४९	पञ्चगव्यस्थापन स्नानयो फलम् ।	६८
५०	तस्यैव ब्रह्मकूर्चसमेतत्वे फलम् ।	६९
५१	तद्विधानकथन प्रतिज्ञा ।	,,
५२	ब्रह्मकूर्चलक्षणं प्रभावश्च ।	७०
५३	कुशोदकस्य द्वैविध्य, तयोराहरण-प्रकारौ कुशोदकाम्मलने मन्त्र, तत्र पञ्चान्तर, कुशोदकप्रमाणं, मन्त्र, तयो गव्येषु नियोजनमन्त्रश्च ।	७१
५४	गव्याना कुशोदकयो संयोजने प्रकारान्तरकथनम् ।	७५
५५	तत्प्राशनस्य काल., फल, निगमनञ्च ।	७६
५६	स्थापनार्थस्य पञ्चगव्यस्य अधिवासाय स्थल, काल, यजनञ्च ।	७७
५७	अधिवासस्य पूर्वाङ्ग, पुण्याह, पञ्चगव्येन सद्रव्यस्थलीप्रोक्षणम् ।	७८
५८	अधिवासपीठस्य प्रदेश, तत्र चक्राब्जविलेखनं, तत्र कुम्भाधिवास, अधिवास्य कुम्भस्य सस्कारा ।	७९
५९	तत्र दीपस्थापन तस्य स्थलादीनि ।	८४
६०	आचार्यस्य भूतशुद्ध्यादि मानसयागान्तविधि ।	८५
६१	तस्यैव ग्राह्ययागविधि., होमद्रव्यैर्होम, पूर्णया तर्पणञ्च ।	८९
६२	पञ्चगव्यस्थापनाय पक्वघटविन्यास, तत्सस्कारश्च ।	९४
६३	अपक्वघटविन्यास तत्संस्कारश्च ।	९७
६४	तदनन्तर दर्भास्तरणादीनि उपरितनानि कृत्यानि ।	१००

श्लोकसङ्ख्या

६५ पञ्चगव्यस्थापनानि, तत्र तत्स्थाप नायश्वश्रखननक्रम, तत्प्रमाण, तत्रस्का ा, शेषकृत्यानि च। १०६
६६ परेत्र वे तस्या ाततक्रम तथा पाठ्यानि सूक्तानि। १११
६७ शान्तिहोप, दक्षिणादानञ्च। १२६
६८ निगमनपूर्वक तत्फलानि। १२७

॥ द्वाविंशाध्याय विषया पर्णा ॥

॥ श्री ॥

॥ त्रयोविंशाध्याय विषया ॥

१ सुदर्शन नृसिंहमहायन्त्रविषयक प्रश्न। १
२ शङ्कराय नारायणेनोक्तत्वम्। २
३ तेनापि कैलासे तस्य प्रतिष्ठा। ४
४ तस्य च तदाराधनेन वरपाप्तत्वम्। ७
५ शङ्करा ुद्धतद्विजाकि पुरुहूतादिभि स्वदिक्पालनम्। ,,
६ राजभि एतदन्वतस्य निरन्तरकलव्यत्व, अन्यथा दोषा, तदाराधकाना अन्येषा द्विजादीना फलञ्च। ८
७ अर्चनीयस्य तस्य प्रतिष्ठाविधान श्रवणनियोग। १२
८ तस्य स्थानानि। ,,
९ तत्प्रासादलक्षणम्। १३
१० तत्र अष्टपीठस्थल, तत्र अष्टदलपद्मस्य लक्षणं, तत्र महायन्त्रस्थापनञ्च। १७
११ यन्त्र फलकामाने विकल्पा। १८
१२ यन्त्र फलकामानानुगुण्येन पद्माना भागकल्पन प्रकार। २०
१३ प्रथमादि पद्माना दलकेसरसंख्याकथनम्। ,,
१४ सम्पुटभूपुरप्रमाणम्। २४
१५ बहिरावरणद्वय प्रमाणे [illegible] कुर्वितव्या। ,,
१६ चक्रादीना स्थाने प्रमाणम्। २६
१७ वराह नृसिंहयोः स्थानप्रमाणम्। ,,
१८ यन्त्रस्य नालानां विस्तारायामाकारादिकम् २८
१९ यन्त्रार्थशिलाद्याहरणम्। ३०
२० यन्त्रफलकाया. दार्वादिमयत्वे तद्धन प्रमाणम्। ३१
२१ तस्या शिलामयत्वे प्रतपमाणे पञ्चकयम। ३२
२२ मुख्यकल्पे उत्तमस्य पद्मस्य उन्नत्वम्। ३३
२३ मुख्यकल्पे मध्यमाधमपद्मप्रमाणकथनपूर्व निगमनम्। ३३
२४ कर्णिकादीना मानानि। ३४
२५ आवृतिद्वयस्य मानकथन तत्र स्थाप्य देवाना समुदितसंख्या च। ३६
२६ केशवादीना स्थानविषय पद्मान्तरकथनम। ३८
२७ कर्णिकाया लेख्यानि।
२८ तत्र लेख्यस्य उग्रस्य सुदर्शनस्य अनुवर्णनम्। ३९
२९ पत्रालीढस्य मानम्। ४३
३० षोडशभुजेषु धार्याणि आयुधानि तेषा क्रमश्च। ४५
३१ शान्तस्य अष्टायुधाना नामानि धारण क्रमश्च। ४९
३२ यन्त्रपालकस्य सुदर्शनस्य अर्धचित्रत्व प्रमाणञ्च। ५०
३३ तत्पादान्तरे शक्ति सम्पुटितसाध्य विलेखनम्। ५१
३४ षट्कोणेषु लेख्यमन्त्र, तल्लेखन प्रकारादि च। ५३
३५ कोणान्तराललेख्यमन्त्रा.। ५४
३६ चतुर्षु दलेषु विलेख्यमन्त्रा., तदन्तराल लेख्यमन्त्राश्च तेषा सबिन्दुकत्व मुख्यनिर्णयश्च। ५६
३७ अष्टदलपद्म केसरदलाना मन्त्रा। ५७
३८ षोडशदलपद्मकेसरदलाना मन्त्रा, षोडशाक्षरमन्त्रोद्धारश्च। ५८
३९ द्वात्रिंशद्दलपद्मस्य मन्त्रौ। ५९
४० [illegible]
४१ [illegible]
४२ भूपुरस्य लक्षणं, तस्य दिग्विदिक्कोणाभ्यन्तर मन्त्रादीना मन्त्रा। ,,

श्लोकसङ्ख्या

४३ केशवादीना विष्णु, हृषिकेश, जनार्दनानाञ्च स्थानानि। ६९
४४ केशवादीना यन्त्रोद्धार साध्यमन्त्रसहित. ६८
४५ तद्बहिर्दिक्षु विलेख्या वर्णा । ७०
४६ कोणेषु विलेख्या । ,,
४७ तद्बहिर्विलेख्यमन्ते विकल्प । ७१
४८ अधस्तादुपरि च विलेख्यदेवते। ,,
४९ केशवादीना आयुधानि, वर्णा, तद्धारणक्रम., आभरणमाला वस्त्रस्वभाव कृत्यानि। ७२
५० विष्णु, हृषिकेश, जनार्दनान. स्थानानि, साधारणाकारा । ८०
५१ विष्णूना सुदर्शनक्रेषु क्रमेण आयुधान। ८३
५२ हृषीकेशाना तत्रायुधानि। ८५
५३ जनार्दनाना आयुधानि। ८६
५४ तेषा स्थित्यासिक्रियो शक्तिमत्वे च विकल्प । ८८
५५ यज्ञवराहस्य स्थानादिकम्। ८९
५६ नृसिंहस्य स्थानादिकम्। ९१
५७ सर्ववेष्टनमन्त्र.। ९५
५८ तद्बहिर्दिक्षु विलेख्यान्यायुधानि। ,,
५९ केशवादीना कल्पने पक्षद्वयम्। ९६
६० यन्त्रकल्पनम्। ९७
६१ कर्णिकावलयस्य स्थानप्रमाणे। ९८
६२ तदन्त. षट्कोणविधिः। ,,
६३ अत्र श्लोका गलिता ,
६४ तद्बहिर्द्वादशदलचक्रम्। ९९
६५ तद्बहिश्चतुर्विंशतिदलचक्रं सलक्षणम्। १००
६६ कर्णिकामध्यस्थषट्कोणे नृसिंह., तल्लक्षणादि च। १०१
६७ तच्चरणाधोलेख्यमन्त्र । १०७
६८ षट्कोणेषु लेख्यमन्त्र.। ,
६९ कोणाभ्यन्तरेषु लेख्यम्। १०८
७० प्रथिगणेषु लेख्यम्। १०९
७१ चक्रबाह्ये प्रागादिषु लेख्याना जयादीना वर्णालङ्कारव्यापारा । ,,
७२ नृसिंहपादमूललेख्ययोः नामालङ्कारादय. ११५
७३ एतादृश सुदर्शन नृसिंहयन्त्रस्य स्थान, विष्टराराधनकालादिकम्। ११८
७४ विष्टरयन्त्रकथन प्रतिज्ञा। ११९
७५ विष्टरस्य दैर्घ्य प्रमाणम्। १२०
७६ तस्यैव विस्तृते. प्रमाणम्। ,
७७ तत्र नालार्थ सुषिरकल्पनम्। १२०
७८ विष्टरोच्छ्राय प्रमाणम। १२३
७९ तदलङ्करणप्रकार । १२४
८० तत्र विष्टरयन्त्र लक्षणकथन प्रतिज्ञा। १२५
८१ मध्ये कर्णिका कल्पनम्। ,,
८२ तद्बहि षोडश कल्पिते भागे एक-स्मिन्नष्टदलचक्र, तद्बहि एकस्मिन् दशारचक्र, [illegible] त्रिभागे वायुमण्डलम् यत्र षट्कोण भागार्धेन भूपुरश्च। १२६
८३ कर्णिकामध्यगत यन्त्रमध्यमनालार्थ सुषिरकल्पनं, तत्रस्थित साध्यनाम लेखनञ्च। १२८
८४ षोडश केसरेषु नृसिंहषोडशाक्षरवि लेखन, षोडशभागोद्धारश्च। १२९
८५ अष्टदलेषु अनुष्टुप्मन्त्र विलेखन क्रम.। १३१
८६ बहि दशारचक्रे विलेख्य सुदर्शन नृसिंह मन्त्रक्रम । १३२
८७ बहि वायव्यमण्डलविलेख्य मन्त्रा., क्रमश्च। १३३
८८ षट्कोणेषु विलेख्यमन्त्र । १३४
८९ कोणान्तर विलेख्यमन्त्र । १३५
९० भूपुरस्य दिग्विदिक्षु लेख्यमन्त्राः। १३६
९१ विष्टरस्य कण्ठदेशे प्रतिदिग विलेख्याना अनन्तादीनामष्टनागाना नाम-व्यापारादिकम्। १३६
९२ प्रकारान्तरे विष्टरयन्त्रे विशेषकथनम्। १३९
९३ यन्त्रविलेखनार्हद्रव्याणि। १४१
९४ सुदर्शन नृसिंहयोः वर्णस्य पूर्वपेक्षोक्तत्वम् १४२
९५ कर्णिकाकेसरपत्रभूपुराणा वर्णा., मूर्तिवर्णानामुक्तत्वञ्च। १४२

श्लोकसङ्ख्या

९६ चक्रस्य नाभिद्वय, अर, तदन्तराल, नेमीना वर्णा । १४४
९७ मन्त्राक्षराणा विलेखने वर्णद्वये विकल्प, स्थानानि, अन्तर्मुखत्वादिकम् । १४५
९८ नारायणास्त्रकूर्चयो वर्णादिकम् । १४९
९९ आयुरारोग्यादि सिद्धये भूर्ज लिखितस्य अस्य शिरसा धार्यत्वम् । १५०
१०० सुदर्शन नृसिंहयन्त्र कथननिगमनम् । १५३
१०१ प्रतिष्ठाप्रकारस्य प्रागुक्तत्वम् । १५४
१०२ एव रीत्या प्रतिष्ठाप्य त्रिकालमर्चनस्य फलकथनम् । १५४

॥ त्रयोविंशाध्यायविषया पूर्णा. ॥

॥ श्री ॥

॥ चतुर्विंशाध्यायविषयाः ॥

१ सनकस्य मन्त्रविषय प्रश्न । १
२ शाण्डिल्यस्य सदाचार्यात् प्राप्तार्थश्रवणाभ्यनुज्ञा । ३
३ वर्णचक्र लेखनस्थललक्षणे । ५
४ वर्णचक्रे वर्णविन्यासक्रम । ६
५ स्वाभिमत मन्त्रोद्धाराय वर्णचक्राराधनक्रम ८
६ भगवत सङ्कल्परूप सुदर्शन चक्र, स्तुति ११
७ सौदर्शन बीजमन्त्रोद्धार. । १४
८ तस्यैव पिण्डमन्त्रोद्धार । १७
९ हृदयाद्यङ्गसिद्धिप्रकारः । ,,
१० सुदर्शनषडक्षरोद्धार । १९
११ तस्यैव अष्टाक्षरोद्धार. । २४
१२ सुदर्शन शब्दनिर्वचन, तत्प्रभावश्च । २६
१३ पुनरपि सविशेषमङ्गमन्त्रोद्धारः । ३१
१४ तेषा ध्यानप्रकार. । ३५
१५ सुदर्शन षडक्षर्याश्चरमवर्णयो मन्त्रविशेषत्वम् । ३६
१६ नारायणाष्टाक्षरोद्धार । ,,
१७ तस्यैव अङ्गोपाङ्गमन्त्रोद्धार । ३७
१८ वासुदेव षोडशाक्षरी । ३८
१९ वराहानुष्टुभमन्त्रोद्धार । ४०
२० तस्यैव अङ्गमन्त्रोद्धार । ४४
२१ तस्यैव शक्तिबीजोद्धार । ४७
२२ नृसिंहानुष्टुभोद्धार । ,,
२३ आनुष्टुभ बीजोद्धार । ५०
२४ तस्यैव शक्तिमन्त्रोद्धार । ५६
२५ तस्यैव पञ्चाङ्गमन्त्रोद्धार. । ,,
२६ पातालनृसिंह मन्त्रोद्धार । ५९
२७ तस्यैव बीजशक्त्युद्धार । ६०
२८ तस्यैव षडङ्गमन्त्रोद्धार । ७०
२९ नरसिंहाष्टाक्षर मन्त्रोद्धार । ७३
३० तस्य बीजशक्त्युद्धार, अङ्गमन्त्रकल्पन प्रकारश्च । ७६
३१ केशवादीना बीजमन्त्रोद्धार । ७७
३२ तेषा मन्त्रोद्धार । ७९
३३ तेषामङ्गमन्त्रोद्धार । ८२
३४ तत्कान्ताना श्र्यादीना बीजाना हृदादीनाञ्चोद्धार । ८२
३५ विष्णूना चतुर्णा मन्त्रोद्धार । ८७
३६ तेषामङ्गोपाङ्गमन्त्रा । ९०
३७ हृषिकेशव्यूहमन्त्रा । ९१
३८ जनार्दनव्यूहमन्त्रोद्धार. । ९२
३९ तदङ्गमन्त्रा । नृसिंहक्रोडमन्त्रस्य प्रागुक्तत्वम् । ९४
४० अन्त स्थादीना प्रसिद्धत्वोक्ति. । ९५
४१ अथापराङ्गमन्त्रश्रवणानुज्ञा । ,,
४२ सुदर्शन नृसिंहाष्टादशाक्षर मन्त्रोद्धारः । ९६
४३ तस्यैव बीजशक्त्युद्धार. । १०१
४४ तस्यैव षडङ्गमन्त्रोद्धार. । ,,
४५ नृसिंहदशाक्षरमन्त्रस्य बीजमन्त्रोद्धार । १०५
४६ नृसिंहद्वादशाक्षर मन्त्रोद्धार. । १०६
४७ (अत्र ग्रन्थपात)
४८ तस्य हृदयादि मन्त्रोद्धार. । ११०
४९ अथाद्यष्टशक्ति मन्त्रोद्धारः । ११२
५० [illegible] मन्त्रोद्धार । [illegible]
५१ अथ विष्टर यन्त्रमन्त्रा । ११६
५२ साध्यमन्त्रोद्धारक्रम । ,,

श्लोकसङ्ख्या

५३ नृसिंहाष्टादशाक्षरानुष्टुभयो पूर्वमे वोक्तत्वम् । ११९
५४ पुनरपि केषाञ्चित्पूर्वोक्तत्वम् । १२०
५५ यन्त्रधारकाणा मन्त्रोद्धार । १२१
५६ नारायणास्त्रमन्त्रोद्धार । १२३
५७ चक्रादि षोडशास्त्र मन्त्रोद्धार । १२५
५८ मन्त्रमाहात्म्य ज्ञानपूर्वक दिग्बन्धादि मन्त्रैरर्चने फलम् । १२७
५९ दिग्बन्ध मन्त्रोद्धार ।
६० वह्नि प्रकार मन्त्रोद्धार । १३१
चक्रगायत्र्युद्धार । १३२
६१ तस्यैव प्रणवलेशिष्टत्वम् । १३४
६२ आवाहन मन्त्रोद्धार । १३६
६३ सम्प्रदान मन्त्रोद्धार । १४२
६४ विसर्जनमन्त्रोद्धार । १४४
६५ शक्तिन्यासमन्त्रोद्धार । १४६
६६ सुदर्शनानुष्टुभ मन्त्रोद्धार । १५०
६७ नृसिंहगायत्र्युद्धार । १५५
६८ एतदादि मन्त्राणा विनियोग निगमनम् । १५९

॥ चतुर्विंशाध्यायविषया पूर्णा ॥

॥ श्री ॥

॥ पञ्चविंशाध्यायविषयाः ॥

१ सनकस्य सुदर्शनाराधन प्रश्न । १
२ आराधनस्य फलकथनपूर्व उत्तरदानप्रतिज्ञा । २
३ आचार्यस्य देहशुद्ध्यादि । ४
४ कवाटोद्घाटनादि । ५
५ प्रासादासनशुद्धि । ७
६ कर्णशुद्धिस्थानशुद्धिविघ्नविरेचनदिग्बन्धनावकुण्ठन प्राणायामा । ८
७ संग्रहेण भूतशुद्धि । ११
८ तस्यैव समन्त्र विवरणञ्च । १३
९ मातृकान्यासप्रकार, करयो [illegible] । १
तत्रैव पृथङ्न्यासे प्रकारद्वयं देहे व्यापकन्यास तत्रैव पृथङ्न्यासप्रकार १८
१० मूलमन्त्रस्य करयोः शरीरे च न्यास । २५
११ तस्यैव अङ्गन्यास । ३३
१२ मूलमन्त्रस्य शरीरे न्यासा, अङ्गाना च । ३४
१३ करयो अस्त्र भूषणन्यास । ३८
१४ अनयो शक्तिन्यास । ३९
१५ अहङ्ग्रहोपासनमात्मनो रक्षणम् । ४०
१६ मानसयागविधि ४२
१७ प्रत्याहारासनयोर्विधि । ,
१८ आसनकल्पनस्य पूर्वोक्तत्वं, तस्य सुदर्शन-नृसिंहयोस्तुल्यत्वादि । ४४
१९ शङ्खशक्तिस्वरूपानुवर्णनम् । ४५
२० पश्यन्तीस्वरूपम् । ५०
२१ वर्णविसर्गे [illegible] प्रकाशातीतस्यानुवर्णन, तस्य भावना भाव्यत्वञ्च । ५८
२२ पूजितस्य सर्वफलप्रदत्वम् । ५७
२३ तस्यैव भक्तानुग्रहाय सुदर्शनरूपेणा वतीर्णत्वम् । ,
२४ सुदर्शन शब्दनिर्वचनम् ५९
२५ नृसिंहशब्दनिर्वचनम् । ६१
२६ अनयोरुपासनस्य फलम् । ६२
२७ आराधनस्य एतद्ज्ञानपूर्वकं कर्तव्यत्वम् । ,,
२८ परस्मात् स्वहृदये आवाहनम् । ६३
२९ सुदर्शनस्य वाच्यवाचकरूपेण द्वैविध्यम् । ६४
३० पुनस्तस्य परसूक्ष्मस्थूलरूपेण त्रैविध्य तद्विवरणञ्च । ६५
३१ पुनस्तस्य मन्त्ररूपस्य परसूक्ष्मादि भेदेन त्रैविध्यम् । ६७
३२ पुनस्तस्य स्वपरापरभेद , अपरस्य त्रैविध्य, तद्विवरणञ्च । ६८
३३ एतादृशज्ञानपूर्वक मानसार्चनक्रमः । ६९
३४ मानसहोम सप्रकार । ७३
३५ अपराह्ण नृसिंहमानसाराधनम् । ८०
३६ यन्त्रत्रयगताना मन्त्राणा मानसार्चा । ८१
३७ बाह्ययागविधि । ८२
३८ पात्रकल्पन देहविन्यस्तमन्त्र द्वारार्चन, गर्भद्वार बाह्यमण्डप द्वारपेवा, [illegible] शक्त्याद्यर्चन गणनाथाद्यर्चन प्रातोष्टतस्य आवाहन, भावनाक्रम, मन्त्राङ्गायुध-

श्लोकसङ्ख्या।

भूषणाना न्यास तेषामालयार्चा, तत्र यन्त्रस्थाना भोगा, आराधन, मन्त्रजप, तन्निवेदनञ्च। ८३

३० अपराङ्गस्थ नृसिंहस्य सपरिवारस्य आराधन, निगमनञ्च। ०६

४० अन्याराधनोपक्षेप। ९७

॥ पञ्चविंशाध्यायविषया पूर्णा ॥

॥ श्री. ॥

॥ षड्विंशाध्यायविषयाः ॥

१ सनकस्य प्रश्न, अग्निपूजाविषय। १

२ शाण्डिल्यस्य उत्तरदानप्रतिज्ञा। २

३ यागशालालक्षणम्। ३

४ तत्र कल्प्य वेदिकालक्षणम्। ४

५ तत्र चक्राब्जकुण्डविधि। ५

६ तस्य लक्षण, तदर्थ सूत्रपातगरयाक्रमश्च, मध्ये वृत्तकल्पनप्रकार, ओष्ठ, कर्णिका केसर, पत्र, तद्बाह्य, नाभि, अर नेमि, मेखलाना प्रमाणादि, नेमिपर्यन्ताना वृत्तत्व, मेखलायाश्चतुरश्रत्वञ्च। ६

७ कुण्डनिर्माण क्रम:। १२

८ कुण्डस्य मानेन बहुविधत्वं, तेषु अन्यतमस्य इच्छया ग्राह्यत्वम्। १८

९ होमद्रव्यविन्यास क्रम। ३०

१० कुण्डसंस्कारादि पूर्णाहुतिपर्यन्ताना विधिः ,,

११ यन्त्रस्थस्य विसर्जनम्। ३४

१२ होमसमर्पण, पितृसन्तर्पणं, बलिदानं, यज्ञशिष्टदानं, अनुयागादि च। ,,

१३ शान्तिकादिषु पूजितस्यास्य सर्वसमीहित पूरकत्वम्। ३७

१४ शान्तिकादिषु मन्त्रविशेषा। ३९

१५ अवाप्तुकाना अहिर्बुध्न्यसंहितानुसारण कर्तव्यत्वम्। ४०

१६ आयतनाङ्गत्वेन स्थापिताना कर्तव्यकार्यादि विभाग। ४४

१७ निगमनञ्च। ४८

१८ उक्तार्थस्य अतिरहस्यत्वादयोग्यजनेभ्य गोपनीयत्वम्। ४०

१९ एतत्प्रकाशन योग्या ५०

॥ षड्विंशाध्यायविषया पूर्णा. ॥

॥ श्रीरस्तु ॥

॥ श्रीः ॥
॥ श्रीमते रामानुजाय नमः ॥
श्रीरङ्गनाथपरब्रह्मणे नम ।

॥ श्रीपारमेश्वर संहिता ॥

प्रथमोऽध्याय ।

ओं ॥ नम. सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥ १ ॥

तोताद्रिशिखरक्षेत्रे देवगन्धर्वसेविते ।
पुण्यतीर्थसमायुक्ते सर्वर्तुकुसुमान्विते ॥ २ ॥

प्रशस्ताश्रमसयुक्ते पुण्यक्षेत्रोपशोभिते ।
वेदवेदान्तनिष्ठैस्तु तपोनिष्ठैर्महर्षिभि. ॥ ३ ॥

साख्यसिद्धान्तसयुक्तैर्योगसिद्धान्तवेदिभिः ।
इतिहासपुराणज्ञैर्धर्मशास्त्रार्थकोविदै ॥ ४ ॥

वेदाङ्गज्ञानकुशलैर्युक्ते देवर्षिभिस्तथा ।
राजर्षिभिः समायुक्ते मन्त्रसिद्धैर्महात्मभि. ॥ ५ ॥

सनको नाम योगर्षिर्ब्रह्मपुत्रो महातपाः ।
भगवज्ज्ञानसिद्ध्यर्थं तपस्तेपे सुदुश्चरम् ॥ ६ ॥

शतवर्षं ध्यायमाने परमात्मानमात्मनि ।
न लेभेऽभि(सं)मतं सोऽपि तप्त्वा घोरतर तपः ॥ ७ ॥

शोकेन महताऽऽविष्टो वभूव स मुनिस्तदा ।
ततः शोकार्णवे मग्नं जितक्रोधं जितेन्द्रियम् ॥ ८ ॥

दान्त योगाङ्गनिरतं तं भक्तं भक्तवत्सलः ।
वाक्यमेतज्जगद्धाता जगाद जगतो हितम् ॥ ९ ॥

वासुदेवः परंज्योतिरदृश्य. पुरुषोत्तमः ।
श्रीभगवानुवाच –
त्वया योगीश्वरेणेह सुतप्तं तप उत्तमम् ॥ १० ॥

प्राप्स्यसे न चिराद्ब्रह्मन् महतस्तपसः फलम् ।
समाश्वसिहि भद्रं ते मा विषीद महामते ! ॥ ११ ॥

कृतकृत्यो जगत्यस्मिन् शाण्डिल्य. श्रूयते महान् ।
तमाश्रयस्व भद्रं ते भगवद्धर्मसिद्धये ॥ १२ ॥

एतस्मिन् पर्वतश्रेष्ठे(वरे) पुराऽनेन महात्मना ।
साक्षाद्भगवतो व्यक्तादच्युतादच्युताभिधात् ॥ १३ ॥

अधीतास्त्रिसुपर्णाद्याः साक्षात्सद्ब्रह्मवाचकाः ।
शाखाश्च निषदः सर्वाः सहिता ब्राह्मणाभिधा. ॥१४॥

निरुक्तानि ततो ज्ञाता. पदार्था. सप्त च क्रमात् ।
ज्ञानं च द्विविधं ज्ञातं शास्त्राणि विविधानि च ॥१५॥

त्रयोदशविधं कर्म द्वादशाध्यात्मसंयुतम् ।
श्रुत्वैव प्रथमं शास्त्रं रहस्याम्नायसंज्ञितम् ॥ १६ ॥

दिव्यमन्त्रक्रमोपेतं मोक्षैकफललक्षणम् ।
भूय. संचोदितात्तस्मात्तेन लोकहितैषिणा ॥ १७ ॥

श्रुत विस्तरतः शास्त्रं भोगमोक्षप्रदं हि यत् ।
अनुष्टुप्छन्दोव(न्धे)द्धेन प्रोक्तं भगवता स्वयम् ॥ १८ ॥

सात्वतं पौष्करं चैव जयाख्येत्येवमादिकम् ।
तत्सर्वं विदितं सम्यक् शाण्डिल्यस्य महात्मनः ॥१९॥

एव सकलशास्त्रज्ञः शाण्डिल्यः परमो गुरुः ।
आस्ते शिष्यैः परिवृतः स्वाश्रमे श्रमनाशने ॥ २० ॥

पाञ्चकाल्यं परं यज्ञं कुर्वाणः सर्वदा वशी ।
स ते वक्ष्यति धर्मज्ञो धर्मं भागवतं मुने ॥ २१ ॥

तमाश्रयस्व भद्रं ते भगवज्ज्ञानसिद्धये ।
इत्युक्त्वाऽस्तमिता वाणी वासुदेवसमीरिता ॥ २२ ॥

इत्यद्भुततमं वाक्यं श्रुत्वा हृष्टतनूरुह.।
तदा कृतार्थमात्मानं मन्यमानो महामुनि. ॥ २३ ॥
शाण्डिल्यदर्शनाकाङ्क्षी संचचाराचलाधिपम्।
अपश्यदाश्रमश्रेष्ठं शाण्डिल्यस्य महात्मन. ॥ २४ ॥
नानापुष्पसमाकीर्णं नानाफलसमन्वितम्।
नानापक्षिगणैर्जुष्टं नानामृगनिषेवितम् ॥ २५ ॥
कमलोत्पलसंकी(पू)र्णैः शोभितं कमलाकरैः।
भगवद्धर्मजिज्ञासापरै. शान्तैरमत्सरै. ॥ २६ ॥
मुनिमुख्यै. समाकीर्णं सर्वत्र च मुमुक्षुभि.।
सप्रविश्य तमद्राक्षीन्मुनिमुख्यैरुपासितम् ॥ २७ ॥
शिष्यै परिवृत शान्तैरात्मनिष्ठं दयापरम्।
दिव्यज्ञानोपपन्नं त दृष्ट्वा दिव्यक्रियापरम् ॥ २८ ॥
उद्वहन्त परा भक्ति वासुदेवे परात्परे।
अभ्यवन्दिष्ट सनको विनयात्तस्य पादयोः ॥ २० ॥
तिष्ठन्त भगवद्धर्मे दृष्ट्वा दिव्येन चक्षुषा।
शाण्डिल्यो मुनिशार्दूल सनक ब्रह्मसंभवम् ॥ ३० ॥
अब्रवीन्मधुर वाक्य कृतार्थोऽसि महामुने।
भगवान् सुप्रसन्नस्ते सुतप्तं तप उत्तमम् ॥ ३१ ॥
आदिष्टोऽहं भगवता भवदर्थे तपोनिधे।
इत्युक्त्वाऽध्यापयामास वेदमेकायनाभिधम् ॥ ३२ ॥
मूलभूतस्तु महतो वेदवृक्षस्य यो महान्।
सद्ब्रह्मवासुदेवाख्य(ख्यं)परतत्त्वैकसश्रयम् ॥ ३३ ॥
दिव्यैर्वलादिकैर्मन्त्रै. साक्षात्तत्प्रतिपादकैः।
अलङ्कृतमसन्दिग्धमविद्यातिमिरापहम् ॥ ३४ ॥
अध्याप्य सजगादास्य स्वरूपं च समागति(त)म्।
शाण्डिल्य –
एष कार्तयुगो धर्मो निराशी.कर्मसंज्ञितः ॥ ३५ ॥
योगाख्यो योगधर्माख्यः शास्त्राख्यश्च समागम.।
प्रवर्त्यते भगवता प्रथमे प्रथमे युगे ॥ ३६ ॥
युगेषु मन्दसञ्चार इतरेष्वितरेष्वपि।
अनन्तचेष्टादध्यक्षादनिरुद्धात् सनातनात् ॥ ३७ ॥
ब्रह्मणो मानसं जन्म प्रथमं चाक्षुषं स्मृतम्।
द्वितीयं वाचिकं चान्यच्चतुर्थं श्रोत्रसंभवम् ॥ ३८ ॥
नासिक्यमपर चान्यदण्डजं पद्मज तथा।
एतेष्वपि च सर्वेषु साक्षाद्भगवतो विभोः ॥ ३९ ॥
ब्रह्मणा मुनिमुख्यैश्च सुपर्णाद्यैर्महर्षिभि.।
वालखिल्यमुखैश्चान्यैः क्रमाद्राजर्षिभिस्तथा ॥ ४० ॥
एष प्रकृतिधर्माख्यः प्राधीत. प्रथमो द्विज।
सप्तमे पद्मजे सर्गे प्राप्तो भगवतस्तथा ॥ ४१ ॥
विवस्वता ततः प्राप्तो मनुनेक्ष्वाकुणा ततः।
इक्ष्वाकुणा च कथितो व्याप्य लोकानवस्थित. ॥ ४२॥
एष एव महान् धर्म आद्यो विप्र! सनातनः।
दुर्विज्ञेयो दुष्करश्च सात्वतैर्धार्यते सदा ॥ ४३ ॥
चातुरात्म्यपरैर्नित्यं पञ्चकालपरायणै.।
वलादिमन्त्रनिरतैर्देवतान्तरवर्जितै ॥ ४४ ॥
एष धर्मो यथा प्राप्तो मया तद्(निग)दतः शृणु।
साङ्गोपनिषदा वेदा. समधीता मया पुरा ॥ ४५ ॥
ऋग्यजुःसामसञ्ज्ञास्तु संकीर्णा देवतान्तरै·।
व्यामिश्रयागसंयुक्ताः प्रवृत्तिफलदायिनः ॥ ४६ ॥
तदर्थाश्च परिज्ञाता यथान्यायं यथाविधि।
क्वचित् क्वचित् प्रदेशेषु भगवन्तं जगत्पतिम् ॥४७॥
तदीयं कर्म च ज्ञानमप्रणाड्या वदन्ति हि।
तथा तदतिसक्षिप्तमनभिव्यक्तलक्षणम् ॥ ४८ ॥
अग्नीन्द्रादिप्रणाड्यैव प्रदेशेषु वहुष्वपि।
प्रवदन्ति जगन्नाथ तथा च सकलाः क्रियाः ॥ ४९ ॥
नित्यादिका मुनिश्रेष्ठ! प्रवृत्तिफलसयुता.।
देवतान्तरनाड्यैव प्रब्रुवन्ति सुविस्तरात् ॥ ५० ॥
तथा क्वचित् क्वचिद्विप्र प्रवदन्ति च केवलम्।

इन्द्रादिदेवतावर्जं तत्कर्माऽपि सुविस्तरम् ॥ ५१ ॥
मन्त्राः प्राचुर्यतस्तत्र फलसङ्गसमन्विताः।
एव व्यामिश्ररूपत्वात्तेषु निष्ठां न लब्धवान् ॥ ५२ ॥
यस्तु सर्वपरो धर्मो यस्मान्नास्ति महत्तर.।
वासुदेवैकनिष्ठस्तु देवतान्तरवर्जितः ॥ ५३ ॥
तज्जिज्ञासा बलवती तदा त्वाविरभून्मम।
ततोऽत्र पर्वतश्रेष्ठे तपस्तप्तं मयोत्तमम् ॥ ५४ ॥
अनेकानि सहस्राणि वर्षाणा तपसोऽन्तत ।
द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ॥ ५५ ॥
साक्षात्सङ्कर्षणाद्व्यक्तात् प्राप्त एप महत्तरः।
एष एकायनो वेदः प्रख्यात. सात्वतो विधि. ॥ ५६ ॥
दुर्विज्ञेयो दुष्करश्च प्रतिबुद्धैर्निषेव्यते।
मोक्षायनाय वै पन्था एतदन्यो न विद्यते ॥ ५७ ॥
तस्मादेकायन नाम प्रवदन्ति मनीषिणः।
श्वेतद्वीपे पुराऽधीतो नारदेन सुरर्षिणा ॥ ५८ ॥
सन. सनत्सुजातश्च भवानपि सनन्द(क)न.।
सनत्कुमार. कपिल. सप्तमश्च सनातन. ॥ ५९ ॥
एते एकान्तिधर्मस्य आचार्याश्च प्रवर्तका.।
मरीचिरत्र्यङ्गिरसौ पुलस्त्य. पुलहः क्रतु ॥ ६० ॥
वसिष्ठश्च महातेजा एते चित्रशिखण्डिनः।
मनुः स्वायम्भुवश्चापि समाराध्य जगत्पतिम् ॥ ६१ ॥
महता तपसा चैव देवं नारायण प्रभुम्।
दिव्यं वर्षसहस्रं तु तदन्ते समधीत्य च ॥ ६२ ॥
मूलश्रुति यथावच्च ऋषयोऽध्यापितास्तु तै.।
ततस्ते ऋषयस्त्वष्टौ लोकाना हितकाम्यया ॥ ६३ ॥
श्लोकानां शतसाहस्रैर्मूलवेद निरीक्ष्य च।
तथा दिव्यानि तन्त्राणि सात्वतादीनि चक्रिरे ॥६४॥
अन्यच्छास्त्र तु तन्त्राख्यमस्मान्मन्वादयोऽपि च।
धर्मशास्त्राण्यनेकानि करिष्यन्ति यथातथम् ॥ ६५ ॥
अन्येषामपि शास्त्राणा योनिरेतद्भविष्यति।
अस्मिन् धर्मश्च कामश्च अर्थश्चोक्त सुविस्तरम् ॥ ६६ ॥
मोक्षश्च सूचित. पश्चादुक्तश्च यथातथम्।
अश्वमेधादयो यज्ञा अधिकृत्याच्युतं हरिम् ॥ ६७ ॥
यथा क्रियन्ते च तथा द्विषट्कार्णपुरस्सरै.।
निवृत्तिफलदैर्मन्त्रैस्तस्यासाधारणैर्हरे. ॥ ६८ ॥
पूजिता विनियुज्यन्ते तस्मिंस्तस्मिंश्च कर्मणि।
ऋगादिमन्त्रा सर्वेऽपि तथा चास्मिन् प्रकीर्तिता. ॥
वसूराजोपरिचरो मूलवेदेन सरकृत.।
स्वर्गलोकाधिकारार्थमेतदुक्तप्रकारत ॥ ७० ॥
अश्वमेधादिकान् यज्ञानन्वशिष्टद्यथाविधि।
अन्याश्च भगवद्यागान् स्विन्नवृत्त्यधिकारत. ॥ ७१ ॥
इति श्रुत मया पूर्व स चार्थ प्रतिभाति मे।
सुमन्तुर्जैमिनिर्ब्रह्मन् भृगुश्चैवौपगायन ॥ ७२ ॥
मौञ्ज्यायनश्च तत्सर्व सम्यगध्यापिता मया।
नरनारायणाभ्या तु जगतो हितकाम्यया ॥ ७३ ॥
तथाऽनुष्ठीयते मूलधर्मो बदरिकाश्रमे।
एप प्रकृतिधर्माख्यो वासुदेवैकगोचरः ॥ ७४ ॥
प्रवर्तते कृतयुगे ततस्त्रेतायुगादिषु।
विकारवेदाः सर्वत्र देवतान्तरगोचरा. ॥ ७५ ॥
महतो वेदवृक्षस्य मूलभूतो महानयम्।
स्कन्धभूता ऋगाद्यास्ते शाखाभूतास्तथा मुने ॥ ७६ ॥
जगन्मूलस्य देवस्य वासुदेवस्य मुख्यत.।
प्रतिपादकतासिद्धा मूलवेदाख्यता द्विज! ॥ ७७ ॥
आद्य भागवतं धर्ममादिभूते कृते युगे।
मानवा योग्यभूतास्तु अनुतिष्ठन्ति नित्यश. ॥ ७८ ॥
ततस्त्रेतायुगे सर्वे नानाकामसमन्विताः।
व्यामिश्रयाजिनो भूत्वा त्यजन्त्याद्यं सनातनम् ॥७९॥
अन्तर्दधाति (धर्मो)सर्वोऽस्य वासुदेवसमाहृतः।
ततो योग्याय भगवान् प्रादुर्भावयति स्वयम् ॥ ८० ।
यथा पुरा मया प्राप्तो देवाद् ज्ञानबलात्मन.।

तथा प्रकाशितो वेद. सरहस्यो महामुने ॥ ८१ ॥
एवं निगदिते सम्यक् शाण्डिल्येन महात्मना ।
ततः कृतार्थमात्मान मन्यमान. कृताञ्जलि. ॥ ८२ ॥
सनकः प्रश्रितं वाक्यं शाण्डिल्य मुनिमब्रवीत् ।
सनक –
भगवन्! सर्वधर्मज्ञ! सर्वशास्त्रार्थपारग! ॥ ८३ ॥
त्वत्प्रसादेन सम्प्राप्तो मया धर्मवरो महान् ।
निवृत्तिलक्षणाख्योऽय प्रतिबुद्धैर्निषेवित. ॥ ८४ ॥
कथमप्रतिबुद्धैस्तैर्मग्नैर्भवमहाम्बुधौ ।
प्राप्यते भगवद्धर्म एकान्तिभिरनुष्ठित. ॥ ८५ ॥
शाण्डिल्य –
श्रूयतामभिधास्यामि यदह चोदितस्त्वया ।
एतदर्थ मया पृष्ट. पुरा सङ्कर्षण. प्रभु. ॥ ८६ ॥
परित्यज्य परं धर्म मिश्रधर्ममुपेयुषाम्।
भूयस्तत्पदकाङ्क्षाणा श्रद्धाभक्ती उपेयुषाम् ॥ ८७ ॥
अनुग्रहार्थ वर्णानां योग्यतापाद(का)नाय च ।
तथा जनानां सर्वेषामभीष्टफलसिद्धये ॥ ८८ ॥
सात्वतादीति शास्त्राणि भोगमोक्षप्रदानि च ।
उपदिश्य तु दिव्यानि शास्त्राणि तदनन्तरम् ॥ ८९ ॥
पारमेश्वरशास्त्राणा सर्वेषा मुनिपुङ्गव! ।
सारभूतं विशेषेण पौष्करार्थोपपादकम् ॥ ९० ॥
मूलवेदानुसारेण छन्दसाऽऽनुष्टुभेन च ।
लक्षग्रन्थेन सर्वार्थक्रियाज्ञानोपलब्धये ॥ ९१ ॥
स मेऽब्रवीन्म(हच्छा)हाशास्त्रं पारमेश्वरसंज्ञया ।
तस्मात्तु सारमुद्धृत्य सर्वशास्त्रोपयोगिनम् ॥ ९२ ॥
श्लोकै. षोडशसाहस्रै. पारमेश्वरसंज्ञया ।
संप्रवक्ष्यामि ते शास्त्रमिदानीमवधारय ॥ ९३ ॥
नारदोऽपि पुरा चैतदपि संक्षेपतो विभोः ।
क्षीरोदशायिनो देवात् साक्षात् संश्रुतवान् द्विज! ॥
ज्ञानकाण्डक्रियाकाण्डभेदेनै(तद्)व द्विधाकृतम् ।
यत्र संकीर्त्यते सम्यग्वासुदेवस्य वै विभोः ॥ ९५ ॥
दिव्यमात्मस्वरूपं च नित्या ज्ञानादयो गुणाः ।
प्रधाना. षट् समस्ताश्च व्यस्ता युग्मत्रयेण हि ॥ ९६ ॥
कीर्त्यादयो गुणाश्चान्ये आकृतिश्च परात्परा ।
नित्यैका वासुदेवाख्या ततः सृष्ट्यादिहेतुना ॥ ९७ ॥
संकर्षणादिव्यूहश्च जगज्जन्मादयोऽपि च ।
उपासनार्थं भक्तानामास्तिकानां महात्मनाम् ॥ ९८ ॥
जगतामुपकारार्थं वासुदेवस्य वै विभो. ।
परात्परस्वरूपस्य चतुर्व्यूहस्तुरीयकः ॥ ९९ ॥
व्यूह. सुषुप्तिसंज्ञश्च स्वप्नव्यूहस्तथैव च ।
जाग्रद्व्यूहस्तथाऽन्ये च व्यूहा मूर्त्यन्तरा अपि ॥१००॥
मूर्तयो विभवाख्याश्च प्रादुर्भावान्तराण्यपि ।
लक्ष्मीपुष्ट्यो. स्वरूपे च नित्ये भगवता सह ॥ १०१ ॥
कान्त्यादयोऽवताराश्च भूषणाना तु विग्रहा. ।
नित्याः किरीटपूर्वाणामनित्याश्च पृथग्विधाः ॥१०२॥
चक्रादीना स्वरूपं च नित्यानित्योभयात्मकम् ।
गरुडप्रमुखाना तु अन्येषामात्मनामपि ॥ १०३ ॥
विभोः साधनभूताना स्व स्वं नित्य स्वरूपिणाम् ।
एतेषा मूर्तयो नित्या अनित्याश्च पृथग्विधाः ॥ १०४॥
विभोर्वै वासुदेवस्य स्थानं नित्य(त्यात्) परात्परम् ।
अन्येषा व्यूहरूपाणा विभवाना तथैव च ॥ १०५ ॥
नानाविधानि स्थानानि विरजासि बहूनि च ।
तेषा विस्तारमान च तथा स्वं स्व व्यवस्थितम् ॥
तत्सालाना प्रतोलीना सख्यामानं च लक्षणम् ।
जीवात्मना स्वरूप च मुक्तामुक्तोभयात्मकम् ॥ १०७ ॥
तेषां गतिविशेषाश्च प्रोच्यन्ते यत्र विस्तरात् ।
भगवन्मन्त्रमूर्तीना तथाऽन्येषां क्रमेण तु ॥ १०८ ॥
म(न्त्रा)न्त्रध्यानं तथा मुद्रा योगरूपं च कीर्तितम् ।
ज्ञानकाण्डाभिधानेन तदेतत् परिकीर्तितम् ॥ १०९ ॥
यत नित्यानि कर्माणि स्नानादीन्यखिलानि च ।

नैमित्तिकानि काम्यानि प्रायश्चित्तानि विस्तरात् ॥
तुलाभारादिकादीनि कर्माणि विविधान्यपि ।
तथा च कर्षणादीनि स्थापनान्तान्यशेषत. ॥ १११ ॥

प्रासादप्रतिमाभद्रपीठादीनां च लक्षणम् ।
एवमादीनि चान्यानि देवेशयजनार्थतः ॥ ११२ ॥
कीर्त्यन्ते विस्तराद्यत्र क्रियाकाण्ड तु विद्धि तत् ।
एव द्विविधरूप तु शास्त्र वक्ष्येऽवधारय ॥ ११३ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहिताया ज्ञानकाण्डे शास्त्रावतारो नाम प्रथमोऽध्याय ॥

क्रियाकाण्डे द्वितीयोऽध्यायः ॥

शाण्डिल्य –

अथाधिकारसिद्ध्यर्थं स्नान वक्ष्यामि पूर्वतः ।
येन भक्तोऽभिषिक्तस्तु स्यादर्हो यागहोमयो. ॥ १ ॥
स्नान तु द्विविध कुर्यान्मलसंकरशुद्धये ।
सामान्यविधिना स्नात्वा विशेषविधिना ततः ॥ २ ॥
सामान्यं लौकिकं स्नान विशिष्ट मन्त्रसंस्कृतम् ।
तच्चापि शौचपूर्व स्यात्तदादौ कथयामि ते ॥ ३ ॥
ब्राह्मं मुहूर्तमासाद्य उदयात्पूर्वमेव च ।
मन्त्रज्ञः प्रयत. कुर्याद्विधिदृष्टेन कर्मणा ॥ ४ ॥
संप्रबुद्ध. प्रभाते तु उत्थाय शयने स्थित. ।
नाम्ना संकीर्तनं कुर्यात् षोडशाना प्रयत्नतः ॥ ५ ॥
ओं नमो वासुदेवाय, नमः संकर्षणाय ते (च) ।
प्रद्युम्नाय नमस्तेऽस्तु, अनिरुद्धाय ते नमः ॥ ६ ॥
क्रमशः केशवादीना यावद्दामोदरं द्विज ।
नमो नमः केशवाय, नमो नारायणाय च ॥ ७ ॥
माधवाय नमश्चैव गोविन्दाय नमस्तत. ।
विष्णवेऽथ नमस्कुर्यान्नमस्ते मधुसूदन ॥ ८ ॥
नमस्त्रिविक्रमायाथ, वामनाय नमस्ततः ।
श्रीधराय नमश्चाथ(श्चैव) हृषीकेशाय ओ नमः ॥ ९ ॥
नमस्ते पद्मनाभाय, नमो दामोदराय च ।
दिव्यानामवताराणां दशानामथ कीर्तनम् ॥ १० ॥
एकशृङ्गादिकाना तु विहितं क्रमशः प्रभोः ।
नमस्ते मीनरूपाय, कमठाय नमो नम. ॥ ११ ॥
नमोऽस्त्वादिवराहाय, नारसिंहाय ते नमः ।
नमो वामनरूपाय, नमो रामत्रयाय च ॥ १२ ॥
कुठारज्याहलास्त्राय, नमः कृष्णाय वेधसे ।
कल्कि(न्)विष्णो नमस्तेऽस्तु पूर्व सप्रणवं द्विज ! ॥१३॥
यथास्थितक्रमेणैव भेदास्त्वेतान् हरेर्विभो. ।
नमस्कुर्यात् प्रभाते तु यागान्ते तु दिनक्षये ॥ १४ ॥
शब्देनोच्चतरेणैव संहृ(तु)ष्टिजननेन तु ।
स्तोत्राणि चाथ मन्त्राणि उदीर्यान्यानि वै ततः ॥१५॥
इत्येवमादिभि. स्तोत्रैरभिष्टूय श्रिय. पतिम् ।
इदं विज्ञापयामास हरये वरदायिने ॥ १६ ॥
हरिर्हरि ब्रुवंस्तल्पादुत्थाय भुवि विन्यसेत् ।
नम. क्षितिधरायोक्त्वा वामपादं महामते ॥ १७ ॥
वहिर्निर्गमनार्थं तु सञ्चाल्यादौ तमेव हि ।
जलसंपूर्णपात्र च अस्त्रमन्त्रोद्धृतं मुने ! ॥ १८ ॥
देवाग्निगिरिगोष्ठेषु नद्यां वा न श्मशानके ।
वल्मीके मूषिकास्थाने वृक्षमूले सुरालये ॥ १९ ॥
जलान्तरे च मार्गे च न गृह्णीयात् कदाचन ।

देशे मनोरमे ग्राह्या विहाय चतुरङ्गुलम् ॥ २० ॥
प्राण्यङ्गतुषभस्मास्थिकाष्ठलोष्टविवर्जितम् ।
परशौचावशिष्ट यच्छ्रेयःकामै. सदा नरै. ॥ २१ ॥
अनङ्गारामनूषारां तथा कृष्णामवालुकाम् ।
शस्त्रादिनाऽस्त्रजप्तेन निखनेच्छुभदेशगाम् ॥ २२ ॥
मृदं दोषविनिर्मुक्तां ततस्तेनैव चाहरेत् ।
स्नानोपकरणं चान्यच्छमीशाखाः सपल्लवाः ॥ २३ ॥
अर्कन्यग्रोधखदिरकरञ्जककुभादिकम् ।
शरजोदुम्बराश्वत्थप्लक्षदर्भाश्च वैणवान् ॥ २४ ॥
आम्राङ्कुरमपामार्गमर्जुनं धातकीं शमीम् ।
अन्यानि च पवित्राणि तेषु संपन्नमाहरेत् ॥ २५ ॥
यथावसरमेतद्वै नृपवत् संप्रयोज्य च ।
कूपस्नानं न कुर्वीत तटाकादिषु सत्सु च ॥ २६ ॥
तेषु नाल्पोदके स्नायात्तीर्थेषु बहुवारिषु ।
एतेष्वपि तु न स्नायात् सत्या सरिति साधक. ॥२७॥
सरित्स्वपि च सर्वासु विशिष्टाः स्यु. समुद्रगाः ।
तासामपि विशिष्टाः स्युः सर्वा. प्राक्स्रोतसः सदा ॥
नदीनामपि सर्वासां दक्षिणं तीरमुत्तमम् ।
प्राक्स्रोतस. स्रवन्त्यस्तु यत्र चोदङ्मुखस्थिताः ॥
प्राक्तीरं तत्र तीर्थं स्यात् सर्वपापप्रणाशनम् ।
कूपाद्दशगुणा वापी वाप्या दशगुणा नदी ॥ ३० ॥
नद्यां स्नानफलं स्नातुस्तथा तस्याः समुद्रगाः ।
तथा दशगुणं तस्या. प्राक्स्रोताः कुरुते फलम् ॥३१॥
प्राक्स्रोतसोदङ्मुखायाः प्राक्तीरेऽनन्तकं फलम् ।
पूर्वं तु क्षालिते तीरे संप्रोक्ष्य स्थापयेत् पृथक ॥३२॥
जलसंपूर्णपात्रं च अस्त्रमन्त्रोद्धृतं मुने ! ।
शौचार्थं मृदमाहृत्य जलकूले निधाय वै ॥ ३३ ॥
मनोरमे शुचौ देशे तृणान्निक्षिप्य भूतले ।
दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥ ३४ ॥
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुख. ।

न कुर्याद्भुवि विण्मूत्रे सभवद्दीर्घजन्तुषु ॥ ३५ ॥
न चाप्सु न गिरौ चापि चत्वरेषु चतुष्पथे ।
न राजमार्गे नो वीथ्या न देवायतने क्वचित् ॥ ३६ ॥
न श्मशाने न चैत्ये च न भस्मनि न गोव्रजे ।
न ग्राममध्ये विप्रेन्द्र ! कुर्वीताप्यन्यथाविधि ॥ ३७ ॥
आत्मच्छाया तरुच्छायां न मेहेत कदाचन ।
अवकुण्ठ्योत्तमाङ्ग तु न पश्येद्दिग्गणं मलम् ॥ ३८ ॥
तथा ज्योतींष्यपश्यंश्च देवतायतनानि च ।
पुरीषं गुदसंयुक्तं काष्ठपर्णतृणादिभिः ॥ ३९ ॥
वामहस्तेन सम्मार्ज्य तेन हस्ततलेन तु ।
गृहीतशिश्नश्चोत्थाय जलकूलं समाश्रयेत् ॥ ४० ॥
ऊरुद्वयान्तरस्थेन गुदं मृद्दायिनाऽपि च ।
दाक्षिण्यजानोर्बाह्यं च दीयमानजलेन च ॥ ४१ ॥
वामेन दक्षिणेनैव पाणिना कुक्कुटासनी ।
अस्पृष्टतीर्थः शौचार्थं मृद्भिरभ्युद्धतैर्जलै. ॥ ४२ ॥
गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ।
तिस्रो लिङ्गे मृदो देया एकैकान्तरमृत्तिकाः ॥ ४३ ॥
पञ्च वामकरे देयास्तिस्रः पाण्योर्विशुद्धये ।
मूत्रोत्सर्गे शुद्धिरेषा पुरीषस्याप्यनन्तरम् ॥ ४४ ॥
अर्धप्रसृतिमात्रं तु प्रथमा मृत्तिका स्मृता ।
द्वितीया च तृतीया च तदर्धा परिकीर्तिता ॥ ४५ ॥
बिडालपदमात्रं तु तदूर्ध्वा परिकीर्तिता ।
पञ्चापाने मृत्तिकाः स्युस्तथैवान्तरमृत्तिकाः ॥ ४६ ॥
दश वामकरे देयाः सप्त तूभयहस्तयोः ।
पादाभ्यां तिसृभिः शुद्धिर्जङ्घाशुद्धिश्च पञ्चभि. ॥४७॥
नियोजयेत्ततो विप्र ! कट्यां वै सप्त मृत्तिकाः ।
स्वदेहस्वेददोषघ्ना बाह्यकर्दमशान्तये ॥ ४८ ॥
भक्तानां श्रोत्रियाणां च वर्षास्वेवं निरूपितम् ।
प्रावृ(ट्स्)डुक्तात्तु वै तस्मादेकमृद्द्वयपनोदनम् ॥ ४९ ॥
शरद्ग्रीष्मवसन्तेषु नित्यं कार्यं क्रियापरैः ।

एतस्मादपि चैकैका परिलोप्या तु मृत्तिका ॥ ५० ॥
हेमन्ते शिशिरे विप्र ! श्रोत्रियैः संयमस्थितैः ।
पथि शौचं प्रकर्तव्यं देशकालानुरूपतः ॥ ५१ ॥
गन्धलेपमपास्यैवं मनःशुद्ध्या विशुध्यति ।
विहिताः पादशौचे तु विडालपदसंमिताः ॥ ५२ ॥
मृदश्चतुर्द्विजेन्द्राणां त्रिर्द्विरेका क्रमात्ततः ।
वर्णानां शूद्रनिष्ठानां कटिशौचे तथैव हि ॥ ५३ ॥
सप्त सप्त च ऊरुभ्यां कराभ्यां त्रितय पुनः ।
सर्वेषामेव सामान्य पाणिशौचमुदाहृतम् ॥ ५४ ॥
अन्तर्जानुगतं कृत्वा भुजयुग्म द्विजोत्तम ! ।
चतुर्धा मणिबन्धस्थं तोयं कृत्वा सुनिर्मलम् ॥ ५५ ॥
बुद्बुदाद्यैर्विनिर्मुक्त पिबेद्विप्रो हृदा तत. ।
एकैका ह्रासयेन्मात्रा वर्णत्रयमनुक्रमात् ॥ ५६ ॥
पाणिना क्षालितेनैव पुनराचामयेद्बुध. ।
एवं प्रक्षाल्य विधिवदाचम्य प्रयत. शुचि. ॥ ५७ ॥
प्राङ्मुखोदङ्मुखो वाऽपि उपविश्यासन(ने) ततः ।
अर्कादिभिरपामार्गै. कारयेद्दन्तधावनम् ॥ ५८ ॥
प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम् ।
भक्षयेद्दन्तधवन दन्तमासान्यबाधयन् ॥ ५९ ॥
द्वादशाङ्गुलमात्रं तु वक्रग्रन्थिविवर्जितम् ।
पयोभिः सह तर्जन्या ब्रह्म(न्)द्वादशसंख्यया ॥ ६० ॥
काष्ठालाभे तु रोगे वा कर्तव्यं दन्तधावनम् ।
षोडशाङ्गुलदीर्घैस्तु वक्रग्रन्थिविवर्जितै. ॥ ६१ ॥
हेमादिनिर्मितैर्वाऽपि कुशदर्भादिभिस्तथा ।
जिह्वानिर्लेहनं चैव गण्डूषं मुखधावनम् ॥ ६२ ॥
कुर्यादाचमनं विप्र ! शुद्धेन सलिलेन च ।
विना विविधसंपर्कै. पश्चाद्भस्नानमाचरेत् ॥ ६३ ॥
मुखं करद्वयोपेतं पादौ कटितलावधि ।
स्त्रीसङ्गाद्युपघातेषु स्नानं कुर्याद्यथाविधि ॥ ६४ ॥
अधोत्तमाङ्गात् पादान्त शिरसाऽभ्यञ्जयेद्द्विज ।
अङ्गान्युद्वर्त्य चास्त्रेण चरणान्तान्यनुक्रमात् ॥ ६५ ॥
गोमयेन मृदा विप्र ! निर्मलीकृत्य विग्रहम् ।
नरामरप्रयुक्तां प्राक् स्नानार्थं चाहरेत् खलीम् ॥ ६६ ॥
माषचूर्णादिना देहं निर्हृत्य कवचं स्मरन् ।
शुद्ध्यर्थं प्रथम स्नात्वा मन्त्रस्नानं समाचरेत् ॥ ६७ ॥
स्नायाद्राजोपचारेण दिव्यैर्गन्धैः पुराऽऽहृतैः ।
हृन्मन्त्रेण च विप्रेन्द्र ! वामहस्तनले ततः ॥ ६८ ॥
मृदाऽऽमलकमानेन क्रमशोऽभिनिधाय च ।
प्रान्तपर्वावधौ मध्ये मणिबन्धसमीपत· ॥ ६९ ॥
अस्त्रमन्त्रेण मूलेन क्रमात् पश्चाङ्गमन्त्रितम् ।
कृत्वा नियोज्य दिक्ष्वप्सु सर्वाङ्गालेपनं क्रमात् ॥ ७०॥
अध ऊर्ध्वं च तन्मन्त्रं मुद्रावन्धेन संयुतम् ।
तेन स्नानहरा विघ्ना दिग्विदिक्परिसंस्थिता. ॥७१॥
प्रयान्ति विह्वलीभूता यावत्तन्नोपसंहृतम् ।
मृद्भागो मूलमन्त्रेण मन्त्रितो य. पुरा स्थितः ॥ ७२ ॥
तमुच्चरन् समादाय तोयमध्ये विनिक्षिपेत् ।
तेन तद्द्विजशार्दूल ! तत्क्षणादेव जायते ॥ ७३ ॥
गङ्गातोयेन संपूर्ण यामुनेन शुभेन च ।
प्रयागं चक्रतीर्थं च प्रभासं पुष्कराणि च ॥ ७४ ॥
भवन्ति सन्निधीभूता मन्त्रस्यास्य प्रभावत. ।
ततो वै विष्णुतीर्थाय मन्त्रान्ते पदमुच्चरेत् (रन्) ॥
सनमस्कं भवेत्तेन विष्णुतीर्थस्य सन्निधौ ।
अन्यतीर्थे यदा स्नान कुर्यात्तत्र च योजयेत् ॥ ७६ ॥
केवलं मूलमन्त्रं तु विष्णुतीर्थपदं विना ।
तीर्थान्तरेष्विदं नाम न संकीर्तयते सुधीः ॥ ७७ ॥
नित्यसन्निधितीर्थस्य यद्यन्यस्याभिधा स्मरेत् ।
स्नातस्य तत्र तीर्थ तदभिशाप क्षणं(णात्) सृजेत् ॥
निर्झराम्बुतटाकादौ सामान्यस्नानकर्मणि ।
गङ्गादीना नदीना च तीर्थानां च प्रकीर्तनम् ॥ ७९ ॥
मन्त्रस्नानं(न) क्रमैः सम्यग्विष्णुतीर्थाय कीर्तयेत् ।

ततोऽङ्गमन्त्रजप्तं च भागं पाणितले स्थितम् ॥ ८० ॥
तोयेनालोड्य मसृणं तापयेदर्करश्मिभिः ।
मेघच्छन्ने स्वकं मन्त्रं सूर्यवत् स्वस्थितं स्मरेत् ॥ ८१ ॥
दर्शयित्वा करौ तस्य ताभ्यां सर्वाऽङ्गकं स्पृशेत् ।
अपास्य प्रोच्चरन् वर्म मृल्लेपं वारिणाऽङ्गगम् ॥ ८२ ॥
दर्भपुञ्जीलमादाय दक्षिणेन करेण तु ।
जले त्वावर्त्य तन्मन्त्रं सकृद्वा बहुशो द्विधा ॥ ८३ ॥
तत. कुम्भाभिषेकं वा पाणिकुम्भोदराम्बुना ।
स(सं)हिता(कृदा)वर्तितेनैव अभिषेक तु मूर्धनि ॥
श्रोत्रदृग्वदनं नासा स्वकराङ्गुलिभिः क्रमात् ।
स्थगयित्वा निमज्याथ साङ्ग मन्त्रमथोच्चरन् ॥ ८५ ॥
सकृद्वा बहुश. शक्त्या ध्यायेज्ज्योतिर्मय हरिम् ।
देवं हृत्पुष्करान्तस्थं नेत्रयोरथ चान्तरे ॥ ८६ ॥
सर्वपापनिरासार्थं कृत्वैवमघमर्षणम् ।
प्राणायामैस्त्रिभिर्द्वाभ्यामेकेन नियतेन वा ॥ ८७ ॥
समुत्थायाचरेत् पश्चात् सन्निरीक्ष्यार्कमण्डलम् ।
मन्त्रमूर्तिमहातेजा. समुत्तीर्य जलान्तरात् ॥ ८८ ॥
स्नानवस्त्रं परित्यज्य परिधायाम्बरान्तरम् ।
शिखयाऽथ शिखाबन्धं कृत्वाऽऽचम्य यथाविधि ॥
अङ्गुष्ठमूलं ब्राह्मं तु अङ्गुल्यग्र तु दैविकम् ।
पैतृकं हस्तमध्यं तु तीर्थं दक्षिणहस्तजम् ॥ ९० ॥
ब्राह्मेण तु पिबेत्तोयं पैतृकेन तु मार्जयेत् ।
दैविकेन स्पृशेदङ्गान् येषा तृप्ति यदीच्छति ॥ ९१ ॥
त्रिधा चतुर्धा वा विप्र ! द्विरामृज्य मुखं पुन. ।
वामहस्ततल प्रोक्ष्य पादयोश्च तले शुभे ॥ ९२ ॥
तलेन हृदयं स्पृष्ट्वा मुखमङ्गुलिभिस्तथा ।
अङ्गुष्ठानामिका कृत्वा नेत्रे स्पृष्ट्वा च वारिणा ॥
तेनैव तर्जनीं कृत्वा तथा द्वे नासिकापुटे ।
कनिष्ठिका तथा कृत्वा तेनैव श्रवणं स्पृशेत् ॥ ९४ ॥
तथैव मध्यमा कृत्वा बाहुदेशावुभौ स्पृशेत् ।
तेनैव नाभिदेशं च सर्वैर्युक्तैः शिरः स्पृशेत् ॥ ९५ ॥
एतदाचमनं प्रोक्तं सर्वकर्मसु सर्वदा ।
सजलं दक्षिणं हस्तं कृत्वा घ्राणाग्रगं मुने ! ॥ ९६ ॥
स्मरन् हृन्मन्त्रमाद्याय सन्धार्य कवचं लपन् ।
विरेच्य समुदीर्यास्त्रं तोयक्षेपेण वै सह ॥ ९७ ॥
ततस्तु हस्तयोर्देहे न्यासं कुर्याद्यथाग(क्र)मम् ।
हृदा वामकरे तोयमादाय गलितं च तत् ॥ ९८ ॥
विबुधानूर्ध्वदेहस्थान् हृलादयेच्छिखया क्षिपन् ।
स्मरञ्जस्त्रं क्षिपेद्भूमौ दुष्टदोषप्रशान्तये ॥ ९९ ॥
अन्तरान्तरयोगेन ह्यूर्ध्वान्तं प्रागधस्ततः ।
जलाञ्जलिमथादाय स(स्व)मन्त्रेण हरि स्मरन् ॥१००॥
सूर्यमण्डलमध्यस्थं तर्पयेत्तेन वारिणा ।
सकुशोर्ध्वकरश्चाथ विनिमीलितदृग्जपन् ॥
सूर्य निरीक्षयेन्मन्त्रं यदर्घ्येणार्चितं पुरा ।
ततोपविश्य सन्तर्प्य आ(सा)धारासनपूर्वकम् ॥
साङ्गं सपरिवारं च मन्त्रं तदनु वै क्रमात् ।
इन्द्रादीन् विष्णुपूर्वांश्च वासुदेवादिकानपि ॥ १०३ ॥
मूर्तीर्द्वादशशक्तीश्च परमात्मनमेव ।
पृथिव्यादीनि भूतानि ऋषींश्च पितृभिः सह ॥१०४॥
आदौ नाम द्वितीयान्तं तर्पयामीति चोच्चरन् ।
एष मन्त्रस्तु निर्दिष्टस्तर्पणेषु यथाक्रमम् ॥ १०५ ॥
तिलोदकैस्तर्पयित्वा स्वपितॄंश्च पितामहान् ।
प्रपितामहसंज्ञांश्च सदाराननुतर्पयेत् ॥ १०६ ॥
तर्पयेत् सर्वपितॄणां दक्षिणाभिमुखेन तु ।
देवाना च तदन्येषां प्राङ्मुखो वाऽप्युदङ्मुख. ॥
पवित्रक त्यजेत् पश्चात् पुनराचम्य मन्त्रवित् ।
सायं प्रातर्दिशो वन्द्याद्ध्यात्वा नारायणं प्रभुम् ॥
करशुद्धिसमोपेतं दिग्बन्धं चावकुण्ठनम् ।
प्राणायामादिकं कुर्याद्भूतशुद्धिसमन्वितम् ॥ १०९ ॥
मन्त्रन्यासं तत. कृत्वा मुद्रां बध्वा स्मरेद्धरिम् ।

जलमध्येऽपि यागस्य भोगैश्चैवासनादिकैः ॥ ११० ॥
ततो मन्त्री समभ्यर्च्य पत्रपुष्पफलैर्विभुम् ।
संभवे सति पुष्पाणां विहितं तत्र चार्चनम् ॥ १११ ॥
औदकेनोपचारेण भावनाभावितेन च ।
तर्पयेदम्भसा प्राग्वद्धोमभावनयाऽखिलम् ॥ ११२ ॥
एवं कृत्वा जगन्नाथं समिद्दानं समाचरेत् ।
जुहुयाच्च यथाशक्ति ततस्तिलघृतादि यत् ॥ ११३ ॥
न्यूनातिरिक्तशान्त्यर्थं सर्वकर्मसमाप्तये ।
पूर्णाहुत्यवसानान्तं कुर्याद्वै जलतर्पणे ॥ ११४ ॥
स्तुत्वा च प्रणमेद्विप्र! अष्टाङ्गेनाथ दण्डवत् ।
दूर्वा सिद्धार्थकोपेतां शिखामन्त्राभिमन्त्रिताम् ॥
चूड्योत्तमाङ्गे शिरसा उपसङ्गृह्य सासनम् ।
वाच्यं जलात् स्वहृद्व्योम्नि मनसा निष्कलात्मना ॥
कृत्वाऽभिगमनं कृत्य सन्यसेच्च विचक्षणः ।
कुर्याद्भोगार्जनं पश्चान्यायोपायसमार्जितम् ॥ ११७ ॥
मूलेन वाऽस्त्रमन्त्रेण पुष्पमूलफलादिकम् ।
अवपन्नं त्वभिमतमनाप्तं भावदूषितम् ॥ ११८ ॥
व्याभिश्रहीनसंस्पृष्टं शुक्तं लीढं च वर्जयेत् ।
सम्यक् पूरकयुक्त्या तु धिया वाचकमुच्चरन् ॥११९॥
अपामार्गशमीशाखायुग्मं संभ्राम्य मूर्धनि ।
सव्यापसव्ययोगेन पृष्ठतोऽस्त्रं पठन् क्षिपेत् ॥ १२० ॥
स्नानवस्त्रं च निष्पीड्य ततश्चाचम्य वाग्यतः ।
इत्युक्तमौदकं स्नानमथ मान्त्रं निबोध मे ॥ १२१ ॥
तोयाधावे च यत्कुर्याद्दुर्गे(ष्टे) काले तु शीतले ।
गमने क्षिप्रसिद्धौ वा गुरुकार्येऽस्वतन्त्रताम् ॥ १२२ ॥
प्राप्तां वा वीक्ष्य विप्रेन्द्र! निशाभागे दिनस्य वा ।
प्रक्षाल्य पादावाचम्य प्रोद्धृतेन च वारिणा ॥ १२३ ॥
स्थानं दश दिशः प्राग्वत् सशोध्योपविशेत्ततः ।
प्राणायामगणं कुर्याद्भूतशुद्धि ततस्तनौ ॥ १२४ ॥
मूलमन्त्रादितः कुर्यात् सर्वमन्त्रगणेन तु ।
केवलादुदकस्नानात् संस्कारपरिवर्जितात् ॥ १२५ ॥
प्रयागादिषु तीर्थेषु यत्फलं कुरुते द्विज! ।
स्नानाच्छतगुणं तस्मान्मन्त्रस्नानस्य सत्तम! ॥ १२६ ॥
ध्यानस्नानमथो वक्ष्ये द्वाभ्यामपि परं तु यत् ।
स्वस्थित पुण्डरीकाक्ष मन्त्रमूर्ति प्रभुं स्मरेत् ॥ १२७ ॥
तत्पादोदकजां धारां पतमानां हि मूर्धनि ।
चिन्तयेद्ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकां तनुम् ॥ १२८ ॥
तया संक्षालयेत् सर्वमन्तर्देहगतं मलम् ।
तत्क्षणाद्विरजा मन्त्री जायते स्फटिकोपमः ॥ १२९ ॥
ध्यानस्नानं परं मन्त्रस्नानाच्छतगुणं स्मृतम् ।
सध्यानस्नानमित्युक्तं दिव्यस्नानादिकं शृणु ॥ १३० ॥
सहातपेन वर्षेण स्नानं दिव्यमनन्तरम् ।
समिधा दीपितानां च गोमयस्य हुत(शुभ) स्य च ॥
सितेन भस्मनाऽङ्गेषु ललाटादिषु च क्रमात् ।
यदूर्ध्वपुण्ड्रकरणं मन्त्रोच्चारणपूर्वकम् ॥ १३२ ॥
दाहनं तु भवेत् स्नानं शोधनं परमं स्मृतम् ।
गच्छत्सु गोषु वातोत्थै रजोभिर्भूमिसंभवैः ॥ १३३ ॥
स्पर्शनं वपुषः स्नानं वायव्यं तदुदाहृतम् ।
प्रशस्ते पर्वताग्रादौ जातया श्वेतमृत्स्नया ॥ १३४ ॥
उच्चार्य केशवादीनि नामान्यङ्गे यथाक्रमम् ।
ललाटादौ यद्विधानमूर्ध्वपुण्ड्रस्य तत्स(त्क्ष)मम् ॥
पार्थिवस्नानमित्येवं सर्वपापहरं शुभम् ।
तस्मादेकतमं कार्यं स्नानं श्रद्धापरेण तु ॥ १३६ ॥
स्नानाचमनशौचेन प्राणायामेन देशिकः ।
अन्तर्बहिः शरीरस्य साधकस्तु विशुध्यति ॥ १३७ ॥
स्नानपूर्वाः क्रियाः सर्वाः फलसंसिद्धिहेतवः ।
तस्मात् स्नानं प्रकुर्वीत देवर्षिपितृतर्पणम् ॥ १३८ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहिताया क्रियाकाण्डे
साधकस्नानविधिर्नाम द्वितीयोऽध्याय ॥

॥ श्रीः ॥

तृतीयोऽध्यायः ॥

सास्त्रं दूर्वाङ्कुरं दत्वा पत्रं पुष्प तिलांस्तु वा ।
सोदकानात्मनो मूर्ध्नि शिखास्थाने च सत्तम ! ॥ १ ॥

ततः कलशपूर्वं तु अम्बुपूर्णं तु भाजनम् ।
समादायाम्बरच्छन्नं पाणिना भगवद्गृहम् ॥ २ ॥

एकान्तं निर्जनं यायान्मनोज्ञं दोषवर्जितम् ।
अनुकूल शुचि दक्ष संयतं समये स्थितम् ॥ ३ ॥

एकायन वैदिकं वा ब्राह्मणं चार्घ्यवाहकम् ।
हृन्मध्यस्थं स्मरन्मन्त्रं प्रबुद्धानन्दविग्रहम् ॥ ४ ॥

दिगन्तरमवीक्षन् वै मौनी संरोधितानिल ।
प्राप्य स्थान स्वमन्त्र तं नासाग्रेण विरेचयेत् ॥ ५ ॥

उच्चरन द्वादशार्णं तु प्रविश्यान्त प्रदक्षिणम् ।
प्रासादोद्देशमखिलं मार्जयेत् प्रोक्षयेत्तत ॥ ६ ॥

परिचारैस्तु कर्तव्यं वलिपीठात्तमेव हि ।
द्वारादाद्ये यथाशास्त्रं शुद्धेन सलिलेन च ॥ ७ ॥

आजानुपादौ प्रक्षाल्य हस्तौ चामणिवन्धनात् ।
पूर्वोक्तेन विधानेन समाचम्योर्ध्वपुण्ड्रकै ॥ ८ ॥

चन्दनाद्यै सुगन्धैर्वा धर्मक्षेत्रे विशेषत ।
पर्वताग्रे नदीतीरे सिन्धुतीरे तथैव च ॥ ९ ॥

वल्मीके तुलसीमूले प्रशस्ता मृत्तिका द्विज ! ।
वश्यार्थी रक्तया श्रीच्छन् पीतया शान्तिकामिक. ॥

श्यामया मोक्षकामी च श्वेतया चोर्ध्वपुण्ड्रकम् ।
वर्तिदीपाकृतिं चैव वेणुपत्राकृति तथा ॥ ११ ॥

पद्मस्य मुकुलाकारमुत्पलं मुकुलाकृति ।
मत्स्यकूर्माकृति चेव शङ्खाकारमत. परम् ॥ १२ ॥

पुष्टिप्रदेनाङ्गुष्ठेन तर्जन्या मुक्तिसिद्धये ।
वाञ्छितार्थप्रदायिन्या मुनेऽनामिकयाऽथ वा ॥ १३ ॥

आयुष्कामी मध्यमया अङ्गुल्या च—अथ देवता ।
एताभिरङ्गुलीभिस्तु कारयेन्न नखै. स्पृशेत् ॥ १४ ॥

ललाटे वासुदेवं च हृदि संकर्षणं न्यसेत् ।
प्रद्युम्न दक्षिणे चांसे अनिरुद्धोत्तरासके ॥ १५ ॥

जलनिर्मथितेनेव ह्यूर्ध्वपुण्ड्रचतुष्टयम् ।
ललाटे केशवं विद्यान्नारायणमथोदरे ॥ १६ ॥

माधवं हृदये कुर्याद्गोविन्दं कण्ठकूपके ।
उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते ॥ १७ ॥

तत्पार्श्वे बाहुमध्ये तु मधुसूदन इष्यते ।
त्रिविक्रमं कण्ठकूपे वामे कुक्षौ तु वामनम् ॥ १८ ॥

श्रीधरं वामबाहौ च हृषीकेशं तु कण्ठके ।
अपरे पद्मनाभं तु ककुद्दामोदरं स्मरेत् ॥ १९ ॥

एवं द्वादशनामं(नि) तु वासुदेवं तु मूर्धनि ।
यज्ञो दानं तपो होमो भोजन पितृकर्म च ॥ २० ॥

तत सर्व निष्फल प्रोक्तमूर्ध्वपुण्ड्रविनाकृतम् ।
तस्मात् सर्वप्रयत्नेन धारयेत् सर्वसिद्धिदम् ॥ २१ ॥

चतुरङ्गुलमग्रं तु सदाविष्ण्वधिदैवतम् ।
महाविष्ण्वधिदैवस्तु ग्रन्थिरेकाङ्गुलो भवेत् ॥ २२ ॥

विष्ण्व(ा)धिदैवं वलयं द्वयमङ्गुलमुच्यते ।
पवित्रं हस्तयुग्मे चानामिकाया नियोजयेत् ॥ २३ ॥

दर्भैर्विना तु यत् स्नानं विना नैवेद्यमर्चनम् ।
विनोदकं तु यद्दानं तत् सर्व निष्फलं भवेत् ॥ २४ ॥

अर्चन जपहोमौ च दानं च पितृतर्पणम्।
अपवित्रानुपाणिश्चेत् तत् सर्व च विनश्यति ॥

तस्मात् सर्वप्रयत्नेन सदा धार्य पवित्रकम्।
गन्धैः स्रग्भिरलङ्कारैः सोत्तरीयैश्च भूषित॰ ॥ २६ ॥

कर्णभूषणहाराद्यैः कटकैरङ्गुलीयकै.।
अलाभे त्वङ्गुलीयेन अलङ्कृत्य तु साधक. ॥ २७ ॥

वदन नासिकारन्ध्रे स्थगयित्वाऽम्बरेण तु।
स्वश्वासोपहतं चैव न भवेच्च यथा द्विज ! ॥ २८ ॥

शुक्लवासा॰ सुवेषश्च शुक्लदन्त. शुचिव्रत ।
ताम्बूलशुद्धवदनो ललाटे साक्षातैर्युत॰ ॥ २९ ॥

एवमुक्तगुणैर्युक्तो बोधयेत् पुरुषोत्तमम्।
शङ्खध्वनिसमोपेतं दुन्दुभीपटहस्वनैः ॥ ३० ॥

वन्दिवृन्दोत्थितोच्चाभिर्नानावाद्यैर्महामते !।
महाजयजयारावै पुन॰पुनरुदीरितै॰ ॥ ३१ ॥

प्रबोधलक्षणैः स्तोत्रैरुत्थाप्य शयनात्तत ।
द्वारमासाद्य तत्रस्थो दशदिग्बन्धपूर्वकम् ॥ ३२ ॥

अवकुण्ठ्याथ तर्जन्या मन्त्रं कवचमुच्चरन्।
स्थिते वा कल्पिते तत्र पूजयेद्बलिमण्डले ॥ ३३ ॥

सर्व खगेशपूर्व तु परिवारं हि साच्युतम्।
नमसा प्रणवाद्येन पुष्पमादाय कीर्तयेत् ॥ ३४ ॥

समस्तपरिवाराय अच्युताय नमो नम॰।
वास्तुपूरुषमन्याश्च समभ्यर्च्य यथाक्रमम् ॥ ३५ ॥

मूलमन्त्रेण साङ्गेन निरङ्गेनाथवा ततः।
न्यासं कृत्वा त्रिराचार्यो हस्तताल हृदा तत. ॥ ३६ ॥

मूलमन्त्रेण चोद्घाट्य कवाटं नेत्रमन्त्रतः।
नित्यदीपास्ततोज्ज्वाल्य हस्तौ प्रक्षाल्य वारिणा ॥

प्रासादादि यदा न स्यात्तदा देश मनोहरम्।
आसाद्य कल्पयेन्मान्त्रं गृहं तदधुनोच्यते ॥ ३८ ॥

मूलमन्त्रं पुरा ध्यायेद्ब्रह्मवत् सर्वगं ततः।
विदिक्षु दिक्षु मध्ये च ज्वलन्तं भानुकोटिवत् ॥३९॥

हृन्मन्त्रं च तदन्तस्थमाक्रम्याखिलमात्मना।
शिरोमन्त्र च तन्मध्ये ब्रह्मनाडीस्वरूपिणम् ॥ ४० ॥

स्तम्भभूत तु विश्वस्य संचाराध्ववदुज्ज्वलम्।
शिखामन्त्रं च सर्वस्माद्बहि प्रकारवत् स्थितम् ॥

वर्ममन्त्रं तु कर्मात्मा(त्म)परमात्मानुवेधयेत्।
गवाक्षद्वारभूतं च नेत्रमन्त्र च भावयेत् ॥ ४२ ॥

स्फुरद्वह्निस्फुलिङ्गोर्मिसहस्रपरिराजितम्।
सर्वविघ्नप्रशमन बहिरस्त्र च भावयेत् ॥ ४३ ॥

एवं (म)मान्त्रगृहं ध्यात्वा ततो द्वारं तु चेतसा।
त्रिभागीकृत्य तन्मध्ये भागमेकं द्विधा पुन. ॥ ४४ ॥

विभज्य वामदेशेन दक्षिणेनाङ्घ्रिणा ततः।
शनै. शनै. प्रविश्यान्तः सास्त्रमन्त्रेण तेन वै ॥ ४५ ॥

धरणीहनन कृत्वा भगवन्तं प्रणम्य च।
मनसा गुरुवशं च तदाज्ञा मानसीमथ ॥ ४६ ॥

शिरसा धारयेत् खेष्टं फल संकल्प्य चेतसा।
देवाय च निवेद्यै(तान्) तत् यागागारस्य मध्यत. ॥

प्रासादं विग्रह कल्पत्वा वर्ममन्त्र सविग्रहम्।
तज्जीवं भगवन्तं च ध्यात्वा यागगृहं तत. ॥ ४८ ॥

सशलाकैस्ततो दर्भै सहदेवीविमिश्रितैः।
संमार्ज्य बहुतोयेन प्रक्षाल्याऽऽलिप्य गौमयै. ॥ ४९ ॥

गोमयं च नवं ग्राह्यं भूमिष्ठं धेनुसंभवम्।
सजलं शिथिलं शुष्कं कीठवच्च विवर्जयेत् ॥ ५० ॥

उपलिप्तमथास्त्रेण संविध्य शकलं त्यजेत्।
पञ्चगव्येन सास्त्रेण वारा(रिणा)वा प्रोक्ष्य चन्दनै ॥

कुङ्कुमागरुकर्पूरै. समालिप्य समन्तत ।
कुशदूर्वाक्षताश्चैव विकिरेत् स्थानशुद्धये ॥ ५२ ॥

प्रासादं शोधयित्वा तु ततो मौनपरो द्विज !।
देवेशस्याग्रतो वाऽपि दक्षिण भागमाश्रयेत् ॥ ५३ ॥

दर्भे चर्मणि वस्त्रे वा फलके यज्ञकाष्ठजे।
स्वासन्यस्यनं वार्भि(चाद्भि)श्च मूलमन्त्राभिमन्त्रितैः ॥

प्रोक्ष्य छोटिकयाऽस्त्रेण दद्यात्तच्छुद्धये पुनः ।
तुर्यादीना तु तत्रैकं भावयेदासनं त्वथ ॥ ५५ ॥

तुर्य नामऽऽसनं पूर्वं कारणप्रणवा(न्वय.)न्वितम् ।
सुषुप्तिर्नाम तद्व्याप्ताव्यक्तपङ्कजसंस्थिति. ॥ ५६ ॥

स्वप्न. शेषाद्विपूर्वं तु वह्निपर्यन्तमासनम् ।
क्षीरार्णवादितो भावासनान्त जाग्रदासनम् ॥ ५७ ॥

तत्र सुप्तं(प्तिं) तुरीयं वा करशुद्धेः पुरा स्मरेत् ।
स्वप्नं मानसयागात्तु पूर्वं तुर्योक्तकालतः ॥ ५८ ॥

जाग्रदासनकल्पे तु विशेषो गृह्यतामयम् ।
स्वदेहमन्त्रविन्यासात् पूर्वमन्ध्यादिकं त्वयम् ॥ ५९ ॥

न्यसेदस्त्राम्बुना प्रोक्ष्य ताडयित्वाऽस्त्रपुष्पतः ।
तत्रैव भगवद्योगपीठार्चाया. पुरोत्तरम् ॥ ६० ॥

न्यसेदाधारशक्त्यादि भावपीठान्तमासनम् ।
प्रणवेनाथ तद्व्याप्ति स्मृत्वा स्वार्णेन तेन वै ॥ ६१ ॥

अभ्यर्च्य तदुपर्यास्यपद्माद्येकतमान्वितम् ।
यागोपस्करसंभूतौ भगवन्तमनुस्मरन् ॥ ६२ ॥

विनीतान् शिष्यपुत्रादीन् स्नातानाज्ञापयेत्तदा ।
पात्रशुद्धि तत. कुर्याद्यथा तच्छृणु सत्तम ! ॥ ६३ ॥

अम्लकल्केन तोयेन हेमं ताम्रं च शोधयेत् ।
राजतं गृहधूमेन शान्ताङ्गारेण वा पुनः ॥ ६४ ॥

भस्ममिश्रेण तोयेन लोहयुक्तं विशोधयेत् ।
शङ्खशुक्तिमयाना च लवणेव विशोधयेत् ॥ ६५ ॥

फलपत्रमयानां च मृद्भिरद्भिश्च शोधयेत् ।
लेपगन्धापनोदेन शुद्धिर्भवति कारयेत् ॥ ६६ ॥

द्रव्यशुद्धिर्भवत्येवं यथावद्विधि चोदिता ।
अथार्कोदयकालस्य पूर्वं कर्म समारभेत् ॥ ६७ ॥

प्रच्छन्नपटसंयुक्तं पूजाकाले प्रपूजयेत् ।
पापिष्ठानाश्रमभ्रष्टाञ्नास्तिकान् वै न दर्शयेत् ॥ ६८ ॥

आगमार्थं च देवाना गमनार्थं च रक्षसाम् ।
कुर्याद् घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥ ६९ ॥

शङ्खादिघोषसंयुक्तं गेयवाद्यसन्वितम् ।
आवाहने तथाऽभ्यङ्गे स्नानारम्भावसानयो. ॥ ७० ॥

तथा तिलकदाने च दीपे मात्रानिवेदने ।
नीराजने त्वाहरणे नैवेद्यस्य महानसात् ॥ ७१ ॥

तन्निवेदनकाले तु पूर्णाहुत्यवसानके ।
जलाहरणकाले च यानारोहावरोहयोः ॥ ७२ ॥

कवाटयोर्विघटने तथा बन्धे द्विजोत्तम ! ।
एतेषु नित्यकालेषु शङ्खमापूरयेत् त्रिधा ॥ ७३ ॥

प्रवृत्तस्यार्चने विष्णोः कृतमौनस्य तत्वत. ।
तस्याविक्षिप्तबुद्धेर्वै वाग्दान सुविरोधकृत् ॥ ७४ ॥

अत. सव्यभिचारं तु मौनं वर्ज्य क्रियापरै. ।
शुभमव्यभिचार यत्तत्कार्य सर्ववस्तुषु ॥ ७५ ॥

यदङ्गसंकेतमयैरव्यक्तैर्नासिकाक्षरैः ।
कृतमोष्ठपुटैर्वद्धैर्मौनं तत्सिद्धिहानिकृत् ॥ ७६ ॥

स्वयमेव स्वबुद्ध्या यत् सर्ववस्तुषु वर्तते ।
शब्दैरनुपदिष्टैस्तु तन्मौन सर्वसिद्धिदम् ॥ ७७ ॥

करशुद्धि ततः कुर्याद्यथाव(त)दवधारय ।
द्वे तले हस्तपृष्ठे द्वे सर्वाश्चाङ्गुलयस्तथा ॥ ७८ ॥

अस्त्रमन्त्रेण संशोध्य ध्यानमुद्रान्वितेन तु ।
कृत्वैव करशुद्धि च स्थानशुद्धि समाचरेत् ॥ ७९ ॥

ध्यात्वा देवं ज्वलद्रूपं सहस्रार्कसमप्रभम् ।
ज्वालाकोटिसमाकीर्णं वमन्तं ज्वलनं मुखात् ॥ ८० ॥

तेन संपूरयेत् सर्वमाब्रह्मभवनान्तिमम् ।
दिगोघं प्रज्वलन्तं च भावयेन्मन्त्रतेजसा ॥ ८१ ॥

क्ष्मामण्डलमिदं सर्वं स्मरेत् पक्व च वह्निना ।
मन्त्रजेन द्विजश्रेष्ठ ! मृण्मयं भाजनं यथा ॥ ८२ ॥

स्थानशुद्धिर्भवत्येवं सुधाकल्लोलसेचनात् ।
भावयेदथ दिग्बन्ध कुर्यादास्ये तु पावकम् ॥ ८३ ॥

किरन्तमस्त्रमन्त्रं च बाहुभ्यां दक्षिणेन वा ।
दिग्विदिक्षु च सर्वत्र विरेच्य स्वासनाद्बहिः ॥ ८४ ॥

शरजालचिताकारं प्राकारं बन्धयेद्बुध.।
यद्वा तु पूर्ववत् कुर्याद्दिग्बन्धं हृदयादिकैः ॥ ८५ ॥

अस्त्रेण वै विदिग्बन्धं नेत्रेण तु अथोर्ध्वत.।
आदित्यायुतदीप्तेन ज्वलत्कञ्चुकरूपिणा ॥ ८६ ॥

कवचेन तु तर्जन्या रक्षार्थमवकुण्ठयेत्।
एवं कृत्वा तु दिग्बन्धं प्राणायाममथारभेत् ॥ ८७ ॥

प्रमाथिनो दृढस्याथ चञ्चलस्य तु चेतसः।
समाधियोग्यतासिद्ध्यै प्राणादिविजयाय च ॥ ८८ ॥

तमोनि(वर्हणार्थं च)र्हरणार्थाश्च कुर्यात् प्राणायतीरथ।
शरीरे नाडिसंस्थानं तथा प्राणादिसंस्थितम् ॥ ८९ ॥

प्राणायामस्वरूपं च ज्ञात्वा यामान् समाचरेत्।
नाडीचक्रं प्रवक्ष्यामि यथावन्मुनिपुङ्गव ! ॥ ९० ॥

नाडीना कन्दनाभिः स्यादुत्पत्तिस्थानमुत्तमम्।
द्विसप्ततिसहस्राणि नाडयोऽन्तर्व्यवस्थिताः ॥ ९१ ॥

तिर्यगूर्ध्वमधश्चैव देहं व्याप्य व्यवस्थिता.।
आग्नेया. सौम्यरूपाश्च सौम्याग्नेयास्तथैव च ॥ ९२ ॥

आग्नेया ऊर्ध्ववदना. सौम्यसंज्ञा अधोमुखा।
तिर्यग्गता नाडयस्तु सौम्याग्नेया उदाहृता. ॥ ९३ ॥

नाडीनामपि सर्वासा प्रधाना दश नाडयः।
इडा च पिङ्गला चैव सुषुम्ना चोर्ध्वगामिनी ॥ ९४ ॥

गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी।
अलम्बुसा कुहूश्चैव को(के)शिनी दशमी स्मृता ॥९५॥

सुषुम्नाख्या मध्यनाडी कन्दादूर्ध्वप्रवाहिनी।
मध्यनाड्याः सुषुम्नाया वामदक्षिणत. स्थिते ॥ ९६ ॥

इडापिङ्गलसंज्ञे द्वे ते तु नासापुटावधी।
पुरतः पृष्ठतस्तस्या गान्धारी हस्तिजिह्वके ॥ ९७ ॥

वामेतराक्ष्यवधिके कन्ददेशात् समुत्थिते।
पूषायशस्विन्याख्ये द्वे सव्यान्यश्रोत्रनिष्ठिते ॥ ९८ ॥

कन्दाद्वै पादमूलान्ता संस्थिता स्यादलम्बुसा।
कुहूर्मेढ्रान्तपर्यन्ता पादाङ्गुष्ठे तु कोशिनी ॥ ९९ ॥

शुक्लेडा पिङ्गला रक्ता गान्धारी पीतवर्णका।
हस्तिजिह्वा कृष्णरूपा पूषा स्यात् कृष्णपीतका ॥

यशस्विनी श्यामवर्णा बभ्रुवर्णा ह्यलम्बुसा।
कुहूररुणसंकाशा कोशिनी ह्यञ्जनप्रभा ॥ १०१ ॥

एवं दशप्रधानास्तु नाडय· परिकीर्तिता·।
वायवो दश संप्रोक्ता· शरीरे नाडिषु स्थिता. ॥१०२॥

प्राणोऽपानः समानश्च उदानो व्यान एव च।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जय. ॥ १०३ ॥

इडाख्या वहति प्राण गान्धार्याख्या अपानकम्।
अलम्बुसा समानं तु कुहूर्व्यान द्विजोत्तम ! ॥ १०४ ॥

उदानं तु सुषुम्नाख्या पिङ्गला नागसञ्ज्ञितम्।
पूषा वायु तु कूर्माख्य कृकरं तु यशस्विनी ॥ १०५ ॥

हस्तिजिह्वा देवदत्तं कोशिनी तु धनञ्जयम्।
विद्रुमाभौ प्राणनागाविन्द्रकोपोपमावुभौ ॥ १०६ ॥

कूर्मापानौ खसकाशौ समानकृकराकुभौ।
किञ्जल्कसदृशौ देवदत्तोदानौ धनंजय. ॥ १०७ ॥

व्यानश्च फेनवर्णाभः सर्वशास्त्रेषु निश्चयः।
अथ प्राणायति.—सा च निश्वासोच्छ्वासयोर्गते. ॥

स्तम्भनं तत्र निश्वासो बाह्यवातोपयोगिना।
प्राणेनानयनं वायोरन्तः कोष्ठानिलस्य च ॥ १०९ ॥

बहिर्निष्कासनं नास्या उच्छ्वासो बुद्धिपूर्वकम्।
अभ्यन्तरा स्तम्भवृत्तिर्वायोरन्त. प्रपूरणम् ॥ ११० ॥

बाह्यं तु तद्वत् प्रथमं प्राणसंरोधनं विदु.।
अभ्यन्तराद्द्वितीयस्तु स्तम्भवृत्तिस्तृतीयकम् ॥

बाह्या तत्राधमा प्राणधारणा मध्यमा मता।
अभ्यन्तरा स्तम्भवृत्तिरुत्तमा धारणा मता ॥ ११२ ॥

सदा निश्वासरूपा तु बाह्या रेचकमुच्यते।
अभ्यन्तरा समुच्छ्वासरूपा सपूरकस्तथा ॥ ११३ ॥

श्वासोच्छ्वासनिरोधात्मा स्तम्भवृत्तिस्तु कुम्भक.।
एकद्वित्रिभिरुद्घातैर्मृदुमध्यमतीक्ष्णका. ॥

क्रमेणैते भवन्त्यत्र प्राणादेर्नाभिदेशत. ।
उद्गतस्याहति. पूर्वमुद्घात. स्याद्द्वितीयकम् ॥११५॥

निवृत्तिरुदरादूर्ध्वं तस्य चाथ तृतीयकम् ।
अन्यत्र निग्रहोऽस्येह(स्यैव) मृदु. पूर्वोऽथ मध्यमः ॥

द्वितीयस्तु तृतीयोऽथ तीक्ष्णस्स्वेदादिकारणम् ।
प्राणायामगणं कुर्यात् पूर्वमस्त्रेण रेचकम् ॥ ११७ ॥

तत्र द्वादशमात्रस्तु रेचकः पूरकः स्मृत. ।
चतुर्विंशतिमात्रस्तु षट्त्रिंशन्मात्रकं विदु. ॥ ११८ ॥

कुम्भक चाथ भूयोऽपि केवलानिलनिःसृतिः ।
या सा प्राणायति. साऽपि रेचकाख्या विधीयते ॥

मात्राव्यतिक्रमान्न्यूना विपर्यासे तु साऽस (ध)मा ।
तस्मान्मात्राविशेषेण ज्ञातव्या प्राणजिष्णुना ॥ १२० ॥

जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
कुर्यादङ्गुलिविस्फोटं सा मात्रा परिकीर्तिता ॥

प्राणायमगणं कुर्यात् पूर्वमस्त्रेण रेचकम् ।
पूरकं हृदयेनाथ नेत्रमन्त्रेण कुम्भकम् ॥ १२२ ॥

प्रागुक्तेनाचरेद्भूयो रेचकं द्विजसत्तम ! ।
वामेतराङ्गुलीभ्या तु पिदधद्वामनासिकाम् ॥

नाभिदेशस्थितं ध्यायेन्मूलमन्त्रेण वै हरिम् ।
वासनादोषसंमिश्रान् दशप्राणान् सगर्भकान् ॥ १२४ ॥

अगर्भश्च सगर्भश्च प्राणायामो द्विधा मतः ।
जपध्यानं विनाऽगर्भ. सगर्भस्तद्युत(त्सम)श्च य. ॥

अगर्भाद्गर्भसंयुक्तः प्राणायाम. शताधिकः ।
आकृष्यास्त्रं समुच्चार्य दक्षिणघ्राणतो बहिः ॥ १२६ ॥

रेचयेद्वातचक्र तु दशनाडीष्ववस्थितम् ।
मात्रयैकैकयाऽन्योन्यं मोचयित्वाऽत्र पूषि(र्वि)काम् ॥

द्वाभ्यां तु पिङ्गला द्वाभ्या वहिर्नाभ्यास्तु रेचयेत् ।
विरेच्यैवं हरि तावत् संस्थाप्यादाय पावकम् ॥

वातचक्रस्थितं ध्यायेत्तमेवान्त. प्रवेशयेत् ।
दक्षिणाङ्गुष्ठतो द्वारं पिदधद्वामनासया(सिकाम्) ॥

हरि सवातचक्रं तं मात्राभ्यामिडयोच्चरन् ।
हृन्मन्त्रमन्त. सवेश्य तं ध्यात्वा हृदये स्थितम् ॥

मात्राचतुष्टयेनाथ तेन वातेन पिङ्गलाम् ।
द्वाभ्या सुषुम्ना गान्धारी द्विद्विकाभिस्तु पूषिकाम् ॥

द्वाभ्या द्वाभ्या हस्तिजिह्वालम्बुसे च यशस्विनीम् ।
कोशिनीं च कुहूं चैव क्रमात् सपूरयेत् (यन्) गर्ता. ॥

नासापुटादिकादूर्ध्वं नेत्रेणासीत कुम्भवत् ।
षट्त्रिंशद्भिस्तु मात्राभिरथ नाभ्यग्निमिश्रितैः ॥१३३॥

परिभ्रमद्भि. सर्वत्र तैर्वातैर्दोषसंहती ।
ध्यात्वा निरस्ता, नाडीश्च शोधितास्तु शनै. शनैः ॥

केवल वातचक्र तु बहिः प्राग्वद्विरेचयेत् ।
यद्वा षोडशमात्रा स्याद्रेचके द्विगुणः स्मृतः ॥ १३५ ॥

पूरकः कुम्भकोऽपि स्यात् सचतु.पष्टिमात्रक. ।
नाडीस्ता मोचयेत् प्राग्वत् षण्मात्राभिस्तु पिङ्गलाम् ॥

नाडीस्तु दश तन्त्रीभिः पञ्चमात्राभिरर्जयेत् ।
प्राणायाममिदं प्रोक्तमुत्तमादिविभेदत. ॥ १३७ ॥

त्रिप्रकारे विधानेऽत्र यथासंभवमाचरेत् ।
प्राणायामत्रयं कृत्वा पञ्च वा सप्त वाऽथवा ॥ १३८ ॥

भवेत् प्राणजयः पुंसः प्राणायामः स उच्यते ।
ततस्तु कायशुद्ध्यर्थं वर्ण भौमादि विन्यसेत् ॥१३९॥

भूतशुद्धि शृणु मुने ! यथावदनुपूर्वशः ।
पृथ्व्यप्तेजोनिलाकाशं शरीर भूतपञ्चकम् ॥ १४० ॥

इन्द्रजालोपमं विद्धि ज्ञानाद्यैरुज्झित गुणैः ।
मलिनं चास्वतन्त्रं च रेतोरक्तोद्भवं क्षयि ॥ १४१ ॥

यावन्न शोधितं सम्यग्धारणाभिर्निरन्तरम् ।
तावदेतदयोग्यं स्यान्मन्त्रन्यासादिवस्तुषु ॥

पञ्चभिर्धारणाभिर्वा द्वाभ्या वा शोधयेत्तनुम् ।
सुषुम्नादक्षिणद्वारान्निर्गमय्य हरि बहिः ॥ १४३ ॥

सहस्ररविसङ्काशं वृत्तमण्डलमध्यगम् ।
तप्तकाञ्चनवर्णाभमासीनं परमे पदे ॥ १४४ ॥

मन्त्रात्मानं तु तं ध्यात्वा ह्युपरि द्वादशाङ्गुले।
प्रभाचक्रं तु तदधस्तत्वाधिष्ठातृसंयुतम् ॥ १४५ ॥

निष्कलं मन्त्रदेहं तु ध्यात्वा तु तदधःक्रमात्।
तुर्यश्रां पीतला भूमिं चिन्तयेद्वज्रलाञ्छिताम् ॥

शब्दाद्यैः पञ्चभिर्युक्तां नगद्रुमसमाकुलाम्।
पुरप्राकारसुसरिद्द्वीपार्णवपरिष्कृताम् ॥

सविशन्तीं स्मरेद्ग्राह्यात् पूरकेण स्वविग्रहे।
प्रोच्चरंश्चैव तन्मन्त्र विश्रान्तामथ चिन्तयेत् ॥

जान्वोः पादतलं यावत्तया व्याप्त क्रमेण तु।
कुम्भकेन द्विजश्रेष्ठ! मन्त्रमूर्तां स्वके तत. ॥ १४९ ॥

शनै. शनैर्लयं याता गन्धशक्तौ च मन्त्रराट्।
गन्धशक्ति च तां पश्चाद्रेचकेन बहिः क्षिपेत्॥

तोयाख्ये च महाधारे, ततस्तोय च वैभवम्।
ससमुद्रसरित्स्रोतोरसषट्कं च सौषधिम् ॥

यान्यन्यान्यम्बुभूतानि भूतानि भुवनान्तरे।
अर्धचन्द्रसमाकारं कमलध्वजशोभितम् ॥

वारुणं विभवं बाह्ये ध्यात्वा तेनाथ विग्रहम्।
सपूर्य पूरकाख्येन करणेन शनैः शनैः ॥ १५३ ॥

ऊरुमूलाच्च जान्वन्तं शारीरं मण्डलं स्वकम्।
तेनाखिल तु संव्याप्त कुम्भकेन स्मरेद्द्विज! ॥

तन्मध्ये वारुणं मन्त्रं धारणाख्य विचिन्त्य च।
अम्मयं विभवं सर्व तन्मन्त्रे विलयं गतम् ॥

ततस्तं रसशक्तौ च सा शक्तिर्वह्निमण्डले।
रेचकेन विनिक्षिप्य ततो वाह्नं च वैभवम् ॥

त्रिकोणभुवनाकारं दीप्तिमद्भिर्विभूषितम्।
विद्युच्चन्द्रार्कनक्षत्रमणिरत्नैश्च धातुभि ॥ १५७ ॥

स्वप्रकाशशरीरैस्तु अशरीरैश्च खेचरे।
चिह्नित स्वस्तिकेर्दीप्तैर्ध्यात्वैव विभवं महत् ॥

तैजस मुनिशार्दूल! तन्मन्त्रं चाथ सस्मरेत्।
तन्मण्डलान्तरस्थं तु प्रोच्चरन् वै तमेव हि॥

प्रविष्टं पूर्ववद्ध्यायेत्तेनैव करणेन तु।
आनाभे. पायुपर्यन्तं व्याप्त कृत्वाऽवधार्य च ॥

तं विप्र! विभवं सर्व तैजसं परिभावयेत्।
तन्मन्त्रविग्रहे शान्तं तन्मन्त्रं चानलात्मकम् ॥

रूपशक्तौ लय यातं शक्तिः संविन्मयी च सा।
तया मन्त्रशरीरं स्वं स्वशक्त्या विलयीकृतम् ॥

रेचकेन तु तां शक्ति वाय्वधारे बहिः क्षिपेत्।
ततस्तु वायवीयं वै विभवं वाह्यत. स्मरेत् ॥

वृत्त राजोपलाभं तु बिम्बैर्युक्तं तु(स्व)तैजसैः।
पूर्ण नानाविधैर्गन्धैरनेकैस्तद्गुणैस्तथा ॥ १६४ ॥

स्वमन्त्रेण समाक्रान्त धारणाख्येन संस्मरेत्।
तथा स्वरूपं तन्मन्त्रं ध्यात्वोच्चार्य समाहरेत् ॥

पूर्वोक्तकरणेनैवं घ्राणाग्रेण शनै. शनै.।
आकण्ठं नाभिदेशान्तं तेन व्याप्त तु भावयेत् ॥

प्रागुक्तकरणेनैव वायव्यं तु विभवं तु तम्।
अधिष्ठातृलयं यातं स्मृत्वा त च महामते! ॥

स्पर्शाख्याया महाशक्तौ ता शक्तिमविनश्वरीम्।
व्याप्ति नित्यामनित्यां च स्वशक्तिविभावान्विताम ॥

शब्दाख्ये तु महाधारे निक्षिपेद्व्योममण्डले।
ध्यात्वाऽथ विभवं सर्व व्योमाख्यं विग्रहाद्बहि ॥

नानाशब्दसमाकीर्ण नीरूपं चाञ्जनप्रभम्।
अविग्रहैः शब्दमयैः पूर्ण सिद्धैरसंख्यकैः ॥

तन्मध्ये धारणामन्त्रं व्योमाख्यं संस्मरेद्द्विज!।
धारयन्तं स्वमात्मानं स्वसामार्थ्येन सर्वदा ॥

शब्दमात्रमरूपं तु व्यापकं विभवेष्वपि।
धिया च संपरिच्छिन्नं कृत्वा विन्यस्य विग्रहे ॥

प्रागुक्तकरणेनैव तेन व्याप्तं च भावयेत्।
आकण्ठाद्ब्रह्मरन्ध्रान्तं व्योमाख्यविभवेन च ॥

सन्धार्य कुम्भकेनैव यावत्कालं तु योगिना।
ध्यायेत् परिणतं पश्चात् स्वमन्त्रे तु महामुने! ॥

व्योमाख्यं धारणामन्त्रं शक्तौ परिणतं स्मरेत् ।
(घ्राणोपस्थौ धरण्यां च रसनापायुतोयके ॥ १७५ ॥

दृष्टिपादौ हुतवहे त्वक्करौ वायुमण्डले ।
वाक्च्छ्रुती व्योमतत्त्वे तु लयस्यादौ सह स्मरेत्) ॥

ता शक्तिं ब्रह्मरन्ध्रेण प्रयान्तीमनुभावयेत् ।
युक्ता शक्तिचतुष्केण गन्धाख्येनाविनश्वरीम् ॥

आश्रयेन्निष्कलं मन्त्रं तत्त्वाधिष्ठातृसंयुतम् ।
समन्त्र विमवं भौतमेवमस्त नयेत् क्रमात् ॥ १७८ ॥

चेतन्य जीवभूत यत् प्रस्फुरत्तारकोपमम् ।
भावनीय तु विश्रान्तं निःसृतं भूतपञ्चरात् ॥

निष्प्रपञ्चे परे मन्त्रे पञ्चशक्त्याख्यविग्रहे ।
अनेन क्रमयोगेन जीव आत्मानमात्मना(म्) ॥

ईक्षेत तद्धृदाकाशे अचल सूर्यवर्चसम् ।
स्फुरद्द्युतिभिराकीर्णमीश्वरं व्यापकं परम् ॥

ततो मन्त्रशरीरस्थः समाधिं चाभ्यर्चेत् परम् ।
गन्धतन्मात्र पूर्वाभिर्युक्तत्वात् पञ्चशक्तिभिः ॥

हेयं चेत्थमिदं बुद्ध्वा यदा तत्स्थानबृंहितः ।
अतृप्तोऽकृतकृत्यश्च मन्त्रहृत्पद्मसेवनात् ॥ १८३ ॥

षट्पदो ह्यात्मतत्त्वश्च ज्ञानरज्ज्ववलम्ब्य च ।
हृत्कोटरोर्ध्वान्निर्यान्तं स्वात्मानं स्वात्मना स्मरेत् ॥

भारूपनाडिमार्गेण मन्त्रवह्नेः शिखा हि सा ।
पद्मसूत्रप्रतिकाशा सुषुम्ना चोर्ध्वगामिनी ॥

तद्ब्रह्मरन्ध्रगा स्मृत्वा सुपथा तेन सत्तम ! ।
शनैःशनैःस्वमात्मानं रेचयेज्ज्ञानवायुना ॥ १८६ ॥

मान्त्रं करणषट्कं च एवमव्यापकं त्यजेत् ।
प्राप्नुयाच्च तदूर्ध्वात्तु यः परात् प्रभुविग्रहात् ॥

उदितो द्विजशार्दूल ! तेजःपुञ्जो ह्यनूपमः ।
तत्प्रभाचक्रनाभिस्थस्वानन्दानन्दनन्दितः ॥

एवं पदात्पदस्थस्य ह्यात्मतत्त्वस्य वै ततः ।
तत्त्वनिर्मुक्तदेहस्य केवलस्य चिदात्मनः ॥ १८९ ॥

उदेति महदानन्दः सा शक्तिर्वैष्णवी परा ।
अलुप्तकर्मकर्तारं जीवं कृत्वा तमात्मसात् ॥ १९० ॥

यत्रोदिता च तत्रैव पुनरेवावतिष्ठते ।
तच्च संकल्पनिर्मुक्तमवाच्यं विद्धि सत्तम ! ॥

एवं स्वस्थानमासाद्य त्यक्त्वा भौतं च विग्रहम् ।
तत्र स्थितो दहेत् पिण्डं शक्तितन्मात्रवर्जितम् ॥

पाट्कौशिकमसारं च निर्दण्ड(ग्ध)तृणरूपिणम् ।
इच्छानिर्मथनोत्थेन मन्त्रजेन तु वह्निना ॥ १९३ ॥

तेनाङ्घ्रिदेशादारभ्य तं पिण्डं ज्वलितं स्मरेत् ।
दक्षिणाङ्घ्रेरथाङ्गुष्ठप्रान्तदेशे शिखाक्षरम् ॥

ध्यात्वा युगान्तहुतभुग्रूपज्वालशतावृतं ।
तेन स्वविग्रहं ध्यायेत् प्रज्वलन्तं समन्ततः ॥

नाभिकन्दान्तरोद्देशे नेत्रमन्त्रेण पावकम् ।
ध्यायेज्ज्वालागणोपेतं निनयेत्तेन भस्मसात् ॥

दहनेन स्वकं देहं हृन्मन्त्रं भावयंस्ततः ।
दहजां भावयेज्ज्वालां मन्त्रनाथे लयं गताम् ॥

भस्मराशिसमप्रख्यं शान्ताग्निं तमनुस्मरेत् ।
(साह्लादेन सुसूक्ष्मेण व्यापिनोकारपूर्विणा ॥

नमोऽन्तेन तु तद्भस्मपातं ध्यानान्वितस्ततः ।)
तद्वाचकेन तद्भस्म यात ध्यात्वा इतस्ततः ॥ १९९ ॥

ततः समन्त्रं तद्बिम्बं पूर्णचन्द्रायुतोपमम् ।
ध्यात्वा तन्निःसृतेनैव त्वमृतौघेन चाम्बरात् ॥

प्लावयेद्देहजां भूतिं सर्वं ध्यायेत् सुधात्मकम् ।
तत्त्वाधारमयीं शक्तिं मध्ये विन्यस्य वैष्णवीम् ॥

बीजभूता च सर्वस्य तदुत्थं चाम्बुजं स्मरेत् ।
षडध्वं तत्त्वभूतं च सितं तेजोमयं शुभम् ॥ २०२ ॥

मण्डलत्रितयाकीर्णं स्फुरत्किरणभास्वरम् ।
मन्त्रात्मानं च तन्मध्ये ध्यायेन्नारायणं प्रभुम् ॥

निष्कलं केवलं शुद्धं पञ्चसन्मन्त्रविग्रहम् ।
तन्मन्त्रशक्तिभिर्भूयो भावयेन्मूर्छितं द्विज ! ॥ २०४ ॥

व्योमादिपञ्चभूतीयं मान्त्रमीश्वरपञ्चकम् ।
तेभ्योऽथ प्रसरन्तं च व्योमाद्यं विभवं स्मरेत् ॥

संयोगजनितं पिण्ड ध्यायेद्विभवपञ्चकात् ।
सहस्रसूर्यसंकाशं शतचन्द्रगभस्तिमत् ॥ २०६ ॥

निर्मलस्फटिकप्रख्यं जरामरणवर्जितम् ।
जनित्वैव स्वपिण्डं तु परमं भोगमोक्षयो॰ ॥ २०७ ॥

साधन मुनिशार्दूल ! सहजं सर्वदेहिनाम् ।
तमासाद्य क्रमेणैव सिसृक्षालक्षणेन च ॥ २०८ ॥

स्वपदान्निस्तरङ्गाच्च कृत्वा शक्त्या सहोदयम् ।
स्वानन्दं च महानन्दात् स्वानन्दास्याप्यपाश्रयात् ॥

मारीचं नाभसं चक्रं तस्माद्रूपं स्वकं च यत् ।
सूर्यकोटिकराभासं प्रस्फुरन्त स्वभासा ॥ २१० ॥

कदम्बगोलकाकार निशाम्बुकणनिर्मलम् ।
एवमात्मानमानीय स्वस्थानात् स्वात्मना द्विज ! ॥

विशेन्मन्त्रशरीरं स्वं ब्रह्मरन्ध्रेण पूर्ववत् ।
ज्योत्स्नानाडीपथेनैव पुर्यष्टककजान्तरम् ॥ २१२ ॥

स्ववाचकं भावयन् वै ध्वनिना निष्कळेन तु ।
ततस्तु निष्कलान्मन्त्राद्यावद्भौतं च विग्रहम् ॥

पञ्चक चाभिमानं तु आसाद्यालोकविग्रहम् ।
स्वमन्त्रादमृतौघेन सेचयेद्विग्रहं स्वकम् ॥ २१४ ॥

ततः स्वतन्त्रं तद्बिम्बमाकृष्य हृदि विन्यसेत् ।
निस्तरङ्गा परा शक्तिर्महानन्दमयी च सा ॥ २१५ ॥

स्वानन्दाच्च प्रभाचक्रं रूपमात्मीयभास्वरम् ।
सौषुम्नस्तादृशो मार्ग. पिण्डमन्त्रश्च निष्कल. ॥२१६॥

सत्याद्यो मन्त्रशक्त्योघो धारणेश्वरपञ्चकम् ।
तेषा विभवसङ्घो य. पिण्डस्तत्सामुदायिकः ॥

स्मरेल्लोलीकृतं सर्वमपृथक् च पृथक स्थितम् ।
स्थूलसूक्ष्मपराख्येन त्रिविधेन तु सत्तम ! ॥ २१८ ॥

करणेनोदिता सम्यक् शुद्धिरेषा च भौतिकी ।
शोधितै. पञ्चभिर्भूतै॰ पृथिव्याद्यैः स्वपश्चिमै. ॥ २१९ ॥

घ्राणजिह्वाक्षित्वक्छ्रोत्ररूपज्ञानेन्द्रियाणि च ।
उपस्थपायुपादाख्यपाणिवागात्मकानि च ॥ २२० ॥

कर्मेन्द्रियाणि पञ्चैव शोधितानि भवन्ति हि ।
तत्रापि पूरकादीना काल आयामवत्स्मृतः ॥ २२१ ॥

धारणापञ्चकेनैवं मुख्यकल्पे प्रकीर्तिता ।
अनुकल्पे तु ता वक्ष्ये यथावद्विनिबोध मे ॥ २२२ ॥

क्ष्माजलानलवाय्वाख्यनाभसीयं महामते ! ।
धारणापचकं चैव संक्षिप्तं विहित द्वयम् ॥ २२३ ॥

दहनाप्यायनाच्चैव यदा देहात् स्वशुद्धये ।
नाभिक्षेत्रगतं ध्यायेन्मारुतं कवचेन तु ॥ २२४ ॥

नयेद्देहगतं तेन शोषभाव रसं द्विज ! ।
नाभिकन्दान्तरोद्देशे नेत्रमन्त्रेण पावकम् ॥ २२५ ॥

ध्यायेज्ज्वालागणोपेतं निनयेत्तेन भस्मसात् ।
दहनेन स्वकं देहं हृन्मन्त्रं भावयंस्तत ॥ २२६ ॥

तिष्ठेद्गगनमाश्रित्य शिरोमन्त्रेण भावयेत् ।
जलं मुक्ताफलस्वच्छं तदुद्भूतमथ स्मरेत् ॥ २२७ ॥

शिखामन्त्रेण कमलं वसुधागुणलक्षणम् ।
तदधिष्ठातृभावेन नयेदात्मनि सत्तम ! ॥ २२८ ॥

ध्यायेत्तदुत्थितं कोशं भूततत्वमयं वपु. ।
हृदयादीन् स्मरन् पञ्चतत्वानां कारणात्मनाम् ॥

तत॰ समाचरेद्व्यासं तस्मिन् ध्यानोत्थिते पुरे ।
मुख्यानुकल्पभेदेन भूतशुद्धि. प्रकीर्तिता ॥ २३० ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहिताया क्रियाकाण्डे समाधिव्याख्यान नाम तृतीयोऽध्याय ॥

॥ श्रीः ॥

चतुर्थोऽध्यायः ॥

संशुद्धविग्रहो मन्त्री मन्त्रन्यास समाचरेत् ।
येन विन्यस्तमात्रेण देवदेवसमो भवेत् ॥ १ ॥

पूजादिसर्वकार्याणामधिकारी(र) च जायते ।
भवेद्वै सर्वसिद्धीनामाविर्भावस्तु येन च ॥ २ ॥

य कृत्वा निर्भयस्तिष्ठेद्देशे दुष्टसमाकुले ।
विजयश्चापमृत्यूना स्यात्येन विहितेन च ॥ ३ ॥

व्यापारो मानसो ह्येष न्यासाख्यो यद्यपि स्मृत ।
न वध्नाति स्थिति सम्यक् तथाऽपि क्रियया विना ॥

करणाधीना पुनस्सा तु प्राङ्न्यासस्तु तयो स्थित ।
अथ हस्तद्वये न्यस्य दीप्तिमद्द्वादशाक्षरम् ॥ ५ ॥

मणिबन्धाद्यथाग्रान्तं त्वादित्यातपवत्तत. ।
सृष्टिसस्थितिसंहारन्यासं कुर्याद्यथाविधि ॥ ६ ॥

दक्षहस्ततलारम्भो वामान्त सृष्टिसंज्ञित ।
दक्षाङ्गुष्ठादिको वामतलान्त. स्थितिसंज्ञितः ॥ ७ ॥

वामहस्ततलारम्भो दक्षान्त इतर स्मृत. ।
सृष्टौ दक्षतले तारं तदङ्गुष्ठादिके क्रमात् ॥ ८ ॥

अङ्गुलीना तु दशके यावद्वामकनिष्ठिका ।
विन्यस्य दशवर्णास्तु न्यसेद्वामतलेऽन्तिमम् ॥ ९ ॥

स्थित्याख्ये दक्षिणाङ्गुष्ठादारभ्याङ्गुलिपञ्चके ।
तत्तलान्तं तु ताराद्यं वर्णषट्कं तु विन्यसेत् ॥ १० ॥

वामाङ्गुष्ठात्तत्तलान्तं विन्यसेत् षट्कमुत्तरम् ।
सहाराद्येऽक्षर न्यस्य वामहस्ततलेऽन्तिमम् ॥ ११ ॥

अप्ययाख्यक्रमेणैव दक्षहस्ततलावधि ।
ततो वर्णगण शेषं न्यसेत् प्रणवपश्चिमम् ॥ १२ ॥

तर्जन्या तत्तदङ्गुष्ठे तत्तदङ्गुष्ठकेन च ।
तर्जन्यादिषु शाखासु तत्तन्मध्यमया तले ॥ १३ ॥

न्यास कुर्याद्यथायोगं ततोऽङ्गन्यासमाचरेत् ।
आरभ्य दक्षिणाङ्गुष्ठाच्छाखासु दशसु द्विज ! ॥

क्रमाद्वामकनिष्ठान्तं दक्षिणादि तलद्वये ।
हृदादि द्वादशाङ्गानि भास्वद्रूपाणि विन्यसेत् ॥ १५ ॥

दक्षिणे मध्यतः पद्मं प्रस्फुरत्किरणोज्ज्वलम् ।
गदां वामतले न्यस्येज्ज्वलन्तीं स्वेन तेजसा ॥ १६ ॥

दक्षे महाप्रभं चक्रं शङ्खं वामतले न्यसेत् ।
किरीटं दक्षिणे हस्ते श्रीवत्सं वाममध्यतः ॥ १७ ॥

कौस्तुभं दक्षिणतले वनमाला तथाऽपरे ।
श्रियं दक्षिणहस्ते तु पुष्टिं वामतले न्यसेत् ॥ १८ ॥

अङ्गुष्ठाद्दक्षिणादादौ वामान्तं मूलदेशतः ।
गारुडं विन्यसेन्मन्त्रं दशस्वङ्गुलिषु क्रमात् ॥ १९ ॥

अनेन विधिना पूर्वं हस्तन्यासं समाचरेत् ।
या विभो. परमा शक्तिर्हृत्पद्मकुहरान्तगा ॥ २० ॥

वायव्यं रूपमास्थाय दशधा संव्यवस्थिता ।
इच्छया स्वप्रवाहेण पाणिमार्गेण निर्गता ॥ २१ ॥

नाडीदशकमाश्रित्य ता एवाङ्गुलयो मता. ।
अत एव द्विजश्रेष्ठ ! शक्त्याख्ये प्रभुविग्रहे ॥ २२ ॥

पूर्वं मन्त्रगणं न्यस्य ततो भूतमये न्यसेत् ।
विग्रहे मन्त्रसंघातं यथा तदवधारय ॥ २३ ॥

आमूर्ध्नश्चरणान्त च द्वादशार्ण न्यसेत्तनौ।
व्यापकत्वेन विन्यस्य पादाद्भूय. शिरोऽन्तिमम् ॥

सृष्टिसस्थितिसंहारन्यासं कुर्यात्तत. परम्।
मूर्धादिपादपर्यन्तः सृष्टिन्यासः प्रकीर्तित. ॥ २५ ॥

पादादिश्च शिरोऽन्तस्तु संहृतिन्यास उच्यते।
यथाऽभिलषितं कुर्यात् सर्वथा कर्तुरिच्छया ॥ २६ ॥

मूर्ध्नि वक्त्रेऽसयुग्मे च क्रमात् सव्येतरे हृदि।
पृष्ठे नाभौ तथा कट्या जानुनोरथ पादयो ॥ २७ ॥

क्रमेण प्रणवाद्य तु यान्तं द्वादशवर्णकम्।
विन्यसेदेष सृष्ट्याख्यो न्यास. प्रोक्तो यथार्थतः ॥

प्रणवाद्यान्न्यसेद्वर्णान् स्थानेषु हृदयादिषु।
अङ्गोपाङ्गोक्तमार्गेण स्थितिन्यास. प्रकीर्तित. ॥ २९ ॥

पादयोर्जानुनो. कट्या नाभौ पृष्ठे हृदन्तरे।
सव्येतरसयुग्मे च वक्त्रे मूर्धनि च न्यसेत् ॥ ३० ॥

यादिवर्णास्तु तारान्तानेष संहारसंज्ञक.।
ततो हृदादिस्थानेषु अङ्गोपाङ्गानि विन्यसेत् ॥ ३१ ॥

न्यसेत्तु हृदये ज्ञानं यतो व्यज्येत तत्र तत्।
ऐश्वर्य शिरसोद्देशे यस्मादुपरि तिष्ठति ॥ ३२ ॥

प्राकृत तात्त्विक वाऽपि सर्वत्र मुनिसत्तम!।
हृदग्नेरूर्ध्वगायां तु शिखाया शक्तिमन्त्रराट ॥ ३३ ॥

वलं चाखिलगात्राणा त्वगतं वायुना सह।
मूर्छितं सर्वगात्रैर्यत्तद्वीर्य हस्तयोर्न्यसेत् ॥ ३४ ॥

अन्तर्बोधस्वरूपं यत् प्राकृतध्वान्तशान्तिकृत्।
तेजस्तत्तैजसे स्थाने न्यासकाले समस्यते ॥ ३० ॥

यथोक्तविधिना सोऽयं विधिरूर्ध्व प्रवक्ष्यते।
तत पद्मगदाचक्रशङ्खान् प्राग्वत्तु विन्यसेत् ॥ ३६ ॥

किरीटं मूर्ध्नि विन्यस्य(स्येत) वह्न्यर्कायुतदीधितिम्।
श्रीवत्स वक्षसोऽवामे पूर्णेन्दुसदृशद्युतिम् ॥ ३७ ॥

कौस्तुभ हृदये न्यस्य चण्डदीधितिलक्षणम्।
नानाञ्जवनपुष्पोत्था वनमाला च कण्ठत. ॥ ३८ ॥

आचासाद्दक्षिणे भागे न्यस्या श्रीरुत्तरे तथा।
पुष्टि गुल्फावसाने च गरुडं चोरुमूलत. ॥ ३९ ॥

भास्वद्रूपाणि चाङ्गानि चिदेकविभवानि च।
किरीटादीनि चान्यानि सर्वाण्याभरणानि च ॥ ४० ॥

यथा प्रसिद्धरूपाणि स्वस्वकान्तिधराणि च।
मन्त्रन्यासं तु कृत्वैवं यथोद्दिष्टक्रमेण तु ॥ ४१ ॥

आमूलमन्त्रान् सर्वासा मुद्राणा वन्धमाचरेत्।
स्व स्व(चो) उदीरयन्मन्त्र परमेश्वरवत्तत. ॥ ४२ ॥

संचिन्त्य रूपमात्मीयं साभिमानं महामते!।
मूलमन्त्राभिजप्तं च कुसुमं च शिखावधौ।
स्वविग्रहे तु शिरसा दद्याद्गन्धाम्बुभावितम् ॥ ४३ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहिताया क्रियाकाण्डे मन्त्रन्यासविधिर्नाम चतुर्थोऽध्याय ॥

॥ श्री. ॥

पञ्चमोऽध्यायः ॥

कृत्वैवं तु तत. पश्चान्मानसं यागमारभेत्।
पद्मासनादिकं बध्वा नाभौ ब्रह्माञ्जलि दृढम् ॥ १ ॥

मनस्युपरतं कुर्यादक्षग्रामं वहि. स्थितम्।
चित्तं बुद्धौ विनिक्षिप्य ता बुद्धिं ज्ञानगोचरे ॥ २ ॥

ज्ञानभावनया कर्म कुर्याद्वै पारमार्थिकम्।
चतुश्चक्रे नवद्वारे देहे देवगृहे पुरे ॥ ३ ॥

कण्ठकूपधरारूढं हृत्पद्म यदधोमुखम्।
तत्कर्णिकावनेर्मध्यदे(ह)शमाश्रित्य भावयेत् ॥ ४ ॥

नाभिमेढ्रान्तरे ध्यायेच्छक्तिं चाधाररूपिणीम् ।
कालाग्निं च तदूर्ध्वे तु अनन्तं तस्य चोपरि ॥ ५ ॥

तदूर्ध्वे वसुधां देवीं चतुर्भिः पूरितं(ता) स्मरेत् ।
कन्द(रात्)नाभ्यवसानं च चतुर्धा भाजितैः पदैः ॥ ६ ॥

नाभौ क्षीरार्णवं ध्यात्वा ततः पद्मं समुत्थितम् ।
सहस्रदलसंयुक्तं सहस्रकिरणावृतम् ॥ ७ ॥

सहस्ररश्मिसंकाशं तत्पृष्ठे चासनं न्यसेत् ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च चतुर्थकम् ॥ ८ ॥

अवतार्य स्वमन्त्रेण आग्नेयाद्ये चतुष्टये ।
चतुष्कमेतद्विन्यस्य यावदीशानगोचरम् ॥ ९ ॥

तत्पूर्वदिग्विभागादि यावदुत्तरगोचरम् ।
न्यस्याधर्मं तथाऽज्ञानमवैराग्यमनैश्वरम् ॥ १० ॥

पुरुषाकृतयस्त्वेते बन्धूककुसुमोज्ज्वलाः ।
प्रागीशानदिगन्ते तु प्रागाग्नेयदिगन्तरे ॥ ११ ॥

यातुवारुणमध्ये तु वायव्यवरुणान्तरे ।
ऋग्वेदाद्यं चतुष्कं तु कृताद्यं युगसङ्घकम् ॥ १२ ॥

ईशानसोमदिङ्मध्ये अन्तकाग्निदिगन्तरे ।
याम्यराक्षसमध्ये तु सोमसामीरणान्तरे ॥ १३ ॥

तन्मूर्ध्नि कालचक्रं तु, तन्मध्येऽव्यक्तपङ्कजम् ।
वायव्योद्भूतनालं तु विकाराधारसंस्थितम् ॥ १४ ॥

भूतान्याधारशक्तौ तु तन्मात्राः कालपावके ।
वागादिकं तथैवाक्षमनन्ते व्याप्य संस्थितम् ॥ १५ ॥

श्रोत्रादिकं धरण्यां च मनः क्षीरार्णवे द्विज !
अनन्तदलपद्मे तु अहङ्कारः समाश्रितः ॥ १६ ॥

द्विरष्टकं च धर्माद्यमधिष्ठाय च धी(.)स्थिता ।
तदूर्ध्वपद्मे प्रकृतिर्गुणसाम्यविभागिनी ॥ १७ ॥

धामत्रयाश्रितः कालो भावाख्ये पुरुषस्थितिः ।
आधेयमब्जसंभूत ! स्वे विकारे स्वरूपिणि ॥ १८ ॥

स्वयमाद्यन्तयो रुद्धं सूत्रे (त्रं) मणिगणो (णे) यथा ।
प्रागाधारात्मना चैव विश्वाकारतया ततः ॥ १९ ॥

नानामन्त्रात्मना ह्यूर्ध्वे निस्तरङ्गो हि तत्वतः ।
अभ्यस्तवासनानां च कर्मिणां कर्मशान्तये ॥ २० ॥

तदिच्छाविष्कृतानां च भोगकैवल्यसिद्धये ।
अनाद्यविद्याविद्धानामियत्तैषा(त्तेषा) ह्यवस्तुनि ॥

नातोर्ध्वे तत्वदृष्टीनां तत्वतो वाऽस्ति पौष्कर ! ।
न तिर्यक्पृष्ठपूर्वे च न हेयादिविकल्पना ॥ २२ ॥

या विशेषविकल्पैस्तु प्रत्यस्तमितलक्षणा ।
शक्तिर्भगवतो विष्णोः साधाराख्याऽभिधीयते ॥

प्राग्वदासनसामर्थ्यं बीजमादाय चेच्छया ।
अव्यक्तव्यक्तरूपा च यथादित्यकदम्बकम् ॥ २४ ॥

भाविप्रसरधर्मित्वाद्विश्वबीजचयस्य च ।
साम्प्रतं संहृताङ्गस्य कूर्मसंज्ञा विधीयते ॥ २५ ॥

यो विश्वं निर्दहत्यन्ते कालवैश्वानरात्मना ।
दैवतं यस्य भगवान् कूर्मात्मा लोकपूजितः ॥ २६ ॥

अजहद्भगवच्छक्ति(.)सामर्थ्यं पुनरेव तत् ।
अनन्तं सविकल्पानां यद्विश्वाङ्कुरमव्ययम् ॥ २७ ॥

नयत्यूर्ध्वं यथा कूर्मो ग्रीवां स्वात्मनि संवृ(हृ)ताम् ।
शेषाख्यफणिदैवत्यं तदनन्तं हि गीयते ॥ २८ ॥

आश्रयं बीजभूतानां चतुर्णां यन्महामते ! ।
तद्गन्धविटपस्तस्माद्व्यक्तिमभ्येति पूर्ववत् ॥ २९ ॥

भूरात्मा भगवान् यस्मिन्नभिमानाख्यदेवता ।
फलं रसात्मकं तस्माद्व्यज्यत्यमृतलक्षणम् ॥ ३० ॥

यस्याभिमानिकं रूपं क्षीरार्णवमनश्वरम् ।
तस्मादनन्तरत्नोत्थकान्तिं कमलमब्जज ! ॥ ३१ ॥

व्यक्तं यस्य च वै शक्तिर्नित्या दहनलक्षणा ।
तदनन्तदलं विद्धि दिव्यं विकसितं सितम् ॥ ३२ ॥

परपूर्वेण भेदेन एकद्वित्रिगुणात्मना ।
स्थिता बुद्धिर्विकारैस्तु सह चाष्टाभिरब्जज ! ॥ ३३ ॥

यत्राधिदेवतात्वेन वाग्विकारा ऋगादयः ।
तथा कालविकारा ये चत्वारः कृतपूर्वकाः ॥ ३४ ॥

तत्र रूपं हि सर्वेषा सत्तामात्रं परं स्मृतम् ।
व्यक्तिकारणधानाभि. साङ्गाभिरपरं तु तत् ॥ ३५ ॥

तृतीयमभिमानाख्यदेवतादेहलक्षणम् ।
तस्माद्वै वायुदैवत्यं स्पर्शतन्मात्रमेव च ॥ ३६ ॥

जाता यस्य स्फुटा व्यक्तिर्नानाचक्राङ्गलक्षणा ।
तस्मादाकाशदैवत्यं शब्दमुत्पन्नमब्जज ! ॥ ३७ ॥

सर्वाङ्गसंहृता चक्रव्यक्तिर्यस्यामलं वपु. ।
गीयते व्योमवृत्तं तत् प्रधानकमलालयम् ॥ ॥ ३८ ॥

[2] यस्यान्तस्थानि भूतानि यस्मिन् सर्वं प्रतिष्ठितम् ।
[०] यस्मादुन्मेषपूर्वं हि महत्प्रलयपश्चिमम् ॥ ३९ ॥

[4] प्रवर्तते कालतानं भेदकृत् सर्ववस्तुषु ।
[5] वाङ्मात्रेणैव भिन्नस्य अभिन्नस्यैव तत्वतः ॥ ४० ॥

[1] ज्ञानादिगुणवृन्दस्य ब्रह्मणश्चतुरात्मन. ।
नित्योदितत्वान्नित्यत्वाद्व्यापकत्वात् परं पदम् ॥

पूर्णत्वात् षड्गुणत्वाच्च न कालो लब्धगोचरः ।
शब्दादादित्यदैवत्यमहङ्कार महामते ! ॥ ४२ ॥

मनश्च चन्द्रदैवत्यमहङ्कारादभूत्तत. ।
बुद्धि. प्रकाशदैवत्या व्यक्तानन्दात्मनो विभो. ॥ ४३ ॥

दलादिकर्णिकान्ताया. सूर्यपूर्वादिकल्पना ।
प्रधानकमलस्यैषा मूर्तिर्गुणमयी स्मृता ॥ ४४ ॥

बुद्ध्यादीना च तत्वाना कारणं यदनश्वरम् ।
अव्यक्ताख्यं महाबुद्धे ! ह्यभिन्नगुणमूर्तिभृत् ॥ ४५ ॥

स्वगुणानधरीकृत्य स्वप्रतिष्ठं प्रवर्तते ।
अध्यात्मलक्षणावृत्तिः सर्वाः संहृत्य वै हृदि ॥ ४६ ॥

उत्पद्यन्ते हि चैतस्मद्भावाः सर्वे द्विजोत्तम ! ।
विपद्यन्तेऽत्र वै भूयस्तस्मात्पद्मं पर त्विदम् ॥ ४७ ॥

चिदादित्यकलाजालं ग्राह्यग्राहकलक्षणम् ।
संक्रान्तं यत्र स्वं धाम स्वसामर्थ्यं च वेत्यपि ॥ ४८ ॥

विमलाख्या विमलता ज्ञानशक्तिं(ज्ञ)ह्यताब्जज ! ।
प्रभुयाख्या प्रभुता चैव सत्यसंज्ञा च सत्यता ॥

नित्याख्या नित्यता चैव प्रकाशाख्या प्रकाशना ।
अनन्तता ह्यनन्ताख्या कला कमलसभव ! ॥ ५० ॥

सहानुग्रहशक्त्या वै ज्ञेयाऽनुग्रहता परा ।
द्विचतुष्क कलाना यत् स्वप्रतिष्ठं हि वर्तते ॥ ५१ ॥

संवर्तते परं चैव पुनरेव निवर्तते ।
परापरविभागेन कलास्त्वेताश्चिदात्मन. ॥ ५२ ॥

प्रोक्ता. कमलसंभूत ! यासामानन्त्यमुत्तमम् ।
यथाक्रमेण सर्वेषा ध्यानमाकर्णयामलम् ॥ ५३ ॥

शान्तमुज्झितचेष्ट च सितमन्तर्मुखं स्थितम् ।
आधेयोल्लिङ्गिताकारमाधाराख्यं स्मरेत् प्रभुम् ॥ ५४ ॥

कूर्ममुद्रान्वितं कूर्मवक्त्र निष्टप्तरुक्मभम् ।
शङ्खपद्मधर कूर्म स्वस्तिकेन स्थित स्मरेत् ॥ ५५ ॥

मुञ्चन्तमनिशं तेजो देहार्द्रीपणमुत्कटम् ।
तिर्यगूर्ध्व च धातार ज्वालाजालमिवोज्ज्वलम् ॥

अनन्तशशिसकाशमनन्तमथ संस्मरेत् ।
सहस्रफणमालाढ्य सहस्रभुजभूषितम् ॥ ५७ ॥

स्वपाणिसंपुटेनैव शोभयन् स्वान्तभूस्थलम् ।
सितारविन्दशङ्खाक्षसूत्रचक्रकरान्वितम् ॥ ५८ ॥

पतनाशङ्किबुद्धेर्वै वित्रस्तमनसस्तु च ।
मा भैरित्यभयं यच्छन्नाब्रह्मभवनस्य च ॥ ५९ ॥

निःशेषरत्नहेमाङ्गा प्रावृट्छ्रियमिवोज्ज्वलाम् ।
पद्मासनेनोपविष्टां ध्यायेत् पद्माञ्जलि धराम् ॥ ६० ॥

फुल्लकुन्दावदातं च सितस्निग्धजटाधरम् ।
ध्यायमानं सितं शङ्खं मुक्तादामैरलङ्कृतम् ॥ ६१ ॥

विस्तीर्णसर्वावयवं विक्षिप्तोरुद्वयं स्थितम् ।
विक्षिप्तजानुपादं च संस्मर्तव्यं पयोनिधिम् ॥ ६२ ॥

सुपक्काम्रफलश्यामपाणिपादतलोज्ज्वलम् ।
रक्ताक्षं च तथा विप्रकीर्णकेशं स्मिताननम् ॥ ६३ ॥

पद्मासनेनोपविष्टमलिमालाशताकुलम् ।
पद्ममुद्रान्वितं पद्मं सुदीर्घचरणं स्मरेत् ॥ ६४ ॥

तुहिनाच्छोपलस्वच्छमुक्ताफलशशिप्रभाः ।
मृगेन्द्रस्कन्धवदना धर्मज्ञानादयश्चतु ॥ ६५ ॥

पद्मरागप्रवालाग्निसदृशाडिम्बफलोज्ज्वलाः ।
अन्तर्दयोपरक्ताश्च राजराजेश्वरोपमाः ॥ ६६ ॥

द्विरष्टवर्षवद्विद्धि चत्वारोऽधर्मपूर्वकाः ।
हेमचम्पकस्वद्योतहरितालदलोज्ज्वलाः ॥ ६७ ॥

वाजिवक्त्राः स्मृता वेदाः सपूर्णनरलक्षणाः ।
एवं वृषेन्द्रवदना युगा ब्रह्मन् ! कृतादयः ॥ ६८ ॥

सुपक्वाम्रातसीपुष्पनीलाब्जशुकसन्निभा ।
सर्वे सद्रत्नसत्पुष्पसदलङ्करणान्विताः ॥ ६९ ॥

शङ्खपद्मधराः सर्वे वराभयकरास्तु वै ।
आधेयचक्रविन्यस्तमस्तका स्वात्मसिद्धये ॥ ७० ॥

समर्पितान्तःकरणाः परस्मिन् मन्त्रकारणे ।
युगान्तार्काग्निसङ्काशखगोमण्डलमध्यगम् ॥ ७१ ॥

स्वमुद्रान्वितपाणि च वल्गन्तं हेतिराट स्मरन् ।
चिन्त्यमव्यक्तपद्म च हिमहेमाग्निभास्वरम् ॥ ७२ ॥

शान्तमष्टभुजं सौम्य सस्थितं स्वस्तिकेन तु ।
स्फटिकोपलकान्तिं च चिद्धन ध्रुवमव्ययम् ॥ ७३ ॥

सर्वशक्तिनिधि ध्यायेदमूर्त चित्प्रभाकरम् ।
सर्वे स्वविभवान्तस्थास्तत्राधारात्मनो विभोः ॥ ७४ ॥

स्वसत्ताभासितं सत्वं गुणसत्वाद्विलक्षणम् ।
विभवं विद्धि विप्रेन्द्र ! ज्वालौघ कच्छपात्मनः ॥७५॥

स्वभोग नागनाथस्य भूः क्षितेः काञ्चनी तथा ।
आसारमामृतं दिव्यं वीच्योघैस्तु समन्वितम् ॥ ७६ ॥

क्षीरोदकीयविभवं परिज्ञेयमनश्वरम् ।
बीजकोशं सकिञ्जल्कं कमलस्य दलान्वितम् ॥ ७७ ॥

धर्माद्यस्य चतुष्कस्य सद्विवेकं सुनिर्मलम् ।
द्वि(क)द्विकस्या(त्व)धर्मादेरविद्याविभवं महत् ॥

वाक्प्रपञ्चमहेयं यत् तद्गादिगणस्य च ।
विभवं च कृतादीनां महत्कल्पान्तमात्रुटेः ॥ ७९ ॥

चक्रस्य विभवं विद्धि मं मायाश्रय हि यत् ।
गौणीवृत्तिरमेया या विभव प्राकृत हि तम् ॥ ८० ॥

विमलादिकलाजालं पौरुषं विभवं स्मृतम् ।
विभोर्मन्त्रात्मनश्चेदमशेषममरार्चितम् ॥ ८१ ॥

आमहन्मन्त्रनाथेभ्यो नानामन्त्रगणं हि यत् ।
स्वशक्तिनिचयोपेत तद्विष्णोः परमात्मनः ॥ ८२ ॥

विभव कमलोद्भूत ! ज्ञात्वेवं संयजेत् सदा ।
शब्दव्यक्तिस्तदूर्ध्वे तु स्थितार्केन्द्वग्निलक्षणा ॥ ८३ ॥

विद्युत्प्रभास्वरा नाडी त्वव्यक्तध्वनिविग्रहा ।
व्यक्तचक्रत्रयस्योर्ध्वे वर्तते या महामते ! ॥ ८४ ॥

निःसृता ब्रह्मरन्ध्रेण गता सूर्यपथात् परम् ।
वायुद्वारेण पाताल भित्वा याता स्वगोचरम् ॥

सङ्कल्पविषयः सर्वस्तद्वद्ध प्रतितिष्ठति ।
सूत्रे मणिगणो यद्वन्मध्यनाडी ह्यतः स्मृता ॥ ८६ ॥

लक्ष्यस्थाने तु पूर्वोक्ते तस्यामभ्यन्तरे तु वै ।
संपुटे शशिसूर्याख्ये निमेषोन्मेषलक्षणे ॥ ८७ ॥

तत्राब्जं चार्कमालम्ब्य परा वारभ्रमरी स्थिता ।
या सर्वमन्त्रजननी शक्तिः शान्तात्मनो विभोः ॥

नदन्ती वर्णजं नादं शब्दब्रह्मेति यः स्मृतः ।
अकारपूर्वो हान्तश्च धारा सन्तानरूपवृक् ॥ ८९ ॥

नादावसानगगने देवोऽनन्तः सनातनः ।
वरदाभयदेनैव शङ्खचक्राङ्कितेन तु ॥ ९० ॥

त्रैलोक्यधृतिदक्षेण युक्तः पाणिद्वयेन तु ।
शान्तः सवित्स्वरूपस्तु भक्तानुग्रहकाम्यया ॥ ९१ ॥

अनौपम्येन वपुषा ह्यमूर्तो मूर्तता गतः ।
तस्मादावाहनं कुर्याद्यथा तदवधारय ॥ ९२ ॥

स्वशक्त्याधिष्ठितं कृत्वा स्वस्वभावस्वभावया ।
ग्राह्यग्राहकरूपाया एवमव्यक्तपुष्करम् ॥ ९३ ॥

समास्ते केवल शुद्धमीषत्काललवं द्विज ! ।
सामान्यचिन्मयो भूत्वा साप्रतं शक्तयः कलाः ॥

अस्मिता लक्षणं धर्मं स्वकं सम्यङ्निरस्य च।
प्रवर्तते तन्निरासात् आनन्दमतुल द्विज ! ॥ ९५ ॥

स्वप्रकाशमनौपम्यं तमिच्छेन्मन्त्रमव्ययम्।
परिच्छेद्या दिगाद्यैस्तु प्रकाशाकाशवर्तिनीम् ॥ ९६ ॥

कृत्वाश्रित्य कलामूर्तिं समनन्तरमञ्जज !।
विहायोमध्यदेशं च प्रकाशगहनात्तत. ॥ ९७ ॥

धृतिशक्त्यासने स्वेऽथ उपविश्य यथासुखम्।
विद्यादेहेन सूक्ष्मेण भूतदेहानुकारिणा ॥ ९८ ॥

अथानन्दकदम्बं (स्य स्वस्वरूपात्) तत्स्वरूपपृथक्
रञ्जयेच्छास्त्रदृष्टेन व्यवहारगतेन च ॥ [स्थितम्।

स्वकेनालम्बनेनेव देवतालक्षणेन च।
मणिर्यथा विभागेन नीलपीतादिभिर्युत· ॥ १०० ॥

रूपभेदमवाप्नोति ध्यानभेदात्तथा विभु।
एवं प्रवर्तते सम्यङ्मन्त्ररूपं परात्मकम् ॥ १०१ ॥

हृत्पुण्डरीकमध्यस्थं चैतन्यज्योतिरव्ययम्।
कदम्बगोलकाकारं विश्वरूपं मणिप्रभम् ॥ १०२ ॥

रत्नदीपसमाकारमच्छिन्नप्रसरं महत्।
श्रोत्रपूर्वैः खरन्ध्रैस्तु रश्मयस्तस्य निर्गता. ॥ १०३ ॥

छिद्रपूर्णाद्यथा कुम्भान्महादीपयुताद्द्विज !।
याति भासा गणो वाह्ये शरीरादेवमेव हि ॥ १०४ ॥

मान्त्रो रश्मिसमूहस्तु नाडीभि. प्रसरेद्बहि.।
अप्रत्यक्षः सदाक्षाणां मन्त्रात्मा यद्यपि द्विज ! ॥

तथाऽप्यनेन न्यायेन प्रत्यक्षमुपलभ्यते।
वहि. स्थितं यद्भूतानां क्ष्मादीनां गुणपञ्चकम् ॥

तेन तच्चोपलब्धव्यं प्रत्यक्षेण परोक्षकम्।
तस्य भौमो गुणस्थैर्यं तद्गुणेन हि सा स्थिरा ॥

परस्परानुभावेन संवित्तौ तदुपारुहेत्।
आह्लादो यस्तदीयो हि स तोये चोपलभ्यते ॥१०८॥

तौयो गुणस्तु तस्यास्ति कथं स्यादन्यथा मुने !।
स्मृतमात्रेण मन्त्रेण आह्लादो मनसो महान् ॥ १०९ ॥

रूपात्मना परिणत. स चाग्नौ पारमेश्वरः।
यो रूपाख्यो गुणश्चाग्ने. स मन्त्रात्मनि तिष्ठति ॥

तेजो विना यतो ध्यान कुत्रचिन्नोपपद्यते।
स्पर्शधर्मो हि यो वायो स तदीयो महामुने ! ॥

यो वायव्यो गुण सूक्ष्म. स च मन्त्रतनौ स्थितः।
स चान्त.करणेनैव संयमे स्यात्तदुत्थित. ॥ ११२ ॥

यदाकाशस्य शून्यत्वमस्ति तत् स्यात्तदुद्भवम्।
स मन्त्रात्मनि संश्लिष्टो गुणो ह्यस्ति महामते ! ॥११३॥

अग्राह्यत्वाच्च करणे प्राकृतैर्भावनां विना।
इत्येवं मन्त्रसामर्थ्यं पुरा ज्ञात्वा यथार्थत. ॥ ११४ ॥

सन्निधानं भवेद्येन पूजाकाले ह्युपस्थिते।
तस्मिन्नङ्गानि विन्यस्य प्राक् संपूर्णगुणानि च ॥

स्वमन्त्रैरर्चयेदेव स्थानभेदं विना तत.।
तस्मिन कदम्बकुसुमसदृशे मन्त्रगोलके ॥ ११६ ॥

द्वादशाक्षरमन्त्रेण अभिन्नेन तु साप्रतम्।
व्यक्तिमापद्यते तस्माद्ध्येया हृत्पद्ममध्यगा ॥ ११७ ॥

या परा प्रकृतिर्वाणी चिद्रूपा निर्मलात्मिका(परा)।
पूरिताभ्यक्षभावेन निष्कलेन महात्मना ॥ ११८ ॥

शरीरमिव जीवेन स्थूल सूक्ष्मं द्विलक्षणम्।
मूलमन्त्रादित. प्राग्वत् सर्वमन्त्रगणस्य च ॥

करन्यासं विना देहे न्यास तस्य च संस्मरेत्।
सृष्टिसंस्थितिसंहारन्यासं चापि तथाऽऽचरेत् ॥

तत. खाञ्जखमभ्यात्त्वाप्यूर्ध्वस्थात् सस्मरेच्च्युताम्।
गङ्गा भगवतो मूर्ध्नि तेनामृतजलेन तु ॥

अर्घ्याद्यखिलभोगाना कार्या वै शुभकल्पना।
य यं संकल्पयेद्भोग तं त भाव्यसुधामयम् ॥

पतन्तमम्बराद्वेगादमृताशुपरिप्लुतम्।
साक्षादमृतरूपैस्तु तैस्तैरमृतसंभवै. ॥

बृंहितं मुदितं मग्नं स (प्लुप्तं)मन्त्रराट् स्मरेत्।
ततस्तु देवदेवस्य अर्घ्यं दत्वा यथाविधि ॥

सन्निधिं सन्निरोधं च सामुख्यं च समाचरेत् ।
हृदयादीनि चाङ्गानि लाञ्छनं कमलादिकम् ॥

भूषणं च किरीटाद्य लक्ष्म्याद्या. शक्तयस्तथा ।
गरुडो मूर्तयो वान्या देहे देवस्य या. स्थिताः ॥

व्यापकस्य तथात्वेन स्वे स्वे स्थाने प्रभात्मका. ।
तद्देहसंस्थिता. सर्वे पूजनीया. क्रमेण तु ॥

परिवारं विना मन्त्रै. स्वैः स्वैरर्घ्यादिभिर्द्विज ! ।
लययागो ह्यय विप्र ! हृदादिष्वनुकीर्तित. ॥

तस्माद्धृत्कर्णिकाधारे मूर्तौ वा यत्र कुत्रचित् ।
मूलमन्त्रशरीरस्थं परिवारं यजेत् सदा ॥

याग एष लयाख्यस्तु संक्षिप्त. सर्वसिद्धिद. ।
मन्त्रराट् कर्णिकामध्ये लक्ष्म्याद्या केसरादिषु ॥

साकारा. केवला. सर्वे यत्र भोगाभिधः स तु ।
केवलेन च यागेन पृथग्भूतेन नारद ! ॥

पूजनं कमलादीनामधिकाराभिधः स तु ।
एव कृत्वा लयाख्यं तु यागं भोगाभिधं तथा ॥

तत. क्रमाद्यजेद्देवं भोगैरमृतसंभवैः ।
सुसमस्तादिभिः सम्यक्ताम्बूलान्तैर्यथोदितैः ॥

सर्वं कृत्वा यथायोगं यावदात्मनिवेदनम् ।
मानसान् जयशब्दाश्च कृत्वा विज्ञापयेदिदम् ॥

स्वागतं तव देवेश ! सन्निधिं भज मेऽच्युत ! ।
गृहाण मानसीं पूजां यथार्थपरिभाविताम् ॥

ज्ञात्वा तु सुप्रसन्नं तं प्रसादाभिमुखं प्रभुम् ।
विस्तरेण द्विजश्रेष्ठ ! मानसं यागमारभेत् ॥

संकल्पजनितैर्भोगै. पवित्रैरक्षयैः शुभैः ।
सास्पर्शैरौपचाराख्यैस्तथा चाभ्यवहारिकै. ॥

महद्रूपे प्रभूतैस्तु सप्तलोकसमुद्भवैः ।
यथोदितैस्तु विधिवदुत्कृष्टतरलक्षणै. ॥

एवंविधांस्तु तान् भोगान् सद्भक्त्या विनिवेद्य च ।
समुच्चरन् धिया मन्त्रं प्रसन्नेनान्तरात्मना ॥

गजाश्वधेनुयानानि सुवस्त्रालङ्कृतानि च ।
निवेद्यचान्त(तं)र्मानानि ग्राहयन्त स्मरेत्तत. ॥

आत्मानं ससुतान् दारान् सर्वस्वेन समायुतान् ।
निवेद्य प्रणतो मूर्ध्ना आनन्दाश्रुसमन्वितः ॥

कामधेनुमयीं मुद्रां मनसा मन्त्रसंयुताम् ।
बध्वा संचिन्तयेद्विष्णो. सर्वकामप्रपूरणीम् ॥

ततो विशेषयजनं कल्पयेदच्युतस्य तु ।
सौवर्णपुष्पसंपूर्णमञ्जलिं सप्रसार्य च ॥

मूलमन्त्रं समुच्चार्य प्रयत्नैः पूरकादिकैः ।
दीर्घघण्टारवप्रख्यं यावत्तत्संभवावधि ॥ १४४ ॥

स्फुरद्रश्मिचयाकीर्णं वह्न्यर्केन्दुशतप्रभम् ।
ध्यात्वा नारायणं देवमञ्जलौ सन्निरोधयेत् ॥ १४५ ॥

तमञ्जलिं क्षिपेन्मूर्ध्नि तस्मिन् वै मन्त्रविग्रहे ।
अर्घ्यं निवेदयेद्भूयः पुन. पुष्पाञ्जलिं शुभम् ॥ १४६ ॥

मुद्रां सन्दर्श्य मूलाख्यां मानसीं जपमारभेत् ।
संख्याहीनं यथाशक्ति घण्टाख्यकरणेन च ॥ १४७ ॥

भोगस्थानगताना च लक्ष्म्यादीना क्रमेण तु ।
मनसा दर्शयेन्मुद्रां जपं कुर्यात् सकृत् सकृत् ॥ १४८ ॥

स्तोत्रमन्त्रैः पवित्रैश्च स्तुत्वा सम्यक् प्रसादयेत् ।
एवं क्रमेण विप्रेन्द्र ! कृत्वा यागं तु मानसम् ॥ १४९ ॥

होमं तथाविधं कुर्यान्मोक्षलक्ष्मीप्रदं शुभम् ।
नाभिचक्रान्तरस्थं तु ध्यायेद्वह्निगृहं मुने ! ॥ १५० ॥

त्रिकोणं त्रिगुणेनैव अव्यक्तेनावृतं परि ।
ध्यानारणिं तु निर्मथ्य चिदग्निमवतार्य च ॥ १५१ ॥

सुशुद्धं संस्कृतं दीप्तं सदैवोर्ध्वशिखं द्विज ! ।
वासुदेवात्मकं यस्मात् स वसत्यन्तरात्मसु ॥

प्रोच्चरेन्मूलमन्त्रं तु यावच्छब्दस्य गोचरः ।
तत्रस्थमाहरेद्दिव्यमाहुलादाज्यामृतं परम् ॥ १५३ ॥

ब्रह्मसर्पिस्समुद्राद्यन्निस्तरङ्गात् परिच्युतम् ।
गृहीत्वाऽमृतमार्गेण ब्रह्मरन्ध्रेण संविशेत् ॥

हृदयान्मध्य(न्त्र)मार्गेण चिन्मयेन सदीप्तिना ।
प्रोल्लसन्तं स्मरेन्मन्त्रं ब्रह्मशक्त्युपबृंहितम् ॥ १५५ ॥

स्वकारणाग्नौ नाभिस्थे य ऊर्ध्वेन्धनवत् स्थितः ।
स्वभावदीप्तब्रह्माग्नौ परितश्चोदरोऽज्वलम् ॥ १५६ ॥

स्मृत्वा यन्त्रं तु तन्मूर्ध्नि पतमानं द्विजाम्बरात् ।
चिन्तयेदा(द)मृतं त्वाज्यं पुरावच्चाहुतं द्विज ! ॥

चिदग्निमेव सन्तर्प्य नाभौ मन्त्रस्वरूपिणम् ।
ज्वालाग्रावस्थितं चैव भूयो हृत्पङ्कजे स्मरेत् ॥ १५८ ॥

प्रोच्चारयञ्च मन्त्रेशं प्लुतं ध्यानसमन्वितम् ।
कृत्वैनमेकसन्धानं स्थानद्वयगतस्य च ॥ १५९ ॥

विष्णोर्मन्त्रस्वरूपस्य नानामन्त्रात्मकस्य च ।
सर्वं तु विन्यसेत् पश्चात्तस्मिन् कर्मकृतं च यत् ॥

तोयपुष्पाक्षतैः पूर्णं भावयेद्दक्षिणं करम् ।
तन्मध्ये निष्कलं मन्त्रं संस्मरेत् किरणाकुलम् ॥ १६१ ॥

यागोत्था फलसम्पत्ति लक्ष्मीरूपा विचिन्त्य च ।
मूलमन्त्रं समुच्चार्य पाणिमध्ये तथा स्मरेत् ॥ १६२ ॥

भूयश्च निष्कलं मन्त्रं तस्यामुपरि भावयेत् ।
सशीर्षे जानुनी भूमौ कृत्वा विष्णोर्निवेदयेत् ॥ १६३ ॥

प्रसादाभिमुखेनाथ तेन तच्चात्मभात्कृतम् ।
भावनीयं द्विजश्रेष्ठ ! परितुष्टेन चादरात् ॥ १६४ ॥

निवृत्ते पुरुषार्थे तु हृदये बाह्यतोऽपि वा ।
क्रमान्मन्त्रगणं स्मृत्वा यातं मन्त्रेश्वरे लयम् ॥ १६५ ॥

मन्त्रव्यक्तिं स्वसंकल्पशक्तावथ शमं नयेत् ।
सह संकल्पशक्त्या वै विद्यामूर्तिं स्वकां ततः ॥ १६६ ॥

स्वकलासु लयीकुर्यात् कलाजातं तथाऽऽत्मनि ।
प्राग्वदानन्दसन्दोहपरिपूर्णं तु जायते ॥ १६७ ॥

बहिर्यजामीति यदा संकल्पं मनसा कृतम् ।
तदा संहृत्य ता व्यक्तिमास्ते मध्याह्नसूर्यवत् ॥ १६८ ॥

विसर्जयेद्व्रतं यावन्न कृता बाह्यतः क्रियाः ।
न्यसनीयो ह्यसौ यस्मान्मण्डलादिषु वस्तु(वृत्ति)षु ॥

सृष्टिक्रमेण संहृत्य आधारं यत् पुरोदितम् ।
ज्ञानिना विगलत्येष स्वभावात्तत्त्ववेदिनाम् ॥ १७० ॥

निष्क्रियाणां महाबुद्धे ! निष्पन्नानां सकर्मणाम् ।
विकासमेति चान्येषां नित्याकाररतात्मनाम् ॥ १७१ ॥

मन्त्रक्रियारतानां च नानात्वेना(न)समात्मनाम् ।
धृतमच्युतशक्त्या वै ह्यपरिच्युतसत्तया ॥ १७२ ॥

सद्भि(वि)कल्पस्वरूपं च विश्वासनमिदं द्विज ! ।
विधृतं निभुना व्याप्तं स्वसामर्थ्येन यद्यपि ॥ १७३ ॥

तत्रापि तच्छरीराणां जीवानां तन्निवासिनाम् ।
स्वशक्त्यानुगृहीतानां तमाक्रम्य महामते ! ॥ १७४ ॥

नानामन्त्रात्मना त्वास्ते तस्मिन्नानाविधात्मनि ।
इत्येवमुक्तमाधारस्वरूपं हि यथा स्थितम् ॥ १७५ ॥

जायते यत्परिज्ञानात् कर्मिणां कर्मसंक्षयः ।
अयं यो मानसो यागो ज्वरव्याधिलयापहः ॥ १७६ ॥

पापोपसर्गशमनो भवाभावकरो द्विज ! ।
सततभ्यासयोगेन देहपातात् प्रमोचयेत् ॥ १७७ ॥

यस्त्वेवं परया भक्त्या सकृदाचरते नरः ।
क्रमोदितेन विधिना तस्य तुष्याम्यहं मुने ! ॥ १७८ ॥

याजकानां च सर्वेषां प्रधानत्वेन वर्तते ।
तारयेत् स्वपितॄन् सर्वान् यातानेष्याश्च साम्प्रतम् ॥

किं पुनर्नित्ययुक्तो यस्तद्भावगतमानसः ।
मन्त्राराधनमार्गस्थः श्रद्धाभक्तिसमन्वितः ॥ १८० ॥

न तस्य पुनरावृत्तिः स याति परमं पदम् ।
ज्ञात्वैवं यत्नतो नित्यं कुर्याद्यागं तु मानसम् ॥ १८१ ॥

इदं रहस्यं परमं मयोक्तं तेऽद्य नारद ! ।
नाशिष्याणां च वक्तव्यं नाभक्तानां कथंचन ॥ १८२ ॥

अत्यन्तभवभीतानां भक्तानां भावितात्मनाम् ।
इदं रहस्यं वक्तव्यं सम्यग्भावं परीक्ष्य च ॥ १८३ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे मानसयागो नाम पञ्चमोऽध्यायः ॥

॥ श्रीः ॥

षष्ठोऽध्यायः ॥

पुराऽनेन विधानेन कृत्वा याग तु मानसम् ।
कर्मणा भक्तियुक्तेन बहिर्वृत्तौ यजेत्तत ॥ १ ॥

सनक —

भगवंस्त्वत्प्रसादेन ज्ञातो ह्यज्ञाननाशन ।
ज्ञानविज्ञानसहितो हृद्याग. सर्वसिद्धिद ॥ २ ॥

किमर्थं बाह्यत. पूजा कार्या वै प्रतिमादिषु ।
एतदाचक्ष्व भगवन्नत्र मे संशयो महान ॥ ३ ॥

शाण्डिल्य —

बाह्योत्था वासना विप्र ! बहुजन्मार्जिता दृढा ।
लोलीकृतोऽनया ह्यात्मा शुद्धोऽशुद्धस्वरूपया ॥ ४ ॥

या मन्त्रविषया शुद्धा क्रियाशान्तस्वरूपदा ।
समुत्थानविनाशार्थं तस्या संपरिकीर्तिता ॥ ५ ॥

स बाह्याभ्यन्तराभ्या च क्रियाभ्या तन्मयो भवेत् ।
दृढोत्थवासनाना च तानवं स्याच्छनै. शनै. ॥ ६ ॥

यन्मय. साधको विप्र ! देहस्थ साम्प्रत भवेत् ।
तन्मयो देहपातात् स्यादित्येतत् कथित मया ॥ ७ ॥

अथ बाह्योत्थयागस्य विधानमवधारय ।
देवं हृत्कमलाकाशे तेजोरूपतया स्थितम् ॥ ८ ॥

तस्मात् स्थानात् समानीय तं कुर्यान्नेत्रमध्यगम् ।
वासुदेवाभिधानं तु प्रागुक्तं च समाश्रयेत् ॥ ९ ॥

ततो लोचनयुग्मेन स्तन्धेन द्विजसत्तम ! ।
जपन् लोचनमन्त्रं तु अवलोक्याखिलं तु तम् ॥ १० ॥

स्थापितो य उपार्जित्य संभारो ह्युदकादिक. ।
व्याप्येदक्षिणपाणौ तु अस्त्रमादित्यसन्निभम् ॥ ११ ॥

द्रव्यदोषगणं तेन दग्ध्वा तन्मन्त्रमुच्चरन् ।
संचिन्त्य भस्मभूत तु तं सर्व द्विजसत्तम ! ॥ १२ ॥

दग्धदोषमथाप्याय्य वामहस्त (तलेन) गतेन तु ।
हृदा पूर्णेन्दुतुल्येन अमृतासारवर्षिणा ॥ १३ ॥

तन्मन्त्रमुच्चरन् पश्चात् क्रान्तिमन्त विचिन्तयेत् ।
दग्धमाप्यायित सर्वमथ चैव समाचरेत् ॥ १४ ॥

प्रचण्डकिरणव्रातैर्भास्करीयैर्दहेत् पुरा ।
संचिन्त्य भस्मभूत तं तत. पूर्णेन्दुरश्मिभि. ॥ १५ ॥

आप्याय्यामृतकल्लोलधारापातेन सत्तम ! ।
क्रान्तिमच्चिन्तयेद्भूयो यद्दग्ध भानुना तत ॥ १६ ॥

बध्वा कामदुघा मुद्रा स्रवन्ती मन्त्रसंयुताम् ।
गोरूपां हिमशैलभा निराधारपदे स्थिताम् ॥ १७ ॥

तया तदमृतीकुर्याद्भोगजालं यथास्थितम् ।
निर्मलो द्रव्यसङ्घश्च यागयोग्यो भवेत्तदा ॥ १८ ॥

गालितेनाम्बुना पूर्ण स्वाहृतेनाम्बुना सह ।
स्वोत्तरे वर्मणा स्थाप्य कुम्भ, सर्वोपयोगि यत् ॥१९॥

उपार्जितं पुरा यद्वै यागोपकरणं महत् ।
तत् सर्व दक्षिणे कृत्वा मध्ये भद्रासन न्यसेत् ॥ २० ॥

प्रतिमालक्षणाध्याये वक्ष्यते तस्य लक्षणम् ।
यत्किञ्चित् पत्रपुष्पाद्यं परिदृश्येत पीठगम् ॥ २१ ॥

पाणिना तत् समाहृत्य शुचिस्थाने निधाय वै ।
गव्यैर्वा चामरैर्वालैः शिखिपक्षै. कुशैरथ (पि) ॥ २२ ॥

संमार्ज्य भद्रपीठं तु वाससा सुसितेन वा ।
बहुना वस्त्रपूतेन वारिणा तदनन्तरम् ॥ २३ ॥

प्रक्षाल्य द्वादशार्णेन प्रणवाद्यन्तगेन तु ।
एवमाराधनाधारं क्षालयित्वा च वारिणा ॥ २४ ॥

तत्तावदस्त्रपुष्पेण कुर्याद्विघ्नगणोज्झितम् ।
आराध्योऽयमथारोप्य तत्र मन्त्रमयीं शुभाम् ॥ २५ ॥

सर्वोपकरणोपेतां सर्वलक्षणसंयुताम् ।
प्रतिमां धातुपाषाणनिर्मितामात्मसिद्धये ॥ २६ ॥

अष्टाङ्गेन नमस्कृत्य दद्यादर्घ्यं तु मूर्धनि ।
अनुलेपनसंयुक्तं तत. पुष्पाञ्जलिं शुभम् ॥ २७ ॥

साङ्गं सावरणं भक्त्या पूजयेत् पुरुषोत्तमम् ।
यद्वार्घ्यपाद्याचमनैर्देवमभ्यर्च्य वै ततः ॥ २८ ॥

भुक्तमर्घ्यादिकं तस्मादपनीयाभिवाद्य च ।
समर्प्य विष्वक्सेनस्य, संशोध्य मृदुना द्विज ! ॥ २९ ॥

उशीरवंशकूर्चेन क्षालयेद्गन्धवारिणा ।
उच्चरन् मूलमन्त्रं वा कुर्यान्मार्गत्रयं विभो ! ॥ ३० ॥

सुधौते देवदेवस्य वाससी परिधापयेत् ।
चित्रस्थाद्भगवद्बिम्बाद्भुक्तपुष्पादिकं हि यत् ॥ ३१ ॥

अपनीय तु तत् कुर्याद्वाससा रेणुमार्जनम् ।
यद्वा प्राग्यागभवनप्रवेशानन्तरं द्विज ! ॥ ३२ ॥

न्यस्य भद्रासनाद्यं तदन्यदन्यत् समाचरेत् ।
यद्वा तदातने काले न्यस्य भद्रासनादिकम् ॥ ३३ ॥

आद्यं मार्गत्रयं कृत्वा यथोक्तविधिना तत. ।
योगपीठार्चनारम्भे बिम्बोक्तं सर्वमाचरे (रभे)त् ॥३४॥

अथार्घ्यादीनि पात्राणि प्रक्षाल्यास्त्रेण वारिणा ।
समापूर्य सुगन्धेन जलेन हृदयेन तु ॥ ३५ ॥

द्रव्याणि निक्षिपेत्तेषु यथोक्तक्रमयोगत· ।
भद्रासनस्य कोणेषु पुरतो वाससास्तृते ॥ ३६ ॥

भूतले वाऽथ पात्राणि आधारोपरि विन्यसेत् ।
स्वपूर्वनियमेनैव उदक्पश्चिमकोणगम् ॥ ३७ ॥

अर्घ्याम्बुकलशं न्यस्य तत. प्रागुत्तरान्तरे ।
न्यसेदाचमनीयाख्यमाग्नेये स्नानसञ्ज्ञितम् ॥ ३८ ॥

विन्यस्य पाद्यसंज्ञं तु पदे दक्षिणपश्चिमे ।
अग्रतो वापि तन्मध्ये न्यसेदर्घ्यं द्वितीयकम् ॥ ३९ ॥

अग्निकोणे त्वर्घ्यपात्रं पाद्यमैशानकोणके ।
आचाम्यं नैर्ऋते भागे स्नानार्थं वायवे तथा ॥ ४० ॥

ईश्वरप्राग्वशादर्घ्यमाग्नेयादिषु कोणके ।
मुख्यामुख्यार्घ्यपाद्यादिक्रमाद्द्रव्याणि निक्षिपम् ॥

चन्दनं शशिवाहलीकदूर्वासिद्धार्थकानि च ।
साक्षतानि कुशाग्राणि तण्डुलानि तिलानि च ॥४२॥

काञ्चनं रजतं ताम्रं रत्नानि च फलानि च ।
कदलीफलपूर्वाणि प्रधानेऽर्घ्यं विनिक्षिपेत् ॥ ४३ ॥

द्वितीये दधिमध्वाज्यक्षीरबिन्दुचतुष्टयम् ।
कुशाग्रेण सवाहलीक सपुष्प तिल(सित)तण्डुलम् ॥

दूर्वा च विष्णुक्रान्ता च श्यामाक शङ्खपुष्पकम् ।
पद्मकं कुन्दरेणु च पाद्यपात्रे विनिक्षिपेत् ॥ ४५ ॥

एलालवङ्गतक्कोलै सहजातिफलानि च ।
चन्दनं च सकर्पूरं क्षिपेदाचमनीयके ॥ ४६ ॥

कुष्ट मासी हरिद्रे द्वे मुराशैलेयचम्पकान् ।
वचाकचोरमुस्ताश्च स्नानीये तु विनिक्षिपेत् ॥ ४७ ॥

पात्रन्यासक्रमेणैव तानि पात्राणि कल्पयेत् ।
तत्तत्कल्पनमन्त्रैस्तु यद्वा प्रागेव तानि तु ॥ ४८ ॥

तोयै. संपूर्य निक्षिप्य द्रव्याण्यपि यथाक्रमम् ।
तत्तत्कल्पनमन्त्रैस्तु स्वाधारेषु निवेशयेत् ॥ ४९ ॥

यथास्थानं तत. कुर्याद्दहनाप्यायनादिकम् ।
पात्राणा तु तदानी वा भोगानामपि तत् त्रयम् ॥५०॥

दक्षिणेन तु हस्तेन पुष्पमादाय तत्र वै ।
ध्यात्वा निष्कलरूपं तु मूलमन्त्रमनन्यधी. ॥ ५१ ॥

तत्प्रोक्षणार्घ्ये निक्षिप्य चतुरावर्त्य तं तथा ।
जपन् पुनस्तदुद्धृत्य तस्मात् स्थानाद्बहि. क्षिपेत्

ततस्तदम्भसास्त्रेण वेदि भोगानुपार्जितान् ।
आत्मानं चापि संप्रोक्ष्य ह्यर्घ्यादीनभिमन्त्रयेत् ॥५३॥

सास्त्रेण मूलमन्त्रेण तानभ्यर्च्य प्रसूनकै. ।
साङ्गेन मूलमन्त्रेण ततोऽभ्यर्च्य यथाविधि ॥ ५४ ॥

धूपपात्रं च घण्टा च तानि धूपेन पूजयेत् ।
धूपपात्रस्य घण्टाया. पूजनं चाप्यधारय ॥ ५५ ॥

वृषपात्रस्य मूले तु क्षमातत्त्व कमले जलम् ।
चक्रेऽग्नि किङ्किणीजाले वायुं खं कर्णिकोपरि ॥५६॥

एवं ध्यात्वार्च्य तन्मन्त्रैस्तन्मन्त्रेणार्चयेत्तु वा ।
यच्चक्र तच्च हृदय पद्म हृत्कोटरं विदु. ॥ ५७ ॥

चक्रे याश्च अराख्यास्ता नाड्यो वै द्वादश स्मृता ।
किङ्किण्यो याः स्थिता विप्र ! ज्ञेयास्ता. सूक्ष्मनाडयः ॥

यासा वै मध्यमा शक्तिर्भुजङ्गकुटिलोपमा ।
भ्रमध्वसरवर्णाभा अण्ड भित्वा विनिर्गता ॥ ५९ ॥

कालाग्निहृदयोत्था सा सत्यान्ते तु लयं गता ।
तया संबोधितो ह्यात्मा मन्त्रमूर्तिधर प्रभुः ॥ ६० ॥

सन्निधौ भवति क्षिप्रमव्युच्छिन्न दहेत्तया ।
अथ स्वरूप घण्टाया यथावदवधारय ॥ ६१ ॥

व्यक्त तत्राश्रिता नित्य मातृकावर्णविग्रहा ।
तत्र चाक्रमरावृन्द स्वरद्वादशकं स्मृतम् ॥ ६२ ॥

तदेव षोडशारे च वण. सह नपुंसकैः ।
वर्णानां त्रिविधं रूपं सर्वेषा द्विजसत्तम ! ॥ ६३ ॥

संस्थितं वैखरीनिष्ठ पश्यन्ती पूर्वकं क्रमात् ।
अराश्रितं द्विषट्कारे वाक्स्वरूपं परं हि यत् ॥ ६४ ॥

तदेव षोडशारे च तत्र वैकर्तने(री)षु च ।
मध्यमाख्यस्वरूपेण नित्यमेव हि वर्तते ॥ ६५ ॥

अत ऊर्ध्वं चतुर्विंशत्संख्यं वर्णगणं हि यत् ।
दलजालं हि तत् पद्म परिज्ञेय महामते ! ॥ ६६ ॥

मकारसंज्ञं यद्वर्ण विद्धि तत् पद्मकर्णिकाम् ।
शङ्ख यकारवर्ण च समुष्टीके सदा गृहे ॥ ६७ ॥

रादयः सप्त ये वर्णा हान्ता. पर्वगदात्मकाः ।
क्षार्ण पतत्रिराजाद्यमेवं ध्यात्वा ततो द्विज ! ॥ ६८ ॥

शब्दब्रह्मस्वरूपा च घण्टाविग्रहलक्षणा ।
विज्ञेया भगवच्छक्ति. षाड्गुण्यान्तर्गता हि सा ॥

तेजोगुणसमोपेता तैजसद्रव्यरूपधृक् ।
घण्टाख्यमेतद्वे विद्धि आध्यक्षीयं गुणद्वयम् ॥ ७० ॥

अस्यामाश्रित्य ये वर्णा ज्ञातव्यास्ते सदैव हि ।
नित्यमर्चनकाले तु साधकै. सिद्धिलालसै. ॥ ७१ ॥

कालवैश्वानरोपेतमनन्तं शब्दचोदके ।
मुक्ताहाराश्रित शङ्खं घण्टाया वदने स्थितम् ॥ ७२ ॥

सस्थित च महाबुद्धे ! तदूर्ध्वं गगनाश्रितम् ।
चक्र यस्मिन्नरोद्देशे द्वादशात्मा स्थितो रवि. ॥ ७३ ॥

मासात्मना पुनः सो वैकर्तनेष्ववतिष्ठते ।
षोडशारेऽमृतात्मा वै कलादेहस्तु चन्द्रमाः ॥ ७४ ॥

सर्वेषु वृत्तक्षेत्रेषु नभस्वान् स्वयमेव हि ।
तत्वसङ्घं हि चाव्यक्तं पद्मपत्राश्रितं तु वै ॥ ७५ ॥

जीव. कमलकिञ्जल्के कर्णिकाश्रित ईश्वर. ।
शङ्खाश्रितश्च प्रणवो विद्या विद्धि गदाश्रिताम् ॥७६॥

प्राणाधिदैवं गरुडमित्येवं देवतागणम् ।
ध्यात्वार्चयेत् पुराध्याद्यैर्ध्यानैरथवा द्विज ! ॥ ७७ ॥

अधोमुखं तु ब्रह्माण्ड ध्यायेज्जनरवाकुलम् ।
सनालं च तदूर्ध्वं तु पद्ममष्टदलं स्मरेत् ॥ ७८ ॥

प्रकीर्णपत्रं सुसितं केसरालिसुकर्णिकम् ।
तन्मध्ये चिन्तयेद्देवी वर्गाष्टकभुजान्विताम् ॥ ७९ ॥

मुख्ये हस्तचतुष्के तु लाञ्छनं कमलादिकम् ।
स्फाटिकं चाक्षसूत्रं च तथा विज्ञानपुस्तकम् ॥ ८० ॥

अभयं वरदं चैव हस्तद्विद्वितये परे ।
पद्मासने चोपविष्टा पद्मपत्रायतेक्षणाम् ॥ ८१ ॥

पद्मगर्भप्रतीकाशा पद्ममालाविभूषिताम् ।
सिताभरणसञ्छन्ना पीतवस्त्रविवेष्टिताम् ॥ ८२ ॥

मन्त्रौघमुद्गिरन्तीं च मन्त्रज्वालाप्रभान्विताम् ।
देवै. संस्तूयमाना च ब्रह्माद्यैर्ब्रह्मवादिभिः ॥ ८३ ॥

ऋषिभिर्मुनिभिः सिद्धैर्लोकानुग्रहकारिभिः ।
नम्यमाना स्मरेत् सम्यक् पूजाकाले सदैव हि ॥ ८४ ॥

योऽनया पूजयेन्मन्त्रं तस्य सिद्धिर्न दूरतः ।
एवं ध्यात्वार्चयेत् सम्यगर्घ्याद्यैस्तु तत. स्मरेत् ॥

शब्दब्रह्ममहो यद्यद्धृदब्जाकाशमध्यगम्।
नित्योदितमनौपम्यमनभ्यासादगोचरम् ॥ ८६ ॥

उपदेष्टुमतोऽन्येषामभक्तानां न युज्यते।
परस्वरूपमन्त्राणामेतल्लक्षणमञ्जज ! ॥ ८७ ॥

दशप्रकारे यच्छब्दे विसर्गान्तेऽक्षरादिके।
नानामन्त्रस्वरूपेण वर्तते वर्णविग्रहे ॥ ८८ ॥

भोगमोक्षप्रदो मन्त्रो य आप्तः सद्गुरोर्मुखात्।
पञ्चस्थानगतो ज्ञेयो भक्तैर्दिव्यक्रियापरै ॥ ८९ ॥

वह्नि स्थप्रतिमादौ तु जिह्वाग्रे हृत्कुशेशये।
धूपधूमशिखायां च घण्टाशब्दे सुलक्षणे ॥ ९० ॥

स्वरूपज्योतिरेवान्तर्भावयेत् संस्थित हृदि।
मध्यमेन स्वरूपेण अव्युच्छिन्नं महामते ॥ ९१ ॥

धूपधूमाश्रितं विद्धि वैखरीविग्रहं पुन.।
घण्टायां चाल्यमानायामच्छिन्नमनुभूयते ॥ ८२ ॥

एवं स्मृत्वा ततस्ता तु सुमन्त्रन्यस्तदिग्रहाम्।
अर्चिता ध्यानसंयुक्तामर्घ्याद्यैर्धूपसंयुतै. ॥ ९३ ॥

सञ्चालयेत्तत. सम्यक् सुशब्दां मन्त्रबोधिनीम्।
त्रैलोक्यद्राविणीं घण्टा सर्वदुष्टनिवर्हिणीम् ॥ ९४ ॥

एषा द्रतिर्हि मन्त्राणां सुप्ताना च प्रबोधिनी।
वारणी सर्वविघ्नानां सर्वमन्त्रप्रसादिनी ॥ ९५ ॥

प्रणवान्ते ध्वनिर्ह्येषा शब्दशक्तौ लयं गता।
वर्णदेहाः स्मृता मन्त्रा मन्त्रदेहाश्च देवताः ॥ ९६ ॥

घण्टास्तनितमूलास्ते प्रबुद्धाः कर्मसिद्धिदाः।
परशब्दोत्थिता शक्तिर्घण्टास्तनितरूपिणी ॥ ९७ ॥

वर्णत्वं समनुप्राप्ता तैर्वर्णैर्मुनिसत्तम !।
मन्त्राणां कल्पिता देहा नानाकारा. सहस्रश. ॥९८॥

स्वेच्छया त्वनया शक्त्या सामर्थ्यात् स्वात्मनः स्वयम्।
अनुग्रहार्थं भविनां भक्तानां भावितात्मनाम् ॥ ९९ ॥

मननान्मुनिशार्दूल ! त्राण कुर्वन्ति वै यतः।
दद्दे पदमात्मीयं तस्मान्मन्त्रा. प्रकीर्तिताः ॥ १०० ॥

अनभिव्यक्तशब्दास्ते निराकारास्तथैव च।
घण्टायां चाल्यमानाया निर्यान्ति च सहस्रशः ॥

अत एव मुनिश्रेष्ठ ! मन्त्रमाता प्रकीर्तिता।
एषा घण्टाभिधा शक्तिर्वागीशा च सरस्वती ॥१०२॥

वाचि मन्त्रा. स्थिता सर्वे वाच्यं मन्त्रे प्रतिष्ठितम्।
मन्त्ररूपात्मकं विश्व सबाह्याभ्यन्तरं ततः ॥ १०३ ॥

घण्टाशब्दगत सर्व तस्मात्ता चालयेत् पुरा।
स्वेषु चोक्तेषु कालेषु—तास्तु मे गदत. शृणु ॥१०४॥

गणेशपीठद्वारस्थदेवानामर्चने ततः।
आहुतिकाले मन्त्राणा धूपदाने विशेषतः ॥ १०५ ॥

दीपदानेऽर्घ्यदाने च तथा नैवेद्यजोषणे।
जपस्तुत्यवसनाद्या प्रवृत्ते चाग्नितर्पणे ॥ १०६ ॥

पूर्णाहुतिप्रदाने च मन्त्राणां तु विसर्जने।
विष्वक्सेनार्चने चैव तत्पूजाप्रतिपादने ॥ १०७ ॥

बलिप्रदानकाले तु देवतानां विशेषत.।
नातोऽन्यदा स्याद्विहितं चालनं सिद्धिमिच्छताम् ॥

धूपं दत्वाऽथ पात्राणा घण्टाशब्दसमन्वितम्।
धूपं दद्याद्यथाकाल यद्वार्घ्यादौ सकृत् सकृत् ॥१०९॥

अनुकल्पे तु हृन्मन्त्रं कुर्यादावर्तन बुधः।
आवाहने सन्निधाने सन्निरोधे तथाऽर्चने ॥ ११० ॥

विसर्जनेऽर्घ्यदानं तु प्राक्पात्राद्नित्यमाचरेत्।
तदम्भसा चार्हण तु तथैव परिषेचनम् ॥ १११ ॥

कुर्यात् प्रणयनादानं प्रीणनं प्रीतिकर्मणि।
प्रोक्षणं सर्ववस्तूनामन्यस्मादुदकेन तु ॥ ११२ ॥

आरम्भे सर्वकार्याणा तत्समाप्तौ तथैव हि।
न्यूनाधिकानां शान्त्यै तु ज्ञानव्यत्ययशान्तये ॥११३॥

कार्य तदर्घ्यदानं च नित्यं मन्त्रात्मनो विभोः।
कुम्भोपकुम्भकुण्डानां मन्त्रास्त्रकलशार्चने ॥ ११४ ॥

संपूजने च भोगानां गुर्वादीनां महामते !।
दक्षशिष्यात्मपूजार्थं द्वास्थानामर्चनं प्रति ॥ ११५ ॥

प्रासादासनदेवानां गुरूणा सन्ततेस्तथा ।
लाञ्छनाङ्गपरीवारशक्तिभूषणरूपिणाम् ॥ ११६ ॥

मण्डलावरणस्थाना देवानां चार्चन तथा ।
मुद्राबन्धे कराभ्युक्षा तदर्चाक्षालन तथा ॥ ११७ ॥

जपकालेऽक्षसूत्रस्य कुर्यात्तत्पूजन तथा ।
पाद्यदानं तृतीयातु नित्यं पात्रात् समाचरेत् ॥ ११८ ॥

चतुर्थात्तु यथाकाल दद्यादाचमनं पुनः ।
हस्तप्रक्षालनं चैव गण्डूषं मुखधावनम् ॥ ११९ ॥

स्नानीयाद्याचरेत् स्नान प्रयोजकविधिस्वयम् ।
अर्घ्यपात्रात् द्वितीयातु किञ्चिदुद्धृत्य वै जलम् ॥

तेन स्वदेहविन्यस्तान मन्त्रानिष्ट्वा यथाक्रमम् ।
अनुलेपनपुष्पेण धूपेन च ततो मुने ! ॥ १२१ ॥

मत्पूजार्थं प्रकल्पानि गन्धपुष्पाणि यानि च ।
तानि सर्वाण्यथाचार्यो धारयेन्न कदाचन ॥ १२२ ॥

धारयेद्यदि संमोहाल्लोभाद्वा तानि देशिकः ।
गन्धादीन्यर्चनार्थानि सा पूजा निष्फला भवेत् ॥

तस्मात् सर्वप्रयत्नेन पृथक्कुर्याद्यथाविधि ।
अर्घ्यादिक समादाय द्वास्थदेवान् समर्चयेत् ॥ १२४ ॥

निर्गत्य द्वारबाह्ये तु स्थितो वासीन एव वा ।
वास्तुक्षेत्रेशगरुडद्वार्श्रीचण्डप्रचण्डकान् ॥ १२५ ॥

अभ्यर्च्यार्घ्यादिभिर्देवान् प्रासादस्थाश्च पूजयेत् ।
प्रासादेऽथ चतुर्द्वारे मण्डपे चेतरेषु च ॥ १२६ ॥

द्वारत्रयेऽथ धातारं विधातारं जय तथा ।
विजयं चापि भद्रं च सुभद्रं च गणेश्वरम् ॥ १२७ ॥

यदङ्गभावमभ्येति द्वास्थाद्यं देवतागणम् ।
विष्वक्सेनावसानं च नराणामल्पमेधसाम् ॥ १२८ ॥

जन्तोरेकान्तिनस्तद्वै चित्तखेदकृदर्चनम् ।
विघ्नकृत् प्रकृतस्यापि शिष्याणा तदनर्चनम् ॥ १२९ ॥

अतस्तदनुकम्पार्थं देवभृत्यधियाऽर्चनम् ।
भक्तिश्रद्धोज्झितं चैव विहितं त्वेवमेव हि ॥ १३० ॥

ते तत्प्राणिच्युतं प्रह्वा दत्तमप्यवहेलया ।
गृह्णन्ति मनसा श्रेयः परं ध्यात्वा धिया हृदि ॥१३१॥

यत सर्वेऽच्युतमयास्तच्चित्तार्पितमानसाः ।
एतावदर्चनात्तेषा गुरोरेकान्तिनस्तु वै ॥ १३२ ॥

स्याद्विरोधनिरासस्तु यतो भृत्यास्तु ते हरे. ।
कृत्वैवं द्वारयाग तु ततः पुष्पं च समुखम् ॥ १३३ ॥

गृहीत्वाङ्गुष्ठपूर्वेण स्वाङ्गुलित्रितयेन तु ।
अभिमन्त्र्य तदस्त्रेण चक्र तदुपरि स्मरेत् ॥ १३४ ॥

निशितारं ज्वलद्रूप वर्षन्तमनलाशनिम् ।
क्षयकृद्विघ्नजालानां क्षिपेद्यागगृहान्तरे ॥ १३५ ॥

ततस्तत्तेजसा विघ्नजालं निष्कासयेन्महत् ।
बहिर्भवनमध्यातु ततस्तदनुकम्पया ॥ १३६ ॥

स्वदेहादामृतं(हवामगं) भागममृतांशुसमं स्मरेत् ।
प्राङ्मन्त्रमात्रविन्यासात् स तेषामनलप्रभः ॥ १३७ ॥

प्रतिभाति यतस्तेन मन्त्रपुष्पसमाश्रयात् ।
निर्गच्छन्ति तमाश्रित्य वामभागमतस्तु ते ॥ १३८ ॥

दक्षिणां तर्जनीं विप्र ! कुर्यादूर्ध्वमुखी ततः ।
शिखामन्त्रेण संयुक्ता विद्युद्विलसितप्रभाम् ॥ १३९ ॥

स्मृत्वा स्वां विघ्नशान्त्यर्थं भ्रामयन्नन्तराविशेत् ।
स्वासन च ततः प्रोक्ष्य अर्घ्यपात्रोदकेन च ॥ १४० ॥

सास्त्रेण ताड्य पुष्पेण तत्पृष्ठे क्रमशो द्विज ! ।
आधारशक्तिपूर्वं तु मन्त्रसङ्घं प्रपूजयेत् ॥ १४१ ॥

उपविश्यासने यागमारभेत समाहित. ।
समयं वात्र कुर्वीत सर्वभोगनिरीक्षणम् ॥ १४२ ॥

न्यस्य भद्रासनं मूलात् प्रोक्षणार्घ्यप्लुतेन तु ।
पाणिनाऽप्यथ कूर्चेन तज्जलेन तु मार्जयेत् ॥ १४३ ॥

तत्तावदस्त्रपुष्पेण कुर्याद्विघ्नगणोज्झितम् ।
सर्वलोकमयं तत्र सर्वदेवसमाश्रयम् ॥ १४४ ॥

सर्वाधारमयं ध्यायेदन्तर्लीनं तु चक्रराट् ।
प्रणवेन स्वनाम्नाऽथ नमोऽन्तेनार्चयेच्च तम् ॥ १४५ ॥

ततस्तु सर्वमन्त्राणां विन्यासं तत्र चेतसा।
समाचरेद्यथायोगं पुष्पदानपुरस्सरम् ॥ १४६ ॥

अर्घ्यालभनधूपैस्तु माल्यैर्नानास्त्रगुद्भवैः।
योगपीठार्चनं कुर्याद्यथावदवधारय ॥ १४७ ॥

बिम्बेन सहितं पीठं योगपीठमुदाहृतम्।
अनुसन्धानयागे तु योगपीठं प्रकल्पयेत् ॥ १४८ ॥

तन्मन्त्रासनमित्युक्तं, मन्त्रन्यासं तु सर्वतः।
कुर्यात्तत्स्थस्य देवस्य पीठस्याधो निवेशयेत् ॥ १४९ ॥

आधारशक्तिं तस्योर्ध्वे कूर्मं कालाग्निसंज्ञिकम्।
तन्मूर्ध्नि शेषसंज्ञं तु, योगपीठपदोपरि ॥ १५० ॥

भुवं न्यस्य तदूर्ध्वे तु जड्घाया क्षीरसागरम्।
आधारपद्मं कुमुदे, तदूर्ध्वे कण्ठमूलतः ॥ १५१ ॥

आग्नेय्यादौ तु धर्माद्यमैशान्तं तच्चतुष्टयम्।
प्रागाशादौ त्वधर्माद्यमुत्तरान्तं न्यसेत् परम् ॥ १५२ ॥

ऋग्वेदं कल्पयेदेवं प्रागीशानदिगन्तरे।
यजुःप्राग्वह्निदिङ्मध्ये सामान्तर्यातुवारुणे ॥ १५३ ॥

वारुणानिलदिङ्मध्येऽथर्ववेदं तत परम्।
ईशानसोमदिङ्मध्ये कृतं याम्यानलान्तरे ॥ १५४ ॥

त्रेतायुगं यातुयाम्यदिङ्मध्ये द्वापारं युगम्।
सोमवाय्वन्तरोद्देशे कलिसंज्ञं युगं क्रमात् ॥ १५५ ॥

आधारशक्तेरारभ्य अनुसन्धानपूर्वकम्।
युगावसानं प्रागदत्वा स्थूलं मन्त्रासनासनम् ॥ १५६ ॥

तच्च षोडशकं न्यस्य भूयो भूयो दिगष्टके।
सूक्ष्मरूपधर विप्र! प्राक्पदादीशगोचरम् ॥ १५७ ॥

तत्रोर्ध्वे मध्यदेशे वै प्रागुक्तविधिना न्यसेत्।
द्विरष्टकं तु धर्माद्यं कान्तिमत् पररूपवृत् ॥ १५८ ॥

तन्मूर्ध्नि कालचक्रं तु व्योमवत्पट्टिकागतम्।
तन्मध्येऽव्यक्तपद्मं तु गुणत्रयसमन्वितम् ॥ १५९ ॥

तद्दले सूर्यपरिधिं केसरे सोममण्डले।
कर्णिकायामग्निचक्रं तद्बीजे चित्प्रभाकरम् ॥ १६० ॥

स्मरेच्च विमलां शक्तिं तत्समीपे दिगष्टके।
ज्ञानशक्तिं विभोः शक्तिं सत्यशक्तिमनश्वरीम् ॥ १६१ ॥

प्रकाशशक्तिं चानन्तामीशानुग्रहशक्तिके।
यथोक्तरूपान् ध्यात्वैतान् विभवं च यथाक्रमम् ॥

स्वस्वतत्त्वानि विन्यस्य कुर्याद्दर्घ्यादिनार्चनम्।
प्रदर्शयेच्च तन्मुद्रा नीठे वै सुस्थिरे सदा ॥ १६३ ॥

आधारशक्तेरारभ्य मन्त्रग्रामस्य पौष्कर!।
सुस्थिरे सन्निरोधश्च सर्वेषां विहितः सदा ॥ १६४ ॥

यत्र यत्रानुरूपं यत्तत्र तद्यालमाचरेत्।
ईशानुग्रहशक्त्यन्तमाक्षिते, कमलोद्भव! ॥ १६५ ॥

मन्त्राणां सान्निधिः कार्या चलपीठे तु केवले।
तात्कालिकस्तु विहितो निरोधस्तत्र सार्चनः ॥ १६६ ॥

आहूतोऽविशेद्यत्र मन्त्रनाथोऽभिनंमुखः।
तत्प्रागपेक्षया कुर्याद्धर्मादीनां निवेशनम् ॥ १६७ ॥

सामुख्यं भजते यस्मात् साधकं परमेश्वरः।
तदासनं हि चिद्रूप सिद्धमेतस्य वाहनात् ॥ १६८ ॥

चलबिम्बेन सह वै एकीभावगतस्य च।
पीठस्य मन्त्रविन्यासो विहितश्चलपीठवत् ॥ १६९ ॥

सुस्थिरस्यैकयोनेर्वै वियोनौ सुस्थिरस्य च।
मन्त्राणां विहितो न्यासः स्थिरपीठोदितस्तु वै ॥

पीठोपपीठयुक्तानां साङ्गानां केवलात्मनाम्।
एकादिगात्रपादानां सबिम्बानां यथाक्रमम् ॥ १७१ ॥

मण्डलोक्तविधानेन समभ्यूह्य समाचरेत्।
एवं चास्याचले पीठे शयानस्य विभोस्त्वथ ॥ १७२ ॥

सशक्तिकाञ्चितो भानोरूर्ध्वेऽनन्तं समर्चयेत्।
यानारूढे त्वनन्तस्य स्थाने तार्क्ष्यं समर्चयेत् ॥ १७३ ॥

लक्ष्म्यादीनां तु देवीनां पीठस्याधः फणीश्वरम्।
तत्कोणेषु च धर्मादीस्तदूर्ध्वेऽव्यक्तपङ्कजम् ॥ १७४ ॥

धामत्रयं ततस्तस्मिन् विन्यसेत् पूर्ववर्त्मना।
व्योमवाह्ये त्वपीठानामग्निकोणादितो न्यसेत् ॥ १७५ ॥

ज्ञान(युग)स्वभावमूर्तं च धर्माद्यं यच्चतुष्टयम् ।
तन्निविष्टं तथाभूतं तद्व्यत्ययगणं हि यत् ॥ १७६ ॥

सह ऋक्पूर्वसामान्तकालभेदेन चान्वितम् ।
तत्पीठवसुधोद्देशे मन्डलादिषु वृत्तिषु ॥ १७७ ॥

आत्मनः प्राग्वशाद्वायुकोणादारभ्य पूजनम् ।
कार्यं विघ्नेशपूर्वाणां तत्पदाद्वाग्रभूपदम् ॥ १७८ ॥

स्वोत्तरात् पश्चिमद्वारदेशाद्वायुपदावधि ।
वीथौ सवीथिकानां तु रागानामेतदाचरेत् ॥ १७९ ॥

बहिर्वारणरेखाणां तन्मुकानां महामते ! ।
युक्तानां न बहिर्दोषस्तिर्यक्त्वेनार्चने सति ॥ १८० ॥

विन्यस्य विष्टरान् दर्भान् कुसुमस्तवकानि च ।
विन्द्रून् वा सर्वरोगोत्थान् क्रमात्तदुपरि न्यसेत् ॥

गणनाथं च वागीशां गुरुं च तदनन्तरम् ।
पूजयेच्च ततो भक्त्या गुरुं परमसंज्ञितम् ॥ १८२ ॥

आदिसिद्धसमूहं तु भगवद्ध्यानतत्परम् ।
निस्पाधिकारिणश्चान्यान् भगवत्तत्त्ववेदिनः ॥ १८३ ॥

चत्वारो मनवश्चान्ये ऋषयः सप्तपूर्वकाः ।
एतेषां क्रमशो ध्यानं समाकर्णय सांप्रतम् ॥ १८४ ॥

ध्यायेच्चम्पकवर्णाभं बद्धपद्मासनं द्विज ! ।
स्थूलाङ्गमेकदन्तं च लम्बकोडं गजाननम् ॥ १८५ ॥

वरदाभयहस्तं च दक्षिणे स्याक्षसूत्रकम् ।
विश्रान्तं चिन्तयेद्वामं चतुर्थं परशूपरि ॥ १८६ ॥

वरदाभयहस्ताभ्यामस्य मुद्राद्वयं स्मरेत् ।
तर्जन्यङ्गुष्ठसंघट्टाज्जायते यदयत्नतः ॥ १८७ ॥

सितकुन्देन्दुधवलां शङ्खपद्मकरोद्यताम् ।
वरदाभयहस्तां वा विलिखन्तीं च पुस्तकम् ॥ १८८ ॥

द्विनेत्रामेकवक्त्रां च हेमकुण्डलभूषिताम् ।
ध्यात्वा भगवतीं ह्येषा शक्तिः शब्दात्मनो विभोः ॥

समभ्यस्ता ददात्याशु साधकानामभीप्सितम् ।
गणनाथं विना चान्ये सुस्थिताः शान्तविग्रहाः ॥

गणित्राभयहस्ताश्च सर्वानुग्रहकारकाः ।
सर्वे पद्मासना वाथ जटामण्डलभूषिताः ॥ १९१ ॥

एवं ध्यात्वा समभ्यर्च्य मुद्राः संदर्श्य तत्क्रमात् ।
अनुज्ञां प्रार्थयेत्तेभ्यो यथानुक्रममेव च ॥ १९२ ॥

गृहीत्वा शिरसा तां च तत आवाहयेत् प्रभुम् ।
अभ्यन्तरे विमानस्य गर्भभूमौ तु मध्यतः ॥ १९३ ॥

(आत्मप्रमाणरचिते मृदुस्पर्शे मनोरमे ।
शुद्धस्फटिकसंकाशे दीप्यमानेऽतिभासुरे ॥ १९४ ॥

फणामण्डलमध्यस्थैर्मणिभिर्दीपिते तथा ।
अनन्तभोगशयने शयानं पीतवाससम् ॥ १९५ ॥)

सन्ध्याजलदसन्दोहसन्देहकरणक्षमम् ।
सरसीरुहमास्थाय सहस्रदलसंकुलम् ॥ १९६ ॥

शयानं स्थितमासीनं यानारूढमथापि वा ।
निष्कैवल्येन सत्त्वेन संपन्नं रुचिरप्रभम् ॥ १९७ ॥

वपुषा सुन्दरेणैव दिव्येनाविकृतेन च ।
मुञ्चन्तमनिशं देहादालोकं ज्ञानलक्षणम् ॥ १९८ ॥

प्रयत्नेन विनाऽज्ञाननाशकृद्ध्यायिनां महत् ।
स्रग्वस्त्राभरणैर्दिव्यैः स्वानुरूपैरनूपमैः ॥ १९९ ॥

चिन्मये स्वप्रकाशैश्च अन्योन्यरुचिरञ्जितैः ।
दन्तज्योत्स्नावितानैस्तु प्रकटीकृतदिङ्मुखम् ॥ २०० ॥

रेखोत्थितैस्तु कल्हारैः पादपद्मतलेऽङ्कितम् ।
निमग्नजनसन्तापशमनव्यापृताननम् ॥ २०१ ॥

करुणापूर्णहृदयं जगदुद्धरणोद्यतम् ।
स्वदेहतेजःसंभूतज्वालामण्डलमध्यगम् ॥ २०२ ॥

घनकुञ्चितनीलालिगलिताञ्जनसन्निभैः ।
कर्पूरधूसरैर्दिव्यैः पुष्पसंवलितान्तरैः ॥ २०३ ॥

किरीटमकुटाक्रान्तैः शोभितं सुशिरोरुहैः ।
ईषदारक्तगोक्षीरशुद्धनीलाब्जलोचनम् ॥ २०४ ॥

शीतलैर्दृष्टिपातैस्तु जगदाप्यायकारिणम् ।
सुभ्रूललाटं सुनसं सुस्मिताधरविद्रुमम् ॥ २०५ ॥

सौन्दर्यचन्द्रसंकाशविलसद्गण्डमण्डलम् ।
पूर्वकर्मानलार्ताना ध्यायिना खेदशान्तये ॥ २०६ ॥

स्वदन्तेन्दुद्वयोत्थेन हूलाद्यन् गोगणेन तु ।
मुखसौन्दर्यनिष्यन्दचिबुकस्थलशोभितम् ॥ २०७ ॥

सविलासस्मिताधार बिभ्राण मुखाब्जम् ।
कम्बुग्रीवं महाबाहु श्रीवत्साङ्कितवक्षसम् ॥ २०८ ॥

सिंहस्कन्धं विशालाक्षं दीर्घबाहु महोरसम् ।
शङ्खचक्राङ्कितारक्तकरद्वयविभूषितम् ॥ २०९ ॥

दक्षिण भोगिभोगाभमुपधाय महाभुजम् ।
प्रसारितोत्तरकर कटिदेशस्य पार्श्वत ॥ ॥ २१० ॥

कौस्तुभेनाङ्कितोरस्क लक्ष्मीश्रीवत्सभूषितम् ।
आब्रह्मस्तम्बपर्यन्तजगद्वासतनूदरम् ॥ २११ ॥

ईषत्कुञ्चितवामाङ्घ्रिपङ्कज पङ्कजेक्षणम् ।
प्रसार्य दक्षिण पादमीषदुत्तानशायिनम ॥ २१२ ॥

अनेकरत्नरचितकिरीटमकुटोज्ज्वलम् ।
उद्यादादित्यसंकाशैर्विचित्रैर्मणिसंचयै. ॥ २१३ ॥

विराजमानया सम्यक्स्फुरच्चूलिकयोज्ज्वलम् ।
रत्नावतंसप्रभया दीप्तश्रवणशेखरम् ॥ २१४ ॥

ललाटान्तसमालम्बिबालालङ्कारभूषितम् ।
ललाटतिलकेनैव सुन्दरेण विराजितम् ॥ २१५ ॥

अनेकरविसंकाशलसन्मकरकुण्डलम् ।
प्रभूतमणिमुक्ताढ्यग्रैवेयकविराजितम् ॥ २१६ ॥

वज्रवैडूर्यमाणिक्यपद्मरागादिशोभितैः ।
हारैरनेकैर्विविधैरुपशोभितवक्षसम् ॥ २१७ ॥

उदयादित्यसंकाशकौस्तुभेन विराजितम् ।
भ्राजयन्त्या जगत् सर्व स्वतेजोभिर्निरन्तरम् ॥ २१८ ॥

मालया वैजयन्त्या च भ्राजमानमहोरसम् ।
नानादामविचित्रेण मुक्तादामविलम्बिना ॥ २१९ ॥

स्फुरता ब्रह्मसूत्रेण काञ्चनेन सुशोभितम् ।
द्युतिमद्भिर्महारत्नै राजितेन सुवर्चसा ॥ २२० ॥

काञ्चनेनाथ सूत्रेण उदरे कृतबन्धनम् ।
नाभिदेशं तथा पद्म जगच्छृङ्खलया स्वया ॥ २२१ ॥

नानामाणिक्यविलसत्कटिसूत्रेण भूषितम् ।
अनेकरत्नसन्दर्भरशनादममण्डितम् ॥ २२२ ॥

अनेककोटिमार्ताण्डविलसत्पीतवाससम् ।
अनेकरत्नसंभिन्ननूपुरादिविभूषितम् ॥ २२३ ॥

एवमन्यैश्च विविधै. केयूरकटकादिकै ।
यथार्हभूषणै रम्यैर्वलद्भि· परिभूषितम् ॥ २२४ ॥

प्रावृड्घनजलदसंकाश भिन्नाञ्जनगिरिप्रभम् ।
अभिन्नपूर्णषाड्गुण्यविभवेनोपबृंहितम् ॥ २२५ ॥

योगिध्येयमजं नित्य जगज्जन्मादिकारणम् ।
अनादिनिधन देव साक्षाल्लक्ष्मीपति विभुम् ॥ २२६ ॥

अप्राकृततनु शान्त वासुदेवं परात्परम् ।
चतुर्भुजमनुध्यायेच्छुद्धस्फटिकनिर्मलम् ॥ २२७ ॥

शङ्खचक्रगदापद्मैश्चतुर्भि. कृतलक्षणम् ।
तस्मिन्नावाहन कुर्यात् कृत्वा हस्तौ सुगन्धिनौ ॥२२८॥

गन्धार्घ्यपुष्पै संपूर्य मूलमन्त्रं समुच्चरन् ।
पीठोपरि हरेरग्रे मूर्ध्नि पुष्पाञ्जलि क्षिपेत् ॥ २२९ ॥

स्व प्रत्यभिमुख शान्त सुप्रबुद्ध स्मरेच्च तम् ।
करन्यासं विना तत्र सृष्टिन्यासादिक त्रयम् ॥ २३० ॥

मूलमन्त्रादिताक्ष्यन्तिमन्त्राणा न्यासमेव च ।
दीपयेद्विम्बतोऽन्यत्र तस्मिन् पुष्पाञ्जलौ हरिम् ॥२३१॥

आगच्छपदयुक्तेन मूलमन्त्रेण हृत्कजात् ।
एवं तेजोमय देवं नाडीदक्षिणमार्गत. ॥ २३२ ॥

तन्नासाग्रेण चावाह्य पीठकुम्भादिषु क्षिपेत् ।
तत्कदम्बप्रसूनाभै तस्मिन् मन्त्रात्मगोलके ॥ २३३ ॥

स्थानभेदं विनाङ्गानि न्यस्याभ्यर्च्येह देहतः ।
सकलीकृत्य देवेशं तं ध्यायेद्व्यक्तता गतम् ॥ २३४ ॥

प्राग्वदङ्गादिकास्तत्र तत्तन्मन्त्रैस्तु निक्षिपेत् ।
एवमाहूय देवेशं दत्वार्घ्य सन्निधित्सया ॥ २३५ ॥

भूयोऽप्यर्घ्यं प्रदायास्मै हृदा मुद्रापुरस्सरम् ।
सन्निधाप्यार्घ्यदानेन मुद्रापूर्वं च वर्मणा ॥ २३६ ॥

सन्निरो य तु मूलेन तन्मुद्रासहितेन तु ।
समुखीकृत्य मूलादीन् मन्त्रास्तत्र समुच्चरन् ॥ २३७ ॥

प्रदर्शयंस्तथा मुद्रास्त्वष्टाङ्गेनाभिवादयेत् ।
अनेकमूर्तयागे तु प्रधानावाहनादिकान(म्) ॥ २३८ ॥

आहूतदेवश्रान्त्यर्थं गन्धादीनेवमेव च ।
व्यूहानां विभवानां प्राङमूलाङ्गगणार्चनम् ॥ २३९ ॥

पश्चादन्येषु कुर्वीत क्रमेणावाहनादिकान् ।
स्थितभायतने वाथ साकारं परमेश्वरम् ॥ २४० ॥

शङ्खचक्रधरं विष्णुं सुरसिद्धावतारिनम् ।
ऋषिभिर्मनुजैर्वाथ भक्तियुक्तैः प्रतिष्ठितम् ॥ २४१ ॥

तन्मूर्तौ च स्वमन्त्रेण यजेदावाहनं विना ।
प्रत्यहं कर्मबिम्बानां मूलबिम्बहृदब्जकात् ॥ २४२ ॥

कुर्यादावाहनं किञ्चित्तीर्थक्षेत्रादिगामिभिः ।
नरैरा(स्वा)राध्यबिम्बेषु प्रत्यहं स्वहृदब्जतः ॥ २४३ ॥

प्राग्वदावाहनं कुर्यादथ तद्विग्रहस्थितान् ।
मन्त्रन्यासादिनाभ्यर्च्य तास्तद्देहस्फुलिङ्गवत् ॥२४४॥

ध्यात्वावतार्य स्थानेषु स्वेषु भोगावनौ क्रमात् ।
सकलीकृत्य चार्घ्याद्यैरर्चयेदत्र तु क्रमः ॥ २४५ ॥

द्विपटस्वब्जदलेष्वत्र मन्त्रेशस्य पुरो दलात् ।
तदाग्रदलपर्यन्तं हृदाद्यङ्गानि निक्षिपेत् ॥ २४६ ॥

पीठोपरि दलाद्बाह्ये देवस्याग्नेयकोणके ।
पद्ममैशे गदा कोणे नैर्ऋते चक्रमुज्ज्वलम् ॥ २४७ ॥

वायव्ये पाञ्चजन्यं च गदायाश्च समीपतः ।
किरीटं दक्षिणे पार्श्वे वामे श्रीवत्समेव च ॥ २४८ ॥

कौस्तुभं पद्मसामीप्ये वनमाला च दक्षिणे ।
देवस्य कर्णिकायां तु श्रियं पुष्टिं ततोऽपरे ॥ २४९ ॥

अग्रतः पीठतो बाह्ये न्यसेच्चारात् पतत्रिणम् ।
अङ्गोपाङ्गादिकानां तु सर्वेषां ध्यानमुच्यते ॥ २५० ॥

आहूतो मन्त्रनाथस्तु यथा ध्यातः सविग्रहः ।
तद्वदेव हि हृन्मन्त्रं ध्यायेत् कुमुदपाण्डरम् ॥ २५१ ॥

पद्मरागाचलाकारमारक्तं च शिरः स्मरेत् ।
अञ्जनाद्रिप्रतीकाशं शिखामन्त्रं तथाकृतिम् ॥ २५२ ॥

परितः सूर्यसन्तप्तं यथा कनकपर्वतम् ।
तथा कवचमन्त्रं च ध्यानकाले विचिन्तयेत् ॥ २५३ ॥

वृतं ज्वालासहस्रैस्तु अयस्कान्तसमद्युति ।
सर्वास्त्रशक्तिसंपूर्णमस्त्रमन्त्रं प्रकीर्तितम् ॥ २५४ ॥

निर्धूमाङ्गारसदृशं भावयेन्नेत्रमन्त्रराट् ।
ध्येयाः स्वरुचिसंयुक्ताः द्विभुजाः पुरुषोपमाः ॥ २५५ ॥

एवमेव ह्युपाङ्गानां स्मरेद्ध्यानं सुलक्षणम् ।
वीक्षमाणान् विभोर्वक्त्रं ध्यायेन्मुनिवरोत्तमाः ॥ २५६ ॥

स्थितानामादिमूर्तीनां स्थितान् ध्यायेत् सदैव हि ।
आसीनानामथासीनान् वाहनस्थे सवाहनान् ॥२५७॥

शयितानामथासीनानुत्थितान् वा स्मरेद्धिया ।
लाञ्छनाभरणादीनां शृणु ध्यानं यथाक्रमम् ॥ २५८ ॥

कुन्दावदातं कमलं सौम्यमीषत्स्मिताननम् ।
रवं रवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् ॥ २५९ ॥

गदां हेमाद्रिसंकाशां तन्वीं कुवलयेक्षणाम् ।
द्विरष्टवर्षवत्कान्तां कुमारीं नवयौवनाम् ॥ २६० ॥

स्वोत्थेन रश्मिजालेन भासयन्तीं नभःस्थलम् ।
स्वरश्मिमण्डलान्तःस्थं वल्गन्तं हेतिराट् स्मरेत् ॥

विभोराज्ञां प्रतीक्षन्तं ह्रस्वाङ्गं रक्तलोचनम् ।
तुहिनाचलसंकाशं शङ्खं कमललोचनम् ॥ २६२ ॥

सदागमादिसामान्तमुद्गिरन्तं स्वकैर्मुखैः ।
किरीटः सौम्यवदनः काञ्चनाभो महातनुः ॥ २६३ ॥

भाभिराकृतियुक्ताभिर्नानारूपाभिरावृतः ।
स्थितो वैयाधरीयेण स्थानकेनान्तरिक्षगः ॥ २६४ ॥

स्फाटिकाद्रिप्रतीकाशं श्रीवत्समथ भावयेत् ।
बद्धपद्मासनासीनं न्यस्तहस्तं स्वपार्श्वयोः ॥ २६५ ॥

वहन्तं कूर्ममुद्रा च मुख्यहस्तद्वयेन च।
पद्मरागाचलाकारं कौस्तुभं रत्ननायकम् ॥ २६६ ॥

दिशो दश द्योतयन्तं संलग्नाङ्घ्रिस्थितं स्मरेत्।
वहन्तं चोरसो मध्ये स्वहस्तकृतसंपुटम् ॥ २६७ ॥

सन्धारयन्तमपरं तथा वै शिरसि स्फुटम्।
ध्येया भगवती माला चित्रवर्णा मनोरमा ॥ २६८ ॥

सर्वगन्धान्विता सौम्या ईषद्विह(क)सिताननाः।
ध्येया. स्वरुचिसयुक्ता द्विभुजाः पुरुषोपमा. ॥ २६९ ॥

सास्त्रा. किरीटपूर्वा ये गदामालाङ्गनाकृती।
एतेऽस्त्रनायकाः सर्वे विभोराज्ञाप्रतीक्षका. ॥ २७० ॥

प्रोत्थिता विचलन्तश्च सुसमैः स्थानकै. स्थिताः।
श्रोणीतटार्पितकराश्चामरव्यजनोद्यता. ॥ २७१ ॥

सपद्म तु किरीटाद्यं वर्जयित्वा चतुष्टयम्।
तर्जयन्तं च दुष्टौघमन्येषा दक्षिणं करम् ॥ २७२ ॥

स्मरेद्वै ध्यानकाले च सर्वेषामथ मस्तके।
ध्येयं स्वक स्वक चिह्न सुप्रसिद्ध निराकृति ॥ २७३ ॥

रक्तपङ्कजवर्णाभा लक्ष्मीर्नीलाम्बुजेक्षणा।
दुग्धौघधवला पुष्टिरानन्दाकुलिताननाः(तेक्षणा)

भोक्तृशक्तिः स्मृता लक्ष्मी. पुष्टिर्वै कर्तृसञ्ज्ञिता।
भोगार्थमवतीर्णस्य तस्य लोकानुकम्पया ॥ २७५ ॥

उदितं सह तेनैव शक्तिद्वितयमव्ययम्।
रक्ततुण्डं महाप्राणं भीमभ्रुकुटिलोचनम् ॥ २७६ ॥

द्रवच्चामीकराकारं पक्षमण्डलमण्डितम्।
सस्मरेद्गरुडं विप्र! गृध्रवक्त्रं पृथूदरम् ॥ २७७ ॥

यथोक्तमूर्तियुक्ताश्च ततो ध्यायेद्यथाक्रमम्।
अपापतिर्वै कमलं गदादेवी सरस्वती ॥ २७८ ॥

चक्रं लोकप्रतिष्ठा वै शब्दब्रह्म तु शङ्खराट्।
किरीटो हुतभुग्वेद्य. कौस्तुभस्तु प्रभाकर. ॥ २७९ ॥

स्वयं शशाङ्क. श्रीवत्सो मालाषण्माधवादयः।
प्राणं पतत्रिप विद्यादेवं तत्त्वेषु संस्थितान् ॥ २८० ॥

अधिष्ठातृ(तॄन्)क्रमाच्चैतानर्चयेदर्घ्यपुष्पकै.।
अष्टपत्राम्बुजे पूर्वदले हृन्मन्त्रपं शिर. ॥ २८१ ॥

शिखामाग्नेयपत्रे तु कवच चास्त्रमन्त्रपम्।
दक्षिणे पत्रमध्ये तु नैर्ऋते पत्रमध्यत. ॥ २८२ ॥

नेत्र पश्चिमपत्रे तु उदरं पृष्ठमन्त्रपम्।
वायव्ये बाहुमन्त्रं तु ऊरू जानू तथोत्तरे ॥ २८३ ॥

ईशानपत्रमध्ये तु पादमन्त्रं तु विन्यसेत्।
दलोपदलसंयुक्तेऽप्येवमेवाम्बुजे क्रम. ॥ २८४ ॥

अथवा दिग्दले वत्र हृदाद्यं यच्चतुष्टयम्।
अस्त्रं दिग्दलेषु स्यान्नेत्र केसरग पुनः ॥ २८५ ॥

उपाङ्ग स्यादुपदले तद्विधानमत. शृणु।
पूर्वपत्रसमीपस्थतलयोरुदरं न्यसेत् ॥ ॥ २८६ ॥

पृष्ठयन्त्र न्यसेत्तद्वद्दलयो पश्चिमस्थयो।
बाहूरू मन्त्रपौ न्यस्यौ दलयोर्दक्षिणस्थयोः ॥ २८७ ॥

जानू पादौ तथा न्यस्यौ दलयोरुत्तरस्थयो.।
मन्त्ररूपे षडङ्गे तु पद्मस्याष्टदलस्य तु ॥ २८८ ॥

पूर्वस्मिन् हृदय वामे कवच दक्षिणे शिर.।
पश्चिमे तु शिखा न्यस्येत् परे दलचतुष्टये ॥ २८९ ॥

अग्रतोऽस्त्रं कर्णिकाया केसरे च पुरोदले।
नेत्र न्यस्यार्चयेत् प्राग्वत् पद्मादिन्यासमाचरेत् ॥

त्रिदलादिषु पद्मेषु दलमूले यथोदितम्।
बुद्ध्या स्थान विभज्यात्र पञ्च षड्द्वादशाथवा ॥

न्यसेदङ्गान् यथादृष्टपृष्ठभागस्य वै विभोः।
परिवारसमेतस्य त्वङ्गं न्यस्येत्तु दक्षिणे ॥ २९२ ॥

भागं कृत्वा प्रकृत्याग्रात् क्रमात् प्रागादि कल्पयेत्।
आश्रित्य वामभागं तु प्रोक्तमारभ्य चैश्वरीम् ॥ २९३ ॥

चान्द्रं वात्यं वारुणं च दिग्विभागं प्रकल्पयेत्।
तयो. षट्कक्रमात् कुर्याद्द्वादशस्थानकल्पनम् ॥

धर्मादिदेवता न्यस्य ह्येवं दिग्विदिगाश्रया.।
श्रीपुष्टोस्तु य(स)दा यागे पृथक् पद्मोपरि स्थितम्॥

तदाधिकारयागेऽपि पृथगेवासनादिकम् ।
वाहाना लाञ्छनादीना विहीने वाथ पार्श्वतः ॥२९६॥

कल्पयेदथ त भोगैर्यजेत सुसमस्तकै ।
विनिवेद्यासनवर समाहूतस्य वै विभो. ॥ २९७ ॥

पादपीठं तु सामान्यं मृद्वास्तरणभूषितम् ।
घण्टाशब्दसमोपेतं दत्वार्घ्य मन्त्रमूर्धनि ॥ २९८ ॥

पाद्यप्रतिग्रह हैमं विभोर्दद्यात् सरत्नकम् ।
पाद्यं पादोदकाकर्षशाटकेनानुलेपनम् ॥ २९९ ॥

सप्रतिग्रहमाचामं सानुलेप च मालिकाम् ।
घृतादिकैर्महादीपैरच्छिद्रैरर्चयेद्धरिम् ॥ ३०० ॥

सुगन्धैर्मधुरैर्वृपै. प्रभृतैरर्चयेद्विभुम् ।
अर्हण मधुपर्क च दर्पण तदनन्तरम् ॥ ३०१ ॥

(निष्पुसनं सपात्रं च आचामं गन्धमेव च ।
अथ चूर्णितकर्पूरघृष्टश्रीखण्डभावितम् ॥
सपूगफलमुत्कृष्टं ताम्बूलं विनिवेद्य च ।
सपुत्रदारमात्मानं अष्टाङ्गपतनेन च ॥
चेतसा भक्तियुक्तेन निवेद्य तदनन्तरम् ।)

तत. स्नानासनादीना भोगाना सन्निधापनम् ।
कृत्वाभ्यर्च्यापि देवस्य पाणिना दक्षिणं पदम् ॥३०२॥
दक्षिणेनाथ वामेन वाम सगृह्य मन्त्रतः ।
विज्ञाप्य मज्जनार्थं तु कृत्वा मार्गत्रय ततः ॥ ३०३ ॥

स्नानासन निवेद्याथ देवस्य द्वितयं तु वै ।
स्नानार्थमवतीर्णस्य पादपीठमनन्तरम् ॥ ३०४ ॥

भक्तिनम्रेण शिरसा दद्यादर्घ्य तु मूर्धनि ।
विनिवेद्य ततो हैमं सरत्नं च प्रतिग्रहम् ॥ ३०५ ॥

दद्याद्वै पाद्यकलशात् पाद्यं पादाम्बुजद्वये ।
शुभे च पादुके चाथ तदन्ते स्नानशाटकम् ॥ ३०६ ॥

सुगन्धशालिसंपूर्ण मात्रार्थं पात्रमुत्तमम् ।
दर्पणं पूर्णचन्द्राभं गन्धतोयमनन्तरम् ॥ ३०७ ॥

पाणि(भ्या)(पाद)प्रक्षालनार्थं तु पादपीठं ततः शुभम् ।
(शिरस्पृष्टेन तैलेन किञ्चिदङ्गमुपस्पृशेत् ॥)

दन्तकाष्ठं च तदनु कर्मण्यक्षीरवृक्षजम् ॥ ३०८ ॥
मुखधावनपात्र च जिह्वानिर्लेहनं तथा ।
गण्डूषाचामसलिले ताम्बूलं गन्धभावितम् ॥ ३०९ ॥

स्नानारम्भानुवृत्ताश्च(म्भ तु विज्ञाप्य)तैलादीन् संनिधाप्य
तत्पात्राभ्यर्चनं कृत्वा ततस्तैलं समर्चयेत् ॥३१०॥ [च ।

स्कन्धौ संछाद्य वस्त्रेण सुकेशान् विकिरेत् प्रभोः ।
मध्ये शिरसि देवस्य सेचयेत्तैलमुत्तमम् ॥ ३११ ॥

आवृत्यावृत्य निष्पीड्य तथा कण्डूयनं नखै. ।
बहुपचारसंयुक्तं संमार्ज्य तैलजं लवम् ॥ ३१२ ॥

केतकोत्पलमालाश्च दत्वा केशाश्च वन्धयेत् ।
हस्तौ प्राक्षल्य तोयेन स्कन्धवस्त्रं विमुच्य च ॥ ३१३ ॥

स्पृष्ट्वा तैल तथाङ्गानि उपाङ्गानि च मर्दयेत् ।
ततो बहुसुगन्धं तु चूर्णं गोधूमशालिजम् ॥ ३१४ ॥

रजनीचूर्णसंमिश्रमीषत्पद्मकभावितम् ।
देयमुद्वर्तनार्थं तु माषी च(चमषी)तदनन्तरम् ॥३१५॥

स्नानार्थं खलिसंयुक्तं तोयमुष्णमनन्तरम् ।
चन्दन मुखलेपार्थं घृष्ट कर्पूरभावितम् ॥ ३१६ ॥

तत आमलकस्नान लोध्र कालेयक तथा ।
वर्णकं केयूरकं च तगरूणि प्रियङ्गवः ॥ ३१७ ॥

सुगन्धं चैव सिद्धार्थं सर्वौषधिसरत्नकम् ।
सहस्रधारया विष्णोर्दद्याच्छुद्धोदकं तथा ॥ ३१८ ॥

कालेयक च तदनु लोध्रस्नानं तु वर्णकम् ।
शरीरार्थानि चान्यानि शिरोर्थानि तु सत्तम ! ॥ ३१९॥

यद्वा क्षीरादिसंपूर्णकुम्भैः संस्नानपयेद्विभुम् ।
गव्यं प्रभूत स्नानार्थं क्षीरं दधि घृतं मधु ॥ ३२० ॥

ऐक्षव्यं तु रसं द्वयमभावाच्छर्करोदकम् ।
धात्रीफलोदकं चैव लोध्रतोयमनन्तरम् ॥ ३२१ ॥

रक्तचन्दनतोय च रजनीनीरमुत्तमम् ।
ग्रन्थिपल्लववार्येव ततस्तु तगरोदकम् ॥ ३२२ ॥

प्रियङ्गुवारि तदनु मासीजलमत. परम् ।

सिद्धार्थकोदकं चाथ सर्वौषधिजल तत. ॥ ३२३ ॥
पत्रपुष्पोदके चैव फलबीजोदके त्वथ ।
गन्धोदकं च तदनु हेमरत्नजले तत. ॥ ३२४ ॥
पुण्यतीर्थसरित्तोये केवलं तदनन्तरम् ।
स्नानार्थं कल्पितेनैव तृदकेन विमिश्रितम् ॥ ३२५ ॥
योक्तव्यं क्रमशो ह्येतदर्घ्यपुष्पसमन्वितम् ।
अन्तरान्तरयोगेन स्नानानां च महामते' ॥ ३२६ ॥
क्षालनं चार्घ्यकलशादर्घ्यदानसमन्वितम् ।
ततः स्नानीयशेषेण-हेमादिद्रव्यनिर्मितम् ॥ ३२७ ॥
सपूर्णमम्भसा कुम्भं हरिद्राशालितण्डुलै. ।
सुपिष्टैरुपरिष्टाच्च लिप्त युक्तं स्रगादिना ॥ ३२८ ॥
पाणौ कृत्वा तमेकस्मिन्नपरस्मिस्तु मल्लकम् ।
धूमायमानं सिद्धार्थैर्भ्राम्य मूर्ध्नि बहि. क्षिपेत् ॥
सुधौतमहतं चाथ शाटकं विनिवेद्य च ।
कचोदकापकर्षार्थमपर देहवारिहृत् ॥ ३३० ॥
अधरोत्तरवस्त्रे द्वे गन्धधूपाधिवासिते ।
स्कन्धस्रोत निवेद्याथ सुसूक्ष्ममहत सितम् ॥ ३३१ ॥
शिर.श्यानं तत. कुर्याच्छशिधूपसमन्वितम् ।
कर्पूरचूर्णसमिश्र कुर्याद्देवस्य मूर्धजम् ॥ ३३२ ॥
विभाव्यालङ्कृतं भक्त्या भोगै स्रक्चन्दनादिभि. ।
एव हि चित्रपूर्वाणामन्येषा कमलासन' ॥ ३३३ ॥
सद्रत्नब्रह्मपाषाणवर्जितानां समाचरेत् ।
स्नानाद्यं कर्मबिम्बे तु तत्समीपेऽथ दर्पणे ॥ ३३४ ॥
स्नानविज्ञापनं कृत्वा कर्मार्चा तस्य सन्निधौ ।
स्नानासने समारोप्य तस्या सर्व समाचरेत् ॥ ३३५ ॥
तदभावे दर्पणे तु स्नानभोगानि चार्पयेत् ।
चित्रस्थ एव दद्याच्च भोगानन्यान् यथाक्रमम् ॥३३६॥
तदभावे च तान् सर्वान् पाणिनादाय चेतसा ।
निवेदयेन्मण्डलादिष्वेवं भोगनिवेदनम् ॥ ३३७ ॥
प्रोक्षणं यदि वा कुर्यादर्घ्याद्यैरवशिष्टकै. ।
प्रणालभागादपरं स्थानं भद्रासनात्तु(नं तु) वै ॥३३८॥
भूरिनीरघटै शुद्धं कृत्वा तत्रावतार्य च ।
सपीठं भगवद्बिम्बं तद्विना वार्चितं यदि ॥ ३३९ ॥
खप्लुत भावयेद्देवं निश्शेषं क्षालयेत्तत. ।
भूयो गन्धोदकेनैव पूर्य कुम्भचतुष्टयम् ॥ ३४० ॥
स्नानकुम्भ विनान्येषां प्राग्वत् कार्या च कल्पना ।
हृन्मन्त्रेण चतुर्णा तु कुर्याद्वै द्रव्ययोजनम् ॥ ३४१ ॥
सास्त्रैण मूलमन्त्रेण सर्व तच्चाभिमन्त्र्य तु ।
मार्गत्रयं क्रमात् कृत्वा विनिवेद्यासनं तत. ॥ ३४२ ॥
तृतीय रत्नखचितं तत्रस्थं परमेश्वरम् ।
समभ्यर्च्यार्घ्यपात्रेण पादुकाभ्यामनन्तरम् ॥ ३४३ ॥
देयमाचमन भूय. पादपीठं तथैव च ।
समालभ्य सुगन्धेन भक्तितश्चन्दनादिना ॥ ३४४ ॥
संवीज्य व्यजनैव मायूरेण ततेन च ।
ततोऽप्यचटन हैम राजतं दारुजं तु वा ॥ ३४५ ॥
केशप्रसादकृत्कूर्च पुष्पताम्बूलकर्तरीम् ।
निवेद्य देवदेवाय दुकूलवसने सिते ॥ ३४६ ॥
वृष्टकुङ्कुमकस्तूरीमृगस्नेहानुलेपनम् ।
उपवीत सोत्तरीयं मकुटाद्यमनन्तरम् ॥ ३४७ ॥
पादनूपुरपर्यन्तमलङ्करणमुत्तमम् ।
विचित्रं हि शिरोमाल्यं वेष्टनेन समन्वितम् ॥ ३४८ ॥
स्रग्दामसूत्रसंबद्धमाकर्णा(ण्ठा)च्चरणावधि ।
मुक्तपुष्पं ततो दद्यद्यथाकालसमुद्भवम् ॥ ३४९ ॥
रुचिरं कङ्कणं चाद्य दद्यात् प्रतिसरं ततः ।
धातुभिः कुङ्कमाद्यैर्वा विचित्रं सितसूत्रजम् ॥ ३५० ॥
पूरितं मृदुतूलेन ग्रथितं चान्तरान्तरा ।
अञ्जनं सशलाकं च ताम्बूलं गन्धभावितम् ॥ ३५१ ॥
ललाटतिलकं हैमं मुखवासं सरोचनम् ।
कर्णावतंसके पुष्पे मण्डनं दर्पणं महत् ॥ ३५२ ॥
प्रकिरन् चित्रकुसुमैर्दी(मदी)प्तरत्नप्रभोज्ज्वलैः ।

प्रदीप्तैस्तु महाज्वालै(दीपै)स्तिलतैलाज्यपूरितै ॥
अभुक्ताहतसुश्वेतरञ्जि(चि)तैर्वस्त्र(र्ति)वेष्टितै ।
गर्भीकृतत्वगेलाद्यै. पूजयेत्तदनन्तरम् ॥ ३५४ ॥

कर्पूरचूर्णसंमिश्र सुगन्धिमधुर बहु ।
मृष्टधूपसमायुक्तं गुग्गुलुं धूपयेच्छुभम् ॥ ३५५ ॥

सहघण्टारवै रम्यैश्चाल्यमानेन वाहुना ।
उपानहौ सितच्छत्र शिविकां च रथादि यत् ॥ ३५६ ॥

वाहनं गजपर्यन्त सपताक खगध्वजम् ।
सितासितौ तु चमरौ मात्रावित्तमनन्तरम् ॥ ३५७ ॥

जानुनी भूगते कृत्वा शिरसावनतेन तु ।
आदायोत्तानपाणिभ्या विनिवेद्य जगत्प्रभो. ॥ ३५८ ॥

संपूरणार्थं भोगाना सर्वेषा द्विजसत्तम ! ।
भेरीमृदङ्गशब्दाद्यैर्जयशब्दसमन्वितै ॥ ३५९ ॥

गीतकैर्विविधैर्नृत्तैस्तन्त्रीवाद्यसमन्वितै. ।
वंशै. शृङ्गैस्तथा वाद्यैरन्यै. श्राव्यैश्च पूजयेत् ॥ ३६० ॥

स्तोत्रमन्त्रजपं कुर्याज्जितन्ताद्य महामते ! ।
व्यस्तं चैव समस्तं च वाक्ययुक्त विशेषत. ॥ ३६१ ॥

तत. प्रदक्षिणं कुर्याच्चत्वारि द्विजसत्तम ! ।
कुसुमक्षेपसयुक्तं चतुर्दिक्षु समं तु वै ॥ ३६२ ॥

सहान्त.करणेनैव भक्तियुक्तेन चेतसा ।
नतपृष्ठशिरोजानुललाटतटहृत्करः ॥ ३६३ ॥

गृहस्थ आचरेन्नित्यं प्रणामं सप्रदक्षिणम् ।
संन्यासी दण्डवत् कुर्यात् प्रणिपातं च सर्वदिक् ॥

विहितं स्नातकादीनामन्येषामेवमेव हि ।
स्मरन् सर्वेश्वरं बुद्ध्या सकृत् प्रवितते क्षितौ ॥३६५॥

संकटे सति भूभागे भगवत्यग्रत. स्थित. ।
धिया तु भक्तितः कुर्याद्बध्वा तु करसंपुटम् ॥ ३६६ ॥

हृद्देशे मूर्ध्नि कम्पैस्तु स्मरन् सर्वेश्वरं हरिम् ।
अन्तर्गर्भगृहे विष्णोर्गर्भद्वाराधमण्टपे ॥३६७ ॥

प्रणिपातगणं कुर्यात् प्रदक्षिणगणं विना ।

चक्रवद्भ्रामयेन्नाङ्ग पृष्ठभागं न दर्शयेत् ॥ ३६८ ॥

पश्चाद्भागेन निर्गच्छेद्देवाग्निगुरुसन्निधौ ।
वह्निस्थस्य विभोर्यस्मात् पाणिपृष्ठस्य दर्शनम् ॥ ३६९ ॥

वहुष्वपि च भोगेषु प्रधानं प्रापणं तथा ।
पश्चादुत्सवविम्वं तत्क्रमेणैव तु पूजयेत् ॥ ३७० ॥

जानुभ्या सह पाणिभ्या पाणिभ्या वा समाचरेत् ।
जानुप्रदक्षिणं मुक्त्वा अन्तः सन्निकटे विभो ॥३७१॥

विरुद्धमपरं चैव भक्ताना चरणभ्रमम् ।
एवं प्रदक्षिणीकृत्वा क्षिप्त्वा पुष्पाञ्जलि तत. ॥३७२॥

सुस्नाना(ता)दिक्रियं पृच्छेद्भगवन्तं तदापि च ।
सार्घ्याचामे(न) तु वा चार्घ्यगन्धपुष्पप्रधूपकैः ॥३७३॥

इष्ट्वा नीराजयेद्देव विभोरर्घ्यं समर्पयेत् ।
भोज्यासन निवेद्याथ मार्गत्रयपुरस्सरम् ॥ ३७४ ॥

छन्नं दुकूलतूलोत्थमसूरकवरेण तु ।
अर्घ्यं पाद्याचमे दद्यात् प्रतिग्रहसमन्विते ॥ ३७५ ॥

तर्पणं संप्रतिष्ठाप्य वासित चार्घ्यवारिणा ।
अथार्हणजल स्वच्छं सुगन्ध पात्रतः कृतम् ॥ ३७६ ॥

मधुपर्क दधिघृत मधुयुक्तमनन्तरम् ।
समस्तमेवमेकाङ्ग दधि वापि निवेदयेम् ॥ ३७७ ॥

शीतलं तर्पणजल अथ चूर्ण पुरोदितम् ।
देयं निष्पुंसनार्थं च पुनराचमनं विभो. ॥ ३७८ ॥

स्वलङ्कृता सुरूपा च स्रग्युक्ता विनिवेद्य गाम् ।
ओषधीः शालिपूर्णाश्च स्रक्फलाढ्यं वनस्पतिम् ॥

मूर्ति(र्त)निवेदयेत् पूर्व ततः संस्थाप्य तर्पणम् ।
प्रच्छादनाम्बरं चैव प्रदद्यादर्हणोदकम् ॥ ३८० ॥

षड्रसप्रभवैर्दिव्यैर्नैवेद्यैः पावनै. फलैः ।
गुडखण्डचितैर्भक्ष्यैर्बहुभिर्घृतपाचितै. ॥ ३८१ ॥

गुडमुद्गपयोमिश्रैर्निशाज्यतिलमिश्रितैः ।
दधिमिश्रैस्सर्वमिश्रैर्मधुस्वादुयुतैः फलै. ॥ ३८२ ॥

क्रमादन्नैरष्टविधैरपूपान् विनिवेदयेत् ।

सरसाभी रसालाभि. पयसा सुश्रुतेन च ॥ ३८३ ॥
पवित्रै. शीतलै. स्वादुरसगन्धैश्च पानकै. ।
भक्ष्यैर्भोज्यैस्तथा लेह्यै. पेयैरन्यैरनेकश ॥ ३८४ ॥
श्रद्धापूतेन मनसा यष्टव्य(जेत्त)मजमव्ययम् ।
एकैकस्मिस्तु वै भोगे प्रोक्षयेदर्घ्यवारिणा ॥ ३८५ ॥
छोटिकां मन्त्रसंयुक्ता कृत्वा पाणिद्वयेन तु ।
धारणाद्वितयेनैव अर्कसोममयेन तु ॥ ३८६ ॥
सम्यक् सर्वं तु सस्कुर्याद्यथा तदवधारय ।
प्रचण्डकिरणव्रातैर्भास्करीयैर्दहेत् पुरा ॥ ३८७ ॥
सचिन्त्य भस्मभूताहं(तं तु) तत पूर्णेन्दुरश्मिभि ।
आ याय्यामृतकल्लोलधारापातेन नारद ! ॥ ३८८ ॥
कान्तिमच्चिन्तयेद्भूयो यद्दग्ध भानुना तु वै ।
वध्वा कामदुघा मुद्रा स्रवन्ती मन्त्रसयुताम् ॥ ३८९ ॥
गोरूपा हिमशैलाभा निराधारपथे स्थिताम् ।
दत्वा पुष्पार्घ्यमुपरि सस्पृशेद्विष्णुपाणिना ॥ ३९० ॥
सव्येन पाणिना स्पृश्य प्रकोष्ठ दक्षिणस्य तु ।
तेन दक्षिणहस्तेन अग्रसंकुचितेन तु ॥ ३९१ ॥
निवेदयेत्ततो विप्र ! शिरसाऽवनतेन तत् ।
पावनैः पानकै. स्वच्छै. शीतलैर्मधुरादिकै ॥ ३९२ ॥
त्वगेलाद्यन्वितैर्मृष्टघृपकर्पूरवासितै ।
नालिकेरोदकोपेतैस्तर्पणीयमनन्तरम् ॥ ४९३ ॥
मसूरमाषचूर्णेन रजनीशालिजेन च ।
समुद्वर्त्य च संक्षाल्य शीतलैर्बहुवारिभिः ॥ ३९४ ॥
नैवेद्याचमनार्थं तु गन्धोदकमनुत्तमम् ।
वाससा निर्मल कृत्वा चन्दनेन सितेन च ॥ ३९५ ॥
समालभ्य सुघृष्टेन कर्पूरसहितेन च ।
तिलान्यथ स रत्नानि सौवर्णे वाथ राजते ॥ ३९६ ॥
पात्रे कृत्वाथ मात्रार्थं देवाय विनिवेदयेत् ।
लवङ्गतक्कोलेलात्वक्कर्पूरपरिभावितम् ॥ ३९७ ॥
जातिपूगफलोपेतं ससुगन्धच्छदं बहु ।
कर्पूरचूर्णसंमिश्रं मुक्ताचूर्णसमन्वितम् ॥ ३९८ ॥
मातुलुङ्गफलोपेतं नालिकेरफलान्वितम् ।
प्रदद्यात् प्रणतश्चान्ते ताम्बूल जगत पतेः ॥३९९॥
प्राक्षल्य गन्धतोयेन अर्घ्यपात्रोद्धृतेन वै ।
पाणियुग्म यथा वै स्यात् स्वच्छमत्यन्तनिर्मलम् ॥
नैवेद्यधूपपात्राद्यै. पात्रैश्चानिर्मलीकृतम् ।
कृत्वा तु गन्धदिग्धौ तौ अर्घ्येणार्च्य परस्परम् ॥
मुद्रामूलादिमन्त्राणां दर्शयित्वा यथाक्रमम् ।
भूयोऽर्घ्यगन्धपुष्पेण धूपान्तेन समर्च्य च ॥ ४०२ ॥
जपयज्ञविधानेन देव सन्तर्पयेत्तत ।
स्फाटिकेनाक्षसूत्रेण स्वकैर्वा करपर्वभिः ॥ ४०३ ॥
पात्र संस्थापयेत् पश्चादर्घ्यपात्राच्च वारिणा ।
विलिप्य चन्दनाद्यैस्तु स्थापयेद्भाजने शुभे ॥ ४०४ ॥
संपूज्य पुष्पधूपाद्यैर्मन्त्रं तत्र च विन्यसेत् ।
साधारमासन चैव शक्तिपूर्वै. समावृतम् ॥ ४०५ ॥
चतुर्भुज तु विरजो नारायणमिवापरम् ।
वरदाभयहस्तं च बद्धाञ्जलिधरं स्मरेत् ॥ ४०६ ॥
ब्रह्मस्थानस्थितं तं च सूत्र ध्यायेच्छिखोपमम् ।
सन्निधौ भव देवेश ! संनिरुद्धो भवाच्युत ! ॥ ४०७ ॥
सूत्राख्यमणिजालेऽस्मिन् यावच्चन्द्रार्कतारकम् ।
एवं मुने ! प्रतिष्ठाप्य मन्त्रं सूत्रेऽक्षसंज्ञिके ॥ ४०८ ॥
प्रतिष्ठितस्य वै पश्चान्मुद्रां स्वां च प्रदर्शयेत् ।
यथाशक्ति जपं कुर्याच्छतमष्टाधिकं तु वा ॥ ४०९ ॥
तन्निवेद्य विभो पश्चाद्वाक्कर्ममनसान्वितम् ।
"पुण्डरीकाक्ष ! विश्वात्मन् ! मन्त्रमूर्ते ! जनार्दन ! ॥
गृहाणेदं जपं नाथ ! मम दीनस्य शाश्वत !" ।
इत्युक्त्वार्घ्योदकं पश्चात् पुष्पं दक्षिणपाणिगम् ॥
अग्रतो निक्षिपेद्विष्णोर्मूलमन्त्रेण नारद ! ।
भावयेच्च ततस्सम्यक्स्फुरन्तीं तारकावलिम् ॥४१२॥
प्रविष्टा भगवद्वक्त्रे वक्त्रात्तां हृद्गतां पुनः ।

हृदयाद्द्विजशार्दूल ! संहाराख्यक्रमेण तु ॥ ४१३ ॥
पूर्ववद्ब्रह्मरन्ध्रेण परेण सह योजयेत् ।
एकैकं हृदयादीना सर्वेषा विहित त्वथ ॥ ४१४ ॥
क्रियाङ्गत्वान्न दोषोऽस्ति अन्यथा तज्जप विना ।
धूपं दत्वा प्रणम्याथ स्तु(श्रु)त्वा मन्त्रेश्वरं तत. ॥
द्विधा प्रदक्षिणं कुर्यात् प्रणामं च तथाविधम् ।
नैकत्रिपञ्चसप्ताख्यगणनाविषमं च यत् ॥ ४१६ ॥
यतः समो हि भगवान् देवः सर्वस्य वै हरि ।
संपूज्य गन्धधूपैश्च ततस्तु भगवन्मयान् ॥ ४१७ ॥
यथाक्रम समभ्यर्च्य नैवेद्यं प्रतिपाद्य च ।
तेषां मात्रावसान च आसनाद्यं निवेदयेत् ॥ ४१८ ॥
यद्वैभ्यो देव(भोग)यज्ञान्ते तन्मात्रान्तं प्रदाय तु ।
अस्मिन कालेऽर्हणाद्य तु ताम्बूलान्तं समर्पयेत् ।
शय्यासन ततो दद्यादग्नौ सन्तर्पयेत्तत· ॥ ४१९ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहिताया क्रियाकाण्डे मानमयागो नाम षष्ठोऽध्याय ॥

॥ श्रीः ॥

सप्तमोऽध्यायः ॥

न्यस्त्वास्त्रमासने यायादनलालयमर्घ्यभृत् ।
पूर्ववद्द्वारयाग तु कृत्वा सप्रविशेत्तत ॥ १ ॥
तत्र पूर्वोक्तविधिना उपविश्य समाहित· ।
नाकुण्डहवनं यस्मात् सिद्धिकृन्मन्त्रयाजिनाम् ॥ २ ॥
तस्मात् कुण्ड सदा कार्य सौत्र वा जङ्गम स्थिरम् ।
भगवद्वह्निशक्तेर्वै ज्वालाद्या प्रकृति· परा ॥ ३ ॥
अपरा प्रकृतिर्धिष्ण्या नानाकारा यथानलाः ।
अत एताग्निरूपा वै कुण्डा हवनकर्मणि ॥ ४ ॥
चतुरश्रादिभेदोत्था· काम्याना कर्मणां द्विज !।
सद्रत्नमालाश्रीवत्समकुटाङ्गदलक्षणा ॥ ५ ॥
शङ्खचक्रगदापद्मशार्ङ्गनानाशरोपमाः ।
परश्वथ तथा सीरसदृशा सर्वसिद्धिदा ॥ ६ ॥
वज्राद्यस्त्रचयाकारा भृङ्गारकरकोपमा ।
सर्वे सपीठा विहिताश्चतुस्त्रिद्व्येकमेखला ॥ ७ ॥
चक्रपद्मगदाशङ्खसमस्तव्यस्तलाञ्छिता ।
ततोष्टयोनिनिर्वाहै खेरङ्गै रुचिरैर्युता ॥ ८ ॥
आद्वादशाङ्गुलात् कुण्डा करान्ता ये त्रयोदश ।
सर्वाकृतिवराश्चैव जङ्गमा मेखलोज्झिता ॥ ९ ॥
अनुकल्पे तु विहिता भक्ताना मन्त्रतर्पणे ।
एक(स्य)द्वि(स्त्र)यन्ता यथालक्षणलक्षिता ॥ १० ॥
भूमावुल्लिख्य सपूर्य धान्यैर्वीजैर्मृदा तु वा ।
सामग्रीविरहाच्चापि शश्वत्कर्मसमाप्तये ॥ ११ ॥
अनुकल्पानुकल्पे तु नित्यमेवाविरोधकृत् ।
प्राजापत्ये दैविकीये शे·येऽर्धकरसम्मिते ॥ १२ ॥
क्षेत्रे क्रमान्नयेद्वृद्धि तावदेकैकमङ्गुलम् ।
यावदष्टकरं क्षेत्रं धिष्ण्यार्थमुपजायते ॥ १३ ॥
एवं स्यान्मानभेदेन एकाशीत्यधिकं शतम् ।
एवं कृते शुभे कुण्डे अग्निकार्य समाचरेत् ॥ १४ ॥
चुल्ल्या वा मल्लके वापि होमं कुर्याद्यथाविधि ।
शतार्धसख्या होमे च कुण्डं स्याद्द्वाशाङ्गुलम्
होमे साष्टशते चैव मुष्ट्यरत्निसमं भवेत् ।
होमे सार्धशते चैव सारत्नि· सकनिष्ठिका ॥ १६ ॥

हस्तं सहस्रहोमे तु अयुतार्थे द्विहस्तकम् ।
लक्षहोमे चतुर्हस्तं कोटिहोमेऽष्टहस्तकम् ॥ १७ ॥

एवं सुलक्षणं कुण्डं विभवानुगुणं शुभम् ।
सुधाद्यैर्वर्णके शुद्धैर्भूषयित्वोपलिप्य च ॥ १८ ॥

सुगन्धैश्चन्दनाद्यैश्च पञ्चगव्यपुरस्सरैः ।
कुण्डस्यारम्भकाले तु संस्कारा न कृता यदि ॥ १९ ॥

निष्पन्नस्य च ते सर्वं विधेयाश्च क्रमेण तु ।
ताडयेदस्त्रमन्त्रेण पुष्पैर्दक्षिणपाणिना ॥ २० ॥

खननं तीक्ष्णशस्त्रेण देशिकश्चास्त्रविद्यया ।
गृहीत्वा चैकदेशात्तु कुण्डमध्यात्तु मृत्कणम् ॥ २१ ॥

अङ्गुष्ठानामिकाभ्यां तु हृदयेन समुद्धरेत् ।
अस्त्रेणैव समीकृत्य न स्यान्निम्नोन्नतं यथा ॥ २२ ॥

सेचयेत् कवचेनैव कुट्टयेत्तदनन्तरम् ।
लेपयेद्गन्धतोयेन अस्त्रेण परिशोधयेत् ॥ २३ ॥

[1] अस्त्रजप्ते कुशाकाण्डैस्तीक्ष्णलाङ्गलवर्जिते ।
[2] अस्त्राभिमन्त्रितेनैव दर्भकाण्डद्वयेन तु ॥२४॥

[3] तन्मध्ये च कुशाग्रेण प्रागग्रागमवलम्ब्य च ।
[4] आरभ्य दक्षिणाशायां लिखेद्रेखामुदग्गताम् ॥२५॥

[5] विलिख्यार्गलरेखां प्राक् काष्ठां वैषुवतीं च सा ।
[8] उत्तराशावधिर्यावद्द्वाद्रेखावत्र तु वा ॥ २६ ॥

[9] प्रत्यग्भागात् समारभ्य नयेत् पूर्वमुखं तु तत् ।
[6] तस्यामुपरि संलिख्य रेखाणां त्रितयं स्फुटम् ॥

[7] प्रागग्रं दक्षिणाशादि ह्युदीच्यन्तं च सान्तरम् ।
[10] तन्मध्ये त्रितयं चाऽन्यद्रेखाणामुत्तरामुखम् ॥२८॥

[11] प्रत्यग्भागात् समारभ्य मध्येका पिङ्गलाभिधा ।
दक्षिणोत्तरयोर्द्वे तु सुषुम्नेडाधिदैवते ॥ २९ ॥

नीत्वा शुद्धिमथास्त्रेण क्षालयेच्छिरसाम्बुना ।
संशोष्य कवचेनैव नेत्रेणाथावलोक्य च ॥ ३० ॥

विलिप्योद्धृत्य चास्त्रेण प्रपूज्य हृदयेन तु ।
दर्भकाण्डद्वयेनाथ मध्ये मध्येऽन्तरीकृते ॥ ३१ ॥

वर्मणा क्षालनाद्येन चतुष्पथधिया पुनः ।
नीत्वा व्यक्तिं यथावच्च हृन्मन्त्रेण महामते ॥ ३२ ॥

मृदुदर्भसमूहं च नीरसं चाश्मकुट्टितम् ।
शुष्कगोमयचूर्णेन युक्तं गन्धाम्बुना सह ॥ ३३ ॥

कुण्डे द्रोणांशमात्रं तु समारोप्य प्रसार्य च ।
अच्छिन्नाग्रैस्ततो दर्भैरस्त्रमन्त्राभिमन्त्रितैः ॥ ३४ ॥

कुण्डभित्तिगणं सर्वं प्रोत्थितं परिमृषयेत् ।
वर्मणा चाक्षवाटं तु सकल्प्य तदनन्तरम् ॥ ३५ ॥

समभ्यर्च्यार्घ्यपुष्पाद्यं मध्यतः प्रणवेन तु ।
तेनैव विधिना नाभिं पूजयेच्चन्द्रसन्निभाम् ॥ ३६ ॥

ततः पवित्रकं दर्भं दिग्भागमन्त्राभिमन्त्रितम् ।
प्राक् समालभनोपेतं चतुष्पथपदे न्यसेत् ॥ ३७ ॥

हृन्मन्त्रेण च विन्यस्य तत्रोपर्यथ पूजयेत् ।
आधारशक्तिपूर्वं तु आसनं वैष्णवं च यत् ॥ ३८ ॥

अथवा पूजयेच्छक्तिं केवलाधारसञ्ज्ञिताम् ।
तत्र नारायणाख्यां वै शक्तिं विद्योतलक्षणाम् ॥ ३९ ॥

लक्ष्म्याकृतिपदं प्राप्तामसृतामृतरूपिणीम् ।
सर्वातिशायिरूपां च सर्वशक्तिसमन्विताम् ॥ ४० ॥

सौकुमार्येण रूपेण सर्वस्वान्तरस्थिताम् ।
शाश्वतीं सृष्टिमार्गेण अवतार्य हृदम्बुजे ॥ ४१ ॥

पुनर्ध्यानक्रमेणैव हृन्मन्त्रेण हृदम्बुजात् ।
स्वनामपदयुक्तेन सनमः प्रणवादिना ॥ ४२ ॥

रेचकेन विनिक्षिप्य कुण्डे हृत्पद्ममध्यतः ।
संपूज्य गन्धपुष्पाद्यैः पद्ममुद्रां प्रदर्श्य च ॥ ४३ ॥

ताम्रपात्रेऽथवाऽन्यस्मिन् समादाय हुताशनम् ।
आरण्यं लौकिकं वाऽथ मणिजं दर्पणोद्भवम् ॥ ४४ ॥

निधाय कुण्डस्यैशान्यां संस्कारार्थं च साम्प्रतम् ।
सन्ताड्य चास्त्रमन्त्रेण प्रोक्षयेच्छिखया च तम् ॥४५॥

हृदाभ्यर्च्यामृतध्यानं दत्त्वाच्छाद्याथ वर्मणा ।
मूलं स्मृत्वा समानीय पूरकेण हृदन्तरे ॥ ४६ ॥

मन्त्रानिलकलाकृष्टं कृत्वा तस्माद्विनिर्गतम् ।
व्यस्तो गुणतणात् पञ्चस्तेजोनाम गुणो हि यः ॥ ४७ ॥

पञ्चस्य ब्रह्मणः सोऽयं सामान्यं सर्वतेजसाम् ।
विरेच्य विन्यसेत्तस्मिन् तद्विपाके पुरार्चिते ॥४८॥

ततोऽग्निपात्रमादाय निर्धूमसमतिर्दीप्तिमत् ।
दक्षिणेन करेणैव पाणिभ्यामथवा द्विज ! ॥ ४९ ॥

भ्रामयित्वा चतुर्धा वै तत् कुण्डान्तरे क्षिपेत् ।
ध्यायेदेकत्वमापन्नं ततो मन्त्रार्चिषा सह ॥ ५० ॥

यावीयैरिन्धनैः शुष्कैः प्रज्वालयाभिमन्त्रितैः ।
हृदा दक्षिणहस्तेन कुर्यात् परिस्फुटनम् ॥ ५१ ॥

प्रदक्षिणक्रमेणैव हाद्रिपाणितलेन तु ।
तिर्यक् चाधोमुखस्थेन नखपृष्ठमदर्शयन् ॥ ५२ ॥

अस्त्राभिमन्त्रितेनैव प्रोक्षयेदर्घवारिणा ।
ततस्त्वभग्नमूलाग्रैः समैर्दद्यात् कुशैस्तलम् ॥ ५३ ॥

दिशि दिक्षूत्तराशान्तं, प्राग्याशादौ तु सान्तरम् ।
चतुर्गुणैश्चतुर्धा वाप्यग्रच्छन्नैः परस्परम् ॥ ५४ ॥

प्राक्प्रान्ते पूर्वभागाच्च यावदुत्तरगोचरम् ।
चतुर्भिरस्त्रजैर्वा चतुर्दिक्षु त्रिधा त्रिधा ॥ ५५ ॥

चतुर्भिश्च चतुर्भिर्वा प्राक्प्रतीच्योरुदङ्मुखे ।
दक्षिणोत्तरयोश्चैव तत्संख्यैः प्राङ्मुखैर्द्विज ! ॥ ५६ ॥

अवतार्य तदूर्ध्वे तु दक्षिणस्या तथात्मनः ।
द्वन्द्वद्वयप्रयोगेण द्रव्यस्थापनमाचरेत् ॥ ५७ ॥

परिधीश्चैव मनिचयं मुक्तदर्भैस्तरण्डिकाम् ।
स्रुक्स्रुवौ च चतुष्कं यदेकत्र विनिवेश्य च ॥ ५८ ॥

स्रक्धूपमधुपर्कं च बीजान्येकत्र वै ततः ।
कौशेयं धूतकेशं च विष्टरं च घृतं चरुम् ॥ ५९ ॥

आज्यस्थालीचतुष्कं च निधाय तदनन्तरम् ।
प्रणीतं पात्रयुगलं करकं चार्घ्यभाजनम् ॥ ६० ॥

चतुष्कमेतदपरं अग्रतो विनिवेश्य च ।
प्रादेशमात्राः समिधः प्रभूतं शुष्कमिन्धनम् ॥ ६१ ॥

पक्ष्मकं स्वेदहृद्रूपं वामभागे निधाय च ।
अर्घ्योदकेन सास्त्रेण कृत्स्नं पावनता नयेत् ॥ ६२ ॥

सुसमं कुण्डगाह्ये तु प्राग्भागे मेखलाश्रितम् ।
पवित्रकाष्टकं कृत्वा तेषु चाष्टविधान् न्यसेत् ॥ ६३ ॥

क्ष्मादिकां प्रकृतिं दवीमहङ्कारावसानिकाम् ।
प्रभवाप्ययभेदेन विभुना चतुरात्मना ॥ ६४ ॥

अधिष्ठिता महाबुद्धे ! तामभ्यर्च्य महात्मना ।
स्वनामपदयुक्तेन नतिना प्रणवेन च ॥ ६५ ॥

ऊर्ध्वाधोमेखलानां तु चतुर्णां दिक्चतुष्टये ।
कौशेयविष्टरस्थाश्च वासुदेवादिकान् यजेत् ॥ ६३ ॥

विदिक्ष्वाप्ययोगेन ऊर्ध्वान्तमधरात्तु वै ।
तद्देवार्घ्यपुष्पाद्यैः पूजनीयाः क्रमेण तु ॥ ६७ ॥

ततस्तन्मूलदेशस्था ब्रह्मवृक्षादिकोत्थिताः ।
सपर्णाः सत्वचः स्पष्टा अधोनेमेस्तु चाधिकाः ॥ ६८ ॥

प्राक्प्रत्यगुत्तराग्रौ च प्राग्ग्रौ दक्षिणोत्तरौ ।
चतस्रो वै परिधयः शिखामन्त्रेण पूजयेत् ॥ ६९ ॥

विष्टराणि ततो दद्यात्तेषु पृष्ठे हृदा मुने ! ।
तत्पृष्ठे पूजयेन्नित्यं लोकपालान् स्वदिक्स्थितान् ॥

दर्भान् प्रसव्यमावेष्ट्य मूलात् प्रादेशसमितान् ।
परतो द्व्यङ्गुलं पाशं कृत्वावेष्ट्य निरग्रतः ॥ ७१ ॥

पाशे निवेश्य द्वि त्रि(?) गुणं गुणेष्वायम्य मूलतः ।
समीकृत्यातिरिक्ताग्राण्यनखं विनिकृन्तयेत् ॥ ७२ ॥

कृत्वा वेदोपयामं तं वामाङ्गुष्ठान्तरार्पयेत् ।
स्रुक्स्रुवाभ्यां च संस्कारमुपयामाग्रगैः कुशैः ॥ ७३ ॥

स्रुचं द्वादशधा शोध्य सास्त्रेणोष्णेन वारिणा ।
तथैव द्विजशार्दूल ! स्रुवं शोध्य द्विधैव तु ॥ ७४ ॥

तथैव स्रुक्स्रुवौ ह्येव शिखामन्त्रेण वै ततः ।
प्रताप्यास्त्रेण सन्ताड्य सार्घ्यपुष्पासनान्वितैः ॥७५॥

तदा प्रमेयं तु स्रुचो ज्ञातव्यं कर्मसिद्धये ।
शतपत्रात्मनानन्तो मुष्टिस्थोऽनन्तवक्त्रधृक् ॥ ७६ ॥

अन्तर्वीजात्मभावेन स्थित्वा चोर्ध्वमुखं पुनः ।
सप्तस्कन्धं यदध्यात्मभूतप्राणमरुन्महत् ॥ ७७ ॥

प्रेरितं ब्रह्मरन्ध्रेण तत्तदिच्छावशात् पुनः ।
सप्तपातालनाग च अगमत् क्षमाम्बुजात्मना ॥ ७८ ॥

यदाश्रित्य स्वबाहे तु अमृतात्मा जलस्थितः ।
सचक्ररचनाजाले स्थितस्तेजस्त्रिमूर्तिधृक् ॥ ७९ ॥

शङ्खविग्रहधृग्वायुराज्यकोशं च खं तत ।
निर्वीजमजमक्षोभ्यमाद्य स्यादधिदैवतम् ॥ ८० ॥

अपरिस्मिन् स्रुवे ज्ञेय यथा जायेत तच्छृणु ।
साक्षादमृतमूर्तिर्वै वरुण कलशात्मना ॥ ८१ ॥

नालात्मना तदस्त्र च संस्थितं विघ्नभीतिकृत् ।
जगदाप्यायकृच्चन्द्र पद्मत्वेनाग्रदेशत ॥ ८२ ॥

आनन्दाख्य हि सामर्थ्य ज्ञेय तत् पारमेश्वरम् ।
सत्यभूतममेयं च प्रणेयमिदमाच्युतम् ॥ ८३ ॥

सस्कारकाले त्वारोप्य नित्य सन्मन्त्रतर्पणे ।
स्वसज्ञा प्रणवोपेता नमस्कारपदान्विता ॥ ८४ ॥

सर्वेषामर्चने विप्र ! आराध्य हृदयेन वा ।
पूजयित्वार्घ्यगन्धाद्यैर्न्यस्तमन्त्रगणं तत ॥ ८५ ॥

अम्बुपूतेऽथ पात्रे द्वे हेमादिद्रव्यनिर्मिते ।
पूरयित्वाम्भसा ताभ्या विप्ररद्वितय न्यसेत् ॥ ८६ ॥

एकस्मिन् मूलमन्त्रं तु सासनं सप्रपूज्य च ।
तदस्त्रमपरस्मिन् वै तेन प्रागादितस्तरम् ॥ ८७ ॥

प्रदक्षिणक्रमेणैव स्रुचा सिच्य निधाय च ।
पूरयित्वाऽम्भसा भूयो द्वितीयेन सहोत्तरे ॥ ८८॥

विनिधाय च दिग्भागे अर्चयित्वा प्रणम्य च ।
आज्यौघं च तदस्त्रेण प्रोक्षयेत्ताडयेद्द्विज ! ॥ ८९ ॥

भाण्डस्थस्य यदाज्यस्य दर्भैः प्रज्वलिते पुरा ।
स्पर्शनं विद्धि संस्कारमधिश्रयणसंज्ञकम् ॥ ९० ॥

उपाधिश्रयणं नाम यत्तद्द्रावणमुच्यते ।
परिवर्तनमन्यस्मिन् भाण्डे दोषापनुत्तये ॥ ९१ ॥

प्रसादीकरण ह्येतदुच्चस्थेन करेण तु ।
पुनराहाय कृत्वाग्रे आधारोपरि यत्नत ॥ ९२ ॥

परावर्त्य स्रुवेणादौ चतुस्त्रिद्व्येकसख्यया ।
दर्भकाण्डचतुष्कं तु द्वादशाङ्गुलसंमितम् ॥ ९३ ॥

तिर्यगुत्तानपाणिभ्यामवष्टभ्य च सान्तरम् ।
अनामाङ्गुष्ठयुग्मेन यथा मध्यं नतं भवेत् ॥ ९४ ॥

तैराज्य चतुरो वारानानयेद्बहुशो नयेत् ।
अन्तरान्तरयोगेन ह्यात्मनोऽग्रेस्तु संमुखम् ॥ ९५ ॥

प्रणवेनोक्तसख्येन कुण्डमध्ये विनिक्षिपेत् ।
यद्वा हृदा द्विदर्भेण नित्येद्वा त्रयेत् त्रिधा ॥ ९६ ॥

संप्लवोत्प्लवने कृत्वा ततो दर्भ पवित्रकम् ।
विनिक्षिपेच्च तन्मध्ये पवित्रीकरण च तत् ॥ ९७ ॥

नीराजीकृत्य नेत्रेण कुशाग्रैरर्चितान्विते ।
हृदा सयोजन कुर्याद्धुतशेषस्य तत्र च ॥ ९८ ॥

तेजसा हृदयस्थेन दृग्गतेनावलोकनम् ।
निरीक्षणमिद विप्र ! नेत्रेण हृदयेन वा ॥ ९९ ॥

निरीक्ष्यैवं तु तत्पश्चात् कवचोदरगं स्मरेत् ।
अवगुण्ठनमेतद्धि स्थित तत्रोपरि स्मरेत् ॥ १०० ॥

चन्द्रमण्डलमध्यस्थ वेणुमुद्रासमन्वितम् ।
मन्त्र वै सौम्यभीयं च स्फुरदिन्दुशतप्रभम् ॥ १०१ ॥

तदन्तरस्थं मन्त्रेश हिमाचलनिभं स्मरेत् ।
तत्स्रुतैरमृतौघैश्च शशिजैर्वेणुजैरपि ॥ १०२ ॥

कवचेनामृतीकृत्य निदध्यादुत्तरे घृतम् ।
अमृतीकरणं नाम इदं ते सप्रकाशितम् ॥ १०३ ॥

सामान्याज्यस्य संस्कारान् कृत्वा पञ्चदश द्विज ! ।
अथाज्यप्रोक्षण कुर्याद्योग्य तदसित तु वै । १०४ ॥

समित्कुसुमपूर्व तु विधुरेण स्रुवेण वा ।
हृदाज्यसिक्तै कुसुमै सर्पिषा वा धिया द्विज ! ॥

गर्भाधानादिसंस्कारान् कुर्याद्दारावसानकान् ।
स्त्रीकुक्षिकुहरे यद्वै यद्विष्टस्य प्रवेशनम् ॥ १०६ ॥

गर्भाधानं तु तद्विद्धि संस्कारं प्रथमं मुने ! ।
प्राणयोगाच्च या शक्तिर्वह्नौ श्रीजठरे स्थिता ॥

जडरूपाक्षया सूक्ष्मा तस्याश्चित्प्रसरो हि य ।
भगवच्छक्तिचैतन्यसामर्थ्याच्च शनैः शनैः ॥ १०८ ॥

स्मृत्वैव जुहुयादाज्यं हृन्मन्त्रणोदितेन च ।
भवेत् पुंसवनं चाग्नेश्चिच्छक्तिनयनात्तु वै ॥ १०९ ॥

सीमन्ताख्यं तु संस्कारमग्नेः कुर्यादनन्तरम् ।
अव्यक्ताश्च तदन्तस्थाः शिरः पाण्यादयोऽखिलाः ॥

स्वा स्वा वै कर्मसीमानं प्रबुद्धाः संश्रयन्ति ये ।
विभागकल्पनं तेषां सीमन्तं तदुदाहृतम् ॥ १११ ॥

अग्नेर्वै जातकर्मार्थं पूर्ववद्धोमयेत् सकृत् ।
निस्सृतस्य च वै गर्भात् स्नातस्य प्राशनं द्विज ! ॥

हिरण्यमधुसर्पिर्भ्यां जातकर्म भवेत्तु तत् ।
होमयेन्नामकर्मार्थं घृतपूर्णस्रुवेण च ॥ ११३ ॥

जातस्याग्नेः प्रयत्नेन वासुदेवादिना द्विज ! ।
अङ्कयेत् सुप्रसिद्धेन नामकर्म भवेदिदम् ॥ ११४ ॥

अन्नप्राशनकर्मार्थं पूर्ववद्धोममाचरेत् ।
एवं संस्कारशुद्धस्य वैष्णवाग्नेः प्रयत्नतः ॥ ११५ ॥

मन्त्रान्नदानपूर्वं यत्तदन्नप्राशनं भवेत् ।
शिखाबन्धं यदग्नेस्तु तच्चौलमिति चोच्यते ॥ ११६ ॥

यदग्नेर्होमयोग्यत्वं तच्चोपनयनं स्मृतम् ।
वेदव्रतं च गोदानं समावर्तविवाहकौ ॥ ११७ ॥

कृत्वानलस्य जिह्वानां भावयेत् सप्तकं पुनः ।
नवखण्डे समिद्वह्नौ कुण्डेऽग्नावर्चिषोद्धते ॥ ११८ ॥

ईशप्रागनलाख्यानां पदानां भावयेत् त्रयम् ।
यातुधाने तु वारुण्ये वायव्ये तु पदत्रये ॥ ११९ ॥

जिह्वात्रयं तु बोद्धव्यं मध्यतो दक्षिणोत्तरे ।
एका चैव परिज्ञेया ता, क्रमेण निबोध तु ॥ १२० ॥

हव्या कव्या च धूम्रा वै तिस्रः प्राच्यां दिशि स्थिता ।
काली मनोजवा चेति कराली चेति पश्चिमे ॥ १२१ ॥

एका वै लेलिहाख्या च विद्धि शेषपदत्रये ।
रक्तं श्वेतं तथा नीलं कृष्णं पीतं तथारुणम् ॥ १२२ ॥

सौदामिनीनिभं ध्यायेज्जिह्वानां सप्तकं क्रमात् ।
स्वस्ववीजैः, स्वसंज्ञैर्वा, सबीजैर्वा स्वनामभिः ॥ १२३ ॥

एतैर्मन्त्रैर्द्विजश्रेष्ठ ! भावयेच्च यथाक्रमम् ।
प्रभादीप्ति प्रकाशा च मरीचिस्तापनी तथा ॥ १२४ ॥

कराला लेलिहा चैव कुण्डं व्याप्य व्यवस्थिताः ।
ईशपूर्वाग्निदिग्भागे प्रभाद्यं त्रितयं स्मृतम् ॥ १२५ ॥

रक्षोवारुणवायव्यो मरीच्याद्यं त्रयं तु तत् ।
उदग्दिङ्मध्यतो याम्ये स्थितैका, लेलिहाभिधा ॥

विभागमेवं ज्ञात्वा वै जिह्वानामग्निकर्मणि ।
आवेयोल्लिङ्गिताकारं ध्यात्वा कुण्डगतानलम् ॥ १२७ ॥

तज्जनित्री तत कुण्डाज्ज्वालामार्गेण चोद्गताम् ।
परानन्दप्रकाशाभां नासिक्यां द्वादशावधि ॥ १२८ ॥

ततोऽवतारयोगेन प्रविष्टां भावयेद्धृदि ।
हृन्मन्त्रेणार्चयित्वाग्निं सार्घ्यपुष्पैश्च निर्मलैः ॥ १२९ ॥

धूपैर्दीपैः दध्ना च तिलैरक्षतमिश्रितैः ।
अन्नैर्भक्ष्यफलोपेतैराज्येन क्रमशो द्विज ! ॥ १३० ॥

संपूज्यैव विधानेन स्वमन्त्रेणाथवा ततः ।
तर्पयेत् यथाशक्ति तिलाज्याद्यैरनुक्रमात् ॥ १३१ ॥

आज्येन वा केवलेन सहस्रशतसंख्यया ।
दद्यात् पूर्णाहुतिं पश्चात् पूजितां कुसुमादिकैः ॥ १३२ ॥

स्रुक्स्रुवेणोपयामेन ह्यर्ध्वाधः संस्थितेन च ।
स्रुवा संपुटयोगेन वह्नेर्वदनमध्यगम् ॥ १३३ ॥

प्रादक्षिण्येन चामध्याद्धारापातं समाचरेत् ।
नयेन्मध्यपदे निष्ठामाज्यधारां तथा पुनः ॥ १३४ ॥

प्रकल्प्य हार्दीयां मद्रामग्निमद्रां तु वा द्विज ! ।
नारायणात्मकं वह्निं प्राग्वदभ्यर्चयेत्ततः ॥ १३५ ॥

पूर्ववच्च स्मरेद्वह्निं साकारं निष्कलप्रभम् ।
स्वयोगबलवीर्येण व्यापकं सर्वदिग्गतम् ॥ १३६ ॥

कदम्बकुसुमाकारं स्वप्रभाभिर्विराजितम् ।
कुण्डमापूरयन् सर्वं सर्वाकृत्या तु सर्वत ॥ १३७ ॥

एव हि विततो व्यापी निराकार सुदीप्तिमान् ।
अथ ज्वालाजटाधारे वह्नौ वै कुण्डमध्यत ॥ १३८ ॥

अनुसन्धीयते बुद्ध्या विष्टरं तु यथोदितम् ।
तदर्चनमथो कुर्यात् पुष्पैर्धूपै सचन्दनै ॥ १३९ ॥

मुद्रावन्धं तत कुर्यात् पीठामरगणस्य च ।
ततोऽवतार्य तन्मध्ये हृदयात् परमेश्वरम् ॥ १४० ॥

नीरौदकात् स्वमन्त्रेण दद्यात् पुष्पाञ्जलि विभो ।
साङ्ग सलाञ्छन ध्यायेत् सकल परमेश्वरम् १४१ ॥

सामुख्य सन्निधानं च सन्निरोधनमाचरेत् ।
अर्घ्यपदानपूर्व तु सर्व कुर्यात्तु पूर्ववत् ॥ १४२ ॥

मूलबिम्बे यथा ध्यानमग्निमध्ये तथा भवेत् ।
यानगे यानग ध्यायेदग्नौ स्थाने यथास्थितम् ॥

आसीने त्वथ चासीनं शयाने च तथाविधम् ।
पद्मरागारुणरुचि स्मर्तव्यमनलास्पदे ॥ १४४ ॥

मूलादिसर्वमन्त्राणां तत्तन्मुद्रा प्रदर्श्य च ।
अर्घ्यगन्धादिना पश्चात् पूजयेत् सकल प्रभुम् ॥१४५॥

लयभोगात्मना सम्यक् पूर्वोक्तविधिनाऽथवा ।
समिद्भणं तु पात्रस्थं कृत्वाभ्यर्च्य हृदा मुने ! ॥१४६॥

शिरसावनतेनैव विनिवेद्य तत प्रभो ।
इध्मानामष्टकं चापि चतुष्कं द्वयमेव वा ॥ १४७ ॥

आज्येन सर्वत सिक्त ब्रह्मक्षीरद्रुमोद्भवम् ।
समादाय द्विधा कृत्वा मूलेन द्विजसत्तम ! ॥ १४८ ॥

निधाय दक्षिणस्या च मध्ये आग्नेयदिग्गतम् ।
विश्रान्तं नैर्ऋतपदे उत्तरस्यां तथापरम् ॥ १४९ ॥

बाह्वीशपदसरुद्धमाघारार्ज्यं तत शिपेत् ।
इध्ममूलादथाग्रान्तमिध्मेध्मोपरि संस्थितम् ॥ १५० ॥

स्रुवमाज्येन संपूर्य सूर्यबीजेन चिन्तयेत् ।
सहस्राशुं च तन्मध्ये दद्यात् कुण्डस्य दक्षिणे ॥१५१॥

अपरस्मिन् स्रुचि ध्यात्वा सोमाख्येनाक्षरेण तु ।
पूर्णं शशाङ्कबिम्बं च प्रदद्यात्तु तदुत्तरे ॥ १५२ ॥

सूर्यानुगुणमिध्माना घृत च जुहुयात्तु वै ।
सूर्यसोमात्मक चाग्नेर्विद्धि तल्लोचनद्वयम् ॥ १५३ ॥

एतयोरन्तर यद्वै तदग्नेर्वदन स्मृतम् ।
तत्रैव जुहुयात् पूर्व समिधा सप्तकं क्रमात् ॥ १५४ ॥

घृतसिक्ता चतुस्संख्यामेकैका हि सुपुष्कलाम् ।
प्राक्कुङ्कुमादिना लिप्ता काष्ठसंज्ञा तु होमयेत् ॥१५५॥

स्रुग्रूपमधुपर्क च बीजाज्य यथाक्रमम् ।
तत्राग्नसमिदाधाने विशेषोऽयं विधीयते ॥१५६ ॥

साधितं संस्कृतेऽग्नौ प्राक् तन्निधायाग्रतश्चरुम् ।
समुद्धाट्यावलोक्यादौ सप्रोक्ष्यार्घ्याम्बुना तत ॥

दर्भकाण्डचतुष्केन साग्निना तदनु स्पृशेत् ।
तन्मध्ये स्रुक्चतुष्कं तु मन्त्रेणाज्यस्य निक्षिपेत् ॥

अथादाय स्रुचं तत्र तद्वद्दद्याच्चतुष्टयम् ।
चतुरङ्गुलमानेन अन्नग्रासमथाहरेत् ॥ १५९ ॥

तन्निधाय स्रुवा गर्भे तद्धूं पूर्ववद्घृतम् ।
दद्यादग्नौ चतुष्क तु क्षिपेदन्नाहुति तत ॥ १६० ॥

भूयोऽग्नौ स्रुक्चतुष्क तु ह्याज्यस्यापाद्य यत्नत ।
ततोऽन्यमाज्यसंसिक्तं प्राग्वत् कृत्वाहुतं पुनः ॥१६१॥

दद्यात् पूर्वप्रयोगेण त्वेवमेव चतुष्टयम् ।
हुत्वाप्यन्नाहुतीना तु ह्याज्याख्या जुहुयात्तत ॥ १६२ ॥

यादृङ्निवेद्यते बिम्बे होतव्यश्चापि तादृश ।
स्रुवमध्येन स्रुग्गर्भे एकैक वा घृतस्य तु ॥ १६३ ॥

प्रत्येकमन्नसमिध क्षिपेदाद्यन्तयोस्तथा ।
तिलैर्घृतसमायुक्तैरष्टोत्तरसहस्रकम् ॥ १६४ ॥

शतं शतार्ध पादं वा यथाशक्ति समाचरेत् ।
आज्याक्तैरक्षतैस्तद्वत्तिलैश्च जुहुयात्तत ॥ १६५ ॥

अर्धमर्धाशसंयुक्तमधिकं चाग्रवर्तिनाम् ।
जपकाले तथा होमे कर्तव्यं सिद्धिमिच्छता ॥ १६६ ॥

स्विष्टकृद्धवनं कुर्याद्ग्रासेन वै सकृत् ।
काम्यरक्षयफलदर्दशकालसमुद्भवे ॥ १६७ ॥

तिलैर्घृतेन पयसा दध्ना वा पायसेन तु ।
सिद्धान्नै साधितैर्भक्ष्यैर्बीजैर्लाजैश्च तण्डुलै ॥१६८॥

मूलै फलै पल्लवैश्च सुप्रशस्तैश्च कोमलै ।
सुगन्धै. स्थलपद्माद्यै पुष्पैर्द्विज ! सितादिकै ॥ १६९॥

गुग्गुलेनाज्यमिश्रेण सज्ञश्रीवेष्टकेन वा ।
धात्रीफलैश्च सरसैस्तत्फलैश्च शुभैस्तथा ॥ १७० ॥

सुमित्तै सितरक्तैश्च पद्मैर्बिल्वे सुशोभने. ।
दूर्वाकाण्डैरभग्नाग्रैर्दन्तिसद्दन्तनिर्मले ॥ १७१ ॥

एधोभिर्ब्रह्मवृक्षोत्थ क्षीरद्रुमभवैस्तथा ।
अमृताक्षीरसयुक्ता औदुम्बर्यो मधूत्लुता ॥ १७२ ॥

अच्छिन्नाग्रा ह्यभग्नाश्च कण्टकै. परिवर्जिता ।
सर्वास्त्रिमधुयुक्ताश्च घृतयुक्तास्तु वा पुन ॥ १७३ ॥

योक्तव्यान्यग्निमध्ये तु समिद्भि सह सर्वदा ।
सर्वाण्यन्नविशेषाणि चन्दनादीनि यान्यपि ॥ १७४ ॥

सदन्तकाष्ठताम्बूलमुत्कटक्षारवर्जितम् ।
दाप्यानि लक्षहोमे तु आसनादीनि यानि च ॥१७५॥

मधुलवणपानाम्बुकटुतैलोज्झितानि च ।
आज्ययुक्तैस्तिलै. शान्ति सिद्धय. सकलास्तथा ॥

घृतेन पयसा दध्ना होमस्तृप्ति प्रयच्छति ।
पायसेन तु सिद्धान्नैर्भक्ष्यैः पुष्टि सदा भवेत् ॥१७७॥

बीजैर्धान्यैस्तण्डुलैश्च तर्पितो मन्त्रराड्द्विज ! ।
प्रयच्छति सदा श्रेय. प्रसन्न. परमेश्वर. ॥ १७८ ॥

पल्लवै. फलमूलैश्च होमस्तुष्टि प्रयच्छति ।
जहाति चापमृत्युं च रोगाश्चोपशमं नयेत् ॥ १७९ ॥

तर्पित. स्थलपद्माद्यै. पुष्पैश्चान्यै. सितादिकै. ।
सौभाग्यमतुल विप्र ! अचिरात् संप्रयच्छति ॥ १८० ॥

गुग्गुल्वाज्यैर्द्विजारोग्यं शुभैर्धात्रीफलैस्तथा ।
शर्करैर्बिल्वफलकै. पञ्चगव्यसमुद्भवै. ॥ १८१ ॥

आज्याक्ते पद्मबीजैश्च लक्ष्मी शीघ्रं प्रयच्छति ।
उत्पलैर्वश्यकामस्तु भोगकामश्च होमयेत् ॥ १८२ ॥

दूर्वाङ्कुरैश्च होमेन आयुषो वृद्धिमाप्नुयात् ।
एधोभिश्च शुभैर्होमो माष. शान्तिप्रद प्रभु ॥१८३॥

तिलाना शस्यते होमो हरिणाननमुद्रया ।
घृतस्य कार्पिको होम क्षीरस्य च विशेषत. ॥ १८४ ॥

शुक्तिमात्राहुतिर्दध्न प्रसृति पायसस्य च ।
ग्रासार्धमानमन्नाना भक्ष्याणां स्वप्रमाणत. ॥ १८५ ॥

तृतीय मूलकन्दाना पुष्पाणां स्वप्रमाणत ।
सर्वपामेव बीजाना मुष्टिना होममाचरेत् ॥ १८६ ॥

अग्राङ्गुलिस्तु लाजाना शालीना पञ्चक हुनेत् (!) ।
फलाना स्वप्रमाण च पल्लवाना तथैव च ॥ १८७ ॥

कर्कन्धुमात्रा गुलिका होतव्या गुग्गुलो. सदा ।
धात्रीफलप्रमाणं वा संभवे सति होमयेत् ॥ १८८ ॥

दूर्वाकाण्डानि विप्रेन्द्र ! चतुरष्टाङ्गुलानि वा ।
समित्प्रादेशमानेन समच्छेदास्त्वगन्विताः ॥ १८९ ॥

अग्नेर्वर्णाश्च गन्धाश्च शब्दाश्चाकृतयस्तथा ।
विकारा विशिखाश्चैव संवेद्या कर्मसिद्धये ॥१९०॥

पद्मरागद्युतिश्रेष्ठो लाक्षलक्तकसन्निभ ।
बालार्कवर्णो हुतभुग्जयार्थं शस्यते द्विज ! ॥ १९१ ॥

इन्द्रगोपकसकाश शोणाभो वाथ पावकः ।
शक्रचापनिभ श्रेष्ठ. कुङ्कुमाभस्तथैव च ॥ १९२ ॥

रक्ताना पुष्पजातीना वर्णेनाग्निरिहेष्यते ।
सुगन्धद्रव्यगन्धोऽग्निर्घृतगन्धश्च शोभनः ॥ १९३ ॥

आयुर्द. पद्मगन्ध. स्याद्बिल्वगन्धश्च सुव्रत ! ।
उग्रगन्धोऽभिचारे तु विहित. सर्वदानलः ॥ १९४ ॥

जीमूतबहुकीशङ्खमृदङ्गध्वनितुल्यक. ।
शब्दोऽग्ने. सिद्धये हेतुरतोऽन्यः स्यादसिद्धिदः ॥

छत्राकारो भवेच्छ्रेष्ठो ध्वजचामररूपकः ।
विमानादिवितानाना प्रासादाना वृषस्य च ॥ १९६ ॥

आकारेणाथ हंसाना मयूराणा च सिद्धिदः ।
रक्ताभस्तु यदा वह्निः क्षीणाच परिदृश्यते ॥ १९७ ॥

भग्नराजोपलाभश्च स्फटिकाभस्तथा शुभः ।
यद्रूप कथितं पूर्वं यदि तस्य प्रदक्षिणम् ॥ १९८ ॥

अन्योन्यत्वं प्रपद्येत तथा सिद्धिकरोऽनलः ।
गर्हितेन तु वर्णेन यदि कापोतकादिना ॥ १९० ॥

परिवर्तं करोत्यग्निस्तदा विप्रविपर्ययः ।
होमान्ते तन्निमित्तं वै होमं कुर्याच्छताधिकम् ॥

विषमाश्च शिखावन्हेस्त्र्यादयश्च शुभावहाः ।
ह्रस्वा ह्रस्वोन्नता दीर्घा ज्वाला सिद्धिप्रदा स्मृता ॥

स्निग्धः प्रदक्षिणावर्तः श्रुतिप्रच्छादितध्वनिः ।
स नित्यमेव शुभकृद्यदन्यैर्वर्जितो गुणैः ॥ २०२ ॥

प्रदीप्तलेलिहानेऽग्नौ निर्धूमे सगुणे तथा ।
हृद्ये तुष्टिप्रदे [illegible] होतव्यं श्रुतिमिच्छता ॥ २०३ ॥

अल्पतेजोऽल्परूपश्च विस्फुलिङ्गसमन्वितः ।
ज्वालाभ्रमविहीनश्च हुताशनो न सिद्धिदः ॥ २०४ ॥

अप्रबुद्धे सधूमे च जुहुयाद्यो हुताशने ।
कर्महानिर्भवेत्तस्य त्वाभिचारार्थमश्रुते ॥ २०५ ॥

दुर्गन्धः पीतवर्णश्च अवलीढश्च योऽशुभः ।
प्रभामूर्तिगतो मन्त्रस्तर्पितो यदि सत्तम ! ॥ २०६ ॥

विद्या प्रयच्छत्यचिरादीप्तिस्थो भूप्रदः प्रभुः ।
तापयत्याशु शत्रूणां प्रकाशोपर्यवस्थया ॥ २०७ ॥

शत्रुक्षयं ददात्याशु मरीच्यामूर्ध्वगो विभुः ।
तापिन्यामूर्ध्वगो मन्त्रः सर्वतापोपशान्तिदः ॥ २०८ ॥

विपक्षोच्चाटनं कुर्यात् करालारांस्थितो हुतः ।
लेलिहावस्थितो मन्त्रो यदि सन्तर्प्यते मुने ! ॥२०९॥

ददात्यभीप्सितं चैव देहान्ते परमं पदम् ।
स्वाहाकारं सदा होमे पूर्णाया वौषडेव च ॥ २१० ॥

तमेव शान्तिके कुर्याद्वषडाप्यायने तथा ।
स्वधां पितृक्रियायां च फट्कारं क्षयकर्मणि ॥ २११ ॥

विद्वेषे तु [illegible] च नमो मोक्षप्रदे [illegible] ।
कमहोमावसाने च घृतेनाप्लुत्य च स्रुचम् ॥ २१२ ॥

अभावाच्च प्रभूतेन होमद्रव्येण पूरयेत् ।
तदोपरि घृतं दद्यात्ततोऽर्थेषु शुभादिषु ॥ २१३ ॥

मूलदेशात् समारभ्य स्रुक् संख्या स्रुवान्विता ।
घृतयुक्तं तु तद्द्रव्यं स्रुचा पुष्करकुक्षिगम् ॥

द्रवचन्द्रोपमं ध्यायेत्तेन पूर्णां समुद्धरेत् ।
स्रुग्दण्डे देहनाभौ तु मूले संस्थाप्य संस्मरेत् ॥

निष्कलं मन्त्रनाथं तु पूर्णशीताशुविग्रहम् ।
आमूलाग्रं समाच्छन्त्या प्रोद्धरेच्च स्वविग्रहात् ॥ [illegible] ॥

विधाय चेश्वरागारे तस्मादाकारमूर्तं महत् ।
नासिकासन्धिमार्गेण स्रुक्पद्मे पतितं स्मरेत् ॥२१७॥

सामृतामाज्यधारां च वसुधारामिव क्षिपेत् ।
सुषुम्नमध्ये तु मन्त्रं तद्ब्रह्मविवरेऽथवा ॥ २१८ ॥

हृत्पद्मान्तर्गतां सम्यक् प्रविष्टामनुभावयेत् ।
तया वै गृह्यते मन्त्र आनयेद्ब्रह्मधारया ॥ २१९ ॥

तृप्तं हृष्टं च पुष्टं च तुष्टं वै साधकोपरि ।
मन्त्रोच्चारपरमेता वै [illegible]करणान्विता ॥ २२० ॥

वामोपेता द्विजश्रेष्ठ ! [illegible] परिपातिता ।
सर्वसिद्धिकरी शश्वन्मोक्षलक्ष्मीविवर्धनी ॥ २२१ ॥

बहु शुष्केन्धनेऽग्नौ च होतव्या कर्मसिद्धये ।
एका, अनेकप्रयोगाणां, न तु कर्माणि कर्मणि ॥ २२२ ॥

ततोऽर्घगन्धपुष्पाद्यैर्मन्त्रनाथं समर्चयेत् ।
मुद्रां प्रदर्शयेत् [illegible] मूलमन्त्रादितः क्रमात् ॥ २२३ ॥

चतुर्थशेन [illegible] कुर्यान्मूलस्य तर्पणम् ।
लाञ्छनाभरणानां च लक्ष्म्यादीनां तदर्धतः ॥ २२४ ॥

अथवा हृदयादीनामतोऽर्धनाखिलासु च ।
परमेश्वरकान्तासु तदर्धं द्विजोत्तम ! ॥ २२५ ॥

लाञ्छनाभरणादीनि सर्वाणि जुहुयात् क्रमात् ।
हृदादिसर्वमन्त्राणामेकैकं जुहुयात्तु वा ॥ २२६ ॥

विसर्जनं ततः कुर्याद्दत्त्वार्घ्यं धूपसंयुतम् ।
भोगस्थानगता मन्त्रा पूजिता य यथाक्रमम् ॥२२७॥

मुख्यमन्त्रशरीरं च सप्रविष्टाश्च संस्मरेत् ।
ज्वालाज्वालान्तरे यद्वत् समुद्रस्येव निम्नगा ॥२२८॥

तन्मन्त्रविग्रहं स्थूलं सर्वमन्त्रास्पदं द्विज ! ।
प्रविष्टं भावयेत् सूक्ष्मे अध्यक्षे हृदयात्मके ॥ २२९ ॥

परे प्रागुक्तरूपे तु तं सूक्ष्ममुभयात्मकम् ।
तं परं प्रस्फुरद्रूपं निराधारपदाश्रितम् ॥ २३० ॥

सन्धिमार्गेण हृत्पद्मे संप्रविष्टं तु भावयेत् ।
मन्त्रमुद्रासमेतेन पूरकेण तु सत्तम ! ॥ २३१ ॥

भासितं भावयेद्देहं तेनापादाच्छिरोवधि ।
प्रविष्टेन तु मन्त्रेण प्रयत्नेन विना द्विज ! ॥ २३२ ॥

विग्रहः कम्पते यस्य मन्त्रस्तस्य प्रसीदति ।
एवं विसृज्य मन्त्रेशं मुद्राबन्धेन वै सह ॥ २३३ ॥

साधारासनमन्त्राणां गणेशस्य गिरः सदा ।
गुर्वादीनां तु विहितमर्घं लाञ्छनतर्पणात् ॥ २३४ ॥

एतेषां च लयं विप्र ! कुर्यात् सृष्टिक्रमेण तु ।
द्वास्थत्रिलोकपालानां वप्रस्यहरिसेविनाम् ॥ २३५ ॥

गुरुपूर्वक्रमादित्थमर्घमर्घं यथाक्रमम् ।
सकृत् सकृत् स्वशक्त्या वा पूर्णां सर्वेष्वथ क्षिपेत् ॥

विष्वक्सेनस्ततो भक्त्या तर्पणीयस्तिलाक्षतैः ।
औषडन्तेन मन्त्रेण दद्यात् पूर्णाहुतिं द्विज ! ॥ २३७ ॥

पूजयित्वा यथान्यायं कुर्यात्तस्य विसर्जनम् ।
अनलं पूजयित्वा तु शक्तितस्तर्पयेत्ततः ॥ २३८ ॥

अच्छिद्रकरणीं पूर्णां पूर्णामन्त्रेण पातयेत् ।
सन्दर्शयेत्ततो वह्निमुद्रां मन्त्रसमन्विताम् ॥ २३९ ॥

कुण्डे पुष्पाञ्जलिं क्षिप्त्वा वह्निमन्त्रमनुस्मरन् ।
जलनिर्मथितेनैव ह्यूर्ध्वपुण्ड्रचतुष्टयम् ॥ २४० ॥

शिरस्तनुत्रहृन्मन्त्रैर्ललाटे चांसयोर्हृदि ।
कुण्डस्थभस्मना चैव कुर्याद्दीपशिखाकृतिम् ॥ २४१ ॥

ज्वालया हृदयं स्पृष्ट्वा नेत्रं चास्त्रेण वै पुरा ।
क्षान्त्वा चैव नमस्कृत्य यथाविधि विसृज्य तत् ॥

समाघ्राय न्यसेत् कोष्ठे ह्यवतारक्रमेण तु ।
प्रतिष्ठितान्ते संस्कारं पर्यग्निकरणादितः ॥ २४३ ॥

विसर्जनं तु कुर्याद्वै प्रमच्छेदे न तत्र च ।
संमार्ज्य स्रुक्स्रुचेऽग्नौ तु स्रुचं निक्षिप्य चाम्भसा ॥

अर्घपात्रात् चापूर्य कुण्डबाह्ये प्रदक्षिणम् ।
कुर्यादीशानकोणान्ते अच्छिद्रोदकधारया ॥ २४५ ॥

पवित्रकेणाथ ऊर्ध्वं विनिक्षिप्य करेण तु ।
दद्याच्छिरसि वै शेषं स्रुगधोवदनं न्यसेत् ॥ २४६ ॥

आत्मनो वामभागे तु विष्टरस्रुग्वसंयुतात् ।
अपवास्य जलं तस्माद्द्वितयस्यात्तदर्चितम् ॥ २४७ ॥

उपसंहृत्य वै यागादर्चनालयमर्घ्यभृत् ।
नमस्कुर्याज्जगन्नाथमष्टाङ्गपतनेन तु ॥ २४८ ॥

आपूर्य पाणियुगलं पुष्पैस्तत्रोपरि स्थितम् ।
संस्मरेन्निष्कलं मन्त्रममृतेनोपबृंहितम् ॥ २४९ ॥

प्रभूतदीप्तच्छायेन निक्षिपेन्मन्त्रमूर्धनि ।
' तर्पितोऽसि विभो ! भक्त्या होमेनानलमध्यगः ॥

होमद्रव्येषु यद्वीर्यं तद्विद्धि चात्मसात्कुरु " ।
विनिवेद्य विभोर्होमं पूजां कृत्वा यथाविधि ॥ २५१ ॥

गृहीतं भावयेत्तेन प्रसन्नेनान्तरात्मना ।
इदमुक्तं समासेन मन्त्रसन्तर्पणं द्विज ! ॥ २५२ ॥

वाच्यं नादीक्षितानां च नाभक्तानां कदाचन ।
नान्यदर्शनसंस्थानां नापहासरतात्मनाम् ॥ २५३ ॥

सद्भावज्ञे तु वक्तव्यं समयज्ञे सपुत्रके ।
साधके तु गुरौ वापि भक्ते स्निग्धे विमत्सरे ॥ २५४ ॥

सत्यधर्मव्रतपरे साचारे शासनस्थिते ।
एवं समाप्य होमं तमर्घ्यगन्धादिभिर्विभुम् ॥ २५५ ॥

समभ्यर्च्य पितॄणां च संविभागमथाचरेत् ।
पौष्कराख्ये विशेषेण देवदेवेन विस्तृतम् ॥ २५६ ॥

विधानमेतद् विप्रेन्द्र ! प्रोक्त पुष्करजन्मने ।
सात्त्वतोक्तविधानेन तद्विधानं वदामि ते ॥ २५७ ॥

आराध्यस्याग्रतो विप्र ! प्रत्यह क्रियते तु यत् ।
विज्ञेय सविभागं तदुत्तम सर्वकर्मणाम् ॥ २५८ ॥

सविभागात् पितृणा च भवत्यनृणवान्नर· ।
प्रयान्ति तृप्तिमतुला तेन कर्मवशादपि ॥ २५९ ॥

निमन्त्रितं वा सप्राप्तं नित्यमङ्गीकृतं तथा ।
द्विजेन्द्र पञ्चकालज्ञ षट्कर्मनिरत तु वा ॥ २६० ॥

स्नानादीनि पुरा कृत्वा प्रयत संविशेत् पुन ।
स्वयमर्घ्याम्बुना विप्र ! पवित्रीकृत्य पाणिना ॥ २

सन्ताड्य कुसुमास्त्रेण मन्त्रास्त्राधिष्ठितेन च ।
समुच्चरन्नेत्रमन्त्रमवलोक्याखिल तत ॥ २६२ ॥

निवेश्य भगवत्यग्रे प्रणवाधिष्ठितासने ।
पूजिते विततेऽ पूते समुख वोत्तराननम् ॥ २६३ ॥

उदग्दिग्वीक्षमाणं च विनिवेश्य तथा च तम् ।
यथा मन्त्रेशदृग्रश्मिप्रसरेणाभिविध्यते ॥ २६४ ॥

मन्त्रेणाराध्य तं ध्यात्वा ब्रूयात् "संयतवाग्भव" ।
तैश्चापि मौननिष्ठैश्च भवितव्यं सुयन्त्रितै· ॥ २६५ ॥

समाधाय जगन्नाथं हृत्पद्मगगनेऽर्कवत् ।
सत्पात्रस्याथ पात्राभ्या पात्राणामब्जसभव ! ॥ २६६ ॥

एव कृत्वा प्रतिष्ठानं प्राग्यत्नेनात्र कर्मणि ।
समुद्दिश्य पितॄन् दद्याद्दानमन्तरवेदिकम् ॥ २६७ ॥

निवेशितद्विजेन्द्र यद्यक्तिस्थमपि मन्त्रराट् ।
अन्तर्वेदी तु सा ज्ञेया त्वाभ्यामभ्यन्तरं तु यत् ॥

संप्रदानं पितृणा यत् कुर्यात् सत्पात्रपिण्डकम् ।
तद्दिव्यममलं यस्माच्चैतन्यमवलम्ब्य वै ॥ २६९ ॥

तत्कालसंविभज्याश्च तिष्ठन्ति कमलोद्भव ! ।
प्रदातृसंकल्पवशादत· पुष्करसंभव ! ॥ २७० ॥

एकस्य वा बहूना वा प्रदद्यादासनोपरि ।
पुनरेवासनं दार्भमग्रन्थि बहुभिः कुशै ॥ २७१ ॥

विभोर्यज्ञाङ्गदेहस्य लोमानि तु कुशाः स्मृताः ।
ता एव नाडयः सर्वास्तस्य भूतशरीरगाः ॥ २७२ ॥

रश्मयो भूतदेहे तु चिन्मूर्ते· शक्तयोऽखिलाः ।
अत एव हि विप्रेन्द्र ! पितृणा तु कुशासनम् ॥ २७३ ॥

श्राद्धकाले तु विहितमाहुताना तदूर्ध्वत· ।
यत्किञ्चिद्दीयते भक्त्या ब्रह्मभूत तु तद्भवेत् ॥ २७४ ॥

पुरा वै हेतुमानेन नृणामविदितात्मनाम् ।
कर्म[illegible]जाल विहितं कमलोद्भव ! ॥ २७५ ॥

[illegible]रूपीश्वरोऽच्युत· ।
[illegible]स्तेषा नैव प्रयोजनम् ॥ २७६ ॥

न्यसेत्त[illegible]ग्रानुदङ्मूलान् कुशान् द्विज· ! ।
यस्माद्दिव्यमुदग्भाग दिव्य दक्षिणसंज्ञकम् ॥ २७७ ॥

स्वकेनामृतवीर्येण नित्य संवर्धयन्ति च ।
दर्भमार्गच्छलेनैव पितृणा तेऽमरा द्विज ! ॥ २७८ ॥

वसत्यत पितृगणो भागमाश्रित्य दक्षिणम् ।
चित्कलाशस्वरूपेण नृणामेवं हि चोत्तरे ॥ २७९ ॥

कृतास्पदा अपला नित्या त्वमृताख्याक्षया कला ।
अत एव हि यत् किञ्चिदात्रह्मविदितैर्द्विज ! ॥ २८० ॥

प्रदीयते पितृणा च तत् सव्येन तु पाणिना ।
येऽधिकृत्य जगद्योनि मन्तात्मानमज हरिम् ॥ २८१ ॥

प्रयच्छन्ति पितृणा च तोयतर्पणपूर्वकम् ।
तेषा तदाश्रयत्वाच्च यदुक्तं तन्न कारणम् ॥ २८२ ॥

कर्तव्यस्य च पारम्यं प्रकृतस्य महामते ! ।
स्फुरत्यन्तर्गत येषां मन्त्राराधनपूर्वकम् ॥ २८३ ॥

तत् स्वोत्तरवशात्तेषा मन्त्रसामुख्यदिग्वशात् ।
चेतसा निर्विकल्पेन कृतं भवति चाक्षयम् ॥ २८४ ॥

किंतु पुष्करसंभूत ! दुर्लभा भुवि ते नरा· ।
इति चेतसि वै येषां निश्चयीकृत्य वर्तते ॥ २८५ ॥

कुण्डस्य योनिदिग्भागे भद्रपीठोर्ध्वतोऽथवा ।
समीपे पुरतस्तस्य भूभागे चार्घ्यवारिणा ॥ २८६ ॥

प्रोक्षिते वास्त्रमन्त्रेण दक्षिणाग्रान् कुशास्तरेत् ।
तदूर्ध्वं पितृतीर्थेन सतिलानक्षतोदकान् ॥ २८७ ॥

विकिरेदस्त्रजप्ताश्च दर्भाग्रैः प्रणवेन तु ।
कौशस्तराग्रपर्यन्तं यस्मादेतद्द्वय द्विज ! ॥ २८८ ॥

सर्वस्य भोगजालस्य जनक भुवनत्रये ।
विशेषात् पितृदेयस्य श्रद्धापूतस्य वस्तुनः ॥२८९॥

अग्नीषोमस्वरूपेण क्रोडात्मा भगवान् स्वयम् ।
व्यक्त कर्मात्मतत्त्वाना भूतत्वेनात्मसिद्धये ॥ २९० ॥

तत्तेजस्तिलभावेन हूलडो वर्तत्यवात्मनः ।
अत एव प्रबुद्धाना प्रबुद्धानामपि द्विज ! ॥ २९१ ॥

तिलोदकेऽङ्गभावं तु गच्छत श्राद्धकर्मणि ।
श्राद्धस्य च परा रक्षा ते द्वे नित्यप्रमन्त्रिणाम् ॥२९२॥

तत्स्वरूपविदा चैव विशेषान्मन्त्रवेदिनाम् ।
एवं तिलोदके बुद्ध्वा प्रकाशाह्लादलक्षणे ॥ २९३ ॥

स्तरोर्ध्वे स्वस्वसञ्ज्ञाभिरग्रान्तं तु यथाक्रमम् ।
भावयेत् पुरुषादीना सारूप्य समुपागतान् ॥ २९४ ॥

पितृन् पितामहाश्चैव तथैव प्रपितामहान् ।
तप्तितृंश्चाथ शंमन्त सन्तानं स्वविभागतः ॥ २९५ ॥

देवान्नोच्छेषसयुक्त पाकाग्र पात्रसभृतम् ।
मधुयुक्तेन हविषा दर्भकाण्डैस्तिलैः सह ॥ २९६ ॥

भावित वह्निना कृत्वा हृदा दर्भाग्रगेण तु ।
निर्दोषं जस्वभाव च धामत्रयसमप्रभम् ॥ २९७ ॥

ध्यायेद्द्रव्यगत दोष निर्दहन्त समन्तत ।
देवताना पितृणा यत् तृप्तयेऽन्न महामते ! ॥ २९८ ॥

तत् साधन व विहित सस्कृतेन पुराग्निना ।
तमालकदलीपूर्वदलेषु क्षालितेषु च ॥ २९९ ॥

सविभज्य चतुर्धान्नं निधाय प्रणवेन तु ।
प्रोक्षितान्यन्नपात्राणि चत्वारि कवलानि वा ॥ ३०० ॥

तृप्तये त्वथ सर्वेषा देवाय विनिवेद्य च ।
पितृणा तर्पयेत्तेन पिण्डाद्यन्नेन सादरम् ॥ ३०१ ॥

क्रमेण प्रागदृष्टाना हृदा संज्ञापदेन तु ।
एवं दृष्टस्वरूपाणा ज्ञात्वा तेषा स्थिति पुरा ॥ ३०२ ॥

प्राग्वत् स्वधावसानाद्यैर्मन्त्रैरोङ्कारपूर्वकै ।
हृन्मन्त्रालिङ्गितैर्विप्र ! तथा संज्ञापदान्वितैः ॥ ३०३ ॥

" पिण्डं प्रकल्पयामी "ति तत पूर्ववदाचरेत् ।
प्रणवैर्दक्षिणाग्राणि सेचितानि तिलाम्बुना ॥ ३०४ ॥

नाडीरूपाणि दर्भाणि पिण्डानामूर्ध्वतो न्यसेत् ।
प्रविष्टान् भावयेत्तेषु नाडीमार्गैरनुक्रमात् ॥ ३०५ ॥

" पितृनावाहयामी "ति स्तरोर्ध्वे प्राक्स्थितास्तत ।
क्रमेण चातुरात्मीयैर्मन्त्रैरप्यययोगत ॥ ३०६ ॥

समर्चयेद्यथान्यायमर्घ्यगन्धादिभिश्च तान् ।
ततस्तु नाम्ना गोत्रेण मन्त्रपूर्व तिलोदकम् ॥ ३०७ ॥

सर्वेषामर्घ्यकलशात् प्रदद्याच्च यथाक्रमम् ।
शिरसावनतेनाथ जानुयुग्मे क्षितौ कृते ॥ ३०८ ॥

पाणियुग्मे ललाटस्थे एकचित्त पठेदिदम् ।
" ओ नमो व पितरः ! नमो वः पुरुषोत्तमाः ! ॥३०९॥

नमो विष्णुपदस्थेभ्य स्वधा व पितरो ! नम ।
हरये पितृनाथाय ह्यग्नीषोमात्मने नमः ॥ ३१० ॥

सत्सोमपात्मने विष्णो ! नमो वर्हिषदात्मने ।
आसंसारं हि जनका अग्निष्वात्ता अथाच्युत ! ॥३११॥

पितामहाः सोमपास्त्वं त्वमन्ये प्रपितामहा ।
तुभ्यं नमो भगवते पितृमूर्ते ! ऽच्युताय च ॥ ३१२ ॥

नारायणाय हंसाय विष्णो ! त्रिपुरुषात्मने ।
मुक्त्वा त्वामेव भगवन् ! न नमाम्यर्चयामि च ॥३१३॥

न तर्पयामि सर्वेश ! नान्यमावाहयाम्यहम् । "
स्तुत्वैवं हि पितृव्यूहं भक्त्या परमया युतम् ॥ ३१४ ॥

सभवे सति समान पिण्डमूर्तेः समाचरेत् ।
तदग्रतोपविष्टस्य क्रमाद्द्विजगणस्य च ॥ ३१५ ॥

अनुसन्धाय वै द्वाभ्यामेकस्मिन् वा द्विजोत्तम ! ।
देवभावस्थितं ध्यात्वा पित्र्य प्राणगणं क्रमात् ॥३१६॥

प्रणवेन स्वरूपं तु समुत्थाय ततः स्वयम् ।
मध्ये तिर्यक्स्थितौ स्थित्वा ह्यदूरेऽन्योन्यदृक्स्थिते ॥
उत्तराभिमुखश्चैव दक्षिणास्योऽथवा द्विज ! ।
तदुत्तराननवशाद्ब्रह्मन्त्रं हृदयान्न्यसेत् ॥ ३१८ ॥
नमोऽन्तं प्रणवाद्यं तु मरुदम्बरविग्रहम् ।
पिण्डाग्रे ह्युपविष्टस्य प्राणशक्तिं द्विजस्य वा ॥ ३१९ ॥
बहूना वा प्रयत्नेन स्वातन्त्र्यान्निर्गता वहिः ।
ध्यात्वा तया सह क्षिप्रमेकीभूतत्वमागतम् ॥ ३२० ॥
आत्मशक्तौ लयं नीत्वा याति ह्यात्माख्यलक्षणम् ।
कृत्वैव प्राणसञ्चारं पितॄणां विप्रविग्रहे ॥ ३२१ ॥
प्राग्वदानन्दसंरुद्धे भोजयेत् पितृरूपिणः ।
तादर्थ्येनाथ चतुरो विनिवेश्यासनेषु च ॥ ३२२ ॥
लब्धलक्ष्यान् परे तत्त्वे ब्राह्मणान् पाञ्चरात्रिकान् ।
प्राङ्मुखं द्वितयं चैव द्वितयं चाप्युदङ्मुखम् ॥३२३॥
सपत्न्यभावे ह्येकं वा विनिवेश्योत्तराननम् ।
पादयोरपि पाद्यार्थं कं क्षिपेद्दक्षिणादितः ॥ ३२४ ॥
अथ तेषां क्रमात् कुर्यादर्चनं चातुरात्म्यवत् ।
अर्घ्यानुलेपनाद्यैस्तु भोगैर्मात्रावसानिकैः ॥ ३२५ ॥
तत्तत्कालोचितैः सर्वैरनुपादेयवर्जितैः ।
तैश्चापि मौननिष्ठैस्तु भवितव्यं सुयन्त्रितैः ॥ ३२६ ॥
अथास्त्रपरिजप्तेन भूतिना वाथ शङ्कुना ।
मसृणेनाश्मचूर्णेन परिघां स्वधयाथवा ॥ ३२७ ॥
बहिस्तदासने कुर्यात्त्वग्रे दैर्घ्याच्छमाधिकाम् ।
वैपुल्याच्छममानं तु प्राग्वत् पावनता नयेत् ॥ ३२८ ॥
न्यसेत् तत्राप्यभग्नाग्रानुदङ्मूलान् कुशान् द्विज ! ।
तत्रापि च विशेषेण तिलतोये समुत्किरेत् ॥ ३२९ ॥
न्यस्तास्त्राण्यस्त्रजप्तानि तत्र पात्राणि विन्यसेत् ।
सर्वाणि चक्रवृत्तानि हेमाद्युत्थानि सम्भवे ॥ ३३० ॥
पात्राणि कदलीपद्मतमालच्छदनान्यथ ।
दर्भाण्यस्त्राम्बुयुक्तानि शुभपर्णमयानि वा ॥ ३३१ ॥
निदध्यात्तेषु चान्नानि भोज्यानि मधुराण्यपि ।
भक्ष्याणि फलमूलानि दधिक्षीरादिकान्यपि ॥ ३३२ ॥
पानकानि रसालानि सपानीयानि सत्तम ! ।
कर्मण्यानि तथान्यानि तत्तत्कालोद्भवानि च ॥ ३३३ ॥
पुरोपस्तरणार्थं च पात्राणां दक्षपाणिषु ।
निपातव्याऽमृती धारा वारिणाप्युद्धृतेन च ॥ ३३४ ॥
वाग्यता लब्धलक्षास्तु ह्यन्नमूर्तेः जनार्दने ।
येऽश्नन्ति पितरस्तेन तृप्तिमायान्ति शाश्वतीम् ॥
अतः सर्वव्यभिचारं तु मौनं चर्यं क्रियापरैः ।
शुभमव्यभिचारं यत् तत् कार्यं सर्ववस्तुषु ॥ ३३६ ॥
यदङ्गसङ्केतमयैरव्यक्तैर्नासिकाक्षरैः ।
कृतमोष्ठपुटैर्वद्धैर्मानं तत् सिद्धिदानिकृत् ॥ ३३७ ॥
स्वयमेव स्वबुद्ध्या यत् सर्ववस्तुषु वर्तते ।
शब्दैरनुपदिष्टैस्तु तन्मौनं सर्वसिद्धिदम् ॥ ३३८ ॥
तस्माद्वै श्राद्धभोक्तॄणां दिव्ये वा पितृकर्मणि ।
दद्यान्नैवेद्यवत् सर्वं मर्यादाभ्यन्तरेऽग्रतः ॥ ३३९ ॥
येनाचमनपर्यन्तं कालं तिष्ठन्ति वाग्यताः ।
सर्वेषामेकमात्रं तु तृप्तये यदि योजितम् ॥ ३४० ॥
ओमाद्यमस्मच्छब्दं तु पितृभ्यस्तदनन्तरम् ।
इदमर्घ्यमिदं पाद्यं तदन्ते सस्मरेत् स्वधाम् ॥ ३४१ ॥
सर्वस्मिन्नुपचारान्ते ह्येव वा संस्मरेन्नमः ।
नमः स्वधाऽथवा ब्रूयान्नमोन्ता त्वथवा स्वधा ॥ ३४२ ॥
एवमेव हि यः कुर्यात् कर्तव्यत्वेन सत्तम ! ।
तुल्यानां च स्वकुल्यानां नमस्तत्र च केवलम् ॥ ३४३ ॥
सत्युक्तं व्यत्ययं नित्यं विहितं च स्वधा द्विज ! ।
स्वयमेव हि सन्यासी ददाति च फलार्थिनाम् ॥
कार्यस्तेन नमस्कारः स्वधान्तो नित्यमेव हि ।
ददाति फलकामस्तु यो नित्यमफलार्थिनाम् ॥ ३४५ ॥
स्वधाकारावसाने तु विहितं तत् सदा नमः ।
एवमिच्छावशेनैव संविभज्य पितॄन् द्विज ! ॥ ३४६ ॥

पृष्ट्वा पात्रमुखेनैव संतृप्ति च पुन. पुन ।
ततोऽम्भश्चुलुकं पाणौ हृन्मन्त्रेणामृतोपमम् ॥ ३४७ ॥

दद्यात् पूर्णेन्दुतुल्य तद्ध्यातव्यं तत्कला. पठन् ।
सानुस्वारमकाराद्यैर्भिन्न षोडशभि. स्वरै. ॥ ३४८ ॥

सकारं नतिनिष्ठं च तत्र प्राक्स्थं सतारकम् ।
इत्युक्तं सकलस्येन्दोर्वाचकं मन्त्रमब्जज ! ॥ ३४९ ॥

पाणिप्रक्षालनात् पूर्व पातव्यं तेन पूर्ववत् ।
येनामृतपुटान्तस्थमन्त्रवीर्यमनश्वरम् ॥ ३५० ॥

भवत्याप्यायकृद्ब्रह्मन् ! पितृदेवगणस्य च ।
माषचूर्णादिना पाणि प्रक्षाल्यामणिबन्धनात् ॥ ३५१ ॥

समाचम्योपसहृत्य हृयुच्छिष्टं च यथाविधि ।
पवित्रीकृत्य वसुधा पाणौ कृत्वा तिलोदकम् ॥३५२॥

प्रीणनं भगवत्यग्रे समुत्थायाचरेत् तत ।
" मन्नास्तु भगवान् पूर्व प्रीत. पितृगणस्तथा ॥ ३५३ ॥

शारीरो देवताव्यूह आपादाद्यो व्यवस्थित ।
नयन्त्वमृततामन्नमिद विष्णुपुरसरा ॥ ३५४ ॥

देवा नद्यस्तथा गाव. सूर्य. सोमो बृहस्पति ।
(ओ) माधवो भगवान् मन्त्रमूर्तिर्मधुमयो महान् ॥

मधुभावेन चान्नेऽस्मिन् स्थित्वा तृप्ति करोतु वै " ।
अ[illegible]लि यासन कुर्यात् पितृणा प्रीणन द्विज ! ॥ ३५६ ॥

[illegible] हि भूभागे यस्या तत्पिण्डचित्रितौ ।
स्थि[illegible] सर्वपितृणा च साम्प्रतं कमलासन ! ॥ ३५७ ॥

यावत् प्राणावियुक्तानां पिण्डाना नोपसहृति. ।
स्वोद्दिष्टाना कृता सम्यक् तदन्ते सव्रजन्ति ते ॥३५८॥

स्वस्थानमाशिषं दत्वा श्राद्धकर्तुर्धिया मुने ! ।
सामृतं सोदकं सान्नं सतिलं मन्त्रतेजसा ॥ ३५९ ॥

विविक्तं व. कृतं मार्ग पुनरागमनाय च ।
नारायणाख्यसन्मन्त्रकर्मब्रह्मजवीकृते ॥ ३६० ॥

स्वे स्वेन्द्रियरथे कृत्वा तृप्ता याताच्युतास्पदम् ।
एवं सुवितते कुर्यात् कर्म त्वाराधनालये ॥ ३६१ ॥

संकटे पुनरन्यत्र यायादभ्यर्थ्य मन्त्रराट् ।
स्थानं संस्कारसंशुद्धं कृत्वा प्राक् ताडनादिना ॥३६२॥

व्याप्तिशक्त्याश्रित भूयस्तोयाधारगतं स्मरेत् ।
मन्त्रमर्चनपूर्वं तु तदग्रे सर्वमाचरेत् ॥ ३६३ ॥

देवान् पितॄन् समुद्दिश्य भोजनं भगवद्गृहे ।
अविरुद्धं द्विजेन्द्राणामन्यथा तद्विरोधकृत् ॥ ३६४ ॥

विधिनानेन वै नित्यमथ यज्ञे तु वैष्णवे ।
संविभाग पितृणा च कार्य. सद्भिर्विनैर. ॥ ३६५ ॥

कृत्वा तिलोदकान्त वा फलमूलै. स्वशक्तित ।
तदर्ध ग्रासमात्रं तु दद्याद्वोप्वथ भैक्षुके ॥ ३६६ ॥

यस्माद्दिव्यैर्महामन्त्रैर्दत्तं यत् पूजितेऽच्युते ।
पित्रर्थमल्पं वा भूरि तत्तेषामक्षय भवेत् ॥ ३६७ ॥

सम्यगर्च्यार्घ्यगन्धाद्यैर्मूलमूर्तिगतं विभुम् ।
प्राङ्गणेषु च सर्वेषु प्रासादेष्वाश्रयेषु च ॥ ३६८ ॥

प्रतिष्ठितेषु शोभार्थं विभवव्यूहमूर्तिषु ।
तथैव गोपुरद्वारदिङ्मूर्तिषु च मण्डपे ॥ ३६९ ॥

सान्निध्यं चैव यातासु शक्त्या नित्यं समर्चनम् ।
षोडशोपचारैर्वा द्वात्रिंशद्भिस्ततोऽधिकै. ॥ ३७० ॥

कुर्यात्तन्मूर्तिमन्त्रैश्च तथा नैमित्तिकेष्वपि ।
जपान्त हवनान्त वा स्नानाद्य साधकस्तत. ॥ ३७१ ॥

तत्तन्मूर्त्यग्रदेशस्थे कुण्डे होमं समाचरेत् ।
न कर्मार्चादिकं तत्र स्तपनं चोत्सवादिकम् ॥ ३७२ ॥

बलिदान च सर्वत्र पवित्रारोहणादिकम् ।
नाचर्तव्यं विशेषेण परतन्त्रासु मूर्तिषु ॥ ३७३ ॥

नित्याभिषेकमात्रं तु तासु तत्र समाचरेत् ।
सितादिवर्णयुक्तासु प्रोक्षणं वा निवेदनम् ॥ ३७४ ॥

मूलालयार्चया सार्ध परतन्त्रासु देशिकै. ।
पवित्रारोहणं कार्यमङ्गत्वेनाधिवासितै ॥ ३७५ ॥

पूरकेषु च सर्वेषु तथैवाग्रयणादिके ।
स्वगेशविष्वक्सेनादिपरिवारगणेष्वपि ॥ ३७६ ॥

प्रतिष्ठितेषु गेहेषु पूज्यमाश्रयमूर्तिवत्।
अमूर्तस्य खगेशस्य विष्वक्सेनादिकस्य च ॥ ३७७ ॥

कुमुदादिगणेशाना द्वारावरणवासिनाम्।
अन्येषा परिवाराणा महापीठनिवासिनाम् ॥ ३७८ ॥

अग्रे नित्योत्सवार्चाया दद्यात् कालत्रये वलिम्।
साकारो वा निराकारो विष्वक्सेनो गणै सह ॥

यद्वा समर्चनीयश्च वल्यन्ते शिष्टवस्तुभि.।
नित्योत्सवं ततः कुर्यात् सर्वालकारसंयुतम् ॥ ३८० ॥

प्राङ्गणद्वारदेवानां वलिदानपुरस्सरम्।

सनक —

त्वया नित्योत्सवार्चायाः पुरस्ताद्भगवन्! मम ॥३८१॥

द्वारावरणदेवाना वलिदानमुदाहृतम्।
तद्विभाग विशेषेण वद मे सर्वसिद्धिदम् ॥ ३८२ ॥

शाण्डिल्य —

विस्तृतं तव वक्ष्यामि शृणु नित्योत्सवादिकम्।
कृतेन येन भक्तानामभीष्ट जायते फलम् ॥ ३८३ ॥

नित्योत्सवार्थबिम्बं तु सौवर्ण राजतं तु वा।
ताम्रजं पैत्तल वाथ नात्युच्चं तच्चतुर्भुजम् ॥ ३८४ ॥

मूलबेरानुरूप च स्थापितं पूजित पुरा।
वस्त्राभरणमाल्यैश्च यथाशोभमलङ्कृतम् ॥ ३८५ ॥

मूलबिम्बगता शक्ति तस्मिन्नारोप्य मन्त्रत.।
समभ्यर्च्यार्घ्यपुष्पाद्यैर्भोगैर्धूपान्तिमैस्तथा ॥ ३८६ ॥

आप्तैराराधिते देवे स्वयंव्यक्तालयादिषु।
साधक वरयेदन्यं वलिदानादिकर्मणि ॥ ३८७ ॥

पुरा गर्भगृहद्वारि तथा चैवाग्रमण्डपे।
घण्टानादसमेतेन दीपेन ज्वलितेन तु ॥ ३८८ ॥

द्वास्थानर्घ्यादिधूपान्तै समभ्यर्च्यार्घ्यवारिणा।
दत्वार्हणं ततश्चान्नं तर्पणाम्भस्तत. परम् ॥ ३८९ ॥

ताम्बूलं च क्रमाद्दत्वा तत्तन्मन्त्रैरनुक्रमात्।
स्वर्णादिनिर्मित यान पुरस्तात् प्रथमाङ्गणे ॥ ३९० ॥

सुगन्धपुष्पप्रभया क्षौमैर्माल्यै. सितादिभि.।
यथाशोभमलकृत्य तस्मिन् वल्यर्थकौतुकम् ॥ ३९१ ॥

प्राचीमुख समारोप्य प्राङ्गणेषु प्रदक्षिणम्।
आतपत्रै.सिताद्यैश्च मायूरै. केतुयष्टिभि ॥ ३९२ ॥

पताकाभिश्चामरैश्च तालवृन्तैश्च शोभनैः।
गणिकादेवदासीभिर्गायकैर्वाद्यसञ्चयै. ॥ ३९३ ॥

भेरीपटहघोषैश्च श्रुतिघोषसमन्वितै.।
एवमाद्यैरलङ्कारैर्गोमयेनोपलेपिते ॥ ३९४ ॥

मण्डले हस्तमात्रे तु वलिदानपुरस्सरम्।
द्वारावरणदेवाना ध्याताना वा स्वदिक्षु च ॥ ३९५ ॥

वक्ष्यमाणविधानेन नियतोत्सवमाचरेत्।
पीठोर्ध्वे विष्णुभूताना सगणानामथार्चनम् ॥ ३९६ ॥

कृत्वा समुत्किरेच्छेष तृप्त्यर्थ सोदक वलिम्।
पीठं प्रदक्षिण नीत्वा चतुर्धा वा द्विधा तथा ॥ ३९७ ॥

सन्तोष्य नृत्तगीताद्यैर्देवमन्त प्रवेशयेत्।
प्राङ्गणेषु विशालेषु वहिष्टेषु च सादरम् ॥ ३९८ ॥

मण्डितं रथमारोप्य परिभ्रमणमाचरेत्।
यानादेरवरोप्याथ पादुके विनिवेद्य च ॥ ३९९ ॥

अग्रमण्डपभूमिष्ठे भद्रपीठे निवेश्य च।
पाद्यार्घ्याचमनाम्भोभि. चन्दनाद्यनुलेपनै ॥ ४०० ॥

माल्यैर्नानाविधैश्चापि धूपैस्ताम्बूलपञ्चिमै.।
अभ्यर्च्य श्रमशान्त्यर्थ स्वस्थाने सन्निवेशयेत् ॥ ४०१ ॥

आदौ निवेशितां शक्ति तस्मिन् मूले नियोज्य च।
तमभ्यर्च्यार्घ्यगन्धाद्यै प्रणमेत् स्तुतिपूर्वकम् ॥४०२॥

त्रिकालं यत्र विधिवत् क्रियते नियतोत्सवः।
तत्र सर्वसमृद्धि. स्याद्राज्ञो राष्ट्रस्य चानिशम् ॥४०३ ॥

अभावे वलिबिम्बस्य हेतुनाऽसन्निधीकृते।
कूर्चेन वाऽन्नमूर्त्या वा कुर्यान्नित्योत्सवं तत. ॥ ४०४ ॥

निश्शेषस्योपसंहार कृत्वा चार्घ्यादिकस्य च।
नत्वा स्तुत्वा च देवेशं ततः पाद्यप्रतिग्रहात् ॥ ४०५ ॥

पादोदकं समादाय विग्रहं सेचयेत् स्वकम् ।
भुक्तानि पत्रपुष्पाणि निदध्यान्मूर्धनि स्वके ॥ ४०६ ॥

पुष्पार्घ्यगन्धपूर्वाणा देवयज्ञे कृते सति ।
विनयादाहृताना च भक्ताना मन्त्रसेविनाम् ॥ ४०७ ॥

मूर्ध्नि सन्धारणाच्छ्रेयो दौर्भाग्य क्षयमेति च ।
कीर्ति कान्ति श्रियारोग्य सिद्धि समुपयाति च ॥

पश्चाच्छरीरयात्रार्थमभ्यर्थ्य परमेश्वरम् ।
लब्धानुज्ञस्तु वै कुर्यादनुयाग यथाविधि ॥ ४०९ ॥

प्रविश्य भोजनस्थान विविक्तं दोषवर्जितम् ।
घृतपूरितपात्रस्थ दीपमारोप्य वै तत ॥ ४१० ॥

गोमयेनोपलिप्याथ तुर्यश्र तत्र मण्डलम् ।
प्रणवेन प्रतिष्ठाप्य तन्मध्ये फलकादिकम् ॥ ४११ ॥

प्रक्षालिताङ्घ्रि. स्वाचान्तस्तन्मध्ये चोपविश्य च ।
भोज्यं नैवेद्यपूर्व तु सर्वमादाय पात्रगम् ॥ ४१२ ॥

विनिवेद्य च देवाय पवित्रीकृत्य चाम्भसा ।
सत्यरूपा ह्यलक्ष्या चाप्यन्नदोषक्षयङ्करी ॥ ४१३ ॥

चेतसा चातुरात्मीया भावनीया च भावना ।
रसात्मा व्यक्षसज्ञोऽत्र स्वादुभावे व्यवस्थित ॥४१४॥

"प्रद्युम्नो भगवान् रूपे त्वेतद्वीर्य तु लाङ्गली ।
भोक्ताहमात्मा भगवान् वासुदेव. स्वय त्वज ॥४१५॥

इदं तदमृत ब्रह्म इदमायुरनश्वरम् ।
इद ज्ञानमिदं वीर्यमिद तेजस्तु वैष्णवम् ॥ ४१६ ॥

इदमिन्दुरखण्डश्च स्थितं चान्नात्मना स्वयम् ।
पर्जन्यात्मा स भगवान् व्यञ्जनस्थितिसिद्धये ॥ ४१७ ॥

हार्दानलात्मना भुङ्क्ते ह्यध्यक्ष. परमेश्वर ।
तच्छक्त्यानुगृहीतत्वात् सोऽहं प्राकृतिक पुमान्" ॥

एवमन्नदमन्नाद ज्ञेयमन्नं पुर. स्थितम् ।
वाह्यतश्चाज्यदानेन संबोधमुपयाति च ॥ ४१९ ॥

यथा तथाम्बुनाभ्येति देहस्थो हुतभुक् प्रभुः ।
कारणं रसमन्नस्य षड्गुणं षड्रसस्य च ॥ ४२० ॥

आत्मा ब्रह्माऽनात्मा स्यादीषत्तत्करणात्मना ।
साम्मुख्यमात्मनो नीत्वा ततोऽन्नं जुहुयाच्छनै. ॥

चतु प्रणवसञ्जतं ततोम्भश्चुलक पिबेत् ।
वक्त्रकुण्डेऽथ तेनैवाप्यन्नाहुतिचतुष्टयम् ॥ ४२२ ॥

प्रान्तपवैश्चतुर्धा प्राक् चातुरात्म्यव्यपेक्षया ।
त्रियपेक्षावशेनैव जुहुयादाहुतित्रयम् ॥ ४२३ ॥

सहृदा मूलमन्त्रेण भुञ्जीयात् कवलेस्तत ।
प्रयतास्यकरश्चान्ते पिबेन्मन्त्राभिमन्त्रितम् ॥ ४२४ ॥

तोय तद्ध्यानपादाब्जपरिस्रुतमथापि वा ।
प्रतिष्ठितस्य वा पूर्व तदाकृविधरस्य च ॥ ४२५ ॥

यतस्तत् सर्वपापघ्नं सर्वदोषक्षयङ्करम् ।
सर्वोपतापशमनं सर्वसौख्यप्रदं सदा ॥ ४२६ ॥

पावन सर्वतीर्थेभ्यो मन्त्रेभ्यो मुनिसत्तम ! ।
अतस्तु भोजनान्ते वै हार्दाग्नेस्तर्पणं पुरा ॥ ४२७ ॥

भावभक्तिपरो नित्य क पिबेदाज्यदो भवेत् ।
ब्रह्मतीर्थेन च शनैर्द्विर्वा त्रिर्वा चतु क्रमात् ॥ ४२८ ॥

समाचम्य पुनर्यायात् प्रयतो भगवद्गृहम् ।
मनोबुध्यभिमानेन सह न्यस्य धरातले ॥ ४२९ ॥

कूर्मवच्चतुर पादान् शिरस्तत्रैव पञ्चमम् ।
प्रदक्षिणसमेतेन त्वेव रूपेण सर्वदा ॥ ४३० ॥

अष्टाङ्गेन नमस्कुर्याद्द्वादशार्ण समुच्चरन् ।
यत्र द्वादशकालेज्या कर्तव्या भूतिविस्तरात् ॥ ४३१ ।

तत्र प्राभातिकी कुर्यात् पूजामष्टाङ्गसंयुताम् ।
अङ्गद्वयं तु पाश्चात्य विना वा ता समाप्य च ॥४३२॥

पितॄणा संविभाग च अनुयागं यथोदितम् ।
देशिक स्वेच्छया कुर्यान्नित्यं मध्यन्दिनार्चने ॥४३३॥

त्रिकालेष्वेकमष्टाङ्ग षडङ्गं चाचरेद्द्वयम् ।
योगार्थिना च स्वाध्याय योगमध्यात्मसञ्ज्ञितम् ॥

तत्तत्कालेषु कुर्वीत स्वाध्यायमधुनोच्यते ।
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतो विभोः ॥ ४३५ ॥

आगमाध्ययनं कुर्यात्तद्वाक्यार्थविचारणम् ।
प्राप्तेऽथ सन्ध्यासमये स्नात्वा वा जघनावधि ॥४३६॥

क्षालयित्वा तत कुर्याद्वाससा परिवर्तनम् ।
सायन्तनार्चन कुर्यात् षडङ्ग वलिपश्चिमम् ॥ ४३७ ॥

जपं कृत्वा यथाशक्ति स्वासाद्य शयनं तत. ।
[8]समाधाय वहिर्देवं निरालम्बपदे स्थितम् ॥ ४३८ ॥

अप्रयत्नेन वै तावदनिरुद्धेन चेतसा ।
सह तेनैव ते निद्रा यावदभ्येति साम्प्रतम् ॥ ४३९ ॥

समुत्थायार्धरात्रेऽथ जितनिद्रो जितश्रम. ।
कमण्डलुस्थितेनैव समाचम्य तु वारिणा ॥ ४४० ॥

अथ योगविभूत्यर्थं योगं युञ्जीत वैष्णवम् ।
सुगुप्ते विजने देशे निर्द्वन्द्वे शुभलक्षणे ॥ ४४१ ॥

जितदर्पा मति कृत्वा सर्वभूतहिते स्थित ।
दवाग्निगुरुभक्तश्च सच्छास्त्राभिरतः सदा ॥ ४४२ ॥

भूतद्रोहपरित्यागी अस्तेयः संयतेन्द्रिय ।
आसने चोपविष्टस्तु सुशुभे लक्षणान्विते ॥ ४४३ ॥

शुभदारुसमुत्थे तु चतुर्विंशाङ्गुलायते ।
द्वादशाङ्गुलकोत्सेधे सुधौतेनापि वाससा ॥ ४४४ ॥

कुशैश्च मृदुभिश्छन्ने पवित्रेणाथ चर्मणा ।
तत्रोपविष्ट. सतत योगाङ्गानि समभ्यसेत् ॥ ४४५ ॥

रेचकादिचतुर्भिस्तु मात्राभेदकृतैस्तु य. ।
कनीयान् मध्यमो ज्येष्ठः प्राणायाम. प्रकीर्तितः ॥

प्रत्याहार प्रकुर्वीत चित्तसंयमनं तु यत् ।
बुद्धिर्मनस्त्वहङ्कारस्त्रिभिश्चित्तं प्रकीर्तितम् ॥ ४४७ ॥

तथापि मनस. कुर्यात् प्रत्याहारं प्रयत्नत. ।
मनश्चतुर्विधं प्रोक्तं प्रत्याहारेण निर्जितम् ॥ ४४८ ॥

तिष्ठते लक्ष्यमार्गे तु नान्यथा तु कदाचन ।
[8] ध्यान लक्ष्यस्य निष्पत्तिश्चिन्तनं तत् प्रकीर्तितम् ॥

[1] धारणापि ततो धार्या तदा पापापनुत्तये ।
[2] पञ्चधा पूर्ववत् सा तु प्रतिमन्त्रव्यवस्थया ॥४५०॥

[3] जपं निमीलिताक्षेण कुर्यान्मन्त्रस्य वाचकम् ।
[4] वाच्यस्य प्रतिपत्त्यर्थं वीजपिण्डपदात्मकम् ॥ ४५१॥

[5] त्रिविध वै समुद्दिष्टं प्रागुक्तविधिभावितम् ।
[6] योगोऽपि त्रिविध प्रोक्तस्तं च कार्त्स्न्येन मे शृणु ॥

[7] प्राकृतं पौरुषं चैव ऐश्वरं च तृतीयकम् ।
[9] ऊहस्तु कीर्त्यते तर्क त च विद्धि विचारकम् ॥

समाधिस्त्वात्मलाभस्तु आनन्द परिकीर्तित. ।
स तु लक्ष्य परित्यज्य मन्त्रोच्चारणवर्जित. ॥४५४॥

यदा विभज्यते ब्रह्मकलाशो विधिवर्जित ।
समाधौ परिनिष्पन्ने परमाप्नोति पूरुषम् ॥ ४५५ ॥

प्राणायामादितो यावत् समाध्यन्तं प्रकीर्तितम् ।
द्विगुण त्रिगुण चैव मात्राभेदेन संस्थितम् ॥ ४५६ ॥

योगासनस्थ कुर्वीत विधिमेव यथोदितम् ।
योगासनानि चत्वारि योगपट्टेन वन्धयेत् ॥ ४५७ ॥

पर्यङ्कं कमलं वापि भद्रं वा स्वस्तिक दृढम् ।
तेषामेकतमे स्थित्वा ऋजुकायोर्ध्वत. क्रमात् ॥ ४५८ ॥

स्रस्ताङ्गसन्धि कुर्वीत विस्तीर्णोरु सुकन्धर ।
वाहू उपरि समौ कृत्वा किञ्चिदाकुञ्चयेच्छिर ॥ ४५९॥

नाभौ जघनमध्ये तु हस्तौ कच्छपवत् स्थितौ ।
सव्यस्य चोपरिस्थं तु वामे सव्यं तथापि वा ॥४६०॥

उत्तानौ तु करौ कृत्वा कच्छपी तान्नियोजयेत् ।
ग्रीवा तु हृदयाद्यन्तां नातिस्तब्धा न कुञ्चिताम् ॥

किञ्चिन्निमीलयेन्नेत्रे नासाग्रमवलोकयन् ।
समुद्गवत् पिधायास्य दन्तैर्दन्तानसंस्पृशन् ॥ ४६२ ॥

सगर्भ योगमातिष्ठेन्निर्गर्भं वा सुयन्त्रित ।
तत. प्रमथयेद्वायु प्राणाख्यं चित्तसंयुतम् ॥ ४६३ ॥

रेचकादिचतुर्भेदै. प्राणायाम प्रकीर्तित ।
चित्तं जयेत् सदा यत्नात् दुर्जयं देवदानवै ॥ ४६४ ॥

यद्यप्यभ्यासवैराग्यै· चित्तं संयम्यते वलात् ।
तथापि यत्नमातिष्ठेदुपाधीनां तु वर्जने ॥ ४६५ ॥

द्विविधास्ते तु विज्ञेया सन्निकृष्टा मनोगता ।
सन्निकृष्टा. स्थानकृताश्चित्तोत्था वासनाकृता. ॥४६६॥

न दशमशकाकीर्णे निश्शब्दे गन्धवर्जिते ।
निमीलिताक्षः सन्तिष्ठेत् सर्वेन्द्रियविवर्जित ॥

एवं परित्यजेत् सर्वानुपाधीन् सन्निकर्षजान् ।
वासनोत्थाश्च विविधान् सम्यक् लक्ष्यं समास्थित ॥

प्रत्याहरेत् सदा चित्त विक्षिप्त सर्ववस्तुषु ।
तामस तन्तु बोद्धव्य चित्त सर्वगत तदा ॥ ४६९ ॥

गत रागादितो ज्ञेयमभ्यासाद्राजसं तु तत् ।
तत् साधु कथयते चित्त सश्लिष्ट लक्ष्यगोचरे ॥

सलीन च ततो ज्ञेय गुणातीत तपोधन ! ।
ध्यानमेवविधं कुर्यात् सगर्भ प्राणनिग्रहे ॥ ४७१ ॥

उच्यते च ततो भूयस्त्रविधा योगिना गति. ।
सकल निष्कलं विष्णुं तृतीय पररूपि च ॥ ४७२ ॥

अन्यत्तत् त्रिविध ज्ञेय शब्द व्योमसविग्रहम् ।
विग्रह देवदेवस्य लक्ष्यरूप विचिन्तयेत् ॥ ४७३ ॥

ध्यानमेव समुद्दिष्टं यावद्व्योमान्तिकं भवेत् ।
तावच्च भावयेल्लक्ष्यं यावल्लक्ष्यं न भावयेत् ॥ ४७४ ॥

भावे ह्यभावमापन्ने स स्वभाव पर स्मृत ।
स्थूल पूर्व समभ्यस्य तत सूक्ष्मं तत परम् ॥ ४७५ ॥

एवं विलीयते चित्त लक्ष्यं चोपाधिभि. सह ।
विग्रहं देवदेवस्य ध्यायेद्धृत्पद्मगोचरे ॥ ४७६ ॥

ततोऽन्यं चिन्तयेल्लक्ष्य स्थूलं सूक्ष्मं तत. परम् ।
एवमभ्यस्यमानस्य गुणोत्कर्ष प्रजायते ॥ ४७७ ॥

योगोऽय मुनिशार्दूल ! सामान्य समुदाहृत. ।
परात्पराद्वासुदेवात् प्रकाशानन्दलक्षणात् ॥ ४७८ ॥

अतीन्द्रियादनौपम्यात् सच्चिद्रूपात् सदोदितात् ।
द्विभुजादेकमूर्तेश्च वरदाभयपाणिकात् ॥ ४७९ ॥

स्वास्तेः षाड्गुण्यसंसिद्धाच्चातुरात्म्यस्वभाविनः ।
संशान्तपरमानन्दस्वरूपाद्ब्रह्मण सत. ॥ ४८० ॥

अनुग्रहार्थं भक्तानामवतीर्णस्य चेच्छया ।
परव्यूहादिरूपस्य दीपाद्दीपवदुज्ज्वलात् ॥ ४८१ ॥

एकाद्यनेकरूपस्य विग्रहोऽयं प्रकाशितः ।
तत्र चित्त समाधाय योगी विज्ञानभावनाम् ॥ ४८२ ॥

तत्तन्मन्त्रपदेनैव योगाभ्यासं समाचरेत् ।
एवं य कुरुते याति स कालेन परात्परम् ॥ ४८३ ॥

प्राप्तुमिच्छति य शीघ्र तस्य योगः समुच्यते ।
नित्योदित परं ब्रह्म यत् पुरा ते प्रकाशितम् ॥ ४८४ ॥

वाच्यं तद्द्वादशार्णस्य ध्यात्वा युञ्जीत बुद्धिमान् ।
नासाग्रे भुवि सद्ब्रह्म ध्यायन् कुर्याज्जप द्विधा ॥४८५॥

जिह्वाग्रे तु चतुर्धाप्सु तालुन्यग्नौ तथा च षट् ।
जिह्वामध्ये तथा वायावष्टधावर्तयेन्मनुम् ॥ ४८६ ॥

जिह्वामूले तथा व्योम्नि दशधा द्वादशाक्षरम् ।
कण्ठकूपे तु मनसि ध्यात्वा षोडशधा जपेत् ॥ ४८७ ॥

उरोदेशे बुद्धितत्वे चतुर्विंशतिधा जपेत् ।
उरोन्तेऽहङ्कृतौ ध्यायञ्जपेच्चाशीतिधा पुन ॥ ४८८ ॥

शतं कर्मणि कालेऽब्जज ! अर्धयुक्त शतं जपेत् ।
तत. पुष्करनाड्या वै शतद्वयमनाकुल ॥ ४८९ ॥

अध्यक्षाद्वासुदेवान्तं हृत्याकाशे चतु.शतम् ।
हृदि नादावसानोर्ध्व गगने योजयेत्तु वा ॥ ४९० ॥

एव वा प्रणवेनाद्या प्रणवार्णेन वाचरेत् ।
एवं मन्त्रविशेषेण बहुधा योग ईरित. ॥ ४९१ ॥

इति य. कुरुते योगं नित्ययुक्तः समाहितः ।
प्राप्नोति परमं स्थानं नित्योदितमनामयम् ॥ ४९२ ॥

समाधायात्मना ऽऽत्मानमेवं जप्त्वा जपक्रियाम् ।
ज्ञातृज्ञेयाविभागेन यावत्तन्मयता व्रजेत् ॥ ४९३ ॥

यथा संवेद्यनिर्मुक्ते समाधौ लभते स्थितिम् ।
अभ्यासाद्भववद्योगी ब्रह्म सम्पद्यते तदा ॥ ४९४ ॥

तत. श्रमजय कुर्यात् त्यक्त्वा ध्यानासनक्रमान् ।
शय्यासन निवेद्याथ मूलमूर्तेरनन्तरम् ॥ ४९५ ॥

लक्ष्म्यादिशक्तियुक्तस्य यागमूर्तिगतस्य च।
तस्मिन्नारोपयेद्देवं सर्वाङ्गपरिशोभिते ॥ ४९६ ॥

अर्घ्यं पाद्यं तथाचाम प्रतिग्रहसमन्वितम्।
दत्वा समालभेत् पश्चाच्चन्दनाद्यनुलेपनैः ॥ ४९७ ॥

सुगन्धपुष्पमाल्यादि दीपधूपे निवेद्य च।
भक्ष्याण्यपूपपूर्वाणि सक्षीराणि फलानि च ॥ ४९८ ॥

तर्पणाम्भश्च ताम्बूल साङ्गं सद्गन्धभावितम्।
निवेद्य देवदेवाय निमवानुगुणं तत ॥ ४९९ ॥

सर्वं तु विन्यसेत् पश्चात्तस्मिन् कर्मकृत च यत्।
तुष्टं गृहीतं तत् पूर्णं भावयेद्दक्षिणं करम् ॥ ५०० ॥

तन्मध्ये निष्कल मन्त्र सर्वं यत् किरणाकुलम्।
योगोत्था फलसम्पत्ति लक्ष्मीरूपा विचिन्त्य च ॥

मूलमन्त्र समुच्चार्य पाणिमध्ये तथा स्मरेत्।
भूयश्च निष्कल मन्त्र तस्मादुपरि भावयेत् ॥ ५०२ ॥

सशीर्षे जानुनी भूमौ कृत्वा विष्णोर्निवेदयेत्।
प्रसादाभिमुखेनाथ तेन तच्चात्मसात् कृतम् ॥ ५०३ ॥

भावनीयं द्विजश्रेष्ठ! परितुष्टेन चादरात्।
सन्यासं सञ्चयं वाथ कृत्वा सम्यक्कृतस्य च ॥ ५०४ ॥

मन्त्ररूपानुकारिण्या मुद्रणीय च मुद्रया।
फलार्थं प्रसवं येन नैति सन्यासकारिणा ॥ ५०५ ॥

फलपर्यावसाने च कालमागमचोदितम्।
भर्तुर्नो युज्यते येन सिद्धार्थैस्तु फलार्थिनाम् ॥ ५०६ ॥

नित्यं प्रतिष्ठितं बिम्बं विना स्थलजलादिकान्।
विसर्जन ततः कुर्याद्दत्वार्घ्यं धूपसंयुतम् ॥ ५०७ ॥

भोगस्थानगता मन्त्राः पूजिता ये यथाक्रमम्।
मुख्यमन्त्रशरीरं तु सप्रविष्टाश्च संस्मरेत् ॥ ५०८ ॥

ज्वालाज्वालान्तरे यद्वत् समुद्रेष्विव निम्नगाः।
तन्मन्त्रविग्रहं स्थूलं सर्वमन्त्रास्पदं द्विज! ॥ ५०९ ॥

प्रविष्टं भावयेत् सूक्ष्मे ह्यध्यक्षे ह्युभयात्मके।
परे प्रागुक्तरूपे तु त सूक्ष्ममुभयात्मकम् ॥ ५१० ॥

तस्मात् परं स्फुरद्रूप निराधारपदाश्रितम्।
दर्पणं दर्शयित्वा तु निर्मलं तस्य चाग्रतः ॥ ५११ ॥

सन्धिमार्गेण हृत्पद्मे सप्रविष्टं तु भावयेत्।
स्मृत्वा परात्मना तं च स्वसंविद्गगने हृदि ॥ ५१२ ॥

विश्रान्तं भावयेद्देव स्वभावेन समन्वितम्।
कर्मार्चादिषु बिम्बेषु षट्सु नित्यादिसिद्धये ॥ ५१३ ॥

प्रतिष्ठितेषु विधिवन्नित्य प्राभातिकेऽर्चने।
तच्छक्त्या योजितां शक्ति मूलबिम्बाद्यथापुरा ॥

समभ्यर्चयार्घ्यपुष्पाद्यैस्ताम्बूलान्तै पुरोदितैः।
पुनरारोपयेन्मूले तत्र तत्र नियोजिताम् ॥ ५१५ ॥

पूजार्थं कर्मबिम्बादौ नित्यनैमित्तिकादिषु।
प्राप्तेषु तत्तत्कर्मादौ मूलादावाह्य मन्त्रवित् ॥ ५१६ ॥

समाप्य तेषु तत्कर्माण्यारब्धानि यथार्थतः।
समर्प्य मूलबिम्बे तु तेभ्यस्तत्र विसर्जयेत् ॥ ५१७ ॥

मन्त्रानर्घ्यादिपात्रस्थान् विसृज्य प्राक् प्रयोगतः।
शेषमर्घ्यादिक सर्वं भुक्तपूर्वेण वै सह ॥ ५१८ ॥

पाणिना तोयपूतेन विष्वक्सेनाय चार्घ्य च।
न्यासद्वय च संहृत्य मनसा च स्वविग्रहात् ॥ ५१९ ॥

निश्शेषस्योपसंहारं कुर्यादर्घ्यादिकस्य च।
यागोद्देशात्तथा कुण्डांस्तराद्यस्याखिलस्य च ॥५२०॥

सहोपलेपनेनैव सर्वमंभसि निक्षिपेत्।
धर्तव्यं न चिरं चाग्रे यत् पुरा विनिवेदितम् ॥५२१॥

नैवेद्यं मन्त्रमूर्तीना किञ्चित् पुष्पफलादृते।
कवाटबन्धनं कुर्यान्मन्त्र कवचमुच्चरन् ॥ ५२२ ॥

नियोज्य तत्र रक्षार्थं चक्रं च विहगेश्वरम्।
स्वपेच्छय्यागतो मन्त्री प्रातरुत्थाय पूर्ववत् ॥ ५२३ ॥

यथोक्त सकल कुर्यात् प्रबोधयजनादिकम् ।
सकृत् त्रयह च सप्ताह पक्ष मासमथापि वा ॥ ५२४ ॥
योयजेद्विधिनानेन भक्तिश्रद्धासमन्वित ।
सोऽपि यायात् पर स्थान किपुनर्योऽत्र सस्थित ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहितायां क्रियाकाण्डे अग्निकार्य पितृसभाग नियोमवादि विधान नाम षष्ठोऽध्याय ॥

॥ श्री ॥

अष्टमोऽध्यायः ॥

सनक —
भगवन्! मुनिशार्दूल! सर्वज्ञ! वदता वर!
गरुडप्रमुखाना यदर्चनं प्रागुदीरितम् ॥ १ ॥
तदिदानी विशेषेण विस्तरेण प्रकाशय ।
शाण्डिल्य —
शृणु वक्ष्यामि ते सम्यग्गारुडस्यार्चन पुरा ॥ २ ॥
येन विज्ञातमात्रेण वाञ्छित साधकोऽश्नुते ।
विष्णोःसङ्कर्षणाख्यस्य विज्ञानबलशालिन ॥ ३ ॥
मूर्तिर्ज्ञानबलाख्या या सर्वाधारस्वरूपिणी ।
महिमेति जगद्धातुर्विज्ञेयो विहगेश्वर ॥ ४ ॥
सर्वरोगभयघ्नश्च क्षेपक सर्वविद्विषाम् ।
ततस्तमर्चयेन्नित्य प्रासादे स्थाप्य मन्त्रवित् ॥ ५ ॥
प्राङ्गणे प्रथमे वाऽथ द्वितीये मूलमन्दिरात् ।
अग्रदेशे प्रकुर्वीत प्रासाद मण्डपाकृतिम् ॥ ६ ॥
चतुर्द्वारसमोपेत वर्गत्रयसमन्वितम् ।
वर्गषट्कान्वित वाथ सर्वालङ्कारशोभितम् ॥ ७ ॥
मूलगेहात्रिभागोच्चमर्धोच्च वा सुविस्तरम् ।
तस्मिन् ब्राह्मेऽथ दिव्ये वा दिव्ययुक्तेऽथ मानुषे ॥ ८ ॥
संस्थाप्य लोहजा वाथ शैलीमर्चा यथोदिताम् ।
त्रिकालमर्चयेन्नित्यं मुख्यमूर्त्यर्चनान्तिमे ॥ ९ ॥
तद्विधान विशेषेण मन्त्रपूर्व शृणु क्रमात् ।
प्रणवं पूर्वमुद्धृत्य पक्षिशब्दमनन्तरम् ॥ १० ॥
पञ्चाक्षरो महामन्त्र. स्वाहान्त संप्रकीर्तित. ।
मन्त्राणानि सबिन्दूनि प्रागोङ्कारान्वितानि च ॥ ११ ॥
समुच्चार्याथ तुर्यान्तेर्जानाद्यैश्च हृदादिभि ।
अनेनैरस्त्रपर्यन्तैरङ्गानीत्यवधारय ॥ १२ ॥
प्राङ्मूलमन्त्रमध्याद्यव्यत्ययाद्विपदा भवेत् ।
सोऽय मन्त्र. समाख्यातस्त्रिदशैरपि दुर्लभः ॥ १३ ॥
पञ्चाक्षर इति ख्यातो गारुडो मुनिसत्तम! ।
पञ्चाङ्गानि यथापूर्वमक्षरै स्यु सबिन्दुके ॥ १४ ॥
साङ्गेनानेन मन्त्रेण स्थापनीयो विधानत ।
मूलालयगते बिम्बे सुस्थिते वाथ यानगे ॥ १५ ॥
स्थितैव गारुडी मूर्तिर्यानि वाऽगमनोन्मुखी ।
शयने चासने चैव त्वासीना वाथ सुस्थिता ॥ १६ ॥
द्वारावरणदेवाना ध्यानाध्याये विशेषत ।
ध्वजारोहेऽपि सुव्यक्त लक्षण चास्य वक्ष्यते ॥ १७ ॥
एवं ज्ञात्वा यथाकाल तन्मन्त्रनिरतो द्विज! ।
स्नात्वा तदीयमन्त्रेण कृतपादावनेजन ॥ १८ ॥
उपस्पृश्य यथान्यायं प्रासाद सप्रविश्य च ।
स्वासने सुखमासीन. प्राङ्मुखो वाप्युदङ्मुख ॥ १९ ॥
करशुद्धि च दिग्बन्धं प्राणायाम समाप्य च ।
भूतशुद्धि च विधिवन्मन्त्रविन्यस्तविग्रह ॥ २० ॥
पक्षीशमुद्रा बद्ध्वाथ हृदयाम्भोरुहोदरे ।
स्वानन्दधामनिष्ठस्य देवस्य चतुरात्मन ॥ २१ ॥
सकर्षणाशात् संपूर्णविज्ञानबलसंकुलात् ।
अवतार्यामृतैर्भोगैर्जेपान्तं प्रावबन्ध्य च ॥ २२ ॥
ततो मूर्तेर्यजेद्बाह्ये प्रागुक्तैर्भोगराचये ।
पात्रशिष्टैश्च देवाद्यै. साधितै. पृथगेव वा ॥ २३ ॥

तदर्थं कल्पयेत् प्राग्वदर्घ्याद्य पात्रपञ्चकम्।
द्वितय चाथवैकस्मिन् पाद्यं स्नानीयवारि च ॥ २४ ॥

अर्घ्याचामे तदन्यस्मिन्नेकस्मिन् सकल तु वा।
प्राग्वत् स्वदेहविन्यस्तान् मन्त्रानभ्यर्च्य मन्त्रवित् ॥

अर्घ्याद्यैर्धूपपर्यन्तैस्ततो द्वारचतुष्टये।
वास्त्वीशं क्षेत्रनाथ च द्वारलक्ष्मी स्वमन्त्रत. ॥ २६ ॥

चण्डाद्य च गण प्राग्वदासन कल्पयेत् तत।
शेषपूर्व च धर्माद्यमष्टकं वा द्विरष्टकम् ॥ २७ ॥

कालचक्र तदूर्ध्वं तु सरोजाद्य चतुष्टयम्।
समभ्यर्च्य च गन्धाद्यैर्गणनाथादिकानपि ॥ २८ ॥

हृत्पद्मकर्णिकामध्ये मानसैरर्चित पुरा।
स्वविद्यया समावाह्य स्वस्थानाद्विम्बहृत्कजे ॥ २९ ॥

सफलीकृत्य विधिवदङ्गलाञ्छनभूषणै.।
सत्याख्यया दक्षिणतो बलशक्त्या स्वरूपया ॥ ३० ॥

गाणित्रकं च मन्दारकुसुमस्तवकं तथा।
कलशं चामृताधार फणीन्द्रं दक्षिणादित ॥ ३१ ॥

विन्यसेल्लाञ्छनान्येव किरीट वनमालिकाम्।
अनन्तादीनि नागानि न्यस्यानि तदनन्तरम् ॥ ३२ ॥

शक्ति प्रागुदिता तस्य बलधर्मस्वरूपिणी।
पक्षीशमुद्रा सन्दर्श्य लययागं समाचरेत् ॥ ३३ ॥

भोगयागश्च कर्तव्य. पद्मपीठतलोपरि।
प्रागादिपद्मपत्रेषु हृदयादीनि पूर्ववत् ॥ ३४ ॥

विदिक्पत्रेषु चैवास्त्रमेषा वर्णानि पूर्ववत्।
रूपलावण्यभूषाद्यैर्मूलमन्त्रशरीरवत् ॥ ३५ ॥

अग्नीशरक्षोवायव्यकोणेषु विहगेशितु।
चतुष्टयं गणित्राद्य किरीटं वनमालिकाम् ॥ ३६ ॥

पुरस्तात् पृष्ठतो न्यस्य दक्षिणोत्तरयोस्तथा।
चतुष्टयं क्रमेणैव शेषाद्या पन्नगेश्वरा ॥ ३७ ॥

दक्षिणे विहगेशस्य सत्याख्या कर्णिकोपरि।
प्राणापानसमानोदानव्यान प्राणरूपिण. ॥ ३८ ॥

मध्यस्थस्य खगेशस्य वह्नि. प्रागादितः क्रमात्।
सत्य सुपर्णो गरुडस्तार्क्ष्यश्च विहगेश्वर ॥ ३९ ॥

पञ्चात्मकस्य प्राणस्य विकारस्त्वेष पञ्चधा।
सत्याद्या दिक्षु चत्वार कोणेतु विहगेश्वर ॥ ४० ॥

व्यानमेषा विशेषेण समाकर्णय साम्प्रतम्।
आचाड्विग्रगोचरात् सर्वो यस्य देहस्तु पौरुष. ॥

द्विभुजस्तुहिनाभस्तु स सत्य प्राणदैवतम्।
सुपर्ण पद्मरागाभो निर्मल स्वर्णलोचन ॥ ४२ ॥

गरुड काञ्चनाभस्तु कुटिलभ्रूवरुणेक्षण।
केकराक्षस्तु तार्क्ष्यो वै प्रावृड्जलदसन्निभ ॥ ४३ ॥

द्रवत्कनकनेत्रस्तु शबलाभस्तु पञ्चम।
चतुर्भुजा सुपर्णाद्या सौन्दर्यरत्या ह्यनाकुला ॥ ४४ ॥

पतत्रिचरणा सर्वे पद्ममण्डलमण्डिता.।
लम्बोदरा सुपीनाङ्गा कुण्डलाद्यैर्विभूषिता ॥ ४५ ॥

कुटिलभ्रूसुवृत्ताक्षा वक्र (त्र) तुण्डा सितानना।
अपानादिसमीराणामाधिपत्येन संस्थिता ॥ ४६ ॥

महाबला महाकाया रक्ततुण्डोऽत्र पञ्चम.।
स्वस्वाङ्गुष्ठद्वयप्रोतगणित्रोभयपाणिना ॥ ४७ ॥

पुष्पाञ्जलिधरा सर्वे मुख्येन विहगोत्तमा।
सुपर्ण पश्चिमाभ्या तु पाणिभ्या दक्षिणादित ॥ ४८ ॥

मन्दारपुष्पस्तवकं दधद्विस्मयमुद्रिकाम्।
तथाविधाभ्या गरुडस्ते धत्ते व्यात्ययेन तु ॥ ४९ ॥

तार्क्ष्य. पश्चिमयोर्नित्य धत्ते दक्षिणवामयो.।
कद्रू तथाऽमृत कुम्भं पञ्चमो विहगेश्वर ॥ ५० ॥

दक्षिणेन सुधाकुम्भं वामेन तु फणीश्वरम्।
नित्योदितस्य व्यूहस्य तथा शान्तोदितस्य च ॥ ५१ ॥

प्राणापानादिवायूना पञ्चानामपि नामभाक्।
गरुड परिवारत्वे ध्वजत्वेपि विशेषत ॥ ५२ ॥

योजनीयस्तथान्येषु मधुत्यादिपदेषु तु।
वासुदेवादिमूर्तीना चतुर्णा क्रमशस्त्वमी ॥ ५३ ॥

सत्याद्यास्ताक्ष्यपर्यन्तास्तत्तन्मूर्त्यन्तरेषु तु ।
त्रिषु त्रिषु समादेया. सत्याद्या. केशवादिषु ॥ ५४ ॥

पद्मनाभादिमूर्तीना पञ्चमो विहगेश्वर ।
परात्परपरव्यूह व्यूहान्तरतनोर्विभो ॥

प्रादुर्भावतनोश्चापि जगद्रक्षणकाङ्क्षिण ।
खगाना कारणत्वाच्च प्रागुक्तो वा खगेश्वर. ॥ ५६ ॥

इति ते गारुडव्यूहप्रभावः संप्रकीर्तित. ।
कुमुदाद्यास्ततो वाह्ये शक्राद्यास्तद्बहि क्रमात् ॥ ५७ ॥

तद्बहि. कुमुदादीना भूतेशाश्चोत्काटादय ।
गणशः पूजनीयो वा तदग्रे वलिमण्डले ॥ ५८ ॥

महापीठेऽथवा पूज्या गरुडस्यानुयायिन ।
पालयन्तश्च तद्भक्तान् दिव्यान्यायतनान्यपि ॥ ५९ ॥

व्यात्वैवमर्चनं कुर्यादासनाद्यैर्यथोदितै. ।
चतुष्षष्ट्युपचारैर्वा द्वात्रिंशद्भिस्तु वेतरै. ॥ ६० ॥

षोडशैरुपचारैर्वा मुख्यमध्याधमक्रमात् ।
तन्निवेदितमन्नाद्यं नराणा रोगिणा सदा ॥ ६१ ॥

वन्ध्याना वनिताना च जयेच्छूना च भूभुजाम् ।
विषोपहतवेषाणा प्रदद्यात् संविभज्य च ॥ ६२ ॥

आर्द्राया प्रतिमास तं विशेषेणैवमर्चयेत् ।
उत्सवेषु विशेषेण भ्रामयेदुत्सवार्चया ॥ ६३ ॥

इति सम्यक् समाख्यातं गरुडस्यार्चन परम् ।
इत परं यच्छ्रोतव्यं तद्वतस्व मुनोऽधुना ॥ ६४ ॥

सनक —

मुने ! सकलधर्मज्ञ ! भगवन् ! भक्तवत्सल ! ।
विष्वक्सेनस्य विघ्नारेः पूजनं विहितं पुरा ॥ ६५ ॥

तद्विधानं विशेषेण वद सानुग्रहो यदि ।

शाण्डिल्य —

पौष्काराख्ये महाशास्त्रे पुरा पुष्करजन्मन ॥ ६६ ॥

विष्वक्सेनार्चन प्रोक्तं यथावच्छृणु तन्मुने ! ।

पौष्कर उवाच—

किमर्थमाह भगवन् ! विघ्नोच्छेदकर प्रभुम् ॥ ६७ ॥

समस्तविघ्ननाथानां परमं कारणं च य. ।
विष्वक्सेनस्तु यष्टव्यो भोगभूमिगतेऽच्युते ॥ ६८ ॥

कैर्द्रव्यैः केनविधिना कि करोत्यभिपूजितः ।

श्रीभगवानुवाच—

भविना भाविनो विघ्ना सद्धर्मविनिवारका. ॥ ६९ ॥

न यागयज्ञधर्माद्यैर्मन्ये संसारिणा शुभम् ।
तत्प्रवृत्तौ तु ये विघ्ना प्रोत्साहविनिवारका. ॥ ७० ॥

व्यपयान्ति च ते सर्वे चक्रज्वालाभयार्दिता ।
प्रागार्जितेन केनापि कर्मणा द्विज ! साम्प्रतम् ॥

अनुभुङ्क्ते फल यागाद्द्विविध चाग्रत.स्थितम् ।
तस्य संरक्षणार्थं तु विष्वक्सेनः सदैव हि ॥ ७२ ॥

काले यागावसानाख्ये द्वितीयेऽवसरेऽथवा ।
कृत्वा निर्व्याकुल चित्तं यष्टव्य. फलसिद्धये ॥ ७३ ॥

यागनिर्वर्तनाच्छेषैरम्लानैरर्घ्यपूर्वकै. ।
उपचारमयैर्भोगै सर्वैराभरणादिकै ॥ ७४ ॥

नैवेद्यैर्मधुपर्काद्यैर्मुख्यमूर्तेर्निवेदितै ।
द्विजप्रदानशिष्टैस्तु स्वय प्राशनवर्जितै. ॥ ७५ ॥

तथा चर्वन्तरस्थैश्च ह्यपरेभ्योऽनिवेदितै ।
संस्कृतैरूष्मणोपेतैर्मधुराज्यपरिप्लुतैः ॥ ७६ ॥

पौष्कर उवाच —

क एषोऽतुलवीर्यो हि यस्य दूराद्द्रवन्ति च ।
विघ्ना निमेषमात्रेण त्रैलोक्योन्मूलनक्षमा ॥ ७७ ॥

श्रीभगवानुवाच —

कालवैश्वानराख्या या मूर्तिस्तुर्यात्मनो विभो. ।
स एव द्विजदेवास्यो विष्वक्सेन. प्रकीर्तित ॥ ७८ ॥

स्थित आहवनीयादिभेदेन मखयाजिनाम् ।
ऋक्पूतं हुतमादाय तर्पयत्यखिलं जगत् ॥ ७९ ॥

एव मन्त्रमयाद्यागात् सात्विकाद्ब्रह्मभावितात् ।
संप्राप्य गुरुमूर्तेर्वै प्रापण मन्त्रसंस्कृतम् ॥ ८० ॥

अनाहुतामराणा च सर्वलोकनिवासिनाम्।
स्वयं सविभजत्याशु तदनुग्रहकाम्यया ॥ ८१ ॥

ज्ञात्वैवं तस्य माहात्म्य व्यक्तिस्थं फलसिद्धये।
त्रिसन्ध्यं नित्यपूजाया वल्यन्ते त समर्चयेत् ॥ ८२ ॥

वत्सरोत्सवपूर्वेषु तथा वैशेषिकेष्वपि।
व्यक्त्याद्याधारभूतेषु क्रमात् कृत्वा पुरार्चनम् ॥ ८३ ॥

केवल वाथ होमान्तं स्वशक्त्या विभवेन वा।
विस्तरेणाथवा शश्वत्तत. कमलसभव ! ॥ ८४ ॥

कृत्वा पर्णपुटे तोयं पात्रे वा कलशेऽव्रणे।
तमात्मनोत्तरे भागे ह्यर्चयित्वा निवेद्य च ॥ ८५ ॥

अथापरस्मिन् भाण्डे तु तदस्त्रपरिमन्त्रिते।
नैवेद्याद्भागमादाय तथा चर्वन्तरस्थितात् ॥ ८६ ॥

ओदनादंशमुद्धृत्य दध्याज्यव्यञ्जनै. सह।
समालभनपुष्पार्घ्यकुशाम्बुपरिभावितम् ॥ ८७ ॥

तद्धृन्मन्त्रेण बहुशो ह्यभिमन्त्र्याब्जसभव !।
तन्मूलमन्त्रमुच्चार्य ध्यानभावनयान्वितम् ॥ ८८ ॥

प्राक्सन्निवेशिते भाण्डे समुत्कीर्य पिधाय तत्।
प्रणवाष्टकजप्त वा तन्नाम्ना सह पौ कर ! ॥ ८९ ॥

एक वै सोदकं पात्रं सनैवेद्यं जलाप्लुतम्।
सर्वत्र सर्वदा यागे कुर्यात् प्राग्विधिना विना ॥ ९० ॥

तच्चापि क्ष्मातले कूपे तटाकादौ तु चोत्किरेत्।
नोपभोगं यथा याति काकादिष्वब्जसंभव ! ॥ ९१ ॥

यस्मात् सन्मन्त्रपूतं तत् प्राधान्येनाभिवर्धते।
अतो निषिद्धः पापानामपापानां विशेषत. ॥ ९२ ॥

ज्ञात्वैवं यत्नतो मन्त्री तन्मन्त्रेण समर्चयेत्।
साङ्गं मन्त्रमतो वक्ष्ये यथावदवधारय ॥ ९३ ॥

आक्रान्तमनलेनैव प्राणाख्यं बीजनायकम्।
त्रैलोक्यैश्वर्यदोपेतमूर्जोपरि गतं तु तत् ॥ ९४ ॥

ततो वाराहमादाय भूधव्योमरभूषितम्।
विष्वक्सेनाय तदनु सनमस्कं पदं न्यसेत् ॥ ९५ ॥

प्रणवाद्यो ह्ययं मन्त्रो विष्वक्सेनस्य कीर्तितः।
पूर्ववीज हि यच्चास्य ऊकारस्वर्जितम् ॥ ९६ ॥

आकाराद्यैश्च षड्दीर्घैर्भिन्नमङ्गगण नयेत्।
प्रणवेन स्वनाम्नाथ जातिभिष्षड्भिरन्वितम् ॥ ९७ ॥

नमस्स्वाहादिभिश्चाय विष्वक्सेनस्य अङ्गक।
साङ्गेनानेन मन्त्रेण प्रतिष्ठाप्यो विधानत. ॥ ९८ ॥

प्रथमावरणे वाथ द्वितीयावरणेऽथवा।
ईशानसोमदिङ्मध्ये प्रासादे दक्षिणामुखे ॥ ९९ ॥

मूलालयोच्चान्नीचे तु कल्पिते गर्भमन्दिरे।
ब्रह्मस्थानेऽथवा दिव्ये मूलबेराशमानत ॥ १०० ॥

कल्पितस्य शिलादारुलोहपूर्वस्तु वस्तुभि।
पूजन मुख्यकल्प स्यादनुकल्पेऽग्रमण्टपे ॥ १०१ ॥

प्रागुक्तकोणभूभागे मेखलात्रयनिर्मिते।
पीठेऽवतार्य गगनादमूर्त मूर्तमेव वा ॥ १०२ ॥

केवलं वलिदानेन तर्पयेदुदकेन च।
चतुस्स्थानावतीर्णस्य मण्डलादिषु वृत्तिषु ॥ १०३ ॥

परव्यूहादिरूपस्य देवस्य यजनावधौ।
प्रासादान्तर्गतस्यापि स्वस्थानस्थस्य मण्डपे ॥ १०४ ॥

पूजन विधिवत् कार्यमारम्भदिवसादित.।
सर्वकर्मावसाने तु मण्डलादिगते विभौ ॥ १०५ ॥

स्वे स्वे धाम्नि विसृष्टे तु ध्यात्वा मण्डलमध्यत।
पूजयेद्विधिवन्मन्त्री द्वितीये वासरेऽपि च ॥ १०६ ॥

भगवद्यजनार्थं तु प्रासादस्थ विशेषतः।
यथाविधि समभ्यर्च्य नैवेद्यैस्तन्निवेदिते ॥ १०७ ॥

अर्घ्याद्यैरखिलैरन्यैस्ताम्बूलाद्यैश्च नित्यश.।
जलस्थलादिनिलयास्तद्भूताश्चाथ तर्पयेत् ॥ १०८ ॥

प्रासादस्थस्य तस्याथ देहमानानुसारतः।
कृत्वा हेमादिभिर्द्रव्यैर्विशेषार्चा विधानत. ॥ १०९ ॥

उग्रा वा शान्तरूपा वा विघ्नविध्वसनक्षमाम्।
चतुर्भुजां वा द्विभुजामासीना वा समुत्थिताम् ॥

द्विभुजस्य चतुर्हस्तामन्यथा वा प्रकल्पिताम् ।
वैशेषिकेषु प्राप्तेषु पूजयेदुत्सनात्रया ॥ ११२ ॥

मृगयाद्युत्सवे प्राप्ते यत्र यत्र व्रजेत् प्रभु ।
तत्र तत्र नयेदेना निर्विघ्नफलसिद्धये ॥ ११२ ॥

ध्यानमस्य प्रवक्ष्यामि यथावच्छृणु सत्तम ।
नवदूर्वाङ्कुराभं च त्वीषत्पिङ्गलकान्तिभृत् ॥

चतुर्दंष्ट्र चतुर्बाहु चतुष्किष्कुं चतुर्गतिम् ।
पूर्णाङ्गं केसरिस्कन्धं पृथूरस्थलराजितम् ॥ ११४ ॥

दक्षिणावर्तनिम्नेन नाभिरन्ध्रेण शोभितम् ।
आजानुबाहु श्रीमन्त पिङ्गलार्चिर्जटाधरम् ॥ ११५ ॥

द्रवत्कनकपिङ्गाक्षं चिपिट पृथुनासिकम् ।
सितदीर्घनखश्रेणीशोभित कुटिलभ्रुवम् ॥ ११६ ॥

विस्तीर्णगण्डवदन बालेन्दुकुटिलोपमैः ।
नवकिश्वरुणाकारैर्लोमैः सपूर्णविग्रहम् ॥ ११७ ॥

शोभनेन प्रलम्बेन पृथुना प्रोन्नतेन च ।
माणिक्यकुण्डलाढ्येन युक्त श्रोत्रद्वयेन तु ॥ ११८ ॥

मकुटेनोन्नतेनैव हाराद्यैरुपशोभितम् ।
चित्रकौशेयवसनं विचित्रस्रग्विमण्डितम् ॥ ११९ ॥

प्रलयद्वादशादित्यसहस्रगुणदीधितिम् ।
ईषदूर्ध्वं तथातिर्यग्विनिपातितलोचनम् ॥ १२० ॥

कुन्देन्दुकान्तिदशनं किञ्चिद्विहसिताननम् ।
स्वभावसौम्यममलं मायाक्रोधोपरञ्जितम् ॥ १२१ ॥

सविलासचलत्पादन्यासस्थानकसंस्थितम् ।
स्वेनान्तःकरणेनैव भावयन्तं परं पदम् ॥ १२२ ॥

अङ्गुष्ठादि कनिष्ठान्त वामपाणौ लतात्रयम् ।
नामयत्युन्नता चैका घ्राणाग्रे विनियोजिता ॥ १२३ ॥

सद्विघ्नभीतिप्रदया त्वनया मुद्रयान्वितम् ।
रथाङ्गशङ्खहस्तं च लम्बमानगदाधरम् ॥ १२४ ॥

श्रोणीतटनिविष्टेन सावहेलेन पाणिना ।
इत्थंरूपधरं देवमनेकाद्भुतविक्रमम् ॥ १२५ ॥

उग्ररूपमिति ध्यायेदाग्नेयमनलप्रभम् ।
दंष्ट्रातर्जननिर्मुक्त साभयं शान्तलक्षणम् ॥ १२६ ॥

मुख्यदक्षिणहस्तेन भक्तानामभयप्रदम् ।
तथाविधेन वामेन लम्बमानगदाधरम् ॥ १२७ ॥

पृष्ठदक्षिणवामाभ्या चक्रशङ्खधर क्रमात् ।
एवं चतुर्भुजस्योक्त द्विभुजस्यावधारय ॥ १२८ ॥

उक्ताभ्यामुग्रशान्ताभ्या शङ्खचक्रद्वय विना ।
प्रागुक्तद्वितयं वाथ द्वितीयं चिन्तितं तु वा ॥ १२९ ॥

गदाविरहितं वाथ वामकट्यवलम्बितम् ।
स्थानके वाऽसने वाममूरुदेशे निवेशितम् ॥ १३० ॥

गोपनीमुद्रया वाथ कटकाकारमुद्रया ।
उभाभ्यामपि पाणिभ्या विश्रान्त पीठपृष्ठत ॥ १३१ ॥

अवष्टभ्य गदामूर्ध्व मातङ्गमुसलाकृतिम् ।
प्राक्पद्मदलमाक्रम्य पादाभ्या कर्णिकासनम् ॥ १३२ ॥

सुस्थितं कर्णिकायां वा प्राग्वदन्यैरलकृतम् ।
एव ध्यानविशेषेषु त्वेक स्थाप्य विधानतः ॥ १३३ ॥

समर्चयीत कालेषु प्रागुक्तेषु स्वमन्त्रत ।
चतुस्स्थानार्चनार्थं तु मण्डलाना तु मध्यत ॥ १३४ ॥

पूजितेष्वथ मन्त्रेषु नियुक्तेषु स्वधामनि ।
ईशानसोमदिङ्मध्ये चतुरश्रे पुरेऽथवा ॥ १३५ ॥

द्वारशोभाश्रनिर्युक्ते रेखात्रितयभूषिते ।
तदन्तरेऽर्धचन्द्रस्थे कमलेऽष्टदलान्विते ॥ १३६ ॥

साम्राज्येन नियुक्तेऽस्मिन् विघ्नानामच्युतेन तु ।
पूजिते विधिना शश्वदभीष्ट साधकोऽश्नुते ॥ १३७ ॥

तस्मान्मन्त्रैस्तदीयैस्तु स्नात्वा पूर्वविधानतः ।
प्रक्षाल्य पाणिपादौ वा त्वाचम्य न्यासमाचरेत् ॥

तदधिष्ठातृकत्वेन धारणाभिः स्वविग्रहम् ।
शोधयित्वा पुनर्यस्य षडङ्गं तत्करादितः ॥ १३९ ॥

प्राग्वदानन्दधामाद्य ह्यवतार्य तथा प्रभुम् ।
इष्ट्वा हृत्पुण्डरीके तु स्वापेक्षानिष्कलात्मकम् ॥ १४० ॥

तमेव सकलत्वेन यात ध्यात्वा यजेद्गृहि ।
प्रागवदर्घ्यादिपात्राणि प्रतिष्ठाप्य स्वविग्रहे ॥ १४१ ॥

विन्यस्तमन्त्रानभ्यर्च्य द्वारेदक्षिणसौम्ययो ।
चण्डप्रचण्डसदृशौ बलप्रबलसंज्ञितौ ॥ १४२ ॥

वायुवेगं महाप्राणं द्वाराग्र गरुडोपमम् ।
समभ्यर्च्य यथापूर्वं प्रागवत्वा कमलासनम् ॥ १४३ ॥

धर्माद्यनन्तपर्यन्त पञ्चक नवक तु वा ।
सत्वेनाच्छादितं पश्चात् केवलेनाम्बुज स्मरेत् ॥१४४॥

तस्मिन्नावाह्य तं देव हृदये ध्यानचोदितम् ।
सन्निधानादिक कृत्वा मुद्राबन्धपुरस्सरम् ॥ १४५ ॥

समभ्यर्च्यार्घ्यपुष्पाद्यैर्लययागविधानतः ।
कर्णिकामध्यगं तस्य हृदाद्यं मुख्यमन्त्रवत् ॥ १४६ ॥

पद्मच्छदान्तरस्थाश्च तदाकारद्युति विना ।
किन्त्वङ्गाना च सर्वत्र ध्यानमुक्त सिनादिकम् ॥१४७॥

क्रियाख्या तेजसी शक्ति स्वाहापर्यायरूपिणीम् ।
लक्ष्मीरूपधरा पीता सर्वालङ्कारमण्डिताम् ॥ १४८ ॥

प्रियानुरूपा सतत स्वासीना वाथ सुस्थिताम् ।
दक्षिणोत्तरयोगेन चामरोभयधारिणीम् ॥ १४९ ॥

(ओं) ह्रीं क्रियायै स्वाहान्तो मन्त्रोऽय संप्रकीर्तित ।
अनेन स्वामिनो देहात्तेजसाद्विग्रसदनात् ॥ १५० ॥

वामपार्श्वेऽवतार्यास्य भोगयागावसानतः ।
गजाननो जयत्सेनो हरिवक्त्रो महानल ॥ १५१ ॥

कालप्रकृतिसंज्ञश्च चतुर्थः कमलोद्भव ! ।
गणराजेश्वरा ह्येते चत्वारश्चण्डविग्रहा ॥ १५२ ॥

आज्ञाप्रतीक्षकाश्चास्य सुश्वेतचमरोद्यता ।
विनयकादयश्चैव विघ्नेशा प्रवरास्तु ये ॥ १५३ ॥

अमीषा गणनाथाना नित्यमाज्ञानुपालिनः ।
ईशानादिषु कोणेषु पद्मबाह्ये स्थितान् न्यसेत् ॥१५४॥

वीक्षमाणा विभोर्वक्त्रं तत्तुल्यस्थानकै स्थिता ।
तद्वत्करान्विता सर्वः किन्तु मुद्राविवर्जिताः ॥ १५५ ॥

ध्यानमेषा पृथग्भूतं शारीरमवधारय ।
भीमद्विपेन्द्रवदन चतुर्दंष्ट्रं त्रिलोचनम् ॥ १५६ ॥

कम्बुग्रीवं चतुर्बाहु पूर्णचन्द्रायुतद्युतिम् ।
हारनूपुरकेयूरमेखलादामभूषितम् ॥ १५७ ॥

नानास्त्रगन्धवस्त्राढ्यमनौपम्यपराक्रमम् ।
ध्यायेद्गजाननमतो जयत्सेन च संस्मरेत् ॥ १५८ ॥

महत्तुरङ्गवदनं पद्मरागाचलप्रभम् ।
द्रवच्चामीकराक्ष च त्वनेकाद्भुतविग्रहम् ॥ १५९ ॥

हरिवक्त्रमतो ध्यायेत् सटाच्छुरितमस्तकम् ।
निष्टप्तकनकप्रख्यं घोरघर्घरनिस्वनम् ॥ १६० ॥

मृगराड्वदन विप्र ! कल्पान्तनिलविग्रिनम् ।
कालप्रकृतिनामान भावयेदञ्जनद्रिवत् ॥ १६१ ॥

दंष्ट्राकरालवदन पिङ्गलश्मश्रुलोचनम् ।
ज्वलत्कुण्डलभृद्रौद्र मीनवत्सिम्ननासिकम् ॥ १६२ ॥

गणराजेश्वरा ह्येते महापुरुषलक्षणैः ।
संयुक्ताश्चाखिलविप्र ! आपादात् कन्धरावधि ॥१६३॥

यत्किञ्चिन्मण्डन वस्तु तथाद्योक्त स्मरेत्त्रिषु ।
एतेषामर्चन कुर्यात् स्वनाम्ना प्रणवादिना ॥ १६४ ॥

नमोन्तेनाब्जसंभूत ! नानासिद्धिफलाप्तये ।
अष्टाष्टकस्तदर्धेर्वातस्यार्धैर्वा यथारुचि ॥ १६५ ॥

क्षिप्रकर्मप्रसिध्यर्थमष्टभिर्वा समर्चयेत् ।
तत्रिवेदितमल्लाद्यमर्घ्यस्रक्चन्दनादिकम् ॥ १६६ ॥

न देयं कस्यचित् प्राज्ञैरैहिकामुष्मिकाप्तये ।
स्वाश्रितानामनुज्ञातं भूताना चैव तेन तत् ॥ १६७ ॥

नित्य तदूर्ध्वतस्तेषामाशास्थगितचारिणी ।
अत एव हि भोक्तॄणामर्थहानि वदन्ति ते ॥ १६८ ॥

नूनमाशागण सर्व ध्वसयन्ति सदैव हि ।
तस्माद्ददाति योऽन्येषा स्वयमश्नाति वाऽधम ॥

मोहादुपेक्षते वापि स याति नरकेऽधम ।
अतः श्रेयोर्थिना कार्य परिहार सदैव हि ॥ १७० ॥

तच्चापि क्ष्मातले कूपे तटाकादौ तु चोत्क्षिपेत् ।
नोपभोगं यथा याति काकादिवज्जसंभव ! ॥ १७१ ॥

य स्मात् सन्मन्त्रपूतं तत् प्राधान्येनापि वर्धते ।
अतो निषिद्ध. पापानामपापाना विशेषत. ॥ १७२ ॥

इति सम्यक् समाख्यातं विष्वक्सेनार्चन तव ।
अत परं यद्वक्तव्यमस्ति चेत्तद्वदस्व मे ॥ १७३ ॥

सनक —

कुमुदाद्यावृतीशाना द्वारावरणवासिनाम् ।
शिलालोहादिभि. क्लृप्ता या या मूर्ति प्रतिष्ठिता ॥

तत्र तत्र च कि कार्यमर्चने तद्वदस्व मे ।

शाण्डिल्य —

द्वारावरणदेवाना सुस्थिताना स्वसद्मसु ॥ १७५ ॥

चलाना वाथ हेमाद्यैर्निर्मिताना यथाविधि ।
त्रिकालं वा द्विकाल वा संकटे त्वेककालिकम् ॥

तत्तन्मन्त्रेण कुर्वीत पूजामष्टोपचारत ।
परव्यूहादिरूपस्य विष्णोर्दिव्यालयादिषु ॥ १७७ ॥

प्रासादवेरप्राकारगोपुरद्वारमण्डपात् ।
पचनालयपानीयशालापुष्पादिमण्डपान ॥ १७८ ॥

धनधान्याम्बरावासमालिकावलिविष्टरान् ।
तथाङ्गाश्रयसद्मानि गोशालावाहनास्पदान् ॥ १७९ ॥

अपूर्वानथवा जीर्णान् नष्टाश्चैवोद्धरन्ति ये ।
ग्रामादिरथ्यावरणानुत्सवभ्रमणाय च ॥ १८० ॥

फलपुष्पद्रुमाढ्यानि वापीकूपान्वितानि च ।
विश्राममण्डपोपेतनिपानालङ्कृतानि च ॥ १८१ ॥

उद्यानानि प्रकुर्वन्ति ये भक्त्या तु जगत्प्रभो ।
केदारापणपूर्वाणि साधनानि ददन्ति ये ॥ १८२ ॥

समाराधकपूर्वाणां तदैव परिचारिणाम् ।
दासीदासकुटुम्बानां देवालयनिवासिनाम् ॥ १८३ ॥

पोषं कुर्वन्ति ये वृत्या नित्यया प्रीतये विभो. ।
देवस्याङ्गाङ्गिरूपस्य परिवारगणस्य च ॥ १८४ ॥

नूपुरादिकिरीटान्तैर्विग्रह भूषयन्ति ये ।
प्रासादगोपुरादीनि चामीकरमयानि च ॥ १८५ ॥

शयनासनयानानि रथानि विविधानि च ।
महान्ति हेमसद्रत्नरचितानि समन्ततः ॥ १८६ ॥

द्विरदांश्च वराश्वांश्च यागोपकरणानि च ।
पाद्यार्घ्यपात्रपूर्वाणि पादोदादिप्रतिग्रहान् ॥ १८७ ॥

भद्रपीठ तथा दीपधूपयोर्लक्षणान्वितम् ।
पात्रयुग्मं च वै घण्टामक्षसूत्रादिकान्यपि ॥ १८८ ॥

छत्राणि चामरादीनि सितानि विविधानि च ।
उपानत्पादुकादीनि पादपीठान्यनेकश ॥ १८९ ॥

हवि स्थालीश्च विविधा साधाराश्च सलक्षणा ।
हेमराजतताम्रोत्थास्ताम्बूलाधारसंयुता. ॥ १९० ॥

स्रुक् स्रुवादीनि भाण्डानि यान्यन्यानि समर्चने ।
पयोग यानि सर्वाणि येऽर्पयन्ति जगद्विभोः ॥ १९१ ॥

देवद्रव्याणि रक्षन्ति देवस्वं च भयान्विता ।
सदागमादिसिद्धान्तनिश्चयार्थप्रशंसका. ॥ १९२ ॥

दीक्षापयन्ति सद्भक्तान् ये वेदान्तार्थसूचकाः ।
भाषाभि. स्वस्वकीयाभिर्ये तदर्थप्रबन्धका. ॥ १९३ ॥

भक्तोत्तमास्ते विज्ञेयास्तान् दिव्यायतनादिषु ।
चलस्थिरविभागेन लोहैर्वा शिलयाथवा ॥ १९४ ॥

स्वस्ववर्णाश्रमाचारसदृशाकृतिचेष्टितान् ।
बद्धाञ्जलिपुटान् वाथ प्रमाणेनोपलक्षितान् ॥ १९५ ॥

लाञ्छिताश्चक्रशङ्खाभ्या भुजयोर्दक्षिणादितः ।
पद्मविष्टरमध्ये तु स्वासीनान् वाथ सुस्थितान् ॥१९६॥

ऋजुस्थित्या यथाशोभं वैशाखस्थानकेन वा ।
निर्माय च विधानेन प्राङ्गणे मण्डपेऽथवा ॥ १९७ ॥

प्रासादेष्वनुरूपेषु कल्पितेष्वग्रतो विभोः ।
यथावकाश वामे वा दक्षिणे वाथ पश्चिमे ॥ १९८ ॥

स्वस्वमन्त्रैः प्रतिष्ठाप्य विधिवच्छ्रद्धयार्चयेत् ।
शृणु मन्त्रास्तदीयांस्तु स्थापनादिषु कर्मसु ॥ १९९ ॥

प्रधानपुरुषेशात्मतारकब्रह्मणाऽथवा ।
अहं स तारकेणैव सविसर्गेण चान्तिमे ॥ २०० ॥

आद्येन वा द्वितीयेन युक्तया त्रितयेन वा ।
संज्ञया योजनीयास्ते साङ्गयागानत. शृणु ॥ २०१ ॥

ताराद्ययोर्द्वयोरेकं षोढा कृत्वा तदन्तिमे ।
ज्ञानादिहृदयादीनि चतुर्थ्यन्तान्युदीरयेत् ॥ २०२ ॥

प्रणवाधारयुक्तानि प्रागेवाङ्गान्यमूनि वै ।
विन्यस्य संयजेन्नित्यं भक्तान् परमधर्मिण. ॥ २०३ ॥

पारतन्त्र्ये विधिरय भक्ताना संप्रकीर्तित. ।
स्वातन्त्र्ये चाग्रहारादौ विपिने वा नदीतटे ॥ २०४ ॥

सप्राकार विमानं तु यथेष्टतलशोभितम् ।
कल्पयित्वा प्रयत्नेन रथ्याभिश्च परिष्कृतम् ॥ २०५ ॥

देशान्तरगताना वा भगवल्लोकवासिनाम् ।
दृश्यरूपमदृश्य वा देवसारूप्यता गतम् ॥ २०६ ॥

स्थापयित्वा विधानेन प्रासादे मानुषे पदे ।
दिव्यमानुषयोर्वाथ दिव्ये वा मानुषाश्रिते ॥ २०७ ॥

विष्णोर्मन्त्रासनाव्यक्तपद्ममध्यस्थचेतनात् ।
भक्तविम्बहृदम्भोजे चैतन्यमवतार्य च ॥ २०८ ॥

सकलीकृत्य मन्त्रेण साङ्गेनाभ्यर्चयेत् सदा ।
आवाहने विशेषोऽयं जीवता वाप्यजीवताम् ॥ २०९ ॥

सर्वत्राव्यक्तपद्माद्यैरष्टभिर्वा द्विरष्टभि. ।
भोगै. प्रागुदितै. स्फीतैस्ताम्बूलान्तैरनुक्रमात् ॥२१०॥

तत्तज्जन्मदिने कार्य तेषा वैशेषिकार्चनम् ।
कृत्वा पद्मध्वजारोह कार्यस्तत्र महोत्सव. ॥ २११ ॥

देवेन सह कर्तव्य. परतन्त्रोत्सवे ध्वज. ।
भक्तप्रणीता गाथाश्च श्रुत्यन्तार्थोपबृंहिताः ॥ २१२ ॥

श्रावयेद्विधिवद्देवं भक्त्या गीतिपुरस्सरम् ।
तन्निवेदितमन्नाद्य गायकेभ्य. प्रदापयेत् ॥ २१३ ॥

इति ते वेनतेयादिपरिवारगणस्य च ।
पूजन सर्वमाख्यातं नानासिद्धिफलप्रदम् ॥ २१४ ॥

गोपनीयं प्रयत्नेन नास्तिकाना विशेषत. ।
प्रकाशयस्व भक्तानां नित्यकर्मरतात्मनाम् ॥ २१५ ॥

इति श्रीपाञ्चरात्र पारमेश्वरसंहिताया क्रियाकाण्डे गरुडविष्वक्सेनादिपरिवारार्चनविधान नामाष्टमोऽध्याय समाप्त ॥

॥ श्री ॥

नवमोऽध्यायः ॥

शाण्डिल्य —

एवं कालत्रये कुर्यात् पूजनं मन्त्रवित्तमः ।
न च कालत्रयान्न्यूनं पूजन विहितं सदा ॥ १ ॥

प्रासादेषु स्वयं व्यक्तपूर्वेषु द्विजसत्तम ! ।
कालत्रयं प्रधानं स्यात्तदूर्ध्वं कर्तुरिच्छया ॥ २ ॥

विभवापेक्षया चैव वर्धयेत यथाक्रमम् ।
यावद्द्वादशमः कालस्तावद्वै मुनिपुङ्गव ! ॥ ३ ॥

श्रेष्ठः प्रभातकालः स्यात् त्रिषु कालेषु वै पुनः ।
यथावन्मन्त्रविन्यासमात्मन. करदेहयो. ॥ ४ ॥

हृद्याग स्थानसंशुद्धि सायामां भौतिकीं तत. ।
नित्यं प्राभातिके कुर्यादन्यत्रेच्छानुरूपत. ॥ ५ ॥

स्नपनं बलिदानं च कुर्यात् कालत्रये सदा ।
मूर्तेरासनपूजा तु कार्या कालचतुष्टये ॥ ६ ॥

पञ्चकाले भवेन्न्यास. षट्काले हवनक्रिया ।
अत ऊर्ध्वेषु कालेषु जपान्तं पूजनं भवेत् ॥ ७ ॥

अलङ्कारासनाद्य च पूर्ववत् क्रमयोगत. ।
विनोक्तेन प्रकारेण ह्यन्यथा न समाचरेत् ॥ ८ ॥

मुख्यकल्पे तु होमान्ता नित्यनैमित्तिकात्मका ।
पूजा क्रमेण वै कुर्यात् तत्तद्धोमावसानिकाः ॥ ९ ॥

अनुकल्पे तु जप्यान्त यागानन्तरितेषु वै ।
यागेषु हवनान्तेषु नित्यनैमित्तिकादिषु ॥ १० ॥

तत्तद्याग जपान्त च क्रमात् कृत्वा तत परम् ।
तत्तद्धोमान् मुनिश्रेष्ठ ! क्रमात् कुर्याद्यथाविधि ॥ ११ ॥

अनुकल्पेषु यागेषु ह्युपकालोदितेषु वे ।
आसनार्घ्ये तत पाद्यमाचाम सप्रतिग्रहम् ॥ १२ ॥

गन्ध माल्य तथा दीप धूपं माता क्रमेण तु ।
दत्वा भोज्यावसान तु क्रमाद्दद्याद्विधानत ॥ १३ ॥

अथ द्वादशकालादि यावत् कालत्रय द्विज ! ।
नाडिकाना विभागं तु क्रमेणैवावधारय ॥ १४ ॥

ब्राह्मान्मुहूर्तादारभ्य सपादं घटिकाद्वयम् ।
निर्वर्त्य नित्यकर्म प्राक् स्नानपूर्व यथाविधि ॥ १५ ॥

सपादैकोत्तरा नाड्यो दश प्राभातिकेऽर्चने ।
ततो नाडीचतुष्क तु भवेद्यागद्वयस्य तु ॥ १६ ॥

ततस्त्वर्धोत्तरा नाड्यस्तिस्र स्युस्त्वाह्निकस्य तु ।
पश्चादर्धोत्तरा सप्त नाड्यो मध्यन्दिनार्चने ॥ १७ ॥

भूयस्तु घटिकायुग्म यागस्य द्विजसत्तम ! ।
ततोऽपराह्णयागस्य भवेत्तु घटिकात्रयम् ॥ १८ ॥

स्वाध्यायस्य भवेत् कालस्ततस्तु घटिकाद्वयम् ।
अर्धोत्तरा भवेन्नाडी स्वस्य सायन्तनी क्रिया ॥ १९ ॥

तत प्रदोषयागस्य सार्धा. सप्त च नाडिका. ।
ततो यागद्वयं कुर्याद्घटिकाना चतुष्टये ॥ २० ॥

पश्चान्निशीथयागस्य भवेद्वै नाडिकात्रयम् ।
भूयस्तु पूजनं विप्र ! कुर्याद्वै घटिकाद्वये ॥ २१ ॥

ततस्तु प्रत्युषो याग सार्ध स्यान्नाडिकाद्वयम् ।
योगपूर्व तु विश्रामश्चतस्रो नाडिकास्तत ॥ २२ ॥

यत्र द्वादशकालेज्या तत्रायं कालनिर्णय ।
यत्रैकादशकालेज्या तत्राय क्रम उच्यते ॥ २३ ॥

निशीथयजनादूर्ध्वं प्रत्युष. पूजनं भवेत् ।
यद्वा प्रादोषिकादूर्ध्वं कालमेकं विलोपयेत् ॥ २४ ॥

विश्रामस्य भवेत् कालो नाडीना षटकमेव च ।
यदा तु दशकालेषु पूजनं विहितं तदा ॥ २५ ॥

मध्याह्नपूजनादूर्ध्वमपराह्णार्चनं भवेत् ।
तथा मध्याह्नपूजाया सार्धास्तु नव नाडिका ॥ २६ ॥

यत्र कालेषु नवसु पूजन विहित तदा ।
निशीथपूजनात् पूर्वमेक याग तु लोपयेत् ॥ २७ ॥

दश नाड्योऽर्धहीना स्युस्तदा प्रादोषिकेऽर्चने ।
यत्र कालाष्टके यागा विहिता द्विजसत्तम ! ॥ २८ ॥

तदा प्राभातिकादूर्ध्वमेकं याग विलोपयेत् ।
तदा प्राभातिके यागे साशा नाड्यस्त्रयोदश ॥ २९ ॥

यजन सप्तकालेषु यदा स्याद्द्विजसत्तम ! ।
प्रदोषश्च निशीथश्च प्रत्यूषश्च तथा निशि ॥ ३० ॥

निशीथस्य भवेत् कालश्चतस्रो नाडिकास्तदा ।
अर्धहीनाश्चतस्रस्तु घटिकाश्चरमस्य तु ॥ ३१ ॥

यत्र वै कालषट्के तु पूजन विहित तदा ।
पूर्वमध्यापराह्णास्तु दिवाकालास्त्रय स्मृता ॥ ३२ ॥

स्वस्य प्राभातकृत्यस्य साशं नाडीत्रय तदा ।
सार्धाश्चतस्रो नाड्यस्तु स्वस्य मध्यन्दिनस्य तु ॥ ३३ ॥

प्रातराद्या निशीथान्ता पञ्चकाला उदाहृता ।
तदा शिष्टास्तु घटिका योगविश्रामयो. स्मृता. ॥३४॥

एतेऽपराह्णरहिताश्चतुष्काला प्रकीर्तिता. ।
पञ्चकं घटिकाना तु स्वाध्यायस्य भवेत्तदा ॥ ३५ ॥

प्रातर्मध्यन्दिन साय त्रय. काला यथाक्रमम् ।
तदानीमवशिष्टास्तु घटिका. स्वस्य कर्मण ॥ ३६ ॥

अनुकल्पे तु काल. स्यादेको माध्यन्दिनोऽथवा ।
माध्यन्दिनश्च नैशश्च द्वौ कालौ शक्तितो द्विज ! ॥३७॥

यत्रावरणबाहुल्यं तथा च बलिविस्तर. ।
भगवद्यागविस्तारो महता विभवेन तु ॥ ३८ ॥

निशीथयजनारम्भो नाडीषोडशकं न च ।
यामत्रय तदन्यस्तु न च नैमित्तिकादिकम् ॥ ६९ ॥

उक्तं कालमतिक्रामेत् प्रमादाद्यद्यतिक्रमेत् ।
देशक्षोभादिदोष. स्यात् पूर्वोक्तत्रितयस्य च ॥ ७० ॥

पञ्चकालपरैर्विप्रै कल्पितेऽपि निबोध मे ।
प्रागिज्योपक्रमो नाडीपञ्चकं न व्यतिक्रमेत् ॥ ७१ ॥

न च माध्यन्दिनारम्भो नाडिकाना तु विशतिम् ।
न च सायन्तनारम्भो नाडीषट्कमतिक्रमेत् ॥ ७२ ॥

नातिक्रमेन्निशीथेज्या नाड्य सप्तोत्तरा दश ।
चतुर्विंशतिमन्तेज्या नाडीना न ह्यतिक्रमेत् ॥ ७३ ॥

न च नैमित्तिकाद्यस्य प्राप्तकालव्यतिक्रम ।
एवमुक्त तु नियमं येन केनाप्यतिक्रमेत् ॥ ७४ ॥

स्थानभ्रशादिदोष स्याद्देशिकादित्रयस्य च ।
ऋषिभि कल्पिते स्थाने विशेषमवधारय ॥ ७५ ॥

नातिक्रमेत् प्रागिज्याया नाडीषट्कमुपक्रम ।
माध्यन्दिनसमारम्भो न च नाड्येकविंशतिम् ॥ ७६ ॥

सायमिज्यासमारम्भो नाडीना न च सप्तकम् ।
नातिक्रामेन्निशीथेज्या नाड्यष्टादशकं द्विज ! ॥ ७७ ॥

नातिक्रामेत् पश्चिमेज्या नाडिकापञ्चपञ्चकम् ।
अतिक्रमेच्चेत् कर्तु. स्यात् क्षयव्याधिप्रपीडनम् ॥ ७८ ॥

तद्देशे स्यादनावृष्टि. स्थानस्य च महद्भयम् ।
कल्पिते मन्त्रसिद्धैस्तु स्थाने समवधारय ॥ ७९ ॥

आरम्भ. प्रातरिज्याया प्रहर न ह्यतिक्रमेत् ।
एकविंशतिक सार्ध मध्याह्नो न व्यतिक्रमेत् ॥ ८० ॥

नातिक्रमेत्तु प्रहरं साय याग उपक्रम ।
निशीथयागो नाडीना न च त्वेकोनविंशतिम् ॥ ८१ ॥

षड्विंशतिमतिक्रामेन्न च पश्चिमपूजनम् ।
अतिक्रमेच्चेद्वै कर्तुः पुत्रहानिर्भविष्यति ॥ ८२ ॥

स्थाने द्रव्यविनाशः स्याद्राष्ट्रस्य व्याधिपीडनम् ।
दिव्यस्थानेऽथ वक्ष्यामि प्रागिज्याया उपक्रम ॥ ८३ ॥

अष्टक न त्वतिक्रामेन्नाडीनां द्विजसत्तम ! ।
द्वाविंशति न मध्याह्नो न च सायन्तनोऽष्टकम् ॥ ८४ ॥

विंशतिं न निशीथेज्या सप्तविंशतिमन्तिमः ।
नातिक्रामेन्मुनिश्रेष्ठ ! प्रमादाद्यद्यतिक्रमेत् ॥ ७५ ॥

देशाधिपस्य पीडा स्याज्ज्वरादिव्याधिभि. सदा ।
स्थाने धान्यादिनाशः स्यात्तत्तद्देशनिवासिनाम् ॥८६॥

अथ स्थाने स्वयं व्यक्ते शृणु कालविधि द्विज ! ।
प्रथमेज्यासमारम्भो घटिकादशकं न च ॥ ८७ ॥

अतिक्रामेन्न मध्याह्नो नाडीना पञ्चविंशतिम् ।
सायमिज्यासमारम्भो दशकं न ह्यतिक्रमेत् ॥ ८८ ॥

द्वाविंशति निशीथेज्या नातिक्रामेत पश्चिम ।
आदित्योदयवेला तु नातिक्रामेत् कदाचन ॥ ८९ ॥

प्रमादाद्बुद्धिपूर्वाद्वा अतिक्रामेद्यदि द्विज ! ।
अरातिभि. परिभवो महाव्याध्यादिपीडनम् ॥ ९० ॥

सदा देशाधिपस्य स्यात् प्रजाना व्याधिपीडनम् ।
तत्स्थानस्य न सम्पत्तिस्तद्देशे वृष्टिवर्जनम् ॥ ९१ ॥

नित्यनैमित्तिकं कर्म नक्षत्रादिनिमित्तकम् ।
तत्तत्कर्मोदित कालं नातिक्रामेत्तु मानुषे ॥ ९२ ॥

आर्षादिके तु त्रितये पूर्वभागोदितं तु यत् ।
तत् कुर्यात्तदतिक्रान्तौ भागे तु तदनन्तरे ॥ ९३ ॥

तत्कालातिक्रमे दोषो नित्यातिक्रान्तिवद्भवेत् ।
अपराशोदितं कर्म तत्रैव तु समाचरेत्॥ ९४ ॥

पूर्वाह्णे विहितं कर्म मध्याह्ने तु समाचरेत् ।
मध्याह्ने विहितं यत्तदपराह्णे समाचरेत् ॥ ९५ ॥

पूर्वरात्रोदित कर्म मध्यरात्रे समाचरेत् ।
मध्यरात्रोदितं यत्तत् कुर्यादपररात्रिके ॥ ९६ ॥

स्वयं व्यक्ते तु पूर्वाशविहितं स्यात्तु मध्यमे ।
पश्चिमे वापि तत्रोक्त पूर्वे वा मध्यमेऽपि वा ॥ ९७ ॥

आचरेदनुकल्पे तु पूर्वाह्णविहित तु यत् ।
तत् कुर्यादथ मध्याह्णे अपराह्णेऽथवा द्विज ! ॥ ९८ ॥

पूर्वरात्रोदित कुर्यान्मध्ये वा पश्चिमेऽपि वा ।
ऋक्षाणा पूर्वभागे तु ऋक्षकर्म समाचरेत् ॥ ९९ ॥

तिथीनां पश्चिमे भागे तिथिकर्म समाचरेत् ।
नक्षत्रभेदे चाधिक्ये तिथिभेदे तदन्तिमे ॥ १०० ॥

तत्रापि चेदमावास्या सङ्गवात् परतो भवेत् ।
तस्मिन् कुर्यात्तु तत् कर्म तत् स्यात् पूर्वेद्युरन्यथा ॥

अतीते भगवद्यागमाचरेदुत्तरायणे ।
पश्चात् षोडशनाडीनामन्तरे होमपश्चिमम् ॥ १०२ ॥

स्नपनाद्यं मुनिश्रेष्ठ ! चैत्रे च विषुवे तथा ।
प्रागेव भगवद्यागमाचरेद्दक्षिणायने ॥ १०३ ॥

स्नपनाद्यं तु होमान्तं नाडीषोडशकान्तरे ।
अनुकल्पे तु तत् कुर्यात् पश्चात् षोडशकान्तरे ॥१०४॥

एवमाश्वयुजे मासि विषुवेऽपि समाचरेत् ।
उत्तरायणवत् कुर्यात् तत्सङ्क्रान्तिचतुष्टये ॥ १०५ ॥

यल्लग्नहेतुकं कर्म यन्मुहूर्तनिमित्तकम् ।
तत् सशेष समापाद्य प्रायेण विभवेन तु ॥ १०६ ॥

तस्मिन् प्राप्ते शुभे काले शश्वच्छेष समापयेत् ।
अर्घ्याद्यैर्देवमिष्ट्वा तु अग्नौ पूर्णाहुतिं ददेत् ॥ १०७ ॥

नैमित्तिकं दिवोक्तं तु दिवैव तु समापयेत् ।
नैमित्तिक निशोक्तं तु निश्येव तु समापयेत् ॥ १०८ ॥

यस्मिन् यस्मिन्नहोरात्रे विहितं कर्म यद्द्विज ! ।
समापयेत् तत्तस्मिन् यत्नतोऽवश्यमेव हि ॥ १०९ ॥

महोत्सव. सदाकाल विहितं न त्वतिक्रमेत् ।
निशोत्सवस्य काल. स्यात्तपनस्योदयावधि ॥ ११० ॥

काल. स्यात्तीर्थयात्रायां विशन्नाड्यन्तरे दिवा ।
मनुष्यनिर्मिते स्थाने मुख्यकल्पे द्विजोत्तम ! ॥ १११ ॥

अनुकल्पे तु तत्कालो यावदस्तमयावधि ।
स्वयं व्याक्तादिके स्थाने दिवा स्यान्मुख्यकल्पके ॥

अनुकल्पे निशाया तु पूर्वार्धावधिको भवेत् ।
मुख्यकल्पेऽपि रात्रौ वा ह्ययनादेस्तु संभवे ॥ ११३ ॥

मर्त्यप्रतिष्ठिते स्थाने पवित्रारोहणस्य तु ।
काल स्याद्दह्नि विप्रेन्द्र ! नाडीविंशतिकान्तरे ॥

स्वयं व्यक्तादिके स्थाने यावदस्तमयावधि ।
रात्रौ तु भूषणारोप न कदाचित् समाचरेत् ॥ ११५ ॥

चन्द्रसूर्योपरागे च तत्कालात् पूर्वमेव तु ।
चतुस्स्थानस्थितस्यापि स्थानद्वयगतस्य वा ॥ ११६ ॥

देवस्य यजनं कृत्वा होमान्तं स्नपनादिकम् ।
औपचारिकसास्पर्शे प्रभूतैर्हृदयङ्गमै ॥ ११७ ॥

पयोघृतादिभि. सम्यक् सविशेषैर्महामते ! ।
ततोऽक्षसूत्रमादाय तावत् कुर्याज्जपं सुधी ॥ ११८ ॥

यावद्राहुविमुक्तस्य चन्द्रादेर्दर्शनं भवेत् ।
पूजाहोमजपादीना फलानन्त्यमवाप्नुयात् ॥ ११९ ॥

अन्यथा विफल कर्म कर्तुर्व्याध्यादिपीडनम् ।
अतोऽप्यन्यदनित्यं यन्नैमित्तिकमुदाहृतम् ॥ १२० ॥

पुण्यकालवशेनैव तत्राप्येवं समाचरेत् ।
काम्यानि सर्वकर्माणि तत्तत्काले समाचरेत् ॥ १२१ ॥

अन्यथा तानि कर्माणि न सिध्यन्त्यचिरेण तु ।
स्वयंव्यक्तादिके तानि सर्वदैव समाचरेत् ॥ १२२ ॥

प्रायश्चित्त तु वै कुर्यात् सञ्जाते तन्निमित्तके ।
तदैव वाथ कर्मान्ते त्रिदिनाभ्यन्तरे तु वा ॥ १२३ ॥

तद्गुरुत्वानुगुण्येन पञ्चसप्तदिनान्तरे ।
तदारम्भ. समाप्तिर्वा ह्यन्यथा द्विगुणं चरेत् ॥ १२४ ॥

प्रायश्चित्त तु वै कुर्यात् स्वयव्यक्तादिके स्थले ।
स्वयंव्यक्तादिके स्थानचतुष्केऽपि महामते ! ॥ १२५ ॥

प्राकारगोपुरादीनामारम्भ स्थापनं तथा ।
तथा च कर्मबिम्बाना स्थापनं च विशेषत. ॥ १२६ ॥

जीर्णोद्धारविधानं च पुन. संस्थापन तथा ।
अङ्कुरारोपणं चैव ध्वजारोहावरोहणे ॥ १२७ ॥

सुमुहूर्ते सुनक्षत्रे सुलग्नेऽपि समाचरेत् ।
दोषः स्यात्तदतिक्रान्तौ तच्छान्तिं च समाचरेत् ॥

द्वादशी तु कलामात्रा त्रयोदश्या समाचरेत् ।
कर्मावसाने शयनं प्रबोध पुनरेव हि ॥ १२९ ॥

पवित्रारोहणाद्येषु विविधेषु तु कर्मसु ।
मुहूर्तातिक्रमे दोषो न भवेत्तु कदाचन ॥ १३० ॥

यत्र तु व्यापकैर्मन्त्रैरनन्यैरधिकारिभि ।
दिव्यशास्त्रोक्तमार्गेण पूजन क्रियते विभो. ॥ १३१ ॥

तत्र स्यात् कालनियमो दिव्यस्थानोक्तमार्गत ।
एतेषा द्वितय यत्र तत्र कालस्तु सैद्धवत् ॥ १३२ ॥

यत्र त्रयाणामेकं स्यात् तत्रार्षस्थानवद्भवेत् ।
पुरोदितेषु स्थानेषु सर्वेष्वपि यथाक्रमम् ॥ १३३ ॥

य उक्त. कालनियमो नियताद्येषु कर्मसु ।
मुख्यानुकल्पभेदेन द्विविधस्तदतिक्रमे ॥ १३४ ॥

तद्दोषशान्ति वै कृत्वा तानि कुर्यादनन्तरे ।
काले यथा क्रमहानिर्न कदाचित्तु जायते ॥ १३५ ॥

तथा क्रमेण वै कुर्यात्तानि कर्माणि सर्वदा ।
नित्यनैमित्तिके प्राप्ते ह्येकस्मिन् समये तदा ॥ १३६ ॥

पूर्व नैमित्तिक कृत्वा पश्चान्नित्य समाचरेत् ।
नैमित्तिके ह्यनित्ये च नित्ये च युगपद्गते ॥ १३७ ॥

प्रागनित्य तत पश्चान्नित्यनैमित्तिक चरेत् ।
नैमित्तिके च काम्ये च प्राप्ते काम्यं तु पूर्वत ॥ १३८ ॥

एतेष्वपि च सर्वेषु प्रायश्चित्ताख्यकर्मणि ।
एककाले तु संप्राप्ते प्रायश्चित्तं तु पूर्वत ॥ १३९ ॥

समाप्य पश्चाद्वे कुर्यात् तानि कर्माणि सर्वदा ।
यदा नैमित्तिकाद्यं तु विभवाद्यैस्तु विस्तृतम् ॥ १४० ॥

तदा तात्कलिकं नित्यं तत्कालात् प्राक् समाचरेत् ।
कालातिक्रमदोषस्तु तत्र न स्यात् कदाचन ॥ १४१ ॥

देशिका बहवो यत्र बहवः परिचारकाः ।
तत्तत्कर्मार्थविम्बानि संभवन्ति बहूनि च ॥ १४२ ॥

तत्र सर्वाणि कर्माणि ह्येकदैव समाचरेत् ।
कालातिक्रमदोषस्तु विद्यते तत्र पूर्ववत् ॥ १४३ ॥

वक्ष्यन्ते देशिका ऊर्ध्व स्वयंव्यक्तादिषु द्विज ! ।
इदानी मूर्तिभेदेषु लक्ष्यन्ते देशिका शृणु ॥ १४४ ॥

परात्परस्वरूपस्य परस्य च विभो सदा ।
आचार्यान् शास्त्रविहिताश्चतुर. परिकल्पयेत् ॥१४५॥

अष्टौ द्वादश वा कल्प्या व्यूहे मूर्त्यन्तरेऽपि च ।
वैभवेष्वपि मूर्तेषु देशिकेन्द्रास्तथैव हि ॥ १४६ ॥

साधकाश्चैवमेव स्यु सदा षोडश वा द्विज ! ।
विभवेषु स्वतन्त्रेषु साधका द्वादशैव वा ॥ १४७॥

अवतारेषु दशसु स्वतन्त्रेषु महामते ! ।
प्रासादे स्थापितेष्वेषु कल्प्या वाराधका दश ॥१४८॥

यथोक्ताचारसंयुक्तास्तथाप्यधिकसंख्यका ।
तत्रैतत् कल्पनं श्रेष्ठमन्यत्र तदनर्थकम् ॥ १४९ ॥

न तु केवल एवैते दशकल्प्य कदाचन ।
परात्परादिषु सदा दश संख्या न कल्पयेत् ॥ १५० ॥

अस्वतन्त्रेऽवतारेऽपि दशसंख्या न कल्पयेत् ।
परिचारकसंख्या तु वक्ष्याम्युपरि विस्तरात् ॥ १५१ ॥

इति स्वार्थाविरोधेन परार्थाधिकृतस्य तु ।
एकायनस्य विदुष प्रोक्ता काला. क्रमेण तु ॥ १५२ ॥

तथा वै दीक्षितस्यापि सिद्धान्तरतचेतस ।
इदानीं कर्मणि स्वार्थे तयोर्निरतयो. सदा ॥ १५३ ॥

नित्यानां कालभेद तु समाकर्णय साम्प्रतम् ।
अथाभिगमनाद्यास्तु पञ्चकाला. प्रकीर्तिता. ॥ १५४ ॥

पूर्वोऽभिगमनाख्य. स्यादुपादानाभिसंज्ञित. ।
द्वितीयस्तु भवेत् काल इज्याकालस्तृतीयक ॥ १५५ ॥

स्वाध्ययाख्यश्चतुर्थ स्यात् पञ्चमो योगसंज्ञित. ।
कालाना प्रविभाग तु पृष्ट. पुष्करजन्मना ॥ १५६ ॥

नारदनापि भेदेन प्रोवाच भगवान् स्वयम् ।
स एव क्रमशो विप्र ! प्रोच्यतेऽत्र पृथग्द्विज ! ॥१५७॥

पौष्कर —
ज्ञातुमिच्छामि भगवन् ! कालभेदेन वै सह ।

स्वरूपं मन्त्रसिद्धान्ताद्यागमाना यथास्थितम् ॥१५८॥

श्रीभगवानुवाच—

कालमेकं द्विजश्रेष्ठ ! तद्व्यापारवशात् पुन ।
भिन्नमाभाति कर्तृणा भगवद्भाविना तु वै ॥ १५९ ॥

नाडिकाकलितं यद्वै अहोरात्रं तु संस्मृतम् ।
पञ्चधा विषमाशैस्तदाप्रभाताद्विभज्य च ॥ १६० ॥

ब्राह्म मुहूर्तमासाद्य मन्त्रज्ञ प्रयत शुचि ।
शोधयित्वा स्वकं देहमायामाद्यैर्यथोदितै ॥ १६१ ॥

मन्त्रविन्यस्तदेहोऽथ कुर्यान्मन्त्रार्चन तत ।
जपस्तोत्रावसानं च यावदादित्यदर्शनम् ॥ १६२ ॥

कुर्याद्भोगार्चनं पश्चात् पुष्पमूलफलादिकम् ।
गते दिनाष्टमे भागे स्नानपूर्व समाचरेत् ॥ १६३ ॥

प्राग्वदाराधनं मान्त्र तृतीयप्रहरावधि ।
ततश्चतुर्थे प्रहरे शास्त्राध्ययनमाचरेत् ॥ १६४ ॥

चिन्तन श्रवणोपेतं व्याख्यानं स्वधियेच्छया ।
अस्त गते दिनकरे आसाद्याराधनालयम् ॥ १६५ ॥

कुर्यान्मन्त्रार्चन सम्यग्जपध्यानसमन्वितम् ।
आसाद्य शयनं पश्चात् संरेन्मन्त्रेश्वरं हृदि ॥ १६६ ॥

क्षपयित्वा निशाशं तु उत्थाय शयनात्तत ।
योगं युञ्जीत वै मान्त्र प्राग्वद्धृत्कमलोदरे ॥ १६७ ॥

तल्पमासाद्य वै भूय प्रबुद्ध. कमलोद्भव ! ।
उत्थाय शयन त्यक्त्वा तत. पूर्वोक्तमाचरेत् ॥ १६८ ॥

कालभेदमिम विद्धि सप्रपञ्चं पुरोदितम् ।

नारद —

एको हि श्रूयते देव ! कालो लोके न चापर ॥ १६९ ॥

पञ्चकालास्त्वयोद्दिष्टा. किमेतन्मेऽत्र संशय. ।

श्रीभगवानुवाच —

एकस्यैव हि कालस्य भेदशून्यस्य नारद ! ॥ १७० ॥

आप्रभाताच्चिशान्तं वै पञ्चधा परिकल्पना ।
पृथक्कर्मवशात् कार्या न काला बहव स्मृता. ॥१७१ ॥

नारद —

एककालाश्रितानां च कर्मणा लक्षण वद ।
परिज्ञातैस्तु यै सम्यक् कृतकृत्यो भवाम्यहम् ॥१७२॥

श्रीभगवानुवाच—

ब्राह्मान्मुहूर्तादारभ्य प्रागशं विप्र ! वासरे ।
जपध्यानार्चनस्तोत्रै. कर्मवाक्चित्तसंयुतै. ॥ १७३ ॥

अभिगच्छेज्जगद्योनि तच्चाभिगमनं स्मृतम् ।
तत पुष्पफलादीनामुत्थायार्जनमाचरेत् ॥ १७४ ॥

भगवद्यागनिष्पत्तिकारणं प्रहर परम् ।
तदुपादानसंज्ञं वै कर्मकालपदाश्रितम् ॥ १७५ ॥

ततोऽष्टाङ्गेन योगेन पूजयेत् परमेश्वरम् ।
साधक प्रहरं विप्र ! इज्याकालस्तु स स्मृत ॥१७६॥

श्रवणं चिन्तनं व्याख्या तत पाठसमन्वित ।
स्वाध्यायसज्ञ तं विद्धि कालाश मुनिसत्तम ! ॥ १७७ ॥

दिनावसाने सम्प्राप्ते पूजा कृत्वा समभ्यसेत् ।
योग निशावसाने च विश्रमैरन्तरीकृतम् ॥ १७८ ॥

पञ्चमो योगसज्ञोऽसौ कालाशो ब्रह्मसिद्धिद ।

नारद —

श्रुतो मयाखिल पूर्व भगवद्यागमुत्तम ॥ १७९ ॥

तस्याङ्गानि विभागेन ज्ञातुमिच्छाम्यहं पुन ।

श्रीभगवानुवाच —

अन्त करणयागादि यावदात्मनिवेदनम् ॥ १८० ॥

तदाद्यमङ्ग यागस्य नाम्नाभिगमन महत् ।
पूजनं चार्घ्यपुष्पाद्यैर्भोगैर्यदखिल मुने ! ॥ १८१ ॥

बाह्योपचारैस्तद्विद्धि भोगसंज्ञ तु नारद ! ।
मन्त्राज्याक्तेन दध्ना च पूजा च पशुना च या ॥१८२॥

तत् तृतीय हि यागाङ्ग तुर्यमन्त्रेन पूजनम् ।
निवेदितस्य यद्दान पूर्वोक्तविधिना मुने ! ॥ १८३ ॥

सम्प्रदानं तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् ।
वह्निसन्तर्पणं षष्ठं पितृयागस्तु सप्तमः ॥१८४ ॥

प्राणाग्निहवनं नाम्ना त्वनुयागस्तदष्टमम् ।
इत्येतत् कथितं सर्वं यत् त्वया परिचोदितम् ॥१८५॥

प्रदद्यादचिराद्यद्वै तन्निष्ठाना स्वकं पदम् ।
इति प्रोक्तं क्रमेणैव कर्मभेदेन वै सह ॥ १८६ ॥

पञ्चकालविभागं तु द्वयोरप्यधिकारिणो ।
तत्रायं हि विशेष स्यात् सत्यसकल्पयाजिन ॥१८७॥

चातुरात्म्यैकनिष्ठस्य मूलधर्मैकचेतस ।
आयामन्यासपूर्वं तु विघ्नजिद्यजनान्तिमम् ॥ १८८ ॥

इहोदितं यत् तत् सर्वं वर्जनीयं प्रयत्नतः ।
आत्मनोऽभीष्टसिध्यर्थं सात्त्वताद्युक्तमार्गतः ॥ १८९ ॥

पूजने दीक्षितस्यापि शिष्यस्याधिकृतेऽपि च ।
तस्यापि विहितं सर्वमायामाद्यं पुरोदितम् ॥ १९० ॥

इति सम्यक् समाख्यात. कालभेदो मया तव ।
यज्ज्ञानात् सकल कर्म कर्तुं युज्येत सत्तम. ॥ १९१ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहितायां क्रियाकाण्डे द्वादशकालार्चनकालविभागनिर्णयो नाम नवमोऽध्याय ॥

श्री

दशमोऽध्यायः ॥

सनक —

पूर्वं तु भगवद्यागवेलायामुक्तमर्चनम् ।
प्रासादावयवस्थाना लोकादीना समासत ॥ १ ॥

तेषा स्वरूप नामानि स्थानान्यपि विशेषत. ।
विस्तराच्छ्रोतुमिच्छामि प्रब्रूहि वदता वर ! ॥ २ ॥

शाण्डिल्य —

अनेकभेदभिन्नेषु प्रासादेषु महामते ! ।
विस्तरेण समस्तेषु वृत्तायतपुरस्सरम् ॥ ३ ॥

वक्ष्ये लोकाध्वतत्वाना देवताना च सस्थितिम् ।
सविरोध्य च भूलोकं पादक्षितितलेऽखिलम् ॥ ४ ॥

एवं प्रासादपीठेषु भुवर्लोकं यथास्थितम् ।
स्मरेज्जङ्घावधिर्यावत् स्वर्लोकं तत्तदूर्ध्वगम् ॥ ५ ॥

आरभ्य प्रस्तरोद्देशात् महच्छिखरभूमिगम् ।
जनोलोक च तद्वेद्या तप.सज्ञ तदण्डकम् ॥ ६ ॥

सत्यसंज्ञ च यल्लोकं तच्छिखाया तु संस्मरेत् ।
भावयेच्च पुरा व्याप्तिमेवं वै सप्तलौकिकीम् ॥ ७ ॥

ततश्चाध्वमयी व्याप्ति भावयेत्तु यथाक्रमम् ।
कुम्भाधारोपलान्तस्थमध्वषट्कं स्मरन् यजेत् ॥ ८ ॥

वीजभूतं तदन्तस्थामध्वव्याप्तिमनुस्मरेत् ।
वीजतश्चाङ्कुरीभूता परस्ताद्व्यक्तिमेति सा ॥ ९ ॥

प्रासादपीठपर्यन्त कुम्भाधारोपलात्तु वै ।
भुवनाध्वा यथावस्थो भावनीयस्तु सर्वत ॥ १० ॥

गर्भोच्छ्रायावधिर्यावत् पदाध्वान विलोकयेत् ।
मन्त्राध्वा शुकनासान्त तत्त्वाध्वा वेदिकावधि ॥११॥

कलाध्वा तु गलान्त च वर्णाध्वा च तदूर्ध्वत ।
एवं कृत्वाध्वकीं व्याप्ति ततस्तत्वानि विन्यसेत् ॥१२॥

सयोज्य पार्थिवं तत्वं पादक्षितितले द्विज ! ।
तोयतत्व न्यसेत् पीठे जङ्घाया तैजसं स्मरेत् ॥१३॥

ग्रीवोद्देशावधिर्यावद्वायुतत्वं तदूर्ध्वतः ।
आकाशं शिखरस्थ स्यात्तदुद्देशात् क्रमेण तु ॥ १४ ॥

न्यसेच्छब्दादितन्त्रमात्रं यावत् पादतलान्तिमम् ।
पार्श्वतो नासिके श्रोत्रे त्वक् सुधा समुदाहृता ॥१५॥

गवाक्षे चक्षुषी स्यातां जिह्वा भद्राख्यवेदिका ।
घ्राणस्तु शुकनासा स्यादास्यं द्वारमुदाहृतम् ॥ १६ ॥

विज्ञेयाः पाणय. स्तम्भाः पादा. पादशिला घटा ।
पायु. स्याज्जलनिर्याणमुपस्थं तु तदन्तरम् ॥ १७ ॥

मनोऽन्तर्व्योमविज्ञेय गर्वो ब्रह्मशिलागत ।
बुद्धिस्तु पिण्डिका ज्ञेया प्रकृति. स्यात्तदन्तरम् ॥१८॥

पञ्चविंशतमो ज्ञेय प्रतिमा पुरुष पर ।
एवं न्यस्तेषु तत्वेषु न्यस्तव्या देवता क्रमात् ॥ १९ ॥

घटाधारोपलस्याधस्त्वनन्तो नाम नागराट् ।
सहस्रसंख्यासंख्यातफणामण्डलमण्डित· ॥ २० ॥

तदूर्ध्वं संस्थितं चक्र सहस्रारोपशोभितम् ।
या शिला कलशाधारसंज्ञा ता विद्धि सर्वगा ॥ २१ ॥

सामर्थ्यशक्ति. सामान्या निष्कला पारमेश्वरी ।
तदूर्ध्वसंस्थिता कुम्भा नव सख्यास्तु ये द्विज ! ॥

तेषा विदिक्स्थिताना च चतुर्णा मध्यतो न्यसेत् ।
पद्मासनगता लक्ष्मी निधिभि परिवारिताम् ॥ २३ ॥

चतुर्णामपि चान्येषा रत्नराट् कौस्तुभाभिध ।
स्वमन्त्रेण स्वनाम्ना च निधिनाथै समन्वित ॥ २४ ॥

भगवान् सर्वशक्त्यात्मा एकस्मिन् परिचिन्तयेत् ।
षडक्षरेण मन्त्रेण निष्कलं शब्दविग्रहम् ॥ २५ ॥

तत्र मध्यमकुम्भस्य पिधाने मध्यतो न्यसेत् ।
शक्तिर्वा या परा देवी विश्वसन्धारणक्षमा ॥ २६ ॥

प्रभा सर्वेश्वरी दिक्षु ज्ञानशक्ति. स्मृता च सा ।
विदिग्व्यक्तिसमूहे च स्मरेदानन्दलक्षणा ॥ २७ ॥

क्रियाख्या याऽऽच्युती शक्ति. शुद्धवर्गस्य जन्मदा ।
पिधाननवके त्वस्मिन्नामध्यादीशगोचरम् ॥ २८ ॥

स्मर्तव्याः सर्वतो व्याप्ता क्रमेणैव महामते ! ।
ज्ञानभासा निवसती तथाऽनन्तबला प्रभा ॥ २९ ॥

सर्वगा ब्रह्मवदना द्योतकी सत्यविक्रमा ।
संपूर्णा चेति कथिता. शक्तयो विश्वधारिका. ॥ ३० ॥

शक्त्यष्टकं तु न्यस्तव्य तद्बहिर्दिग्विदिक्षु च ।
प्रागादीशानदिङ्निष्ठं क्रमेणैव शिलाष्टके ॥ ३१ ॥

बलधीर्यवती नित्या अनन्ताख्या स्थिरा ध्रुवा ।
सत्याख्या धृतिसंज्ञा च स्थितिर्नाम्ना द्विजाष्टमी ॥

शिलानामन्तरे भूमौ षट्क षट्कं क्रमेण तु ।
न्यस्तव्य पूर्ववर्णाच्च वर्णानां सावसानकम् ॥ ३३ ॥

क्षार्णन चिन्तयेद्व्याप्ति तद्बहिश्चाङ्गुलीयकम् ।
ततो मसूरकाधारे धर्माद्य यद्द्विरष्टकम् ॥ ३४ ॥

तदूर्ध्वं कोणदेशेषु यदा पद्मचतुष्टयम् ।
कल्पित तु तदा विप्र ! कमलोपरि संस्थिता ॥ ३५ ॥

मूर्तयो वासुदेवाद्या पावकादीशपश्चिमम् ।
अथोपानतलोद्देशे चक्र कालानलप्रभम् ॥ ३६ ॥

अधिष्ठानप्रदेशे तु पद्म धामत्रयाश्रितम् ।
सर्वाभि शक्तिभिर्युक्तस्तन्मध्ये चिन्मय. पुमान् ॥

पीठस्य दिक्चतुष्के तु पूर्वाद्युत्तरपश्चिमम् ।
अनन्तविहगाम्भोजचक्राख्या. क्रमश स्थिता. ॥ ३८ ॥

ततश्चरणपद्मे तु प्रागादौ दिक्चतुष्टये ।
वासुदेवादय स्थाप्या. पुरुषाद्यास्तु वा क्रमात् ॥३९॥

सर्वाधारत्रय चक्रं शाखामूल समाश्रितम् ।
ज्ञानक्रियात्मके तत्वे शाखयोर्युगले स्थिते ॥ ४० ॥

परमेश्वर आद्यस्तु द्वारस्योर्ध्व उदुम्बरे ।
सस्थित सर्वतो व्यापी तत्पृष्ठे मध्यदेशत ॥ ४१ ॥

चतुष्पात सकलो धर्म स्थित सत्ववतां वर. ।
यदा कवाटौ द्वारस्य कल्पितौ द्विजसत्तम ! ॥ ४२ ॥

कालवैश्वानरो देवो ह्यपा पतिरुभाविमौ ।
दक्षिणोत्तरयोगेन कवाटपरिसंस्थितौ ॥ ४३ ॥

कल्पितौ शुकनासौ वा यदा साङ्गौ महामते ! ।
इच्छाप्राणौ तयो. स्थाप्यावग्नीषोमौ गवाक्षयो ॥४४॥

ततो जङ्घाद्विपटके तु तथैवान्तरभूमिषु ।
कालो वियन्नियन्ता च शास्त्रं नानाङ्गलक्षणम् ॥ ४५ ॥

विद्याधिपतयश्चैव सरुद्र सगण. शिव. ।
प्रजापतिसमूहस्तु इन्द्र सपरिवारक ॥ ४६ ॥

मुनय सप्तपूर्वेऽन्ये ग्रहास्तारादिकैर्वृता. ।
जीमूताश्चाखिला नागा अप्सरोगण उत्तम. ॥ ४७ ॥

औपन्यश्चैव पशवो यज्ञाः साङ्गाखिलास्तु ये ।
विद्याश्चैवापरा विद्या पावकश्चैवमारुत ॥ ४८ ॥

चन्द्रार्कौ वारिवसुधे इत्येते देवतागणाः ।
चतुर्विंशतिसंख्याता ध्यातव्यास्तु यथाक्रमम् ॥ ४९ ॥

मूर्तय केशवाद्यास्तु जङ्घाग्रपरिसंस्थिताः ।
पार्श्वयोः शुकनासाया भित्तिमूलसमाश्रितम् ॥ ५० ॥

गणेश योगनिद्रा च न्यसेद्वा दक्षिणादित ।
तदूर्ध्वं प्रस्तरोद्देशकपोततलसंस्थितम् ॥ ५१ ॥

नासिकानवकं यच्च यास्तदन्तरभूमय ।
तस्मिंस्तासु च सर्वासु ह्येते स्थाप्या क्रमेण तु ॥

चक्रशङ्खौ गदापद्मे लाङ्गलं मुसलं शराः ।
शार्ङ्गं च नन्दकखेटौ तु दण्डः परशुरीतिहा ॥ ५३ ॥

पाशाङ्कुशौ मुद्गरं च वज्रं शक्तिसमन्वितम् ।
प्रासादे चतुरश्रे च चतुरश्रायतेऽपि च ॥ ५४ ॥

गरुडं प्रस्तरस्योर्ध्वं न्यसेत् कोणचतुष्टये ।
तदूर्ध्वं वेदिकाया तु भाव्नीया महामते ! ॥ ५५ ॥

एते पूर्वादियोगेन एकशृङ्गतनुस्ततः ।
देवो वामनदेहस्तु सर्वव्यापी त्रिविक्रमः ॥ ५६ ॥

नरो नारायणश्चैव हरि कृष्णस्तथैव च ।
ज्वलत्परशुवृग्रामो रामश्चान्यो धनुर्धरः ॥ ५७ ॥

वेदविद्भगवान् कल्की पातालशयनः प्रभुः ।
ततो ग्रीवातले ध्येयः कूर्मः पातालधारकः ॥ ५८ ॥

वराहो नारसिंहश्चाप्यमृताहरणस्तु वै ।
श्रीपतिर्दिव्यदेहोऽथ कान्तात्माऽमृतधारकः ॥ ५९ ॥

राहुजित् कालनेमिघ्न पारिजातहरो महान् ।
लोकनाथस्तु शान्तात्मा दत्तात्रेयो महाप्रभुः ॥ ६० ॥

न्यग्रोधशायी भगवानित्येते द्विजसत्तम ! ।
ततस्तु शिखरोद्देशं त्रिधाकृत्य यथासमम् ॥ ६१ ॥

यावत्तु कलशाधारवेदिका द्विजसत्तम ! ।
अधोभागे क्रमाद्ध्येयाः शिष्टा देवास्तु वैभवाः ॥

अनन्तो भगवान् देव शक्त्यात्मा मधुसूदनः ।
विद्याधिदेव कपिलो विश्वरूपो विहङ्गमः ॥ ६३ ॥

क्रोडात्मा वडवावक्त्रो धर्मो वागीश्वरस्तथा ।
देव एकार्णवशय इति ये द्वादश स्मृता ॥ ६४ ॥

ध्रुवस्तु सर्वतो व्यापी तदूर्ध्वपदसंस्थित ।
पद्मनाभस्तदूर्ध्वं तु व्यापकः परितिष्ठति ॥ ६५ ॥

शुकनासामुखे देव पूजनीय परः पुमान् ।
भगवान् जगदाधारो जगदीशः सनातनः ॥ ६६ ॥

वासुदेव पर ब्रह्म जगत्कारणमच्युतः ।
लोकानध्वगण नित्य तत्वाद्यमपि देवताः ॥ ६७ ॥

प्रासादोपरि विन्यस्ता समाक्रम्य च संस्थिता ।
यत्र प्रासाददेहे तु शुकनासा न कल्पिता ॥ ६८ ॥

तत्राग्रतो नासिकाया वासुदेव तु संस्मरेत् ।
नासिकात्रितये शिष्टे अच्युताद्यास्त्रय स्थिताः ॥६९॥

अथवा पुरुषाद्यास्तु नराद्या वा द्विजोत्तम ! ।
वराहाद्यास्तु वा यद्वा धर्ममूर्त्यादय क्रमात् ॥ ७० ॥

यद्वा परशुरामाद्याः स्मर्तव्या क्रमयोगत ।
एते तु शक्तिभि सर्वे युक्ता वा केवलास्तु वा ॥ ७१ ॥

द्रुमैः पल्लवतायुक्तैर्भूषिते वेदिकातले ।
विन्यसेत् षडर चक्र तेजोज्वालासहस्रवृक् ॥ ७२ ॥

तत सामलसारेषु वासुदेवादिकान् स्मरेत् ।
तदग्रदेशे चक्राणि ध्यातव्यानि यथाक्रमम् ॥ ७३ ॥

अमलं शान्तसंज्ञं तु तथा शान्तोदितोदितम् ।
नराद्य कृष्णपर्यन्तं शुकनासाघटे तु वै ॥ ७४ ॥

अन्तर्मण्डलकोणेषु वन्ह्यादीशानपश्चिमम् ।
वराहरूपी भगवान् शेषमूर्तिधर प्रभु ॥ ७५ ॥

नृसिंहरूपी पुरुषस्तथा नारायणो विभु ।
प्रासादाङ्गेषु विप्रेन्द्र ! क्रमान्निगदितेषु च ॥ ७६ ॥

देवताधारभूतेषु यद्यदङ्ग न कल्पितम् ।
यत्र वा तत्तदधिक तत्रापि च समाचरेत् ॥ ७७ ॥

तत्तत्स्थाने स्वबुद्ध्या तु देवतान्यासमूहत. ।
यद्वा ह्यनवकृप्ताङ्गे देवतेष्टि तु वर्जयेत् ॥ ७८ ॥

लोकाः सप्त तथाध्वानस्तत्वसङ्घाश्च देवता ।
ध्यातव्यास्तु निराकारा साधकैर्द्विजसत्तम ! ॥ ७९ ॥

विमानेऽपि तथा सिद्धविबुधैश्च प्रतिष्ठिते ।
किन्तु तत्र विमानाङ्गमूर्तिना लाञ्छनादिकम् ॥ ८० ॥

तासा स्थानानि विप्रेन्द्र ! कल्पितानि यथाविधि ।
विमानावयवाश्चापि संपरीक्ष्यैव यत्नत. ॥ ८१ ॥

पूजयेत् सावधानेन चेतसा ध्यानपूर्वकम् ।
लाञ्छनाद्येषु मूर्तीनां प्रासादावयवेष्वपि ॥ ८२ ॥

अनभिव्यक्तरूपेषु लक्षणाद्ये परीक्षणात् ।
स्वप्नादेश्चापि विप्रेन्द्र ! देशिकेन्द्रोपदेशत. ॥ ८३ ॥

यथावत् सपरीक्षेत प्रयत्नेन द्विजोत्तम ! ।
लक्षणादिषु हीनेषु विपर्यस्तेष्वपि द्विज ! ॥ ८४ ॥

न लक्षणादिकं कुर्यादन्यथा द्विजसत्तम ! ।
लक्षण न परीक्षेत ह्यन्यथाकरणेच्छया ॥ ८५ ॥

अन्यथाकरणार्थं तु लक्षणाद्ये परीक्षिते ।
क्षयत्यायु कृते तस्मिन् लक्षणैर्नरक व्रजेत् ॥ ८६ ॥

तस्मात् सर्वप्रयत्नेन स्वयव्यक्तादिकेऽपि च ।
विमाने संस्थितानां तु मूर्तीना लक्षणादिकम् ॥ ८७ ॥

स्थानान्यपि च तासा वै विमानावयवानपि ।
यथास्थितं परीक्ष्यैव कृत्वा मूर्तिविनिर्णयम् ॥ ८८ ॥

स्वेन स्वेन विशेषेण लाञ्छनाद्येन वै स्फुटम् ।
स्वेन स्वेन तु मन्त्रेण पूजन च समाचरेत् ॥ ८९ ॥

प्रासादेषु स्वयव्यक्तं श्रेष्ठ सर्वेषु सत्तम ! ।
तद्रूपी भगवान् देव. स्वयमेवावतिष्ठते ॥ ९० ॥

तत्र सन्निहित. साक्षाद्भगवान् भक्तवत्सल ।
जाते जीर्णादिदोषेऽपि न त्यजन्ति कदाचन ॥ ९१ ॥

स्वं स्व प्रदेशमेतास्तु मन्त्राणां शक्तय परा. ।
प्रासादान्तः स्थिताश्चापि स्वयंव्यक्तपुरस्सराः ॥ ९२ ॥

आकारास्तु विभो सम्यग्ज्ञेया पूर्वोक्तयोगत ।
नास्त्रैर्मन्त्रैर्ध्वजैर्येषा व्यक्तिर्व्यक्ता जगत्त्रये ॥ ९३ ॥

तेऽपि लाञ्छनवृन्दं तु धारयन्त्यद्रिगोचरे ।
ललाटे चासपट्टे तु पृष्ठे पाणितलद्वये ॥ ९४ ॥

तनूरुहचये मूर्ध्नि, ऋमिणा प्रतिपत्तये ।
तत्तल्लाञ्छनवृन्द तु परीक्ष्यैवं विशेषत. ॥ ९५ ॥

तत्तदाकारनियतैर्वाचकै संप्रपूजयेत् ।
येषा लाञ्छनवृन्द तु न व्यक्तं चरणादिषु ॥ ९६ ॥

तानर्चयेद् द्विषट्कार्णपुरोगाणां महामते ! ।
व्यापकाना तु मन्त्राणामेकेनाभिमतेन तु ॥ ९७ ॥

इति ज्ञात्वा यथावच्च य पूजयति मन्त्रवित् ।
स पूजाफलमाप्नोति ह्यन्यथा विपरीतमाप्नु ॥ ९८ ॥

एतान्युक्तानि सर्वाणि लोकाद्यानि क्रमेण तु ।
समाराधनकालेषु देवस्यामिततेजस ॥ ९९ ॥

द्वारस्थदेवार्चनं कृत्वा पूजयेत्तदनन्तरम् ।
नमस्कारपदान्तेन स्वनाम्ना प्रणवादिना ॥ १०० ॥

अर्घ्यालभनपात्रैश्च धूपेन द्विजसत्तम ! ।
अग्रतो देवदेवस्य द्वारदेशस्य वाह्यत ॥ १०१ ॥

अन्तर्मण्डलदेशे तु गत्वा वा पूजयेत् क्रमात् ।
एवं प्रासादभेदे तु यस्मिन् साधकसत्तमै ॥ १०२ ॥

एककालं द्विकाल वा त्रिकाल वार्चन द्विज ! ।
नित्यश. क्रियते तत्र सदा संन्निहितो विभु ॥ १०३ ॥

अत एव द्विजश्रेष्ठ ! तदर्चनपुरस्सरम् ।
कुर्यादाराधन विष्णो साधक. सिद्धिलालस. ॥१०४॥

य एवं कुरुते भक्त्या ह्यनन्यपरया सदा ।
सोऽचिराल्लभते कामानिह लोके परत्र च ॥ १०५ ॥

मोक्षार्थी कुरुते यस्तु स याति परमं पदम् ।
सनक —

प्रासादाना स्वयव्यक्तपूर्वाणां तु विशेषत. ॥ १०६ ॥

प्रासादं तु स्वयंव्यक्तमत्यर्थं त्वं प्रशंससि ।

कीदृशं तत्स्वरूप स्यादन्येषा वापि कीदृशम् ॥ १०७ ॥
कीदृशी च महत्तास्य ज्ञातुमिच्छामि साम्प्रतम् ।
शाण्डिल्य —
यदिदं दृश्यते विष्णोर्मायया निर्मितं जगत् ॥ १०८ ॥
कालादिबहुभिर्भेदैर्भिन्नं नानास्वरूपकै ।
तदीये प्रभवो ह्यह्नि प्रलयश्च निशागमे ॥ १०९ ॥
दिव्यं युगसहस्र हि तदीय विद्धि वासरम् ।
रात्रिश्च तावती ज्ञेया एवं रात्रिक्षये सति ॥ ११० ॥
प्रवर्तमाने त्वहनि काले सन्ध्याख्यलक्षणे ।
स्वकारणमनुज्झित्य कार्यार्थं मुनिपुङ्गव ! ॥ १११ ॥
ज्ञानयोगप्रभावेन अमेयमहिमावृतम् ।
प्रेरितं नाभिरन्ध्रेण तेन हार्दं कुशेशयम् ॥ ११२ ॥
विज्ञप्तिमात्ररूप तु स्वस्यान्त.करणे स्थितम् ।
सहस्रार्कप्रतीकाशं सहस्रशशिकेसरम् ॥ ११३ ॥
सहस्रवह्निगर्भं च हेमनालं महाप्रभम् ।
तन्मध्ये मानसो ब्रह्मा तेन सृष्टश्चतुर्मुख ॥ ११४ ॥
जगद्विभवकृद्विप्र ! विद्यादेह सनातन. ।
सर्व संस्कारसंपूर्णो वेदवेदाङ्गपारग ॥ ११५ ॥
अणिमाद्यष्टकोपेत सिसृक्षाशक्तिभिर्युत ।
न तस्य विदितश्चासौ यदा यात. सगर्वताम् ॥११६॥
अस्मीति प्रत्यय लब्ध्वा रजसा कलुषीकृत ।
तस्मिंश्चान्तर्हिते तस्य पौष्करस्य मतिस्तदा ॥ ११७ ॥
विपर्यस्ता तत सृष्टौ प्रवृत्तिर्नाभवद्द्विज ! ।
कार्याकार्यविशेषज्ञो नाभूदुद्विग्नचेतन. ॥ ११८ ॥
तत. प्रसन्नचेतास्तु तपस्तेपे सुदुश्चरम् ।
अचिरात् पुण्डरीकाक्ष द्रष्टुकाम. प्रजापति. ॥ ११९ ॥
ततस्तु तप्यमानस्य ब्रह्मणो द्विजसत्तम ! ।
हरे स्तोत्रार्थमुद्भूता बुद्धिर्बुद्धिमतांवर ! ॥ १२० ॥
ततो जगौ परं जप्यं साञ्जलिप्रग्रहो विभु ।
ब्रह्मा —
"नमस्ते ब्रह्महृदय ! नमस्ते ब्रह्मपूर्वज ! ॥ १२१ ॥
योगार्धनयनश्रेष्ठ ! सांख्ययोगनिधे ! विभो ! ।
व्यक्ताव्यक्तकराचिन्त्य ! क्षेम पन्थानमास्थित ! ॥
विश्वभुक् ! सर्वभूतानामन्तरात्मन्नयोनिज ! ।
अहं प्रसादजस्तुभ्यं लोकधाम्ने स्वयम्भुवे ॥ १२३ ॥
त्वत्तो मे मानस जन्म प्रथमं द्विजपूजितम् ।
चाक्षुष यद्द्वितीय मे जन्मेहासीत् पुरातनम् ॥१२४॥
त्वत्प्रसादाच्च मे जन्म तृतीय वाचिकं महत् ।
तत्वत. श्रावणं चापि चतुर्थ जन्म मे विभो ! ॥१२५॥
नासिक्यं वापि मे जन्म त्वत्त पञ्चममुच्यते ।
अण्डजं चापि मे जन्म त्वत्त. षष्ठ विनिर्मितम् ॥१२६॥
इद च सप्तमं जन्म पद्मज त्वमितप्रभ ! ।
सर्गे सर्गे ह्यह पुत्रस्तृतीयगुणवर्जित ! ॥ १२७ ॥
प्रथम पुण्डरीकाक्ष प्रधानगुणकल्पित. ।
त्वमीश्वर ! प्रभावश्च भूताना च प्रभावन ॥ १२८ ॥
त्वं पञ्चकालकर्तृणा गतिस्त्वं पाञ्चरात्रिक ! ।
त्वया हि निर्मितोऽहं वै वेदचक्षुर्वचोऽतिग ! ॥१२९॥
स्रष्टु जगदिदं सर्व चेतनाचेतनात्मकम् ।
का शक्तिर्मम देवेश ! जगत् स्रष्टु जगत्प्रभो ! " ॥१३०॥
एव स्तुत स भगवान् पुरुष. सर्वतोमुख. ।
स्वरूप दर्शयामास तस्मै दिव्यमनुत्तमम् ॥ १३१ ॥
त दृष्ट्वा महता युक्तो हर्षेण कमलासन ! ।
आनन्दाश्रुसमाविष्ट प्रणम्य प्राञ्जलि स्थित ॥ १३२ ॥
ततस्तु पुण्डरीकाक्षस्तमुवाच जगत्पति. ।
"सृज प्रजा. पुत्र ! सर्वा मुखत. पादतस्तथा ॥१३३॥
श्रेयस्तव विधास्यामि बलं तेजश्च सुव्रत ! ।
वेद च मत्तो गृह्णीष्व सात्वतं नाम नामत. ॥ १३४ ॥
तेन सर्व कृतयुग स्थापयस्व यथाविधि ।
प्रजानामपि सर्वासां संवृत्ते सर्गकर्मणि ॥ १३५ ॥
दिव्यस्य महतो धाम्नः साक्षाद्व्यक्तस्य चान्तरे ।

स्वयव्यक्तेन दिव्येन ह्याकारेणामलेन च ॥ १३६ ॥
अनन्तभोगिशयने शयान पङ्कजेक्षण ।
प्रकाशयिष्यति पुरो वासुदेव परात्पर ॥ १३७ ॥
तमाराधय देवेशं विमानाभ्यन्तरस्थितम् ।
सर्वेषामपि लोकाना सृष्टिस्थित्यन्तकारणम् ॥ १३८ ॥
वासुदेवं तु परमं पुमास भक्तवत्सलम् ।
द्वादशाक्षरमन्त्रेण भोगै सास्वर्शिकादिके ॥ १३९ ॥
हृदयङ्गमसत्रैश्च विविधैरौपचारिके ।
स्वाधिकारप्रवृत्यर्थं लोकाना हितकाम्यया ॥ १४० ॥
महोपनिषदाख्येन शास्त्रेणोक्तप्रकारत ।
यत्पौ करस्यया लोके प्रथिमान प्रयास्यति ॥ १४१ ॥
पौष्करस्य तवोक्तत्वात् प्रथित तु तथा भवेत् ।
महाविभूतिरिति च तद्वक्ष्याम्यपरे युगे ' ॥ १४२ ॥
अस्मिन्नादौ कृतयुगे समतीते तु मानुषे ।
ततो ब्रह्मा नमश्चक्रे देवाय हरिमेधसे ॥ १४३ ॥
ब्रह्मा चाग्र्य स जग्राह सनिषत्सहितान्वितम् ।
कर्मारम्भादिभिर्मन्त्रैर्द्विषट्कार्णसमन्वितै ॥ १४४ ॥
दिव्यै. समन्वितं विप्र ! द्वादशाध्यात्मसंयुतम् ।
अनिच्छातोऽधिकारीणा तत्प्राप्त्येकफलप्रदम् ॥ १४५ ॥
चातुरात्म्यैकनिष्ठं च वासुदेवमुखोद्गतम् " ।
एवं स भगवान् देव आद्यं वेदं सनातनम् ॥ १४६ ॥
उपदिश्य ततो विप्र ! ब्रह्मणेऽमिततेजसे ।
दत्वा श्रेयो वलं तेज. सृष्टिकर्मप्रवर्तकम् ॥ १४७ ॥
जगाम तमस.पारं यत्राव्यक्तं व्यवस्थितम् ।
ततोऽथ वरदो देवो ब्रह्मा लोकपितामह. ॥ १४८ ॥
असृजत् स तदा लोकान् कृत्स्नान् स्थावरजङ्गमान् ।
एव सृष्ट्वा जगत् सर्व भूयश्च कमलासन ॥ १४९ ॥
कदा द्रक्ष्याम्यहं देवं लोकाना हितकारिणम् ।
वासुदेवं विमानान्त.शयानं पीतवाससम् ॥ १५० ॥
इति चिन्तासमाविष्टस्तपस्तेपे सुदुश्चरम् ।
प्रादुरासीत् ततो दिव्यं विमानं परमाद्भुतम् ॥१५१॥
प्रकाशयद्दिश सर्वा प्रकाशेनामलेन च ।
उपानजगतीयुक्त पीठाङ्घ्रिप्रस्तरादिके ॥ १५२ ॥
ग्रीवाशिखरतत्सस्थवेदीघटशिखान्तिमै. ।
दिव्यैरवयवैर्युक्तं दिव्यालङ्कारशोभितम् ॥ १५३ ॥
वृत्तायतं तु परित शुकनासापरिष्कृतम् ।
त दृष्ट्वा महदाश्चर्यमानन्दाश्रुपरिप्लुत ॥ १५४ ॥
पुलकाचितसर्वाङ्ग प्रीतिविस्फारितेक्षण ।
ससम्भ्रमं समुत्थाय प्रणम्य प्राञ्जलि. स्थित ॥ १५५ ॥
पीठादिषु शिखान्तेषु विमानाग्र्यवेषु च ।
भूराद्य सत्यपर्यन्त लोकाना सप्तक क्रमात् ॥ १५६ ॥
अध्वना भुवनाध्वादिषट्कं वर्णाध्वपश्चिमम् ।
धरादिपुरुषान्त च तत्वबृन्द द्विजोत्तम ! ॥ १५७ ॥
सत्ताम्बरूपमास्थाय सस्थितं सन्ददर्श ह ।
ततस्तु देवतावृन्दं क्रमेण समलोकयत् ॥ १५८ ॥
पीठस्याधारभागे तु ह्यनन्तो नाम नागराट ।
चक्र सामर्थ्यशक्त्यादिशक्तिसङ्घं तथैव च ॥ १५९ ॥
ज्ञानभासादिकाना तु शक्तीनामष्टकं तथा ।
वलवीर्यवती पूर्वमष्टक स्थितिपश्चिमम् ॥ १६० ॥
अकारादि क्षकारान्त वर्णचक्र द्विजोत्तम ! ।
ततः पीठप्रदेशाच्च धर्माद्य च द्विरष्टकम् ॥ १६१ ॥
चक्र कालानलज्योति. पद्मं धामत्रयाश्रितम् ।
चिन्मय. पुरुषो मध्ये सर्वाभि शक्तिभिर्युतः ॥ १६२ ॥
दिक्चतुष्के ह्यनन्ताद्य ततश्चरणवर्गके ।
वासुदेवादिकं दिक्षु शाखामूले सुदर्शनम् ॥ १६३ ॥
ज्ञानक्रियात्मके तत्वे शाखयो. परमेश्वरम् ।
आद्य तूदुम्बरे ह्यूर्ध्वे तत्पृष्ठे धर्म एव च ॥ १६४ ॥
कवाटयोस्तु कालाग्नि वरुण तु ततो द्विज ! ।
स्तम्भयोः शुकनासाया इच्छाप्राणौ गवाक्षयोः ॥१६५॥
अग्नीषोमौ ततो जङ्घा द्विषट्केऽन्तरभूमिषु ।

कालादिवसुधान्त च जङ्घाग्रे केशवादिकम् ॥१६६॥
नासिकाना तु नवके कपोतस्थेऽन्तरेऽपि च ।
चक्राद्यायुधसघात सत्तारूपेण संस्थितम् ॥ १६७ ॥
शुकनासामुखे देव वासुदेवं जगत्पतिम् ।
नासिकात्रितये शिष्टे ह्यच्युताद्य क्रमात् स्थितम् ॥
सशक्तिकं तु पत्राद्यैर्भूषिते वेदिकातले ।
सुदर्शन तु षडरं घटाना तु चतुष्टये ॥ १६९ ॥
वासुदेवादिकान् विप्र ! रथाङ्गाना तदग्रत. ।
अमलाद्य चतुष्क तु क्रमेणोदितपश्चिमम् ॥ १७० ॥
अध्यक्षाद्यादिमूर्त्यन्त शुकनासाघटेषु वै ।
सर्वलोकमयं विप्र ! सकलाम्बमयं तथा ॥ १७१ ॥
सर्वतत्वमय चैव सर्वदेवमय तथा ।
इति क्रमेण सन्दृश्य विमान हृष्टचेतन. ॥ १७२ ॥
तत. प्रदक्षिणीकृत्य चतुर्धा प्रणिपत्य च ।
सर्वाङ्गैर्दण्डवद्भूमौ भक्त्या तु पुरुषोत्तमम् ॥ १७३ ॥
तत. कृतार्थमात्मान मन्यमान. प्रविश्य च ।
अभ्यन्तरं विमानस्य गर्भभूमौ तु मध्यत. ॥ १७४ ॥
आत्मप्रमाणरचिते मृदुस्पर्शे मनोहरे ।
शुद्धस्फटिकसकाशे दीप्यमानेऽतिभास्वरे ॥ १७५ ॥
फणामण्डलमध्यस्थैर्मणिभिर्दीपिते तथा ।
अनन्तभोगशयने शयानं पीतवाससम् ॥ १७६ ॥
निष्केवलेन सत्वेन सपन्नं रुचिरप्रभम् ।
वपुषा सुन्दरेणैव दिव्येनाविकृतेन च ॥ १७७ ॥
मुञ्चन्तमनिशं देहादालोकं ज्ञानलक्षणम् ।
प्रयत्नेन विनाऽज्ञाननाशकृद्ध्यायिना महत् ॥ १७८ ॥
स्रग्वस्त्राभरणैर्युक्तं स्वानुरूपैरनूपमै. ।
चिन्मयै. स्वप्रकाशैश्च अन्योन्यरुचिरञ्जितै ॥ १७९ ॥
दन्तज्योत्स्नावितानैस्तु प्रकटीकृतदिङ्मुखम् ।
रेखोत्थितैश्च कल्हारै. पादपद्मतलेऽङ्कितम् ॥ १८० ॥
निमग्नजनसन्तापशमनव्यापृताननम् ।
करुणापूर्णहृदयं जगदुद्धरणोद्यतम् ॥ १८१ ॥
स्वदेहतेज.संभूतज्वालामण्डलमध्यगम् ।
घनकुञ्चितनीलालि गलिताञ्जनसन्निभै. ॥ १८२ ॥
कर्पूरध्रूसरैर्दिव्यै पुष्पसंवलितान्तरै. ।
किरीटमकुटाक्रान्तै शोभितं सुशिरोरुहै ॥ १८३ ॥
ईषदारक्तगोक्षीरशुद्धनीलाब्जलोचनम् ।
शीतलैर्दृष्टिपातैस्तु जगदाप्यायकारणम् ॥ १८४ ॥
सुभ्रूललाट सुनसं सुस्मिताधरविद्रुमम् ।
सौन्दर्यचन्द्रसंकाशविलसद्गण्डमण्डलम् ॥ १८५ ॥
पूर्वकर्मानलार्ताना ध्यायिना खेदशान्तये ।
स्वदन्तेन्दुचयोत्थेन ह्लादयन् गोगणेन तु ॥ १८६ ॥
मुखसौन्दर्यनिष्यन्दचिबुकस्थलशोभितम् ।
सविलासस्मिताधार बिभ्राण मुखपङ्कजम् ॥ १८७ ॥
कम्बुग्रीवं महाबाहु श्रीवत्साङ्कितवक्षसम् ।
सिंहस्कन्धं विशालाक्ष दीर्घबाहुं महोरसम् ॥ १८८ ॥
शङ्खचक्राङ्कितारक्तकरद्वयविभूषितम् ।
दक्षिणं भोगिभोगाभमुपधाय महाभुजम् ॥ १८९ ॥
प्रसारितोत्तरकरं कटिदेशस्य पार्श्वत. ।
कौस्तुभेनाङ्कितोरस्क लक्ष्मीभूषितवक्षसम् ॥ १९० ॥
आब्रह्मस्तम्बपर्यन्तजगद्ग्रासतनूदरम् ।
ईषत्कुञ्चितवामाङ्घ्रिपङ्कजं पङ्कजेक्षणम् ॥ १९१ ॥
प्रसार्य दक्षिण पादमीषदुत्तानशायिनम् ।
अनेकरत्नखचितकिरीटमकुटोज्ज्वलम् ॥ १९२ ॥
उद्यदादित्यसंकाशैर्विचित्रैर्मणिसचयैः ।
विराजमानया सम्यक् स्फुरच्चूलिकयोज्ज्वलम् ॥
रत्नावतसप्रभया दीप्तश्रवणशेखरम् ।
ललाटान्तसमालम्बि बालालङ्कारभूषितम् ॥ १९४ ॥
ललाटतिलकेनैव सुन्दरेण विराजितम् ।
अनेकरविसङ्काशलसन्मकरकुण्डलम् ॥ १९५ ॥
प्रभूतमणिमुक्ताढ्यग्रैवेयकविराजितम् ।

वज्रवैडूर्यमाणिक्यपद्मरागादिशोभितै.॥ १९६ ॥
हारैरनेकैर्विविधैरुपशोभितवक्षसम् ।
उद्यदादित्यसंकाशकौस्तुभेन विराजितम् ॥ १९७ ॥
भ्राजयन्त्या जगत् सर्वं स्वतेजोभिर्निरन्तरम् ।
मालया वैजयन्त्या च भ्राजमानमहोरसम् ॥ १९८ ॥
नानारत्नविचित्रेण मुक्तादामविलम्बिना ।
स्फुरता ब्रह्मसूत्रेण काञ्चनेन सुशोभितम् ॥ १९९ ॥
द्युतिमद्भिर्महारत्नै राचितेन सुवर्चसा ।
काञ्चनेनायसूत्रेण उदरे कृतबन्धनम् ॥ २०० ॥
नानामाणिक्यविलसत्कटिसूत्रेण शोभितम् ।
अनेकरत्नसन्दर्भरशनादाममण्डितम् ॥ २०१ ॥
अनेककोटिमार्ताण्डविलसत्पीतवाससम् ।
अनेकरत्नसभिन्नन्नूपुरादि विभूषितम् ॥ २०२ ॥
एवमन्यैश्च विविधै. केयूरकटकादिकै ।
यथार्हैर्भूषणै रम्यैर्ज्वलद्भि परिभूषितम् ॥ २०३ ॥
प्रावृड्जलदसकाशं भिन्नाञ्जनचयप्रभम् ।
अभिन्नपूर्णषाड्गुण्यविभवेनोपबृंहितम् ॥ २०४ ॥
योगिध्येयमज नित्यं जगज्जन्मादिकारणम् ।
अनादिनिधन देव साक्षाल्लक्ष्मीपति प्रभुम् ॥ २०५ ॥
अप्राकृततनु शान्तं वासुदेव परात् परम् ।
जनलोकगतै सिद्धै सनकाद्यैरभिष्टुतम् ॥ २०६ ॥
नेत्राभ्यामनिमेषाभ्या तृषिताभ्या पिबन्निव ।
उदैक्षत प्रहृष्टात्मा प्रणिपत्य मुहुर्मुहु ॥ २०७ ॥
स्तुत्वा च विविधैस्स्तोत्रैर्दैर्पगद्गदया गिरा ।
तदादाय महद्दिव्यं विमानं शिरसा तत ॥ २०८ ॥
जगाम भवनं विप्र ! स्वकीय कमलासन ।
तत्र संपूजयामास द्विषट्कब्रह्मविद्यया ॥ २०९ ॥
महता विभवेनैव ब्रह्मा लोकपितामह ।
अत्रान्तरे तु विप्रेन्द्र ! पौष्करस्य महात्मय. ॥ २१० ॥
जिज्ञासाया तु जातायां शास्त्रे पौष्करसंज्ञके ।
प्रादुर्भूतस्तदा विप्र ! वासुदेवो जगत्पति. ॥ २११ ॥
महोपनिषदं शास्त्रं ग्राहयामास पद्मजम् ।
यो मूलवेदो विख्यातस्तादृक तस्मात् परिसृतम् ॥
सिद्धिमोक्षप्रदं विप्र ! सर्वशास्त्रार्थगर्भितम् ।
नानाव्यूहसमोपेतं मूर्त्यन्तरसमन्वितम् ॥ २१३ ॥
नानाविभवसंयुक्तं प्रादुर्भावान्तरान्वितम्।
लक्ष्म्यादिशङ्खचक्राद्यगारत्न सदिगीश्वरै. ॥ २१४ ॥
सगणैरस्त्रनिष्टैस्तु सपूर्ण द्विजसत्तम ! ।
वीजै पिण्डात्मकैश्चैव पदै संज्ञामयैर्द्विज ! ॥ २१५ ॥
मन्त्रव्यूहैस्तु विविधैर्यन्त्रैश्च विविधैर्युतम् ।
तत्वसंख्यासमाख्यातैर्मण्डलैर्भद्रकादिभि ॥ २१६ ॥
तथा चतुर्दशव्यूहैरनेकजगर्भितै ।
षड्विंशैरकैर्युक्तैश्चक्राब्जेनवभिस्तथा ॥ २१७ ॥
ध्वरकादिसहस्रसारपर्यन्तैश्च सकारणै ।
तथाष्टादशभिर्विप्र ! मिश्रचक्राभिधानकै ॥ २१८ ॥
आवार्यावरकेणैव रूपेण परिसस्थितै ।
महाख्यनवनाभेन विश्वमेदस्थितेन च ॥ २१९ ॥
घण्टास्रुवक स्रुवपूर्वैस्तु क्रियाङ्गैर्विविधैरपि ।
नानालक्षणसंयुक्तै कुण्डैश्च परिभूषितम् ॥ २२० ॥
वत्सरोत्सवपर्यन्ते स्थापनाद्यैश्च कर्मभि ।
नित्यैर्नैमित्तिकै काम्यै परिपूर्ण द्विजोत्तम ! ॥ २२१ ॥
स्वयव्यक्तादिभेदोत्थै प्रासादैश्च समन्वितम् ।
तस्याधिकारवृत्त्यर्थं लोकाना हितकाम्यया ॥ २२२ ॥
ततस्तदुक्तमार्गेण विविधैर्भोगसञ्चयै ।
नित्यैर्नैमित्तिकै काम्यैर्विविधैश्च महोत्सवै. ॥ २२३ ॥
तत्र प्रतिदिन कुर्वन् पूजा लोकपितामह ।
व्यापारान् जगता चक्र विविधान् लोकपूजित. ॥
ततो मन्वन्तरे विप्र ! प्राप्ते वैवस्वताभिधे ।
इक्ष्वाकुर्नामनृपति सूर्यवंशसमुद्भव ॥ २२५ ॥
महात्मा सततं योगी सर्वभूतहिते रतः ।

द्रष्टुकाम प्रसन्नात्मा वासुदेव जगत्पतिम् ॥ २२६ ॥
तापसं वेषमास्थाय तपश्चर्तुं गतो वनम् ।
प्रविश्य तु तपस्तेपे शाकमूलफलाशन ॥ २२७ ॥
ग्रीष्मे पञ्चाग्निमध्यस्थो नयन् कालं महातपा ।
वार्षिके तु निरालम्बो हेमन्ते तु सरोजले ॥ २२८ ॥
इन्द्रियाणि समस्तानि नियम्य हृदये पुन. ।
मनो विष्णौ समाविश्य मन्त्रं वै द्वादशाक्षरम् ॥ २२९ ॥
जपतो वायुभक्षस्य तस्य राज्ञो महात्मन. ।
आविर्बभूव भगवान् ब्रह्मा लोकपितामह ॥ २३० ॥
तमागतमथालोक्य पद्मयोनिं चतुर्मुखम् ।
प्रणम्य भक्तिभावेन स्तुत्या च परितोषयन् ॥ २३१ ॥
' नमो हिरण्यगर्भाय, जगत्स्रष्टे महात्मने ।
वेदशास्त्रार्थविदुषे, चतुर्वक्त्राय ते नम " ॥ २३२ ॥
इति स्तुतो जगत्स्रष्टा ब्रह्मा प्राह नृपोत्तमम् ।
तपस्यभिरतं शान्तं त्यक्तराज्यमहासुखम् ॥ २३३ ॥
" लोकप्रकाशको राजन् सूर्यस्तव पितामह ।
वसूनामपि सर्वेषां सदा मान्यो मनु पिता ॥ २३४ ॥
कृतवन्तौ तप पूर्वं तीव्रं पितृपितामहौ ।
तावतीत्य तपस्तेऽद्य वर्तते निस्पृहस्य वै ॥ २३५ ॥
किमर्थं राज्यभोगं तु त्यक्त्वा सर्वं नृपोत्तम ! ।
तप करोषि घोरं त्वमाचक्ष्व च महामते ! " ॥ २३६ ॥
इत्युक्तो ब्रह्मणा राजा तं प्रणम्याब्रवीद्वच. ।
" द्रष्टुमिच्छस्तपश्चर्यावलेन मधुसूदनम् ॥ २३७ ॥
करोम्यत तपो ब्रह्मन् ! शङ्खचक्रगदाधरम् " ।
इत्युक्त प्राह राजानं पद्मजन्मा हसन्निव ॥ २३८ ॥
" न शक्यस्तपसा राजन् द्रष्टुं नारायणो विभु ।
मादृशैश्च न दृश्योऽज. केशव क्लेशनाशन. ॥ २३९ ॥
त्वादृशै. किं पुनस्त्वीशो माधवस्त्विति भावय ।
पुरातनीं पुण्यकथां कथयामि निबोध मे ॥ २४० ॥
अहं पुरा महाराज ! वासुदेव सनातनम् ।
द्रष्टुकाम प्रजासर्गे तपश्चर्यां सुदारुणाम् ॥ २४१ ॥
अकार्षं तपसश्चान्ते भगवान् भक्तवत्सल ।
प्रसन्न प्रादुरासीन्मे पश्यत. पद्मलोचन ॥ २४२ ॥
प्रणम्य पुण्डरीकाक्षमस्तौषं विविधै. स्तवै ।
तत्र श्रेयो बल तेजो दत्वा स्रष्टु जगद्विभु ॥ २४३ ॥
अथोपदिष्टवान् मह्यमार्यं वेदं सनातनम् ।
सदागमाख्य मूल तु परब्रह्मप्रकाशकम् ॥ २४४ ॥
दिव्य सिद्धिप्रद चैव शान्तिकृद्विश्वकर्मिणाम् ।
सर्गस्योत्तरकाले तु विमाने दिव्यलक्षणे ॥ २४५ ॥
अनन्तभोगशयने शयान पद्मलोचन. ।
प्रादुर्भविष्यति पुरस्तं पूजय विशेषत ॥ २४६ ॥
द्वादशार्णेन मन्त्रेण पौष्करेणोक्तमार्गत ।
वक्ष्यमाणेन विधिना यथावत् कमलोद्भव ! ॥ २४७ ॥
इत्युक्त्वान्तर्दधे देव परमात्मा जगत्प्रभु ।
प्रादुरासीत्ततो दिव्यं विमानं परमाद्भुतम् ॥ २४८ ॥
शास्त्र चापि मया लब्धं महोपनिषदाख्यकम् ।
तत्रस्थ देवदेवेश वासुदेव जगत्पतिम् ॥ २४९ ॥
पूजयामि विधानेन तदुक्तेन नृपोत्तम ! ।
तदह ते प्रयच्छामि केशवानन्दमन्दिरम् ॥ २५० ॥
विसृज्येदं तपो घोरं पुरं व्रज निज नृप ! ।
प्रजाना पालन धर्मस्तपश्चैव महीभृत. ॥ २५१ ॥
विमान प्रेषयिष्यामि दिव. सिद्धं नृपोत्तम ! ।
संयुक्त पञ्चकालज्ञै. सद्ब्रह्मनिरतैर्द्विजैः ॥ २५२ ॥
तदाराधय देवेश बाह्यान्तरखिलै शुभै. ।
वासुदेवमनन्ताहौ शयान पुरुषोत्तमम् ॥ २५३ ॥
द्विषट्कार्णेन मन्त्रेण पौष्करोक्तविधानतः ।
क्रतुभिर्विविधैश्चैव यजन् देव नृपोत्तम ! ॥ २५४ ॥
निष्कामो नृपशार्दूल ! प्रजा धर्मेण पालय ।
प्रसादाद्वासुदेवस्य मुक्तिस्ते भविता नृप ! " ॥ २५५ ॥
इत्युक्त्वा पौष्करं शास्त्रमुपदिश्य यथाक्रमम् ।

तस्मै तु भूमिपालाय विधातान्तरभूत् पुन ॥ २५६ ॥

इक्ष्वाकुश्चिन्तयन्नास्ते पद्मयोनेर्वचो द्विज ! ।
आविर्बभूव पुरतो विमानं तन्महीभृतः ॥ २५७ ॥

ब्रह्मदत्त द्विजयुत माधवानन्तयोः शुभम् ।
तं दृष्ट्वा परया भक्त्या नत्वा च पुरुषोत्तमम् ॥ २५८ ॥

ऋषीन् प्रणम्य वृद्धाश्च तदादाय ययौ पुरम् ।
पौरैर्जनैश्च नारीभिर्दृष्टं शोभासमन्वितै ॥ २५९ ॥

लाजानि विक्षिपद्भिश्च ततो राजा स्वकं गृहम् ।
स्वमन्दिरे विशाले तु विमान वैष्णवं शुभम् ॥ २६० ॥

संस्थाप्याराधयामास भवितात्मा नृपोत्तम ! ।
पौष्करोक्तविधानेन तैर्द्विजैरर्चितं हरिम् । २६१ ॥

मानुष्य शोभनादयस्तु दृष्ट्वा तु हरिचन्दनम् ।
माला कृत्वा सुगन्धाढ्या प्रीति तस्य वितेनिरे ॥

पौरा कर्पूरश्रीखण्डकुङ्कुमाद्य ददुस्तथा ।
पुष्पाणि विष्णुयोग्यानि ददुरानीय भूपते ॥ २६३ ॥

तत्तत्कर्मार्थविम्बानि प्रतिष्ठाप्य यथाविधि ।
स्वे स्वे यथोदिते स्थाने सन्निवेश्य सुविस्तृतम् ॥

ततोऽष्टाष्टकसख्यैस्तु भोगै सर्वैरकृत्रिमै ।
प्रधानै. साङ्गभोगैस्तु विविधैरौपचारिके ॥ २६५ ॥

सास्पर्शिकैस्तथा विप्र ! हृदयङ्गमसञ्ज्ञितै ।
अर्चयित्वा जगन्नाथं वासुदेवं परात्परम् ॥ २६६ ॥

त्रिसन्ध्यं परया भक्त्या जप्यै स्तोत्रैश्च वैष्णवैः ।
कारयामास देवस्य सुचिर वत्सरोत्सवम् ॥ २६७ ॥

तथा च वत्सरीयाणि नानानैमित्तिकान्यपि ।
प्रतिष्ठा तत्प्रकारं च स्थानभेद तथैव च ॥ २६८ ॥

उत्सवादिप्रकारं च वक्ष्याम्युपरि विस्तृतम् ।
भोगैश्च तोषयित्वा तं सर्वदेवमय हरिम् ॥ २६९ ॥

निष्कामो दानधर्मैश्च परं ज्ञानमवाप्तवान् ।
यजन् यज्ञान् मही रक्षन् स कुर्वन् केशवार्चनम् ॥

उत्पाद्य पुत्रान् पित्रर्थं चिरात् त्यक्त्वा कलेवरम् ।
व्यायन्निष्कलमपं देव प्राप्तवान् वैष्णव पदम् ॥ २७१ ॥

ततश्चैतत् क्रमाल्लेभे देव सर्वेश्वर. स्वयम् ।
रामो राजीवनयनो भ्रातृभेदैस्त्रिभि. सह ॥ २७२ ॥

निहन्ता राक्षसाना यो मनुष्योऽहमिति स्मरन् ।
दशेन्द्रियानन घोरं यो मनोरजनीचरम् ॥ २७३ ॥

विवेकशरजालेन शम नयति देहिनाम् ।
कृतत्यकृस्तु यो वेत्ति स्वभावं दिव्यमुत्तमम् ॥ २७४ ॥

ददौ विभीषणायाशु प्रियाय प्रियकारिणे ।
शास्त्रोपदेशपूर्वं तु विमान दिव्यलक्षणम् ॥ २७५ ॥

सोऽपि तच्छिरसा गृह्य ययौ देश स्वक प्रति ।
रवौ म यन्त्रिते प्राप्त कावेरतनया तटे ॥ २७६ ॥

चन्द्रपुष्करिणीमध्येऽनन्तपीठेऽवतारयत ।
दक्षाध्वरे च रुद्रेण परिभूतो निशाकर ॥ २७७ ॥

मूर्ध्नि तस्य कृतावासो यत्र तप्त्वा महत्तप ।
यस्मिन्स्तु पुण्डरीकाक्षो देवो वामनरूपधृक् ॥ २७८ ॥

प्राप्तवान्यत्सस्कारं यत्र तु स्वयमेव हि ।
विमानप्रवरं दिव्यं श्रीरङ्गमिति शब्दितम् ॥ २७९ ॥

प्रतिष्ठास्यति चात्रेति विनिश्चित्य जगत्पति ।
गणेश योगनिद्रा च रक्षाहेतो समादिशत् ॥ २८० ॥

तत्रावतार्य तन्मध्ये विमानं तद्विभीषण. ।
तत सपूजयामास तैर्द्विजैरर्चितं हरिम् ॥ २८१ ॥

रमणीयैस्तु विविधैर्भोगै सास्पर्शिकादिकै. ।
तदुद्धर्तुमसौ यत्नमकरोद्बलवानपि ॥ २८२ ॥

न शशाक मनागस्मादेतच्चलयितु तदा ।
अथापतद्धरण्या वै विलपन् स च दु खितः ॥ २८३ ॥

आर्त विभीषणं दृष्ट्वा विलपन्तमनाथवत् ।
उवाच भगवान् रङ्गी स्वरेण महता तदा ॥ २८४ ॥

श्रीभगवानुवाच —

" आर्य ! धर्मज्ञ ! देशोऽयं रमणीयो हि मे मतः ।
अस्मिन्नेव शयानोऽह रंस्ये त्वामभिवीक्ष्य च ॥ २८५ ॥

एतैरेकान्तिभिः सार्धं मदाराधनतत्परैः ।
विभीषणानुजानीहि कुरुष्व च मम प्रियम् ॥ २८६ ॥

एतानाराधकान् विप्रान् पञ्चकालपरायणान् ।
क्षेत्रारामगृहाद्यैस्तु सुसमृद्धान् कुरुष्व च ॥ २८७ ॥

मा भूस्त्व दुर्मना याहि क्षिप्रं लङ्कां निशाचर ! ।
तत्र त्वं सुसमृद्धार्थं श्रियं भुङ्क्ष्वानपायिनीम् ॥

इत्युक्तः सुसमृद्धार्थान् क्षेत्रारामगृहादिभिः ।
कृत्वा चैकायनास्तास्तु पञ्चकालपरायणान् ॥ २८९ ॥

ततस्तु प्रययौ चार्तो लङ्कामेव विभीषणः ।
मर्त्यानां भाग्यवैषम्याद्ब्राह्मणानां हितार्थं च ॥ २९० ॥

दवानां च प्रतिष्ठाय रेमे तत्र नदीतटे ।
रङ्गधामनि रङ्गेशः शयानस्तु द्विजोत्तम ! ॥ २९१ ॥

तद्धामोभयतोऽगच्छत् परिरभ्य सरिद्वरा ।
यथा पतिं चिरं प्राप्तं भुजाभ्यां प्रियमङ्गना ॥ २९२ ॥

दिव्यं ह्येतन्महद्धाम दिव्यास्तत्र निवासिनः ।
दिव्या चेयं नदी तद्वद्दिव्यतीर्थमिदं सरः ॥ २९३ ॥

अनन्तशक्तियुक्तं तद्विमानं हि स्वयम्भवम् ।
किङ्करा विष्णुभूतेशा बलिनः कामरूपिणः ॥ २९४ ॥

ते च रक्षन्ति तं देशं सर्वे ह्यनिमिषेक्षणाः ।
ये निष्य(प)न्दा निराहारा सात्त्विकाश्च वसन्ति ते ॥

प्रव्याहरन्तो मधुरां वाणीं कर्णसुखावहाम् ।
न तत्र वसतां पीडा क्षुत्पिपासायुतस्थिता ॥ २९६ ॥

नाध्यात्मिकादिपीडा वा न जरा नाविवेकिता ।
त्रैकाल्यज्ञानसंपन्नाः सर्वकामविवर्जिताः ॥ २९७ ॥

पदार्थसप्तकज्ञानसंपूर्णा नान्ययाजिनः ।
द्वादशाध्यात्मनिरताः पञ्चकालपरायणाः ॥ २९८ ॥

तमर्चयन्तोऽहरहस्तत्रैव निवसन्ति हि ।
षट्कर्मनिरताश्चापि ब्रह्मण्याहितचेतसः ॥ २९९ ॥

चरन्ति तत्र विमलाः पुरुषाः संशितव्रताः ।
देवासुरमुनीन्द्राद्याः सदा दैवाभिकाङ्क्षिणः ॥ ३०० ॥

वसन्ति तत्र चास्थाय चित्रां स्थावररूपताम् ।
अत्युन्मत्तः प्रशान्तः स्याद्वधिरोऽपि सुबोधवान् ॥

तस्य देशस्य माहात्म्यं सम्यग्ज्ञातुं न शक्यते ।
ब्रह्मणापि मुनिश्रेष्ठ ! किं पुनः खलु मादृशैः ॥ ३०२ ॥

तदेतत् परमं धाम श्रीरङ्गमिति शब्दितम् ।
दिव्यलक्षणसंयुक्तं स्वयव्यक्तमिति श्रुतम् ॥ ३०३ ॥

अत्र सन्निहितः साक्षाद्भगवान् पुरुषोत्तमः ।
भक्तानां पुण्डरीकाक्षः परमात्माऽच्युतो हरिः ॥ ३०४ ॥

विविधेष्वपि चान्येषु नित्यं स्थानेषु यद्यपि ।
वासुदेवस्तु मन्त्रात्मा स्थितः सन्निहितः स्वयम् ॥

तथापि बलवत्त्वेन सन्निधिं भजतेऽत्र वै ।
ग्रीष्मकालं समासाद्य यथार्कस्तीक्ष्णतां व्रजेत् ॥

स्वरूपमजहन्नेव तथैवात्र जगत्पतिः ।
दोषैः स दिग्विभागाद्यैस्त्वन्यथात्वं न याति च ॥ ३०७ ॥

नित्यसन्निधिमाहात्म्यात् कालः कल्पक्षयावधिः ।
उत्तरोत्तरता चैव जगत्यस्मिन् हि वर्तते ॥ ३०८ ॥

भक्त्या कान्त्या च कीर्त्या च क्रियया चाप्रमेयया ।
दुष्टोपशान्तिदा शक्त्या सिद्धिदा या च वै सह ॥

मुक्तिकामाश्च भविनः फलकामाश्च सत्तम ! ।
यथाभिमतसंप्राप्तिमिहैवायान्त्यनश्वरीम् ॥ ३१० ॥

इह कर्मपरा सर्वे सायं प्रातस्तु मध्यतः ।
कुर्वते सर्वकर्माणि विमानाभिमुखाः सदा ॥ ३११ ॥

एवं तु पुष्करक्षेत्रे तोताद्रिशिखरेऽपि च ।
क्ष्माङ्गे पुराणसंज्ञे तु मधुभाण्डाभिधेऽपि च ॥ ३१२ ॥

स्थितः सन्निहितो देवः स्वयंव्यक्तो जगत्पतिः ।
भगवान् पुण्डरीकाक्षो लोकानां हितकाम्यया ॥ ३१३ ॥

देवदेवो जगन्नाथ एवं क्षेत्रेषु केषुचित् ।
स्थापितो विबुधाद्यैस्तु सन्निधत्ते द्विजोत्तम ! ॥ ३१४ ॥

केषुचिन्मनुजेन्द्रैस्तु भक्तिबृंहितमानसैः ।
स्थापितो विधिवद्विप्र ! सन्निधत्ते जगत्पतिः ॥ ३१५ ॥

एव भगवदाकारैर्नानासंस्थानलक्षणै ।
नानाविशेषरूपैश्च नानाकार्यवशेन तु ॥ ३१६ ॥

विश्वमापूरित सर्व सर्वानुग्रहकाम्यया ।
स्वयंव्यक्तं तथासिद्धैर्विबुधैश्च प्रतिष्ठितम् ॥ ३१७ ॥

मुनिमुख्यैस्तु गन्धर्वैर्यक्षैर्विद्याधरैरपि ।
यक्षोभिरसुरैर्मुख्यै स्थापितं मन्त्रविग्रहम् ॥ ३१८ ॥

दिव्यशास्त्रोक्तविधिना पूजयेच्छास्त्रकोविद् ।
स्थापित मनुजैर्देवं मुनिवाक्योक्तमार्गत ॥ ३१९ ॥

पूजयेद् द्विज ! तत्रापि ज्ञानिभिस्तत्त्वदर्शिभि ।
वासुदेवैकनिष्ठैस्तु देवतान्तरवर्जितै ॥ ३२० ॥

व्यामिश्रयागमुक्तैस्तु तीव्रभक्तिसमन्वितै. ।
स्थापितं मनुजेन्द्रैस्तु ह्यनुर्वेदादिकोविदै ॥ ३२१ ॥

अर्चयेद्देवदेवेश दिव्यशास्त्रोक्तवर्त्मना ।
मुनिवाक्योक्तमार्गेण पूजनं यत्र वर्तते ॥ ३२२ ॥

तत्रापि दिव्यमार्गाच्चेत् पूजनं कर्तुमिच्छति ।
मुनिमार्ग परित्यज्य दिव्यमार्गेण पूजयेत् ॥ ३२३ ॥

भवेत् सन्निधिमाहात्म्य काल कल्पक्षयावधि ।
दिव्यमार्गेण पूजाद्य वर्तते यत्र नित्यश ॥ ३२४ ॥

तत्र दिव्य परित्यज्य न कदाचिन्मतामते ! ।
मुनिवाक्योक्तमार्गण कुर्यात् संपूजनादिकम् ॥ ३२५ ॥

कुर्याद्वा यदि संमोहाद्विप्र समूढचेतन ।
सप्रयात्यचिरात्तस्य भक्तिर्बीजेन वै सह ॥ ३२६ ॥

समन्त्रं कर्मतन्त्रं च सिद्धयश्च पराङ्मुखाः ।
इहैव शीघ्रं विप्रेन्द्र ! देहान्ते गतसन्तति ॥ ३२७ ॥

घोर प्रयाति नरक राजा राष्ट्र च नश्यति ।
तस्मात् सर्वप्रयत्नेन दिव्यमार्ग तु न त्यजेत् ॥ ३२८ ॥

तामसेन तु मार्गेण पूजनं यत्र वर्तते ।
तत्रापि राजसेनैव पूजन सिद्धिद भवेत् ॥ ३२९ ॥

राजसेन तु पूजाद्य वर्तते यत्र नित्यश ।
तत्रापि सात्विकेनैव पूजन शुभद राद्रा ॥ ३३० ॥

सात्विकेन तु पूजाद्यं वर्तते यत्र चान्वहम् ।
तत्र राजसमार्गेण न कुर्यात् पूजनादिकम् ॥ ३३१ ॥

यत्र राजसमार्गेण प्रवृत्त त्वर्चनादिकम् ।
तत्र तामसमार्गेण न कुर्यादर्चनादिकम् ॥ ३३२ ॥

विधिना राजसानामन्योन्यं स्यात् सकर ।
सर्वत्रपौरुषे वाक्ये तद्ग्राह्यमविरोधि यत् ॥ ३३३ ॥

सनक —

केवल तद्विधानेन न कुर्यात् स्थापनादिकम् ।
दिव्याद्यायतनाना च पूजार्थ यत् त्वयोदितम् ॥३३४॥

शास्त्रं दिव्यादिभेदेन श्रोतुमिच्छामि तत्वत ।
यज्ज्ञात्वा विनिवर्तेय शास्त्रसाङ्कर्यदोषत ॥ ३३५ ॥

शाण्डिल्य —

वासुदेवेन यत् प्रोक्त शास्त्रं भगवता स्वयम् ।
अनुष्टुप्छन्दोबन्धेन समासव्यासभेदत ॥ ३३६ ॥

तथैव ब्रह्मरुद्रेन्द्रप्रमुखैश्च प्रवर्तितम् ।
लोकेष्वपि च दिव्येषु तद्दिव्यं विद्धि सत्तम ! ॥३३७॥

ब्रह्मरुद्रमुखैर्देवै ऋषिभिश्च तपोधने ।
स्वय प्रणीत यच्छास्त्र तद्विद्धि मुनिभाषितम् ॥३३८॥

एवन्तु त्रिविध विद्धि सात्विकादिविभेदत ।
विज्ञाय पुण्डरीकाक्षादर्थजाल यथास्थितम् ॥ ३३९ ॥

तद्बोधक प्रणीत यच्छास्त्र तत् सात्विकं स्मृतम् ।
तस्माज्ज्ञातेऽर्थजाते तु किञ्चित् समवलम्ब्य च ॥

स्वबुद्ध्युन्मीलितस्यैव ह्यर्थजातस्य बोधकम् ।
यत् प्रणीत द्विजश्रेष्ठ ! तथा विज्ञाय तत्वत ॥ ३४१ ॥

ग्रन्थविस्तरसयुक्त शास्त्रं सर्वेश्वरेश्वरात् ।
तत्सक्षेपप्रसादेन स्वविकल्पविजृम्भणै. ॥ ३४२ ॥

ब्रह्मादिभि. प्रणीत यत् तथा तदृषिभिर्द्विज ! ।
ब्रह्मादिभ्य परिश्रुत्य तत् सक्षेपात्मना पुन. ॥ ३४३ ॥

स्वविकल्पात् प्रणीतं यत् तत् सर्व विद्धि राजसम् ।
तत् स्याद् द्वेधा पञ्चरात्रवैखानसविभेदत. ॥ ३४४ ॥

केवलात् स्वविकल्पोक्तै. कृतं यत् तामस तु तम् ।
केवलं मनुजैर्यत्तु कृत तत् पौरुष भवेत् ॥ ३४५ ॥

सनक —

यैर्लिङ्गैर्वदतांश्रेष्ठ ! भगवद्वाक्यपूर्वकम् ।
भेद जानामि तत्वेन तानि विस्तरतो वद ॥ ३४६ ॥

शाण्डिल्य —

यदर्थात्यमसन्दिग्ध स्वच्छमल्पाक्षरं स्थिरम् ।
चातुरात्म्यस्वरूपेण संस्थितस्य विभो सदा ॥ ३४७ ॥

स्वाभाविकं परत्वं तु यत्र यत्र समीरितम् ।
अन्यासा मन्त्रमूर्तीना यत्र चौपाधिक तु यत् ॥३४८॥

तुर्यादिजाग्रत्पर्यन्त पदभेद प्रकाशित ।
भक्तानामनुकम्पार्थं यत्र वै चतुरात्मन ॥ ३४९ ॥

शशीशस्य विभोर्यत्र विभव सप्रकाशित ।
अङ्गलाञ्छनभूषाणा शक्तीना विहरोशितु ॥ ३५० ॥

लयादिभेदभिन्नं तु स्वरूपं यत्र भाषितम् ।
बीजपिण्डपदाद्येन चातुर्विध्येन सत्तम ! ॥ ३५१ ॥

मन्त्राः प्रवर्तिता यत्र यत्र स्थापनकर्मणि ।
अनुक्रेधक्रिया प्रोक्ता यत्र वै नित्यपूजनम् ॥ ३५२ ॥

मूलमूर्तौ तु संपूर्ण प्रोक्त प्राधान्यतो द्विज ! ।
तत्र कर्तुमशक्य यत् स्नानाद्य तावदेव तु ॥ ३५३ ॥

बिम्बान्तरे तदर्थं तु कर्मबिम्बपुरस्सरम् ।
विहितं दर्पणाद्येषु तदभावान्महामते ! ॥ ३५४ ॥

क्ष्माजलानलवाय्वाख्यनाभसीयेन वै द्विज ! ।
धारणापञ्चकेनैव धारणाद्वितयेन च ॥ ३५५ ॥

दहनाप्यायनाख्येन यत्र शुद्धिश्च भौतिकी ।
आगमश्रुतिमूलत्व स्वस्य यद्धयुपपादकम् ॥ ३५६ ॥

तत् पारमेश्वरं वाक्यमाज्ञासिद्ध हि मोक्षदम् ।
एवमादेयवाक्योत्थ आगमो यो महामते ! ॥ ३५७ ॥

सन्मार्गदर्शनं कृत्स्नं विधिवादं च विद्धि तत् ।
तत्प्रामाण्यात्तु यत्किञ्चित् समभ्यूह्य यथार्थत. ॥

पूर्वापराविरोधेन निर्वाह्यमविचारत. ।
सर्वेषा रञ्जकं गूढं निश्चयीकरणाक्षमम् ॥ ३५९ ॥

पारमेश्वरवाक्योक्तमर्थजालं यथास्थितम् ।
प्रत्यभिज्ञापक यद्यत् सात्विक मुनिभाषितम् ॥३६०॥

प्रशंसकं यत् सिद्धीनां सप्रवर्तकमप्यथ ।
मूलमूर्तिमनादृत्य कर्मार्चाया तु पुष्कलम् ॥ ३६१ ॥

नित्यसंपूजनं प्रोक्तं प्राधान्येन तु यत्र वै ।
ब्रह्मरुद्रादिबिम्बाना प्रमाण लक्षणं तथा ॥ ३६२ ॥

स्थापनं यत्र निर्दिष्टं यत्र वै जगता पतेः ।
पूजनं तु समुद्दिष्टं प्राकृताना जडात्मनाम् ॥ ३६३ ॥

तत्वानामपि विप्रेन्द्र ! दिशा कालस्य वाचकै ।
परमेष्ठ्यादिभिर्मन्त्रै. पञ्चभिर्यत वै क्रमात् ॥ ३६४ ॥

स्थापनादिप्रतिष्ठान्त पञ्चकं समुदीरितम् ।
यागपूर्वा हरिस्तोमपर्यन्ता. सप्त कीर्तिता. ॥ ३६५ ॥

यागा यत्र तथा सप्त तत्क्रमादधिकारिण. ।
उक्त यत्र प्रतिष्ठया षोडशन्यालकल्पनम् ॥ ३६६ ॥

एतज्ज्ञानीहि तत् सर्व राजसं मुनिभाषितम् ।
भगवन्तं समुद्दिश्य ह्यङ्गभावं विनैव तु ॥ ३६७ ॥

ब्रह्मरुद्रमुखाना तु विबुधाना तथैव च ।
मातृणामपि दुर्गाया. स्वातन्त्र्येण तु यत्र वै ॥ ३६८ ॥

मन्त्रं ध्यान प्रमाण च लक्षणं स्थापनं तथा ।
निर्दिष्टं तामसं नाम मुनिवाक्यं तु विद्धि तत् ॥३६९॥

अनर्थकमसंबद्धमल्पार्थं शब्दडम्बरम् ।
अनिर्वाहकमाद्योक्तेर्वाक्यं तत् पौरुष स्मृतम् ॥३७०॥

हेयं चानर्थसिद्धीनामाकर नरकावहम् ।
पारमेश्वरवाक्यार्थैर्यद्विरोधि न तद् द्विज ! ॥ ३७१ ॥

संग्राह्यं सात्विकाद्येषु मुनिवाक्येषु यत्नतः ।
यद्विव्यापेक्षितं विप्र ! सग्राह्यमविरोधि तत् ॥ ३७२ ॥

सात्विकादिक्रमात्तेषु समभ्यूह्य महामते ! ।
प्रसिद्धार्थानुपादाय सङ्गतार्थं विलक्षणम् ॥ ३७३ ॥

अपि चेत् पौरुषं वाक्यं ग्राह्यं तन्मुनिवाक्यवत् ।

सनक —

दिव्यपूर्वाणि शास्त्राणि प्रोक्तैरेतैस्तु लिङ्गकैः ॥ ३७४ ॥

लिङ्गितानि द्विजश्रेष्ठ ! व्यक्तनामान्वितानि च ।
कौतूहल हि मे श्रोतुं प्रब्रूहि गणशस्तथा ॥ ३७५ ॥

विज्ञातव्यान्यसंकीर्ण यथा च स्वल्पबुद्धिभि. ।

शाण्डिल्य —

सात्वतं पौष्करं चैव जयाख्यं च तथैव च ॥ ३७६ ॥

एवमादीनि शास्त्राणि दिव्यानीत्यवधारय ।
सहिता चेश्वरस्यापि भरद्वाजस्य संहिता ॥ ३७७ ॥

सौमन्तवी तथा ह्येतत् पारमेश्वरसञ्ज्ञितम् ।
वैहायसी संहिता च शास्त्र चित्रशिखण्डिजम् ॥

तथा जयोत्तर तत्र एवमादीनि तत्वत ।
सात्विकानि विजानीहि मुनिवाक्यानि सत्तम ! ॥

तन्त्रं सनत्कुमारख्यं तथा पद्मोद्भवाभिधम् ।
सत्यापि तेजोद्रविणं मायाद्वैभविकं तथा ॥ ३८० ॥

इत्यादीन्यवगच्छ त्वं राजसान्येव तत्वत ।
पञ्चप्रश्न शुकप्रश्नं तत्वसागरसंहिता ॥ ३८१ ॥

इत्यादीन्यवबुद्ध्यस्व तामसानि विशेषत. ।
पूर्वोक्तलक्षणेनैव ज्ञातव्यं तत्र पौरुषम् ॥ ३८२ ॥

प्रासादाना च शास्त्राणा यथावत् सप्रकाशितम् ।
भेदं दिव्यादिक सम्यग् ज्ञात्वा सर्व समाचरेत् ॥

यो न ज्ञात्वा तु साङ्कर्य यात्) पूजाद्यमनुतिष्ठति ।
स हि सर्वस्य जगत. साङ्कर्य कुरुते सदा ॥ ३८४ ॥

विशेषात् स्वस्य वंशस्य तस्मादापद्यपि द्विज ! ।
न कुर्याच्छास्त्रसाङ्कर्य हितैषी शास्त्रकोविद. ॥ ३८५ ॥

तत् सर्वमुक्त यत् पृष्ट किमन्यत् कथयामि ते ।

इति श्रीपाञ्चरात्रे पारमेश्वरसहिताया क्रियाकाण्डे स्वयव्यक्तादि प्रासाददेवतानिर्णयो नाम दशमोऽध्याय समाप्त ॥

श्री·

एकादशोऽध्यायः ॥

सनक —

नित्योत्सवविधौ ब्रह्मन् ! पूजनं समुदाहृतम् ।
द्वारावरणदेवाना तेषा ध्यानादिक क्रमात् ॥ १ ॥

ज्ञातुमिच्छामि विप्रेन्द्र ! प्रब्रूहि मम विस्तरात् ।

शाण्डिलय —

श्रूयतामभिधास्यामि यदहं चोदितस्त्वया ॥ २ ॥

प्रासादद्वारदेवेभ्यः समारभ्य यथाक्रमम् ।
प्रासादद्वारबाह्ये तु ह्यधस्थौदुम्बरान्तिमे ॥ ३ ॥

वास्त्वीशक्षेत्रनाथौ द्वौ स्थितौ दक्षेतरक्रमात् ।
शुक्लवक्त्रः कृष्णदेहो द्विभुजो रत्नपात्रधृक ॥ ४ ॥

दक्षिणेन करेणैव सर्वामरसमाश्रय. ।
पुण्डरीकसमानाभवस्त्रस्त्रगनुलेपनः ॥ ५ ॥

गदोद्यतकरो विप्र ! ध्यातव्यो वास्तुपूरुष. ।
क्षेत्रेशं द्विभुज ध्यायेद्धेमाभवसनस्त्रजम् ॥ ६ ॥

नीलजीमूतसंकाश दण्डहस्तं महातनुम् ।
मुष्टिकृद्वामहस्तेन यागक्षेत्रस्य पालकम् ॥ ७ ॥

कुण्डलाद्यैरलङ्कारैरेतौ शोभितविग्रहौ ।
वीक्षमाणौ विभोर्वक्त्रं तेजसातीव निर्भरौ ॥ ८ ॥

तप्तकाञ्चनवर्णाभा प्रवालसदृशाम्बराम् ।
हारनूपुरकेयूरकरण्डमकुटादिकैः ॥ ९ ॥

अलङ्कृतामलङ्कारै पुण्डरीकनिभेक्षणाम् ।
अकलङ्कसुसम्पूर्णशरच्चन्द्रनिभाननाम् ॥ १० ॥

पद्मकुम्भकरा लक्ष्मी पद्मोपरिगता स्मरेत् ।
पद्मासनेनोपविष्टा द्वारस्योर्ध्व उदुम्बरे ॥ ११ ॥

तरुणादित्यसंकाशो महोरस्कश्चतुर्भुज ।
उन्नतश्चोन्नतासश्च पूर्णाङ्गो नातिमासल ॥ १२ ॥

तनूदरो निम्ननाभो रोमराजिविराजित ।
दंष्ट्राकरालवदन पिङ्गश्मश्रुजटाधर ॥ १३ ॥

मधुपिङ्गलनेत्रश्च कुटिलभ्रूलतायुत. ।
प्रलम्बलोलश्रवण. पृथुघ्राण स्मिताननः ॥ १४ ॥

कुण्डलालङ्कृतश्चैव हारकेयूरभूषित. ।
बद्धोष्णीषललाटश्च तिलकेनाप्यलङ्कृत. ॥ १५ ॥

शुक्लाम्बरधरः स्रग्वी भुजयुग्मेऽस्य दक्षिणे ।
प्रोद्यतं संस्मरेच्चक्र प्रज्वलन्ती गदा परे ॥ १६ ॥

श्रोणीतटनिपण्णा च विश्रान्ता वसुधातले ।
पूर्वे वामकरे शङ्खमन्यस्मिंश्चाक्षसूत्रकम् ॥ १७ ॥

एवं गणाधिपश्चण्डो विक्रमेणापराजित. ।
क्रुद्धो विघ्नायुतानां च क्षणात् सहरणक्षम. ॥ १८ ॥

ध्येयो गर्भगृहद्वारशाखामूले तु दक्षिणे ।
तत्रैवापरभागे तु प्रचण्डं त्वीदृशं यजेत् ॥ १९ ॥

किंतु सव्यापसव्याभ्यां पुजाभ्या स्याद्विपर्यय ।
भुजद्वये यच्चण्डस्य वामे संपरिकीर्तितम् ॥ २० ॥

दक्षिणे तत् प्रचण्डस्य ध्येयं वा परिकल्प्य च ।
ध्यायेद्द्वाराग्रदेशे तु गरुडं काञ्चनप्रभम् ॥ २१ ॥

कुटिलभ्रुसुवृत्ताक्ष पक्षमण्डलमण्डितम् ।
लम्बोदर सुपीनाङ्गं सर्वभूषणभूषितम् ॥ २२ ॥

मकुटाद्यैरलङ्कारैर्नूपुराद्यैर्विराजितम् ।
नीलं वसानं वसनं नानामाल्योपशोभितम् ॥ २३ ॥

संमुखं देवदेवस्य भूगतं विधृताञ्जलिम् ।
द्विभुजं तुहिनाभं च सत्याख्य विहगाधिपम् ॥ २४ ॥

प्राणाधिदैवत चक्रे वलिमण्डलमध्यगे ।
सस्थितं सस्मरेत् सर्वैरङ्गै. पुरुषरूपिणम् ॥ २५ ॥

प्रलम्बमानजठर पक्षराजिविराजितम् ।
दक्षिणेन करणैव धारयन्त गणित्रकत् ॥ २६ ॥

उत्तानितेतरकर कुण्डलाद्यैर्विभूषितम् ।
नीलकौशेयवसनं नीलमाल्यानुलेपनम् ॥ २७ ॥

अनाकुलाभ्या नेत्राभ्या वीक्षमाणं सदा विभुम् ।
अथाग्रमण्डपद्वारशाखायुगलसंस्थितौ ॥ २८ ॥

पद्मगर्भप्रतीकाशावतिभीमपराक्रमौ ।
चण्डप्रचण्डसदृशौ भुजलाञ्छनभूषणौ ॥ २९ ॥

रक्ताम्बरधरौ चैव रक्तस्रगनुलेपनौ ।
गणौ धातृविधातारौ ध्यात्वा सपूज्य तत्पर. ॥ ३० ॥

कुमुदादिगणेशानान् प्रथमावरणे यजेत् ।
पूर्वे च वह्निदिग्भागे पूज्यौ द्वौ गणनायकौ ॥ ३१ ॥

कुमुद कुमुदाक्षश्च प्रसन्नवदनेक्षणौ ।
तुहिनाचलसङ्काशौ प्रथमे वयसि स्थितौ ॥ ३२ ॥

यानाभरणदिग्धाङ्गौ नानाकुण्डलभूषितौ ।
नानामाल्यचितौ चैव नानामौलिधरौ द्विज ॥ ३३ ॥

नानागन्धविलिप्ताङ्गौ नानावस्त्रविभूषितौ ।
कुमुदाख्यगणेशस्य ध्यातव्यो दक्षिण करः ॥ ३४ ॥

चन्द्ररश्मिप्रतीकाशचामरेण विराजित. ।
अभिगच्छाभयं ध्यायेद् द्वितीय दक्षिणं करम् ॥ ३५ ॥

भवभङ्गात् प्रपन्नानां परेषा गुणशासनम् ।
तस्यैवाद्य वामकरं प्रबुद्धकमलोद्यतम् ॥ ३६ ॥

तूष्णीं भीसूचक ध्यायेद्वहि स्थाना परं करम् ।
एतेद्वे कुमुदाक्षस्य वैपरीत्येन भावयेत् ॥ ३७ ॥

द्वाभ्या द्वाभ्या कराभ्या वै त्वन्येषामेवमेव हि ।
पुण्डरीको वामनश्च द्वावेतौ हुतभुक्प्रभौ ॥ ३८ ॥

गरुडध्वजहस्तौ च शेषमन्यत् पुरोदितम् ।
कृत्वा ध्यात्वाऽथवा न्यस्य दक्षिणे नैर्ऋतेऽपि च ॥३९॥

शङ्कुकर्णाभिधानो य सर्वनेत्राभिसञ्ज्ञित ।
द्वावेतौ चम्पकाभौ तु मयूरव्यजनोद्यतौ ॥ ४० ॥

महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ ।
सुमुख सुप्रतिष्ठश्च विभो. सोमेशदिकस्थितौ ॥ ४१ ॥

चिन्त्यौ मुद्गफलश्यामावातपत्रकरोद्यतौ ।
नोक्तशेषकराणा तु तद्विद्धि कुमुदोदितम् ॥ ४२ ॥

मानव पृश्निगर्भश्च जगत्यन्तरसंस्थितौ ।
तप्तकाञ्चनवर्णाभौ करण्डमकुटोज्ज्वलौ ॥ ४३ ॥

दंष्ट्राकरालवदनौ नानामाल्यधरौ द्विज ! ।
तत्र मानवसंज्ञश्च पक्षनागविभूषित ॥ ४४ ॥

तस्य दक्षिणहस्तश्च शङ्खराजेन शोभित ।
तत्पृष्ठे कटके हस्ते अङ्गुष्ठान्तरलोलगा ॥ ४५ ॥

अक्षमालेति सा प्रोक्ता सर्वसिद्धिकरी सदा ।
मुख्यवामकरे चक्र तत्पृष्ठे चोर्ध्वगा गदा ॥ ४६ ॥

एतद्धि पृश्निगर्भस्य वैपरीत्येन भावयेत् ।
कटिहस्ताद्गता ध्यात्वा पक्षनागौ विना द्विज ! ॥ ४७ ॥

एते भगवतो विप्र ! त्वन्तरङ्गा मयोदिता ।
कर्मणा मनसा वाचा तद्भावगतमानसा ॥ ४८ ॥

ज्ञानादिषड्गुणोपेतेराकीर्णा कोटिश परै. ।
भूते. सिद्धैरनन्तैश्च प्रार्थयानै. परं पदम् ॥ ४९ ॥

वस्त्रभूषाङ्गरागाद्यै. सर्वे ते कुमुदोपमा. ।
श्वेतमृत्कल्पितेनैव ह्यूर्ध्वपुण्ड्रेण भूषिता ॥ ५० ॥

ललाटस्थेन सर्वेऽपि कुमुदादिगणाधिपा ।
एवमन्येऽपि भूताद्या सर्वे पारिषदा द्विज ! ॥ ५१ ॥

एवमावृतिदेवाश्च द्वारस्थाश्च तथैव हि ।
एव तदीया विप्राश्च क्षत्रविट्छूद्रजातय ॥ ५२ ॥

मृदैव वा चन्दनेन कल्पितैरूर्ध्वपुण्ड्रकै ।
द्वादशैश्च चतुर्भिर्वा भूषिता स्यु सदा द्विज ! ॥ ५३ ॥

अतसीकुसुमश्यामौ पीतमाल्याम्बरान्वितौ ।
पीतोष्णीषधरौ रौद्रौ प्राग्वद्भुजविभूषितौ ॥ ५४ ॥

गणौ चण्डाकृतिधरौ दुर्दर्शौ दुरतिक्रमौ ।
जयं च विजय नाम्ना यजेत्तद्वारपार्श्वयो. ॥ ५५ ॥

तदुद्देशात् समारभ्य वह्निद्वारावसानकम् ।
द्वितीयावरणक्षेत्र पीठा कृत्वा तु पञ्चमे ॥ ५६ ॥

भागे तु गरुड कृत्वा विप्र ! ध्यात्वाऽथवा न्यसेत् ।
द्रवच्चामीकराकारं भीमभ्रकुटिलोचनम् ॥ ५७ ॥

पृथुदंष्ट्रं पृथुघ्राण पृथुगात्रं पृथूदरम् ।
पक्षाङ्कुराञ्चितोरस्कं पक्षमण्डलमण्डितम् ॥ ५८ ॥

हारकेयूरताटङ्कमकुटाद्यैस्तु भूषणै ।
भूषित नीलवसन नानामाल्यविभूषितम् ॥ ५९ ॥

नानागन्धविलिप्ताङ्ग नागैकादशभूषितम् ।
पुष्पस्तवकसंपूर्णमञ्जलि दधतं द्विज ! ॥ ६० ॥

उद्यम्य दक्षिण जानुमासनीकृत्य चेतरत् ।
सुखासनसमासीन विभोराज्ञावतीक्षकम् ॥ ६१ ॥

तत (प) कर्मात्मितत्वाना दशकं सिद्धतां गतम् ।
भगवत्तुल्यसामर्थ्यसार्वज्ञ्यादिगुणैर्युतम् ॥ ६२ ॥

वियुक्तं प्राकृताद् दु खान्वियुक्तं चेश्वरेण तु ।
भवसन्तारकत्वेन ह्यतदावृतिक क्रमात् ॥ ६३ ॥

उपेन्द्र पूर्वदिग्भागे सस्थितो द्विजसत्तम ! ।
वह्नौ तेजोधराख्यस्तु दक्षिणे दुरतिक्रम ॥ ६४ ॥

नैर्ऋते तु महाकर्मा पश्चिमे तु महाह्रद. ।
अग्राह्यो वायुदिग्भागे वसुरेतास्तथोत्तरे ॥ ६५ ॥

पूर्वोत्तरे वर्धमान. साक्षी गगनगोचरे ।
आधारनिलय नाम्ना सर्वस्याधोगत स्मरेत् ॥ ६६ ॥

एते स्फटिकवर्णाभा श्वेतमाल्याम्बरान्विता. ।
गणित्रकं रथाङ्ग च शङ्खं चैव गदा तथा ॥ ६७ ॥

दधाना मुख्यदक्षादिमुख्यवामान्तमेव हि ।
करैश्चतुर्भि. सुसमा मकुटादिविभूषिताः ॥ ६८ ॥

तेजसा विघ्नजालानि प्रेरयन्तो महौजस ।
स्थानकै. संस्थिता. सर्वे ध्यानोन्मीलितलोचना ॥ ६९ ॥

अथवा द्विभुजा एते वज्राद्य दशक क्रमात् ।
दक्षेण लोकपालीयं धारयन्त. करेण तु ॥ ७० ॥

गणित्रकं तु वामेन वरदाभयदारतु वा ।
तदा वर्णाङ्गरागाद्यैरिन्द्रादिसदृशास्तु वा ॥ ७१ ॥

द्वितीयगोपुरद्वारपार्श्वगोरन्तरस्थयो. ।
विन्यसेद् द्वारपालाख्यावेतौ वामादितो गणौ ॥ ७२ ॥

निधीशौ शङ्खपद्मौ तु निधिभाण्डोपरिस्थितौ ।
स्थूलदन्तौ च दान्तौ च द्विभुजौ भगवन्मयौ ॥ ७३ ॥

कुटिलभ्रूलतायुक्तौ किञ्चिदुन्नतवक्षसौ ।
लम्बोदरौ सुपीनाङ्गौ ह्रस्वपाणिपदौ द्विज ! ॥ ७४ ॥

शङ्खपद्मसमानाभौ नीलशुक्लाम्बरस्रजौ ।
मकुटाद्यैस्तु विविधैरलङ्कारैरलङ्कृतौ ॥ ७५ ॥

दक्षिणेन करेणैव धारयन्तौ सरोरुहम् ।
इतरेण करेणैव ह्युत्तानेन निधि स्वकम् ॥ ७६ ॥

अथवा वामहस्ताभ्या प्रवेशाभीतिदान्वितौ ।
करद्वयेन शङ्खं वा पद्मं वा दधतौ द्विज ! ॥ ७७ ॥

वामेन धारयेत् पद्मं यद्वा शङ्खं निधीश्वर. ।
शङ्खपद्मधरौ वापि शिरसा मकुटोपरि ॥ ७८ ॥

शङ्खचक्रधरौ वापि साधकेच्छावशेन तु ।
उन्नम्य दक्षिणं जानुं ह्यासनीकृत्य चेतरत् ॥ ७९ ॥

एवं शङ्खनिधे पद्मनिधेस्तु विपरीतवत् ।
तद्द्वारशाखानिष्ठौ तु संस्मरेद्दक्षिणादितः ॥ ८० ॥

क्षीरकुन्दावदातौ च नीलकौशेयवाससौ ।
नीलनीरजवर्णाभै पुष्पैर्भूषितविग्रहौ ॥ ८१ ॥

पूर्वोक्तगणसादृश्यौ नाम्ना भद्रसुभद्रकौ ।
तद्द्वारवाह्यत. पश्चात् पार्श्वयोर्गोपुरस्थितौ ॥ ८२ ॥

एतौ गणेश्वरौ न्यस्येद् ध्यात्वा वा परिकल्प्य च ।
अथवा द्विभुजावेतौ तदा भद्रस्य दक्षिणम् ॥ ८३ ॥

कर तु तर्जनीयुक्त वाममीपत्तु कुञ्चितम् ।
गदाग्रोपरिविश्रान्त गदामूलोपरिस्थितम् ॥ ८४ ॥

व्यत्यस्तदक्षिणं पाद वामं तु भुवि संस्थितम् ।
भद्रस्य वामयोर्विप्र ! यदुक्त पाणिपादयो. ॥ ८५ ॥

दक्षयोस्तत् सुभद्रस्य दक्षोक्त वामगं भवेत् ।
किन्तु तद्वामहस्तं तु युक्तं विस्मयमुद्रया ॥ ८६ ॥

चण्डप्रचण्डौ धाता च विधाता च जयस्तथा ।
विजयश्चापि भद्रश्च सुभद्रश्च गणेश्वरः ॥ ८७ ॥

एते गणेश्वरा ह्यष्टौ प्रभापुष्पाम्बरैर्विना ।
देहवक्त्राकृतैस्तुल्यास्तथैवाभरणायुधैः ॥ ८८ ॥

भक्ताना विघ्नजालस्य सर्वदिक्संस्थितस्य च ।
ससारफलदातुर्वै च्छेदनार्थं समुद्यता. ॥ ८९ ॥

परस्परमुखा सर्वे स्थानके संस्थिताः समे ।
गणेशायुतलक्षैस्तु नानावर्णवपुर्धरै. ॥ ९० ॥

अच्युताराधनपरैरेकैकं परिवारिता. ।
तृतीयावरणे पश्चात् पूर्वादिक्रमयोगत. ॥ ९१ ॥

इन्द्रादिलोकपालाना दशक विन्यसेद्द्विज ! ।
शतधामनिभ ध्यायेच्चतुर्बाहु पुरन्दरम् ॥ ९२ ॥

सुसितद्विपसस्थ तु सुतीक्ष्णकुलिशोद्यतम् ।
अजारूढ स्मरेद्रक्तं शक्तिपाणि हुताशनम् ॥ ९३ ॥

सहस्रार्चिभिराकीर्ण सहस्रादित्यभासुरम् ।
महामहिषसस्थं तु त्वञ्जनाद्रिसमप्रभम् ॥ ९४ ॥

सुभीमदण्डहस्तं तु स्मरेद्देवं पित्रीश्वरम् ।
दंष्ट्राकरालवदन कृष्णमेघसमप्रभम् ॥ ९५ ॥

घोरं प्रेतासनं ध्यायेत् खड्गधृग्राक्षसेश्वरम् ।
मुक्ताफलद्युतिसम भीमं पाशकरोद्यतम् ॥ ९६ ॥

नागकन्यासहस्राढ्यं मकरस्थमपांपतिम् ।
नीलतोयदसंकाशं महाध्वजपटाङ्कितम् ॥ ९७ ॥

ध्यायेत् समीरणं देव सस्थितं हरिणोपरि ।
सोमं तारागणोपेतं शङ्खगोक्षीरपाण्डरम् ॥ ९८ ॥

बृहच्छशकपृष्ठस्थं शिशिरास्त्रकरं स्मरेत् ।
सितभूतिविलिप्ताङ्गं त्रिणेत्र वृषवाहनम् ॥ ९९ ॥

त्रिशूलायुधहस्त च त्वीशानं ज्ञानिनं स्मरेत् ।
पातालदिग्गत ध्यायेत् कूर्मारूढं हलायुधम् ॥१००॥

सित सहस्रफणभृद्योनन्तो नाम नागराट् ।
भचक्रं भ्राम्यमाणं तु दण्डहस्तं प्रजापतिम् ॥ १०१ ॥

हंसारूढं खसंस्थं तु ध्यायेद्ध्रुवमजं विभुम् ।
एते चतुर्भुजा. सर्वे अक्षसूत्रविभूषिता ॥ १०२ ॥

चिन्तयन्त परं तत्त्वं वराभयकरोद्यता ।
दिव्याभरणदिग्धाङ्गा दिव्यमाल्याम्बरान्विताः ॥

दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विज ! ।
रक्तशुक्लनिशापीतनीलचम्पकसप्रभै. ॥ १०४ ॥

व्योमस्फटिकमार्तण्डराजोपलनिभैस्तथा ।
माल्याङ्गरागवसनै. महार्घै. समलङ्कृता ॥ १०५ ॥

भूषिता भूषणैश्चित्रै करण्डमकुटादिभि ।
एभ्यश्चतुर्भुजो ब्रह्मन् ! विज्ञेयो वृषभध्वज. ॥ १०६ ॥

द्विभुजास्त्वमराश्चान्ये वरदाभयदास्तु वा ।
इति लोकेश्वरेषूक्तं ततो वै द्विजसत्तम ! ॥ १०७ ॥

तृतीयावरणद्वारे शाखामूले तु दक्षिणे ।
सुदर्शनं चतुर्हस्तं ह्रस्वकायं ज्वलत्प्रभम् ॥ १०८ ॥

क्रोधरक्तेक्षणं दैत्यदानवासुरविलेपनम् ।
नृत्यन्त मदमत्तं च सहस्रारान्तरस्थितम् ॥ १०९ ॥

दंष्ट्राकरालवदन कुटिलभ्रूलतायुतम् ।
कल्पान्तपावकाकार स्वरश्मिपरिवेष्टितम् ॥ ११० ॥

दक्षिणे भुजयुग्मे तु पूर्वेण च सुदर्शनम् ।
धारयन्तं ततोऽन्येन विश्रान्तां भूतले गदाम् ॥१११॥

शङ्खं मुख्येन वामेन ह्यपरेण गणित्रकम् ।
हारकेयूरताटङ्कमकुटादिविभूषणै. ॥ ११२ ॥

विभूषितं विचित्रैस्तु श्वेतमाल्याम्बरादिकैः ।
विघ्नानुत्पाटयन्तं च दीप्तेन स्वेन तेजसा ॥ ११३ ॥

संस्मरेत्तु ततोऽन्यस्मिन् शाखामूले महामते ! ।
सुस्थित गरुडं विप्र ! तप्तकाञ्चनसन्निभम् ॥ ११४ ॥

सौम्यवक्त्र विवृत्ताक्षं रक्ततुण्डं सुभीषणम् ।
पृथूदरं दीर्घपुच्छपक्षमण्डलमण्डितम् ॥ ११५ ॥

रक्ताम्बरधरं चैव रक्तस्रगनुलेपनम् ।
दंष्ट्राकरालवदन भ्रुकुटीकुटिलेक्षणम् ॥ ११६ ॥

विचित्रकञ्चुकधरैं भुजगेन्द्रैरलंकृतम् ।
मकुटाद्यैरलंकारैर्विविधैस्तु विभूषितम् ॥ ११७ ॥

भुजद्वये यच्चक्रस्य वामे संपरिकीर्तितम् ।
दक्षिणे तद्भवेदस्य दक्षोक्तं वामगं भवेत् ॥ ११८ ॥

वज्रं शक्तिस्तथा दण्ड.खड्ग पाशो ध्वजस्तथा ।
शिशिराख्य त्रिशूल च लाङ्गलं मुसल तथा ॥११९॥

पूर्वादिक्रमयोगेन चतुर्थावरणे स्थिता ।
एतेषा क्रमशो ध्यान समाकर्णय साम्प्रतम् ॥१२०॥

वज्रं वज्रोपलाभ तु सितदीर्घनखाङ्कितम् ।
दंष्ट्राकरालवदन ज्वलत्कनकलोचनम् ॥ १२१ ॥

सौदामिनीप्रभा शक्ति शान्ताग्निवदनेक्षणाम् ।
घनघर्घरनिर्घोषमुद्गिरन्ती मुहुर्मुहु ॥ १२२ ॥

वज्रमुष्टि स्मरेद्दण्ड रक्ताङ्गं रक्तलोचनम् ।
क्रोधमूर्ति स्वदशनैर्दशन्तमधर स्वकम् ॥ १२३ ॥

स्व(ख)रश्मिखचितं ध्यायेन्नृत्यमानं च नन्दकम् ।
शरदाकाशसकाश दशन्तं दशनावलीम् ॥ १२४ ॥

पाशं गुणगणाकीर्णं विद्युज्जिह्वं भयानकम् ।
हेमालिपाण्डराभ च घोरास्य रक्तलोचनम् ॥ १२५ ॥

शरज्जलदसंकाशं ध्वजं कुटिललोचनम् ।
स्वतेजसा जगत् सर्व द्योतयन्तं बलोत्कटम् ॥ १२६ ॥

शिशिरं शीतधामाभं पीनाङ्गं पृथुविग्रहम् ।
जटाकलापधृक्सौम्य पुण्डरीकनिभेक्षणम् ॥ १२७ ॥

उदयार्कसहस्राभं त्रिशूलं भीषणाकृतिम् ।
कल्पान्तपावकाकारस्वरश्मिपरिवेष्टितम् ॥ १२८ ॥

सन्ध्याजलदसंकाशं लाङ्गलं भीमलोचनम् ।
क्षामाङ्गमुन्नतांसं च वज्रकायं बलोत्कटम् ॥ १२९ ॥

कुन्दावदात मुसल सौम्यमीषत्स्मिताननम् ।
रवं रवन्त मधुर श्रोत्रेन्द्रियसुखावहम् ॥ १३० ॥

नीलरक्तसितापीतपावकाञ्जनसन्निभै ।
हेमचन्द्रहिमाकाशसमानाभै क्रमेण तु ॥ १३१ ॥

माल्याङ्गरागवसनै रुचिरै समलङ्कृता ।
दिव्यैराभरणैर्युक्ता. स्वचिह्नाङ्कितमस्तका. ॥ १३२ ॥

तर्जयन्तश्च दुष्टौघ दक्षिणेन करेण तु ।
वामेन कटिमालम्ब्य सुसमे स्थानके स्थिता. ॥१३३॥

चतुर्थावरणद्वारदक्षिणोत्तरशाखयो ।
गङ्गा च यमुना चैव ध्यात्वा सपूजयेत् क्रमात् ॥१३४॥

भगवत्पादसंभूता गङ्गा कुमुदसन्निभाम् ।
नवयौवनलावण्यसौकुमार्यगुणैर्वृताम् ॥ १३५ ॥

नीलाङ्गरागवसना नीलमाल्यैरलङ्कृताम् ।
द्विभुजा सौम्यवदना पुण्डरीकनिमेक्षणाम् ॥ १३६ ॥

हारनूपुरकेयूरकुण्डलाद्युपशोभिनाम् ।
संसारतापसन्तप्तानारुरुक्षन् परं पदम् ॥ १३७ ॥

वासनाकर्मपङ्कानि क्षालयन्तीं स्वतेजसा ।
वहन्तीं दक्षिणेनैव कलशं वारिपूरितम् ॥ १३८ ॥

वामेन तर्जयन्तीं च करेण प्राकृतान् जनान् ।
यमुना नीलरत्ना(क्ता)भा नीलकुञ्चितमूर्धजाम् ॥१३९॥

सिताङ्गरागवसना सितमाल्योपशोभिताम् ।
दक्षिणे तर्जनी मुद्रा वामे तु कलश स्मृत. ॥ १४० ॥

अन्यत् सर्व तु गङ्गोक्तमत्रापि स्यान्महामते ।
लोहिताक्षो महावीर्यस्त्वप्रमेय. सुशोभन. ॥ १४१ ॥

वीरहा विक्रमो भीम. शतावर्तस्तु चाष्टम. ।
ऐश्वरीदिक्क्रमेणैव पञ्चमावरणे स्थिता. ॥ १४२ ॥

ध्यायेच्चन्द्रप्रतीकाशं लोहिताक्षं बलोत्कटम् ।
नीलाम्बरधर नीलमाल्य नीलानुलेपनम् ॥ १४३ ॥

महावीर्य महाकायं पीतवर्ण महाभुजम् ।
प्रवालाभाम्बरधरं रक्तस्रगनुलेपनम् ॥ १४४ ॥

संस्मरेदप्रमेयाख्यमप्रमेयबलोत्कटम् ।
हरिताकृतिमापीतवसनस्रग्विलेपनम् ॥ १४५ ॥

सुशोभन शोभनाङ्ग मुक्ताफलनिभ स्मरेत् ।
अतसीपुष्पसंकाशवासोमाल्यानुलेपनम् ॥ १४६ ॥

वीरघ्न वीरहाख्य च ध्यायेच्चम्पकसप्रभम् ।
बाहुलीकरञ्जित रक्तवसनस्रग्विमण्डितम् ॥ १४७ ॥

विक्रम विक्रमावासं चापोदरनिभ स्मरेत् ।
कुन्देन्दुकान्तिवसन सितमाल्यानुलेपनम् ॥ १४८ ॥

भीमं भीमाकृति ध्यायेत्तप्तकाञ्चनसन्निभम् ।
पाण्डरारुणकौशेय तद्वद्गन्धस्रगन्वितम् ॥ १४९ ॥

अतसीकुसुमश्यामं शतावर्त तु भावयेत् ।
पीताम्बरधर पीतमाल्यगन्धविभूषितम् ॥ १५० ॥

भुजद्वयान्विता ह्येते चान्तर्मुदितमानसा ।
दक्षिणै. पाणिभि. सर्वेज्वेलन्तं परशुं तथा ॥ १५१ ॥

वामै. शङ्खवरं दीप्तं दधानाश्चारुकुण्डला ।
समा समविभक्ताङ्गा प्रशान्ताकृतयस्तथा ॥ १५२ ॥

स्थानके सस्थिता. सर्वे स्वप्रभाभिर्विराजिता ।
प्रसन्नवदना. सौम्यास्त्रैलोक्योद्धरणक्षमा ॥ १५३ ॥

हारनूपुरकेयूरपूर्वभूषाविभूषिता ।
तदाज्ञाप्रेक्षकाश्चैव दुष्टदोषोपशान्तिदा ॥ १५४ ॥

बलेन महता क्षिप्तदेवासुरमहोरगा. ।
एकवीराऽसहायाश्च त्वप्रयत्नेन लीलया ॥ १५५ ॥

आब्रह्मभवनं शश्वत् परिवर्तयितुं क्षमा ।
एतदावरणद्वारचतुष्के द्वारदेवता ॥ १५६ ॥

न्यसेद्युग्मप्रयोगेण पूर्वद्वारादित क्रमात् ।
वज्रनाभ हरीशं च पूर्वस्या दक्षिणोत्तरे ॥ १५७ ॥

ध्यायेत्तु वज्रनाभाख्य शतधामसमप्रभम् ।
मुख्यदक्षिणहस्तेन निषेधाभिनयान्वितम् ॥ १५८ ॥

वेत्रलता द्वितीयेन चक्रराज तृतीयत. ।
मुख्यवामकरेणैव श्रोणीतटकृतार्पणम् ॥ १५९ ॥

शङ्खराजं द्वितीयेन तथा वज्रं तृतीयत ।
धारयन्तं तथा रुक्मभूषणैर्विविधैरपि ॥ १६० ॥

रक्तमाल्याम्बरधरं रक्तस्रगनुलेपनम् ।
एवमेव हरीश च निषेधाभिनयोज्झितम् ॥ १६१ ॥

प्रवेशाभिनयाख्येन पाणिना किन्तु चिह्नितम् ।
एको ह्यत्र निषेधं च त्वभक्ताना करोति वै ॥ १६२ ॥

भक्तानामपरश्चैव प्रवेशं संप्रयच्छति ।
द्वारे द्वारे प्रतीहारद्वयस्यैवं प्रयोजनम् ॥ १६३ ॥

दक्षोक्तं वज्रनाभस्य तद्धरीशस्य वामगम् ।
आद्यवामगत सर्वमन्यद्दक्षिणपाणिगम् ॥ १६४ ॥

धर्माध्यक्षनियन्त्रीशौ दक्षिणे दक्षिणोत्तरे ।
कुर्यादन्तकासादृश्यौ पूर्ववद्भुजभूषितौ ॥ १६५ ॥

पीतकौशेयवसनौ पीतमाल्यविलेपनौ ।
किन्तु दण्डगदाहस्तौ वज्रचक्रविवर्जितौ ॥ १६६ ॥

शुद्धाक्षममृतानन्दं प्रतीच्या दक्षिणादित ।
बाणकार्मुकमेकस्मिन् पाणौ पाशमथापरे ॥ १६७ ॥

आद्य करचतुष्क यत्तद्व्यग्रं पूर्ववद्भवेत् ।
आकृतौ जलनाथस्य सदृशौ सर्वदैव हि ॥ १६८ ॥

नीलकौशेयवसनौ नीलस्रगनुलेपनौ ।
वसुनाथं सुदानन्दमुदग्दिग्दक्षिणोत्तरे ॥ १६९ ॥

खड्गमुद्गरहस्तौ च प्राग्वच्छेष चतुष्टयम् ।
कराणामनयो. कार्यं रूपेणोडुपते समम् ॥ १७० ॥

अतसीकुसुमश्यामकौशेयस्रग्विलेपनौ ।
भूषणैर्भूषिता ह्येते विविधैर्वज्रनाभवत् ॥ १७१ ॥

षष्ठावरणदेवानां तद्द्वास्थीना विशेषत. ।
ध्यानं शृणु क्रमेणैव तत्त्वतो मुनिपुङ्गव ! ॥ १७२ ॥

पूर्वादीशानपर्यन्तं षष्ठावरणसंस्थिता. ।
एताश्च देवता विप्र ! तेजोरूपं समाश्रिता. ॥ १७३ ॥

कालो वियन्नियन्ता च शास्त्र नानाङ्गलक्षणम् ।
विद्याधिपतयश्चैव सरुद्र. सगण. शिव. ॥ १७४ ॥

प्रजापतिसमूहस्तु इन्द्र. सपरिवारक ।
तन्मुख्यद्वाश्चतुष्के तु पूर्ववत् सस्थिता. क्रमात् ॥

चक्रशङ्खौ पद्मगदे लाङ्गलं मुसल शरा. ।
शार्ङ्गं चैते क्रमाद्ध्येया विद्युत्तुहिनकुन्दभा ॥ १७६ ॥

पीतनीलसितारक्तसितगोक्षीरसन्निभै ।
हरितालारुणाभैस्तु वस्त्रमाल्यानुलेपनै ॥ १७७ ॥

सर्वरत्नमयैर्युक्तैर्भूषणैरप्यलङ्कृता. ।
महाबला महावीर्यास्त्वेकवक्त्रा द्विबाहव. ॥ १७८ ॥

एते तु नायका. सर्वे स्वचिन्हाङ्कितमस्तका ।
दुष्टौघं तजयन्तश्च दक्षिणेन करेण तु ॥ १७९ ॥

कटिमालम्ब्य वामेन स्थानके. सुसमै. स्थिता ।
दृढव्रतो बहुशिरा महाकायो महाबल ॥ १८० ॥

जितक्रोधो दुराधर्षो महोत्साहस्त्रिविक्रम ।
अतुलो दुष्टहाऽर्चिष्मान् सर्वदृग दुरतिक्रम ॥ १८१ ॥

विषमो गहनोऽमोघ. षोडशोपप्रवेशका. ।
शक्राग्निमध्यमारभ्य शक्रेशानान्तरावधि ॥ १८२ ॥

शुक्लशोणसुवर्णालिपिङ्गरक्तसितासिता. ।
रक्तपीतातसीहेमा शोणशुभ्रसितासिता. ॥ १८३ ॥

वर्णानुरूपसद्वस्त्रमाल्यालेपनभूषणा. ।
नामानुरूपचारित्रा शङ्खमुद्गरधारिणः ॥ १८४ ॥

सव्येतरक्रमेणैव प्रवेशकनिषेधका. ।
क्षणाद्भुवनसहारसृष्टिस्थितिकृतिक्षमा. ॥ १८५ ॥

उक्तानेतान् क्रमेणैव पूर्ववत् संप्रपूजयेत् ।
मुनय. सप्त पूर्वेऽन्ये ग्रहास्तारादिकैर्वृता ॥ १८६ ॥

जीमूताश्चाखिला नागास्त्वप्सरोगण उत्तम. ।
ओषध्यश्चैव पशवो यज्ञाः साङ्गाखिलास्तु ये ॥ १८७ ॥

सूक्ष्मरूपेण तिष्ठन्ति पूर्ववत् सप्तमावृतौ ।
सभव. प्रभवश्चैव पूर्ण पुष्कर एव च ॥ १८८ ॥

आनन्दो नन्दनश्चैव वीरसेनसुषेणकौ ।
तन्मुख्यद्वारशाखास्थौ द्वौ द्वौ दक्षिणवामयो ॥ १८९ ॥

संभव. श्वेतवर्णस्तु प्रभव. कुन्दसन्निभ ।
पूर्णस्तु रक्तवर्णाभस्त्वतिरक्तस्तु पुष्कर ॥ १९० ॥

आनन्द. पीतवर्णस्तु हेमाभो नन्द उच्यते ।
कृष्णाभो वीरसेनस्तु सुषेणोऽञ्जनसन्निभः ॥ १९१ ॥

मकुटाङ्गदचित्राङ्गा गदाहस्ता द्विबाहव ।
चतुर्भुजा वा विप्रेन्द्र ! शङ्खचक्रगदाधराः ॥ १९२ ॥

पूर्ववत् पाणिनान्येन प्रवेशकनिषेधका ।
दंष्ट्राकरालवदना निग्रहानुग्रहक्षमा. ॥ १९३ ॥

क्षेमकृच्छिवकृत् प्राज्ञो होमकृद्भूतभावन. ।
युगान्ताग्न्यशनश्चैव संवर्तो भीषणस्तथा ॥ १९४ ॥

सकन्दनश्चानिमिष शतपर्वा शतानन. ।
औदुम्बर प्राकृतिको द्वि (वि) रामश्चाशुमाल्यपि ॥

औपदौवारिक त्वेतद्गणषोडशक क्रमात् ।
दृढव्रतादिसदृशं वर्णत. षडभूजान्वितम् ॥ १९६ ॥

वामदक्षिणयोगेन पृष्ठत पूर्वपश्चिमम् ।
शङ्खमुद्गरपद्माक्षवराभयसमन्वितम् ॥ १९७ ॥

नानावर्णस्रगुष्णीषवस्त्रालेपनभूषणम् ।
प्रागुक्तगणशौर्याढ्य सर्वकर्मकृतिक्षमम् ॥ १९८ ॥

तच्छोभाष्टकरक्षार्थं शतमन्युर्विरोचन ।
अप्रतर्क्यस्त्वनुल्लङ्घ्यस्त्वप्रमेयाभिधानक. ॥ १९९ ॥

अमर्षी च महद्भूत. केकाराक्षस्तथाष्टम. ।
इन्द्राग्निमध्योपद्वारपार्श्वशोभास्वनुक्रमात् ॥ २०० ॥

एकैकश स्थिता शूरा. प्रवेशकनिषेधकाः ।
नीलपीतजपाश्यामसितहिङ्गुलकेन्दुभा. ॥ २०१ ॥

महाबला महावीर्या. सुदुर्लङ्घ्यपराक्रमाः ।
नानाविधाम्बरै स्रग्भिर्भूषणैरनुलेपनै ॥ २०२ ॥

अन्यैरनुपदिष्टैश्च यथाशोभमलंकृता ।
षाड्गुण्यमहिमायुक्ताश्चतुर्हस्ताः क्रमेण तु ॥ २०३ ॥

पृष्ठदक्षिणवामाभ्यां चक्रशङ्खसमन्विताः ।
गदाग्रोपरिविश्रान्तमुख्यहस्तद्वयान्विता. ॥ २०४ ॥

द्वारोपद्वारशोभेशानेतान् संपूजयेत् क्रमात् ।
विद्या चैवापरा विद्या पावकश्चैव मारुत. ॥ २०५ ॥

चन्द्रार्कौ वारि वसुधेत्येता. संसारदेवताः ।
सूक्ष्मरूपेण तिष्ठन्ति बाह्यावरणभूतले ॥ २०६ ॥

अमरेशो विरूपाक्ष सुधर्मिष्ठो नियामक ।
सर्वसत्त्वाश्रयश्चातिगहनस्तदनन्तरम् ॥ २०७ ॥

महाराजेश्वरश्चापि धनाध्यक्षेश्वरस्तथा ।
एते गणेश्वरास्त्वष्टौ तन्मुख्यद्वारपालका. ॥ २०८ ॥

ध्येयाश्चतुर्भुजा सर्वे मुख्यपाणिद्वयेन तु ।
अमरेशविरूपाक्षौ वज्रवेत्रलताकरौ ॥ २०९ ॥

पृष्ठकाभ्या तु पाणिभ्या चक्रशङ्खसमुज्ज्वलौ ।
कुङ्कुमाञ्जनसकाशौ दंष्ट्रया विकृताननौ ॥ २१० ॥

दक्षिणोत्तरयोगेन लाञ्छनव्यत्ययान्वितौ ।
द्वारदक्षिणवामस्थौ प्रवेशकनिषेधकौ ॥ २११ ॥

सुधर्मिष्ठो नियन्ता च सुसितश्यामलप्रभौ ।
सुभीमदण्डहस्तौ च वज्रायुधविवर्जितौ ॥ ११२ ॥

यथाक्रमोदितानन्यान् धारयन्तौ यथाविधि ।
सर्वसत्वाश्रयश्चातिगहन. श्यामल सित. ॥ २१३ ॥

किन्तु पाशकरावेतौ पूर्ववद्भुजभूषितौ ।
महाराजेश्वरो रक्तो धनाध्यक्षेश्वरोऽसित. ॥ २१४ ॥

शिशिरायुधसंयुक्तौ त्रिकमन्यद्यथा पुरा ।
महाबला महावीर्या दुष्टदोषभयङ्करा. ॥ २१५ ॥

दुर्निरीक्षाश्च दुर्धर्षा दैत्यदानवहिंसकाः ।
नानामहार्घवासोभिः भूषालेपैरलंकृता ॥ २१६ ॥

महर्षभ प्रभूतं च गम्भीरं प्राणगोचरम् ।
योगाङ्ग योगनिलयं सनातनमश्रृङ्खलम् ॥ २१७ ॥

तारकान्तरितं तारं विरामं विषमं तथा ।
दुरतिक्रमं दुर्ग्रहं च सुधूम्रमनिलाशनम् ॥ २१८ ॥

तत्सालकोपद्वारेषु विन्यसेत् पूर्ववर्त्मना ।
उक्तोपद्वारपालानां वर्णत. समुज्ज्वलम् ॥ २१९ ॥

गणषोडशकं त्वेचतुष्पाणिसमन्वितम्।
गौणवामकराद्यं तु मुख्यवामकरावधि ॥ २२० ॥

शङ्खपट्टसहस्तं च निषेधाभिनयोद्यतम्।
प्रवेशाभिनयाङ्कं च नानावर्णाम्बरस्रजम् ॥ २२१ ॥

नानास्थानकसंयुक्तं नानाभूषणभूषितम्।
अक्षसूत्रधर वाऽथ प्रपन्नाना प्रवेशकृत् ॥ २२२ ॥

निषेधकृत्तथान्येषा न्यस्तव्य मुनिसत्तम!।
देवव्रतं निरातङ्क भीमं च पुरुषं तथा ॥ २२३ ॥

उग्रं वीरेश्वर रम्यमरिष्टं मुनिसत्तम!।
अनिर्विण्णं युगान्ताशं शतानन्द शताननम् ॥ २२४ ॥

तेजोधर विशालाक्षं युगाशं देवनन्दनम्।
एतद्द्विरष्टशोभासु गणमेकैकशो न्यसेत् ॥ २२५ ॥

उपद्वारेशसदृशं वर्णतो लाञ्छनैर्विना।
चतुर्भि. पाणिभिश्चैव पृष्ठदक्षिणपूर्वकम् ॥ २२६ ॥

मुख्यदक्षिणहस्तान्तं शङ्खचक्रगदाधरम्।
निषेधकृच्च पापानामपापाना प्रवेशकृत् ॥ २२७ ॥

नानास्त्रगम्बरोष्णीषभूषालेपाद्यलंकृता।
अनन्ताचिन्त्यविभवा सर्वभूतसमाश्रया ॥ २२८ ॥

नानाशस्त्रास्त्रकुशला नानाज्ञानसमन्विता।
निरस्तानेकदैत्येशा साधूनां पालनोद्यताः ॥ २२९ ॥

द्वारद्वयान्विते साले मुख्यद्वारगतावुभौ।
तिष्ठतः सूक्ष्मरूपेण तदव्यद्वारपार्श्वयोः ॥ २३० ॥

प्राकारसर्वकोणेषु वह्निकोणादितो न्यसेत्।
प्रभवाप्ययरूपाणां मूर्तीना चतुरात्मनाम् ॥ २३१ ॥

तथा मूर्त्यन्तराणा च तत्कान्तानामनुक्रमात्।
मन्त्राणामस्त्रसङ्घादि तेषां रूपमनुस्मरन् ॥ २३२ ॥

चतुर्णामपि कोणानामव्यक्तं भवनाद्बहिः।
संयजेद्भवनाम्नावै यस्मान्नान्यो भव स्मृत ॥ २३३ ॥

तेषा बहिः स्वमन्त्रेण दिक्क्रमेण तु हेतिराट्।
स्वमरीचिगणेनैव भासयन्तं निवेश्य च ॥ २३४ ॥

न्यस्यैवमर्चनं कुर्यान्मित्रमुद्रान्वितेन तु।
निरीक्षणादिशुद्धेन अर्घ्यस्रक्चन्दनादिना ॥ २३५ ॥

वासुदेवाभिधानस्तु देव षाड्गुण्यविग्रह.।
कर्मिणामुपकारार्थं प्रासादं स्थूलविग्रहम् ॥ २३६ ॥

सर्वज्ञानक्रियाढ्यं च सर्वतत्वसमाश्रयम्।
समासाद्यानुगृह्णाति सदार्चान्तर्गत प्रभु. ॥ २३७ ॥

तस्मात्तदङ्गभूतेषु प्राकारेष्वष्टसु क्रमात्।
पृथ्व्यादिबुद्धिनिष्ठ तु बाह्यं तत्वाष्टक न्यसेत् ॥ २३८ ॥

प्रासादश्चाङ्गसंयुक्त. प्रकृतिस्त्रिगुणात्मिका।
तद्गता प्रतिमा जीवस्तद्गत परम पुमान् ॥ २३९ ॥

अतोऽधिदैवतान्यत्र तत्वान्येतान्यनुक्रमात्।
सर्वत्र व्यापकत्वेन ध्यात्वा सपूजयेत्तत ॥ २४० ॥

सर्वाधारमयेनैव सर्वतत्वाश्रयेण च।
सर्वदोषविषघ्नेन कालचक्राम्बुजेन तु ॥ २४१ ॥

सम्पुटीकृत्य भवन सप्राकारमथोर्ध्वत.।
संपूज्य ह्रादयी मुद्रा चक्रमुद्रासमन्विताम् ॥ २४२ ॥

प्रदर्श्य सर्वतोदिक्क कवचेनावकुण्ठयेत्।
एकमूर्तिविधाने च तथैकद्वारभूषिते ॥ २४३ ॥

भवनेऽयं विधान स्याद्विव्यूहपरिनिष्ठिते।
चतुर्द्वारान्विते गेहे दिग्द्वाराग्रस्थमण्डपे ॥ २४४ ॥

सर्वतोभद्रसाले च अघनिर्मोचनेऽपि च।
सदध्वाख्येऽथ धर्माख्ये द्वारद्विद्वितयान्विते ॥ २४५ ॥

द्वारपालगणन्यासे विशेषोऽयं प्रदर्श्यते।
चण्डाद्याश्च सुभद्रान्ताः प्रासादद्वाश्चतुष्टये ॥ २४६ ॥

न्यसनीया. क्रमेणैव पूर्ववद् द्वन्द्वयोगतः।
द्वारोर्ध्वोदुम्बरद्वन्द्वद्वितयस्था यथाक्रमम् ॥ २४७ ॥

लक्ष्मी कीर्तिर्जया माया देव्य. प्रागुक्तलक्षणा.।
सत्य. सुपर्णो गरुड तार्क्ष्यस्त्वग्रेषु संस्थिताः ॥२४८॥

अनिर्वर्ती महावर्ती दर्पहा सर्वजित् स्थिर.।
जयन्तो भयकृन्मानी त्वष्टमो द्विजसत्तम!॥ २४९ ॥

दिग्ग्रमण्डपद्वारशाखापार्श्वे समास्थिता. ।
अनिर्वर्ती महावर्ती कृष्णाभ शुकसन्निभ. ॥ २५० ॥

दर्पहा सर्वजिच्चैव पाण्डुरक्तसुवर्णभौ ।
स्थिरो जयन्त सततं श्यामाञ्जनसमद्युती ॥ २५१ ॥

भयकृच्चैव मानी च पिङ्गल पाण्डुरोज्ज्वल ।
द्विभुजा. सर्व एवैते दक्षिणेन करेण तु ॥ २५२ ॥

नन्दक शङ्खमन्येन दधाना क्रूरविक्रमा ।
यदा चतुर्भुजा ध्येया. तदा चैते गणेश्वरा ॥ २५३ ॥

मुख्यदक्षिणहस्तेन खड्गवेत्रलतान्विता. ।
तथा वामकरे शङ्ख पृष्ठगे दक्षिणाङ्गित ॥ २५४ ॥

पाणिद्वये चक्रपद्मौ बिभ्रतो ज्वलनप्रभौ ।
नानावस्त्रस्रगुष्णीषभूषणालेपनान्विता ॥ २५५ ॥

व्यत्यस्तहस्तचरणा लाञ्छनव्यत्ययान्विता. ।
ऊर्जितश्चामृताङ्गस्तु सर्वाङ्ग सर्वतोमुख. ॥ २५६ ॥

शुभ्राङ्गो वरदश्चैव वागीश शब्दविक्रम ।
पाञ्चजन्यविशेषा हि द्वौ द्वौ चैव क्रमात् स्थितौ ॥

सर्वतोभद्रसालस्थचतुर्द्वारेषु पूर्ववत् ।
द्विबाहवस्तु सस्मार्या दक्षिणेन करेण तु ॥ २५८ ॥

गृहीतमुसला सर्वे शङ्खमन्येन पाणिना ।
दधानाश्चैव चत्वार. पूर्वे बन्धूकसन्निभा· ॥ २५९ ॥

अन्ये परभृताभास्तु सर्वभूषणभूषिता. ।
बलेन महता क्षिप्तदेवासुरमहोरगा ॥ २६० ॥

एकवीराऽसहायाश्च अप्रयत्नेन लीलया ।
आब्रह्मभवनं शश्वत् परिवर्तनकृत्क्षमा. ॥ २६१ ॥

विश्वेशो विश्वभुग्विश्वो विश्वात्मा विश्वलोचन ।
विश्वपादो विश्वभुज. तथा वै विश्वकर्मकृत् ॥ २६२ ॥

एते द्वितीयसालस्य दिग्द्वारेषु नियामका. ।
द्विबाहव. परिज्ञेया वामदक्षिणयोगत. ॥ २६३ ॥

गदाखड्गास्त्रसंयुक्ता. करण्डमकुटान्विताः ।
शोणपिङ्गसितश्यामरक्तपीतसितासिता ॥ २६४ ॥

सर्ववर्णाम्बरालेपस्रग्भूषाभिर्विराजिता ।
एकवीराऽसहायाश्च सर्वदोषनिवारका. ॥ २६५ ॥

तद्द्वारान्तरभागेषु वामदक्षिणयोगतः ।
प्रासादाभिमुखान् न्यस्येन्निधिनाथेश्वरान् क्रमात् ॥

शङ्खपद्मौ महापद्मशतधामाभिधौ तत ।
अखण्डित सन्ततश्चानन्तधार इति श्रुत ॥ २६७ ॥

सर्वद्वार इति ख्यात. प्रथमौ पूर्वमीरितौ ।
अन्येषा वक्ष्यते षण्णा वर्णरूपादिकं क्रमात् ॥२६८॥

रक्त कृष्ण. सुवर्णाभ. सितारुणतमालभा ।
शङ्खपद्मनिधीशोक्तसर्वलक्षणलक्षिता ॥ २६९ ॥

वसुरत्नसुवर्णाष्टलोहधान्यधनाधिपा ।
सर्वौषधिनिधीशानास्तेषामूर्ध्वे सुखासना. ॥ २७० ॥

सर्वालङ्कारसंयुक्ता. स्वाश्रिताभिमतप्रदा. ।
ततस्तृतीयावरणद्वारेषु द्वन्द्वयोगत. ॥ २७१ ॥

तद्दक्षिणोत्तराभ्या तु शाखाभ्या विन्यसेत् क्रमात् ।
पुरतश्चक्रगरुडौ हलतालौ तु दक्षिणे ॥ २७२ ॥

पश्चिमे शार्ङ्गमकरौ सौम्ये नन्दककश्यकौ ।
चक्रपक्षीशताराणा शार्ङ्गनन्दकयोरपि ॥ २७३ ॥

स्वेषु स्थानेषु पूर्वोक्तं वर्णरूपादिक द्विज ! ।
अन्येषा तालपूर्वाणा त्रयाणामथ वक्ष्यते ॥ २७४ ॥

तालो ध्वज स्याद्भूतादिकालरूपाभिमानक ।
झषः सर्वाङ्गनिभृतो जगद्बीज उदाहृत. ॥ २७५ ॥

स सर्वोपद्रवो क्रश्य संसारश्चपलात्मक. ।
एतान् सूक्ष्मस्वरूपेण ध्यात्वा सपूजयेत् क्रमात् ॥

गङ्गा च यमुना गोदा नदी च महती तथा ।
वितस्ता नर्मदा चैव जम्ब्वाख्या च सरस्वती ॥२७७॥

नद्यश्चतुर्थसालस्य दिग्द्वारेषु क्रमात् स्थिता ।
गङ्गायमुनायोरुक्त वर्णरूपादिकं पुरा ॥ २७८ ॥

ताभ्यामन्याः समानास्तु वर्णशोभा विनैव तु ।
सितारुणासितस्वर्णसितकुन्दसमप्रभा. ॥ २७९ ॥

प्रमत्तप्रौढवेषाश्च नानाभरणभूषिताः ।
सर्वधातुविचित्राङ्गाः सर्वरत्नविराजिताः ॥ २८० ॥

सुधाकुम्भधरा द्वाभ्यां कराभ्यां पूर्ववच्च ताः ।
एवं दिग्द्वारभवनद्वारस्थैस्थितिरुदाहृता ॥ २८१ ॥

एकमूर्तेषु दिङमूर्तेः प्राकारेषूर्ध्वगेषु च ।
द्वारादयस्तदीयाश्च सामान्याः समुदाहृता ॥ २८२ ॥

सर्वसालप्रतीहारशाखापार्श्वगतावुभौ ।
ध्येयौ वा स्थापनीयौ वा बाह्यद्वारगतौ यदि ॥ २८३ ॥

यथोक्तलक्षणोपेतौ स्थापनीयौ यथाक्रमम् ।
एवमावरणेशानान् ध्यात्वा सस्थाप्य वार्चयेत् ॥

ध्यानोत्था पीठदेशेषु स्वाकारा स्वासु सद्मसु ।
तदर्थमङ्कणक्षेत्रं त्रिधा वा पञ्चधा भवेत् ॥ २८५ ॥

त्रिभागमेकभागं वा त्यक्त्वा तन्मध्यतो बहिः ।
पीठं वायतनं कुर्यात् सर्वदिक्ष्वन्तरेऽथवा ॥ २८६ ॥

अधरोत्तरनिष्ठाभ्यां प्रागुक्ते पूर्ववत् स्थिते ।
शिलेष्टकादिभिः कल्प्ता पीठिका हस्तविस्तृता ॥

तदर्धेनोच्छ्रिता सर्वा सर्वालङ्कारशोभिता ।
चतुरश्राः सुवृत्ता वा सपूज्या वाऽथ केवला ॥२८८॥

ग्रामादिवास्तुदेवानां स्वदिग्भागगतेषु च ।
गोमयादिविलिप्तेषु मण्डलेषु बलिं हरेत् ॥ २८९ ॥

विस्तारोच्छ्रायमानाद्वै पीठाः प्रागुक्तलक्षणाः ।
अर्धमानेन वा कार्या रथयात्राऽविरोधकम् ॥ २९० ॥

एवमावरणेशानां पीठेषु स्वासु दिक्षु च ।
दुष्टदोषनिरासार्थं प्रासादाभिमु(खं)खा स्थिता ॥

चतुःस्थानावतीर्णस्य द्वारे च यजनालये ।
स्थापनं गणनाथानां शृणु त्वं मुनिपुङ्गव ! ॥ २९२ ॥

वास्तुक्षेत्रेशसंज्ञौ द्वौ प्राग्द्वारे पूर्ववत् स्थितौ ।
लक्ष्मी कीर्तिर्जया माया द्वारेषूर्ध्वस्थिता क्रमात् ॥

वज्रनाभादयो देवा द्वौ द्वौ दिग्द्वारशाखयोः ।
प्रागादिद्वारकुम्भेषु सभवप्रभवादयः ॥ २९४ ॥

कुमुदाद्यन्तरङ्गं च भूतानामष्टकं परम् ।
द्वारान्तर्युगमयुक्त्वा तु भ्रमणीदेशमाश्रितम् ॥ २९५ ॥

सुपर्णश्चक्रसंज्ञश्च सत्यः कौमोदकी द्विज ! ।
योजनीयाः क्रमेणैव द्वाराणामग्रभूतले ॥ २९६ ॥

हेमदण्डगतः सत्यः किन्तु पश्चिमदिग्गतः ।
चण्डाद्याश्च सुभद्रान्ता द्वौ द्वौ प्रागादिषु द्विज ! ॥

दक्षिणोत्तरयोगेन तोरणस्तम्भमूलगाः ।
चक्रद्वितयमध्यस्थः पक्षीशस्तोरणोपरि ॥ २९८ ॥

सुसितासु पताकासु सत्याख्यो विहगाधिपः ।
सुपर्णः शोणवर्णासु गरुडः पिङ्गलासु च ॥ २९९ ॥

राजपाषाणवर्णासु तार्क्ष्यसंज्ञः प्रतिष्ठितः ।
नानावर्णपताकायां संपूज्यो विहगेश्वरः ॥ ३०० ॥

इन्द्रादिलोकपालास्ते सिद्धसङ्घपुरस्सराः ।
वज्रादयस्तदस्त्राश्च स्वासु दिक्षु बहिः स्थिताः ॥

मुख्यकल्पेऽथवान्येषु निमित्तेष्वेवमाचरेत् ।
अनुकल्पेऽथ चण्डादीन् वास्तुनाथादिपूर्वकम् ॥

द्वारेषु केवलान् न्यस्य गरुडान्तं प्रपूजयेत् ।
सर्वद्वारेषु वा पूज्यः सहेतीशः पतत्रिपः ॥ ३०३ ॥

विविधासु प्रतिष्ठासु जीर्णोद्धारविधावपि ।
महोत्सवेषु सर्वेषु ध्वजारोहणकर्मणि ॥ ३०४ ॥

मङ्गलाङ्कुररोपे च पवित्रारोहणादिषु ।
तथा चानन्तकलशाद्यभिषेकविधावपि ॥ ३०५ ॥

प्रायश्चित्तेष्वनित्येषु तुलारोहादिषु द्विज ! ।
शान्तिकादिषु मुख्येषु काम्येष्वन्येषु नित्यशः ॥३०६॥

मुख्यकल्पोक्तविधिना कुर्यादन्यत्र चान्यथा ।
सिद्धसङ्घास्तथेन्द्राद्यास्तदस्त्राश्च यथाक्रमम् ॥३०७॥

लोकदिक्पालकास्त्वेते स्वसेनाभिः समावृताः ।
प्रसिद्धप्राग्वशेनैव नित्यं स्वस्थानमाश्रिताः ॥ ३०८ ॥

दिक्पालकत्वादासृष्टेर्यतस्तेषां स्थितिः स्थिरा ।
भगवन्मन्त्रमूर्तीनामनन्तानां महामते ! ॥ ३०९ ॥

स्वस्थानस्था नमस्यन्ति पूजयन्ति जपन्ति च ।
ध्वजाद्यैरुपचारैश्च सम्यक् परिचरन्ति च ॥ ३१० ॥

कैवल्यसिद्धये शश्वद्रुद्रभि स्वानुगै सह ।
पालयन्ति च, भक्तानां बलमोजो ददन्ति च ॥

ध्वंसयन्ति च विघ्नौघमनिशं मन्त्रयाजिनाम् ।
संरक्षन्ति फलं मान्त्रं वर्धमान द्विलक्षणम् ॥ ३१२ ॥

अधिकारमनादीय शक्तिबीजं जगत्प्रभो ।
दिक्सिद्धये दशात्मत्व तदव्यक्तव्यष्टदिशात्मिका ॥

बाह्यत्रिसालभूमिष्ठा. कालाद्या भवदेवता ।
तत्साधकत्वात् पूर्वोक्तदिग्भागनियता. सदा ॥३१४॥

वज्रनाभादयो देवा लोकदिग्द्वारपालकाः ।
तथामरेशपूर्वाश्च संभवप्रभवादय ॥ ३१५ ॥

प्रसिद्धप्राक्क्रमेणैव दिग्द्वारेषु स्थिता क्रमात् ।
कालाद्यमष्टकं नित्यमिन्द्राद्यं रुद्रपश्चिमम् ॥ ३१६ ॥

नियन्ता कालतत्वान्ते तदन्ते सुस्थितं वियत् ।
क्रमात् पूर्वोत्तरे कोणे न्यसेद्दक्षिणपश्चिमे ॥ ३१७ ॥

विद्याऽविद्याद्वयं यद्वै स्वपदस्थेऽग्निमारुते ।
चन्द्रादित्यावुदग्याम्यस्थानयोर्विनिवेश्य च ॥ ३१८ ॥

प्रत्यग्भागगत तोयं प्राग्भागे विन्यसेद्धराम् ।
कुमुदाद्यावृतीशाना लोहिताक्षादयस्तथा ॥ ३१९ ॥

वज्रनाभादिकं मुक्त्वा द्वारपालत्रिरष्टकम् ।
द्वारपालगणास्त्वन्ये सालकोणगणास्तथा ॥ ३२० ॥

प्रोक्तक्रमेण तिष्ठन्ति भगवत्प्रागपेक्षया ।
कुमुदादिगणेशाना पुरग्रामादिवास्तुनि ॥ ३२१ ॥

पालिकावसथे चैव दिक्पालोक्तवशात् स्थिताः ।
त्रिसन्ध्यमेव देवाना बलिदान समाचरेत् ॥ ३२२ ॥

संकल्पितेषु सालेषु द्वारावरणवासिनाम् ।
असंकल्पितसालोक्तदेवाना नाचरेद्बलिम् ॥ ३२३ ॥

तत्तन्निर्माणकाले तान् प्रतिष्ठाप्य यथाविधि ।
देवयात्रा समेतं तु बलिदान समाचरेत् ॥ ३२४ ॥

एव सर्व समपाद्य महापीठोर्ध्वभूतलम् ।
प्राक्षलितं समारुह्य प्राङ्मुखो वाप्युदङ्मुखः ॥ ३२५ ॥

तदूर्ध्वोम्बुजदिक्पत्रे कुमुदादीनथान्तरे ।
सर्वभूतान् पारिषदानाहूय ग्रहसञ्जितान् ॥ ३२६ ॥

संपूज्य सोदकं तत्र बलिशेषं समुत्किरेत् ।
पश्चादाचम्य विधिवत् स्नात्वा वा संविशेद्गृहम् ॥

सर्वद्वारावृतीशाना कोणस्थानां समर्चने ।
नतिप्रणवसंयुक्तस्वनाम मन्त्र ईरित. ॥ ३२८ ॥

महापीठस्थभूताना पार्षदाना गृहात्मनाम् ।
तारान्ते विष्णुशब्द च नियुञ्ज्याद्युदितक्रमात् ॥३२९॥

सर्वकोणगता मन्त्रा फडन्ता समुदीरिता. ।
सर्व समुदिता मन्त्रा स्वाहान्ता होमकर्मणि ॥ ३३० ॥

ध्यात्वैवमर्च्य तन्मन्त्रैरर्घ्याद्यैरुपचारकै. ।
दर्शयेदावृतीशाना मुद्रा तर्जनिसञ्जिताम् ॥ ३३१ ॥

द्वारपालगणाना तु चण्डाद्युक्तमनन्तरम् ।
धर्माद्यावरणादूर्ध्व हेतुना येन केनचित् ॥ ३३२ ॥

बलिदानमशक्यं चेत्तत्रत्याना यथाक्रमम् ।
सर्वतोभद्रपूर्वेषु द्विगुणीकृत्य चाचरेत् ॥ ३३३ ॥

मुख्यकल्पे तथान्यत्र यथाशक्त्यावृतिक्षितौ ।
तद्बाह्यावृतिदेवानामावृत्यावृत्य तर्पयेत् ॥ ३३४ ॥

द्वारोपद्वारपालाना तस्मिन् द्वारे समर्पयेत् ।
महापीठोदिताना च तद्द्वाराग्रगमण्डले ॥ ३३५ ॥

ध्यानोत्थाना तु सञ्चारे न दोषः केन हेतुना ।
तत्तदावरणद्वारदेशेषूक्तक्रमेण तु ॥ ३३६ ॥

द्रव्यमूर्तिगताना च सचारः स्यादनिष्टद. ।
एवमावृतिदेवाना त्रिसन्ध्य बलिमाचरेत् ॥ ३३७ ॥

नित्योत्सवार्थबिम्बस्य सन्निधौ तत् समाचरेत् ।
नृत्तगेयादिसयुक्तं वेदघोषसमन्वितम् ॥ ३३८ ॥

नित्योत्सवार्थबिम्बे तु यानान्निपतिते भुवि ।
उत्तमं स्नपनं कृत्वा शान्तिहोमं समाचरेत् ॥ ३३९ ॥

यानमारोप्य तद्बिम्ब पुनर्नित्योत्सवं चरेत् ।
द्वादशाहं व्रतं कुर्यात् साधक खिन्नमानस. ॥ ३४० ॥

जपेत् स्वमन्त्रायुतकं यदि भेदादिदूषिते ।
विधिवत् तत् समाधाय कृत्वा संप्रोक्षणं तत' ॥३४१॥

उत्सवं शेषमापाद्य खिन्नचित्तस्तु साधक ।
तदारभ्य निराहारो ब्रह्मचर्यव्रते स्थित. ॥ ३४२ ॥

चतुष्कमयुताना तु स्वमन्त्रस्य तदा जपेत् ।
तत्र त्रिरात्रं षडह द्वादशाह द्विपक्षकम् ॥ ३४३ ॥

व्रतमाचर्य यत्नेन पात्रेभ्यो दानमाचरेत् ।
गोभूहेमादिकाना तु यथाशक्ति द्विजोत्तम ! ॥ ३४४ ॥

दैवाद्बृहति भङ्गे वा तदा बिम्बान्तरेण तु ।
स्नपनादिनियुक्तेन बलिदानेस्तु केवले ॥ ३४५ ॥

कर्मशेष समापाद्य कृत्वा मन्त्रविसर्जनम् ।
जीर्णोद्धारक्रमेणैव व्रताचरणमारभेत् ॥ ३४६ ॥

जपायुतचतुष्क च त्रिरात्राद्य चतुष्टयम् ।
यावद्बिम्बसमापत्तिर्भूय कृच्छ्रादिक चरेत् ॥ ३४७ ॥

बिम्बारम्भदिनात् पूर्व ततस्त्वेकादशाह्निकम् ।
व्रत कृत्वा तु देवे तु बिम्बारम्भदिने द्विज ! ॥ ३४८ ॥

संपूज्य द्वादशाचार्यान् समभूल्यं पृथक् पृथक् ।
तेभ्यो द्वादशदानानि दत्वा गोभूतिलानि वा ॥ ३४९ ॥

एतेषा सन्निधौ भूयो बिम्बापादनमारभेत् ।
यद्वा बिम्बं समादध्यात् प्रतिष्ठादिक्रमाचरेत् ॥ ३५० ॥

गोभूहेमादिकाना तु दानं चापि समाचरेत् ।
जातलोकापवादस्तु भूयश्च व्रतमाचरेत् ॥ ३५१ ॥

यावल्लोकापवादस्तु शान्त. स्यात्तावदाचरेत् ।
मन.प्रसादपर्यन्तकालं च व्रतमाचरेत् ॥ ३५२ ॥

अन्येषामपि बिम्बाना जाते भेदादिके सति ।
एवमेव भवेद्विप्र ! प्रायश्चित्तविधिक्रमः ॥ ३५३ ॥

शूद्रस्याराधकस्यैवं प्रायश्चित्तं समीरितम् ।
वैश्यस्य द्विगुण त्वेतत् त्रिगुणं क्षत्रियस्य तु ॥ ३५४ ॥

चतुर्गुण ब्राह्मणस्य प्रायश्चित्त समीरितम् ।
मनुष्यस्थापिताना तु बिम्बाना भेदनादिके ॥ ३५५ ॥

सञ्जाते साधकस्यैवं प्रायश्चित्तं समीरितम् ।
आर्षे तु भगवद्बिम्बे तदेव द्विगुणं भवेत् ॥ ३५६ ॥

दैवे प्रतिष्ठिते बिम्बे तदेव त्रिगुणं भवेत् ।
सिद्धप्रतिष्ठिते बिम्बे तदेतत् स्याच्चतुर्गुणम् ॥ ३५७ ॥

स्वयंव्यक्तेषु बिम्बेषु जाते भेदादिके सति ।
प्रायश्चित्त यथोक्त तु भवेत् पञ्चगुण द्विज ! ॥ ३५८ ॥

द्विविध स्यात् स्वयव्यक्त बिम्बं भगवतो विभो ।
सालग्रामशिलारूपैरितरैस्तु शिलादिभि ॥ ३५९ ॥

उभयत्र समानं स्यात् प्रायश्चित्त समीरितम् ।
तत्रापि हि विशेष स्यात् स्वयंव्यक्तादिषु द्विज ! ॥

पूजाया वर्तमानाया समाधानादिकं चरेत् ।
प्रायश्चित्तादिक सर्व सविशेष समाचरेत् ॥ ३६१ ॥

स्वयव्यक्तादिकानां तु विना मर्त्यप्रतिष्ठितम् ।
सर्वेषामपि बिम्बाना प्राप्तमेकतम तु यत् ॥ ३६२ ॥

स्वीकारसमये विप्र ! लक्षणादिविवर्जितम् ।
खण्डित स्फुटितं वापि यथावस्थितमेव हि ॥ ३६३ ॥

स्वीकृत्याराधयेन्नित्य न दोषस्तस्य विद्यते ।
सालग्रामशिलाबिम्बे तत्तन्मूर्तिविनिर्णयम् ॥ ३६४ ॥

तत्तद्व्यवस्थितेश्चिह्नैर्ज्ञात्वा सम्यक् समर्चयेत् ।
पश्चाद्भेदादिके जाते प्रायश्चित्त समाचरेत् ॥ ३६५ ॥

पूर्वोदितं प्रयत्नेन साधक क्षीणमानसः ।
चोरभूवारिवन्ह्याद्यैर्जाते भेदादिकेऽपि च ॥ ३६६ ॥

बिम्बे चापहृते वापि मार्जाराद्यैश्च जन्तुभि ।
भेदादिकेऽपि संजाते प्रागुक्तं साधकश्चरेत् ॥ ३६७ ॥

तस्माद्दिनात् समारभ्य प्रायश्चित्तं तु यत्नतः ।
यस्मात् प्रागार्जितं पापं कर्म तत्रापि कारणम् ॥३६८॥

तस्मात्तच्छान्तये वापि ह्यपवादस्य शान्तये ।
प्रायश्चित्तं तु कर्तव्यं विहितं प्राक् प्रयत्नत. ॥ ३६९ ॥

अन्यथा पातकी स स्याद्देतस्मात् पातकाद्द्विज ! ।
प्रमादत कृतेप्येवं प्रायश्चित्त समाचरेत् ॥ ३७० ॥
बुद्धिपूर्वकृते भेदे प्रायश्चित्तैर्न निष्कृति ।
अवश्य दण्ड्य एव स्यात् स पापिष्ठोऽतिदुर्मति. ॥
स्वप्रमादकृते भेदे जन्त्वन्तरकृतेपि वा ।
साधको ह्यनुतापार्तो नाचरेद्यदि कीर्तितम् ॥ ३७२ ॥
प्रायश्चित्तं तथा सोपि दण्ड्य. स्यात् प्रथमं तत. ।
प्रायश्चित्त च वै कुर्यादयोग्यस्त्वन्यथा भवेत् ॥ ३७३ ॥
गोपनपि च दोषस्य तस्य भेदादिकस्य च ।
दण्डश्च प्रायश्चित्तं च विधेयमुभयं भवेत् ॥ ३७४ ॥
एव भेदादिके जाते भय स्याद्राजराष्ट्रयो ।
तच्छान्त्यै सप्तदिवसं यजेत् कुम्भस्थलादिकम् ॥
एकस्मिन् वा त्रिसप्ताह विम्बसस्थं च मन्त्रतम् ।
दोषे प्रसिद्धे भेदादौ प्रायश्चित्तं समीरितम् ॥ ३७६ ॥
अप्रकाशे यथोक्तात्तु चतुर्थांशं समाचरेत् ।
पूर्व त्वपहृतं विम्बं भूयः प्राप्तं यदि द्विज ! ॥ ३७७ ॥
प्रायश्चित्ताद्यथोक्तात्तु यत्नेनार्धं समाचरेत् ।
विम्बाना तु क्षते जाते शृणु दोषान् विशेषत. ॥
क्षतमिन्द्रियचक्रस्थं कर्तुर्भवति दोषदम् ।
आकण्ठान्नाभिपद्मान्तं मन्त्रस्थं पुत्रमृत्युकृत् ॥ ३७९ ॥
पार्श्वद्वये तु जायाया. पृष्ठस्थ भ्रातृहानिदम् ।
नाभेर्यन्मेढ्रपर्यन्त स्थानमासाद्य तिष्ठति ॥ ३८० ॥
क्षतं सुतशिशूना च नाशकृद्भवति द्विज ! ।
आकटे. पायुपर्यन्तं भगिनीना क्षयावहम् ॥ ३८१ ॥
ऊरुमूलाच्च जान्वन्तं यत्र यत्र भवेत् क्षतम् ।
धनधान्यपशूना च क्षयो भवति सर्वदा ॥ ३८२ ॥
जान्वो. पादतलान्तं च भृत्यवर्गस्य दोषदम् ।
सर्वेषामनुकम्पार्थमात्मनश्चापि तृप्तये ॥ ३८३ ॥

कर्ता कमलसंभूत ! क्षतमक्षतता नयेत् ।
अल्पक्षते समाधानं विहितं तु निबोध मे ॥ ३८४ ॥
योजयेच्चित्रबिम्बस्य गलितं गन्धभावितै. ।
सितरक्तादिके रागै. पावनैरस्त्रमन्त्रितैः ॥ ३८५ ॥
मृण्मयाना तु बिम्बाना मध्वाज्यक्षीरमिश्रया ।
मृदा कौशेयसंपूर्णयुक्तया हेमोदसिक्तया ॥ ३८६ ॥
सन्धानं कारयेद्विप्र ! दारुजस्य निबोधतु ।
भेदे भङ्गे च सन्दध्यादस्त्रशस्त्रद्वयेन तु ॥ ३८७ ॥
अश्मजाना क्षते जाते सति रत्नशलाकया ।
सहेमया च विहितं घृष्टशाणस्य घर्षणम् ॥ ३८८ ॥
मनुष्यनिर्मिताना तु ह्यश्मजाना बृहत्क्षते ।
सर्वथा विहितस्त्याग स्वय व्यक्तादिकेषु तु ॥ ३८९ ॥
शिलामयेषु बिम्बेषु भिन्न भग्नं च योजयेत् ।
सुवर्णनिर्मितै. पट्टैर्यथा दृढतरं भवेत् ॥ ३९० ॥
यद्वा तदङ्गेर्हेमेन कृत्वा सम्यङ्नियोजयेत् ।
दारुजे लोहजेष्वेवं स्वयं व्यक्तादिकेष्वपि ॥ ३९१ ॥
भेदे भङ्गे समाधि स्यात् स्वय व्यक्तादिबिम्बवत् ।
रत्नजेऽपि समाधानमेवमेव समाचरेत् ॥ ३९२ ॥
सालग्रामशिलाबिम्बं भिन्नं भग्नं बृहत् क्षतम् ।
अल्पक्षतं च सौवर्णै. पट्टैर्दृढतरं यथा ॥ ३९३ ॥
बन्धयेल्लोहजे बिम्बे शृणु मर्त्यप्रतिष्ठिते ।
केवलस्य हि हैमस्य यथालाभ क्षते क्षिपेत् ॥ ३९४ ॥
स्वर्णरत्नमयं चूर्ण द्वादशाक्षरमन्त्रितम् ।
अन्यथा तूत्थिते बिम्बे क्षतं सम्यङ्महामते ! ॥३९५॥
ईषत्सुवर्णमिश्रेण पूरयेत् स्वेन धातुना ।
स्वयं व्यक्तादिकेऽप्येवं मुख्यकल्पे समाचरेत् ॥ ३९६ ॥
प्रासादे मण्डपे वापि गोपुरादिषु वा द्विज ! ।
शोभार्थं सस्थिताना च बिम्बाना पररूपिणाम् ॥

व्यूहाना विभवाना च सदा भगवतो विभो. ।
भेदादिके तु सञ्जाते समादध्यात् तथैव तु ॥ ३९८ ॥

तत्तत्सन्निध्यनुगुण प्रतिष्ठादिकमाचरेत् ।
प्रायश्चित्त समभ्यूह्य साधकस्तु समाचरेत् ॥ ३९९ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहिताया क्रियाकाण्डे द्वारावरणदेवताध्याननिर्णय,
बलिबिम्बादिपतन भङ्ग अङ्गवैकल्य प्रायश्चित्त, दारुजादिबिम्बसमाधान नाम एकादशोऽध्याय ॥

श्री.

द्वादशोऽध्यायः ॥

मनक —

जाते ह्याकस्मिके लोपे सद्व्यापारस्य नित्यश ।
स्नानादियोगनिष्ठस्य तथा नैमित्तिकस्य च ॥ १ ॥

वत्सरोत्सवनिष्ठस्य विविधस्य महामते ! ।
कृच्छ्रचान्द्रायणादीना सद्वृत्तानां तथैव च ॥ २ ॥

चतुर्णामाश्रमस्थाना वर्णाना च स्त्रियस्तथा ।
श्रेष्ठमध्यमवित्ताना न्यू(ज)नानामपि तत्वत ॥ ३ ॥

भक्ताना पुण्डरीकाक्षे श्रद्धासंयमसेविनाम् ।
यावज्जीवावधि कालं तत्पूजाकृतचेतसाम् ॥ ४ ॥

साक्षात्तन्मन्त्रनिष्ठाना यथावन्मुनिपुङ्गव ! ।
पातत्राणमुपाय तु श्रोतुमिच्छामि साम्प्रतम् ॥ ५ ॥

कृतेन येन भक्ताना जायते कृतकृत्यता ।

शाण्डिल्य —

वक्ष्ये सम्यङ्महाबुद्धे ! सारमुद्धृत्य सर्वत ॥ ६ ॥

सर्वलोकहितार्थाय सावधानेन चेतसा ।
लोप(भ)बुद्धि विना यस्य भोगानामप्यसंभव. ॥ ७ ॥

सामर्थ्येन विना यस्य कृच्छ्रादीनां वरिच्युति ।
ज्वरादिव्याधिदोषेण जात यस्याह्निकक्षयम् ॥ ८ ॥

चातुर्मास्यस्य चाप्राप्ति. यस्य स्वातन्त्र्यतो विना ।
तस्य तस्य महाबुद्धे ! शृणु यद्धितं हितम् ॥ ९ ॥

सास्पर्शिकानां भोगाना मात्राविक्तं हि पूरणम् ।
हृदयङ्गमसंज्ञानामन्न च हविषा प्लुतम् ॥ १० ॥

औपचारिकभोगाना बीजानि विविधानि च ।
कृच्छ्रचान्द्रायणादीना व्रताना परिपूरक. ॥ ११ ॥

विशेषार्चनसंयुक्तश्चातुर्मास्यस्य संयमः ।
सौत्र प्रतिसरं चित्र मुक्ताहारोपम शुभम् ॥ १२ ॥

शमं नयति भक्ताना सर्वदा लोकमाह्निकम् ।
यथाश्वमेधं विप्राणा सर्वेच्छापरिपूरकम् ॥ १३ ॥

राजसूय नृपाणा च भक्तानां भूषणं तथा ।
भूषणाना यथा मध्ये कौस्तुभं वरभूषणम् ॥ १४ ॥

ज्ञेयं पवित्रकं तद्वद्भोगजालस्य चान्तरे ।
यत् पूरयति भक्ताना व्यापारं पारमेश्वरम् ॥ १५ ॥

भोगमोक्षाप्तये शश्वद्भोगस्तस्मात्तु कोऽधिकः ।
भक्ताना सततं भक्त्या सालोक्यं विदधाति वै ॥ १६ ॥

सामीप्यं साधकाना च नानासिद्धिसमन्वितम् ।
सायुज्यं साधकेन्द्राणा स्वमन्त्रात्मनि यच्छति ॥ १७ ॥

तदुत्तरायणेऽतीते चातुर्मास्यस्य मध्यतः ।
कुर्याच्छुभे दिने विप्र ! सर्वदोषविवर्जिते ॥ १८ ॥

कालोऽपि त्रिविध प्रोक्तश्चातुर्मास्योपलक्षित ।
आषाढपञ्चदश्यास्तु यावद्वै कार्तिकस्य च ॥ १९ ॥

संपूर्णचन्द्रदिवसं तं कालं चान्द्रमन्तिमम् ।
आकर्कटकसंक्रान्तेस्तुलाभोगक्षयावधि ॥ २० ॥

कालं तमष्टपक्षं च सौरं मध्यमसंज्ञितम् ।
एकादश्यादि (मा) वाऽन्तो यश्चातुर्मास्योपलक्षित. ॥

काल तं वैष्णव विद्धि तूत्तमं सर्वसिद्धिदम् ।
अप्राप्तेरस्य कालस्य त्वन्तरायेण केनचित् ॥ २२ ॥

निर्वाहणीयो ह्यपर. कालश्चान्द्रायणादिना ।
सम्पाद्य चैव तन्मध्ये विधिवद्यागपूरकम् ॥ २३ ॥

प्रावृट्काले प्रवृत्ते तु त्रैलोक्योदरवर्तिनाम् ।
मनुष्यामरसिद्धाना कर्तव्य चाग्रवर्तिनाम् ॥ २४ ॥

प्रवर्तन्ते हि वै येन श्रद्धया वत्सर प्रति ।
महत्यस्मिन् महाबुद्धे ! व्यापारे पारमेश्वरे ॥ २५ ॥

विभो शयनसंस्थस्य काले पुष्पफलाकुले ।
गगने लम्बमाने तु सबलाकैर्बलाहकै ॥ २६ ॥

कुमुदोत्पलकल्हारैर्भूषिते वसुधातले ।
वनोपवन उद्यानैर्हरिते शाद्वलादिकैः ॥ २७ ॥

शालिसस्यादिकैर्युक्ते पल्वलोदकशोभिते ।
पवित्रक कृतं विष्णोरनन्तस्यातितुष्टिदम् ॥ २८ ॥

तस्माद्यत्नेन तत् कुर्याच्चातुर्मास्यस्य मध्यत. ।
श्रावण्यां शुक्लपक्षे तु द्वादश्यां द्विजसत्तम ! ॥ २९ ॥

आदावन्ते तथा कुर्याद्द्वादशीष्वखिलासु च ।
सङ्क्रान्तिषु च सर्वासु पौर्णमासीषु वा द्विज ! ॥३०॥

अमावास्याखशेषासु तृतीयासु तथैव च ।
नभस्येषु च रोहिण्यामष्टम्यां च महामते ! ॥ ३१ ॥

प्रथमा च द्वितीया च पञ्चमी च त्रयोदशी ।
दशम्येकादशीत्येवमेतास्वपि यथारुचि ॥ ३३ ॥

कृष्णपक्षेऽप्रशस्ता.स्युः शुक्लपक्षे विशेषत. ।
चन्द्रो गुरुस्सितश्चान्द्रो ज्ञेयास्त्वेते शुभप्रदा. ॥ ३३ ॥

पवित्रारोहणादौ तु नक्षत्राणि शृणुष्व मे ।
ह्युत्तरासु च रेवत्यामश्विन्यां भरणीषु च ॥ ३४ ॥

पुनर्वसौ तथा हस्ते रोहिण्यां श्रवणेऽपि च ।
वैष्णवेष्वथ ऋक्षेषु तत्क्षणेष्वखिलेषु च ॥ ३५ ॥

चातुर्मास्यस्य कालस्य तूत्थानद्वादशी तु या ।
षडशीतिमुखा दिव्या तस्यामारोपयेत्तु य. ॥ ३६ ॥

पवित्रकं जगद्योने. स पवित्रीकरोति च ।
अतीता वर्तमानां च एष्या स्वकुलसन्ततिम् ॥ ३७ ॥

तत्र सन्निहित. साक्षाद्भानानिर्माणविग्रहै. ।
भक्तानां पुण्डरीकाक्ष. परमात्माच्युतो हरि. ॥ ३८ ॥

यद्यप्येवं महाबुद्धे ! भक्तना नित्यमेव हि ।
नारायणस्तु मन्त्रात्मा स्थित. सन्निहित. स्वयम् ॥

तथापि बलवत्ता वै तत्तिथेस्तत्र कर्मणि ।
सन्निधि भजते येन मन्त्रिणा मन्त्रराट् प्रभु ॥ ४० ॥

ग्रीष्मकाल समासाद्य यथार्कस्तीक्ष्णतां व्रजेत् ।
स्वरूपमजहन्नेव सन्निधानतरं विभो. ॥ ४१ ॥

सत्पात्रदेशकालानामासृष्टे स्थितये तु वै ।
अतः पवित्रकं तस्यामन्यस्या तदसम्भवात् ॥ ४२ ॥

कार्य क्रियापरैर्भक्त्या साखण्डा येन जायते ।
पवित्रारोहण विष्णोर्वर्जयेदितरेषु च ॥ ४३ ॥

प्रासादस्याग्रत. कुर्यात्तदर्थ मण्टपं द्विज ! ।
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ॥ ४४ ॥

तृतीयावरणे वाथ चतुर्थे पञ्चमेऽपि वा ।
अग्रालाभे तदन्यत्र यथावाञ्छितदिग्गतम् ॥ ४५ ॥

चतुरश्रं समं वापि प्राक्पश्चिमदिगायतम् ।
सौम्ययाम्यायतं वापि कर्तुरिच्छानुरूपत. ॥ ४६ ॥

तथा प्रागाननं यद्वा यथाभिमतदिङ्मुखम् ।
द्वाविंशतिधनुर्मान मण्टपं चोत्तमं भवेत् ॥ ४७ ॥

अष्टादशधनुर्मानं मण्टपं मध्यमं भवेत् ।
अधमं द्वादशधनुर्मानं स्यादथवा द्विज ! ॥ ४८ ॥

पञ्चहस्तात् समारभ्य द्विद्विहस्तविवर्धनात् ।
त्रिसप्तकरपर्यन्तं मानैर्नवविधं भवेत् ॥ ४९ ॥

यद्वोत्तमं दशकरं मध्यमं चाष्टहस्तकम्।
षड्ढस्तमधमं विद्यात् क्षुद्रं हस्तत्रयायतम् ॥ ५० ॥

त्रिंशत्करावसानं वा षट्करात् पञ्चविंशति ।
एक संगृह्यमानेषु ह्येषु वित्तानुरूपत. ॥ ५१ ॥

सोपपीठमधिष्ठान केवलं वा मसूरकम्।
अधिष्ठानोपरिस्तम्भं प्रस्तरं च त्रिवर्गकम् ॥ ५२ ॥

कपोतवृतिसयुक्तं यद्वोक्ताकृतिवर्जितम्।
एकत्रिपञ्चसप्तादिभित्तिभेदै. समावृतम् ॥ ५३ ॥

प्रत्यङ्गोक्तैरलङ्कारैर्युक्तं वा तद्विवर्जितम्।
शिलयेष्टकया वापि पक्वया वाप्यपक्वया ॥ ५४ ॥

एकद्वार चतुर्द्वारं यद्वा द्वारद्वयान्वितम्।
भित्तियुक्तमयुक्तं वा कोणभित्तियुत तु वा ॥ ५५ ॥

केवल वा प्रपामात्रमुक्तलक्षणवर्जितम्।
क्षिप्रकर्मप्रसिद्ध्यर्थं शरकाष्ठमयं शुभम् ॥ ५६ ॥

गवाक्षकान्वितं चैव द्वारैस्तु परिभूषितम्।
छन्नं वितानकेनोर्ध्वं प्राकार परिकल्पयेत् ॥ ५७ ॥

क्षेत्रसङ्कोचविस्तार कर्तुरिच्छानुरूपतः।
शिल्पशास्त्रानुसारेण कृत्वैवं मण्टप द्विज ! ॥ ५८ ॥

यागार्थं सुशुभं विप्र ! तन्मध्येऽथ प्रकल्पयेत्।
दृढा समा तदाकारामीषत् प्रागुत्तरप्लवाम् ॥ ५९ ॥

प्रोच्छ्रिता च विशेषेण स्थला दर्पणसन्निभाम्।
सामान्या न भवेद्येन मेदिनीमण्टपस्य तु ॥ ६० ॥

द्विद्विकेनाङ्गुलीना तु प्रोन्नतेर्यावदष्टकम्।
एकवृद्ध्याल्पमानाना यागाना तु स्थलांगणम् ॥ ६१ ॥

नवाङ्गुलोन्नतेस्तावद्यावत्पञ्चदशाङ्गुलम्।
प्रोन्नतत्वं स्थलानां च मध्यमानमितात्मनाम् ॥ ६२ ॥

चतुर्विंशत्यङ्गुलान्तमुच्छ्रायं षोडशाङ्गुलात्।
प्रागुक्तवृद्ध्या कर्तव्यं ज्येष्ठमानमितात्मनाम् ॥ ६३ ॥

एतदुच्छ्रायमानं च कथितं ते स्थलासु च।
पादमर्धं तु हस्तं वा विस्तारात् सर्वदिक्षु वै ॥ ६४ ॥

स्थलानामिष्टाकद्वैश्च चिन्वीयात् प्रथमं तत ।
मृदा सम्पूर्य तन्मध्यमीषद्वालुकयान्वितम् ॥ ६५ ॥

परीक्ष्य केशकीटादीनाकोट्य तदनन्तरम्।
यावद्भवति पूर्वोक्तलक्षणं वा विशेषत ॥ ६६ ॥

स्थलां मध्योन्नतां रम्या सप्ताहं संपरीक्ष्य सा।
न ददाति यथाभेदं यागयोग्या भवेत्तदा ॥ ६८ ॥

तदूर्ध्वं वेदिकां कुर्यात् अनेकचरणान्विताम्।
तोरणैश्च समायुक्ता विभवेच्छानुरूपत ॥ ६८ ॥

पावनैर्यज्ञकाष्ठैश्च सुदृढै सरले. समे ।
यथालक्षणयुक्तानि तोरणानि चतुर्दिशि ॥ ६९ ॥

द्वाराणां बाह्यतो विप्र ! तदन्तर्वा नियोजयेत्।
त्रीणि त्रीण्यथवा सम्यगेकैकस्यां न्यसेद्दिशि ॥ ७० ॥

बुद्ध्वा मण्टपविस्तार पञ्चक सप्तकं तु वा।
एतानि हेमरत्नाद्यैश्चित्रयेद्विभवे सति ॥ ७१ ॥

श्रीवृक्षोदुम्बरवटप्लक्षोत्थैरथवा द्विज !।
पूर्वोत्तरपर्यन्तं तोरणानां चतुष्टयम् ॥ ७२ ॥

चतुष्टयं चतुर्दिक्षु ह्येषामेकैकमेव वा।
तोरणाना समुच्छ्रायस्तम्भायामसम. स्मृत ॥ ७३ ॥

स्तम्भद्वयान्तरस्थेन मानेन स्यात्तु विस्तृतिः।
स्तम्भमस्तकमानेन साधिकेन सदैव हि ॥ ७४ ॥

तद्दण्डौ विन्यसेद्भूमौ स्तम्भाभ्यन्तरगा स्थिति.।
सदैव दृक्स्वरूपाणां कार्या वेदविदांवर ! ॥ ७५ ॥

द्वाराणां बाह्यतो विप्र ! तोरणानां यथा(दा) स्थिति. ।
तलाच्छिखरपर्यन्तं मानमुच्छ्रायतस्तदा ॥ ७६ ॥

सार्धं सम वा द्विगुणं तद्दण्डेषु च भूगतम्।
चक्रद्वितयमध्यस्थं पक्षमण्डलमण्डितम् ॥ ७७ ॥

तोरणे तोरणे कुर्याद्गरुडं चोर्ध्वसस्थितम्।
मत्स्यादीनवतरांश्च प्रादुर्भावाननेकश. ॥ ७८ ॥

चित्रोदितेन विधिना चतुर्दिक्षु समालिखेत्।
मुनिसिद्धामरव्रातैरनेकाद्भुतदर्शिभि. ॥ ७९ ॥

द्वीपाचलवनोद्यानैर्बहुभिर्मृगयूथपै ।
सर सारसकल्हारैर्जलक्रीडापरान्वितै ॥ ८० ॥

खेचरैरङ्गनायुक्तैर्नृपैर्विद्याधरादिकै ।
प्रशान्तमानसैर्विप्रैरात्मध्यानपरायणै ॥ ८१ ॥

एवमाद्यैरनन्तैश्च व्यापारैश्चित्रसंभवै ।
तद्यागवेश्म सकलं रञ्जनीयं प्रयत्नत. ॥ ८२ ॥

कुर्यात् सुधाविलिप्तं वा भूषयेत्तदनन्तरम् ।
दर्पणैश्चामरैर्वस्त्रैर्दुकूलैर्विविधोज्ज्वलै. ॥ ८३ ॥

घण्टाभिरर्धचन्द्राद्यैरातपत्रैर्मनोहरै. ।
प्रोच्छ्रितै. कदलीपूगैर्द्रुमाङ्गे पावनैर्दृढै ॥ ८४ ॥

मध्वाज्यदधिसत्क्षीरसपूर्णै कांस्यभाजनै ।
शालितण्डुलपात्रैश्च सहिरण्यै फलै. शुभै. ॥ ८५ ॥

लाजसिद्धार्थकैर्बीजभाजनै. पङ्कसान्वितैः ।
सत्सुगन्धैस्त्वगेलाद्यै. पर्ण पूगफलैस्तथा ॥ ८६ ॥

मधूकवदरद्राक्षा इक्षुभिस्त्रिफलै. फलै. ।
यथर्तुप्रभवै पुष्पैर्बहुभि प्रकरीयकै ॥ ८७ ॥

इत्येवमाद्यैर्विविधैर्भोगपूगैस्तु पावनै. ।
पवित्रेण वितानेन सुसितेनोज्ज्वलेन वा ॥ ८८ ॥

चक्राम्बुरुहचिह्नेन भूषयेच्च तदूर्ध्वत. ।
स्तम्भान् सवेष्टयेत् पश्चाद्दुकूलैर्विविधै पृथक् ॥८९॥

प्रागुत्तरादिदिग्भागाद्यावत्कोणं च मारुतम् ।
सितादिवर्णभेदोत्था पताकास्तत्र योजयेत् ॥ ९० ॥

एवं रागविभागेन प्रत्यग्भागाच्च वै पुन. ।
दक्षिणाशावधिर्यावद्द्वितीयं च चतुष्टयम् ॥ ९१ ॥

एकैव सर्ववर्णा च नाभौ कार्या वितानके ।
बाह्यतो वेदिकायास्तु मण्डपस्य दिगष्टके ॥ ९२ ॥

वह्निकोणात् समारभ्य यावत्कोण तु शाङ्करम् ।
सितारुणं च पति च कृष्णं कुर्याच्चतुष्टयम् ॥ ९३ ॥

भूयश्चोत्तरदिग्भागाद्यावद्दिक्पश्चिमा द्विज ! ।
तथाविधं चतुष्कं तु ध्वजाना परिकीर्तितम् ॥ ९४ ॥

राजपाषाणवर्णाभ चक्रपक्षीश्वरोपगम् ।
वैजयन्तीत्रय कुर्यात्तोरणे पूर्वदिक्स्थिते ॥ ९५ ॥

दक्षिणे स्फटिकाभं तु आप्ये सिन्दूरवर्चसम् ।
हेमाभं चोत्तरे कुर्यात्तोरणे ध्वजकत्रयम् ॥ ९६ ॥

चतुष्केण पताकाना युक्तं श्वेतादिकेन च ।
एकैकं तोरणं वात्र त्रितयं पञ्चक तु वा ॥ ९७ ॥

अर्धेन तोरणायामात् पताकानां च दीर्घता ।
एवं त्वभिनवं कृत्वा यागार्थं मण्डपं द्विज ! ॥ ९८ ॥

स्नपनाद्युत्सवान्तस्य वैशेषिकगणस्य च ।
पुरा प्रकल्पित वाथ मण्डपं भूषयेत्तदा ॥ ९९ ॥

एव कृते तत. पश्चाद्वेदिका तोरणै. सह ।
विलिप्य चन्दनाद्यैस्तु गन्धवर्णोज्ज्वलै. क्रमात् ॥

चन्दनेन समालभ्य वेदिका केवलेन च ।
वाह्लीकभावितेनैव तेनैवाद्य च तोरणम् ॥ १०१ ॥

लिप्तं मृगमदेनैव कुर्याद्दक्षिणदिग्गतम् ।
तुषारधूलीधवल पश्चिम कारयेत्ततः ॥ १०२ ॥

कुङ्कुमेन समालभ्य केवलेनोत्तरे स्थितम् ।
क्षीरेण चन्दनेनैव कुङ्कुमेन कृता स्थलाम् ॥ १०३ ॥

रजनीचूर्णयुक्तेन हीबेरेणाम्बुना सह ।
पुण्यगन्धौषधीभिस्तु द्वाराणा मण्डपावनिम् ॥ १०४ ॥

ततस्तु विविधैर्धूपैर्बहुभिर्धूपयेद्द्विज ! ।
ततस्तिरस्करिण्या तद्वेष्टयेत् सर्वतो वहि. ॥ १०५ ॥

मण्डपस्योत्तरे भागे कुर्यात् कुण्डं पुरैव तु ।
यद्वा द्विज ! ततोऽन्यत्र यागाग्रस्था च वर्ज्यदिक ॥

दिक्त्रयेऽभिमता या दिक् कुर्यादनलमण्डपम् ।
धूमनिर्गमनोपेतं नानाकुण्डविभूषितम् ॥ १०७ ॥

साद्रे(न्द्रै)श्च सुपलाशैश्च सुयुक्त तोराणादिकैः ।
यद्वा पचनगेहे तु कुण्डं कुर्यात् सलक्षणम् ॥ १०८ ॥

अन्यन्नैमित्तिकार्थं तु पुरा कल्पं तु वा भवेत् ।
एवं कृते ततः कुर्यात् सम्भारग्रहणं द्विज ! ॥ १०९ ॥

सप्तमे पञ्चमे वापि वासरे कर्मवासरात् ।
पूर्वं कृत्वाङ्कुरारो(वा)पं तत कर्म समारभेत् ॥११०॥

तत. प्रवेशयेत्तस्मिन् सम्भारान् यागमण्डपे ।
दशम्या द्विजशार्दूल ! यत्किञ्चिच्चोपयुज्यते ॥१११॥

भूषणादि तत कुर्याद्यथा तदवधारय ।
तेषा द्विविधं रूपं सूक्ष्मस्थूलविभेदत. ॥ ११२ ॥

सर्वभावेन भक्तानां यत् पालयति सर्वदा ।
मनोवाक्चित्तज कृत्स्न व्यापार शुभलक्षणम् ॥११३॥

परिज्ञेयमतस्तस्मात् स्वरूप तस्य यादृशम् ।
फलमेति च वै येन भक्ताना तत्समापनात् ॥ ११४ ॥

यदच्छिन्न जगद्योनेरनन्तप्रसर सितम् ।
विच्छेदमकृतज्ञानामेति नानात्मना स्वयम् ॥ ११५ ॥

जगत्सूत्र तु तद्विद्धि हेमसूत्रादिना तु वै ।
षाड्गुण्यमहिमान यद्धत्ते प्रतिसरात्मना ॥ ११६ ॥

ज्ञानरागोपरक्तं तु युक्त कार्यैस्तु वीर्यजै ।
तैजसैरावृत मन्त्रैर्वलेनावसितं परि ॥ ११७ ॥

ऐश्वर्यमुपचारे तु सम्पत्तौ शक्तिनोऽव्ययम् ।
एवं पवित्रक तावत् परिज्ञात जगत्प्रभो ॥ ११८ ॥

ब्रह्मण्यधिपतौ विष्णौ तथाकारे प्रतिष्ठिते ।
भक्त्या च विधिवद्दत्त ददाति भगवत्पदम् ॥ ११९ ॥

स्थूलस्य व्यतिरिक्तस्य व्यवहारपदस्थितै. ।
पदार्थै कल्पनीया च यथा तदवधारय ॥ १२० ॥

सूक्ष्मं दृढं सित श्लक्ष्ण सूत्रं ब्रह्मप्रसूतया ।
विनिर्मित कुमार्या वा वृद्धया वा विनीतया ॥ १२१ ॥

शुद्धया वा विधवया सम्पादितमथापि वा ।
क्षौम वा पट्टजं वापि केशरोमादिवर्जितम् ॥ १२२ ॥

यथालब्ध समादाय सम्यक् प्रक्षाल्य वारिणा ।
तस्य शुद्धि पुरा कृत्वा दहनाप्यनेन च ॥ १२३ ॥

अवलोक्य स्मरन्मूलं विनिष्पाद्य चतुर्गुणम् ।
चातुरात्म्यव्यपेक्षायामथवाष्टगुणं द्विज ! ॥ १२४ ॥

प्रभवाप्ययबुद्ध्या तु भेदभिन्नोपलक्षितम् ।
केशवादिष्वधिष्ठातृभावेन त्रिचतुर्गुणम् ॥ १२५ ॥

तन्तुभिर्विषमैर्विष्णो समस्य परिवर्जयेत् ।
पावित्रिकी क्रिया यस्माद्विषमा सा न कस्यचित् ॥

पवित्रकाणि कार्याणि तन्तुभिस्तै सुतानितैः ।
मूलमन्त्रादिमन्त्राणा सर्वेषा मुनिसत्तम ! ॥ १२७ ॥

कुम्भस्थमन्त्रमूर्ते. प्राक् कल्पयेद्भूषण द्विज ! ।
अध्यर्धशमजैर्व्यासाद्धाराकारैश्च तन्तुभि ॥ १२८ ॥

शतेनाष्टोत्तरेणाद्य द्विगुणेन द्वितीयकम् ।
त्रिगुणेन तृतीय तु व्यासमेवं तु तन्नयेत् ॥ १२९ ॥

षट्त्रिंशद्ग्रन्थिकं चाद्य द्वितीय द्विगुणं स्मृतम् ।
तृतीय त्रिगुणं कुर्यादेवमेव महामते ! ॥ १३० ॥

मण्डलस्यस्य च विभोस्तथा वह्निगतस्य च ।
विम्बस्थस्य पवित्राणा विशेषमवधारय ॥ १३१ ॥

मालाकृति च शिरसि यथेच्छग्रन्थिपूर्वकम् ।
द्वितीयमसयोर्यावल्लम्बित जानुमण्डले ॥ १३२ ॥

मूर्ध्न पादावधिर्यावत्तृतीयमिति विस्तृतम् ।
आमूर्ध्न पीठपर्यन्तं वनमालापवित्रकम् ॥ १३३ ॥

पृथक्पीठस्य वै कुर्यात् स्वप्रमाणेन शोभनम् ।
विम्बप्रतिसराणा च व्यासश्चानियत. स्मृत ॥ १३४ ॥

सूत्रमानं च पूर्वक्त द्विगुणं सति संभवे ।
त्रिगुणं वा मुनिश्रेष्ठ ! वनमालाख्यभूषणम् ॥ १३५ ॥

अष्टोत्तरेण सूत्राणां सहस्रेण समन्वितम् ।
यद्वा तदर्ध, पाद वा कुर्याद्वित्तानुरूपत ॥ १३६ ॥

लेपभित्तिपटस्थे तु मूलविम्बे यदा द्विज ! ।
कुर्यादुत्सवविम्बस्य भूषणाना तु पञ्चकम् ॥ १३७ ॥

तदापि मूलविम्बस्य भूषणान्यपि पूर्ववत् ।
कल्पयेदाद्यपूर्वाणि विम्बप्रतिसरेषु तु ॥ १३८ ॥

विभवे देवदेवेशं हारपञ्चसमन्वितम् ।
नानाकाराणि तन्तूनि मुक्ताहारसमन्वितम् ॥ १३९ ॥

त्र्यङ्गुलान्तरिता देया. सर्वेषा ग्रन्थय. समा. ।
सङ्ख्यानेन विना सम्यङ्मातुलुङ्गोपमा शुभा. ॥

अष्टोत्तरशतग्रन्थिसंयुक्ता वनमालिका ।
चतु स्थानावतीर्णस्य विभोरामन्त्रणाय च ॥ १४१ ॥

पवित्रमाद्यसदृशमेकैकं वा द्वय द्वयम् ।
सर्वेषा कर्मबिम्बाना तथा वै गोपुरादिषु ॥ १४२ ॥

स्थिताना मन्त्रबिम्बाना भजतां सन्निधि सदा ।
उत्तमादीनि सर्वाणि कुर्याद्वे मुख्यकल्पने ॥ १४३ ॥

प्रकल्पयेत् तत्सदृशं मध्यमेनोत्तमेन वा ।
द्वितय द्वितय वापि ह्येकैक वानुकल्पने ॥ १४४ ॥

अङ्गानामप्युपाङ्गाना लाञ्छनानामपि द्विज ! ।
भूषणाना च शक्तीना तथैव विहगेशितु ॥ १४५ ॥

प्राग्वत्त्रीण्यथवा द्वे द्वे ह्येकैक वाथवा द्विज ! ।
यथेच्छमानसंख्योत्थै सूत्रैस्तु परिकल्पयेत् ॥ १४६ ॥

सूत्रभ्रमसमोपेतैर्गर्भैर्भूषणसञ्चयम् ।
अन्येषा मण्डलाङ्गाना देवाना विभवे सति ॥ १४७ ॥

पवित्रकगण कुर्याद्यथेच्छग्रन्थितन्तुभि ।
तथैव विष्वक्सेनादे परिवारगणस्य च ॥ १४८ ॥

मन्त्रास्त्रकुम्भयोर्द्वे वै ह्येक वै मण्डलस्य च ।
द्वयं च कुण्डानलयो शास्त्रपीठस्य च द्वयम् ॥ १४९ ॥

लिपेर्वाक्तत्वभूतस्य शब्दतत्वस्य च प्रभो ।
घण्टाक्षसूत्रपूर्वाणा क्रियाङ्गाना महात्मनाम् ॥ १५० ॥

बलिपीठादिदेवाना देशान्तरनिवासिनाम् ।
गुर्वादीना चतुर्णा तु हरिवीक्षाप्रलापिनाम् ॥ १५२ ॥

द्विजोत्तमादिवर्णाना नित्यमच्युतभाविनाम् ।
गृहस्थब्रह्मचारीणा यतीनां वनवासिनाम् ॥ १५२ ॥

वृद्धाना जनकादीना भगवत्तत्वयेदिनाम् ।
बन्धूनां भ्रातृपूर्वाणां नारायणरतात्मनाम् ॥ १५३ ॥

जायाया भक्तिनम्राया रताया अर्चने हरे. ।
सम्बन्धिना च मित्राणां भगवद्धामसेविनाम् ॥ १५४ ॥

तदुत्तरसहायानां चातुरात्म्याभिलाषिणाम् ।
भृत्यानां स्वानुकूलानां पुरुषोत्तमयाजिनाम् ॥ १५५ ॥

वृद्धये योग्यतायैव पवित्रीकरणाय च ।
यथाभिमतमानैस्तु तन्तुभिर्ग्रन्थिभिस्तथा ॥ १५६ ॥

कुर्यात् पवित्रनिचयमथवा मुनिसत्तम ! ।
गुर्वादीनां चतुर्णा तु यतीनां च कुटुम्बिनाम् ॥ १५७ ॥

क्रमाच्चतुर्विंशतिभि. सूत्रै षोडशभिस्तथा ।
ततो द्वादशभिश्चैव अष्टाभि.षट्त्रिभिस्तथा ॥ १५८ ॥

पवित्रकाणि कार्याणि ग्रन्थय सूत्रसख्यया ।
आराधकस्य च गुरो कुर्याद्वे भूषणद्वयम् ॥ १५९ ॥

स्थूलकल्पमिद प्रोक्त सूक्ष्मकल्पमत शृणु ।
शिर प्रमाणेनार्चाया भूषण प्रथम स्मृतम् ॥ १६० ॥

चतु शतेन सूत्राणां द्वात्रिंशद्भिस्तथाधिकै ।
सूत्रावतश्च सुसमे परिकल्प्य सुशोभनम् ॥ १६१ ॥

सप्तविंशत्प्रमाणेन दत्वास्मिन् ग्रन्थिसञ्चयम् ।
कर्णादूर्ध्वगतं नाभिप्रमाणेन पवित्रकम् ॥ १६२ ॥

परिकल्प्य द्वितीय च सूत्राणां मुनिसत्तम ! ।
शतत्रयेण च तथा चतुर्विंशद्भिरेव च ॥ १६३ ॥

द्विगुणैर्ग्रन्थिनिचयैरनुगर्भं तु तत् स्मृतम् ।
स्कन्धदेशात् समारभ्य यावत्पादद्वयावधि ॥ १६४ ॥

नेत्रसूत्रैस्त्रिभागोने. सूत्रग्रामैश्च कल्पयेत् ।
त्रिगुणैर्ग्रन्थिनिचयैस्ततोऽन्यद्द्विजसत्तम ! ॥ १६५ ॥

अष्टोत्तरेण सूत्राणा शतेन ग्रन्थिभिस्तथा ।
शिर पूर्वावताराद्वौ यावत्पीठं तु वैष्णवम् ॥ १६६ ॥

सूत्रैर्ग्रन्थिगणैश्चैव गर्भैस्तु विविधैस्तत ।
मण्डलस्य प्रमाणेन कुर्याच्चान्यच्चतुष्टयम् ॥ १६७ ॥

प्रथम पद्ममानेन नाभिमान द्वितीयकम् ।
अरतुल्य तृतीयं स्याच्चतुर्थ नेमिभि समम् ॥ १६८ ॥

एकाशीतिभिरावर्तै सूत्राणां द्विजसत्तम ! ।
अग्ने कुण्डप्रमाणेन ग्रन्थिभिस्तावदेव हि ॥ १६९ ॥

ऋग्यजुःसामरूपाय शब्ददेहाय विष्णवे।"
प्रविश्य कलशस्थानं समीपे तु वरासनं ॥ २०० ॥

प्राङ्मुखः संस्मरेन्मन्त्रं पूर्ववद्व्याप्तिभाविते ।
उपविश्य यथान्यायमन्तर्यागान्तमाचरेत् ॥ २०१ ॥

करादिशुद्धिपूर्वं तु, पश्चादर्घ्यादिकल्पनम् ।
प्राग्वत् कृत्वा ततोऽभ्यर्च्य मन्त्रसङ्घं तु देहजम् ॥

द्वौ द्वौ तु पूर्णकलशौ सौवर्णौ राजतौ तु वा ।
ताम्रजौ मृण्मयौ वाथ सापिधानौ सपल्लवौ ॥ २०३ ॥

पल्लै रत्नादिकैर्युक्तौ सूत्रेण परिवेष्टितौ ।
शालिपीठोपरि स्थाप्य प्रतिद्वारं तु पार्श्वयोः ॥२०४॥

पालिकानां शरावाणां विन्यसेत्तु तथा त्रयम् ।
प्रतिकोणं तु संस्थाप्य घटिकानां त्रयं त्रयम् ॥ २०५ ॥

द्वारयोस्तु ततः कुर्यात् पूर्वोत्तरपश्चिमम् ।
अर्घ्यालभनमाल्यैश्च धूपैर्गुग्गुलुमिश्रितैः ॥ २०६ ॥

वास्वीशः क्षेत्रनाथश्च द्वारलक्ष्मीस्तथा द्विज ! ।
चण्डप्रचण्डौ गरुडः पूर्वद्वारे तु संस्थिताः ॥ २०७ ॥

दक्षे धातृविधातारौ पश्चिमे तु जयेतरौ ।
भद्राख्यश्च सुभद्राख्यो ह्युत्तरे दक्षिणादितः ॥ २०८ ॥

मूलबिम्बे यदा कुर्यात् पवित्रारोहणं तदा ।
मण्डलस्थस्य देवस्य प्रागाद्युत्तरपश्चिमम् ॥ २०९ ॥

संस्थानं द्वारस्थदेवानां यात्राबिम्बे यदा भवेत् ।
तत्प्रागपेक्षया तेषां संस्थानमुदितं तदा ॥ २१० ॥

मुख्येनार्घ्याम्भसा प्रोक्ष्य पृथग्भाण्डे स्थितं पुरा ।
पञ्चगव्यं ततो विप्र ! कल्पयित्वा हृदादिकैः ॥ २११ ॥

कुशोदकं तदस्त्रेण दत्वाद्येनाभिमन्त्रयेत् ।
कल्पयेत् पञ्चगव्यं तु पञ्चोपनिषदेस्तु वा ॥ २१२ ॥

अथ पाणिद्वयेनैव अग्नीषोमात्मकेन तु ।
योग्यतापदवीं नीत्वा शोधयेद्वसुधां ततः ॥ २१३ ॥

मूलेन साम्भसानेन प्रोक्षयेद्यत् पुराहृतम् ।
कौशेयेन पवित्रेण ध्यायमानस्तमेव हि ॥ २१४ ॥

सर्ववीजानि धान्यानि सिद्धार्थकयुतान्यथ ।
कृत्वास्त्रपरिजप्तानि ध्यात्वा ह्यस्त्रसमानि च ॥ २१५ ॥

विघ्नोपशान्तये वेगाद्दशदिक्षु विनिक्षिपेत् ।
संहृत्य बहुकूर्चेन प्राच्यां दिशि निधाय वै ॥ २१६ ॥

ईशानदिशि वा न्यस्त्वा यागस्येच्छानुरूपतः ।
तद्भूमीकृत्य संलिख्य हेतिराट् चन्दनादिना ॥ २१७ ॥

चक्रं ध्यात्वा मण्डपोर्ध्वे पङ्कजं वसुधातले ।
निर्गमे च गदां देवीं शङ्खं च ककुभाष्टके ॥ २१८ ॥

प्राकाराकारदेहां च नानाज्वालासमाकुलाम् ।
शक्तिरूपां गदां वाथ केवलां मन्त्रतो न्यसेत् ॥ २१९ ॥

एवं कृते तदा सम्यग्भवेद्विघ्नविनाशनम् ।
अथादाय दृढं शुद्धमेकरूपं च निर्व्रणम् ॥ २२० ॥

कुम्भं च मृण्मयं रम्यं सौवर्णं वाथ राजतम् ।
रत्नहाटकस्रग्गन्धफलसर्वौषधीयुतम् ॥ २२१ ॥

शुभपादपशाखाढ्यं पट्टस्रग्गन्धभूषितम् ।
गालितोदकसंपूर्णवारिधारान्वितं नवम् ॥ २२२ ॥

चन्दनाद्युपलिप्तं च परितश्चाक्षतान्वितम् ।
वेष्टितं परितः सूत्रैः विकीर्योपरि तन्न्यसेत् ॥ २२३ ॥

तद्देवताशरीरं तु वक्ष्यदं बलवर्चसम् ।
सास्त्रेण चक्रमन्त्रेण मन्त्रयेदथ वर्धनीम् ॥ २२४ ॥

पूर्वोक्तद्रव्यसंयुक्तां परितः सूत्रवेष्टिताम् ।
आवाह्य मन्त्रनाथस्य दक्षिणे कलशोत्तरे ॥ २२५ ॥

विन्यस्य परितस्तत्र स्थापयेत् कलशाष्टकम् ।
सपल्लवं सापिधानं सूत्रेण परिवेष्टितम् ॥ २२६ ॥

कुम्भमध्ये विभोः प्राग्वदासनं परिकल्प्य च ।
तन्मध्ये पुण्डरीकाक्षं समावाह्य विधानतः ॥ २२७ ॥

सन्निधिं सन्निरोधादिभोगयागावसानकम् ।
पूर्ववत् सकलं कृत्वा तस्य दक्षिणदिग्गतम् ॥ २२८ ॥

अस्त्रविग्रहरूपं च ध्यात्वाऽभ्यर्च्य यथाविधि ।
ध्वंसयन्तं च विघ्नानां जालं कर्मावसानिकम् ॥२२९॥

इदमभ्यर्थयेद्देवं सास्त्रं बद्धाञ्जलि स्थितः ।
"यागालय हि विश्वेश ! गृहाण रचितं मया ॥ २३० ॥
आसमाप्त भज विभो क्रियाङ्गाना च सन्निधिम् ।'
ततोऽस्त्रोदकधारा चाप्यच्छिन्ना भित्तिगां नयेत् ॥
प्रदक्षिणेन प्राग्भागात्तत्पदान्तं च तत् स्मरेत् ।
अथवेशानदिग्भागात् तत्पदान्त द्विजोत्तम ! ॥ २३२ ॥
पृष्ठतः कलशौ भ्राम्य तुल्यकाल तु वा पृथक ।
कलशं वर्धनीयुक्त विन्यस्य विकिरोर्ध्वगम् ॥ २३३ ॥
अर्घ्यदान तयोः कृत्वा पुष्पाद्यै पूजयेत् पुनः ।
अस्त्रेण वस्त्रयुग्म तु अहत चाभिमन्त्र्य वै ॥ २३४ ॥
धूपादिवासितं कृत्वा तावुभौ परिवेष्ट्य च ।
अथवा भद्रपीठं तु विन्यसेद्विकिरोर्ध्वगम् ॥ २३५ ॥
सास्त्रं हि मन्त्रकलश तत्राधारगत न्यसेत् ।
चतुस्त्रिद्व्येकभारैर्वा शालिभिर्विष्टरे कृते ॥ २३६ ॥
तावन्मानास्तदर्धान् वा तदूर्ध्वे तण्डुलान् न्यसेत् ।
तत्पादास्तत्समान् वापि तदूर्ध्वे विन्यसेत्तिलान् ॥
तदूर्ध्वे चाहतं वस्त्रयुग्ममास्तीर्य वै शुभम् ।
कलशं वर्धनीयुक्तं तदूर्ध्वे वापि विन्यसेत् ॥ २३८ ॥
प्राग्वत् सास्त्रं तु देवेशमासनादिक्रमाद्यजेत् ।
व्यापारमाचरेद्दिव्यं कुम्भके च स्मरन् विभुम् ॥२३९॥
नानिशं युज्यते यस्मात् तस्मादेषा प्रतिक्रिया ।
विभाव्या मन्त्रिणा कौम्भी आस्त्रीरक्षार्थमेव हि ॥
ततोऽवतार्यो भगवान् स्थण्डिलेऽभ्यर्च्य सासनम् ।
प्रदक्षिणप्रणामान्तं कुर्यात् सर्व तु पूर्ववत् ॥ २४१ ॥
मण्डले कुम्भयागे च प्रोक्षणस्नानमाचरेत् ।
ततस्तु ब्रह्मघोषेण यायाद्देवनिकेतनम् ॥ २४२ ॥
अथ देवगृहं गत्वा पुण्डरीकाक्षमच्युतम् ।
अष्टाङ्गेन नमस्कृत्य पूजयेत् पुरुषोत्तमम् ॥ २४३ ॥
अर्घ्यालभनमाल्यैश्च धूपैरङ्गादिसंयुतम् ।
तत् सर्व योग्यमाहर्तुं पूजान्तरनिवेदितम् ॥ २४४ ॥
पुष्पपूर्व समादाय शिरसा चाभिनन्द्य तत् ।
समर्प्य विष्वक्सेनस्य ह्यस्त्रमन्त्राभिमन्त्रितैः ॥ २४५ ॥
सपीठ भगवद्बिम्ब निर्मलीकृत्य वारिभिः ।
प्रासादं शोधयित्वा तु देवदेवं समर्चयेत् ॥ २४६ ॥
स्नानैस्तु क्षीरपूर्वैर्वा धात्रीफलपुरस्सरैः ।
यथाक्रमोपदिष्टैस्तु चान्यैर्भोगैरकृत्रिमैः ॥ २४७ ॥
प्रदक्षिणप्रणामान्त विशेषात् सर्वमाचरेत् ।
लेपभित्तिपटस्थं तु मूलबिम्बं यदा द्विज ! ॥ २४८ ॥
तदा नैमित्तिके बिम्बे सर्व कुर्याद्विशेषत ।
एतस्य सन्निधौ विप्र ! कृत्वा स्नानमात्रकम् ॥ २४९ ॥
स्नपनाधिकृते बिम्बे नित्यनैमित्तिकेऽपि वा ।
सर्वमन्यत् पवित्रान्त मूलबिम्बे समाचरेत् ॥ २५० ॥
नित्योत्सवार्थबिम्बे तु तदा कुर्यात् तदुत्सवम् ।
तेषामसन्निधौ विप्र ! दर्पणे तत्समीपगे ॥ २५१ ॥
कुर्यात् स्नपनमात्रं तु तदा कुर्यात् तदुत्सवम् ।
दर्भमञ्जरिजे कूर्चे चक्रे वा कुम्भकेऽपि वा ॥ २५२ ॥
प्राग्वदन्यत् समस्तं तु मूलबिम्बे समाचरेत् ।
ततो होमगृह गत्वा कुण्ड सस्कृत्य पूर्ववत् ॥ २५३ ॥
तत्रानलं च संस्कृत्य कुर्याद्वै मन्त्रतर्पणम् ।
पूर्वोक्तविधिना पश्चात् संस्कृतेनाथ वह्निना ॥ २५४ ॥
चरु संश्रापयेच्चुल्या हृदा क्षीराज्यतण्डुलैः ।
समुद्धृत्याज्यपूत त विनिवेद्य यथाक्रमम् ॥ २५५ ॥
कलशस्थलबिम्बानामेकाशं जुहुयात्ततः ।
यद्वा यागसमारम्भात् पूर्व ससाध्य वै चरुम् ॥ २५६ ॥
कलशस्थलबिम्बाना क्रमात् कृत्वा तु पूजनम् ।
सर्व द्विजप्रदानान्तं वह्नौ सन्तर्पयेत्ततः ॥ २५७ ॥
दत्वा पूर्णाहुति पश्चात् प्रयायाद्बिम्बसन्निधिम् ।
पुरा यस्मिन् दिने विप्र ! अतीते वत्सरे कृतः ॥ २५८ ॥
पवित्रकोपसहारस्तद्दिनादादित स्मरन् ।
अर्घ्यपुष्पादिबलिभिः पूजयेत् सर्वमध्वरम् ॥ २५९ ॥

तद्वदाज्यं सपूर्णान्तं क्रमेण जुहुयात्तत ।
मण्डलाग्रमथासाद्य मुद्रावन्धादिकं तु वै ॥ २६० ॥

कृत्वा प्रणामपर्यन्तं ततस्त्वेक पवित्रकम् ।
वासितं धूपगन्धाभ्या चतु.स्थानस्थितस्य च । २६१ ॥

विनिवेद्य क्रमेणैव धूपं दत्वार्घ्यपूर्वकम् ।
" निजानन्दमयैर्भोगैर्नित्यतृप्तस्त्वमव्यय ॥ २६२ ॥

तथापि भक्त्याऽतृप्तोऽह त्वा यजाम्यात्मसिद्धये । "
इति विज्ञाप्य देवस्य ततोऽस्त्रेणार्घ्यवारिणा ॥ २६३ ॥

सर्व भूषणपूर्व तु संप्रोक्ष्य द्रव्यसञ्चयम् ।
शालिभिस्तण्डुलैर्वापि तिलैर्वा त्रितयेन वा ॥ २६४ ॥

चतुस्त्रिद्व्येकभारैर्वा कृते पीठेऽथवा स्थले ।
निवेश्य वायुदिग्भागे स्थलस्थप्रागपेक्षया ॥ २६५ ॥

यद्वा पश्चिमदिग्भागे देशिकेच्छानुरूपत ।
सितवस्त्रान्वितेनैव त्वक्षतेनैव वर्मणा ॥ २६६ ॥

अर्चयित्वास्त्रमन्त्रेण स्थगयेत् कवचेन तु ।
एव सर्वत्र वा कुर्याद्द्रव्याणामधिवासनम् ॥ २६७ ॥

वर्हिपक्षसमोपेतं साङ्गमिष्वष्टक तत ।
दिग्विदिक्ष्वस्त्रजप्तं तद्द्वाद्वागनिकेतनम् ॥ २६८ ॥

पञ्चरङ्गेण सूत्रेण दृढेन सुसितेन वा ।
चतुर्गुणेन संवेष्ट्याभ्यन्तराद्यागमण्डपम् ॥ २६९ ॥

प्रदक्षिणचतुष्कं तु वर्ममन्त्रं तु सस्मरन् ।
प्रासादं वाह्यतस्तद्वद्वेष्टयेदग्निमन्दिरम् ॥ २७० ॥

वेष्टयेदन्तरा प्राग्वत्ततो देशिकसत्तम ।
स्वयं समूहमभ्यर्थ्य पञ्चकालपरायणम् ॥ २७१ ॥

षट्कर्मनिरतं चापि यतिवृन्दं तु वैष्णवम् ।
समक्षं भवता भक्त्या श्व. प्रभुं पूजयाम्यहम् ॥ २७२ ॥

सन्निधानमतः कार्य मदनुग्रहकाम्यया ।
एवमभ्यर्थितेभ्यस्तु ह्यनुज्ञा प्रतिगृह्य च ॥ २७३ ॥

प्राङ्मुखस्त्वासनारूढो गुरुपाणिपरिच्युतम् ।
ब्रह्मकूर्च पिबेत् पश्चाच्चरुशेष तु भक्षयेत् ॥ २७४ ॥

पिबेद्धृदयसंजप्तं हेमरत्नकुशोदकम् ।
भगवत्पादतोयं च सर्वपापहरं शुभम् ॥ २७५ ॥

अद्यात्तदनु ताम्बूलं दन्तकाष्ठसमन्तिम् ।
आचम्य न्यासपूर्व तु सकलीकृत्य विग्रहम् ॥ २७६ ॥

स्थलस्थ मन्त्रमुद्धृत्य कुम्भेऽग्नौ न्यस्य वात्मनि ।
कुतपे कम्बलोपेते स्थित्वा च सकुशास्तरे ॥ २७७ ॥

जपेन्मन्त्रवरं साङ्गं पठंस्तोत्रवरान् शुभान् ।
कथां सार्वेश्वरी पुण्या कुम्भं निष्पाद्य मण्डलम् ॥

एकाब्ज वहुपद्म वा चक्राब्जाद्यमथापि वा ।
स्वय भगवता प्रोक्तमेतेषा लक्षणादिकम् ॥ २७९ ॥

पौष्करे देवदेवेन सम्यक् पुष्करजन्मन ।
अथवा मण्डलं कुम्भमपरे वासरे द्विज ! ॥ २८० ॥

भूषणानां ततो गत्वा सन्निधि द्विजसत्तम ! ।
दाहाप्यायनयोगेन कुर्याच्चैवाधिवासनम् ॥ २८१ ॥

ध्यात्वा दक्षिणहस्ते तु द्वादशारं ज्वलत्प्रभम् ।
कलाद्वादशसयुक्त तदन्त स्थ दिवाकरम् ॥ २८२ ॥

दग्धं तद्रश्मिसङ्घेन भस्मकूटगतं स्मरेत् ।
मान्त्र पवित्रसङ्घं तु निश्शेष जनयेत्तत. ॥ २८३ ॥

सितं षोडशपत्राढ्यं वामहस्तेऽम्बुजं स्मरेत् ।
क्षपाकरं तु तन्मध्ये ध्यायेत् पूर्णकलान्वितम् ॥

पीयूषवृष्टिसंपातं मुञ्चमानं विचिन्तयेत् ।
तेनामृतेन तद्भस्म भावयेत् सञ्चितं द्विज ! ॥ २८५ ॥

समुत्थितं भस्ममध्यात् तत् सर्व चिन्तयेत् पुन. ।
पञ्चभूतात्मकं ध्यात्वा व्यापकत्वेन तत् पुनः ॥ २८६ ॥

मूलमन्त्रेण सम्प्रोक्ष्य संस्पृश्याथ निरीक्ष्य च ।
कुम्भयोग्यानि चैकस्मिन् माण्डलीयानि चापरे ॥

विम्वयोग्यानि चैकस्मिन्नाग्नेयान्यपरे द्विज ! ।
अन्यानि मन्त्रयोग्यानि ह्येकस्मिन् द्विजसत्तम ! ॥

पात्रे पात्रे पृथक् स्थाप्य पात्रलाभानुरूपत. ।
आच्छाद्य वाससा पश्चात् सुसितेनार्हतेन तु ॥ २८९ ॥

तानि भूषणपात्राणि क्रमेण च पृथक् पृथक् ।
बन्धनीयानि सूत्रेण दृढेन सुसितेन च ॥ २९० ॥

आच्छाद्य पूर्ववत् तानि जागरेण नयेन्निशाम् ।
एकादश्यां प्रभातेऽथ स्नात्वा पूज्य जनार्दनम् ॥

आनिमन्त्र्य गृहं गत्वा यन्त्रित. प्रणिपत्य च ।
ब्राह्मणान् गुरुपूर्वांश्च विष्णुभक्तान् दृढव्रतान् ॥२९२॥

स्वधर्मनिरतांश्चैव देवदेवक्रियापरान् ।
आपत्कालेऽपि संप्राप्ते येऽर्चयन्त्यच्युतं प्रभुम् ॥२९३॥

अथान्यान् वैष्णवान् काश्चित् सुहृत्सम्बन्धिबान्धवान् ।
तत पुण्याहघोषेण प्रवृत्ते तु निशामुखे ॥ २९४ ॥

शङ्खशब्दै सुमङ्गल्यैर्ब्राह्मणैर्ध्वनिभि सह ।
पठद्भि शाकुनं सूक्तं प्रविशेद्देवमन्दिरम् ॥ २९५ ॥

ततो नैमित्तिक बिम्ब वस्त्रैर्माल्यैश्च भूषणै ।
विलेपनैरलङ्कृत्य मूर्तिपै. सह देशिक. ॥ २९६ ॥

यानमारोप्य निष्क्रम्य शङ्खकाहलतूर्यकै. ।
तालवृन्तैस्तथा च्छत्रैश्चामरैर्विविधैः सितै. ॥ २९७ ॥

नरनाथो यथादेवं मण्डपे सन्निवेशयेत् ।
अथ भद्रासने देवं चतुष्पादसमन्विते ॥ २९८ ॥

समारोप्यार्चयेद्देवं सविशेषं विधानत ।
महाहविर्निवेद्याथ तर्पयेद्वन्हिमध्यतः ॥ २९९ ॥

ततोऽपराह्णवेलायां प्रवृत्ते वा निशामुखे ।
पुण्याहोद्घोषणाद्यैश्च सहोक्तैः सर्वमङ्गलै ॥ ३०० ॥

प्रवेशयेज्जगन्नाथं देवेशं यागमण्डपे ।
यागस्य पश्चिमे देशे सौवर्णे भद्रविष्टरे ॥ ३०१ ॥

उपरीष्टाद्वितानेन मौक्तिकेनैव शोभयेत् ।
देवमारोप्य यागस्थविभोरभिमुखं द्विज ! ॥ ३०२ ॥

यद्वा दशम्यां बिम्बस्थं यागागारे विभुं न्यसेत् ।
प्राग्दिक्प्रत्यङ्मुखा योज्या ऋङ्मया. स्वासनेषु च ॥

दक्षिणे च उदग्वक्त्रान् यजुर्वेदांश्च योजयेत् ।
प्राङ्मुखान् पश्चिमे भागे सामज्ञान् विनिवेश्य च ॥

सह चैकायनैर्विप्रैर्मूर्तिसंज्ञोपलक्षितै. ।
दिश्युत्तरस्यां च ततो नित्यकर्मपरायणान् ॥ ३०५ ॥

निवेश्याथर्ववेदज्ञान् सर्वान् द्विद्विकसंख्यया ।
शृणु विध्यन्तर भूयो विस्तराद्द्विजसत्तम ! ॥ ३०६ ॥

पूर्वे प्रत्यङ्मुखं कृत्वा आसनस्थं द्विजोत्तमम् ।
पुष्पवस्त्रैस्तथोष्णीषैर्भूषितं चाङ्गुलीयकै. ॥ ३०७ ॥

ऋङ्मन्त्रान् पाठयेत् पुण्यान् मन्त्रविद्भगवन्मयान् ।
अथ दक्षिणदिक्संस्थं वीक्षमाणमुदग्दिशम् ॥ ३०८ ॥

यजुर्वृन्द वैष्णवं तत् पाठयेद्देशिकस्तु तत् ।
गायेच्छुद्धानि सामानि सामज्ञ पश्चिमे स्थित ॥

भक्तश्चोदक्स्थितो ब्रूयाद्दक्षिणास्योऽप्यथर्ववित् ।
स्वशाखोक्तांस्ततो मन्त्रान् ज्ञानलिङ्गानशेषत ॥ ३१० ॥

एकैकं शिष्यवर्गेण वृतो योग्य. क्रमेण तु ।
भगवद्भाविनो ये च यतय पाञ्चरात्रिका. ॥ ३११ ॥

चतुर्भिराप्तैर्विप्राद्यैर्युक्तस्त्वीशदिशि न्यसेत् ।
एकान्तिनस्त्वनाप्तैश्च युक्तांश्चाग्नेयदिग्गतान् ॥ ३१२ ॥

निवेश्य विप्रान्नैर्ऋत्यां भक्तान् वैखानसास्तथा ।
चतुर्भिरञ्जलीकैस्तु ततो वायव्यगोचरे ॥ ३१३ ॥

सारम्भिण सात्वतांश्च तत्काले भगवन्मयान् ।
चत्वारोऽथ चतुर्दिक्षु योज्याश्च शिखिनो मुने ! ॥

तेषां चैवानुयायीरंश्चत्वारस्तु प्रवर्त्तिन. ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च मुनिसत्तम ! ॥३१५॥

एकायनीयशाखोत्थान् मन्त्रान् परमपावनान् ।
पाठयेच्च यतीनाप्तपूर्वान् वै पाञ्चरात्रिकान् ॥ ३१६ ॥

स्वानुष्ठाने स्वकान् मन्त्रान् जपन्तः संवदन्ति च ।
प्रागादौ चोत्तरान्तं च चत्वारो गुरुपूर्वका. ॥ ३१७ ॥

वहव. समयज्ञानाः सात्वतज्ञा. स्वशक्तित. ।
कृतन्यासास्तथा ध्यानमुद्रालङ्कृतपाणय ॥ ३१८ ॥

स्ववाससा स्वकां मुद्रां च्छन्नां कुर्युः परस्परम् ।
गीतनृत्तपराश्चान्ये अग्रतः स्तोत्रपाठकाः ॥ ३१९ ॥

वन्दिवृन्दयुता बाह्ये तथा दुन्दुभिवादिनः ।
अन्ये तु वैष्णवाः सर्वे पृष्ठतः पार्श्वतोऽपि च ॥ ३२० ॥

एवं निवेशनं कृत्वा सर्वेषां तु यथाक्रमम् ।
ततस्तु देवदेवस्य चतुःस्थानस्थितस्य च ॥ ३२१ ॥

क्रमेण पूजनं कुर्यात् पूर्ववद्द्विजसत्तम ! ।
आसाद्य कलशोद्देशं विनिवेदनमाचरेत् ॥ ३२२ ॥

नानाविशेषभोगानां विभोरामन्त्रणाय च ।
दन्तकाष्ठं सताम्बूलं मुखवासं सदर्पणम् ॥ ३२३ ॥

चन्दनादीनि गन्धानि जातिपूगफलानि च ।
विनिवेद्य निधायाग्रे दक्षिणेऽथ जगत्प्रभो ॥ ३२४ ॥

गुग्गुलुं मृष्टधूपं च प्राकाशं ताम्रपात्रगम् ।
दृक्प्रभामण्डनं रम्यं हेमसूत्रं सकङ्कणम् ॥ ३२५ ॥

मध्वाज्यपूरिते पात्रे तैजसे रोचनाञ्जनम् ।
न्यसेत् षट्कं महन्मूर्तेर्नेत्रवस्त्रे सितारुणे ॥ ३२६ ॥

पश्चिमे च विभोर्दद्यात् पुण्यनद्युदकं तथा ।
तीर्थतोयं नगोत्थं च नगमृच्छ्रीफलादि यत् ॥ ३२७ ॥

शाद्वलं नीलदर्भाश्च ताम्रपात्रेऽथवायसे ।
उत्तरेऽथ विभोर्दद्याद्देवदेवस्य सत्तम ! ॥ ३२८ ॥

माल्यान्योषधयः सप्त बीजानि च फलानि च ।
तिलतण्डुलपात्राणि क्षीरं दधि घृतं सिता ॥ ३२९ ॥

गन्धवृन्दं त्वगेलाद्यं धातवो गैरिकादयः ।
सफलं नारिकेलं च विकारास्त्वैक्षवाखिलाः ॥ ३३० ॥

सराजते कांस्यपात्रे सभवानुगुणं द्विज ! ।
यज्ञपर्णपुटे वा तु विनिवेद्यमसंभवे ॥ ३३१ ॥

सकुशोदं स्थलस्थस्य ताम्बूलं दन्तधावनम् ।
सितानि सोत्तरीयाणि उपवीतानि चन्दनम् ॥ ३३२ ॥

चतुर्दिग्विनिवेद्याथ बिम्बेऽग्रावेवमेव हि ।
तानि भूषणपात्राणि विनिवेद्य पृथक् पृथक् ॥ ३३३ ॥

सन्निवेश्यानि पुरतश्चतुःस्थानस्थितस्य च ।
मूलबिम्बे यदा कुर्यात्तदा सर्वं तदग्रतः ॥ ३३४ ॥

स्थाप्य भूषणपर्यन्तं विनिवेद्य यथाक्रमम् ।
कुङ्कुमागरुकर्पूरश्रीखण्डैरधिवासितम् ॥ ३३५ ॥

चतुःस्थानावतीर्णस्य दद्याद्गन्धपवित्रकम् ।
ततोऽर्घ्यं पुष्पधूपं च मुद्रावन्धं समाचरेत् ॥ ३३६ ॥

आदिमध्यावसाने तु सम्यक् च्छिद्रस्य शान्तये ।
जपेन्मन्त्रवरं साङ्गं पश्चाद्बद्धाञ्जलिः पठेत् ॥ ३३७ ॥

प्रणवद्विद्वयाद्यं तु स्तोत्रमन्त्रं निमन्त्रयेत् ।
"सर्वमन्त्रमयाऽनन्त ! नित्यसन्निहिताव्यय ! ॥३३८॥

गुणप्रधानयोगेश ! भावनाभोगविग्रह ! ।
नारायण ! परं ब्रह्म ! प्राणेश ! चतुराकृते ! ॥ ३३९ ॥

सर्वगाच्युत ! सन्मूर्त ! सर्वज्ञ ! पुरुषोत्तम ! ।
अस्मात् काललवाद्यावद्विसर्जनदिनावधि ॥ ३४० ॥

नानामन्त्रगणोपेतः सन्निधिं भज मे प्रभो ! ।
देवबिम्बे तु सन्मूर्तौ कलशे मण्डलक्षितौ ॥ ३४१ ॥

संख्यासूत्रेऽक्षसूत्रे च पावके गुरुविग्रहे ।
घण्टायां सास्त्रपीठे च यागोपकरणेषु च ॥ ३४२ ॥

स्रुक् स्रुवाद्येष्वशेषेषु एकान्तिद्विजमूर्तिषु ।
विष्णुपार्षदभेदेषु जन्मकर्मरतेषु च ॥ ३४३ ॥

श्रद्धापूतेषु दक्षेषु त्वदेकशरणेषु च ।
अतीतवात्सरीयाणां स्नानादीनां हि कर्मणाम् ॥ ३४४ ॥

नैमित्तिकानां नित्यानामपूर्णानां हि शान्तये ।
त्वत्प्रीतये यथाशास्त्रमद्य निर्वर्तयाम्यहम् ॥ ३४५ ॥

पावित्रकविधानं च सर्वकर्मप्रपूरणम् ।
अतोऽद्य मुखवासाद्यमुपचारं हि चार्चनम् ॥

होमान्तमधिवासीयं कुरु सर्वं हि चात्मसात् ।
त्वामर्चयाम्यहं भक्त्या शक्त्यातीतेऽथ जागरे ॥

यथावद्ब्रह्मसूत्रान्तैर्भोगैर्भोगापवर्गदैः ।
विज्ञप्तोऽसीति भगवन् ! वेत्सि सर्वं हृदि स्थितम् ॥

भक्तस्य मम वात्सल्यात् प्रातः कार्यस्त्वनुग्रहः ।"
एवं निमन्त्रयित्वाजमष्टाङ्गेन नमेत् क्षितौ ॥ ३४९ ॥

चतु· प्रदक्षिणीकृत्य हृदि मन्त्रमनुस्मरन् ।
गीतनृत्तादिकै· स्तोत्रैर्वेदपाठसमन्वितैः ॥ ३५० ॥

जयशब्दसमेतैस्तु जागरेण नयेन्निशाम् ।
स्नात्वा ब्राह्मे मुहूर्तेऽथ कृतकौतुकमङ्गल· ॥ ३५१ ॥

महता विभवेन प्राग्द्वारयागं समाचरेत् ।
नित्य कर्म पुरा कृत्वा ह्येकस्मिन्नधिकारिणि ॥ ३५२ ॥

कुम्भस्थ तु यजेत् प्राग्वन्मण्डलस्थं तत· क्रमात् ।
विम्बस्थं देवदेवेशं सविशेषं समर्चयेत् ॥ ३५३ ॥

क्षीरादिपञ्चविशद्भिर्यथावदधिवासितै ।
स्नानैरन्यैश्च विविधैर्भोगैर्भक्ष्यादिनिर्मितै ॥ ३५४ ॥

सास्पर्शिकैरासनाद्यैर्विविधैरुपचारकै ।
हृदयङ्गमसज्ञैस्तु बहुभेदविनिर्मितै ॥ ३५५ ॥

जपमुद्रावसानान्तमेवं कृत्वा क्रमेण तु ।
अग्निस्थ तर्पयेत् पश्चाद्यथावदनुपूर्वश ॥ ३५६ ॥

अथ भूषणपात्रस्य गत्वा वै सन्निधि द्विज ! ।
पूजयित्वा समुद्धाट्य पात्र प्रातिसरीयकम् ॥ ३५७ ॥

अवलोक्य समादाय गत्वा कलशसन्निधिम् ।
आराधनाङ्गनिचयमव्यक्त तात्विकं भवेत् ॥ ३५८ ॥

तृतीयमुभयात्मं तु आध्यात्म्यादित्रयं तथा ।
अनुसन्धाय वै तस्मिन् संस्मरन् हृदयं धिया ॥ ३५९ ॥

तत्राष्टाष्टकसंख्यं तु अव्यक्तं भोगसङ्ग्रहम् ।
मन्त्रमुद्रासमूहं तु तात्विकं परिकीर्तितम् ॥ ३६० ॥

स्वाध्यायगीतवाद्यादिव्रतानि नियमानि च ।
दानान्युत्सवपूर्वाणि नानानैमित्तिकानि च ॥ ३६१ ॥

एतान्युभयरूपाणि पुरुषार्थप्रदानि च ।
प्रीतिदानि जगद्योनौ मन्त्रमूर्तौ जनार्दने ॥ ३६२ ॥

भास्वरं चिन्मयं शुद्धं यदेषा रूपमक्षयम् ।
तद्भभ्वनुसन्धेयं सूक्ष्मं तदनु भास्वरम् ॥ ३६३ ॥

सूर्येन्दुवह्निसंकाशमियत्तापरिकल्पितम् ।
तद्ग्रन्थिगणदेशेषु भावनीयं महामते ! ॥ ३६४ ॥

सुस्थल व्यावहार्य च तृतीय सार्वलौकिकम् ।
तत् तन्तुनिचयोद्देशे भावनीय सदैव हि ॥ ३६५ ॥

एवमाध्यात्मिकी व्याप्ति लक्षयित्वा तु तत्परम् ।
चिन्तयेदधिदेवाख्या व्याप्ति मान्त्रीमनश्वरीम् ॥३६६॥

चतुर्णामविनाभावि यद्रूपममृतोपमम् ।
नानाभासगणाकीर्ण मूर्तामूर्तमनश्वरम् ॥ ३६७ ॥

किरीटमालाश्रीवत्सकौस्तुभाना महामते ! ।
सन्निधि भावयेन्नित्यमधिदेवात्मना त्रयम् ॥ ३६८ ॥

पृथ्व्यप्तेजोऽनिलाकाशपञ्चाना समुदायि यत् ।
रमणीयं शुभं रूप भक्ताना परितोषकृत् ॥ ३६९ ॥

तदस्य चाधिभूतत्वं मन्तव्यं योजनावधौ ।
व्यात्वैनं मूलमन्त्र तु समुदीर्य तत परम् ॥ ३७० ॥

प्रणवालङ्कृतं मन्त्रं तमुद्यतकर पठेत् ।
"(ओ) त्वत्प्रतिनाधन देव तानं यदमल परम् ॥३७१॥

भक्तिश्रद्धासमेपेता सत्क्रिया त्वत्प्रकाशिता ।
अखण्डसिद्धये तस्या ह्युपाय· कथितस्त्वया ॥ ३७२ ॥

ज्ञानकर्मप्रसक्ताना भक्ताना भावितात्मनाम् ।
पवित्राख्य यथाशक्त्या त्वत्प्रसादान्मया कृतम् ॥

यथोचितमिदानी तद्व्यायस्व परमेश्वरम् ।
तस्माच्छुभतर कर्म विज्ञानममलं हि यत् ॥ ३७४ ॥

विध्यन्तरं मन्त्रगणं द्रव्यसङ्घस्त्वमेव हि ।
प्राप्ति पूरयिता पूर्णमपूर्णाना हि कर्मणाम् ॥ ३७५ ॥

तथ्येनानेन भगवन् ! भवभङ्गार्दितस्य च ।
अशठस्य क्रियाकाडमखण्ड सर्वमस्तु ते ॥ ३७६ ॥

विज्ञप्तोऽसीति भगवन् ! आर्थिता मे परा त्वयि ।
विना त्वत्परितोषेण सम्यज्ज्ञानप्रदेन च ॥ ३७७ ॥

आपत्कालेऽपि संप्राप्ते बुद्धिपूर्व मयाच्युत ! ।
न सन्त्याज्य क्रियाज्ञान त्वं सर्व वेत्सि तत्वत ॥३७८॥

यथाकाल यथावच्च भोगैर्देव ! यथोचितैः ।
नार्चितोऽसि यथा सम्यक् खेदश्चेतसि तेन मे ॥

पूजनं भोगसंभोगैराज्यहोमैस्तु तर्पणैः ।
त्वयेतत् कृतकृत्यत्वान्न किञ्चिदुपयुज्यते ॥ ३८० ॥

सुक्षेत्रे वापितं ह्येतदखिलार्थस्य मेऽखिलम् ।
फलिष्यत्यमृतत्वेन ज्ञात्वैवं हि मया पुरा ॥ ३८१ ॥

अङ्गीकृतं गुरुमुखात् किन्तु सर्वेश्वर ! प्रभो ! ।
परिस्फुरति मे बुद्धौ न निर्व्यूढं यथास्थितम् ॥३८२॥

मनोवाक्कायकर्मैस्तु आप्रभाताच्छिशावधि ।
अस्वातन्त्र्यादसामर्थ्यान्मनसश्चानवस्थितेः ॥ ३८३ ॥

शीतोष्णवातवर्षाद्यैरन्तरायैर्ज्वरादिभिः ।
असम्पत्तेः क्रियाङ्गानां देव ! त्वदनुरूपिणाम् ॥३८४॥

आप्रवृत्तेः परानन्दप्राप्तिनिष्ठं यदाह्निकम् ।
यथोक्तममराणां तु यस्मान्न घटते तत ॥ ३८५ ॥

तस्य सम्पूरणार्थं तु प्रधानतरमर्चनम् ।
पवित्रकाख्यमादिष्टं वत्सरं प्रति यत् त्वया ॥ ३८६ ॥

तन्मया कृतमध्यक्षमर्चितं यदनिर्मलम् ।
क्रियायोगादसंपूर्णं तन्मे निर्मलतां नय ॥ ३८७ ॥

ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया ।
तत् सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ॥ ३८८ ॥

ओमच्युत ! जगन्नाथ ! मन्त्रमूर्ते ! जनार्दन ! ।
रक्ष मां पुण्डरीकाक्ष ! क्षमस्वाज ! प्रसीद ओम् ॥ "

उक्त्वेवं मूलमन्त्रं तु हृदाद्यैर्लाञ्छनैः सह ।
समुदीर्य ततो दद्यान्मूर्ध्नि मन्त्रात्मनो विभोः ॥ ३९० ॥

सर्वज्ञानक्रियाभोगशुभसंकल्पविग्रहम् ।
मण्डलान्तर्गतस्यैवं प्रासादान्तःस्थितस्य च ॥ ३९१ ॥

एवमग्रे पवित्रे द्वे प्रदद्याद्द्विजसत्तम ! ।
यद्वा किरीटमाद्ये तु मध्ये श्रीवत्सकौस्तुभे ॥ ३९२ ॥

तृतीये वनमाला च मन्त्रैरेभिस्तु विन्यसेत् ।
"पद्मराजे किरीटाय पद्मरागवृतः स्वयम् ॥ ३९३ ॥

पवित्रकेऽस्मिन्नागच्छ क्षिप्रं सन्निहितो भव ।
श्रीवत्साय नमस्तुभ्यं कौस्तुभागच्छ ओं नमः ॥३९४॥

पवित्रकेऽस्मिन् सन्तिष्ठ सच्छ्रीवत्सामलप्रभ ! ।
आगच्छ वनमाले ! त्वं अस्मिन् सन्निहिता भव ॥

पवित्रके जगद्योनेर्यन्मया परिकल्पितम् ।"
शृणु विध्यन्तरं भूयो ध्यायेदाद्ये द्विजाखिलम् ॥३९६॥

सांवत्सरं तु यत् कर्म आप्रभाताच्छिशान्तिमम् ।
ध्यानोत्थं निष्फलं सम्यगपवर्गप्रदं तु यत् ॥ ३९७ ॥

संस्मृत्य निष्फलं मन्त्रं शुद्धोच्चारक्रमेण तु ।
मन्त्रे सन्धाय तत्सूत्रं सूत्रे मन्त्रं तथैव च ॥ ३९८ ॥

एकीकृत्यात्मना सार्धं दद्याद्वै मन्त्रमूर्धनि ।
समाज्ञायापरं सर्वं तस्मिन् सकलनिष्कलम् ॥ ३९९ ॥

ध्यानकर्मस्वरूपं तु कर्म ध्यायेच्च वत्सरम् ।
स्मृत्वा चोभयरूपं तु मन्त्रं कलशपूजितम् ॥ ४०० ॥

पूर्ववच्चानुसन्धानं कृत्वा दद्यात् पवित्रकम् ।
ततः प्रतिसरं विप्र ! तृतीयं च समाहरेत् ॥ ४०१ ॥

बाह्यसांवत्सरं कर्म सकलं चाखिलं स्मरेत् ।
पूजयन्तं स्वमात्मानमाधाराच्च परावधिम् ॥ ४०२ ॥

लयभोगाधिकाराख्यक्रमेण सकलात्मना ।
सकलं मन्त्रनाथं तु लयभोगादिविग्रहम् ॥ ४०३ ॥

स्मृत्वा कृत्वा च सन्धानं दद्यात् प्रतिसरं ततः ।
अर्घ्यपुष्पैस्तथा गन्धैर्माल्यैर्धूपैस्तथा द्विज ! ॥ ४०४ ॥

पूजया सम्पुटीकुर्याद्भूषणानि पृथक् पृथक् ।
अन्तरान्तरयोगेन घण्टाशब्दसमन्वितम् ॥ ४०५ ॥

समस्तरत्नसद्धातुपुष्पाक्षतफलान्विता ।
सत्सुगन्धार्घ्यदर्भाल्यलाजसिद्धार्थकैर्युता ॥ ४०६ ॥

प्रक्षेप्तव्या तु बहुशो वृष्टिः करघनैर्मुदा ।
केवला पुष्पवृष्टिर्वा शङ्खादीन्यपि नादयेत् ॥ ४०७ ॥

मन्त्रास्त्रकुम्भयोर्दद्याद्भूषणे ध्यानवर्जिते ।
दत्त्वैव कलशस्थस्य पुरा विप्र ! पवित्रकम् ॥ ४०८ ॥

अनेन विधिना दद्यान्मण्डलस्थस्य वै पुरा ।
पवित्रकत्रयं शुभ्रं भोगस्थाने च नारद ! ॥ ४०९ ॥

द्यात् समस्तमन्त्राणा त्रीण्येकं वा यथेच्छया।
बिम्बस्थं तु समभ्यर्च्य प्रदद्याद्भूषणानि तु ॥ ४१० ॥

कलशोक्तक्रमेणैव वनमालास्यभूषणे।
अव्यक्ताद्यनुसन्धानं यद्वा विध्यन्तरोदितम् ॥ ४११ ॥

शरादिस्थूलपर्यन्तं सर्वं कृत्वा निवेदयेत्।
पृथङ्न्यासो यथा प्रोक्तः किरीटाद्यस्य सत्तम! ॥४१२॥

तत्राय हि विशेष स्यात् किरीटाद्यं चतुष्टयम्।
क्रमेणावाहयेद्विप्र! भूषणाना चतुष्टये ॥ ४१३ ॥

"किरीटाख्यसुरेशस्य भानुतुल्यप्रभान्वित!।
परिवारयुतस्तिष्ठ त्वमस्मिन् शीर्षभूषणे ॥ ४१४ ॥

वक्षःस्थले जगद्योनेर्भूषणं कल्पितं मया।
श्रीवत्सागच्छ पूर्णेन्दुसमान! भगवत्प्रिय! ॥ ४१५ ॥

वक्षःस्थले जगद्योनेर्भूषण कल्पितं मया।
कौस्तुभागच्छ रत्नानामीश! त्व भगवत्प्रिय! ॥४१६॥

धातुपुष्पसमाकीर्णे! प्रवालमणिभूषिते!।
वनमाले! समागच्छ देवदेवप्रिये! शुभे!" ॥ ४१७ ॥

चतुर्भिरेतमन्त्रैस्तु क्रमेणावाहयेद्द्विज!।
अङ्गानामप्युपाङ्गाना लाञ्छनाना तथैव च ॥ ४१८ ॥

भूषणाना च शक्तीना गरुडस्य च वै क्रमात्।
पीठस्य तु पवित्राणि प्रदद्यात् क्रमशस्तत. ॥ ४१९ ॥

एवमेव विभोर्दद्यान्मूलबिम्बगतस्य च।
सर्वेषा कर्मबिम्बाना लक्ष्म्यादीना तथैव च ॥ ४२० ॥

अन्येषामङ्गबिम्बानां परिवारगणस्य च।
क्रमेण भूषणं दत्वा यायादग्निनिकेतनम् ॥ ४२१ ॥

अग्निस्थस्य विभोर्दद्याद्भूषणानि तु पूर्ववत्।
यदा पवित्रकारोपो मूलबिम्बे तदा भवेत् ॥ ४२२ ॥

नित्ये कुण्डेऽन्यथा स स्यान्नित्येनैमित्तिकेऽपि च।
अग्नौ निवेदयेद् विप्र! भूषणं न तु होमयेत् ॥ ४२३ ॥

यस्मात् सन्यासमूर्ध्वे तु विहितं भूषणस्य च।
नाहर्तुं युज्यते दग्धं दोषमाहरणं विना ॥ ४२४ ॥

देशिकस्य हृदारोप्य पूजितस्य च देववत्।
स्वं स्वं चारोप्य चान्येषा देशिकाना तथैव च ॥४२५॥

साधकाना ततो दत्वा यागाङ्गानामपि द्विज!।
शास्त्रान्मनस्ततो दत्वा ह्यन्येषा क्रमशस्तथा ॥ ४२६ ॥

पश्चात् पद्मासन बद्ध्वा देवस्याभिमुखं स्थित।
सकृज्जपेन्महामन्त्रं सर्वकर्मप्रवर्धनम् ॥ ४२७ ॥

नाशनं समयाना च दोषाणा स्मरणादपि।
ततः संश्रावयेद्देव त्रिस्थानस्थं क्रमेण तु ॥ ४२८ ॥

"कामतोऽकामतो वापि न कृतं नियमार्चनम्।
केनचिद्विघ्नदोषेण मया यत्परमेश्वर! ॥ ४२९ ॥

तेन मे मनसोऽतीव सन्तापो दहनात्मक।
यतः समयदोषेण बाधितोऽस्मि जनार्दन! ॥ ४३० ॥

त्वयोद्दिष्टं पुरा नाथ! भक्ताना हितकाम्यया।
दोषविध्वंसकृच्छुभ्र पवित्रं तत् कृत मया ॥ ४३१ ॥

प्रसीद मे कुरु त्राण जहि कोप हि लोपजम्।
निमज्जतो भवाम्भोधौ समयप्रच्युतस्य च ॥ ४३२ ॥

नमो नमस्ते मन्त्रात्मन्! प्रसीद परमेश्वर!।
पाहि पाहि त्रिलोकेश! केशवाऽऽर्तिविनाशन! ॥

त्वत्प्रसादाच्च मे मास्तु दोष समयसंज्ञित.।
अद्यास्तु कर्मसम्पत्तिर्नित्यनैमित्तिके प्रभो!" ॥ ४३४ ॥

श्रुत्वैवमादरात्तस्य संसारार्तस्य मन्त्रराट्।
पूर्णभावं नयेच्छीघ्रं हन्ति दोषाश्च सामयान् ॥ ४३५ ॥

ततः प्रावरणैर्दानैर्यथासम्पत्तिसंभृतै।
सोपवीतोत्तरीयैश्च च्छत्रोपानहसंयुतैः ॥ ४३६ ॥

विविधैर्भोजनैर्विप्र! धूपार्घ्यालभनादिकैः।
पूजयेदाप्तपूर्वाश्च यतिपूर्वास्तथैव च ॥ ४३७ ॥

पञ्च वैखानसान्ताश्च विप्रादींश्चतुरस्तथा।
पञ्च योगरताद्यास्तु तथान्यान् वैष्णवान् द्विज! ॥

एकायनीयशाखोत्थमन्त्राणां प्रथम तत.।
त्रयीमयानां मन्त्राणा स्तोत्राणां च तथैव च ॥ ४३९ ॥

उद्घोषणं च कर्तव्यं ब्राह्मणैरग्रतो विभोः ।
शङ्खभेरीनिनादैश्च काहलीगीतकैस्तथा ॥ ४४० ॥

नृत्तैश्च निनदैरन्यैर्मङ्गलैस्तोषयेत् प्रभुम् ।
पश्चादुत्सवबिम्बं तु यानमारोप्य देशिकः ॥ ४४१ ॥

महोत्सवविधिप्रोक्तं सर्वमङ्गलसंयुतम् ।
प्रदक्षिणक्रमेणैव प्रासादं तु प्रवेशयेत् ॥ ४४२ ॥

प्रार्थना च ततः कुर्याद्यतीनां भावितात्मनाम् ।
"युष्मत्प्रसादसामर्थ्यान्मनसः परिपूर्णता ॥ ४४३ ॥

क्रियाङ्गानां तु सर्वेषां मा मेऽस्तु समयच्युतिः ।"
"एवमस्त्विति" वक्तव्यं सर्वैस्तालसमन्वितम् ॥४४४॥

ताश्चानुपृच्छ्य नैवेद्यपूर्वं कुर्यात् सुभोजनम् ।
बन्धुभृत्यसमोपेतः स विशेष द्विजोत्तम ! ॥ ४४५ ॥

एकरात्रं त्रिरात्रं वा सप्तरात्रं तु वा द्विज ! ।
पवित्रकं स्थापयित्वा ततः सन्यासमाचरेत् ॥४४६॥

अथवार्चागतं विप्र ! तावत् संस्थाप्य भूषणम् ।
यावदेकादशी शुक्ला संवृत्ता कार्तिकस्य तु ॥ ४४७ ॥

अपनीय च माल्यादीन् प्रदद्याद्वा दिने दिने ।
नो यान्ति म्लानतां यावत् संप्राप्ते कालवासरे ॥

महदर्चनपूर्वं तु कृत्वा पूर्णावसानकम् ।
क्रमशश्चोपसंहृत्य स्वयं गुर्वात्मना तु वा ॥ ४४९ ॥

आदाय पूजिते पात्रे अर्चयित्वा यथाविधि ।
जानुनी भूगते कृत्वा प्रणिपत्य च देशिकम् ॥ ४५० ॥

मानयित्वार्घ्यपुष्पाद्यैः प्रणिपत्य स्वयं पुरा ।
विनिवेद्य च तत् पात्रं "प्रसादः क्रियतां प्रभो" ॥

स्वाशिषं भगवत्प्रीतिर्वाच्याचार्येण तस्य तु ।
"यथागमं यथाशास्त्रं प्रसादाच्चतुरात्मनः ॥ ४५२ ॥

त्वयि सांवत्सरं कृत्यं सुसंपूर्णं सुतास्तु ओम् ।"
समुत्कीर्य ततस्तस्य आसनस्थस्य मूर्धनि ॥ ४५३ ॥

कलशद्वितयं मान्त्रं कृत्वा सौभाग्यमोक्षदम् ।
विसर्जनं विभोः कुर्यात् पूजापूर्वं यथाक्रमम् ॥ ४५४ ॥

विष्वक्सेनं यजेत् साङ्गं तर्पयेत् तदनन्तरम् ।
समाहृत्याखिलं पश्चात् कृते चैतद्विसर्जने ॥ ४५५ ॥

यद्यन्निवेदितं तस्य ह्यगाधेऽम्भसि निक्षिपेत् ।
यथासंवत्सरकृतो दोषः समयपूर्वकः ॥ ४५६ ॥

नाशमायाति वै क्षिप्रं पवित्रारोपणान्मुने ! ।
पाति यस्मात् सदोषं हि पतनात् परिरक्षति ॥ ४५७ ॥

विशेषेण द्विज त्राति पूर्णं कर्म करोति च ।
साधके च क्रियाहीने तस्मादुक्तो महान् मया ॥

यागः एष पवित्राख्य उक्तलक्षणलक्षितः ।
पतितं च क्रियालोपाद्विधिवत् त्रायते यदा ॥ ४५९ ॥

तदा पवित्रकं विप्र ! भूषणं सूत्रजं स्मरेत् ।
अज्ञानादथवा मोहाद्यद्वा कर्मण्यनादरात् ॥ ४६० ॥

नास्तिक्याद्वाप्यहङ्कारात् कर्तॄणामुपरोधतः ।
वैशेषिकान्तरप्राप्तेर्यद्वा निद्रादिदोषतः ॥ ४६१ ॥

कालातिक्रान्तिभीत्या वा त्वेवमन्येन केनचित् ।
विकलं यजनं कृत्वा यदा दद्यात् पवित्रकम् ॥ ४६२ ॥

मन्त्रेशस्य तदानीं तु भवेत् तत् कर्म तामसम् ।
देशाधिपो देशिकश्च प्राप्नुयात् तामसं फलम् ॥

ज्वरादिव्याधिपीडा स्यात् तदा तद्देशवासिनाम् ।
त्वराविष्टोऽथवा विप्र ! रजसा कलुषीकृतः ॥ ४६४ ॥

यागं कृत्वा तु देवस्य यदा दद्यात् पवित्रकम् ।
तदा स्याद्राजसं कर्म फलं स्यादेव तादृशम् ॥ ४६५ ॥

अज्ञानपूर्वकैर्दोषैः प्रागुक्तैस्तु विवर्जितः ।
यागं कृत्वा सुपूर्णं तु भूषणेन यदा यजेत् ॥ ४६६ ॥

तदा कर्ता गुरुश्चापि पवित्रोक्तं फलं लभेत् ।
तदा सांवत्सरं कर्म परिपूर्णतरं भवेत् ॥ ४६७ ॥

पतितस्य क्रियालोपात् परित्राणं भवेत् तदा ।
तस्मात्तु यजनं सम्यग्विभोः कृत्वा सुविस्तरम् ॥

तदन्ते शोभने प्राप्ते मुहूर्ते देशिको विभुम् ।
भूषणैर्भूषयेत् सम्यगत्वरः शान्तमानसः ॥ ४६९ ॥

न लभ्यते मुहूर्तं तु यागान्ते यदि शोभनम् ।
तदन्यस्मिन् समारोप्य पवित्राणि यथाविधि ॥

तदतिक्रान्तिदोषस्य शान्तयेऽथ जपेद्गुरुः ।
अष्टोत्तरसहस्रं तु मूलमन्त्रं तथास्त्रपम् ॥ ४७१ ॥

जपेत् समयदोषघ्नमष्टधा मन्त्रनायकम् ।
एव सर्वेषु यागेषु मुहूर्तातिक्रमे भवेत् ॥ ४७२ ॥

तिथिनक्षत्रवारेषु पवित्रारोहणे विधि ।
कथितो मुनिशार्दूल ! यदा पुण्येक्षणादिके ॥ ४७३ ॥

केवले वैष्णवे वापि तत् कुर्यात् तत्र मे शृणु ।
पुण्यक्षणादिक यस्मिन् दिने भवति तद्दिनात् ॥ ४७४ ॥

प्राक्सप्तमे दिने कृत्वा प्राग्वदङ्कुररोपणम् ।
प्राग्वत् कृत्वाधिवास तु पुरस्ताद्वासरद्वये ॥ ४७५ ॥

ततः कर्मदिने ब्राह्मे मुहूर्ते स्नानकर्म च ।
कृत्वा प्राग्वत् समभ्यर्च्य चतुःस्थानस्थित विभुम् ॥

केवलं बिम्बग वापि यथाकालानुरूपतः ।
क्षणे तु वैष्णवे प्राप्ते पवित्रैस्तु यजेद्विभुम् ॥ ४७७ ॥

यदा तु केवले बिम्बे पवित्रारोपण भवेत् ।
तदा स्याद्बिम्बगस्यैव अधिवासोक्तपूजनम् ॥ ४७८ ॥

तथा वह्निगतस्यापि वर्जयेत् कुम्भमण्डले ।
अतीतेऽस्मिन् मुहूर्ते तु भगवद्यागविस्तरात् ॥ ४७९ ॥

क्षणान्तरे तु तन् कृत्वा सास्त्रमूलायुतं जपेत् ।
समस्तदोषशमनमष्टाविंशतिकं जपेत् ॥ ४८० ॥

तिलैराज्यैरक्षतैर्वा सहस्रं जुहुयाद्गुरुः ।
विरोधात् समतिक्रान्ते क्षणे तस्मिन् महामते ! ॥

तदन्यस्मिन् समारोप्य पवित्राणि यथाविधि ।
ततस्तु पूर्वनवके प्रथमस्नपनं चरेत् ॥ ४८२ ॥

द्वितीयं वा तृतीयं वा गुरोरिच्छावशेन तु ।
यद्वा मूलायुतं सास्त्रं जप्त्वा पश्चात्तिलादिकैः ॥४८३॥

आहुतीना सहस्र तु प्रत्येक जुहुयात् त्रिभि ।
जपेन्मन्त्रवरं पश्चात् पञ्चाशच्चतुरुत्तरम् ॥ ४८४ ॥

विधानमेवं कथितं स्थाने मर्त्यप्रतिष्ठिते ।
स्वयंव्यक्तादिके स्थाने पवित्रारोहणादिषु ॥ ४८५ ॥

नैमित्तिकेषु सर्वेषु नित्येष्वपि विशेषतः ।
मुहूर्तातिक्रमे तत्तत्कालातिक्रमणेऽपि च ॥ ४८६ ॥

न दोषो द्विज ! पूर्वोक्तस्तत्रापि च विशेषतः ।
भगवद्यागविस्तारादृतेऽन्येन च केनचित् ॥ ४८७ ॥

विघ्नानामुद्यमे तेन अतिक्रान्ते क्षणादिके ।
तत्तत्कर्माखिल कृत्वा कालेऽन्यस्मिन् यथाविधि ॥

तद्दोषशान्तये कुर्यान्महामन्त्रजप सुधीः ।
सकृद्द्विधा चतुर्धा वा अष्टधा वा द्विपञ्चधा ॥ ४८९॥

द्विषट्षोडशधा वापि अष्टाविंशतिधा तु वा ।
तत्तत्कर्मविशेषाणा गुरुत्वाद्यानुगुण्यतः ॥ ४९० ॥

यद्वाधिक जपं कुर्याद्यथा चित्त प्रसीदति ।
प्रायश्चित्तविशेषं तु ह्यूर्ध्वं वक्ष्यामि विस्तरात् ॥

दोषसभावना प्रोक्ता तत्र कालावधिस्तथा ।
कीर्तितो विस्तरेणैव तस्माच्चात्र प्रतन्यते ॥ ४९२ ॥

इत्येष कथित सम्यक् पवित्रारोहणे विधि ।
कृते पवित्रके विप्र ! भक्तैर्मन्त्रक्रियापरैः ॥ ४९३ ॥

कश्चिद्विशेषनियम पालनीयः प्रयत्नतः ।
यावदेकादशी शुक्ला कार्तिकस्यातिपुण्यदा ॥ ४९४ ॥

वक्ष्यते सूक्ष्मरूपोऽन्यः प्रकारो मुनिपुङ्गव ! ।
केवले बिम्बके वापि यागमन्दिरसंस्थिते ॥ ४९५ ॥

प्रासादसंस्थिते वापि दशम्यामधिवासिते ।
कल्पयेद्भूषणारोपं विना कलशमण्डले ॥ ४९६ ॥

अग्निस्थेऽपि तदा कुर्यात् तत् प्राग्वदधिवासिते ।
एकं द्वे त्रीणि वा दद्यात् पवित्राणि तदा विभोः ॥

समानीयोत्तमाद्येन भेदेन तु कृतानि वा ।
द्रव्याभावो द्विजश्रेष्ठ ! अशक्तिर्यदि वा भवेत् ॥४९८॥

सद्योऽधिवासं द्वादश्या कृत्वा शक्त्या तु कारयेत् ।
सोपवासं द्विजश्रेष्ठ ! अर्चाया भूषणं विभो ॥ ४९९ ॥

यथेच्छाकल्पितै. सूत्रैर्ग्रन्थिभिस्तु यथेच्छया ।
निशारोचनया वापि पवित्राणा च धातुना ॥ ५०० ॥

केनचिद्ग्रन्थयो(?)विप्र ! विधिवत् परिकल्पयेत् ।
पुष्पपूर्णानि गर्भाणि कृत्वा वा केवलान्यत. ॥ ५०१ ॥

प्रपूज्य पूर्ववद्विप्र ! बिम्बसन्निहितं विभुम् ।
निवेद्य भूषणं दद्याद्वाणीमुच्चारयेदिमाम् ॥ ५०२ ॥

" यन्मया ब्रह्मसूत्रं च कल्पित ग्राहयस्व च ।
कर्मणां पूरणार्थाय, यथा दोषो न मे भवेत् " ॥५०३॥

इत्युक्त्वा च ततो दद्यात् पूज्योपरि पवित्रकम् ।
स्तुत्वा च देवदेवेश द्वितीयेऽह्नि प्रयत्नतः ॥ ५०४ ॥

पूजयित्वाथ देवेश कुर्यात् तदुपसंहृतिम् ।
गृहे पवित्रयागे तु विशेषमधुनोच्यते ॥ ५०५ ॥

बिम्बस्थे मण्डलस्थे वा चतुस्त्यानस्थितेऽपि वा ।
पवित्राणा त्रयं दद्यादेकैकं वा यथेच्छया ॥ ५०६ ॥

इत्युक्त योगिना श्रेष्ठ ! पवित्रारोहण परम् ।
ऊनातिरिक्ताद्यत् पाति भुवि भक्तजन सदा ॥ ५०७ ॥

तस्य निर्वर्तनाद्भक्त्या ब्राह्मणो वेदविद्भवेत् ।
श्रीमानत्युग्रशक्तिर्वै क्षत्रियोऽच्छिन्नसन्तति ॥ ५०८ ॥

धनधान्ययुतो वैश्य' शूद्रस्तु सुखभाग्भवेत् ।
गोभूहिरण्यदानानामनन्ताना हि यत् फलम् ॥ ५०९ ॥

यावज्जीवं प्रदत्तानां प्रत्यहं तत् समाः शतम् ।
परमायुश्च संपूर्ण तत् फल प्राप्नुयान्नर ॥ ५१० ॥

प्राप्तकालं स्वबुद्ध्या तु आसाद्यायतन हरे. ।
स्मरन् सर्वेश्वरं सम्यक् समुत्सृजति विग्रहम् ॥ ५११ ॥

यानैश्चन्द्रप्रकाशैश्च दिव्यस्त्रीजनसङ्घकैः ।
वीज्यमानो दिवं याति पूज्यमानस्तथाऽमरै ॥ ५१२ ॥

भुञ्जीत सकलान् भोगान् सर्वलोकान्तरोद्भवान् ।
य. कुर्याद्भूषणारोप निष्काम प्रीतये विभोः ॥५१३॥

संप्राप्य विष्णुलोकं स आस्ते कल्पशतान् बहून् ।
कालेन महतासाद्य मानुष्य पुनरेव हि ॥ ५१४ ॥

शुभे काले शुभे देशे जायते सुशुभे कुले ।
निवृत्ते बालभावे तु व्यक्ते करणसङ्ग्रहे ॥ ५१५ ॥

बुद्धितत्वे प्रबुद्धे तु क्रमभ्यासवशात्तु वै ।
कर्मणा मनसा वाचा नारायणपरो भवेत् ॥ ५१६ ॥

नित्य क्रियापरो धीमान् ब्रह्मण्य. सत्यविक्रमः ।
अनन्ययाजी शुद्धात्मा दुष्टसङ्गविवर्जित. ॥ ५१७ ॥

व्याधिशोकविनिर्मुक्त. पुत्रदारादिकैर्युतः ।
अपमृत्युविनिर्मुक्तो ज्ञानमासाद्य निर्मलम् ॥ ५१८ ॥

श्वेतद्वीपं समासाद्य सुराणा यत् सुदुर्लभम् ।
ज्ञानिनामपि चान्येषा तत्र दृष्ट्वा जगत्पतिम् ॥ ५१९ ॥

परब्रह्मत्वमायाति तत्कर्मपरम. पुमान् ।
पश्यन्त्यारोप्यमाण ये ब्रह्मसूत्रं जगत्प्रभोः ॥ ५२० ॥

तथानुमोदन्त्यन्योन्यं यान्ति ते परमा गतिम् ।
शृण्वन्ति ये विधानं तु पवित्र पापनाशनम् ॥ ५२१ ॥

प्राप्नुवन्ति च ते पुण्यमिष्टापूर्तोदितं हि यत् ।
नारी ह्यनन्यशरणा पतिना परिचोदिता ॥ ५२२ ॥

तद्भक्ता सद्गुणा साध्वी कर्मणा मनसा गिरा ।
नित्य भर्तरि चाद्रोहा प्रयाता सह तेन वै ॥ ५२३ ॥

पवित्रकं जगद्योनेरारोपयति वा द्विज ! ।
सातुल चैव सौभाग्यं प्राप्नुयादचिरेण तु ॥ ५२४ ॥

देहान्ते देवनारीणा देवानां याति पूज्यताम् ।
सा त्वरुन्धतिपूर्वाणामर्वाक् समभिवीक्ष्यते ॥ ५२५ ॥

ज्ञानमासादयत्यन्ते येन यात्यच्युतं पदम् ।
प्रोत्तारयति बन्धूना दुष्कृतेभ्योऽब्जसंभव ! ॥ ५२६ ॥

पितृणा जनकादीना नाम्ना स्नेहपरस्तु य. ।
ददाति भूषणं विप्र ! मन्त्री मन्त्रात्मनो विभोः ॥ ५२७ ॥

दुर्गतेः सुगति यान्ति द्युसिन्धोरस्थिना यथा ।
यथा सुराणाममृतं नृणा गाङ्गं यथा जलम् ॥ ५२८ ॥

स्वधा यथा पितृणा च कर्मिणा तद्वदेव हि ।
पवित्रकं क्रियाढ्यानां पावनं भूतिवर्धनम् ॥ ५२९ ॥

सर्वदोषभयघ्नं च सर्वोपद्रवनाशनम् ।
सर्वसौख्यप्रद चैव सर्वगुह्यप्रकाशनम् ॥ ५३० ॥

तपोदानव्रताना च विहितस्याह्निकस्य च ।
निश्शेषयागभोगाना कृत्वा संपूरणक्रियाम् ॥ ५३१ ॥

अपरेऽहनि वै कुर्याच्चतुर्थे सप्तमेऽपि वा ।
स्नपन पूज्यमन्त्रस्य तीर्थोद्देशेऽथ सङ्गमे ॥ ५३२ ॥

नद्या समुद्रगामिन्या देवखाते ह्रदे तु वा ।
प्रीतये परमेशस्य त्वात्मनो दु खहानये ॥ ५३३ ॥

आह्लादायामराणा च पितृणा तृप्तये तु वै ।
आप्यायनार्थ भूताना भुवनाना च भूतये ॥ ५३४ ॥

देशदोषप्रशान्त्यर्थ गोब्राह्मणहिताय वै ।
यथावत् स्नपनं कुर्यात्तीर्थबिम्बे विशेषत. ॥ ५३५ ॥

नित्यस्नपनबिम्बे वा कुर्यात्तत्तदसन्निधौ ।
नित्योत्सवपरे बिम्बे ह्याचरेत्तदसन्निधौ ॥ ५३६ ॥

तदभावे पवित्रे तु दर्भमञ्जरिजे शुभे ।
विधानमत्र मे सम्यक् शृणु विप्र ! समाहित. ॥

बहुशाखमभग्नाग्र समूलं यदपुष्पितम् ।
प्राङ्मुखो दर्भमादाय प्रणवेन पुरा क्षिते. ॥ ५३८ ॥

ततस्तेनैव तन्मूल प्राग्वत् कुर्यादधिष्ठितम् ।
तस्य मध्यमनालं यन्न्यग्भूतमवतिष्ठते ॥ ५३९ ॥

आराध्य मन्त्रनाथेन स्मरेद्व्याप्त महात्मना ।
विवर्त परमात्मीयमध्यक्षाख्य च विद्धि तम् ॥ ५४० ॥

अनेकगर्भमुच्चं यत् काण्ड काण्डेषु चोत्तमम् ।
अणिमादिगुणैर्युक्त पुस्तत्व तेन कल्पते ॥ ५४१ ॥

वाचकं तस्य योक्तव्यं हंसयुक्तं द्विलक्षणम् ।
बहिष्काण्डचतुष्केण चित्तपूर्व चतुष्टयम् ॥ ५४२ ॥

ग्रथनीयमथो वक्त्रमव्यक्तान्तं स्वकै. पदै ।
प्रणवादिनमोन्तैस्तु व्यापकं सूक्ष्मलक्षणम् ॥ ५४३ ॥

एवं श्रोत्रादिकान् पञ्च स्वनाम्ना ग्रथयेत्तदा ।
कर्मेन्द्रियाणि तदनु ततस्तन्मात्रपञ्चकम् ॥ ५४४ ॥

पञ्चक त्वथ भूतानां बद्ध्वा वै क्ष्मावसानिकम् ।
अवशिष्टैस्तु तत्काण्डैर्बध्नीयात्तु करण्डवत् ॥ ५४५ ॥

विना शिखासमूहेन समुत्थानावधेरथ ।
किञ्चित्तद्दूर्ध्वदेशाच्च यथा नो याति वै पुन ॥ ५४६ ॥

बहुधा काण्डसङ्घस्तु कल्पितस्तत्त्वसख्यया ।
विभिन्नानां च काण्डाना भङ्गादेकतरस्य च ॥ ५४७ ॥

उत्पद्यतेऽन्यथात्व च तस्मात्तद्ग्रथयद्दृढम् ।
दर्भमञ्जरिज त्वेव सम्पाद्यादौ पवित्रकम् ॥ ५४८ ॥

अनुसन्धीयते तत्र मान्त्रध्यानं यथास्थितम् ।
पूजयित्वार्घ्यपुष्पाद्यैरलङ्कृत्य पठेदिदम् ॥ ५४९ ॥

" त्वमेव तीर्थ भगवस्त्वमेवायतनं परम् ।
त्वयैवाधिष्ठित सर्वमिद जानामि तत्त्वत. ॥ ५५० ॥

तत्रापि च त्वया दिष्टं क्रियाकाण्डं शुभप्रदम् ।
यत्तन्निर्वाहयाम्यद्य त्वदनुग्रहकाम्यया " ॥ ५५१ ॥

एवं विज्ञाप्य भगवन् ! मन्त्रमूर्ति परात्परम् ।
तत्पत्रपात्रग कृत्वा ब्रह्मयानगत तु वा ॥ ५५२ ॥

वेदगेयध्वनीशङ्खश दमङ्गलपूर्वकम् ।
नीत्वा तीर्थान्तिकं तत्र तीरदेशे निधाय च ॥ ५५३ ॥

पूर्वामुखं च तद्यानमादाय च पवित्रकम् ।
वामहस्ततले कुर्यात् क्ष्मामण्डलगतं त्विव ॥ ५५४ ॥

विधूयान्मध्यभागाच्च पाणिना दक्षिणेन तु ।
अवतीर्याम्भसो मध्य निमज्जेत् सह तेन वै ॥ ५५५ ॥

सन्निधि तत्र तत्कालं प्रकुर्वन्त्यचिरात्तु वै ।
निश्शेषाणि च तीर्थानि लोकत्रयगतानि च ॥ ५५६ ॥

मन्त्रात्मा यत्र रक्षार्थं क्षणमास्ते जलाशये ।
तत्रायतनतीर्थाना सर्वेषा स्यात् समागम. ॥ ५५७ ॥

कि पुनर्यत्र भगवान् मन्त्रमूर्तिरधोक्षजः ।
साधकाभ्यर्थितः स्नायात् सर्वानुग्रहया धिया ॥५५८॥

विद्वान् योऽनेन विधिना तीर्थमासाद्य तत्ववित् ।
स्नापयेद्बान्धवादीनां प्राप्नुवन्त्यचिराच्च ते ॥ ५५९ ॥

तैर्थं फलमनायासान्मन्त्रमूर्तेः प्रसादत ।
किं तु तद्यानवादित्रवर्जितस्तु भवेद्विधिः ॥५६०॥

इमं विद्धि महाबुद्धे ! विशेषं चात्र कर्मणि ।
सामान्यमविनाशं यच्चिन्मयं रूपवर्जितम् ॥ ५६१ ॥

विशेषज्ञानसंबद्ध जीवहंस विभाव्य तम् ।
पवित्रकं तदाकारं स्मृत्वाऽऽप्लाव्यं ततोऽम्भसा ॥

एवं तेनैव चान्येषा बहूना बहुभिस्तु वा ।
सम्पाद्यं विष्टरे स्नान दूरस्थाना सदैव हि ॥ ५६३ ॥

सम्पन्ने स्नपने त्वेव द्वितीयेऽह्नि महामते ! ।
रथे कृत्वार्चिते तं वै प्रपूज्य च यथाविधि ॥ ५६४ ॥

यात्राख्यमुत्सव कुर्यादन्नदानपुरस्सरम् ।
सनृत्तगेयवादित्रं जागरेण समन्वितम् ॥ ५६५ ॥

एकरात्र द्विरात्र वा त्रिरात्र भक्तिपूर्वकम् ।
सकृत् संवत्सरस्यान्ते तृत्सवं स्नपनादिकम् ॥ ५६६ ॥

कुर्याद्यो मन्त्रनाथस्य स सिद्धि लभते पराम् ।
प्रस्थापे च प्रबोधे च ह्युत्सवे वत्सरीयके ॥ ५६७ ॥

तथा सहस्रकलशैरभिषेकविधावपि ।
अङ्कुरारोपणे चैव मन्त्राङ्गाभरणे द्विज ! ॥ ५६८ ॥

विविधासु प्रतिष्ठासु जीर्णोद्धारविधावपि ।
प्रायश्चित्तेषु मुख्येषु तुलाभारादिकेऽपि च ॥ ५६९ ॥

एवमादिनिमित्तेषु काम्येष्वपि तथैव च ।
द्वादश्यादिषु कालेषु कल्पयेद्यागपूर्वकम् ॥ ५७० ॥

यागमण्डपविन्यास चतुस्स्थानार्चनक्रियाम् ।
तत्रायं हि विशेष. स्यात् पूर्वेद्यु कर्मवासरात् ॥

रजन्यामधिवास· स्यात् प्रभाते कर्म तद्भवेत् ।
उत्सवेषु तदारम्भवासरे ह्यधिवासनम् ॥ ५७२ ॥

तद्रात्रौ कर्म कुर्वीत कुम्भाद्यर्चनपूर्वकम् ।
पुष्पयागेषु विप्रेन्द्र ! कुर्यात् सद्योऽधिवासनम् ॥

संप्रोक्षणे च पूर्व तु दहनाप्यायनात्मकम् ।
स्याद्वा सर्वत्र तत् सद्यो देशकालानुरूपतः ॥ ५७४ ॥

प्रस्थापे स्वस्तिकं नाम कुर्याद्यागवरं द्विज ! ।
प्रबोधे तु विवेकाख्य व्यूहेष्वेकतमं तु वा ॥ ५७५ ॥

उत्सवे ह्येकपद्म वा नेकाब्जं चक्रपङ्कजम् ।
भूषित परितो विप्र ! केवलः परशूपमै ॥ ५७६ ॥

कर्तर्यन्तारितैर्वापि यद्वा पद्मदलोपमै ।
इन्दीवरदलाकारैर्यववल्मीकरूपकैः ॥ ५७७ ॥

याग वा नवनाभाख्यं यागानामुत्तमोहि सः ।
यद्वा कुम्भोदरान्ताना वृत्तादीना क्रमेण तु ॥ ५७८ ॥

नवानामपि बिम्बानामेकेकं प्रतिवासरम् ।
प्रथमाद्दात् समारभ्य यावन्नवमवासरम् ॥ ५७९ ॥

याग व्यूहाभिधानं वा नवभि. पङ्कजैर्युतम् ।
अथ व्यूहाच्चतुष्पद्माद् यावदष्टसरोरुहम् ॥ ५८० ॥

नवानां व्यूहयागानामेकैक च क्रमेण तु ।
नियमो नवसंख्याख्यस्तत्संख्ये स्यान्महोत्सवे ॥ ५८१ ॥

न्यूनाधिकदिनेऽन्यस्मिन्नुत्सवे नववासरे ।
द्वयोरप्येकपद्मादिविधि. साधारणो भवेत् ॥ ५८२ ॥

सर्वदा पुष्पयागे तु मातुलुङ्गोपमाऽरकैः ।
युक्त चक्राम्बुजं कुर्यादनन्तकलशे द्विज ! ॥ ५८३ ॥

चक्राम्बुजं चाभिमतमङ्कुरारोपणे तथा ।
विविधासु प्रतिष्ठासु चक्राब्जे संयजेद्विभुम् ॥ ५८४ ॥

यथाभिमतरूपे तु व्यूहे वाभीप्सिते द्विज ! ।
भूतावासाह्वये वापि ध्रुवे वा नित्यसंज्ञके ॥ ५८५ ॥

जीर्णोद्धारादिविधिषु ह्येवमेव महामते ! ।
क्ष्मापरिग्रहपूर्वेषु सर्वेष्वपि च कर्मसु ॥ ५८६ ॥

प्रायश्चित्तनिमित्ते तु संजाते संकरादिके ।
अभीष्टैररकैर्युक्तं कुर्याच्चक्राम्बुजं सदा ॥ ५८७ ॥

तुलाभारादिकेऽप्येव यद्वा काम्यानुरूपत. ।
सङ्क्रान्तिद्विचतुष्केषु मेषसंक्रान्तिपूर्वकम् ॥ ५८८ ॥

सदध्वदे तु धर्माख्ये वसुगर्भे क्रमेण तु ।
सर्वकाम्ये ह्यमित्रघ्ने ह्यायुष्ये बलभद्रके ॥ ५८९ ॥

आरोग्ये संयजेद्देवं पुण्डरीकाक्षमव्ययम् ।
वाग्विभूतिप्रदे चैव मानसाख्येऽयनद्वये ॥ ५९० ॥

चन्द्रसूर्योपरागे तु जयेऽनन्ते तदेव हि ।
द्वादश्यो. सुप्रतिष्ठाख्ये बुद्ध्याधारे तु पूर्वयो ॥५९१॥

अमोघसंज्ञितेऽन्यासु प्रशस्तासु तिथिष्वपि ।
नक्षत्रेषु प्रशस्तेषु यजेद्यागे गुणाकरे ॥ ५९२ ॥

शान्तिकर्मणि वै कुर्याद्यागे शङ्खोदराभिधे ।
पूजनं देवदेवस्य यागे वा शान्तिकाह्वये ॥ ५९३ ॥

पौष्टिके च यथायागे ह्यथवा कौस्तुभोदरे ।
वनमालोदरे वाथ यष्टव्यो भगवान् विभु ॥ ५९४ ॥

रक्षाकर्मण्यमित्रघ्ने आरोग्ये वा यजेत् प्रभुम् ।
आप्यायनेऽर्धचन्द्राख्ये यद्वा पूर्णेन्दुमण्डले ॥ ५९५ ॥

कजाभिधाने यागे वा यजेत् कुम्भोदरे तु वा ।
धर्मार्थी संयजेन्नित्य देवदेवं जनार्दनम् ॥ ५९६ ॥

सदध्वदेवा धर्माख्ये अघनिर्मोचनेऽथवा ।
अर्थार्थी पूजयेन्नित्यं पद्मे कौमोदकीगदे ॥ ५९७ ॥

वसुगर्भाभिधे यागे सर्वतोभद्रकेऽथवा ।
काम्याभिलाषी कुर्वीत सर्वकामप्रदाभिधम् ॥ ५९८ ॥

विजयो राज्यलाभश्च शतार मिश्रचक्रराट ।
सहस्रारं तु वा मिश्रं मिश्र वारिजचक्रराट् ॥ ५९९ ॥

इच्छासख्यारसंपूर्ण सहस्रारावसानकम् ।
मोक्षार्थी परमानन्दे यागे वा चक्रपङ्कजे ॥ ६०० ॥

सहस्रसंख्यासंख्यातैररके परिभूषिते ।
अथवा मिश्रचक्रे तु तत्संख्यारपरिष्कृते ॥ ६०१ ॥

सर्वेष्वेतेषु यागेषु सर्वेषामपि कर्मणाम् ।
पूजयेद्वा जगन्नाथ वासुदेवं सनातनम् ॥ ६०२ ॥

प्रस्तावं च प्रबोधं च उत्सवं वात्सरीयकम् ।
पवित्रारोहणं चैव स्थापनं विविधं तथा ॥ ६०३ ॥

जीर्णोद्धारविधानं च तुलाभारादि कर्म च ।
प्रायश्चित्तानि मुख्यानि वर्जयित्वा तु कर्मसु ॥ ६०४ ॥

नैमित्तिकाख्येष्वन्येषु सर्वेषु द्विजसत्तम ! ।
अनुकल्पे यजेद्देवं कुम्भमण्डलके विना ॥ ६०५ ॥

प्रायश्चित्तप्रकारस्तु विभिन्नस्त्रिविभेदतः ।
उत्तमादिविभागेन कलशे मण्डलक्षितौ ॥ ६०६ ॥

बिम्बेऽग्नौ सयजेद्देवं प्रकारे ह्युत्तमोत्तमे ।
कुम्भमण्डलवह्निस्थ यजेत्तन्मध्यमे विभुम् ॥ ६०७ ॥

कुम्भेऽग्नौ च यजेद्देवं विभुं तदधमे द्विज ! ।
बिम्बेऽग्नौ च यजेद्देव गुरोरिच्छानुरूपत. ॥ ६०८ ॥

स्नपने. परभेदोत्थै. स्नापयेन्मध्यमोत्तमे ।
अपरोदितभेदैस्तु चतुर्भि स्नापयेद्विभुम् ॥ ६०९ ॥

क्रमेण मध्यमध्याद्ये न्यूनम-यावसानिके ।
चतुष्टये तदन्यस्मिन्नग्नौ सन्तर्पयेद्विभुम् ॥ ६१० ॥

प्रायश्चित्तेषु सर्वेषु जप वापि समाचरेत् ।
देशकालस्वसामर्थ्यद्रव्यादेरानुगुण्यत ॥ ६११ ॥

प्रायश्चित्तेषु सर्वेषु चतुस्स्थानार्चनादिके ।
दशप्रकारे विप्रेन्द्र ! दिनसंख्या निबोध मे ॥ ६१२ ॥

दिनानि चत्वारिंशच्च त्रिंशद्विंशतिरेव च ।
तथा पञ्चदशाहश्च क्रमादेकदिनान्तिमम् ॥ ६१३ ॥

एवमष्टादशविधा दिनसंख्या प्रकीर्तिता ।
उत्तमोत्तमपूर्वेण भेदेन नवधा तु वा ॥ ६१४ ॥

द्विकद्विकक्रमेणैव तदा ह्येकदिनान्तिमम् ।
प्रायश्चित्तप्रकारस्तु प्रसङ्गादत्र कीर्तित ॥ ६१५ ॥

विस्तरेण प्रवक्ष्यामि ह्युपरिष्टान्महामते ! ।
इति पावित्रकं सम्यग्विधान कथितं मया ।
इत. परं मुनिश्रेष्ठ ! किमन्यच्छ्रोतुमिच्छसि ॥ ६१६ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे पवित्रारोपणविधानं नाम द्वादशोऽध्याय ॥

श्रीः

त्रयोदशोऽध्यायः ॥

सनक —

शयनस्थे जगन्नाथे चातुर्मास्यस्य मध्यत ।
पवित्रारोहण प्रोक्तं त्वया मतिमता वर ! ॥ १ ॥

कि देवशयन नाम , कि देव. स्वपिति , कि विधान तथा वद ॥ २ ॥

के मन्त्रा. , के च नियमा. , व्रतान्यस्य क्रिया तु का ।
कि ग्राह्यं , कि च मोक्तव्य सुप्ते देवे जनार्दने ॥ ३ ॥

शाण्डिल्य —

श्रूयतामभिधास्यामि गुह्याद्गुह्यतरं तव ।
पुरा तप. प्रभावेन तोषितो योगनिद्रया ॥ ४ ॥

" ममाङ्ग मानयस्वे "ति प्रार्थितो जगतापतिः ।
निरीक्ष्य चात्मनो देहे रुद्ध लक्ष्म्या उर स्थलम् ॥ ५ ॥

शङ्खचक्रासिशार्ङ्गाद्यैर्बाहव सुविभूषिता ।
अधोनाभेर्निरुद्ध च वैनतेयेन पक्षिणा ॥ ६ ॥

मकुटेन शिरो रुद्धं कुण्डलाभ्या श्रवोयुगम् ।
ततो ददौ सुसन्तुष्टो नेत्रयो स्थानमादरात् ॥ ७ ॥

" चतुरो वार्षिकान् मासान् वासं प्रीता गमिष्यसि ।"
योगनिद्रापि तद्वाक्यं श्रुत्वा हृष्टतनूरुहा ॥ ८ ॥

चकार लोचनावासमत्यर्थं शार्ङ्गधन्वन ।
द्वादश्या शुक्लपक्षस्य आषाढस्य द्विजाधिप ! ॥ ९ ॥

तदादौ कौमुदाख्यस्य यावन्मासस्य तद्दिनम् ।
देव. सर्वेश्वरस्ता तु मानयन्नयनस्थिताम् ॥ १० ॥

योगनिद्रा महानिद्रा शेषाहिशयने स्वपन् ।
क्षीरोदतोयबीच्यग्रै धौतपाद. समाहित. ॥ ११ ॥

लक्ष्मीकराम्बुजश्लक्ष्णमृज्यमानपदद्वय. ।
प्रवृत्ते तौहिने काले प्रबुद्ध्यति जनार्दन. ॥ १२ ॥

वासुदेवो जगन्नाथ. क्रियार्थं स्वेच्छया द्विज ! ।
सेवमानोऽपि ता निद्रा जडता न व्रजेत् प्रभु ॥ १३ ॥

यथा प्राकृतिक सुप्त. कश्चिन्मलिनमानस ।
अकर्ता सर्वकार्याणा योगनिद्रावशीकृत ॥ १४ ॥

न तादृक्त्वे जगद्धातुरप्रमेय सनातन ।
यत प्रबुद्ध सर्वज्ञो नित्योऽज परमेश्वर ॥ १५ ॥

तस्य निद्रादयो दोषा सतत यान्ति वश्यताम् ।
निद्रादिदोषरहिते प्रसुप्ते ह्यच्युतेऽमले ॥ १६ ॥

निवर्तन्ते क्रिया. सर्वाश्चातुर्वर्ण्यस्य सवश. ।
विवाहव्रतबन्धादिचूडासंस्कारदीक्षणम् ॥ १७ ॥

यज्ञो गृहप्रवेशादिगोदानार्चाप्रतिष्ठनम् ।
पुण्यानि यानि कर्माणि वर्जयेद्दक्षिणायने ॥ १८ ॥

असङ्क्रान्त तु यन्मास दिव्ये पित्र्ये च वर्जयेत् ।
मलिम्लुचमशौच च सूर्यसङ्क्रान्तिवर्जितम् ॥ १९ ॥

नैमित्तिकान् मासि मासि तथा संवत्सरोत्सवान् ।
विशेषयागसयुक्तान् सर्वसंपूरणादृते ॥ २० ॥

नान्यन्नैमित्तिकं काम्य कार्य मासचतुष्टये ।
अभीष्टव्रतमाश्रित्य नेतव्यं तच्चतुष्टयम् ॥ २१ ॥

भगवद्भक्तिनिष्णातै. कार्य यच्चापरं शृणु ।
विष्णोरायतनस्याग्रे कुर्याच्छयनमन्दिरम् ॥ २२ ॥

षट्करादादितो यावच्चतुर्दशकरावधि ।
स्तम्भयुक्तं सुधालिप्त नानारागै. सुरञ्जितम् ॥ २३ ॥

ऊर्ध्व तथा भित्तिगणं पूरयेच्चित्रनिर्मितैः ।
ब्रह्मरुद्रेन्द्रचन्द्रार्कबिम्बैश्चान्यैस्तु वै बुधैः ॥ २४ ॥

अष्टयोनिगतैर्विप्र ! सर्वैश्चोपनतस्थितैः ।
ब्रह्मर्षिसिद्धमनुजैर्भक्तैश्चान्यैस्तथाऽसुरै ॥ २५ ॥

अप्सरोभिश्च विविधैस्तुवद्भिर्द्धाञ्जलीयकैः।
सम्मुखे देवदेवस्य सर्वाभरणभूषितैः ॥ २६ ॥

एवं तु शयनागारं कृत्वा वस्त्रादिभूषितम्।
ब्रह्मस्थानं समाश्रित्य तस्मिन् कुर्यात्ततो द्विज! ॥२७॥

एकद्वित्रिचतुरष्टाभिः स्वकीयैस्तु करैः स्थलाम्।
कोणेषु तत्समैर्दण्डैः शुभैर्यज्ञतरूद्भवैः ॥ २८ ॥

सुश्लक्ष्णैर्वेदिका कार्या चतुर्भिस्तोरणान्विता।
वितानकं तदूर्ध्वे तु मध्ये पङ्कजभूषितम् ॥ २९ ॥

प्रलम्बिपुष्पमालाभिर्घण्टाचामरदर्पणैः।
भूषयेद्बुद्बुदाद्यैश्च सुवर्णरजतोद्भवैः ॥ ३० ॥

मुक्तेन्द्रनीलवैडूर्यपद्मरागविचित्रितैः।
सितादिवस्त्रभेदेन पताकाभिस्तथा ध्वजैः ॥ ३१ ॥

खगेन्द्रतालमकरकृश्यसंज्ञैः समुच्छ्रितैः।
पूर्वादिदिक्षु संयुक्तैः कोणे पूर्णघटैर्युतम् ॥ ३२ ॥

बीजैर्गन्धैस्त्वगेलाद्यैः पूरितैः पात्रसञ्चयैः।
राजद्भिः सत्फलोपेतैर्विविधैः परितो वृताम् ॥ ३३ ॥

विचित्रपुष्पप्रकरां चन्दनाद्यनुलेपिताम्।
विचित्रवस्त्रसञ्छन्नां कुर्याद्वेदिं जगद्गुरोः ॥ ३४ ॥

इत्येवं शयनागारं संपाद्यादौ मनोहरम्।
हेमरत्नविचित्राङ्गं शयनं लक्षणान्वितम् ॥ ३५ ॥

सुपर्णतालमकरकृश्यैर्दिक्स्थैर्विभूषितम्।
मकरास्यसमायुक्तं व्याघ्राङ्घ्रिसदृशाङ्घ्रिकम् ॥ ३६ ॥

यद्वा गर्भगृहे विष्णोर्मूलमूर्तेस्तु दक्षिणे।
शयनं कल्पयेद्विप्र! स्वगृहे वाऽनुकल्पने ॥ ३७ ॥

एवं पुरा समापाद्य यथा वित्तानुरूपतः।
संगृह्य सर्वसंभारान् दशम्यां द्विजसत्तम! ॥ ३८ ॥

संकल्प्य पूर्वविधिना पूर्वोक्तं यागमण्डपम्।
प्रविशेद्देशिकेन्द्राख्य एकादश्यां निशामुखे ॥ ३९ ॥

पूर्ववत् पूजनं कुर्यात् कलशे मण्डले क्षितौ।
संप्रविश्य ततः प्राग्वन्मूलमूर्तौ तु पूजनम् ॥ ४० ॥

कुर्यात् स्नपनयोग्यायां यात्रामूर्तावतोऽन्यथा।
वह्नौ सन्तर्पयेन्मन्त्रं समिद्भिः सप्तभिः क्रमात् ॥ ४१ ॥

यागमण्डपमासाद्य जागरेण नयेन्निशाम्।
ब्राह्मे मुहूर्ते संप्राप्ते उत्थाय शयनात्ततः ॥ ४२ ॥

स्नातः कृताभिगमनो नित्यं निर्वर्त्य पूरयेत्।
पूर्वोक्तमण्डलं विप्र! रजोभिर्विविधैस्तत ॥ ४३ ॥

कुम्भमण्डलयोः पूर्वं समाराध्य यथाक्रमम्।
ततो नैमित्तिकं बिम्बं पश्चिमे मण्डपस्य तु ॥ ४४ ॥

संस्थाप्य संयजेत् सम्यग्भोगैर्व्यक्तैः क्रमोदितैः।
अष्टाष्टसंख्यासंख्यातैर्विविधैरौपचारिकैः ॥ ४५ ॥

सांस्पर्शिकैस्ततो ब्रह्मन्! हृदयङ्गमसंज्ञकैः।
एवमिष्ट्वा तु होमान्तं सविशेषं विधानतः ॥ ४६ ॥

इन्द्रादिलोकपालानां बलिं दद्याद्द्विजोत्तम!।
ततो विसृज्य मन्त्रेश कुम्भमण्डलकुण्डगम् ॥ ४७ ॥

विष्वक्सेनं यजेत् साङ्गं भोगैर्मण्डलमध्यतः।
ततस्तां भगवद्व्यक्तिं प्रासादान्तं प्रवेशयेत् ॥ ४८ ॥

उत्सवोक्तविधानेन सर्वालङ्कारसंयुतम्।
संप्रवेश्य प्रवेद्याथ मूलमूर्तिं महामते! ॥ ४९ ॥

अर्घ्येण गन्धपुष्पाभ्यां धूपेन सुशुभेन च।
प्रपूज्यावाह्य शय्यार्थमूर्तौ वै मूलमूर्तितः ॥ ५० ॥

तां समानीय यागार्थमण्डपे स्नापयेत् क्रमात्।
अलङ्कृतामलङ्कारैर्नूपुरान्तैः समुज्ज्वलैः ॥ ५१ ॥

श्रीखण्डशशिबाह्लीकविलिप्तां पुष्पवेष्टिताम्।
प्रावृतां नेत्रवस्त्रेण मृष्टधूपैः सुधूपिताम् ॥ ५२ ॥

पूजयेद्विभवेनैव भोगपूगैस्तु पावनैः।
यद्वा ह्यनुमतो विप्र! देशिको गुरुणा मुने! ॥ ५३ ॥

पूर्वमेव यजेन्मूर्तिमेनां स्नपनपूर्वकम्।
ततो निशामुखे प्राप्ते देशिकः साधकैः सह ॥ ५४ ॥

यानेनाभिमतेनैव प्रदक्षिणचतुष्टयम्।
प्रासादं संपरिक्रम्य सर्वाण्यावरणानि वा ॥ ५५ ॥

सह चक्रायनैर्विप्रैर्द्विजेन्द्रै पाञ्चकालिकै ।
सिद्धान्तानेष्टैस्तत्कर्मनिरतैर्भगवन्मयै. ॥ ५६ ॥

मङ्गलानि प्रयुञ्जाने पुष्पाक्षतकरैर्द्विज ! ।
कृत्वा द्वार्स्थार्चनं साध्यै पुष्पगन्धानुलेपनै. ॥ ५७ ॥

" लक्ष्मीनिवासेश ! विभो ! भोगपर्यङ्कशायन ! ।
ममाशु पापनिचय विघ्नजाल विनाशय " ॥ ५८ ॥

पठन्मन्त्रमिम सम्यक् प्रणवब्रह्मसंयुतम् ।
प्रविशेच्छयनागार हृदि मन्त्रमनुस्मरन् ॥ ५९ ॥

तत. शयनदेशे तु पश्चिमे हेमविष्टरे ।
निवेश्य प्राङमुखीं मूर्ति, यदा गर्भगृहे तदा ॥ ६० ॥

निवेश्य द्वाराभिमुखीं स्वयं समुपविश्य तु ।
पञ्चगव्येन चाभ्युक्ष्य तत शय्यास्थल द्विज ! ॥ ६१ ॥

कुङ्कुमागरुकर्पूरैरुपलिप्य च चन्दनै. ।
तस्मिन् मध्ये शुभं कुर्यात् स्वस्तिकं सूक्ष्मलक्षणम् ॥

शुक्लारुणैस्तथा पीतैर्धातुभिश्चासितैर्मुने ! ।
चतुर्विधेन रजसा कुर्याद्रत्नोद्भवेन वा ॥ ६३ ॥

मूर्धोपधानसंयुक्त मसूरकवरान्वितम् ।
गण्डोपधानसंयुक्त चरणाधारसंयुतम् ॥ ६४ ॥

ज्योत्स्नावितानसदृशप्रच्छादनपटान्वितम् ।
सुधूपितं च शयनं संस्थाप्य च तथोपरि ॥ ६५ ॥

प्रागुत्तरशिरश्शुभ्र प्राक्छिरस्त्वथवा द्विज ! ।
मूलबिम्बे शयनगे स्थाप्यं तदनुरूपत. ॥ ६६ ॥

तद्दक्षिणेऽथ दिग्भागे देशे समवलम्ब्य वै ।
तस्मिन् शुभतरे ब्रह्मन् ! शयने शशिवासिते ॥ ६७ ॥

क्षीरोदार्णवमध्यस्थ सहस्रफणमौलिनम् ।
हिमकुन्देन्दुधवलं नागराजं महामते ! ॥ ६८ ॥

प्रणवेन स्वनाम्ना च वर्णान्तेन सबिन्दुना ।
ध्यात्वार्चयित्वा स्तुत्वा च नमस्कृत्वा प्रमाद्य च ॥

निवेश्य तस्मिंस्ता मूर्तिं केवला वा श्रिया सह ।
स्वबीज मन्त्रपूतं (वर्ण) तु "ओ लक्ष्मीपतये नम." ॥

समुद्धीर्य धियाचार्य अङ्गोपाङ्गक्रमेण तु ।
द्वादशाक्षरवर्णैस्तु स्वनामपदसंयुते ॥ ७१ ॥

दत्वा गन्धानि माल्यं च धूप शय्यास्थित प्रभुम् ।
पूजयेत् पूर्वविधिना भोगै सर्वैर्यथोदितै ॥ ७२ ॥

ततस्त्वभिनवं कुण्डं संस्कृत्याभ्यन्तरे द्विज ! ।
तेजस्तस्मिन् समाहूय मन्त्रेणानेन विन्यसेत् ॥ ७३ ॥

"(ओं) हुताशनागच्छ विभो ! कुण्डेऽस्मिन् हव्यवाहन ! ।
सन्निधान घटे चास्मिन् कुरु मासचतुष्टयम् " ॥ ७४ ॥

ततश्चावाह्य देवेशं तर्पयेत् पूर्ववत् क्रमात् ।
होम समाप्य सपूज्य ह्यर्घ्याद्य. संपठेदिदम् ॥ ७५ ॥

" सुप्ते त्वयि जगन्नाथे जगत् सुप्त भवेदिदम् ।
प्रबुद्धे त्वयि बुध्येत जगत् सर्व चराचरम् " ॥ ७६ ॥

शाययित्वोपरि सितं दुकूलं धूपधूपितम् ।
दत्वोपरि समभ्यर्च्य पुष्पधूपविलेपनैः ॥ ७७ ॥

सर्वसत्वोपसंहारां चिन्ताशक्ति च विन्यसेत् ।
दक्षिणे त्वभिमानाख्यमूर्तिं तु चमरोद्यताम् ॥ ७८ ॥

एवं ज्ञाननिशा वामे तालवृन्तकरोद्यताम् ।
उत्तमाङ्गपदे निद्रा करसंवाहने रताम् ॥ ७९ ॥

पदारविन्ददेशस्था लालयन्तीं कराम्बुजै ।
आदाय चरणौ दिव्यौ साक्षाच्छ्रीं निधिसंश्रिताम् ॥

आनन्दं ब्रह्मणो रूपं तस्यै देवोऽधिदेवता ।
तदन्त स्मरणानन्दजातविस्मयलोचनाम् ॥ ८१ ॥

स्वनामपदमन्त्रैस्ता. सम्पूज्या प्रणवादिभि. ।
राजती काञ्चनी मूर्तिस्ताम्रजा रीतिजाऽथवा ॥ ८२ ॥

पूर्वा पूर्वा प्रशस्ता स्याच्छयनोत्थानकर्मणि ।
यदि कुर्याद्विपर्यासं राजा राष्ट्रं विनश्यति ॥ ८३ ॥

दर्भमञ्जरिजे कूर्च सर्वाभावे तदाऽचरेत् ।
एव हि देवशयन प्रतिष्ठाप्य द्विजोत्तम ! ॥ ८४ ॥

तस्यैवाग्रे स्वयं वाचा गृह्णीयान्नियमान्नर. ।
चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ॥ ८५ ॥

स्त्री वा नरो वा तद्भक्तो धर्मार्थी सुदृढव्रतः।
गृह्णीयान्नियमानेतान् दन्तधावनपूर्वकम् ॥ ८६ ॥

तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक् पृथक्।
मधुस्वरो भवेद्विप्र! पुरुषो गुडवर्जनात् ॥ ८७ ॥

लभेत सन्ततिं दीर्घां तैलसेवाविवर्जनात्।
अभ्यङ्गवर्जनाद्ब्रह्मन्! सुन्दराङ्गः प्रजायते ॥ ८८ ॥

कटुतैलपरित्यागाच्छत्रावासमवाप्नुयात्।
मधूकतैलत्यागेन सौभाग्यमतुलं लभेत् ॥ ८९ ॥

पुष्पादिभोगत्यागेन स्वर्गे विद्याधरो भवेत्।
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ॥ ९० ॥

कस्तूरीं कुङ्कुमक्षोदचन्दनाद्यनुलेपनम्।
यो वर्जयेत् स वैरूप्यं दौर्गन्ध्यं न तु वाप्नुयात् ॥ ९१ ॥

ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते।
घृतत्यागात् स लावण्यं सर्वस्निग्धतनुर्भवेत् ॥ ९२ ॥

फलत्यागाच्च मतिमान् बहुपुत्रश्च जायते।
पादाभ्यङ्गपरित्यागाच्छिरोभ्यङ्गविवर्जनात् ॥ ९३ ॥

दीप्तिमान् दीप्तकरणः साक्षाद्द्रव्यपतिर्भवेत्।
दधिदुग्धतक्रनियमाद्भोलोकं लभते नरः ॥ ९४ ॥

इन्द्रातिथित्वमाप्नोति स्थालीपाकविवर्जनात्।
लभते सन्ततिं दीर्घामपि पक्वमभक्षयन् ॥ ९५ ॥

भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत्।
सदा मुनिः सदा योगी मधुमासस्य वर्जनात् ॥ ९६ ॥

एवमादिपरित्यागाद्धर्मी स्याद्धर्मनन्दनः।
एकान्तरोपवासेन ब्रह्मलोके महीयते ॥ ९७ ॥

धारणान्नखरोमाणां गङ्गास्नानं दिने दिने।
मौनव्रती भवेद्यस्तु तस्याज्ञा तुलिता भवेत् ॥ ९८ ॥

द्विषट्काक्षरनिष्णातः प्राप्नुयात् परमं पदम्।
नमो नारायणायेति जपन्नामशतं फलम् ॥ ९९ ॥

पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम्।
विष्णुपादाम्बुसंस्पर्शात् कृतकृत्यो भवेन्नरः ॥ १०० ॥

विष्णोरायतने कुर्यादुपलेपनमार्जने।
कल्पस्थायी भवेद्विप्र! स नरो नात्र संशयः ॥ १०१ ॥

प्रदक्षिणशतं यस्तु करोति स्तुतिपाठकः।
हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ॥ १०२ ॥

गीतवाद्यकरो विष्णोर्गान्धर्वं लोकमाप्नुयात्।
कृत्वा प्रदक्षिणं दिव्यं स्थानमप्सरसां व्रजेत् ॥ १०३ ॥

नित्यं शास्त्रविनोदेन लोकान् यस्तु प्रबोधयेत्।
स व्यासरूपी विष्ण्वग्रे अन्ते विष्णुपुरं व्रजेत् ॥ १०४ ॥

पुष्पमालाकुला पूजा कृत्वा विष्णोः पुरं व्रजेत्।
प्रातःस्नायी नरो यस्तु नरकं स न गच्छति ॥ १०५ ॥

भोजनं वर्जयेद्यस्तु स स्थानं पौष्करं लभेत्।
तीर्थाम्बुना हरेः स्नानान्निर्मलं देहमाप्नुयात् ॥ १०६ ॥

पञ्चगव्याशनाद्विप्र! चान्द्रायणफलं लभेत्।
पर्णेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ॥ १०७ ॥

शिलायां भोजनान्नित्यं स्नानं प्रायागजं लभेत्।
यामद्वयाशनत्यागान्न रोगैः परिभूयते ॥ १०८ ॥

एवमादिव्रतैर्देवस्तुष्टिमाप्नोति तोषितः।
यस्मिन् देशे तु तद्भक्तो यो मासाश्चतुरः क्षिपेत् ॥

व्रतैरनेकैर्नियमैर्महद्भिः श्रेष्ठमानसः।
कल्पस्थायी विष्णुलोके संवसेन्नात्र संशयः ॥ ११० ॥

चतुरो वार्षिकान् मासान्नियमो येन यत्कृते।
कथयित्वा द्विजेन्द्रेभ्यो भुक्तेभ्यस्तं स दक्षिणाम् ॥

दत्वा विसर्जयेद्विप्रांस्ततो भुञ्जीत च स्वयम्।
यन्नक्तं चतुरो मासान् प्रवृत्तिं तस्य वाऽचरेत् ॥ ११२ ॥

एवं य आचरेद्विद्वान् सोऽनन्तं धर्ममाप्नुयात्।
यस्य विष्णोः समाप्येत चातुर्मास्यव्रतं द्विज! ॥ ११३ ॥

स भवेत् कृतकृत्यस्तु न पुनर्मानुषो भवेत्।
तदन्ते जन्म चासाद्य शुचीनां श्रीमतां गृहे ॥ ११४ ॥

शास्त्रमेकायनं ज्ञात्वा सम्यक् कृत्वा तदुद्भवम्।
त्रयोदशविधं कर्म भगवन्तं समाप्नुयात् ॥ ११५ ॥

एवं संकल्प्य नियमानन्यान् वै शास्त्रचोदितान् ।
कार्यात्र प्रत्यहं पूजा मार्जनं चोपलेपनम् ॥ ११६ ॥

मृदा धातुविकारैर्वा सुगन्धैश्चन्दनादिकै. ।
प्रदानं धूपदीपाना व्यजनेनानिलोत्थिति ॥ ११७ ॥

शशिचन्दनसंमिश्र शीतलोदकसत् क्रिया ।
कदलीफलकल्हारै. पद्मोत्पलविमिश्रिते. ॥ ११८ ॥

स्वेदशान्ति समापाद्य पौन पुन्येन पूजनम् ।
वेणुवीणासमोपेतां गीति च मधुरस्वनाम् ॥ ११९ ॥

एवं मासद्वये याते याते मेघरवेऽम्बरात् ।
ब्रह्मन् ! भाद्रपदे मासि द्वादश्या हि निशामुखे ॥

ईषत् प्रबोधमाश्रित्य देवदेवो ह्यधोक्षज. ।
स्थित्यर्थममराणा च परिवर्तनमाचरेत् ॥ १२१ ॥

दक्षिणेनाङ्गसङ्गेन त्यक्त्वा चोत्तानशायिनीम् ।
योगनिद्रा समाश्रित्य प्रकुर्वन् प्रभवाप्ययौ ॥ १२२ ॥

वायुचक्रान्तरस्थस्य जगद्बीजचयस्य च ।
मुखेन्दुमण्डलाच्चाथ अपोह्याच्छादनाम्बरम् ॥ १२३ ॥

आस्ते चाश्वयुजे चैव द्वादश्या परमेश्वर. ।
सन्त्यज्य शयनं दिव्य निशाया कार्तिकस्य तु ॥

उत्थायामरनाथस्तु समाक्रम्य पतत्रिराट् ।
निश्शेषभुवनग्रामवीथीना दोषशान्तये ॥ १२५ ॥

विचरत्यप्रमेयात्मा नन्दयस्तु सुरादिकान् ।
संहर्षयन् जगत्यस्मिन् सुकृता धर्मपद्धतिम् ॥ १२६ ॥

एवं भक्तजनै कार्य तस्य तच्चेष्टितं महत् ।
विविधैरुत्सवैर्दानैर्जपजागरणस्तवै. ॥ १२७ ॥

नृत्तगीतसमोपेतैर्विलासैर्हास्यसंयुतै. ।
क्रीडमानै. सुमनसैः प्रयनै. प्रणतैर्विभो ॥ १२८ ॥

एकदेशस्थितैर्विप्र ! अनन्यमनसै सदा ।
विशेषयागपूर्व तु परिवर्तनमाचरेत् ॥ १२९ ॥

तद्वत् प्रभातवेलायामासनं च विधीयते ।
प्रबोधनं तत. कुर्याच्छयनस्थस्य वै विभो ॥ १३० ॥

द्वादश्यां शुक्लपक्षस्य कार्तिके मासि वै द्विज ! ।
दशम्या विधिवत् कृत्वा संकल्पं पूर्ववद्बुधः ॥ १३१ ॥

निमन्त्रणं द्विजातीनामेकादश्या तथैव च ।
पूर्ववत् पूजनं कृत्वा चतु.स्थानस्थितस्य वै ॥ १३२ ॥

रात्रौ प्रजागर कुर्यात् सहायै. सह देशिकः ।
पुण्याख्यानकथाभिस्तु स्तोत्रपूर्वैस्तु गीतकैः ॥ १३३ ॥

सवाद्यैर्मधुरैर्नृत्तैरपहासैस्तु हर्षदै. ।
जयशब्दैर्नमस्कारैः करतालसमन्वितै. ॥ १३४ ॥

सोपवास. शुचि. स्नात्वा समाराध्य परं प्रभुम् ।
भोगै. षड्रसपूर्णैस्तु सुपूर्णैरौपचारिकैः ॥ १३५ ॥

अर्घ्यैर्विलेपनैर्माल्यैर्मृष्टधूपसमन्वितै. ।
ब्राह्मे मुहूर्ते द्वादश्या मन्त्रमूर्ति प्रबोधयेत् ॥ १३६ ॥

"प्रबुद्ध ! त्वं जगन्नाथ ! प्रबुद्ध ! परमेश्वर ! ।
प्रबुद्ध ! पुण्डरीकाक्ष ! भक्तानामनुकम्पया ॥ १३७ ॥

त्वयि प्रबुद्धे देवेश ! तवाग्रे परमेश्वर ! ।
लौकिकानीह यज्ञानि तानि निर्वर्तयाम्यहम् ॥ १३८ ॥

अग्रत. सर्वयज्ञाना त्वं प्रभुर्नामत. सदा ।
नापरेषु जगन्नाथ ! पूजितेषु सुरेषु च ॥ १३९ ॥

मयि यज्ञसमाप्ति. स्यात् त्वयि सन्तर्पितेऽनले ।
सर्व देवानलमुखाः स चाग्निस्त्वन्मुखे कृत ॥ १४० ॥

ब्रह्मा स्वयं ब्रह्मलोके स्वर्गे स्वर्गनिवासिनः ।
सात्विका मानुषे लोके नागाद्याश्च रसातले ॥ १४१ ॥

त्वयि प्रबोधयन्त्येते स्वार्थसंसिद्धये सदा ।
त्यज योगमयीं निद्रा कृपा कुरु सनातन ! " ॥ १४२ ॥

'बोधश्च मामनिर्बोध' इति मन्त्रमुदाहरन् ।
'उत्तिष्ठ ब्रह्मणस्पते उदुत्यं जातवेदसम्' ॥ १४३ ॥

'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।'
'समूढमस्य पॉ सुरे स्वाहा' ॥ १४४ ॥

जिततेनोच्चया वाचा समस्तव्यस्तयोगतः ।
शङ्खध्वनिसमोपेतै. दुन्दुभीपटहस्वनैः ॥ १४५ ॥

वन्दिवृन्दोत्थितोच्चाभिर्नानावारिभिर्महामते ! ।
महाजयजयारावै. पुन पुनरुदीरितै ॥ १४६ ॥

प्रबोधलक्षणैः स्तोत्रैरुत्थाप्य शयनात्तत. ।
अर्घ्यगन्धादिनाभ्यर्च्य प्रविशेद्यागमण्डपम् ॥ १४७ ॥

सपूर्याभिमतं रागैर्मण्डलं चाधिवासितम् ।
कुम्भमण्डलयो. पूर्वं पूजा कृत्वा विधानत ॥ १४८ ॥

पश्चादुत्सवमूर्तिं च यजेन्मण्डलपश्चिमे ।
महास्नपनपूर्वैस्तु भोगैः पूर्णैर्यथोचितै ॥ १४९ ॥

होमं तु विधिवत् कृत्वा तोषयेत् परितो द्विज ! ।
एकायनीयशाखोत्थै. साक्षात्तत्प्रतिपादकै ॥ १५० ॥

दिव्यैर्बलादिकैर्मन्त्रैर्व्यापकै प्रणवान्वितै. ।
ऋग्यजुस्सामसभूतैर्मन्त्रै स्तोत्रै पृथग्विधै. ॥ १५१ ॥

गीतकैर्विविधैर्नृत्तैर्वाद्यैस्तन्त्र्यादिभिस्तदा ।
एवं प्रवृत्ते गीताद्ये यायाच्छय्यानिकेतनम् ॥ १५२ ॥

प्रबोधितं तु विधिवत् स्नापयेत् पूर्ववत् प्रभुम् ।
संपूज्य च तथा भक्त्या क्रमेण च महामुने ! ॥ १५३ ॥

महाविभूतिसंभारैः पुष्पधूपानुलेपनै. ।
नैवेद्यैर्विविधैर्विप्र ! स्तोत्रवादित्रपूर्वकै ॥ १५४ ॥

अग्नौ सन्तर्पयेत् पश्चात् सविशेषं यथाविधि ।
पश्चादुत्सवमूर्तिं तां पूजितां यागमण्डपात् ॥ १५५ ॥

समानीय रथाद्येषु यानेत्वभिमतेर्चिते ।
स्थाप्य प्रासादपूर्वं वा भ्रामयेद्ग्रामपूर्वकम् ॥ १५६ ॥

चक्राधिष्ठानपूर्वं वा सस्थाप्य भ्रामयेद्द्विज ! ।
गणिका भगवद्भक्तै. सह नागरिकैर्जनैः ॥ १५७ ॥

परिव्राड्ब्रह्मचारिभि. जपस्तुतिपरायणै. ।
द्विजेन्द्रप्रमुखैर्वृत्तसंयुक्तैस्तत्परायणै. ॥ १५८ ॥

श्वेताम्बरधरै सर्वैर्ध्वजोत्तरकरै. शुभै ।
वालव्यजनहस्तैश्च पताकोद्यतपाणिभि ॥ १५९ ॥

पद्मोत्पलकरैश्चान्यैर्द्विजैर्वेत्रलताकरैः ।
लाजसिद्धार्थककरैरन्यैरक्षतपाणिभिः ॥ १६० ॥

सुसुगन्धतयाच्छिन्नधूपपात्रकरैस्तथा ।
फलपुष्पकरैश्चान्यैस्तथा पूर्णघटोद्यतै ॥ १६१ ॥

अन्यै. कलशहस्तैश्च गदाचक्रधरै. सदा ।
शङ्खातपत्रहस्तैश्च दण्डलाङ्गलधारिभि. ॥ १६२ ॥

ऋङ्मन्त्रोद्घोषणपरैर्जपस्तुतिपरैस्तथा ।
प्रयत्नाद्देवतासीभिर्नृत्तगीतादि चोत्सवम् ॥ १६३ ॥

कारयेत् सर्वतो वीथीर्वाद्यैरन्यै. पृथग्विधै. ।
प्रदद्येत् सुरभि धूप पृथक् साज्य च गुग्गुलुम् ॥१६४॥

अर्थिनश्चार्थनिचयैस्तर्पणीयाश्च शक्तित. ।
देवीयब्रह्मयानस्य भ्रममाणस्य वै द्विज ! ॥ १६५ ॥

अल्पमात्र तु यो दद्यात् पञ्चकालपरायणे ।
दानं सहस्रगुणित विस्तार याति तत्र तत् ॥ १६६ ॥

पुष्पमूलादिनैवेद्यै. फलमूलैर्धनैस्तथा ।
ब्रह्मयानगतं देव य. पूजयति भक्तित. ॥ १६७ ॥

तद्दानं लक्षगुणितं विस्तार नात्र संशय. ।
सर्षपाक्षतपुष्पाणि अग्रत पृष्ठतो विभो ॥ १६८ ॥

क्षेप्तव्यानि द्विजश्रेष्ठ ! ऊर्ध्वं च ककुवष्टके ।
एव विधं ब्रह्मरथं वैष्णवं विघ्ननाशनम् ॥ १६९ ॥

ग्रामे पुरे वा नगरे भ्राम्यते यत्र कुत्रचित् ।
विपापोऽसौ भवेद्देशो न दुर्भिक्षभयं भवेत् ॥ १७० ॥

नाकालमृत्युना किञ्चित् प्राप्यते विधिना तथा ।
ईतयोपद्रवाद्याश्च प्रसमं यान्ति सर्वदा ॥ १७१ ॥

नश्यन्ति तस्करास्तत्र नाधर्म. संप्रवर्तते ।
धर्मयुक्तो भवेद्राजा जना धर्मपरास्तथा ॥ १७२ ॥

भवन्ति सुखिन. सर्वे दु खशोकविवर्जिताः ।
एवं प्रदक्षिणीकृत्य क्षिप्त्वा पुष्पाञ्जलि ततः ॥ १७३ ॥

अवतार्य रथान्मन्त्रं चक्राधिष्ठानपूर्वकम् ।
यष्टव्यमर्घ्यगन्धाद्यैर्मुद्रा बद्ध्वा जपेत्ततः ॥ १७४ ॥

तर्पणीयमथाज्याद्यैर्दद्यात् पूर्णाहुति शुभाम् ।
अर्घ्यधूपप्रधानाद्यैः क्षमयेत् पुरुषोत्तमम् ॥ १७५ ॥

ततो यागगृह नीत्वा प्रणिपत्य मुहुर्मुहु. ।
ततः शयनमूर्तेस्तु गत्वैवं सन्निधि गुरु. ॥ १७६ ॥

चतु प्रदक्षिणीकृत्य अष्टाङ्गेन नमेत् क्षितौ ।
तोषयित्वा जगन्नाथ ब्रह्मयानादिषु द्विज ! ॥ १७७ ॥

संस्थाप्य भ्रामयेद्भक्त्या प्रासादं साम्प्रत क्रमात् ।
प्रविश्य गर्भगेहं तु द्वारदेशे स्थित. प्रभुम् ॥ १७८ ॥

अर्घ्यपाद्यादिभि· पूज्य निनयेदन्तरं तत. ।
मूलमूर्तिं प्रणम्याथ अर्घ्यगन्धादिभिर्यजेत् ॥ १७९ ॥

विसर्जयेत्तु तन्मूर्तौ मन्त्र शयनमूर्तिगम् ।
पश्चादुत्सवमूर्ति तां पूजितां यागमण्डपात् ॥ १८० ॥

प्रदक्षिणक्रमेणैव गर्भगेहं प्रवेशयेत् ।
मूलमूर्तिगत देवमर्घ्याद्यै संप्रपूज्य च ॥ १८१ ॥

स्तुत्वा विज्ञाप्य तद्भूयो गुणातीतमधोक्षजम् ।
" अनेनोत्सवयोगेन यागपूजादिकेन च ॥ १८२ ॥

निर्वर्तितेन भगवंस्त्वं मम प्रीयतामिति । "
ततो विसर्जयित्वा तु कुम्भमण्डलमध्यगम् ॥ १८३ ॥

कृत्वा यागं गणेशस्य कुर्यात्तस्य विसर्जनम् ।
अनुकल्पे तु देवस्य परिभ्रमणकर्मण ॥ १८४ ॥

प्रागेव देवदेवेशं कुम्भमण्डलकुण्डगम् ।
विसर्जयित्वा तत्पश्चात् परिभ्रमणमाचरेत् ॥ १८५ ॥

यद्वा विघ्नेशयागं च तथैव तु समाचरेत् ।
प्रागेव मुख्यकाले तु कृत्वा शयनगं विभुम् ॥ १८६ ॥

ततो विसर्जयेद्देवं कुम्भमण्डलकुण्डगम् ।
यानपात्रं तथा च्छत्रं प्रतिपाद्य सदक्षिणम् ॥ १८७ ॥

शयनं स्वगुरोर्विप्र ! द्विजानां तदसन्निधौ ।
देवदेवस्य देवस्य मूलमूर्तिगतस्य च ॥ १८८ ॥

कृत्वा जानुद्वयं भूमौ बद्धाञ्जलिरिदं पठेत् ।
" देव ! सर्वेश्वरानादे ! कर्मणानेन चाखिलाम् ॥ १८९ ॥

शुभां गति जनो यातु प्रीति च परमा भज । "
इति विज्ञाप्य देवस्य ब्राह्मणान् प्रीणयेत्ततः ॥ १९० ॥

विविधैरन्नपानाद्यैर्यथाशक्ति द्विजोत्तम ! ।
बन्धुभृत्यसमोपेतमनुयागमथाचरेत् ॥ १९१ ॥

अनेन विधिना कुर्याच्छयनस्थस्य बोधनम् ।
यदा तु मूलमूर्ता तु चतुःस्थानार्चनं भवेत् ॥ १९२ ॥

तदाप्युत्सवमूर्तौ स्यात् पूजिताया तदुत्सवम् ।
कुर्याच्छयनमूर्तौ च शयनं शास्त्रकोविद. ॥ १९३ ॥

यात्राव्यक्तेरभावे तु मूलबिम्बेऽर्चन भवेत् ।
तदा स्नपनबिम्बे तु तदीयस्नपनं भवेत् ॥ १९४ ॥

तदा शयनमूर्तौ स्यादुत्वो द्विजसत्तम ! ।
तदभावे तु तत् कर्म दर्भमञ्चरिजे हितम् ॥ १९५ ॥

विष्टरे विष्टरं कल्प्य रक्षार्थं किञ्चिदूनत. ।
तदा मन्त्रेशकुम्भेस्याच्छस्त्रकुम्भे तदुत्सवम् ॥ १९६ ॥

अथवा चक्रराजस्य विष्टरे वा समाचरेत् ।
अभावे स्नपनव्यक्तेर्दर्पणे स्नपनं भवेत् ॥ १९७ ॥

तदभावे निवेद्यैव प्रक्षिपेत् कलशान् क्रमात् ।
इत्येवमुक्तं देवस्य शयनं च प्रबोधनम् ॥ १९८ ॥

यदुक्तमेवामखिलं यथाकालमसंभवात् ।
अस्वातन्त्र्यादसामर्थ्याद्वित्ताभावात्तु वा द्विज! ॥ १९९ ॥

द्वादशीष्वखिलास्वेवं कुर्यात् संवत्सरान्तरे ।
परीते तु शयानां तु चातुर्मास्ये तु संयमे ॥ २०० ॥

भक्तैर्निर्वहणीयं तु तुलाभोगावसानकम् ।
पूर्वोक्तविधिना शय्यां यो विष्णो. परिकल्पयेत् ॥

सोऽचिराल्लभते लक्ष्मी सौभाग्यमतुलं तथा ।
पुत्रदारकुटुम्बेषु कदाचित् केनचित् सह ॥ २०२ ॥

वियोगं नाप्नुयात् किञ्चिद्योषिद्वा पुरुषस्तथा ।
अतुल पुण्यमाप्नोति दीर्घमायुश्च विन्दति ॥ २०३ ॥

रोगाच्च मुच्यते रोगी भीतो मुच्येत वै भयात् ।
अजय्यः सर्वशत्रूणां पूज्य सर्वजनस्य च ॥ २०४ ॥

भुक्त्वा भोगास्तु विविधान् विष्णुलोके महीयते ।
शेषशय्यागतं विष्णु य. पूजयति भक्तित. ॥ २०५ ॥

विभवेनाथ भक्त्या वा तस्य तुष्यति केशव ।
तस्मिन् काले तु ये किंचित्तत्र तिष्ठन्ति मानवा ॥
याति पाप क्षयं तेषामन्ते स्वर्ग व्रजन्ति च ।
इद शय्याविधानं तु शृणुयाद्यस्तु वैष्णवः ॥ २०७ ॥
त्रिविधस्य तु पापस्य क्षयस्तस्य तु वै क्षणात् ।
अनेन विधिना यस्तु कुर्याद्विष्णोः प्रबोधनम् ॥
सकामानखिलान् प्राप्य दीर्घमायुश्च विन्दति ।
विधिनानेन य. कुर्यात् प्रतिसंवत्सरं द्विज ! ॥ २०९ ॥
प्रबोधनं तु देवस्य स वै जन्मनि जन्मनि ।
सुखप्रबुद्धो भवति सर्वदोषविवर्जित· ॥ २१० ॥
सर्वेषां बान्धवादीना वन्दनीयस्त्वसौ नर. ।
विष्णोर्भक्तिपरो ब्रह्मन् ! स गच्छेद्वैष्णवं पदम् ॥
दुग्धाब्धिभोगिशयने भगवाननतो
यस्मिन् दिने स्वपिति वाथ विबुध्यते वा ।
तस्मिन्ननन्यमनसामुपवासभाजां
पुसां ददाति सुगति गरुडांससंस्थ. ॥ २१२ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहितायां क्रियाकाण्डे स्वापशयनोत्थापनोत्सवविधिर्नाम त्रयोदशोऽध्याय ॥

श्री

चतुर्दशोऽध्यायः ॥

सनक —
स्नपनानां विधि ब्रह्मन् ! समाख्याहि सविस्तरम् ।
यज्ज्ञानात् सकला. पूर्णा. नित्यनैमित्तिका क्रिया ॥
शाण्डिल्य —
शृणुवत्स ! महाबुद्धे ! सावधानेन चेतसा ।
विधानं स्नपनानां तु बहुभेदविनिर्मितम् ॥ २ ॥
प्रासादस्याग्रत कुर्यान्मण्डप तु तदर्थत ।
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ॥ ३ ॥
तृतीयावरणे वापि चतुर्थे पञ्चमेऽथवा ।
आग्नेय्यां दक्षिणस्या वा नैर्ऋत्यां पश्चिमे तु वा ॥ ४ ॥
वायव्यामुत्तरस्या वा ऐशान्या वा यथा रुचि ।
कुर्यान्मानादिकं सर्व यागमण्डपवद्द्विज ! ॥ ५ ॥
विना यागस्थलान्मध्ये वेदिं चापि तदूर्ध्वतः ।
अधिवासश्च कुम्भाना स्थापन स्नपनं तथा ॥ ६ ॥
युज्यतेवै यथेकस्या तथाभ्यूह्य समाचरेत् ।
आचार्याश्चतुरो विप्र ! षडष्टौ द्वादशापि वा ॥ ७ ॥
यजमानस्तु वरयेच्छास्त्रज्ञान् गुरुणा सह ।
प्रवीणाश्च, बहुत्वे तु तत्सख्यानियति कृता ॥ ८ ॥
तेषा यथोक्तसंख्यानामभिज्ञानामसन्निधौ ।
तादृशान् वरयेद्विप्राश्चतुस्त्रिद्वयेकमेव वा ॥ ९ ॥
साधकाश्चतुर षड्वा ह्यष्टौ द्वादश षोडश ।
वरयेच्छास्त्रकुशलान् प्रवीणानुक्तकर्मसु ॥ १० ॥
एव सर्वेषु यागेषु नित्यनैमित्तिकात्मसु ।
आचार्याणा साधकाना संख्यानियम ईरित. ॥ ११ ॥
सख्याहीनं न गृण्हीयादापद्यापि कदाचन ।
मोहेन यदि गृण्हीयाद्भयं स्याद्राजराष्ट्रयोः ॥ १२ ॥
प्राङ्मुखे मण्डपे भागे तृतीये पश्चिमे स्थिते ।
मध्यसूत्रं समाश्रित्य स्नानपीठं प्रकल्पयेत् ॥ १३ ॥
प्राग्गतं प्रत्यगास्ये तु, सौम्यास्ये दक्षिणागतम् ।
तदास्ये चोत्तरासस्थ यथा लक्षणलक्षितम् ॥ १४ ॥
यदा स्नपनबिम्बादौ बिम्बे स्नपनमाचरेत् ।
एवं तदा प्रकुर्वीत मण्डपं द्विजसत्तम ! ॥ १५ ॥

मूलबिम्बे यदा कुर्यात्तदग्रे मण्डपं तदा ।
तदानीं न तु कुर्वीत स्नानपीठं द्विजोत्तम ! ॥ १६ ॥

सप्तमे पञ्चमे वापि पूर्वं स्नपनवासरे(रात्) ।
तृतीये वा मुनिश्रेष्ठ ! तस्मिन्नहनि वा द्विज ! ॥ १७ ॥

अङ्कुरानर्पयित्वा तु ततः स्नपनमारभेत् ।
यदा पूर्वदिने कुर्यात् कुम्भानामधिवासनम् ॥ १८ ॥

तदानीं पूर्वरात्रौ तु कुर्यात् कौतुकबन्धनम् ।
पूर्वेद्युर्विघ्निते पश्चात्तस्मिन्नहनि वाचरेत् ॥ १९ ॥

यदा कर्मदिने विप्र ! कुर्यात् कुम्भाधिवासनम् ।
तदानीं तु दिने तस्मिन् कुर्यात् कौतुकबन्धनम् ॥२०॥

ततः प्रभात आचार्यः कृतस्नानः प्रसन्नधीः ।
प्रविश्य मण्डपं सार्धं परिचर्यापरैर्जनैः ॥ २१ ॥

शलाकासहितैर्दर्भैः सहदेवीविमिश्रितैः ।
मार्जयेत् सर्वतो विप्र ! प्राङ्मुखो वा वाग्युदङ्मुखः ॥

आलेपयेद्गोमयेन पूर्वादीशानपश्चिमम् ।
नूतनेनाम्बरेणैव गालितेन जलेन तु ॥ २३ ॥

प्रोक्षयेत् सर्वदिग्विप्र ! पञ्चगव्यकुशाम्बुभिः ।
एको द्वौ बहवो वापि देशिका स्नपने स्मृताः ॥२४॥

नवसूत्रधराः सर्वे सर्वालङ्कारसंयुताः ।
नववस्त्रोत्तरीयाश्च सोष्णीषा गुरुसम्मताः ॥ २५ ॥

नियमस्थास्तु बहवस्तथैव परिचारकाः ।
यद्यद्योग्यं भवेद्ब्रह्मन् ! स्नपने यत्र यत्र तु ॥ २६ ॥

तत् समस्तं समाहृत्य मण्डपे सप्रवेश्य च ।
स्नपनं प्रारभेत् पश्चाद्देशिकः शास्त्रपारगः ॥ २७ ॥

स्नपनं द्विविधं विद्धि परापरविभेदतः ।
परं तु दशधा प्रोक्तं प्रधानादिविभेदतः ॥ २८ ॥

प्रधानं [1]प्रथमं विद्धि [2]द्वितीयं तु परं स्मृतम् ।
[3]तृतीयं परसूक्ष्मं स्यात् परस्थूलं [4]चतुर्थकम् ॥ २९ ॥

[5]पञ्चमं स्यात् सूक्ष्मपरं सूक्ष्मसूक्ष्मं तु [6]षष्ठकम् ।
सूक्ष्मस्थूलं [7]सप्तमं स्यात् स्थूलं स्यात् [8]परमष्टमम् ॥

स्थूलसूक्ष्मं तु [9]नवमं स्थूलस्थूलं [10]तदुत्तरम् ।
चतुर्धा त्वपरं विद्धि ह्येकैकं नवधा स्थितम् ॥ ३१ ॥

उत्तमोत्तमपूर्वेण भेदेन द्विजसत्तम ! ।
परापरविभेदानामेषा साधारणं स्थितम् ॥ ३२ ॥

अनन्तकलशं नाम्ना स्नपनं सर्वपूरकम् ।
एषां प्रधानपूर्वाणां सूत्रपातपुरस्सरम् ॥ ३३ ॥

सर्वमुद्धारपर्यन्तं क्रमेण शृणु सत्तम ! ।
लोहजं दारुजं वापि मृण्मयं वा सुशोभनम् ॥ ३४ ॥

मण्डपेशानदिग्भागे संस्थाप्य जलभाजनम् ।
वेदिं प्रक्षाल्य तोयेन वस्त्रैः संवेष्ट्य नूतनैः ॥ ३५ ॥

सूत्रपातं ततः कुर्यात् कुम्भसंख्यानुरूपतः ।
यथोक्तमानविस्तीर्णक्षेत्रमण्डपमध्यतः ॥ ३६ ॥

मण्डपस्य तु विप्रेन्द्र ! प्राग्भागमवलम्ब्य वा ।
स्वीकृत्य पश्चात् प्राक् प्रत्यक् दद्यात् सूत्रचतुष्टयम् ॥

दक्षिणोत्तरगं सूत्रपञ्चकं विनिवेशयेत् ।
एवं कृते भवन्त्यत्र पदानि द्वादश द्विज ! ॥ ३८ ॥

एकैकस्य तु विस्तारं तालं प्रादेशमेव वा ।
हस्तं वाऽरत्निमात्रं वा मण्डपस्यानुरूपतः ॥ ३९ ॥

सहस्रस्य च कुम्भानामेव सर्वत्र चोर्ध्वतः ।
पिष्टचूर्णैरलङ्कृत्य चतुर्दिक्षु समन्ततः ॥ ४० ॥

कोष्ठेषु पीठिकां कुर्यात्तण्डुलैर्व्रीहिभिस्तु वा ।
तासां हि प्रतिकोष्ठं तु कुर्यादाढकसंमितैः ॥ ४१ ॥

अर्धाधिकैस्त्रिभिः प्रस्थैरथवा केवलैस्त्रिभिः ।
अर्धोत्तरेण वा विप्र ! कुर्यात् प्रस्थद्वयेन वा ॥ ४२ ॥

यद्वा प्रस्थद्वयेनैव प्रस्थेनार्धोत्तरेण वा ।
प्रस्थेन वा तदर्धेन तत्पादेनाथवा द्विज ! ॥ ४३ ॥

तुर्याश्रमथवा वृत्तां कृत्वैवं पीठिकां ततः ।
सौवर्णा राजता ग्राह्यास्ताम्रा वा भेदवर्जिताः ॥ ४४ ॥

श्लक्ष्णा न सुषिराः कुम्भा चतुर्विंशाङ्गुलोन्नताः ।
विस्तृतेर्मध्यतस्तद्वत्तद्वलं त्र्यङ्गुलोन्नतम् ॥ ४५ ॥

ततमङ्गुलिषट्केन तत्रास्य त्र्यङ्गुल स्मृतम् ।
मेखला परितो ज्ञेया त्र्यङ्गुला द्विजसत्तम ! ॥ ४६ ॥

यद्वा तदर्धमान तु सर्वमुच्छ्रायपूर्वकम् ।
यद्वोत्तमोत्तमा विप्र ! द्रोणमानोदपूरका. ॥ ४७ ॥

तदष्टमाशतो न्यूना. क्रमात् प्रस्थद्वयावधि ।
अधमाधमकुम्भास्तु प्रस्थमात्रोदपूरकाः ॥ ४८ ॥

एव लक्षणयुक्तास्तु कार्या वित्तानुरूपत. ।
चक्राधारोपरिस्थास्तु विततता कमठो(लो)दरा ॥४९॥

पाञ्चजन्यवलिग्रीवा. शतपत्रमुखानना. ।
ऊर्ध्वाध. (र्ध्वतः) कौमुदीमालामण्डलालकृता द्विज ! ॥

मकराननशेषाभि (हि ?) अमृताम्बुप्रवाहका ।
नदीसमुद्र(?)श्रीवृक्षनानामाल्ये परिष्कृता. ॥ ५१ ॥

चक्राधाराधिभिर्यद्वा रहिता सत्यसभवे ।
मृण्मया वानुकल्पे तु भेदश्छिद्रविवर्जिताः ॥ ५२ ॥

पक्वबिम्बफलाकारा. कालवृत्तैर्विवर्जिताः ।
न द्वितप्ता सुतप्ताश्च ह्येकवर्णास्तु सुस्वना. ॥ ५३ ॥

संगृह्य क्षालयेत् सम्यक् शुद्धतोयैश्च सर्वत ।
सूत्रेण वेष्टयेद्यत्नादङ्गुलाङ्गुलमन्तरम् ॥ ५४ ॥

पश्चिमे कलशस्थानात् कलशानधिवासयेत् ।
शालिभि. स्थण्डिल कृत्वा केवले स्थण्डिले तु वा ॥

पूर्वाग्रानुत्तराग्राश्च कुशास्तत्र परिस्तरेत् ।
तारेण तत्र कलशान् न्यस्य पुष्पेण पूज्य च ॥ ५६ ॥

अधोमुखांस्तु तानेव न्यस्य पङ्क्तिक्रमेण तु ।
कुशानुपरि संस्तीर्य प्राङ्मुखं परमेष्ठिना ॥ ५७ ॥

दर्भमुद्रा प्रदर्श्याथ गन्धतोयेन सर्वत. ।
सप्रोक्ष्य "पुंसा" "विश्वेन" विकिरेदक्षतानि च ॥

"निवृत्या" चोन्मुखीकृत्य, सर्वेण मुनिपुङ्गव ! ।
पृथगुद्धृत्य कलशान्, स्वस्थानेषु क्रमान्न्यसेत् ॥५९॥

कुम्भन्यासादि सर्व तु द्विषट्कार्णेन वाचरेत् ।
निरीक्षणादिसंशुद्धान् कृत्वा सहृदयेन तु ॥ ६० ॥

द्वादशाक्षरमन्त्रेण मन्त्रयेत् तान् सकृत् सकृत् ।
तेनैव पूजयेत् पश्चादर्घ्यस्रक्चन्दनादिना ॥ ६१ ॥

तदाहरणहोम तु यथाशक्ति समाचरेत् ।
पूर्णान्तमथ संपूर्य क्रमाद्द्रव्यैर्निबोध तत् ॥ ६२ ॥

पङ्क्तित्रये पश्चिमादि पूर्वान्त च चतुश्चतु. ।
तत्र दक्षिणदिक्पङ्क्तौ कलशे पश्चिमे स्थिते ॥ ६३ ॥

धात्रीफलोदक चैव लोध्रतोयमनन्तरम् ।
रक्तचन्दनतोय च रजनीनीरमुत्तमम् ॥ ६४ ॥

ततस्तु मध्यपङ्क्तौ तु तथैव विनिवेशयेत् ।
ग्रन्थिपल्लववार्येव ततस्तु नगरोदकम् ॥ ६५ ॥

प्रियङ्गुवारि तदनु मासीजलमत. परम् ।
तथैवोत्तरपङ्क्तौ तु भवेदेतच्चतुष्टयम् ॥ ६६ ॥

सिद्धार्थकोदक चैव सर्वौषधिजल तत. ।
सर्वरत्नोदक चैव शुद्धोदकमत. परम् ॥ ६७ ॥

न्यसेत्, कूर्च कुश दार्भमुदग्र षोडशाङ्गुलम् ।
अङ्गुल ग्रन्थिमानं तु मूल वै द्वादशाङ्गुलम् ॥६८॥

शेषमग्र विजानीयादित्येतत् कूर्चलक्षणम् ।
अथवार्धाङ्गुलो ग्रन्थिरग्र वै त्र्यङ्गुल भवेत् ॥ ६९ ॥

मूल कुर्यात्तु विप्रेन्द्र ! द्वादशाङ्गुलसंमितम् ।
ब्राह्मणस्य चतुर्दर्भ त्रिदर्भ क्षत्रियस्य तु ॥ ७० ॥

द्विदर्भ तु विशा कूर्च स्त्रीशूद्राणा तथा भवेत् ।
सर्वेषामथवा कूर्च चतुस्सप्तकृतं तु वा ॥ ७१ ॥

मूलमन्त्रेण तदनु पूजयेद् द्वादशात्मना ।
अर्घ्यालभनपुष्पैश्च धूपेन मुनिपुङ्गव ! ॥ ७२ ॥

अपिधाय क्रमेणैव विधानै. सूत्रवेष्टितै. ।
प्रतिकुम्भ तु वसनैर्वेष्टयेद्विभवे सति ॥ ७३ ॥

आच्छाद्य नववस्त्रेण सर्वत प्रागुदङ्मुखः ।
पूर्ववत् पूजयित्वा तु ततो होमं समारभेत् ॥ ७४ ॥

अष्टोत्तरशतं हुत्वा समिदादीन् पृथक् पृथक् ।
पूर्णाहुति ततो हुत्वा कलशानभिमन्त्रयेत् ॥ ७५ ॥

मूलमन्त्रेण सर्वेषा स्नपन विहितं द्विज !।
अन्तरान्तरयोगेन कुम्भै शुद्धोदपूरिते. ॥ ७६ ॥

स्नपनं चार्घ्यदानं च द्रव्याणा तु समाचरेत् ।
द्रव्यन्यासक्रमेणैव तदुद्धार प्रकीर्तित. ॥ ७७ ॥

[1]प्रधानमेतत् कथित द्विषट्ककलशात्मकम् ।
सर्वेषा कारणमिदं कार्याण्यन्यानि सत्तम ! ॥ ७८ ॥

[2]अम्बुना पञ्चगव्येन क्षीरेण तदनन्तरम् ।
दध्ना घृतेन मधुना सर्वौषधिजलेन तु ॥ ७९ ॥

बीजाम्बुफलतोय च गन्धपुष्पाम्बुना तत. ।
हेमरत्नोदकेनाथ पूरित तु यथाक्रमम् ॥ ८० ॥

कलशाना द्विषट्क यत् [2]परमेतदुदाहृतम् ।
[3]पञ्चगव्यदधिक्षीरघृतमध्विक्षुवारिणा ॥ ८१ ॥

सर्वौषधीगन्धरत्नफलपुष्पजलैस्तथा ।
केवलेनोदकेनापि क्रमेण परिपूरितम् ॥ ८२ ॥

द्विषट्कमेतत् कुम्भाना [3]परसूक्ष्ममुदाहृतम् ।
[4]पयोदधिघृतक्षौद्रै. सर्वगन्धोदकेन च ॥ ८३ ॥

सर्वौषधिजलेनापि पत्रपुष्पफलाम्बुभिः ।
बीजाम्बुना हेमरत्नजलेनैकीकृतेन च ॥ ८४ ॥

मिश्रै पुण्यसरित्तोयै. परिपूर्ण क्रमेण तु ।
[4]परस्थूलमिमिदं विद्धि कलशं द्वादशात्मकम् ॥ ८५ ॥

सूत्रपातादिक चान्यत् त्रितयेऽस्मिन् प्रधानवत् ।
[5]पञ्चधा भाजिते क्षेत्रे भागा. स्यु पञ्चविशति. ॥

वहि. प्रागादियोगेन कलशाना द्विरष्टके ।
क्षीरं दधि घृतं चैव मधु वै रसमैक्षवम् ॥ ८७ ॥

धात्रीफलादिदशकं सर्वौषध्यन्तमेव हि ।
पत्रोदकं तत. पश्चात् तदन्त. कलशाष्टके ॥ ८८ ॥

प्रागादिपुष्पतोयं च फलबीजोदके त्वथ ।
गन्धोदकं च तदनु हेमरत्नजले तथा ॥ ८९ ॥

पुण्यतीर्थसरित्तोयं, मध्ये शुद्धोदकम् न्यसेत् ।
द्रव्यन्यासक्रमेणैव तदुद्धार उदाहृत. ॥ ९० ॥

एवं क्रमाद् द्रव्ययुक्तकलशैर्द्विजसत्तम ! ।
स्नपनं पञ्चविशद्भि रेतत् [5]सूक्ष्मपरं स्मृतम् ॥ ९१ ॥

पञ्चविशतिकोष्ठानि कल्पयित्वा तु पूर्ववत् ।
मध्ये शुद्धोदकं न्यस्य वहिरिन्द्रादियोगत. ॥ ९२ ॥

पूर्व क्षीराम्भसा पूर्ण पर शुद्धेन वारिणा ।
तृतीयं रत्नतोयेन हेमतोयेन चापरम् ॥ ९३ ॥

गन्धसंमिश्रित चान्यत् फलपुष्पोदकान्वितम् ।
शालिबीजाम्भसा पूर्णमष्टम परिकीर्तितम् ॥ ९४ ॥

कुम्भाष्टक तु तद्बाह्यदिगष्टकसमाश्रितम् ।
धात्रीफलोदक पूर्वे पथ्यातोय ततोऽपरे ॥ ९५ ॥

गलूचीक्षोदमन्मस्मिन् विभीतकजल परे ।
कुमारीकथित तोय व्याघ्रीसलिलमेव च ॥ ९६ ॥

नागरोदकमन्यस्मिन् तथान्यस्मिन् मधूदकम् ।
विहितोऽत्र समुद्धारो द्रव्यन्यासक्रमेण तु ॥ ९७ ॥

सत्याद्ये पञ्चभिर्मन्त्रैस्त्रिभि. सिद्धादिभि. क्रमात् ।
अन्तरावरणस्थाना कलशाना महामते ! ॥ ९८ ॥

एकैक सप्तधामन्त्र्य प्रागादौ, तद्वहि स्थितान् ।
कलशाश्चक्रमन्त्रेण हृदाद्येनाभिमन्त्रयेत् ॥ ९९ ॥

गायत्र्यान्तर्गतैर्विप्र ! कलशैः स्नापयेत् क्रमात् ।
द्वितीयावरणस्थैस्तु उपचारा " हृदा " मुने ! ॥

केवलेनोदकेनाथ अस्त्रजप्तेन सेचयेत् ।
यद्वा प्रागुदितेनैव वर्त्मना सर्वमाचरेत् ॥ १०१ ॥

दशभि सप्तभि कुम्भै [6]सूक्ष्मसूक्ष्ममिद स्मृतम् ।
[7]चतुर्हस्तं त्रिहस्तं वा क्षेत्रं सार्धद्विहस्तकम् ॥

द्विहस्त वा समापाद्य तदर्ध तु द्विधा भवेत् ।
एकेन कर्णिका कुर्याद्द्वितयेन द्विरष्टकम् ॥ १०३ ॥

दलाना तु, ततो ब्रह्मन् ! कर्णिकोपरि विन्यसेत् ।
कलशाना चतुष्क तु दिकचतुष्कसमाश्रितम् ॥ १०४ ॥

पूर्व तु पुष्पतोयेन गन्धोदेन तत. परम् ।
स्वर्णोदेनापरं चान्यत् सर्वरत्नजलेन तु ॥ १०५ ॥

पूर्वपवात् समारभ्य यावदीशानगोचरम्।
षोडशान्यान् प्रतिष्ठाप्य तत्रैव कलशान्मुने ! ॥ १०६ ॥

प्रथमं पञ्चगव्येन केवलेन तु पूरयेत्।
गोमूत्रेण द्वितीय तु तृतीयं गोमयाम्बुना ॥ १०७ ॥

त्रेताग्निभूतिना विप्र ! चतुर्थ सोदकेन तु।
गजगोवृषभशृङ्गवल्मीकाख्यमृदा परम् ॥१०८॥

शालिक्षेत्रान्नदीमध्यात् पद्मषण्डाच्च पर्वतात्।
मृद्भि.षष्ठं तु कलशं पूरणीय ततो द्विज ! ॥ १०९ ॥

सप्तम सर्षपाम्भोभि सर्वौषधिभिरष्टमम्।
क्षीरेण नवम विद्धि दध्ना दशममुच्यते ॥ ११० ॥

घृतेन चैकादशम मधुना द्वादश द्विज !।
सर्वैस्त्रयोदशं बीजै. फलै सर्वैश्चतुर्दशम् ॥ १११ ॥

समस्तधान्यैरपरं सर्वगन्धैस्तु षोडशम्।
दलस्थान् पूर्वमुद्धृत्य द्रव्यन्यासक्रमेण तु ॥ ११२ ॥

पश्चात्तु कर्णिकासस्थास्तथैव तु सुमुद्धरेत्।
हृदाभिमन्त्रित कृत्वा एकैक कलश पुरा ॥ ११३ ॥

स्नापयेन्मूलमन्त्रेण एकैकेन तत. क्रमात्।
इति विशतिभि. कुम्भैरन्वितं द्विजसत्तम ! ॥ ११४ ॥

सूक्ष्मस्थूलमिदं प्रोक्तं ततोऽन्यच्छृणु विस्तृतम्।
प्राक्प्रत्यगायतं सूत्रपञ्चकं विनिवेश्य च ॥ ११५ ॥

दक्षिणोत्तरसूत्रानामेकादश विनिक्षिपेत्।
एव कृते तु कोष्ठानि चत्वारिशद्भवन्ति हि ॥११६ ॥

तत्र पश्चिमदिक्पङ्क्तेरारभ्य क्रमयोगत.।
दक्षिणादुत्तरान्तं च कलशाना चतुश्चतु. ॥ ११७ ॥

विन्यस्य पूरयेत्तास्तु क्रमाद्द्रव्यैर्निबोध तत्।
पाद्यार्घ्याचमनीयार्थद्रव्यै. पूर्वोदितैस्त्रयम् ॥ ११८ ॥

नगादाद्यन्तमध्येभ्यो नदीमृत्तीरसंभवा।
ह्रदाद्वल्मीकशिखराद्गजदन्तक्षतीकृतात् ॥ ११९ ॥

हलोत्था गोवृषशृङ्गशालीना तु समुद्भवा।
तथा च पद्मषण्डोत्था त्वेकस्मिन् गोमयं परे ॥१२०॥

वनदाहसमुद्भूतं तथैव च महानसात्।
त्रेताग्निभस्म त्वपरे विनिवेश्य घटान्तरे ॥ १२१ ॥

अन्यस्मिन् पञ्चगव्यं तु कुशोदकसमन्वितम्।
सघृतं तैलकुम्भं तु चमसीवारिपूरितम् ॥ १२२ ॥

पलाशखदिराश्वत्थशमीलोहितचन्दनम्।
कषायोदकमन्यस्मिन् परे तु त्रिफलोदकम् ॥ १२३ ॥

वचा शतावरी 'कन्या' 'व्याघ्री' 'सिंही' 'कृताञ्जलि'।
गोलोमी सिंहलोमी च कुष्ठ भूम्यञ्जनं तथा ॥ १२४ ॥

महागरुडवेगा च कलशेऽन्यत्र सत्तम !।
महानीला गलूची च सहदेवी शतावरी ॥१२५॥

विष्णुक्रान्ता च कार्कोटा साटा वह्निशिखापरे।
यष्टी वराहकर्णी चान्यन्यस्मिन् गजपिप्पली ॥

श्रीफलाद्यानि चान्यस्मिन् पावनानि फलानि च।
दधिक्षीराज्यकुम्भाश्च द्वौ मधिश्चुरसान्वितौ ॥

मूलान्यम्भोरुहाणां च तान्यन्यस्मिन् घटे न्यसेत्।
द्रुमाणा पावनाना तु सक्षीराणा विशेषतः ॥ १२८ ॥

पत्रपुष्पफलोपेतमेकस्मिन् मञ्जरीगणम्।
जात्यादिकमथैकस्मिन् कौसुमीय लताचयम् ॥१२९॥

रोचनारजनीयुग्म वालमोटाय पञ्चकम्।
इति पञ्चकमन्यस्मिन् दर्भदूर्वाङ्कुराणि च ॥ १३० ॥

सास्य शाल्यङ्कुरचयं कलशे ह्यपरे तु वै।
सिद्धार्थकान् सिताद्यास्तु प्रियङ्गु गन्धसञ्चकम् ॥

अपरस्मिन् न्यसेत् कुम्भे सह वै नागकेसरे।
ग्राम्याश्चोषधयः सप्त सप्तारण्या घटद्वये ॥ १३२ ॥

बाह्लीक चन्दनं चेव रस कर्पूरमेव च।
चतुष्कमेतदपरे त्वन्यस्मिन् धातव शुभा ॥ १३३ ॥

ताम्रजाम्बूनदाद्यास्तु परे रत्नचयं महत्।
न्यसेद्विद्रुमजालं च द्वये मुक्ताफलानि च ॥ १३४ ॥

अर्घ्योदकमकमथैकस्मिन्नदीतीर्थोदकं द्वये।
सर्वौषधिघटं चैव सुशीताम्भोघटं तत. ॥ १३५ ॥

सुगन्धपुष्पकलशं चत्वारिंशत् त्वमी स्मृता ।
द्रव्यन्यासक्रमोद्धार इदं [8]स्थूलं परं स्मृतम् ॥ १३६ ॥

[9]शीताम्बुपूरिताना च घटाना केवल द्विज ! ।
चत्वारिंशत् समायुक्त [9]स्थूलसूक्ष्मं प्रकाशितम् ॥

[10]गन्धोदकेन पूर्णाना चत्वारिंशद्भिरेव च ।
समन्वितं घटाना तु स्थूलस्थूल प्रकीर्तितम् ॥ १३८ ॥

सूत्रपातविधान च कुम्भन्यासक्रमं तत ।
उद्धार चानयो. कुर्यात् स्थूलाद्यसदृशं द्विज ! ॥१३९॥

भक्तिश्रद्धावशाच्चापि विभवानुगुणं तु वा ।
त्रिविध स्थूलभेद तु द्विगुणं तु समाचरेत् ॥ १४० ॥

अनुकल्पे तदर्ध वा पादमष्टांशमेव वा ।
चतुष्टय वा कुम्भाना प्रत्येक वा द्वय द्वयम् ॥ १४१ ॥

एकैक वापि विप्रेन्द्र ! सर्वद्रव्यमयं घटम् ।
नवाना परिपूर्णानामुक्तादन्यदपेक्षितम् ॥ १४२ ॥

कुर्यादभ्यूह्य तत् सर्व प्रधानोदितवर्त्मना ।
एव तु दशधा विप्र ! परभेदा प्रकाशिता ॥ १४३ ॥

अपरस्य विभेदांस्तु क्रमेण शृणु सत्तम ! ।
[1]चतुरश्रीकृते क्षेत्रे ह्येकत्रिंशद्विभाजिते ॥ १४४ ॥

कोष्ठकाना नवशतमेकषष्टिस्तथैव च ।
मध्ये पङ्क्तित्रयं स्थाप्य मार्जयेत्तद्बहिर्द्वयम् ॥ १४५ ॥

वीथ्यर्थं तद्बहिर्भूय स्थाप्य पङ्क्तित्रय पुन ।
द्वय विमृज्य वीथ्यर्थं स्थापयेत् सप्तक पुन. ॥ १४६ ॥

विभज्य वा त्रिणवधा ह्येकैकं विमृजेद्द्विज ! ।
वीथ्यर्थं संकटे देशे कलशाना तु पूर्ववत् ॥ १४७ ॥

क्रमेण तेषु कोष्ठेषु कलशान् पूर्ववन्न्यसेत् ।
घृतमुष्णोदकं चैव रत्नवारि फलोदकम् ॥ १४८ ॥

लोहाम्भो मार्जनाम्भश्च गन्धाम्भोऽक्षतवारि च ।
यवोदकमथेशान्तं मध्यादारभ्य मध्यमे ॥ १४९ ॥

पाद्यमर्घ्यं तथाचाम पञ्चगव्यं क्रमेण तु ।
द्विचतुष्केण सवीतनकाना तु मध्यमे ॥ १५० ॥

ऐन्द्राद्युत्तरपर्यन्त विदिक्स्थाना तु मध्यमे ।
दधि क्षीरं मधु तथा कषायं वह्निदिक्क्रमात् ॥ १५१ ॥

एवं सप्तदश प्रोक्त. प्रधानद्रव्यसंयुता ।
शेषाश्चान्ये चतुष्षष्टि. शुद्धोदकसमन्विता. ॥ १५२ ॥

इत्येकाशीतिकलशा मध्यत. संस्थिता द्विज ! ।
ततस्त्वेकोनपञ्चाशत्कलशास्तद्दिगष्टके ॥ १५३ ॥

तत्र मध्यमकुम्भेषु दिक्स्थिताना च सेचयेत् ।
गुलोदकं चेक्षुरसं नालिकेररसं तथा ॥ १५४ ॥

'शान्तिवारि' मुनिश्रेष्ठ ! पूर्वदिक्क्रमयोगत. ।
विदिक्स्थब्रह्मकुम्भेषु सेचयेन्मङ्गलोदकम् ॥ १५५ ॥

आग्नेयादीशपर्यन्त शिष्टमन्यच्छतत्रयम् ।
अशीतियुक्त कुम्भाना तथैव चतुरुत्तरम् ॥ १५६ ॥

सुगन्धै शीतलैस्तोयै. संपूर्ण द्विजसत्तम ! ।
पश्चान्मध्यस्थनवके मध्यादीशानपश्चिमम् ॥ १५७ ॥

वासुदेवाद्बराहान्तं मूर्तीना नवकं यजेत् ।
अर्घ्यालभनमाल्यैश्च धूपेन च यथाक्रमम् ॥ १५८ ॥

तद्बहिर्नवकाना तु ब्रह्मकुम्भेषु पूजयेत् ।
केशवाद्वामनान्तं च द्विचतु पूर्वदिक्क्रमात् ॥ २५९ ॥

तत एकोनपञ्चाशत् कलशाना महामते ! ।
पूजयेद्ब्रह्मकुम्भेषु श्रीधराद्यं चतुष्टयम् ॥ १६० ॥

पूर्वादुत्तरपर्यन्त वह्न्यादीशानपश्चिमम् ।
नराद्य कृष्णपर्यन्तं चतुष्कं पूजयेद्द्विज ! ॥

प्राग्वत् कूर्चानि संन्यस्य चक्रिकाभि. पिधाय च ।
तत आच्छादयेद्वस्त्रैर्नूतनैस्तु पृथक् पृथक् ॥ १६२ ॥

तत ऊर्ध्वं यजेद्देव वासुदेव जगत्पतिम् ।
पाद्यमर्घ्यं तथाचामं पञ्चगव्यं, घृतं, दधि ॥ १६३ ॥

पयो, मधु, कषायं च, उष्णाम्भ. फलपारि च ।
मार्जनाम्भो, ऽक्षताम्भश्च, रत्नाम्भो, लोहवारि च ॥

गन्धाम्भश्च, यवाम्भश्च, गुलोदेक्षुरसौ, तथा ।
नालिकेररसं, चापि शान्तितोय, च मङ्गलम् ॥ १६५॥

क्रमेणानेन विप्रेन्द्र! ह्याचरेत् स्नपन विभो।
मूलमन्त्रेण सर्वेषा स्नपनं विहित द्विज! ॥ १६६ ॥

अथवा पाद्यपूर्व तु गन्धतोयावसानकम्।
ऋग्भि. पुरुषसूक्तस्य, तथेद विष्णुरित्यृचा ॥ १६७ ॥

यवाम्भो, गुलतोयाद्य चतुष्कं शान्तिपश्चिमम्।
त्व विष्णुरिति मन्त्रेण, विष्णोर्नुकमिति द्विज! ॥१६८॥

स्नापयेन्मङ्गलाद्येन तोयेन मुनिपुङ्गव!।
येनाभिषिञ्चेद्देवेश प्रधानकलशेन तु ॥ १६९ ॥

तच्छुद्धवारिकलशैस्तन्मन्त्रेणाभिषेचयेत्।
प्रतिद्रव्यं तु वस्त्रेण ह्यर्घ्यालभनमाल्यकै ॥ १७० ॥

धूपेन च समभ्यर्च्य ततस्तेनाभिषेचयेत्।
यद्वार्घ्य पाद्यनाचामं गन्धस्नग्धूपदीपकम् ॥ १७१ ॥

दद्याद्यथाक्रम सर्व, केवलं चार्घ्यमेव वा।
युक्त शतचतुष्केण सप्तत्या च त्रयेण च ॥ १७२ ॥

कुम्भाना स्नपनं ह्येतदुत्तमोत्तममुच्यते।
[2]हीनमष्टाष्टसख्यातैरन्तश्शुद्धोदवारिभि. ॥ १७३ ॥

कलशैः स्नपनं यत्तु तत् स्यादुत्तममध्यमम्।
[3]तथा पङ्क्तिचतुष्कं तु हीन स्यात् पूर्वनिश्चितात् ॥

यदेतत् स्नपन युक्तमेकाशीत्या च मध्यतः।
दिक्षु चैकोनपञ्चाशच्चतुष्केन विदिक्षु च ॥ १७५ ॥

ब्राह्मदैविकभागस्थै कलशैरन्वित द्विज!।
शेषैःषष्ट्युत्तरशतसख्यातैः शुद्धवारिभि ॥ १७६ ॥

विहीनं कलशैर्विप्र! तद्भवेदुत्तमाधमम्।
[4]शतद्वयेन कुम्भानां चतुर्दिक्संस्थितेन च ॥ १७७ ॥

चतुर्हीनेन वै विप्र! ह्येकाशीत्या च मध्यतः।
सयुक्तं स्नपनं प्राग्वत् तद्भवेन्[4]मध्यमोत्तमम् ॥ १७८ ॥

[5]अष्टाष्टपरिसङ्ख्यातैरन्त. शुद्धोदवारिभि.।
कलशैर्यद् भवेद्धीनं तत् स्यान्[5]मध्यममध्यमम् ॥ १७९ ॥

एकाशीत्या च कुम्भाना मध्यतस्तु समन्वितम्।
[6]दिक्षु चैकोनपञ्चाशन्मध्यस्थनवसंयुतम् ॥ १८० ॥

शेषे. शुद्धोदकलशैर्विहीनं मध्यमाधमम्।
[7]पङ्क्तीनामष्टकेनात्र हीन क्षेत्र तु कल्पयेत् ॥ १८१ ॥

एकाशीत्या च कुम्भाना केवल पूर्ववद् द्विज!।
[7]अधमोत्तममेतत्तु स्नपनं परिकीर्तितम् ॥ १८२ ॥

[8]द्वात्रिंशद्भिस्तु कलशै. कौणस्थै शुद्धवारिभिः।
विहीनं स्नपनं यत्तद् भवेद्[9]धममध्यमम् ॥ १८३ ॥

यच्चतुष्षष्टिकलशैर्विहीनं सर्वदिक्स्थितै.।
शुद्धोदकैर्द्विजश्रेष्ठ! तद्भवेद्[9]धमाधमम् ॥ १८४ ॥

नवधा सप्तधा वात्र क्षेत्रं कृत्वा तु पीडयेत्।
द्वयं चतुष्क वा शिष्ट, कुम्भाना स्थापनार्थत ॥१८५॥

इत्युक्तमाद्यं नवधा, द्वितीयं शृणु सत्तम!।
चतुरश्रीकृते क्षेत्रे ह्यष्टाद्दशविभाजिते ॥ १८६ ॥

यद्वा षोडशधा विप्र! पङ्क्तिषट्क तु मध्यत।
संस्थाप्य तद्बहिर्वीथ्यै मार्जयेद्द्वितय द्विज! ॥

एकैकं वापि तद्बाह्ये स्थापयेत्तु चतुष्टयम्।
पूर्ववत्तेषु कलशान् न्यस्य द्रव्याणि निक्षिपेत् ॥

मध्ये कुम्भचतुष्के तु सर्वरत्नजलं तत.।
द्वितये मौक्तिकं प्राच्यामेकस्मिन् वह्निदिग्गते ॥ १८९॥

वज्र याम्यद्वये विप्र! गोमेदकमनन्तरे।
एकस्मिन्निन्द्रनील तु पुष्यरागं ततो द्वये ॥ १९० ॥

पश्चिमस्थे तु वायव्ये ह्येकस्मिन् ब्रह्मरागकम्।
चन्द्रकान्तं द्वये सौम्ये ह्येकस्मिन् विद्रुमं परे ॥१९१॥

द्वितीयावरणे प्राच्यामाज्य कुम्भद्वये द्विज!।
कुम्भ आग्नेयकोणस्थे ह्येकस्मिन्नौपमानिकम् ॥ १९२ ॥

क्षीरं द्वये दक्षिणस्थे नैर्ऋत्या मार्जन तथा।
दधि द्वये पश्चिमस्थे गन्धो वायव्यकोणगे ॥ १९३ ॥

सौम्यद्वये माक्षिकं स्यात् कषायं चेशकोणगे।
गन्धोदकेन संपूर्ण कुम्भाना शिष्टमष्टकम् ॥ १९४ ॥

एवं मध्यस्थिताः कुम्भा षट्त्रिंशत्संख्यया द्विज!।
चतुर्विंशत्तु कलशा. प्रतिदिक्क तु तद्बहिः ॥ १९५ ॥

विदिक्स्थितास्तु प्रत्येकं कलशा षोडश द्विज ! ।
पूर्वदिक्सस्थिताना तु कुम्भाना मध्यमे स्थिते ॥

चतुष्केऽर्घ्य, तथा पाद्य दक्षिणे पश्चिमे तथा ।
आचाम, सौम्यमध्यस्थचतुष्के पञ्चगव्यकम् ॥ १९७ ॥

वह्निदिक्कलशाना तु चतुष्के मध्यसंस्थिते ।
तैल, गुलोदं निर्ऋतौ, वायुसंस्थे तिलोदकम् ॥१९८॥

अक्षतं त्वीशदिक्संस्थे, ह्यष्टाविशोत्तर शतम् ।
अवशिष्ट तु कुम्भाना पूर्ण गन्धोदकेन तु ॥ १९९ ॥

अर्घ्यादिसर्वरत्नान्तमुद्धारक्रम इष्यते ।
अर्घ्य पाद्य तथाचाम पञ्चगव्यं तत परम् ॥ २०० ॥

तैलं गुलोदकं चैव तिलोद चाक्षतोदकम् ।
आज्य तथा चौपमान्य क्षीर मार्जनमेव च ॥ २०१ ॥

दधि गन्ध माक्षिकानि कषाय मौक्तिकं तथा ।
वज्रादिसर्वरत्नान्तमष्टकं क्रमशो द्विज ! ॥ २०२ ॥

शतद्वयेन कुम्भाना चतुर्न्यूनेन संयुतम् ।
एतत् स्नपनमाख्यातमुत्तमोत्तमसञ्ज्ञितम् ॥ २०३ ॥

चतुरश्रीकृते क्षेत्रे चतुर्दशविभाजिते ।
कोष्ठकाना भवत्यत्र चतुर्न्यूनं शतद्वयम् ॥ २०४ ॥

मध्ये पङ्क्तिचतुष्क तु संस्थाप्य परिमार्जयेत् ।
एकैकं वीथये बाह्ये स्थापयेच्च चतुष्टयम् ॥ २०५ ॥

तत्रापि कोष्ठकानां तु कलशस्थापनार्थत. ।
संस्थाप्याष्टोत्तरशतं शेषाणि परिमार्जयेत् ॥ २०६ ॥

पूर्ववत्तेषु कलशान् न्यस्य द्रव्याणि निक्षिपेत् ।
विन्यसेद्रत्ननिचयं मध्ये कुम्भचतुष्टयम् ॥ २०७ ॥

प्राङ्मध्यसूत्राद्दक्षिणत कलशे मौक्तिकं द्विज ! ।
एतद्दक्षिणत संस्थे वज्रगोमेदके क्रमात् ॥ २१८ ॥

इन्द्रनीलं पुष्यराग पश्चिमस्थे द्वये तथा ।
ब्रह्मरागं चन्द्रकान्तं सोमदिक्स्थे द्वये द्विज ! ॥२०९॥

प्राङ्मध्यसूत्रोत्तरतो विद्रुमं कलशे द्विज ! ।
एवं द्विषट्कं कुम्भानां मध्यत., तद्दिगष्टके ॥ २१० ॥

प्रतिदिक्कलशाना तु द्विषट्कं द्विजसत्तम ! ।
तेषा मध्यस्थिते कुम्भे चतुष्के प्रागिदगादित ॥

अर्घ्य तैलं तथा पाद्य गुलाम्बाचमनीयकम् ।
तिलोदकं पञ्चगव्यमक्षतं त्वीशपश्चिमम् ॥ २१२ ॥

शेषा. कुम्भाश्चतुष्षष्टि पूर्णा गन्धोदकेन तु ।
अर्घ्यादिसर्वरत्नान्तमुद्धारक्रम इष्यते ॥ २१३ ॥

एवमष्टोत्तरशतै. कुम्भैरुत्तमध्यमम् ।
चतुरश्रीकृते क्षेत्रे त्रयोदशविभाजिते ॥ २१४ ॥

पङ्क्तीना पञ्चम मध्ये संस्थाप्य परिमार्जयेत् ।
एकैक वीथये बाह्ये स्थापयेत् त्रितय पुन. ॥ २१५ ॥

मध्यमे रत्नकुम्भ तत् प्रागादीशावसानकम् ।
मुक्ताफलं तथा वज्र गोमेदकेन्द्रनीलकौ ॥ २१६ ॥

पुष्यरागो ब्रह्मरागश्चन्द्रकान्तश्च विद्रुम. ।
तद्वहि प्राक्क्रमेणैव धृत चैवोपमानिकम् ॥ २१७ ॥

क्षीर मार्जनतोय च दधि गन्धं च माक्षिकम् ।
कषायमष्टौ शिष्टाश्च गन्धाम्भ. परिपूरिता ॥ २१८ ॥

एव मध्यस्थिता विप्र ! कलशा पञ्चविशतिः ।
अष्टकं नवकाना तु तद्वहिस्तु दिगष्टके ॥ २१९ ॥

तेषा मध्ये क्रमादर्घ्य तैलं पाद्य गुलोदकम् ।
आचाम तिलतोयं च पञ्चगव्य तथाक्षतम् ॥ २२० ॥

प्रागाशादीशदिङ्निष्ठ शिष्टमष्टाष्टकं द्विज ! ।
पूरितं गन्धतोयेन ह्येवं कुम्भसमन्वितम् ॥ २२१ ॥

नवत्या सप्ताधिकया तद्भवेदुत्तमाधमम् ।
त्रिपञ्चधा कृते क्षेत्रे भागाना तु भवन्ति हि ॥ २२२ ॥

शतद्वयं तथा पञ्चविशतिर्मुनिपुङ्गव ! ।
पङ्क्तीना पञ्चकं मध्ये तद्वहिर्विमृजेद्द्वयम् ॥ २२३ ॥

वीथ्यर्थं तद्वहिर्भूय. स्थापयेत् त्रितयं द्विज ! ।
तन्मध्ये रत्नकलशं दिक्स्थिते तु चतुष्टये ॥ २२४ ॥

रत्नाष्टकं मौक्तिकादि द्वन्द्वश. पूर्वदिक्क्रमात् ।
प्रागादीशानपर्यन्तं तद्वहि. कलशाष्टके ॥ २२५ ॥

घृतपूर्वकषायान्तद्रव्याणामष्टकं द्विज ! ।
ऐन्द्रादिनवकाना तु ह्यष्टाना द्विज ! मध्यमे ॥ २२६ ॥

अर्घ्याद्यक्षतपर्यन्तं क्रमादीशानपश्चिमम् ।
शेषा. कुम्भाश्चतुष्पष्टिर्गन्धोदकसमन्विता. ॥ २२७ ॥

पञ्चाशीतिघटोपेतमेतत् स्यान्मध्यमोत्तमम् ।
मध्यमे रत्नतोय तु तद्वहि. कलशाष्टकम् ॥ २२८ ॥

मुक्तादिद्रव्यसंयुक्त पूर्ववन्नवकाद्वहि ।
इत्येकाशीतिकलशैर्भवेन्मध्यममध्यमम् ॥ २२९ ॥

सप्तधा भाजिते क्षेत्रे चत्वारिंशन्नवोत्तरम् ।
कोष्ठकानि भवन्त्यत्र कलशान विन्यसेतत ॥ १३० ॥

पूर्ववद्द्रव्यसयुक्ता कलशा पञ्चविंशति ।
चपुर्विंशतिशेषास्तु शुद्धोदकसमन्विता ॥ २३१ ॥

एवमेकोनपञ्चाशत्कलशैर्मध्यमाधमम् ।
रत्नादिककषायान्ता युक्ता. सप्तोत्तरा दश ॥ २३२ ॥

अष्टौ गन्धोदसंयुक्ता एतत् स्यादधमोत्तमम् ।
शुद्धोदाष्टकहीनं तद्भवेदधममध्यमम् ॥ २३३ ॥

रत्नादिविद्रुमान्तेन द्रव्यसङ्घेन संयुतम् ।
नवक कलशाना यत् तद्भवेदधमाधमम् ॥ २३४ ॥

एवं द्वितीयभेदास्तु कीर्तिता , तृतीय शृणु ।
क्षेत्रं तु सप्तधा कृत्वा प्राग्वदापाद्य संस्थितम् ॥

उदङ्मुखस्थितो भूत्वा प्रणवं वन्धयेत्तत. ।
तन्मुद्रां विन्यसेत् कुम्भे जितन्ताख्येन मध्यत. ॥

दैविकेऽष्टाक्षरै. कुम्भान् प्राङ्मुख प्राग्दिगादित. ।
मानुषास्तु द्विषट्केन षोडशप्रागुदङ्मुख. ॥ २३७ ॥

फट्कारै. पैतृकान् विप्र ! न्यसेत् प्रत्यगुदङ्मुख. ।
तन्मुद्रा बन्धयित्वा तु मध्यादुत्तरपश्चिमम् ॥ २३८ ॥

कुम्भाना पञ्चके विप्र ! पाद्यार्घ्याचमनान्यपि ।
पञ्चगव्य घृत चापि पञ्चोपनिषदै क्रमात् ॥ २३९ ॥

विदिक्कुम्भचतुष्के तु वह्न्यादीशानपश्चिमम् ।
दधि क्षीर मधु तथा ह्युष्णाम्भोमूर्तिवाचकै. ॥२४०॥

चतुर्भिः कलशैर्विप्र ! तद्वहिर्दिक्चतुष्टये ।
कषायं मार्जनाम्भश्च फलाम्भ परिमार्जनम् ॥ २४१ ॥

आग्नेयादीशपर्यन्तं कलशाना चतुष्टये ।
रत्नोद सर्वलोहाम्भ कुशाम्भ सक्तुवारि च ॥ २४२ ॥

क्षिपेत् क्रमेण विप्रेन्द्र ! वर्णैरष्टाक्षरोदिते. ।
शुद्धाम्भसान्तरालस्थ पूरित कलशाष्टकम् ॥ २४३ ॥

प्रागग्निमध्यादारभ्य ईशप्राङ्मध्यपश्चिमम् ।
प्रणवाख्येन मन्त्रेण केवलेन ततो वहि. ॥ २४४ ॥

दिक्कुम्भानां चतुष्के तु गन्धाम्भ पुष्पवारि च ।
औदुम्बानिकसञ्ज्ञं च तथाचामलकोदकम् ॥ २४५ ॥

आग्नेयादिक्रमेणैव कलशाना चतुष्टये ।
अक्षताम्भस्तिलाम्भश्च यवाम्भस्तण्डुलोदकम् ॥२४६॥

द्विषट्कमन्त्रेण ततो विष्णुगायत्रिया द्विज ! ।
शेषा षोडश शुद्धाम्भ परिपूर्णा. क्रमेण तु ॥ २४७ ॥

एव सपूरयित्वा तु प्रणम्याञ्जलिमुद्रया ।
वासुदेवादियागाद्यं सर्व कृत्वा तु पूर्ववत् ॥ २४८ ॥

द्रव्यन्यासक्रमेणैव समुद्धार. प्रकीर्तित. ।
मूलमन्त्रेण वै दद्यात् सर्व यद्वा द्विजोत्तम ! ॥ २४९ ॥

इद विष्ण्वाख्यत पाद्यमर्घ्यमापो वहन्त्विति ।
आप पुनन्त्वित्याचामं गायत्र्या पञ्चगव्यकम् ॥२५०॥

घृत दद्यात्ततो विप्र ! घृतं शुक्रमसीति च ।
दधिक्रा इति मन्त्रेण दधि दद्यात्तत. परम् ॥ २५१ ॥

क्षीरमाप्याययस्वेति मधुवातेति वै मधु ।
आदित्य शुक्रमित्येवमुष्णाम्भो मुनिपुङ्गव ! ॥ २५२ ॥

तत कषायतोयं तु सदसस्पतिमित्यृचा ।
शन्नोदेवीरित्यनेन दद्याद्वै मार्जनं तत. ॥ २५३ ॥

गणानामिति मन्त्रेण दद्याच्चैव फलोदकम् ।
त्व विष्णुरिति मन्त्रेण दद्यात्तु परिमार्जनम् ॥ २५४ ॥

अग्न आयाहि वीतये इति रत्नोदक तत. ।
इषेत्वेति च लोहाम्भस्त्वग्निमीके कुशोदकम् ॥ २५५ ॥

किमित्त इति मन्त्रेण दद्यात् सकृदकं ततः ।
दद्याच्छुद्धोदकान्यष्टावापो अस्मानिति क्रमात् ॥२५६॥

अष्टौ गन्धोदकादीनि मानस्तोक्त्या निवेदयेत् ।
शेषान् पुरुषसूक्तेन षोडश प्रत्यृचं क्रमात् ॥ २५७ ॥

एवमेकोनपञ्चाशत्कलशैरुत्तमोत्तमम् ।
वहि षोडश शुद्धोदैर्हीनमुत्तममध्यमम् ॥ २५८ ॥

तत्रस्थै. कोणकलशैर्हीनं स्यादुत्तमाधमम् ।
अन्त. शुद्धोदकस्थाने स्थितं गन्धोदकाष्टकम् ॥२५९॥

विहीनं सर्वकलशैर्बहिरावरणस्थितै. ।
तदन्त पञ्चविंशद्भिरन्वित मध्यमोत्तमम् ॥ २६० ॥

मानुषे दिक्चतुष्केन हीन मध्यममध्यमम् ।
तत्रस्थै सर्वकलशैर्हीनं स्यान्मध्यमाधमम् ॥ २६१ ॥

नवकं कलशाना यत्तद्भवेदधमोत्तमम् ।
तद्विदिक्कलशैर्हीनं भवेदधममध्यमम् ॥ २६२ ॥

मध्यस्थितेककुम्भेन तद्भवेदधमाधमम् ।
तृतीयमेव कथित चतुर्थं शृणु सत्तम ! ॥ २६३ ॥

सप्तभक्ते स्थिता भागाश्चत्वारिंशन्नवोत्तरम् ।
घृतमुष्णोदक चैव रत्नवारि फलोदकम् ॥ २६४ ॥

लोहाम्भो मार्जनाम्भश्च गन्धाम्भोऽक्षतवारि च ।
यवोदकमथेशान्तं मध्यादारभ्य मध्यमे ॥ २६५ ॥

पाद्यमर्घ्यं तथाऽऽचाम पञ्चगव्यं तथा दधि ।
पयो मधु कषाय च दिग्विदिक्षु च तद्वहि ॥ २६६ ॥

गुलोदक चेक्षुरस नालिकेररस तथा ।
शान्तिवारि चतुर्दिक्षु पूर्वादिक्रमयोगत ॥ २६७ ॥

विदिक्कुम्भचतुष्केषु विन्यसेन्मङ्गलोदकम् ।
शेषा भागाश्चतुर्विंशच्छून्या स्युर्द्विजसत्तम ! ॥

मन्त्रार्चनं तथोद्धारो यथा चाद्योत्तमोत्तमे ।
उत्तमोत्तममेतद्धि स्नपनं परिकीर्तितम् ॥ २६९ ॥

पञ्चभागीकृते स्थाने कलशा. पञ्चविंशतिः ।
मूलमन्त्रेण कलशान् विन्यस्य प्रोक्षयेत्ततः ॥ २७० ॥

द्रव्याणि निक्षिपेत्तेन प्राङ्मुखः प्रयतो वशी ।
ब्राह्मं तु मध्यमं कुम्भं स्नानतोयेन पूरयेत् ॥ २७१ ॥

ततस्तु मानुषे भागे प्रागाद्ये दिक्चतुष्टये ।
पाद्यमर्घ्यं तथाऽऽचामं पञ्चगव्यं तथैव च ॥ २७२ ॥

घृतं दधि तथा क्षीर मधु चाग्नेयपूर्वकम् ।
इन्द्राग्निमध्यादारभ्य तदीशान्तरपश्चिमम् ॥ २७३ ॥

उष्णोदकं कषायं च मार्जनं च फलोदकम् ।
तिलाम्बु रत्नतोयं च लोहतोयं कुशोदकम् ॥ २७४ ॥

ततस्तु दैविके भागे पूर्ववद्दिक्चतुष्टये ।
गन्धोदकं च पुष्पाम्भ औपमान्यामलोदके । २७५ ॥

आग्नेयादीशपर्यन्तमक्षताम्भस्तथैव च ।
नालिकेररस चेक्षुरस वै तण्डुलोदकम् ॥ २७६ ॥

एव च पञ्चविंशद्भि कुम्भैरुत्तममध्यमम् ।
पाद्य च मध्यमे भागे प्रागादीशानपश्चिमम् ॥ २७७ ॥

अर्घ्यमाचमन चापि पञ्चगव्यं घृत दधि ।
क्षीर मधूष्णतोय च अन्तरालेषु वै क्रमात् ॥ २७८ ॥

कषायं मार्जनाम्भश्च फलाम्भ परिमार्जनम् ।
रत्नाम्भो लोहतोयं च कुशाम्भश्चोष्णतोयकम् ॥

ततस्तु दैविके भागे प्रागादीशानपश्चिमम् ।
गन्धाम्भ. पुष्पतोयं च औपमान्यामलाम्बुनी ॥ २८० ॥

अक्षताम्भस्तिलोदं च यवोदं तण्डुलोदकम् ।
विहितश्च समुद्धार. पाद्यात्तण्डुलपश्चिमा. ॥ २८१ ॥

एव तु पञ्चविंशद्भिः स्नपनं चोत्तमाधमम् ।
सप्तभक्ते स्थले प्राग्वद्भृताच्छान्त्यम्बु पश्चिमम् ॥२८२॥

कलशैरेकविंशद्भि स्नपनं मध्यमोत्तमम् ।
त्रिधा विभक्ते कोष्ठाना नवक तत्र सत्तम ! ॥ २८३ ॥

मध्यादीशानपर्यन्त घृतं दधि पयो मधु ।
तथोद्वर्तनचूर्णं च ततः कोणचतुष्टये ॥ २८४ ॥

उष्णोदकं च गन्धाम्भ. पुष्पाम्भो मङ्गलोदकम् ।
द्रव्यन्यासक्रमेणैव समुद्धारः प्रकीर्तित. ॥ २८५ ॥

एवं तु नवभि कुम्भैर्भवेन्मध्यममध्यमम् ।
घृत पयो दधि मधु गन्धहेमाम्बुनी तथा ॥ २८६ ॥

रत्नाम्भश्चोपधीवारि शालिचूर्णानि च क्रमात् ।
मध्यमादीशदिङ्निष्ठमेतत् स्यान्मध्यमाधमम् ॥

मध्यमे दिक्चतुष्के तु पञ्चगव्यैस्तु पञ्चकम् ।
आग्नेयादीशपर्यन्तं कलशाना चतुष्टयम् ॥ २८८ ॥

शुद्धाम्भसा तु सपूर्णमेतत् स्यादधमोत्तमम् ।
मध्ये रत्नजलं दिक्षु कुम्भानां तु चतुष्टयम् ॥ २८९ ॥

मुक्तादिरत्नसंयुक्तं द्वन्द्वयोगेन सत्तम ! ।
एवं तु पञ्चभि कुम्भैर्भवेदधममध्यम् ॥ २९० ॥

सर्वरत्नजलं मध्ये दिग्द्वये पूर्वपश्चिमे ।
द्वौ कुम्भौ तत्र पूर्वस्मिन् मौक्तिकादिचतुष्टयम् ॥

चतुष्कं पुष्परागादि ह्यन्यस्मिन् द्विजसत्तम ! ।
एवं कुम्भत्रयेणैव स्नपनं त्वधमाधमम् ॥ २९२ ॥

एव ह्यपरभेदास्तु षट्त्रिशत् संप्रकाशिता ।
कुम्भाधिवासपूर्वं तु सर्वं पूर्ववदाचरेत् ॥ २९३ ॥

आज्यस्य दैवत देवो वासुदेव पर. स्मृत ।
उष्णाम्भस सङ्कर्षण. प्रद्युम्नो रत्नवारिण ॥ २९४ ॥

फलाम्भसोऽनिरुद्धस्तु भगवान दैवत द्विज ! ।
नारायणस्तु मन्त्रात्मा लोहतोयस्य दैवतम् ॥ २९५ ॥

मार्जनस्य हयग्रीवो विष्णुः स्याद्गन्धवारिणः ।
नृसिंहोऽक्षततोयस्य वराहो यववारिण. ॥ २९६ ॥

पाद्यस्य केशवो देवोऽर्घ्यस्य नारायण स्मृतः ।
देव आचमनीयस्य माधवस्त्वधिदेवता ॥ २९७ ॥

गोविन्द पञ्चगव्यस्य विष्णुस्तु दधिदेवतम् ।
मधुसूदनसंज्ञस्तु पयसो देवता स्मृता ॥ २९८ ॥

त्रिविक्रमाख्यो मधुन' कषायस्य च वामन ।
भगवान् श्रीधराख्यस्तु गुलतोयस्य देवता ॥ २९९ ॥

देवदेवो हृषीकेश इक्षुसारस्य दैवतम् ।
दामोदरोऽधिदैवं तु नालिकेराम्भसो द्विज ! ॥ ३०० ॥

पद्मनाभस्तु भगवान् शान्तितोयस्य देवता ।
नरो नारायणश्चैव हरि कृष्णस्तथैव च ॥ ३०१ ॥

आग्नेयादीशपर्यन्तं देवता मङ्गलाम्भस. ।
परिमार्जनसंज्ञे तु शङ्ख स्यादधिदैवतम् ॥ ३०२ ॥

कुशोदकस्य पद्म स्याद्गदा स्यात् सक्तुनो द्विज ! ।
वनमाला पुष्पतोये चक्र स्यादौषमानिके ॥ ३०३ ॥

किरीटमधिदैवं तु भवेदामलकाम्भसः ।
कौस्तुभस्तिलतोयस्य श्रीवत्सस्तण्डुलाम्भसः ॥ ३०४ ॥

एकाशीतिस्थिताना तु शुद्धोदाना तु देवता ।
कान्त्याद्युन्नतिपर्यन्तमष्टक प्रतिदिक्क्रमात् ॥ ३०५ ॥

बहिरेकोनपञ्चाशच्छुद्धतोयेषु च क्रमात् ।
स्वधादिगायत्र्यन्तास्तु शक्तयो ह्यधिदेवता. ॥ ३०६ ॥

अष्टावष्टौ तु पूर्वादिदिक्ष्वग्न्यादिविदिक्षु च ।
अन्येषा स्नपनाना तु सर्वेषा द्विजसत्तम ! ॥ ३०७ ॥

मर्यादा चेत्र दृष्टिश्च शुद्धोदेष्वधिदेवता ।
कलशाना तु गरुड., शेष सूत्रस्य दैवतम् ॥ ३०८ ॥

कूर्चाना तु पर ब्रह्म, चक्रिकाना तु चक्रराट् ।
वाससा वासुदेवस्तु, सर्वेषा च स एव वा ॥ ३०९ ॥

मार्जनं प्रोक्षण चैव शकृता चानुलेपनम् ।
सूत्रपातमलङ्कार पिष्टचूर्णै. समन्तत ॥ ३१० ॥

द्वादशाक्षरमन्त्रेण कारयेत् पञ्च मन्त्रवित् ।
पञ्चोपनिषदा मन्त्री कलशानधिवासयेत् ॥ ३११ ॥

विष्णुगायत्रिया तत्र कोष्ठेषु कलशान् न्यसेत् ।
तत्र द्रव्याधिदेवाना वाचकै. पूरयेत् क्रमात् ॥ ३१२ ॥

कूर्चास्तु प्रक्षिपेत्तेषु द्विषट्कब्रह्मविद्यया ।
तत्तद्द्रव्याधिदेवांस्तु तत्तद्द्रव्येषु पूजयेत् ॥ ३१३ ॥

चक्रिका. स्थापयेत् पश्चाच्चक्रमन्त्रेण साधक ।
वासोभिश्छादयेत् पश्चाद्द्विषट्कार्णेन मन्त्रवित् ॥

वस्त्रापनयनं, कुर्यान्मूलमन्त्रेण मन्त्रवित् ।
प्रणवेन तु सूत्राणि च्छित्त्वा तेनाभिवन्द्य च ॥ ३१५ ॥

उद्धृत्य, विष्णुगायत्र्या दद्याद्धस्ते गुरोस्तथा ।
यस्मिन् यस्मिन्न मन्त्रोऽत्र विहितः कर्मणि द्विज ! ॥

द्वादशाक्षरमन्त्रेण तत्तत् कुर्याद्विचक्षण ।
अथवा सर्वकर्माणि द्वादशाक्षरविद्यया ॥ ३१७ ॥

पूर्वोक्त परमेदानां स्नपनाना महामते ! ।
अर्घ्यादिद्रव्यनिचयः, इतरेषा तु कथ्यते ॥ ३१८ ॥

विष्णुपर्णी च दूर्वा च पद्म श्यामाकमेव च ।
एतानि पाद्याङ्गानि चत्वारि द्विजपुङ्गव ! ॥ ३१९ ॥

गन्धपुष्पेऽक्षतफले यवसिद्धार्थक तिलम् ।
कुशाग्रमर्घ्यस्याङ्गानि ह्येतान्यष्टौ भवन्ति हि ॥ ३२० ॥

लवङ्गजातितक्कोलमङ्गमाचमनीयके ।
शकृद्रसं च गोमूत्रं क्षीर दधि घृतं तथा ॥ ३२१ ॥

अङ्गानि पञ्चगव्यस्य पञ्चेतानि च सर्वत. ।
शम्योदुम्बरबिल्वाना पलाशवटयोस्तथा ॥ ३२२ ॥

खदिराश्वत्थयोश्चापि विकङ्कततरोस्तथा ।
त्वक्सारं तु कषाय स्यात् सर्वपापापनोदनम् ॥ ३२३॥

कुष्ठ मासी हरिद्रे द्वे मुराशैलेयचम्पका ।
वचाकच्चोरमुस्ताश्च 'सर्वोषध्य' प्रकीर्तिता ॥ ३२४ ॥

पलाशबिल्ववकुलकदम्बाम्रशिरीषजा ।
न्यग्रोधाश्वत्थजाश्चापि पल्लवा 'पल्लवारिण' ॥३२५॥

केतकीमल्लिका जातिनन्द्यावर्तोत्पलोद्भवा ।
पद्मचम्पककुन्दोत्था. कुसुमा 'पुष्पवारिण.' ॥३२६॥

कदलीबिल्वचूताश्च पनस मातुलङ्गकम् ।
नालिकेरं चामलकं बीजपूरं 'फलाम्भस' ॥ ३२७ ॥

अङ्गान्येतानि विप्राष्टौ फलानि कथितानि वै ।
यवगोधूमकव्रीहिशालिमुद्गप्रियङ्गुका ॥ ३२८ ॥

माषनीवारकौ चाङ्गं कथितं 'बीजवारिण.' ।
वाह्लीकं चन्दनं चैव कर्पूरमगरुं तथा ॥ ३२९ ॥

गन्धाङ्गानि च चत्वारि, त्वथवा मुनिपुङ्गव ! ।
चन्दनं कुङ्कुमं मांसी हरिबेरं मुरं तथा ॥ ३३० ॥

उशीरं कुष्ठमगरु 'गन्धाम्भो' ऽङ्गं तु चाष्टकम् ।
सूर्यकान्त पद्मरागमिन्द्रकान्तं तथैव च ॥ ३३१ ॥

वैडूर्य चाप्ययस्कान्तमिन्द्रनीलप्रवालकौ ।
गरुडं पुष्यरागं च स्फटिकब्रह्मरागकौ ॥ ३३२ ॥

वज्रं मौक्तिकमङ्गानि 'रत्नोदस्य', अथवा द्विज ! ।
मणिमुक्ताफलं वज्रं प्रवालं पुष्यकं तथा ॥ ३३३ ॥

रत्नोदकाङ्गान्येतानि पञ्च वै कथितानि ते ।
अपररत्नपनानां तु द्वितीय नवकं विना ॥ ३३४ ॥

तत्र मुक्ताफलं वज्रं गोमेदकेन्द्रनीलकौ ।
पुष्यराग ब्रह्मरागं चन्द्रकान्तं च विद्रुमम् ॥ ३३५ ॥

रत्नाम्भसोऽष्टावङ्गानि ह्यमूनि घदितानि वै ।
सहदेवी शिरीषं च रजनी सूर्यवर्तिनी ॥ ३३६ ॥

सदाभद्रा कुशाग्राणि मार्जनाङ्गानि षड् द्विज ! ।
रुक्मं रूप्य च ताम्रं चाप्ययस्त्रपुकमेव च ॥ ३३७ ॥

अङ्गानि कथितान्येव पञ्च वै 'लोहवारिण' ।
तिलसिद्धार्थनीवारयववेणुयवानि च ॥ ३३८ ॥

तुलसीपत्रयुक्तानि 'शान्त्यम्भो' ऽङ्गानि चैव षट् ।
इन्द्रवल्ल्यङ्कुरं पद्ममश्वत्थाङ्कुरमेव च । ३३९ ॥

एकपद्मं च चत्वार्यङ्गानि 'मङ्गलवारिण' ।
नद्यां तटाके वल्मीके पर्वते चेव मृत्तिका ॥ ३४० ॥

'परिमार्जनवस्तूनि' कथितानि द्विजोत्तम ! ।
शङ्ख चक्रं च कूर्म च वैनतेयं तथैव च ॥ ३४१ ॥

कुर्यात् प्रतिकृति लोहैरौपमानिकमुच्यते ।
शुद्धोदकलशाः सर्वे चन्दनैकाङ्गसंयुताः ॥ ३४२ ॥

अथवानन्तकलशं नाम्ना सकलपूरकम् ।
यदेतस्य विधानं त्व क्रमेण शृणु विस्तृतम् ॥ ३४३ ॥

पूर्ववन्मण्डपं कुर्याच्चत्वारिंशत्करायतम् ।
द्वात्रिंशत्करविस्तारं चतुर्द्वारादिसयुतम् ॥ ३४४ ॥

ध्वजाद्यैरप्यलंकारै पूर्ववत् सुविभूषितम् ।
आपाद्य वा प्रपामात्र यथाभिमतदेशगम् ॥ ३४५ ॥

यागार्थमण्डप प्राग्वत् कल्पयेत् तत्समीपत ।
उक्ते दिनेऽङ्कुरारोपं कृत्वा कर्मदिनात् पुरा ॥

तदर्थान् सर्वसंभारान् संभृत्य सुसमाहित. ।
देशिकेन्द्रस्तु पूर्वेद्यु. सुस्नातश्च कृताह्निक. ॥ ३४७ ॥

भूषणैर्विविधैर्वस्त्रैर्नूतनैश्च विभूषित. ।
सितोष्णीषोत्तरीयश्च चित्रैर्माल्यैरलंकृत. ॥ ३४८ ॥

चतुर्भिरष्टभिर्वा(चा ')र्यस्तादृशैरपि साधकै. ।
तत्संख्यै शास्त्रकुशलै. कञ्चुकादिविभूषितै. ॥

अन्यैश्च सुसितैर्वस्त्रै. स्थगिताननानासिकै ।
तत्तत्प्रयोगकुशलैरनेकै परिचारकैः ॥ ३५० ॥

प्राप्तेऽपराह्णसमये कृत्वा द्वारार्चनं विशेत् ।
यागार्थमण्डप तत्र देवं कुम्भादिके यजेत् ॥ ३५१ ॥

तत्रैव वा यजेद्बिम्ब वह्नौ सन्तर्प्य पूर्ववत् ।
ततोऽनुज्ञां समादाय क्रमेण मुनिपुङ्गव ! ॥ ३५२ ॥

अनुकल्पविधाने तु प्रासादं संप्रविश्य च ।
मूलबिम्बं तु संपूज्य अर्घ्यालभनमाल्यकै. ॥ ३५३ ॥

धूपेन च ततोऽनुज्ञा समादायारभेत् तत ।
द्वारस्याभ्यर्चनपूर्वं तु विशेत् स्नपनमण्डपम् ॥ ३५४ ॥

प्रोक्षयेत् पञ्चगव्येन द्विषट्कार्णेन सर्वत ।
नानाविधानि पुष्पाणि विकिरेत् सर्वदिक् तथा ॥

सिद्धार्थकाश्च बीजानि ततो मण्डपमध्यत. ।
सार्धद्वाविंशतिकरं भजेत् क्षेत्रं तु पञ्चधा ॥ ३५६ ॥

एकैकं नवधा भूयश्चत्वारिंशच्च पञ्च च ।
पङ्क्तयश्चापि कोष्ठानां पञ्चविंशोत्तरं भवेत् ॥ ३५७ ॥

द्विसहस्रं, ततो मध्ये कलशस्थापनार्थत. ।
एकाशीतिं च कोष्ठानि संस्थाप्य परिमार्जयेत् ॥

परितो वीथये पङ्क्तिद्वितयं, तद्बहि. पुन ।
पूर्वादिदिक्चतुष्के तु एकाशीतिपदानि च ॥ ३५९ ॥

कल्पयेत् पार्श्वतो वीथ्यै पुनः पङ्क्तिद्वय भवेत् ।
चतुर्षु कोणेष्वेकोनपञ्चाशत्कोष्ठकानि तु ॥ ३६० ॥

कल्पयेत्तत्र चाप्येकाशीतिमध्यानुसारत ।
मध्यतो नवक स्थाप्य पङ्क्त्येका लोपयेत् परि ॥

बहि पङ्क्तिद्वये दिक्षु षट्क षट्क विदिक्षु च ।
चतुश्चतुश्च संस्थाप्य शेषाणि परिमार्जयेत् ॥ ३६२ ॥

तद्बहि परितो वीथ्यै लुम्पेत् पङ्क्तिद्वय तत. ।
कोणानि कल्पयेद्बाह्यात् षडषोडशकानि तु ॥ ३६३ ॥

तत्पार्श्वे लोपयेत् पङ्क्तिमेकैका दिक्चतुष्टये ।
पङ्क्तिद्वयेन द्वाराणामन्तर्भागास्त्रयो बहि ॥ ३६४ ॥

पञ्चपार्श्व तु शोभार्थं चतुरस्रबहिर्द्वयम् ।
तदन्त पङ्क्तित्रितये त्रयस्त्रिंशत्पदानि तु ॥ ३६५ ॥

वीथ्या सहैकता नीत्वा ह्येकैक स्थापयेद्बहि ।
द्वाराणामपि कोणाना मध्ये षोडशसंख्यया ॥ ३६६ ॥

पञ्चविंशतिकोष्ठानि स्थापयित्वा तु पार्श्वत ।
अन्योन्यं लोपयेत् पङ्क्तिमेकैका तु महामुने ! ॥

एवमापाद्य कुम्भानां पदानि स्थापनार्थत. ।
तत सुगन्धरजसा सितेन सुसमा द्विज ! ॥ ३६८ ॥

अङ्गुष्ठविस्तरोत्सेधा ऋज्वी रेखास्तु कल्पयेत् ।
विकीर्य कोष्ठेषु रज. पश्चाद्द्वाराणि पूरयेत् ॥ ३६९ ॥

तेनैव शोभा पीतेन विचित्रै. कुसुमान्वितै ।
लताबृन्दैर्मुनिश्रेष्ठ ! वीथी. सर्वत्र भूषयेत् ॥ ३७० ॥

तत. संगृह्य कलशान् पूर्वलक्षणलक्षितान् ।
अष्टोत्तरशत कृत्वा मूलमन्त्रेण वै घृतम् ॥ ३७१ ॥

गायत्र्या वा ततो द्वारा चतुष्के पूर्वदिक्क्रमात् ।
द्वौ द्वौ संस्थाप्य कलशौ कुसुमादीन् प्रपूज्य च ॥

पुष्पैरभ्यर्च्य कोष्ठानि विचित्रैर्मन्त्रमन्त्रितै. ।
सर्वधान्यै प्रयत्नेन कल्पयित्वा तु पीठिका. ॥ ३७३ ॥

तासु द्वौ द्वौ कुशाग्रौ च निक्षिपेन्मूलमन्त्रत ।
सूत्रेण वेष्टितान् कृत्वा कलशान् पूर्ववद्द्विज ! ॥

गायत्र्या क्षालयित्वा तान्, कोष्ठेषु न्यस्य 'तारत.' ।
अधोमुखान् न्यसेत् पृष्ठे परमेष्ठ्यात्मना कुशान् ॥

तत' संप्रोक्षयेत् 'पुंसा' पञ्चगव्येन तान् कुशै ।
'विश्वेन' विकिरेत् सर्वानक्षताश्च तदूर्ध्वत ॥ ३७६ ॥

उत्तानये 'निवृत्या' तान् क्रमाद्यत्नेन वै तत ।
गालितेन तु तोयेन सुगन्धैश्चन्दनादिकै. ॥ ३७७ ॥

वासितेन तु तान् विप्र! सर्वेणापूरयेत् क्रमात् ।
मध्यैकाशीतिमध्यस्थनवके मध्यकुम्भके ॥ ३७८ ॥

सूर्यकान्त पद्मराग वैडूर्य चन्द्रकान्तकम् ।
अयस्कान्तमिन्द्रनील प्रवाल गारुड तथा ॥ ३७९ ॥

पुष्यराग स्फाटिक च ब्रह्मराग च सेचकम् ।
वज्र च रजत चैव मौक्तिक ताम्रमेव च ॥ ३८० ॥

सर्वाण्येतानि निक्षिप्य तद्बहिर्नवकाष्टके ।
पूर्वादीशानपर्यन्त मध्यकुम्भेषु वै क्रमात् ॥ ३८१ ॥

द्रव्याणि षोडशैतानि द्वन्द्वयोगेन विन्यसेत् ।
द्विसप्तति च (क) सख्येषु न्यसेच्छेषेषु मौक्तिकम् ॥

पूर्वैकाशीतिमध्यस्थनवके मध्यगोचरे ।
कदलीपनसाम्राणा क्षीरिकावदरारयो' ॥ ३८३ ॥

मातुलङ्गकेसरयो. ह (भ) व्यजम्बीरयोरपि ।
फलानि निक्षिपेत् पश्चात्तद्बहिर्नवकाष्टके ॥ ३८४ ॥

प्रागादीशानपर्यन्तं मातुलङ्ग च दाडिमम् ।
नारङ्ग चापि जम्बीर तक्कोल बदरीं तथा ॥ ३८५ ॥

क्षीरिकामलके चैव द्राक्षाखर्जूरके फले ।
आम्रं च सहकारं च पनसस्य फलं तथा ॥ ३८६ ॥

क्षुद्रपूर्व च पनसं कदलीमोचके तथा ।
क्रमाद्द्वन्द्वप्रयोगेण मध्यकुम्भेषु विन्यसेत् ॥ ३८७ ॥

नवकाष्टककुम्भेषु बदराणि विनिक्षिपेत् ।
उशीरं कुङ्कुमं चैव मासी मलयजं तथा ॥ ३८८ ॥

मुर च हरिबेर च कुष्ठ चागरुमेव च ।
एकाशीतिपदे याम्ये विश्वान्येतानि निक्षिपेत् ॥३८९॥

मध्ये मध्यस्थकलशे पूर्वादिक्रमयोगत. ।
शेषेषु मध्यकुम्भेषु न्यसेदेकैकजं फलम् ॥ ३९० ॥

विनिक्षिपेन्मलयजमेतेषामष्टकेषु च ।
समुद्रवापीकूपाना तटाकाना ह्रदस्य च ॥ ३९१ ॥

वृष्टीनदीहिमाना च तोयानि प्रतिपादयेत् ।
वारुणे मध्यमे कुम्भे एकैक शेषमध्यमे ॥ ३९२ ॥

शेषेषु चाष्टवर्गेषु शुद्धोदानि विनिक्षिपेत् ।
यवगोधूमकव्रीहिशालिमुद्गप्रियङ्गुकान् ॥ ३९३ ॥

माषनीवारकौ वापि नवके मध्यमे घटे ।
शेषेषु धान्यमेकैक मध्यकुम्भेषु च क्रमात् ॥ ३९४ ॥

अष्टकेषु च सिद्धानि तोयानि प्रतिपादयेत् ।
आग्नेयैकोनपञ्चाशन्नवके पूरयेद्घृतम् ॥ ३९५ ॥

षटके वैन्द्रादियोगेन गोमूत्र गोमयं तथा ।
क्षीर दधि विनिक्षिप्य कोणेषूष्णोदक न्यसेत् ॥ ३९६॥

नैर्ऋते मध्यनवके तैल विन्यस्य तद्बहि. ।
शेषेषु चत्वारिशत्सु कलशेषु गुलोदकम् ॥ ३९७ ॥

वायव्यनवके मध्ये न्यसेत् तैल तु सार्षपम् ।
कलशेषु च शेषेषु विन्यसेदैक्षवं रसम् ॥ ३९८ ॥

ईशानैकोनपञ्चाशन्नवके मधु विन्यसेत् ।
शेषेषु नालिकेराम्भ तत्क्षीर वापि विन्यसेत् ॥

ऐन्द्रादिपञ्चविशत्सु प्रथमे मध्यमे घटे ।
क्षेत्रतीर्थाब्धिशैलेभ्य सूकराख्यबिलाद्रजात् ॥

वल्मीकाद्वृषशृङ्गाच्च मृदमादाय पूरयेत् ।
शेषेष्वष्टसु चैकैक, षोडशे गन्धवारि च ॥ ४०१ ॥

सहदेवी वचा चैव शतमूली शतावरी ।
कुमारी च गलूची च सिंही व्याघ्री तथैव च ॥ ४०२॥

द्वितीये मध्यमे कुम्भे विन्यस्य, बहिरष्टके ।
एकैकं प्राक्क्रमेणैव, षोडशे पूर्ववद्भवेत् ॥ ४०३ ॥

न्यग्रोधोदुम्बराश्वत्थजम्बूबिल्वपलाशजैः ।
शिरीषमधुकोत्थैश्च त्वग्रसैर्मध्यमं घटम् ॥ ४०४ ॥

तृतीये पूरयित्वाष्टौ व्यस्तै. षोडशपूर्ववत् ।
पलाशबिल्ववकुलकदम्बाम्रशिरीषजान् ॥ ४०५ ॥

न्यग्रोधाश्वत्थजान् क्षिप्त्वा चतुर्थे पल्लवान् घटे ।
मध्यमेऽष्टासु च व्यस्तान् प्राग्वत् षोडश विन्यसेत् ॥

मल्लिकाजातिवकुलनन्द्यावर्तप्रियङ्गुजै. ।
पद्मचम्पककुन्दैश्च पुष्पैरापूर्य मध्यमम् ॥ ४०७ ॥

कलश पञ्चमव्यस्तैरष्टौ शेषास्तु पूर्ववत् ।
सिद्धार्थ सर्षप माष रोचना गोसमुद्भवाम् ॥ ४०८ ॥

इन्द्रयवं वेणुयवं शमीश्यामाकबीजके ।
षष्ठे मध्यस्थिते कुम्भे न्यसेदष्टासु च क्रमात् ॥ ४०९ ॥

व्यस्तानि तानि द्रव्याणि प्राग्वत् शेषास्तु षोडश ।
तिल वनतिल चैव जीरकं कृष्णजीरकम् ॥ ४१० ॥

अतसी शतपुष्पा च कुठारच्छिन्नमेव च ।
ऋषिबीज च विन्यस्य मध्यकुम्भे तु सप्तमे ॥ ४११ ॥

एकैकं बहिरष्टासु प्राग्वत् षोडशसु द्विज ! ।
षष्टिश्यामाकशालीना नीवारस्य च तण्डुलम् ॥ ४१२ ॥

दूर्वाकुशेन्द्रवल्लीनामङ्कुरान् पिप्पलस्य च ।
न्यसेन्मध्येष्टमेऽष्टासु व्यस्तानन्येषु पूर्ववत् ॥ ४१३ ॥

कुशोदीच्येक्षुकाशानामुशीरशरपुङ्खयो ।
अगर्वपामार्गयोश्च मूलानि नवमे न्यसेत् ॥ ४१४ ॥

कुम्भे मध्यस्थिते, ऽष्टासु व्यस्तानन्येषु पूर्ववत् ।
तुलस्या. कृष्णतुलस्याश्च ग्रन्थिवेणोरपिच्छदा. ॥ ४१५ ॥

भृङ्गराजस्य बिल्वस्य शम्याः केतकि, जातयो. ।
दशमे मध्यमेऽष्टासु व्यस्तान् शेषेषु पूर्ववत् ॥ ४१६ ॥

मुस्तानगरमुस्ताख्यकन्दे कुवलयस्य च ।
कुमुदोत्पलयोश्चापि शीतलीयककन्दकम् ॥ ४१७ ॥

कल्हारस्य कशेरोश्च कन्दे एकादशे क्षिपेत् ।
मध्ये कुम्भेषु चैतानि क्रमादन्येषु पूर्ववत् ॥ ४१८ ॥

मुद्गमाषकनिष्पावशिम्बव्रीहियवाङ्कुरान् ।
आढकाना कुलुत्थानामङ्कुरान् द्वादशे क्षिपेत् ॥

मध्यकुम्भेऽष्टके व्यस्तान् प्राग्वत् षोडशसु द्विज ! ।
शङ्खपुष्पी सदाभद्रा विष्णुक्रान्त्येकपद्मयोः ॥ ४२० ॥

बलाया खरमञ्जर्या सहायाश्च तथैव च ।
अङ्कुरान् सहदेव्याश्च मध्ये कुम्भे त्रयोदशे ॥ ४२१ ॥

विन्यस्याष्टासु च व्यस्तानन्येषु प्राग्वदाचरेत् ।
श्वेतार्क ब्रह्मदण्डी च तथा ब्रह्मसुवर्चलाम् ॥ ४२२ ॥

सरक्तां च विरक्ता च पृश्निपर्णी स्थिरा तथा ।
एरण्ड चापि विन्यस्य मध्ये कुम्भे चतुर्दशे ॥ ४२३ ॥

अष्टासु तानि व्यस्तानि प्राग्वदन्येषु विन्यसेत् ।
सुरभी पद्मकिञ्जल्क नागकेसरमेव च ॥ ४२४ ॥

पत्रमेलात्वच चैव लता कस्तूरिकां तथा ।
जातीफल च पञ्च दशमे मध्यसंस्थिते ॥ ४२५ ॥

कुम्भे न्यस्याष्टके व्यस्त शेष पूर्ववदाचरेत् ।
सुवर्ण रजत ताम्रमायसं त्रपु सीसकम् ॥ ४२६ ॥

आर कास्यं च विन्यस्य षोडशे मध्यसस्थिते ।
कलशेऽष्टासु च व्यस्तं प्राग्वत् षोडशसु द्विज ! ॥

एवं द्रव्याणि विन्यस्य क्रमेण सुसमाहित. ।
तत आग्नेयकोणे तु देवस्याराधनार्थतः ॥ ४२८ ॥

अर्घ्यादेर्द्रव्यनिचय मधुपर्क च विन्यसेत् ।
ततो निर्ऋतिकोणे तु सरिद्रा शालिपिष्टके ॥ ४२९ ॥

दूर्वामश्वत्थपत्र च सिद्धार्थ च तथाक्षतम् ।
माल्यानि पूर्णकुम्भं च न्यसेन्नीराजनार्थत ॥ ४३० ॥

तथाचोद्वर्तनार्थ च चूर्ण गोधूमशालिजम् ।
रजनीचूर्णसंमिश्रमीषत् पद्मकभावितम् ॥ ४३१ ॥

चमषी च खलि चैव तथा च मुनिपुङ्गव ! ।
चन्दनं मुखलेपार्थं घृष्टकर्पूरभावितम् ॥ ४३२ ॥

चम्पकैर्मुरमासीभ्या हरिबेरै समन्वितम् ।
पिष्टमामलकं चैव शिर. स्नानार्थकं न्यसेत् ॥ ४३३ ॥

पृथक पृथक् च पात्रेषु ततो वायव्यकोणके ।
धौतवस्त्रं करण्ड च पुष्पमाल्यादिभाजनम् ॥ ४३४ ॥

तत ईशानकोणे तु शलाकान्यायसानि तु ।
आयसा गुलिकाश्चैव तथा सन्दंशन द्विज ! ॥ ४३५ ॥

अन्यद्यदुपयोगि स्यात् स्थापयेत् तद्यथारुचि ।
एतदुक्तं समस्तं वा यथाभिमतकोणगम् ॥ ४३६ ॥

मध्यैकाशीतिमध्यस्थनवके मध्यसंस्थिते ।
कुम्भे यजेद्वासुदेव तत प्रागादियोगत ॥ ४३७ ॥

दिक्स्थाना नवकाना तु मध्येषु प्रभवक्रमात् ।
चतुरो वासुदेवादीन् विदिक्स्थानां तु मध्यत. ॥

ईशादिवह्निपर्यन्त तानेवाप्यययोगत. ।
मध्ये शुद्धोदकुम्भेषु सत्य सर्वेषु पूजयेत् ॥ ३३९ ॥

वहिर्दिङ्नवकाना तु शुद्धोदेषु च दिक्क्रमात् ।
सुपर्ण गरुड चैव तार्क्ष्य तु विहगेश्वरम् ॥ ४४० ॥

वह्न्यादीशानपर्यन्तं नवकाना चतुष्टये ।
शुद्धोदेषु च तानेव क्रमेण परिपूजयेत् ॥ ४४१ ॥

एकाशीतिषु दिक्स्थेषु पूर्वादिक्रमयोगत. ।
मध्यकुम्भेषु षट्त्रिंशत्संख्यातेषु यथाक्रमम् ॥ ४४२ ॥

पद्मनाभादयो विप्र ! देवा वेदविदन्तिमा ।
पूज्या नवकयुक्त्या तु मध्यादिशानपश्चिमम् ॥ ४४३ ॥

मध्ये शुद्धोदकुम्भेषु यजेत् कल्किस्वरूपिणम् ।
वहिर्नवकशुद्धोदकलशेषु यजेत् प्रभुम् ॥ ४४४ ॥

पातालशयनाख्य तु, पश्चादग्निदिगादितः ।
चतुर्षु कोणेष्वेकोनपञ्चाशन्नवकेषु च ॥ ४४५ ॥

मध्येषु केशवादीना क्रमात् त्रिकचतुष्टये ।
आद्यान्, दिक्स्थेषु कुम्भेषु द्वितीयास्तु चतुर्ष्वपि ॥

विदिक्स्थेषु तृतीयाश्च षट्क षोडशके क्रमात् ।
चक्रादिवज्रपर्यन्तमस्त्रषोडशक यजेत् ॥ ४४७ ॥

कोणस्थेषु चतुष्केषु न्यसेच्छक्ति तत. परम् ।
ऐन्द्री दक्षिणत. पञ्चविशतौ प्रथमे यजेत् ॥ ४४८ ॥

सर्वसम्पत्प्रदा लक्ष्मीं मध्यकुम्भेषु तद्वहि. ।
अष्टासु पुष्टि तद्बाह्ये कान्तिं षोडशके द्विज ! ॥ ४४९ ॥

एवमाद्येषु चान्येषु पञ्चविशतिषु क्रमाम् ।
प्रभादीना च शक्तीना त्रितयं त्रितयं यजेत् ॥ ४५० ॥

तत्रापि पञ्चदशमे वहि षोडशके न्यसेत् ।
किरीट, मन्ति मे पञ्चविशतौ त्रितयं यजेत् ॥४५१॥

श्रीवत्सकौस्तुभं चापि वनमाला तथैव च ।
वासुदेवादिमन्त्रेस्तु वनमालान्तिमै. क्रमात् ॥ ४५२ ॥

अष्टाविशतिसख्य तु हुत्वाज्य तु (वा) यथारुचि ।
पूर्णान् दत्वा तत. कुम्भान् सपातविधिना स्तृशेत् ॥

पिधाय चक्रिकाभिस्तु सर्वानुक्तक्रमेण तु ।
वासोभिश्छादयेत् पश्चान्नूतनैस्तु पृथक् पृथक् ॥

भूय. पूर्णाहुति दत्वा दिक्षु भूतवलि हरेत् ।
मृदादिसर्वरत्नान्तमुद्धारक्रम इष्यते ॥ ४५५ ॥

पूर्व विष्णोर्नुकमिति मन्त्रेण च महामते ! ।
पूर्वादीशानपर्यन्तं मृत्कुम्भैरभिषिच्य च ॥ ४५६ ॥

सर्वमृत्कलशेनैव मध्यस्थेन ततो वहि. ।
कुम्भै.षोडशभिर्विप्र ! प्रागादिक्रमयोगतः ॥ ४५७ ॥

एवमेव क्रम. सर्वपञ्चविशतिषु द्विज ! ।
"प्रतद्विष्णुरि"त्यनेन मूलाद्भिरभिषेचयेत् ॥ ४५८ ॥

"प्रतत्ते विष्णुवास" इति कषायैरन्वितामबुभि. ।
यस्य "त्रिपूर्णे" त्येतेन कलशै. पल्लवान्वितैः ॥

"तदस्ये" ति च मन्त्रेण पुष्पैरापूरितैर्घटै. ।
"तावा"मिति च मन्त्रेण सिद्धार्थादिसमन्वितै. ॥

"प्रवः पान्तमि" त्येतेन तिलाद्यन्वितवारिभि. ।
"परो मात्रे" तिमन्त्रेण षष्ट्यादिद्रव्यवारिभि. ॥

"न ते विष्णो" रित्यनेन कुशमूलान्वितामबुभिः ।
"इरावती" ति मन्त्रेण तुलस्यादिजलैस्ततः ॥ ४६२ ॥

"अतो देवे"ति मन्त्रेण मुस्ताकन्दादिसंयुतै. ।
"इद विष्णुरि" त्यनेन मुद्गाद्यङ्कुरपूरितै. ॥ ४६३ ॥

"त्रीणि पदे" ति मन्त्रेण शङ्खपुष्पादिवारिभिः ।
"विष्णो. कर्माणी"त्यनेन श्वेतार्काद्यम्बुभिस्तत. ॥

"तद्विष्णो" रिति मन्त्रेण सुरभ्यादिजलैस्तत. ।
"तद्विप्रास" इत्यनेन स्नापयेल्लोहवारिभि. ४६५ ॥

उद्धार एव कथित. शृणु कर्मक्रमं द्विज ! ।
प्रभाते तु कृतस्नान. कृतकौतुकमङ्गल. ॥ ४९६ ॥

देशिकेन्द्रस्तथान्यैश्च देशिकैश्च समन्वित ।
प्रासाद संप्रविश्याथ नित्य निर्वर्त्य पूर्ववत् ॥ ४९७ ॥

यागमण्डपमासाद्य रजोभि· पूर्य मण्डलम् ।
कुम्भमण्डलयोरिष्ट्वा प्रासादं संप्रविश्य च ॥ ४९८ ॥

ततस्त्वर्घ्यादिभिर्भोगै· मूलबिम्ब तु पूजयेत् ।
तस्मात् स्नपनबिम्बे तु समावाह्य तथैव च ॥ ४९९ ॥

इष्ट्वालंकृत्य विविधैर्वस्त्रैर्माल्यैश्च भूषणै ।
शिबिकादौ समारोप्य सर्वालङ्कारसंयुतम् ॥ ५०० ॥

पूर्वोक्तवर्त्मना विप्र ! निनयेत् स्नानमण्डपम् ।
स्नानपीठे समारोप्य पूर्वोदितविधानत ॥ ५०१ ॥

यथाक्रमं समभ्यर्च्य यावदात्मनिवेदनम् ।
ततस्तु देवदेवस्य कुर्यात् कौतुकबन्धनम् ॥ ५०२ ॥

देवस्य पुरतः कुर्याच्छकृता मण्डलं शुभम् ।
पिष्टचूर्णैरलकृत्य न्यसेत् कोणेषु पालिका· ॥ ५०३ ॥

व्रीहिभि· पीठिका कृत्वा तदूर्ध्वं विनिवेशयेत् ।
हैम वा राजतं पात्र पूरित शालितण्डुलै ॥ ५०४ ॥

खारिमानैस्तदर्धैर्वा ताम्बूलैश्च विभूषितम् ।
तदूर्ध्वे विन्यसेत् सूत्रं पट्टज तु चतुर्गुणम् ॥ ५०५ ॥

मन्त्रयित्वास्त्रमन्त्रेण संपूज्य कुसुमैरपि ।
तत् पात्रं शिरसि स्थाप्य परिचर्यापरस्य च ॥ ५०६ ॥

शिष्यस्य मण्डप पश्चाच्चतुष्कुर्यात् प्रदक्षिणम् ।
सर्वमङ्गलसंयुक्त प्रासादाभ्यन्तरे यदि ॥ ५०७ ॥

प्रथमावरणे वापि द्वितीयावरणेऽथवा ।
प्रदक्षिणचतुष्क तु कुर्याद्वा सकटे द्वयम् ॥ ५०८ ॥

देवस्याग्रे तु तत्पात्रमाधारस्योपरि न्यसेत् ।
कृत्वा पुण्याहघोषं तु देवमर्घ्यादिभिर्यजेत् ॥ ५०९ ॥

तत. प्रतिसर चेष्ट्वा गन्धधूपाधिवासितम् ।
कौतुकं देवदेवस्य बन्धयेद्दक्षिणे करे ॥ ५१० ॥

संपूज्यार्घ्यादिभिर्भूयस्ताम्बूलैस्तोषयेद्द्विजान् ।
दीक्षितान् वैष्णवाश्चापि देशिकेन्द्रपुरस्सरान् ॥

आचार्य. स्वयमादद्यात्तदर्ध तण्डुलादिकम् ।
एवं सर्वेषु यागेषु कार्य कौतुकबन्धनम् ॥ ५१२ ॥

कुम्भाना विहितं कर्म न कृत यदि व पुरा ।
कया त्वनुपपत्या तु तदा तत् सर्वमाचरेत् ॥ ५१३ ॥

स्नानासनोदितैर्भोगै. मुखलेपान्तिमै. क्रमात् ।
पूजयित्वा तत· कुम्भै. स्नापयेदुक्तवर्त्मना ॥ ५१४ ॥

सर्वेषामपि कुम्भाना स्नानशेष तु पूरयेत् ।
घटान्तरं तु द्रव्याणामन्तरान्तरयोगत. ॥ ५१५ ॥

शुद्धाम्भसा स्नापयित्वा पत्रेणार्घ्यादिभिर्यजेत् ।
एवं सुस्नाप्य विधिवद्रजनीचूर्णपूरितै. ॥ ५१६ ॥

कौतुकोक्तेन मार्गेण पुरस्तादधिवासितै ।
पञ्चविंशतिभि कुम्भैर्नवभि. पञ्चभिस्तु वा ॥ ५१७ ॥

एकेन वापि तच्चूर्ण द्विषट्कब्रह्मविद्यया ।
प्रदद्यान्मूर्ध्नि देवस्य भूयश्चार्घ्यादिभिर्यजेत् ॥ ५१८ ॥

सर्वाङ्ग परिमृज्याथ भक्ताना मूर्ध्नि दापयेत् ।
विष्वक्सेनस्य दत्वा तु तन्मन्त्रेण ततो द्विज ! ॥

सहस्रधारास्नपनमाचरेच्छुद्धवारिभि ।
सवन्दनादिक दत्वा तत पीठात्तत. प्रभुम् ॥ ५२० ॥

अलङ्कारासनं नीत्वा आसनादिक्रमाद्यजेत् ।
भोगै सास्पर्शिकै. प्राग्वद्विविधैरौपचारिकै. ॥

हृदयङ्गमसत्रैश्च विचित्रैश्च मनोहरैः ।
एवं द्विजप्रदानान्तं होमान्तं वा प्रपूज्य च ॥ ५२२ ॥

शिबिकादौ समारोप्य पूर्ववत् संप्रवेशयेत् ।
प्रदक्षिणक्रमेणैव प्रासादाभ्यन्तर तत. ॥ ५२३ ॥

तत्रावरोप्य तद्बिम्बं स्वस्थाने सन्निवेश्य च ।
इष्ट्वाचार्घ्यादिभिर्भोगै. मूलबिम्बं तथैव च ॥ ५२४ ॥

समाप्य च कृतं कर्म कुर्याच्चैव विसर्जनम् ।
ततश्चोत्सवबिम्ब तद्विचित्रैर्वसनैस्तथा ॥ ५२५ ॥

ततश्चोत्सवबिम्बं तद्विचित्रैर्वसनैस्तथा ।
अनेकैर्भूषणै रम्यैर्माल्यैश्च सुसुगन्धिभि ॥ ५२७ ॥

अलंकृत्य समारोप्य शिबिकां संप्रवेशयेत् ।
आस्थानमण्डपं सम्यगुत्सवोदितवर्त्मना ॥ ५२८ ॥

तत्रावरोप्य यानाच्च सौवर्णे वितते शुभे ।
भद्रासनेऽथवा विप्र ! विचित्रास्तरणान्विते ॥ ५२९ ॥

यथाक्रमोदितेनैव वर्त्मना संप्रपूजयेत् ।
सांस्पर्शादिकैर्भोगैर्विविधैस्तु विशेषत ॥ ५३० ॥

महाहविर्निवेद्याथ कृत्वा सर्वं क्रमेण तु ।
द्विजप्रदानपर्यन्तमग्नौ सन्तर्पयेत् क्रमात् ॥ ५३१ ॥

समर्पणादिकं सर्वं कृत्वा देवं जगत्पतिम् ।
समारोप्य च यानादौ सर्वमङ्गलसंयुतम् ॥ ५३२ ॥

प्रवेशयेत्तु प्रासादं यानादेरवरोप्य च ।
स्वस्थाने सन्निवेश्याथ अर्घ्यगन्धादिभिर्यजेत् ॥ ५३३ ॥

मूलबिम्बं तथाभ्यर्च्य कृतं कर्म समर्पयेत् ।
स्नानशेषेण तोयेन कुम्भस्थेन क्रमेण तु ॥ ५३४ ॥

द्वारस्थान् सकलान् देवांस्तथा चावरणस्थितान् ।
बलिदानक्रमेणैव सम्प्रोक्ष्य परिपूज्य च ॥ ५३५ ॥

बलिं च दत्वा शेषेण गणेशमभिषिच्य च ।
पूजयेदर्घ्यगन्धाद्यैरथवा ह्यनुकल्पके ॥ ५३६ ॥

पूजावसाने देवस्य स्नपनव्यक्तिगस्य तु ।
प्रोक्षणं देवतानां च गणेशस्याभिषेचनम् ॥ ५३७ ॥

आचरेत् क्रमयोगेन, यजमानस्ततो द्विज ! ।
आचार्यान् साधकांश्चैव तोषयेद्विविधैर्धनैः ॥ ५३८ ॥

अन्यांश्च बान्धवान् सर्वान् यथाशक्ति च तोषयेत् ।
अनिवारितमन्नाद्यं सार्वजन्यं तु कारयेत् ॥ ५३९ ॥

एवमेव हि सर्वेषु स्नपनेषु क्रियाक्रम ।
प्रोक्षणं परिवाराणां बलिदानं च वर्जयेत् ॥ ५४० ॥

महाहविर्विधानं च विभवे सति कल्पयेत् ।
प्रधानादिक्रमेणैव स्नपनानां तु पञ्चकम् ॥ ५४१ ॥

कुर्यान्नित्यविधौ विप्र ! तथा नैमित्तिकेऽपि च ।
ततस्तु सूक्ष्मसूक्ष्मादिस्थूलस्थूलान्तपञ्चकम् ॥ ५४२ ॥

चातुरात्म्यादिदिनानां कार्यं स्थापनकर्मणि ।
अयने विषुवे चन्द्रतारके सोमसूर्ययो ॥ ५४३ ॥

स्नपनं मुख्यकल्पे तु [illegible]मोत्तमम् ।
अनुकल्पे तु तन्न्यूनादि चतुष्टयम् ॥ ५४४ ॥

अयनद्वयमध्यस्थसंक्रान्तिद्विचतुष्टये ।
आवृत्तिक्रमयोगेन कल्पयेन्मुनिपुङ्गव ! ॥ ५४५ ॥

उत्सवारम्भदिवसे तदन्ते च समारभेत् ।
अधमोत्तमसंज्ञं तु तन्मध्यं वानुकल्पके ॥ ५४६ ॥

महाहविर्विधाने तु तन्मूले तु समाचरेत् ।
देशकालानुरूपेण द्वितीयं नवकं तु वा ॥ ५४७ ॥

तृतीयं वा चतुर्थं वा कल्पयेत्तु यथाक्रमम् ।
प्रायश्चित्तेषु कार्येषु सर्वाण्येतानि कल्पयेत् ॥ ५४८ ॥

तेषु स्नपनभेदं तु वक्ष्याम्युपरि विस्तृतम् ।
स्नपनानां विधानं तु दिव्यशास्त्रोक्तवर्त्मना ।
यथावत् कथितं सम्यक्किमन्यच्छ्रोतुमिच्छसि ॥ ५४९ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे स्नपनविधानं नाम चतुर्दशोऽध्याय ॥

श्रीः

पञ्चदशोऽध्यायः ॥

सनक —

स्वयं व्यक्तविमानस्य प्रादुर्भावप्रसङ्गत ।
प्रतिष्ठा सूचिता ब्रह्मन्! विस्तरेणाद्य मे वद ॥ १ ॥

शाण्डिल्य -

श्रूयतामभिधास्यामि यदर्थं चोदितस्त्वया ।
पौष्कराख्ये महाशास्त्रे प्रोक्ता भगवता स्वयम् ॥ २ ॥

प्रतिष्ठा वासुदेवेन पौष्करस्य महात्मना ।
सुविस्तरेण सर्वत्र प्रकीर्णा बहुधा स्थिता ॥ ३ ॥

सर्वत्र सारमुद्धृत्य तत्प्रसादाद्वदामि ते ।
[1]आद्यवेदोद्भवैर्दिव्यै. साक्षात् सद्ब्रह्मवाचकै. ॥ ४ ॥

मन्त्रैर्बलादिकैर्योक्ता प्रतिष्ठा तत्पदप्रदा ।
[2]सिद्धान्तोक्तेन मन्त्रेण साङ्गेनैव बलादिके ॥ ५ ॥

स्थापना या तु सा प्रोक्ता भोगमोक्षफलप्रदा ।
[3]साङ्गेन मूलमन्त्रेण ज्ञानध्यानान्वितेन च ॥ ६ ॥

प्रतिष्ठा विहिता ब्रह्मन्! मन्त्रसिद्धिफलप्रदा ।
[4]एकायनाख्यवेदोक्तैर्मन्त्रैरन्यैस्त्रयीमयै ॥ ७ ॥

सिद्धान्तोक्तेन मन्त्रेण, साङ्गेन क्रियते च या ।
[5]सा सार्धमैहिकैर्भोगै, रणिमादिफलप्रदा ॥ ८ ॥

दिव्यैर्बलादिकैर्मन्त्रै. सह चान्यैस्त्रयीमयै ।
स तु षाड्गुण्यफलदा सह यज्ञफलैर्भवेत् ॥ ९ ॥

सह ऋक्सामपूर्वैस्तु मन्त्रैः स्वव्याप्तिसंयुतै ।
साङ्गेन मूलमन्त्रेण स्थापना या महामते! ॥ १० ॥

सा सर्वभोगदा चान्ते तथा मन्त्रफलप्रदा ।
केवलैः श्रुतिमन्त्रैस्तु यथावसरलक्षणै. ॥ ११ ॥

धारणा भगवद्ध्यानमन्त्रन्यासेन वै सह ।
देशिकेन्द्रेण या कार्या भक्ताना परमेश्वरे ॥ १२ ॥

सामान्या सा परिज्ञेया यज्ञवत् सर्व(स्वर्ग)भोगदा ।
कालक्रमादकामाना सर्वा परफलप्रदा ॥ १३ ॥

इति मन्त्रविभेदेन सप्तधा परिकीर्तिता ।
द्विजेन्द्रो भगवद्याजी तद्भक्तस्तन्मना सदा ॥ १४ ॥

निर्द्वन्द्वो नित्यसत्त्वस्थो द्विषट्काध्यात्मचिन्तक ।
वेत्ता यो व्यूहपूर्वस्य व्यक्तस्य परमात्मन ॥ १५ ॥

बलादिदिव्यमन्त्रेषु यस्य निष्ठा परा स्थिता ।
सन्यास कर्मणा यस्तु करोत्यध्यक्षतः क्रमात् ॥ १६ ॥

नित्यसिद्धे तदाकारे तत्परत्वे च सर्वदा ।
यस्यास्ति सक्तिर्हृदये तस्यासौ सन्निधि भजेत् ॥१७॥

मन्त्ररूपी जगन्नाथ परमात्माच्युतः प्रभु ।
अतस्तेन प्रतिष्ठान कृत मुख्याधिकारिणा ॥ १८ ॥

विद्धि तन्मुख्यकल्प तु प्रतिष्ठोक्तफलप्रदम् ।
प्राक् त्रयीधर्मनिष्ठो य प्राप्तदीक्षो जितेन्द्रिय ॥ १९ ॥

मन्तज्ञ. कर्मकुशल पञ्चरात्रार्थतत्त्ववित् ।
स्थापनं यत् कृतं तेन ह्यनुकल्पं च विद्धि तत् ॥ २० ॥

परात्परस्वरूपस्य परस्य चतुरात्मन. ।
शान्तोदितादिव्यूहाना केशवाद्यखिलस्य च २१ ॥

तथा विभवमूर्तीनामेकाकारस्वरूपिण. ।
तथा च सर्वजगतामेकबीजात्मकस्य च ॥ २२ ॥

सदोदितस्वरूपस्य वासुदेवस्य वै विभो. ।
त्रयाणामच्युतादीना तद्भेदाना तथैव च ॥ २३ ॥

शान्तोदितस्वरूपस्य परस्य चतुरात्मन. ।
या तु सन्धानरूपा सा "प्रतिष्ठेति" प्रकीर्तिता ॥२४॥

पीठब्रह्मशिलाज्ञानस्तम्बस्य चतुरात्मन ।
चतुर्दिग्वीक्षमाणस्य या तु सन्धानलक्षणा ॥ २५ ॥

बोद्धव्या "सुप्रतिष्ठा" च दिग्व्यूहपरिपूरिका ।
धृतिशक्ति स्वरूपेण त्वमूर्तनाव्ययात्मना ॥ २६ ॥

स्थितये प्रक्रियार्थं च "ब्रह्मपाषाणता" गता ।
सर्वब्रह्मशिलानिष्ठमाक्षिप्तेर्द्विजसत्तम ! ॥ २७ ॥

व्याप्तमामूलतश्चैव तेनामूर्तेन वै पुरा ।
द्रव्यमूर्तिरमूर्ता च गृहीता स्तम्बलक्षणा ॥ २८ ॥

अनुग्रहार्थं वर्णानां स्थित्यर्थं दिक्क्रमस्य च ।
अधोर्ध्वाभ्यां विभागार्थं सिद्ध्यै पुनरेव हि ॥ २९ ॥

तात्वस्य विश्वपीठस्य जडत्वविनिवृत्तये ।
सम्यक् सवित्तिलाभार्थं तत्वाना भिन्नरूपिणाम् ॥३०॥

युक्ति. परिगृहीता च चातुरात्म्यैकलक्षणा ।
एकस्याच्युतबीजस्य भिन्नेषु प्रतिवस्तुषु ॥ ३१ ॥

संस्था स्थितिरच्छिन्ना सा "प्रतिष्ठान्त" एव हि ।
ज्ञानस्तम्बाविभक्तानामेतेषा चतुरात्मनाम् ॥ ३२ ॥

चतुर्दिग्वीक्षमाणाना स्थापना या समीरिता ।
एकदिग्वीक्षिताना च स्थापिताना च पङ्क्तित ॥३३॥

सा च "प्रतिष्ठा" विज्ञेया पूर्ववद्द्विजसत्तम ! ।
भिन्नाना व्यूहमूर्तीना केशवाद्यखिलस्य च ॥ ३४ ॥

प्रादुर्भावसमूहस्य ह्यादिकस्य च यद्द्विज ! ।
एकस्मिन् विश्वपीठे तु स्थितिरेकस्य चेच्छया ॥ ३५ ॥

प्रतिष्ठाख्यं "विशेषं तु स्थापनं" समुदाहृतम् ।
चिच्छक्तेरनुविद्धं च अव्यक्त तत्वविग्रहम् ॥ ३६ ॥

दिव्यमूर्तौ चलाख्ये तु नित्यमेकात्मताधिया ।
बिम्बसंस्कारकाले तु अधिवासाभिधे द्विज ! ॥ ३७ ॥

अचलत्वेन सन्मन्त्रैश्चलभावेन वा पुन. ।
साङ्ग सलाञ्छन-चैव कामाद्याभिमतात्तु वै ॥ ३८ ॥

आराधनार्थं हृदयान्न्यस्तं तद्धृदये पुनः ।
समाहरेत् कृतार्थत्वान्नित्य कालान्तरेण वा ॥ ३९ ॥

सुबोधपरिणामेन सत्वेनाऽऽनिर्मलेन च ।
कालसत्ता इयत्ताख्या परिच्छेदवशात् स्मृता ॥४०॥

तमा "स्थापनसंस्थ च विशेष" समुदीरितम् ।
सपन्ने ब्रह्मपाषाणसस्कारे पैठिकेऽपि च ॥ ४१ ॥

उद्वर्तनाभ्यञ्जनेन मृद्वृतीर्गोमयादिना ।
शिल्पिदोषोपशमने स्नानमात्रे कृते सति ॥ ४२

निष्पन्ने नेत्रदाने तु स्नाने सपादिते परे ।
उत्थाप्य मूर्तिपाद्यैस्तु गुरुणा बहुभिर्बलात् ॥ ४३ ॥

निवेशनममन्त्र यद्विधिवत् साम्प्रत कृतम् ।
तृतीयं वज्रलेपेन नित्यमेकात्मता द्विज ! ॥ ४४ ॥

प्राप्ते लग्नोदये मन्त्रन्यासमाचरणात्तु वै ।
चिच्छक्तरनुसन्धानात् तत् "स्थितस्थापन" तथा ॥

प्रासादान्तरभित्तीना लिखितं वाम्बरादिके ।
सिद्ध्यर्थं साधकेन्द्रैस्तु सिद्धिकालावधि तु वै ॥ ४६ ॥

चलबिम्बस्य यन्मन्त्रन्यासं वै सासनस्य च ।
नित्यमाराधनार्थं तु कर्मार्चायामपि द्विज ! ॥ ४७ ॥

तदपि प्रचलाख्यं तु स्थितस्थापनमेव च ।
क्ष्माभङ्गैर्जलपूर्वैस्तु दोषैर्या चातिदूषिता ॥ ४८ ॥

उद्धृत्य योजितान्यत्र स्थाने तु शुभलक्षणे ।
सम्यक् सस्थापनाद्ध्य. "संस्थापन" मुदाहृतम् ॥

विद्युत्प्रपातपूर्वैस्तु दोषैर्या चातिदूषिता ।
तदुत्थाने कृते शश्वन्निर्दोषे चासने सति ॥ ५० ॥

तत्समा लक्षणाढ्या च प्रतिमाद्या महामते ! ।
अन्यस्मिन् वा नवे पीठे विधिवत् परियोजिता ॥ ५१ ॥

बोद्धव्यं तद्विशेषं च "स्थापनोत्थापनं" तु वै ।
आदिमूर्त्यादिभेदेन चलाचलविभागत ॥ ५२ ॥

प्रतिष्ठादिविशेषास्तु अष्टधा परिकीर्तिता ।
आदिमूर्त्यादिमूर्तीना भोगपर्यङ्कशायिनाम् ॥ ५३ ॥

या तु पीठे मुनिश्रेष्ठ ! विधिवत् परियोजना ।
" संस्थापना " च विज्ञेया, तथा " चाऽऽस्थापना "

आसीनानां स्थितानां तु स्थापना समुदीरिता ।[भवेत्]॥
" प्रस्थापना " सुपर्णस्थमूर्तीनां परिकीर्तिता ॥ ५५ ॥

शयनादिविभेदेन चतुर्धा परिकीर्तिता ।
भूयश्च द्विविध विद्धि बेरैकत्वबहुत्वत. ॥ ५६ ॥

शिलया मणिना वापि लोहैर्वापि कृता तु या ।
नित्यादिसकलस्नानविषया, रहिता सदा ॥ ५७ ॥

कर्मार्चयापि देवीभि स्थिताभ्यासीनता गता ।
स्थाप्यते केवला मूर्ति " एकबेर " तु विद्धि तत् ॥

बृहारुज तु यद्बिम्ब कर्मार्चादिसमन्वितम् ।
नित्यादिसर्वस्नानार्थं शक्तिभि. सहितं न वा ॥ ५९ ॥

मणिवज्रादिशैलोत्थ निमित्तस्नपनक्षमम् ।
सदा तु नित्यस्नानार्थं कर्मार्चासहित तु यत् ॥ ६० ॥

बृहद्बिम्बं तु लक्ष्म्यादिसहित रहितं तु वा ।
नित्यनैमित्तिकाद्युक्तसकलस्नपनक्षमम् ॥ ६१ ॥

लक्ष्म्यादिभिः समोपेत यद्बिम्बं शक्तिभि सदा ।
तदेतत्त्रिविध विद्धि " बहुबेरं " महामते ! ॥ ३२ ॥

यत्तु चित्रमय बिम्ब भित्तिकाष्ठाम्बराश्रयम् ।
कर्मबिम्बसमोपेत नित्यादिस्नानकर्मणि ॥ ६३ ॥

यच्चापि मृण्मय बिम्बं त्रिविध चापि चित्रजम् ।
नित्यनैमित्तिकस्नाने दर्पणादिसमन्वितम् ॥ ६४ ॥

कर्मबिम्बान्वये योग्यं विभवेच्छानुसारत. ।
एतच्चतुर्विध विद्धि " बहुबेरविशेषकम् " ॥ ६५ ॥

बहुबेरं यथायोग स्थितमासीनमेव वा ।
शयान यानग वापि भवेदिच्छानुरूपत. ॥ ६६ ॥

बहुबेरादिभेदास्तु पञ्चधा परिकीर्तिता. ।
अन्यानि कर्मबिम्बानि यात्राबिम्बपुरस्सरम् ॥ ६७ ॥

तत्तत्कर्मविशेषार्थं बहुबेरैकबेरयो. ।
द्वयोश्च कल्पनीयानि विभवस्यानुरूपत. ॥ ६८ ॥

साधार सर्वमूर्तीनां प्रति (अधि)ष्ठानक्रम शृणु ।
यथोक्तलक्षणोपेत प्रासाद बिम्बसंयुतम् ॥ ६९ ॥

यथाभिमतदिग्वक्त्र निश्चयीकृत्य वै पुरा ।
भूभागे सति वै कुर्यात्तदग्रे यागमण्डपम् ॥ ७० ॥

दिक्त्रये तदभावात्तु तदभावाद्विदिक्षु वा ।
यथाभिमतदेशेषु सौम्ययाम्यादिगायतम् ॥ ७१ ॥

आनुगुण्य, ऽऽयशुद्ध च शुभं निर्बाधमुच्छ्रितम् ।
त्रिपञ्चाशत्करायाम षोडशाङ्गुलसंमितम् ॥ ७२ ॥

द्विसप्तकरविस्तारं विभवेच्छानुसारतः ।
हस्तद्वादशविस्तीर्ण षट्चत्वारिंशदायतम् ॥ ७३ ॥

द्विचतुष्काङ्गुलैर्युक्तमष्टत्रिंशत्करायतम् ।
विस्तृत दशभिर्हस्तैरथवा द्विजसत्तम ! ॥ ७४ ॥

चतुस्त्रिंशत्करं सार्धमायामं नवविस्तृतम् ।
द्विरष्टाङ्गुलसयुक्तं त्रिंशत्करसमायतम् ॥ ७५ ॥

विस्तृतं चाष्टभिर्हस्तैरेवं पञ्चविध भवेत् ।
सप्तषट्पञ्चहस्त च तथा सार्ध चतुष्करम् ॥ ७६ ॥

चतुर्हस्त भवेत् पीठ क्रमान्मण्डपपञ्चके ।
मण्डपे मण्डपे कुर्यात् पार्थिव पीठपञ्चकम् ॥ ७७ ॥

स्वविस्तृते. षडंशेन सर्वेषा परिवर्ज्य च ।
अन्तरालानि विप्रेन्द्र ! तदुच्छ्रायमथाचरेत् ॥ ७८ ॥

चतुर्विंशतिमांशेन स्वेन स्वेन महामते ! ।
शिष्टं च परितो वीथिः स्यादेषां पीठकल्पना ॥ ७९ ॥

तद्विस्तारोच्छ्रितास्तम्भान् स्थापयेत् कोणदेशत. ।
तन्मानेन समारोप्या. स्तम्भाना शिरसोपरि ॥ ८० ॥

रचनारहिताश्चान्ये दण्डास्तिर्यक्प्रसारिता ।
सर्वं स्थलागणं ब्रह्मन् ! चतुर्दिक्तोरणान्वितम् ॥८१॥

पीठात् तृतीयभागेन विस्तृत तोरण भवेत् ।
विस्तारात् त्रिगुणेनैव सर्वेषामुन्नतिः स्मृता ॥ ८२ ॥

सचक्रगरुडा. सर्वे त्रिचतुःपञ्चसख्यया ।
स्वान्तरालप्रमाणेन सस्तम्भास्तोरणाखिला. ॥ ८३ ॥

विनिवेश्या. क्षितौ खात्वा सर्वे चैव सुलक्षणा. ।
चतुरश्रास्त्वधोभागे त्वष्टाश्रा मध्यभागतः ॥ ८४ ॥

वर्तुलाश्चोर्ध्वभागाश्च समाशेन विभाजिता ।
कृत्वैव भगवद्यागमण्डप सर्वकर्मणाम् ॥ ८५ ॥

उदग्दिक्पीठतश्चोर्ध्वे धिष्ण्य कुर्यात् कजाङ्कितम् ।
वर्तुलं चतुरश्र तु प्रकाशाख्यं सुलक्षणम् ॥ ८६ ॥

शङ्खचक्रगदापद्मैरङ्कितं मेखलावनौ ।
द्रव्याणामधिवासार्थं तत्समीपस्थित तु यत् ॥ ८७ ॥

मध्यमे मण्डलं पीठे मन्त्रास्त्रकलशार्चनम् ।
चतुर्थ स्नानकुम्भाना सोपधीना निवेशने ॥ ८८ ॥

तस्मिन्नन्यत्र शयनं, पञ्चमं स्नपनासनम् ।
भद्रपीठसमायुक्त स्नानद्रव्यसमन्वितम् ॥ ८९ ॥

पूरितं वालुकाभिश्च कर्तव्यं तु द्विजाऽथवा ।
सद्वारं सगवाक्षं च सकवाटं हि सार्गलम् ॥ ९० ॥

कृत्वैवमधिवासार्थं प्राकारं सालय महत् ।
प्रासादक्षेत्रमानं तु सन्त्यज्य परितस्तत ॥ ९१ ॥

समेखलं सपीठ तु दिक्षु कुण्डाष्टकं लिखेत् ।
अनुकल्पे तु वा कुर्यात् प्राच्या दिङ्मण्डपाद्बहि ॥९२॥

तत्पाश्चात्ये तु वा भागे सपीठा सहतोरणा. ।
सस्तंभा वा पृथक्पीठा विविक्ताश्च परस्परम् ॥९३॥

चातुरात्म्यादिदेवाना ब्रह्मन्! स्थापनकर्मणि ।
संस्थिति शृणु कुण्डाना विविधा दिग्विदिक्षु च ॥

महाविभवसौभाग्य आयुरारोग्यवृद्धये ।
सिद्धये सर्वकर्माणा (!) विघ्नाना विनिवृत्तये ॥ ९५ ॥

व्यत्ययादफलं विद्धि मुक्तये समतानघ ! ।
गदाद्वन्द्वद्वयोपेतं प्राग्दिक्तुर्याश्रमेव वा ॥ ९६ ॥

चक्रं दक्षिणदिग्विप्र ! शङ्खं प्रत्यक्प्रदेशत. ।
पद्ममुत्तरदिग्भागे यथाभिमतपल्लवम् ॥ ९७ ॥

आग्नेय्या तु समापाद्य कुण्डमश्वत्थपत्रवत् ।
विमुक्तकमलं कुर्यात् त्रिकोणं पूर्ववत्तत. ॥ ९८ ॥

होमार्थं या तु दिक्कुण्डमष्टाश्रं वायवे पदे ।
धिष्ण्यं श्रीवत्ससंज्ञ तत्, अर्धेन्दुसदृशाकृति ॥ ९९ ॥

एशान्या तु समालिख्य लक्षणेनोपलक्षितम् ।
अतोऽपर सन्निवेशमेकाग्रमवधारय ॥ १०० ॥

धिष्ण्यं पूर्वपदे वृत्तमाग्नेय्या कौस्तुभाकृति ।
चक्र दक्षिणदिग्भागे शार्ङ्गाकार तु यातुदिक् ॥

आप्या गदाकृति प्राग्वन्मालाख्यं वायवे पदे ।
उदग्दिक्कमलाकार श्रीवत्साकारमीशदिक् ॥ १०२ ॥

विस्तारं शम (य) मान तु सर्वेषा विहितं तु वै ।
द्वादशाशं परित्यज्य ओष्ठार्थं च ततो वहि. ॥ १०३ ॥

सुसमं मेखलाबन्ध कुर्यात् तद्विस्तृते. समम् ।
शम(य ?)द्वयं भवेत् सर्व यथा मेखलया सह ॥ १०४ ॥

मध्यदेशे तु वृत्तं च तुर्याश्र वा सुलक्षणम् ।
प्रासादक्षेत्रभूमेर्वे तमेवैशपदे वहि ॥ १०५ ॥

संपाद्यमानं युक्त वा तर्पणे सर्वकर्मणाम् ।
वास्त्वङ्गविबुधानां च लोकेशाना महामते ! ॥ १०६ ॥

विघ्नेशद्वारपालानां क्षेत्रेशस्य तथा क्षिते. ।
कृत्वैव भूपयेत् प्राग्वत् सकुण्ड यागमण्डपम् ॥१०७॥

चतुरश्रं चतुर्द्वारं दर्भमालान्तरीकृतम् ।
अन्यत्र तदलाभे तु यथाभिमतदिङ्मुखम् ॥ १०८ ॥

चतुर्दशकराच्चैव यावत्त्रिंशत्करावधि ।
षट्करान्तं पुनस्तस्माद्विम्बमानव्यपेक्षया ॥ १०९ ॥

कार्या मध्ये स्थला तेषा द्विसप्तांशैस्ततोऽष्टभि. ।
समन्तभद्रा सुश्लक्ष्णा चिता पक्वेष्टकादिभि. ॥

तालोन्नतै. समारभ्य सामान्येऽस्मिन् हि कर्मणि ।
उन्नताङ्गुलवृद्ध्या तु, नीचा तद्ध्रासतः क्रमात् ॥

द्वित्रिरष्टाशकैर्मध्ये सर्वासा मण्डल भवेत् ।
चतुरश्रं चतुर्द्वारं चक्राम्बुरुहभूषितम् ॥ ॥ ११२ ॥

दक्षिणे शयन, सौम्ये कुण्डं, अग्नेस्तु पूर्ववत् ।
समेखलं द्विहस्तं च चक्रपद्माङ्कितं शुभम् ॥ ११३ ॥

तदधश्चतुरश्र प्राक् गदामेखलिकान्वितम् ।
तथा दक्षिणदिग्भागे कुर्याद्वै चक्रचिह्नितम् ॥ ११४ ॥

वर्तुलं पश्चिमे सौम्ये कमलाङ्कं मनोहरम् ।
शङ्खाङ्क सर्वकोणेषु मानमेषा यथोर्ध्वगे ॥ ११५ ॥

सर्वे दशान्तहस्ताना चतुर्णामेकमेखला ।
मण्डपानां तु किन्त्वत्र ऊर्ध्वग सर्वमेखलम् ॥ ११६ ॥

ततोऽध. संस्थिता सर्वे एककुण्डास्तु मण्डपा. ।
तेषां समेखल चाद्ये द्वाविंशत्यङ्गुल भवेत् ॥ ११७ ॥

ह्रासादङ्गुलयुग्मस्य यावद्वै षोडशाङ्गुलम् ।
स्यात् षट्करे गृहे कुण्डं कुर्याद्वै वा मेखलाधिका ॥

अष्टहस्तोच्छ्रितं पूर्व ततोर्धकरवर्धितम् ।
त्रयोदशकरादीनां चतुर्णा ह्रासयेत् तत ॥ ११९ ॥

अष्टक त्वङ्गुलानां तु सप्तपञ्चचतु क्रमात् ।
न ह्रास. षट्करान्तानां न्यूनानामुच्छ्रितेर्भवेत् ॥

एवं स्नानगृहाणां तु विस्तारश्चोन्नतै सह ।
किन्तु वै वालुकापीठैर्मध्यतश्चोपशोभित. ॥ १२१ ॥

द्विचतुर्भिर्द्विहस्ताशैर्विस्तृता. प्राग्वदुन्नता ।
स्नानीया अग्रगेहाद्वा दिक्कूयेऽभिमते शुभे ॥ १२२ ॥

अर्धमानसम मुख्यात् सुपीठं शयनान्वितम् ।
दग्दानभवन कुर्यान्मङ्गल्यकलशैः सह ॥ १२३ ॥

सर्वेषां कर्मभूभागं कोणस्तम्भैर्विभूषितम् ।
सुनेत्रैर्वेष्टितं कुर्याच्चक्राद्यै. पूर्ववद्युतम् ॥ १२४ ॥

सुस्थिर दृढपाद च स्नानाम्भोग्रहणक्षमम् ।
अर्धेन वालुकापीठाद्दीर्घमाद्यक्रमेण तु ॥ १२५ ॥

वर्धितं चार्धहस्तेन ह्रासितं चतुरङ्गुलै. ।
स्वदैर्घ्यादर्धविस्तीर्ण कृत्वैवं सप्रणालकम् ॥ १२६ ॥

तेन तद्वालुकापीठं भूषयेन्मध्यगेन तु ।
यागागारस्य वै दिक्षु द्वारार्थं तत्र चान्तरे ॥ १२७ ॥

शमार्ध वृद्धियोगेन ह्रासोऽन्यत्र कलादिकः ।
तोरणानि वहिः कुर्याद्दृढैः काष्ठै. सुपूजितै. ॥१२८॥

पञ्चहस्तानि चार्धेन वर्धितानि करेण तु ।
न ह्रासमाचरेत्तेषामन्यत्र करणे सति ॥ १२९ ॥

दशमात् पञ्चहस्तानामृते भूमौ प्रवेशयेत् ।
शमार्ध वर्धिताना च द्वे द्वे संवर्धयेत् कले ॥ १३० ॥

दैर्घ्यात् प्रवेशशिष्टात्तु त्रिभागेन तदन्तरम् ।
सर्व चक्रध्वजं कार्य वस्त्रस्रङ्मञ्जरीयुतम् ॥ १३१ ॥

सुधाद्यैर्वर्णके पीतैश्चन्दनाद्यैस्तु लेपितम् ।
भिन्नाङ्गमेतदखिल यथैकस्मिन् हि युज्यते ॥ १३२ ॥

कर्म, यागगृहे शश्वद्विभूतेर्वावनेर्विना ।
पञ्चतिशत्कर क्षेतं स्वतुर्यांशेन विस्तृतम् ॥ १३३ ॥

तन्मध्ये तु चतुर्हस्तं चाऽऽपाद्यं स्थलसप्तकम् ।
स्थलाना व्यवधानं तु कुर्याद्वै तालसमितम् ॥१३४॥

एकापायेन वै कुर्याद्विहस्तान्तस्थलाङ्गणम् ।
क्रमेणाष्टाङ्गुलान्मानाद्व्यङ्गुलं द्व्यङ्गुलं विना ॥

स्थलानां संकटाना च व्यवधानं द्विगोलकम् ।
एवमेव समुच्छ्राय. सर्वासां परिकीर्तित. ॥ १३६ ॥

परितो विहित वीथेर्मानमत्र स्वपीठजम् ।
एव वा सङ्कटे कुर्यादाद्योक्तान्मण्डपद्वयात् ॥ १३७ ॥

मध्ये मण्डलपीठं तु, तस्य दक्षिणदिग्भवेत् ।
समीपे शयनं, स्थानकुम्भानां स्थापनायनम् ॥ १३८ ॥

एवं हि वामनिकटे भोगाना मन्त्रतर्पणम् ।
ऋग्यजुः सामपूर्वाणां श्रुतीनां हवनं परे ॥ १३९ ॥

दग्दानशयनं स्थाने ह्यन्यस्मिन् शयने हितम् ।
व्यवसायार्थसम्पत्ती देशकालौ तु तज्ज्ञताम् ॥ १४० ॥

ज्ञात्वा समाचरेत् सर्व न न्यूनं नाधिकं तु वा ।
यद्युक्तमविरुद्धं च व्यापकं सम्प्रयोजनम् ॥ १४१ ॥

तत्तदभ्यूह्य सर्वत्र कुर्याल्लोभधिया विना ।
यतो यथोक्तं देवानां निष्पद्यति हि वा न वा ॥ १४२॥

अतो यथोक्तेन विना नावसीदति बुद्धिमान् ।
यथोक्तकरणे च्छिद्रपूरणं परमं स्मृतम् ॥ १४३ ॥

भावभक्तिसमेत च श्रद्धापूतं पुरोदितम्।
प्रासादस्याष्टदिग्व्योम मूर्तिपानां यथोदितम् ॥ १४४ ॥

स्थण्डिलेष्वथ कुण्डेषु, तादर्थ्येनाथवा स्वयम्।
स्वकुण्डे हवनं कुर्याच्चतुर्वेदमथोऽपरे ॥ १४५ ॥

समस्तं मूर्तिपीयं वा स्वयमेव समाचरेत्।
सामग्रीविरहाद्योग्यमूर्तिपानामभावत. ॥ १४६ ॥

एवं त्वभिनव कृत्वा यागार्थं मण्डपं द्विज!।
पूर्वोदितैरलङ्कारैरलकृत्य पृथग्विधै ॥ १४७ ॥

सितरक्तादिभेदेन प्रागादौ तु ध्वजाष्टकम्।
निवेश्य मध्ये वेद्यां तु पुनरन्ययवत्तथा ॥ १४८ ॥

यागमण्डपनिर्माणे भूयो विध्यन्तर शृणु।
प्राग्वा ह्युदग्वा प्रासादात् त्रिशद्धस्तैर्द्विजायतम् ॥

द्व्यधिकैर्मण्डप कुर्यादन्यद् द्वादशभि करै।
स्यात् तुर्यश्रायत मध्ये वेदीना तत्र पञ्चकम् ॥ १५० ॥

परित पञ्चहस्तं च हस्ते हस्तेऽन्रीकृतम्।
प्रदक्षिणगणोपेतं वितानाद्यैर्विभूषितम् ॥ १५१ ॥

वेद्यामुत्तरदिक्स्थायां कुर्यात् कुण्डं सलक्षणम्।
होमोपकरणं सर्व तत्रोपरि निवेश्य च ॥ १५२ ॥

ततोपरायां वेद्या तु नेत्रे उन्मीलयेद्द्विज!।
मण्डलं मध्यमायां तु वेद्यामन्येकपङ्कजम् ॥ १५३ ॥

प्रस्तार्य चित्रं शयनं चतुर्थ्यां मुनिसत्तम!।
स्नानकर्म ततः कुर्यात् पञ्चमायां तु दक्षिणे ॥ १५४ ॥

मण्डपस्य चतुर्दिक्षु कुर्यात् कुण्डचतुष्टयम्।
प्रासादस्यापि परितः कुर्यात् कुण्डचतुष्टयम् ॥ १५५ ॥

तदर्थान् सर्वसंभारान् संभृत्य सुसमाहित।
दिने कर्मदिनात् पूर्वे सप्तमे पञ्चमेऽपि वा ॥ १५६ ॥

अङ्कुरानर्पयित्वा तु ततः कर्म समारभेत्।
प्रधानदिवसात् पूर्वदिने देशिकसत्तम. ॥ १५७ ॥

स्नात शुक्लाम्बरः स्रग्वी कृतन्यास. सुशान्तधी.।
कृताह्निकोऽधिवासार्थं सर्वालङ्कारभूषित ॥ १५८ ॥

सर्वसाधनसंयुक्त त्वर्घ्यपाद्यसमन्वितम्।
मङ्गल्यकुम्भमादाय ध्यायमानोऽच्युत हृदि ॥ १५९ ॥

सह चैकायनैर्विप्रै सदागमपरायणै।
तथा ऋङ्मयपूर्वैस्तु आमूलाङ्गवन्मयै. ॥ १६० ॥

भेरीपटहवादित्रशङ्खशब्दादिकै सह।
ऋग्यजुस्सामपूर्वैश्च प्रशस्ता संपठन् श्रुती. ॥ १६१ ॥

द्वारपालार्चनं कृत्वा यागागारं प्रविश्य च।
सस्मृत्य स्वासने व्याप्तिमर्चयित्वोपविश्य च ॥ १६२ ॥

मध्यपीठसमीपे तु प्राङ्मुख. पश्चिमे पदे।
अग्रे मङ्गल्यकलशमाधारस्योपरि न्यसेत् ॥ १६३ ॥

विप्रान् ऋङ्मयपूर्वाश्च उपवेश्य च पूर्ववत्।
पूर्वोक्तस्त्वधिकैर्युक्तो द्रव्यैर्द्रव्यगण. शुभ ॥ १६४ ॥

यश्च यत्रोपयोग्यस्तु तत्र तं संप्रवेशयेत्।
मन्त्राणामुपदेष्टा चाप्यनुकूलो महामति ॥ १६५ ॥

योक्तव्य कर्मदक्षस्तु सर्वेष्ववसरेषु च।
दक्षिणे ह्यात्मनो विप्र! एकचित्त समाहित ॥ १६६ ॥

स्वय वस्त्वनुसन्धाय हवनार्चनकर्मणाम्।
आस्ते ह्युत्पत्तिपूर्वाणा न्यासान्तानामनन्यधी ॥

करशुद्ध्यादि सर्व तु चक्रादिन्यासपश्चिमम्।
सर्व क्रमेण कृत्वा तु पुण्याह वाचयेत् तत ॥ १६८ ॥

ओङ्काराद्य पवित्रान्तं मन्त्राणां प्राक्चतुष्टयम्।
पाठयेच्च सपुण्याह गायत्रीत्रितयान्वितम् ॥ १६९ ॥

ततश्चात्मानुवादं च आत्मव्यूह तथैव च।
विष्णुसूक्तं शाकुन च शिवसंकल्पमेव च ॥ १७० ॥

श्रीसूक्तं चापि शंसूक्त भद्रसूक्तं तथैव च।
अद्भिरित्यादिकं यच्च प्रीतिमन्त्रावसानकम् ॥ १७१ ॥

पुण्याहं स्वस्तिं ऋद्धि च सवाच्य सह मूर्तिपै.।
प्रोक्षयेच्छतधारेण "स्थानानी"त्यादिकेन च ॥

एवं सर्वेषु यागेषु भवेत् पुण्याहवाचनम्।
यागं पुरोक्तविधिना त्रिस्थानस्य क्रमाद्यजेत् ॥ १७३ ॥

भगवन्तं जगद्योनिं बिम्बमध्ये द्विजोत्तम ! ।
कुर्यात् सतोरणानां च ध्वजानां स्थापनं ततः ॥१७४॥

सत्यादिकं चतुष्कं तु, मध्ये वेद्या ध्वजाष्टकम् ।
प्रभवाप्यययोगेन यजेत् प्रागादियोगतः ॥ १७५ ॥

"उत देवा अवहिता" ऋङ्मयान् पाठयेत्ततः ।
प्रागादिदिक्चतुष्केषु तोरणानां चतुष्टये ॥ १७६ ॥

सुशोभनं सुभद्रं च सुगन्धं च यजेत् क्रमात् ।
सुहोत्रं च ततश्चक्रं विष्वगेश्वरसंयुतम् ॥ १७७ ॥

उपरिष्टान्मुनिश्रेष्ठ ! पूजयेत् प्रतितोरणम् ।
एतेषामथवा पूर्वं भवेद् द्वास्थैः सहार्चनम् ॥ १७८ ॥

पाठयेद्द्वारपालीयं साम सामविदस्तत ।
अथोर्ध्वपुष्पभृन्मूर्तिधरैर्यायात् सामवृतः ॥ १७९ ॥

यत्र तिष्ठति विश्वेशः पीठब्रह्मशिलान्वितः ।
तत्रावलोकनं तेषां कुर्यात् सन्ताडनादिकम् ॥ १८० ॥

चक्रास्त्रमन्त्रितैः स्नानकलशैः स्नपयेत्ततः ।
सिद्धार्थकैस्तथा पञ्चगव्यमृद्भूतिवारिणा ॥ १८१ ॥

वल्मीकमृज्जलेनाथ चक्राङ्कौषधिवारिणा ।
सक्षोद्याभ्यर्च्य चोद्वर्त्य क्षालयेदस्त्रवारिणा ॥ १८२ ॥

तमर्घ्येणार्चयित्वा च ततस्तन्मन्त्रितान् करे ।
सिद्धार्थकान् दक्षिणे तु बध्वाग्रे पाठयेदृचम् ॥ १८३ ॥

"रक्षोहणं" तथा सर्वान्नयेत् प्रतिसरे मणीन् ।
सर्वत्र वेष्टितं कृत्वा समारोप्य रथोत्तमे ॥ १८४ ॥

कर्मारम्भं च पठतः तस्य दक्षिणदिङ्न्यसेत् ।
ऋक्सामपूर्वान् वामे तु ब्राह्मणांश्च चतुश्चतुः ॥ १८५ ॥

पुरतोऽस्त्रं स्मरन् यायात् स्वयं विघ्नास्तु सूदयन् ।
सनृत्तगीतवादित्रस्तुतिमङ्गलपाठकैः ॥ १८६ ॥

इदं विष्णुर्विचक्रम इति ऋङ्मयैः सह पाठकैः ।
एकायनास्तदन्ते तु "ओं नमो ब्रह्मणे" तु यत् ॥१८७॥

तथैव शाकुनं सूक्तं श्रीसूक्तेन समन्वितम् ।
स्वर्णादिनार्थिनः शक्त्या तर्पयंस्तान्निवेशयेत् ॥

यागभूमिं ततो बिम्बमवरोप्य रथादिकात् ।
निषण्णं दृढकाष्ठोत्थतोरणे सन्निवेश्य च ॥ १८९ ॥

स्नानभूमौ ततः कुर्यादस्त्रेणाज्यतिलाहुतीः ।
यद्वा पूर्वं समानीय पीठं ब्रह्मशिलान्वितम् ॥ १९० ॥

भूमिष्ठे भद्रपीठे तु वेदिकायां निवेश्य च ।
ततो बिम्बं समानीय स्थापयेत् पिण्डिकोपरि ॥१९१॥

स्थाप्यमाने बृहद्बिम्बे विशेषं कथयते शृणु ।
पूर्ववत् कर्मशालायां संस्थाप्याकारशुद्धये ॥ १९२ ॥

सम्प्राप्य विधिना कृत्वा नयनोन्मीलनं ततः ।
स्नपनं बृहदापाद्य केवलं वा बहूदकैः ॥ १९३ ॥

स्नानकर्मशिलादीनामीषत् कृत्वा तु सार्चनम् ।
उत्थाप्य मूर्तिपाद्यैस्तु बहुभिस्तु रथस्थितम् ॥ १९४ ॥

समानीय ततो यत्नात् प्रासादाभ्यन्तरं तु वै ।
यथावद्रत्नविन्यासपूर्वं पीठे निवेश्य च ॥ १९५ ॥

बृहद्बिम्बं, ततः कुर्यात् कर्म बिम्बेऽखिलं तु वै ।
सन्निरोधस्तु मन्त्राणां तत्र लग्नोदये स्मृतः ॥ १९६ ॥

आबृहत्स्नपनात्पूर्वं यत्किञ्चदपि तत्र तत् ।
निर्वर्तनीयं पूर्णान्तं बुद्ध्यैव प्राङ्महामते ! ॥ १९७ ॥

तथा कार्यं शुभो येन मूहूर्तो नावसीदति ।
एवं हि चित्रपूर्वाणामग्येषां मुनि (द्विज) सत्तम ! ॥

सरत्नब्रह्मपाषाणवर्जितानां समापयेत् ।
स्नानाद्यं कर्मबिम्बे तु तत्समीपेऽथ दर्पणे ॥ १९९ ॥

कर्मबिम्बं विना तेषां प्रस्थापाद्यपि विष्टरे ।
कुर्यात् प्रवेशपूर्वं तु सर्वमुत्सवपश्चिमम् ॥ २०० ॥

शक्तिभिः कर्मबिम्बैश्च गरुडाद्यैर्यदा सह ।
समाचरेत् प्रतिष्ठानं मूलबिम्बेन वै सह ॥ २०१ ॥

तदानीं तानि बिम्बानि यागभूमौ प्रवेशयेत् ।
एवं प्रवेश्य तद्बिम्बं देशिकः सुसमाहितः ॥ २०२ ॥

मण्डलाग्रमथासाद्य तत्र बिम्बं निवेदयेत् ।
"भगवन् भूतभव्येश ! त्वय्येवाराधनाय च ॥ २०३ ॥

इदं बिम्बं करिष्यामि संस्कृत्य रजनीक्षये ।
एवं निवेद्य स्नानार्थं कलशान् स्थापयेत् पृथक् ॥

अथवा कर्मदिवसात् तृतीये वासरे पुरा ।
कर्मभूमेः समानीय ब्रह्म (बिम्ब) पीठशिलान्वितम् ॥

यागभूमौ तु संस्थाप्य कलशे मण्डलश्रितौ ।
वह्नौ च देवदेवेशमिष्ट्वा पूर्वोक्तवर्त्मना ॥ २०६ ॥

बिम्बादिसर्वद्रव्याणामधिवासं यथास्थितम् ।
कल्पयित्वा तु देवस्य कृत्वा बिम्बनिवेदनम् ॥ २०७ ॥

अपरेऽहनि संप्राप्ते स्नपनं प्रारभेद्गुरुः ।
यद्वा तृतीयदिवसे प्राग्वदिष्ट्वा क्रमेण तु ॥ २०८ ॥

बिम्बानस्थं जगन्नाथं कर्मशाला प्रविश्य च ।
प्राप्तेऽपराह्णसमये बिम्बमात्मशुद्धये ॥ २०९ ॥

संस्नाप्य विधिना पश्चाद्विशुद्धे तोयेऽधिवास्य च ।
अपरस्मिन् दिने प्राप्ते देशिकस्तु कृताह्निकः ॥ २१० ॥

जलादुत्थाप्य तद्बिम्बं यागभूमौ प्रवेशयेत् ।
मनक —

जलाधिवासनं कर्म यथावद्वदतांवर ! ॥ २११ ॥

श्रोतुकामस्य मे सम्यक् समाख्याहि सुविस्तरम् ।
शाण्डिल्य —

वक्ष्ये जलाधिवासीयं विधानमवधारय ! ॥ २१२ ॥

प्रासादस्य विशुद्ध्यर्थं बिम्बशुद्ध्यर्थमेव च ।
मानोन्मानप्रमाणानामूनाधिक्योपशान्तये ॥ २१३ ॥

जगदाप्यायनार्थं च सर्वसंपूर्णसिद्धये ।
प्रतिष्ठार्थक्रियारम्भात् पूर्वमेव शुभे दिने ॥ २१४ ॥

पञ्चगव्यादिना स्नानं पूजाहोमौ तथा जपम् ।
समाचरेत् स्वमन्त्रस्य यत्रैवं न कृतं पुरा ॥ २१५ ॥

हेतुना केनचित्तत्र जलवासं समाचरेत् ।
नदीषु दीर्घिकायां वा तटाके निर्झरे ह्रदे ॥ २१६ ॥

संभवे सति कुर्वीत जलवासं यथाविधि ।
असंभवे जलद्रोण्यां कटाहे धातुनिर्मिते ॥ २१७ ॥

यथासंभवमन्यस्मिन् पात्रे वा मृण्मयादिके ।
अल्पतोये श्मशानान्ते लवणोदपरिप्लुते ॥ २१८ ॥

कटुके च कषाये च तिक्ते फेनेश्च दूषिते ।
चैत्यवृक्षसमीपे च नीचावासससमीपके ॥ २१९ ॥

वर्णान्तरयुते स्वल्पे ऊषरे शैवलान्विते ।
एवमादिषु दुष्टेषु जलवासं न कारयेत् ॥ २२० ॥

एकत्रिपञ्चरात्रं वा जलमध्येऽधिवासयेत् ।
देशकालानुरूपेण सद्यो वा जलवासनम् ॥ २२१ ॥

प्रतिष्ठादिवसात् पूर्वं तृतीये पञ्चसप्तमे ।
दिनेऽपराह्णसमये कर्मशालां प्रविश्य च ॥ २२२ ॥

अस्त्रमन्त्रेण संप्रोक्ष्य बिम्बं संताडयेत्ततः ।
सिद्धार्थकैस्तिलैर्दीर्घरस्त्रमन्त्राभिमन्त्रितैः ॥ २२३ ॥

संस्नाप्याकारशुद्ध्यर्थं षड्भिः सिद्धार्थकादिकैः ।
वस्त्राभरणपुष्पाद्यैरलंकृत्य च भूषणैः ॥ २२४ ॥

पूर्ववत् कौतुकं बद्ध्वा समारोप्य रथादिके ।
पूर्ववच्छ्रुतिघोषैश्च शङ्खभेर्यादिकैः सह ॥ २२५ ॥

विविधैर्नृत्तगेयैश्च तथान्यैर्मङ्गलैः सह ।
ग्रामं वा नगरं वापि प्रासादं च प्रदक्षिणम् ॥ २२६ ॥

भ्रामयित्वा जलोद्देशमानयेन्मूर्तिभिः सह ।
प्रपायां तु जलाभ्यर्णे अवरोप्य रथादिकात् ॥ २२७ ॥

विष्टरे विनिवेश्याथ प्राङ्मुखं वाप्युदङ्मुखम् ।
मण्डपे जलमग्नं तु वातवृष्टिक्षमं शुभम् ॥ २२८ ॥

चतुःस्तम्भसमायुक्तं चतुस्तोरणभूषितम् ।
वितानध्वजसंयुक्तं वेष्टितं दर्भमालया ॥ २२९ ॥

विचित्रैश्च फलैर्युक्तं द्रुमाद्यैः पावनैस्तथा ।
मुक्तादामसमायुक्तं स्रग्दामभिरलंकृतम् ॥ २३० ॥

कोणप्रदीपसंयुक्तं चामरैरुपशोभितम् ।
पुरैव कारयित्वा तु कुर्यात् पुण्याहघोषणम् ॥ २३१ ॥

प्राग्वच्छुद्धिमपां कृत्वा तन्मध्ये विन्यसेत्ततः ।
प्रतिमानुगुणं भद्रपीठमास्तरणान्वितम् ॥ २३२ ॥

सोपधानं तदूर्ध्वे तु कल्पयेन्मान्त्रमासनम् ।
अनन्तं कल्पयित्वोर्ध्वे अर्घ्यगन्धादिनार्चयेत् ॥ २३३ ॥

द्विपटकार्णेन बिम्बस्य अर्घ्यं पाद्यं तथैव च ।
आचामं वासितं गन्धमुपवीतोत्तरीयके ॥ २३४ ॥

भूषणानि च माल्यानि दीपं धूपं यथाक्रमम् ।
दत्वा कृत्वा घृतारोपं सस्मरेत् संहृतिक्रमम् ॥ २३५ ॥

संहारस्य क्रमं वक्ष्ये समाकर्णय साम्प्रतम् ।
आत्मानं सर्वगं ध्यात्वा सर्वज्ञं विष्णुमव्ययम् ॥ २३६ ॥

कुर्याद्भावान्वितो विष्णोरधिवासनमुत्तमम् ।
प्रणवेन समारोप्य जीवमर्चाभिमानिनम् ॥ २३७ ॥

उत्क्रम्यात्मैकतां कृत्वा स्वस्मिन् सर्वेश्वरे हरौ ।
संशोष्य मरुता पृथ्वीं दग्ध्वा बीजान्वितानिना ॥

अद्भिः संप्लाव्य तां वायुशुष्कां वह्नौ विलाप्य च ।
संहृत्य वायुना वह्निं वायुमाकाशतां नयेत् ॥ २३९ ॥

आध्यात्मिकाधिदैवैस्तु करणैर्विषयैः सह ।
तन्मात्रासंस्थितान्येवं क्रमात् संहृत्य देशिकः ॥२४०॥

नभो मनसि संहृत्य मनोऽहङ्कृतिं ततः पुनः ।
महत्यात्मनि तं चापि नयेदव्याकृतैकताम् ॥ २४१ ॥

शान्तानन्ते परे व्योम्नि निष्कले ज्ञानविग्रहे ।
तं ध्यायेत् परमानन्दे संस्थितं शान्तविग्रहम् ॥२४२॥

यस्मिन्नव्याकृतं लीनं स्वस्थं यत् स्वस्वरूपकम् ।
वासुदेवोऽपि विज्ञेयः सर्वात्मा सर्वकृत् प्रभुः ॥२४३॥

तस्मिन्नेव तु संहृत्य पृथिव्यादीनि देशिकः ।
एवं ध्यात्वा यथान्यायं बिम्बं वस्त्रेण वेष्टयेत् ॥ २४४ ॥

स्थगयित्वाशुकैर्दिव्यैर्दर्भैः सर्वैः स्रगादिभिः ।
आचार्यो मूर्तिपैर्मन्त्रान् व्यापकाश्चतुरोपि च ॥ २४५ ॥

पठद्भिः शाकुनं सूक्तं तथा चान्यैस्त्रयीमयैः ।
आम्नायोद्घोषणपरैः सार्धमादाय तीरतः ॥ २४६ ॥

तद्बिम्बं जलमध्ये तु पीठोर्ध्वे शाययेत् स्वयम् ।
अम्भस्येति च मन्त्रेण प्राङ्मूर्धानमुदङ्मुखम् ॥२४७॥

दुन्दुभीर्विविधाकारा नादयित्वा दिशो दश ।
जयशब्दैश्च गीताद्यैः सपुण्याहपुरस्सरम् ॥ २४८ ॥

आत्मन्यासं क्रमात् कृत्वा दिशोऽस्त्रेणावबन्धयात् ।
अवलोक्य च नेत्रेण कवचेनावकुण्ठयेत् ॥ २४९ ॥

लोकपालान् बहिर्ध्यात्वा स्थानादस्मात् समन्ततः ।
तीरदेशमथ प्राप्य कुम्भं सूत्रेण वेष्टयेत् ॥ २५० ॥

वेष्टितं नववस्त्राभ्यां सापिधानं सपल्लवम् ।
संस्थाप्य तद्दक्षिणतः करकं च तथैव हि ॥ २५१ ॥

इन्द्रादीशानपर्यन्तं कलशान् परितो न्यसेत् ।
सवस्त्रान् सापिधानांश्च सहिरण्यान् सकूर्चकान् ॥

कुम्भे विशाखयूपं तु करके च सुदर्शनम् ।
आवाह्यार्घ्यादिनाभ्यर्च्य इन्द्रादीन् कलशाष्टके ॥२५३॥

बिम्बस्य शिरसोद्देशे कुम्भं च करकं न्यसेत् ।
अर्चितं परितश्चाष्टौ कलशान् विन्यसेत् क्रमात् ॥

कोणेषु पालिका न्यस्त्वा (!) अनिर्वाणेश्च दीपकैः ।
दर्शयेच्चक्रमुद्रां च रक्षामुद्रां तथैव च ॥ २५५ ॥

अत ऊर्ध्वं न वै कुर्याद्ग्राम्यधर्मं तु तज्जले ।
दारुलोहशिलोत्थानां बिम्बानां जलवासनम् ॥ २५६ ॥

साक्षाद्भवेत्तदन्यत्र भवेच्छायाधिवासनम् ।
विधानं तत्र वक्ष्यामि यथा तदवधारय ॥ २५७ ॥

स्नानमाकारशुद्ध्यर्थं दर्पणे तु समाचरेत् ।
अन्यच्च सकलं विप्र ! प्राग्वद्बिम्बे समाचरेत् ॥ २५८ ॥

अग्रतो देवबिम्बस्य छायाधिवसनार्थतः ।
जलद्रोणीं कटाहं वा स्थापयेल्लोहनिर्मितम् ॥ २५९ ॥

मृण्मयं दारुजं वापि भाजनं धान्यसञ्चये ॥
पूरयेद्गन्धतोयेन शुद्धस्फटिकवर्चसा ॥ २६० ॥

पूर्ववद्विष्टरं कृत्वा दर्भमञ्जरिजं शुभम् ।
अष्टाविंशतिदर्भोत्थं कूर्चं कृत्वा द्विजोत्तम ! ॥ २६१ ॥

देशिकेन्द्रो विधानेन तत्रावाह्य जगद्गुरुम् ।
अर्घ्यगन्धादिनाभ्यर्च्य स्मृत्वा वै संहृतिक्रमम् ॥२६२॥

विष्टरं जलमध्ये तु प्राङ्मूर्धानं तु शाययेत् ।
चक्रमुद्रां प्रदर्श्याथ कुम्भादीन् पूर्ववन्न्यसेत् ॥ २६३ ॥

शक्तीनामपि विप्रेन्द्र ! पूर्ववद्विष्टरं भवेत् ।
अथवा तु त्रिभिर्दर्भैः कूर्चं कुर्याद्विधानतः ॥ २६४ ॥

छायाधिवासमात्रं तु तासामपि पृथक् पृथक् ।
सर्वाङ्गं नववस्त्रेण प्रतिमायाः समन्ततः ॥ २६५ ॥

छादयित्वा समन्ताच्च सिद्धार्थान् विकिरेत् क्षितौ ।
रक्षोघ्नेति मन्त्रेण रक्षां कुर्यात् समन्ततः ॥ २६६ ॥

अनुक्तमत्र यत् किञ्चित् प्राग्वत्तत् सर्वमाचरेत् ।
मृण्मये भित्तिसंस्थे च बिम्बे छायाधिवासनम् ॥२६७॥

अन्तः प्रविश्य प्रासादे देशिकेन्द्रः समाचरेत् ।
अन्येषां यागगेहस्य प्राग्वत् कृत्वा तु मण्डपम् ॥२६८॥

कुटीं वा तत्र कुर्वीत छायाधिवसनं गुरुः ।
दारुलोहशिलोत्थानां बिम्बानां विषये तदा ॥ २६९ ॥

जलद्रोण्यादिके पात्रे तोयाधिवसनं चरेत् ।
तदापि जलवासं तु आचरेन्मण्डपान्तरे ॥ २७० ॥

यद्वा स्नानार्थकं क्लृप्तमण्डपे वा समाचरेत् ।
अथवा यागसदने स्नानभूमौ तु तद्भवेत् ॥ २७१ ॥

एवं जलाधिवासं तु कृत्वा वै देशिकोत्तमः ।
उपयोग्यं प्रतिष्ठायां यद्यद्द्रव्यमुपार्जितम् ॥ २७२ ॥

तत् सर्वं समुपाहृत्य प्रासादं शोधयेत्ततः ।
मार्जनालेपनाद्यैश्च ततो यागनिकेतने ॥ २७३ ॥

अकृतं यदलङ्कारं कारयेत् सकलं तु तत् ।
नास्तिकान् भिन्नमर्यादान् देवब्राह्मणनिन्दकान् ॥

पापरोगयुतानन्यान् निन्दितान् पिशुनास्तथा ।
पाषण्डिनो हीनवृत्तीन् प्रतिलोमान् समत्सरान् ॥

लुब्धान् मूर्खानविदुषो बलाद्विर्वासयेत्तत ।
कर्माहाद्वासरे विप्र ! अपराह्णे गुरुः स्वयम् ॥ २७६ ॥

जलाधिवासदेशं तु सम्प्राप्य सह मूर्तिपैः ।
उत्थाप्य बिम्बमुदकात् कुम्भं च कलशानपि ॥ २७७ ॥

उद्वास्य देवतास्तत्स्थास्तद्बिम्बं तीरविष्टरे ।
प्राङ्मुखं समवस्थाप्य वारिभिः क्षालयेत्तत ॥ २७८ ॥

लोहजं चेद्विशुद्ध्यर्थं तिन्त्रिणीफलवारिणा ।
प्राग्वत् सृष्टिक्रमं कृत्वा विधानेन महामते ! ॥ २७९ ॥

वस्त्राभरणपुष्पाद्यैरलङ्कृत्य मनोहरैः ।
यानमारोप्य तद्बिम्बं शङ्खभेर्यादिसंयुतम् ॥ २८० ॥

ग्रामं प्रदक्षिणीकृत्य ह्यालयं वा समानयेत् ।
यागगेहं तु यानादेरवरोप्य निवेशयेत् ॥ २८१ ॥

स्थाने पूर्वोदिते पश्चादारभेत् स्नपनं गुरुः ।
लेप्यादौ संप्रविश्याथ प्रासादं मूर्तिपैः सह ॥ २८२ ॥

प्राक् चाधिवासितं कूर्चं जलात्तस्मात् समुद्धरेत् ।
बिम्बाच्च वस्त्राभरणमाद्यान्यपनयेत् ततः ॥ २८३ ॥

पीठे तु स्नानकुम्भानां स्थापनार्थं तु कल्पिते ।
पूर्वोदितं स्थूलपरं स्नपनं स्थापयेद्द्विज ! ॥ २८४ ॥

पूर्वादिपश्चिमाशान्तं पृथक् स्नपनमण्डपम् ।
विहितं यत्र, तत्रैव देवदेवस्य वामतः ॥ २८५ ॥

यातुधानपदं यावदग्निकोणादितो न्यसेत् ।
स्नपनं स्थूलपराख्यं, स्थूलसूक्ष्मं तु पृष्ठतः ॥ २८६ ॥

ईशकोणात् समारभ्य यावदाग्नेयगोचरम् ।
देवस्य दक्षिणे पार्श्वे ईशानाद्वायुपश्चिमम् ॥ २८७ ॥

स्थूलस्थूलाभिधं स्नानं स्थापयेत् क्रमयोगतः ।
अधिवासदिने कुर्यात् स्नानं स्थूलपराभिधम् ॥२८८॥

प्रतिष्ठादिवसे कुर्यात् स्नपनं स्थूलसूक्ष्मकम् ।
चतुर्थे दिवसे स्नपनं स्थूलस्थूलाभिधं भवेत् ॥ २८९ ॥

तदा तत्तद्दिने तत्तत् स्नपनं स्नापयेद्गुरुः ।
एवं हि स्नानकलशान् क्रमात् संस्थाप्य पूर्ववत् ॥

तदर्पणावसानेऽथ शयनं कल्पयेद्द्विधा ।
नयनोन्मीलनार्थं तु शयनं कल्पयेत् पुरा ॥ २९१ ॥

द्वादशाक्षरमन्त्रेण पीठं संप्रोक्षयेत्तत ।
प्रागग्रानुदगग्रान् वा दर्भानास्तीर्य पुष्कलान् ॥२९२॥

पञ्चभारमितान् शालीनथवा चार्धसमितान् ।
वृत्त वा चतुरश्रं वा कम्बलानुपरि न्यसेत् ॥ २९३ ॥

उपधानानि चित्राणि शयनाङ्गानि कल्पयेत् ।
मङ्गल्यकुम्भान् संस्थाप्य दिगष्टकसमाश्रितान् ॥

ततो विम्बाधिवासार्थं शयन परिकल्पयेत् ।
तदर्धं वेदिकोर्ध्वे तु कुर्यात् स्वस्तिकमण्डलम् ॥

रजसा कुसुमैर्वाथ चतुर्वर्णैर्महोज्वलै. ।
प्रागग्रानुदगग्राश्च दर्भान् सस्तीर्य तत्परम् ॥ २९६ ॥

पञ्चभारप्रमाणेन शालींस्तत्र विनिक्षिपेत् ।
तदर्धं तण्डुल शुद्ध तदर्धं तु तिलं तथा ॥ २९७ ॥

उपर्युपरि निक्षिप्य लाजानूर्ध्वे तु विन्यसेत् ।
काष्ठजं सुदृढ स्निग्ध चतुर्गात्रसमन्वितम् ॥ २९८ ॥

त्रितुषादसमायुक्त चतुरश्रायत ततम् ।
खट्वासंज्ञितपर्यङ्क तदूर्ध्वे स्थापयेत्तत. ॥ २९९ ॥

दुकूल मृदुतल्प च विन्यसेत् सोपरिच्छदम् ।
केवल तल्पमात्र वा विन्यसेदथवा द्विज ! ॥ ३०० ॥

खट्वातूले विवर्ज्याथ लाजोर्ध्वे रत्नकम्बले ।
न्यसेदभिनवं पश्चाद्वस्त्र कार्पासज नवम् ॥ ३०१ ॥

क्षौमवस्त्र न्यसेन्मध्ये चित्रवस्त्रं ततोपरि ।
शिरोपधानसयुक्त पादगण्डूकसंयुतम् ॥ ३०२ ॥

सर्वानभिनवान् शुभ्रान् सकपोलोपधानकान् ।
सुगन्धधूपितान् वस्त्रान् कुसुमामोदसंमितान् ॥३०३॥

इन्द्रादीशानपर्यन्तं कलशान् सूत्रवेष्टितान् ।
तोयपूर्णान् समान् स्निग्धान् सापिधानान् सवस्त्रकान्॥

सुरत्नपल्लवैर्युक्तान् धान्यराशिषु निक्षिपेत् ।
शङ्खचक्रगदापद्मध्वजैश्चेन्द्रादिषु क्रमात् ॥ ३०५ ॥

श्रीवत्सं गरुडं कूर्म सौवर्णं तेषु निक्षिपेत् ।
मध्ये मध्ये च कुम्भाना धान्योर्ध्वं मङ्गलान् न्यसेत् ॥

वस्त्रैराच्छादितास्तद्वन्न्यसेत् कोणेषु पालिकाः ।
एव शयनयुग्मं तु प्रकल्प्य तदधो यजेत् ॥ ३०७ ॥

सर्वाधारमनन्त तु तदूर्ध्वे सर्वगं प्रभुम् ।
प्रभवाप्ययोगेन यजेत् प्रागादियोगत ॥ ३०८ ॥

पाठयेत् सर्पसामादिसज्ञा ज्ञानबलात्मिकाम् ।
हुत्वा शताष्टसख्य तु मूल तदनुकल्पयेत् ॥ ३०९ ॥

मण्डल पावने रागे सिताद्यैर्माङ्गलीपकै ।
तदूनाधिकशान्त्यर्थं हुत्वा कुण्डगण तत. ॥ ३१० ॥

सस्कुर्यात् प्रतिकुण्डस्य निकटे कुम्भमध्यगम् ।
प्रभवाप्ययोगेन चातुरात्म्य तु सयजेत् ॥ ३११ ॥

हृदादि यज्ञा दिक्स्थेषु विदिक्स्थेषु तदस्त्रम् ।
दत्त्वा तदर्थं पूर्णां तु "पूर्णात्पूर्णं च पाठयेत् ॥ ३१२ ॥

एकादशनान् यजुर्मयानाश्रावितमनन्तरम् ।
एवं सर्वं समापाद्य प्रयायाद्विम्बसन्निधिम् ॥ ३१३ ॥

विम्बमर्घ्यादिनाभ्यर्च्य गुरु स्नपनमारभेत् ।
अथास्त्रमन्त्रेण पुरा मङ्गल्यकलशाम्भसा ॥ ३१४ ॥

ससेच्य विम्ब तदनु स्नापयेत्तन्मृदम्भसा ।
पाठयेत्तत्र "कूश्माण्डान्" बलमन्त्राननन्तरम् ॥

ततो गोपायकुम्भेन "इह गाव" प्रपाठयेत् ।
भूतस्नपनमित्र तत्र पाठ्यमानेन भूमिना ॥ ३१६ ॥

पञ्चगव्येन तदनु पाठये "पञ्चाङ्कर" तत ।
पूर्ववच्च ततोऽभ्यर्च्य विधिवच्चमसाम्बुना ॥ ३१७ ॥

क्षालयित्वा जलै शुद्धैरभिषिच्य ततोऽर्चयेत् ।
शिल्पदोषविनाशार्थं स्नानमेतदुदाहृतम् ॥ ३१८ ॥

परिधाय ततो विम्ब ! वाससी अधरोत्तरे ।
नयनोन्मीलनार्थं तु शयन यत् प्रकल्पितम् ॥ ३१९ ॥

तत्र पूर्वशिरस्कं च विम्ब प्रस्थापयेद्द्विज ! ।
तत समन्ताद्विम्ब तु छादयेत् कम्बलादिभिः ॥३२०॥

सौवर्णं राजतं चैव पात्रमाढकपूरणम् ।
धान्यराशौ निधायाग्रे पूरयेत यथाक्रमम् ॥ ३२१ ॥

मधुना सर्पिषा चैव ततस्तु मधुपात्रके ।
अर्कमण्डलमध्यस्थं मार्ताण्डायुतसन्निभम् ॥ ३२२ ॥

ध्यात्वा मन्त्रेशमभ्यर्च्य तदन्यस्मिन् महामते ।
चन्द्रमण्डलमध्यस्थं धेनुमुद्रासमन्वितम् ॥ ३२३ ॥

मन्त्रं वै सौरभीयं च स्फुरदिन्दुशतप्रभम् ।
तदन्तरस्थं मन्त्रेशं हिमाचलनिभं स्मरेत् ॥ ३२४ ॥

तत्स्रुतैरमृतौघैश्च शशिजेर्धेनुजैरपि ।
सुभावितं स्मरेद्बिम्बं मधुपातेति मन्त्रत ॥ ३२५ ॥

घृतादि मन्त्रयेत् पश्चाद्वस्त्रेणाच्छादयेत्तु तत् ।
अष्टाङ्गुला च सौवर्णी शलाका राजती तथा ॥३२६॥

केवला वापि सौवर्णी शलाका स्याद्द्विजोत्तम ।
अष्टधान्यानि परित. पात्रेषु विनिवेशयेत् ॥ ३२७ ॥

गा कन्यका. शुभाकारा भूषणैश्चापि भूषिता ।
आनीय स्थापयेत् पार्श्वे ब्रह्मघोषेण घोषयेत् ॥ ३२८ ॥

स्वय शलाका सौवर्णी कृत्वा नेत्राभिमन्त्रिताम् ।
मध्वक्ता च तया नेत्रं दक्षिणं त्वीषदुल्लिखेत् ॥ ३२९ ॥

सस्मरन् परमं ज्योतिर्नेत्रमन्त्रेण देशिक. ।
आज्याक्तया तया वापि राजत्या वाममुल्लिखेत् ॥

तन्मन्त्रितेन शस्त्रेण शिल्पी स्नातोऽवलोकित ।
यथावत् प्रकटीकुर्याद्विधिदृष्टेन वर्त्मना ॥ ३३१ ॥

वारुण पाठयत् साम सह "चान्द्रेण" सामगान् ।
पूरयेन्मधुसर्पिर्भ्यां नेत्रयुग्मं क्रमेण तु ॥ ३३२ ॥

वौषडन्तेन मूलेन तेनैव जुहुयात्तत ।
तन्मुर्ध्नि शशिबिम्बं तु ध्येयं तापादिशान्तये ॥ ३३३ ॥

सिञ्चन्तममृतौघं तु "हृदा" यन्तेन सेचयेत् ।
व्यपोह्याच्छादनपटं दर्शयेन्मधुसर्पिषी ॥ ३३४ ॥

अष्टधान्यानि गाश्चैव कन्यका. पुरत स्थिता. ।
मध्वाज्ये च शलाके च प्रदद्याच्छिल्पिने द्विज ॥

अष्टधान्यानि गाश्चैव शय्योपकरणं तथा ।
प्रदद्याद्देशिकेन्द्राय साधक. सिद्धिलालस. ॥ ३३६ ॥

यद्वा मध्वादिसकलमाचार्याय निवेदयेत् ।
यथाशक्ति तथान्यथा मूर्तिपाना च दक्षिणाः ॥ ३३७ ॥

मृण्मये मूलबिम्बे तु भित्तिस्थेऽथ प्रविश्य तु ।
प्रासाद तत्र कुर्वीत नयनोन्मीलनक्रियाम् ॥ ३३८ ॥

एव श्रियादिशक्तीना नयनोन्मीलनं भवेत् ।
एव नेत्रं समुन्मीलय बिम्बस्य तु तत परम् ॥ ३३९ ॥

दहनाप्यायने कुर्याद "स्त्रेण, हृदयेन" च ।
आमूर्धो द्वादशार्णं तु मन्त्रयं पूर्ववन्न्यसेत् ३४० ॥

स्नानार्थेत पुरा क्लृप्ते पीठे बिम्ब नयेत्तत ।
व्याप्तिसन्नासमायुक्ते सस्कृते प्रोक्षणादिना ॥ ३४१ ॥

आधाराद्विक्रमोपेते सनाल वे सुपूजिते ।
पीठेऽवतार्य सवेष्ट्य वाससी ह्यधरोत्तरे ॥ ३४२ ॥

अथ क्रमोदिते कुम्भे द्विपट्कावर्तितैर्हृदा ।
स्नापयेत् पाठयेद्विप्रानो पवीनामिति श्रुतिम् ॥

"या ओषधय" इत्यादि ऋग्वेदास्तदनन्तरम् ।
एव दशावशिष्टान्ते. सेचिते कलशे सति ॥ ३४४ ॥

तत. कुम्भचतुष्के तु चतुर्भिर्मूर्तिधारकैः ।
ऋक्सामपूर्वैर्विधिवत् स्नपनीयं तु पाठयेत् ॥ ३४५ ॥

"उदुत्तमं" हि ऋग्वेदान् पाठयेद्द्रविणं यजु ।
ततस्तु वारुण साम सामज्ञोऽथर्वणस्तत ॥ ३४६ ॥

अयं ते वरुणश्चेति, पवित्रं ते—ततो ऋचम् ।
वसो. पवित्र—हि यजु. पाठयेत् सुमहास्तत ॥ ३४७ ॥

पवित्र ते—हि यत् साम संयोज्यैकायनास्ततः ।
मूर्तिपान् समुदायेन पावमानीश्चतुष्टयम् ॥ ३४८ ॥

तदन्ते परम मन्त्रं व्यूहीयं भगवानिति ।
पवित्रमन्त्र तदनु—इदं विष्णुर्विचक्रमे ॥ ३४९ ॥

ततो विभवमन्तेस्तु सर्वे. संमन्त्रितेन च ।
कुम्भेन सेचयित्वा तु, व्यूहमन्त्रै. परेण तु ॥ ३५० ॥

स्नापयित्वार्चयित्वा च जुहुयात् साधिकं शतम् ।
यथावत् प्रणवेनाथ व्याप्ति कृत्वा च पाठयेत् ॥ ३५१ ॥

"माप्रगामे"ति ऋग्वेदान्, अग्ने नायुर्यजुर्मयान् ।
प्राणापान हि यत् साम तत. प्राणाय वै नम. ॥३५२॥

यातव्येति परं मन्त्र विप्रानेकायनांस्तत ।
ध्यानयुक्तो धिया सम्यक् पठेदाराधकस्तत ॥ ३५३ ॥

" आवाहयाम्यमरवृन्दनताङ्घ्रियुग्म
लक्ष्मीपति भुवनकारणमप्रमेयम् ।
आद्यं सनातनतनु प्रणवासनस्थं
पूर्णेन्दुभास्करहुताशसहस्रदीप्तिम् ॥ ३५४ ॥

" ध्येयं परं सकलतत्वविदा च वेद्य
वाराहकापिलनृकेसरिसौम्यमूर्तिम् ।
श्रीवत्सकौस्तुभमहामणिभूषिताङ्गं
कौमोदकीकमलशङ्खरथाङ्गहस्तम् ॥ ३५५ ॥

" सर्वत्रगोऽसि भगवन् ! किल यद्यपि त्वा
आवाहयामि हि यथा व्यजनेन वायुम् ।
गूढो यथैव दहनो मथनादुपैति
आवाहितोऽपि हि तथा त्वमुपैषि चार्चाम् ॥

" मालाधराच्युत ! विभो ! परमार्थमूर्ते !
सर्वज्ञनाथ ! परमेश्वर ! सर्वशक्ते ! ।
आगच्छ मे कुरु दया प्रतिमा भजस्व
पूजां गृहाण मदनुग्रहकाम्ययाद्य " ॥ ३५७ ॥

ततो विमृज्य वस्त्रेण भोगै पूर्वेदितैर्यजेत् ।
अर्घ्याद्यैर्दक्षिणान्तैस्तु पाठयेद्ब्रह्मयास्ततः ॥ ३५८ ॥

अर्चामि तेति मन्त्र वै सामगाश्चार्चत त्विति ।
(ओं)भगवानिति तज्ज्ञांस्तु अग्नौ सन्तर्पयेत्ततः ॥

स्वकुण्डे देशिकेन्द्रस्तु समिधा सप्तकं हुनेत् ।
पश्चाच्छताष्टसंख्यं च साज्यैस्तु तिलतण्डुलै. ॥ ३६० ॥

तर्पयित्वा तु पूर्णान्तमुद्धृत्याग्निकणं ततः ।
दिक्कुण्डेषु विनिक्षिप्य संस्कृतेषु पुरैव हि ॥ ३६१ ॥

तथैव च विदिक्स्थेषु उद्धृत्याभ्यर्च्य वै क्रमात् ।
ततः प्रभवयोगेन चतुर्दिक्षु निवेशयेत् ॥ ३६२ ॥

चतुरो वासुदेवादिनाम्ना एकायनान् द्विजान् ।
स्वाभिः स्वाभिरसंख्य च तैः कार्यमभिधादिभि. ॥

समित्सप्तकपूर्वैस्तु साज्यैस्तु तिलतण्डुलै ।
एवमप्यययोगेन वाय्वादीशावसानकम् ॥ ३६४ ॥

ऋग्वेदाद्यास्तु चतुर. संस्कृत्यादौ तथा न्यसेत् ।
अथवा विन्यसेत्तास्तु ईशाद्वायुपदावधि ॥ ३६५ ॥

तेरप्यच्युतलिङ्गैस्तु स्वशाखोक्तैश्च पावनै ।
हवनं विधिवत् कार्य भक्तियुक्तेन चेतसा ॥ ३६६ ॥

एव क्रमेण कुण्डांस्तु सर्वान् हुत्वा ततो गुरुः ।
द्वास्थादीना पुरोक्ताना दिक्पतीना समाचरेत् ॥३६७॥

हवन विधिवत् कुण्डे तदर्थ पूर्वनिर्मिते ।
स्तुत्वा जितत्वामन्त्रेण सामज्ञान् पाठयेत् पुन. ॥

सह गायत्रिसाम्ना तु यद्रथन्तरसंज्ञकम् ।
प्रजप्य द्वादशार्ण तु मुद्रा वध्वा प्रणम्य च ॥ ३६९ ॥

अष्टाङ्गेनाथ विज्ञाप्यो भगवान् भूतभावनः ।
" मूर्तिभेदेन रूपेण अनेनैव हि साम्प्रतम् ॥ ३७० ॥

लोकानज्ञाततत्वास्तु समाह्वादय नागरान् ।
येनान्त सप्रविष्टेन ईषत्कालवशात्तु वै ॥ ३७१ ॥

जन्मान्तरसहस्रोत्थान्मोक्षमायान्ति किल्बिषात् " ।
एवमर्थ्यो हि भगवान् लोकानुग्रहकृत् प्रभुः ॥ ३७२ ॥

दत्वार्घ्यगन्धस्रग्धूपदीपनैवेद्यमेव च ।
निवेद्याचमनं चार्घ्य कुर्यान्नीराजनं तत ॥ ३७३ ॥

पुण्याहजयघोषेण वेदध्वनियुतेन च ।
शङ्खवादित्रनिर्घोषपटहैर्गीतिभि सह ॥ ३७४ ॥

करावङ्घ्रिगतौ कृत्वा देवदेवस्य देशिक ।
पाठयेद्ब्रह्मयं मन्त्र " उतिष्ठेति " ततः सह ॥ ३७५ ॥

यात्रोपकरणैर्मन्त्रं कृत्वा ब्रह्मरथे स्थिरे ।
सुयन्त्रितेति क्षीराज्यदध्योदनसमन्विते ॥ ३७६ ॥

सुभिक्षक्षेमशान्त्यर्थं परमान्नफलैर्युते ।
पाठयेदस्य वामीयमृङ्मयं तदनन्तरम् ॥ ३७७ ॥

तन्मयान् बलमन्त्र तु " दशार्धे "ति महामते ! ।
स्वयमाद्यन्तसंरुद्धं हृदा तु कवचं जपेत् ॥ ३७८ ॥

भ्रामयेद्बलिदानं च क्रियमाण तु सर्वदिक् ।
(रत्न) पद्मकाञ्चनवज्राणा पूर्ववत् शेषमाचरेत् ॥

दिव्याद्यायतनानां च कार्या पूजा यथोचिता ।
पञ्चरात्रविदा चैव यतीना ब्रह्मचारिणाम् ॥ ३८० ॥

षट्कर्मनिरताना च दान दीनजनेष्वपि ।
रथस्थे मन्त्रबिम्बे तु यावत्पदशत व्रजेत् ॥ ३८१ ॥

तद्रथ तूर्यघोषेण तावत् क्रतुशतं फलम् ।
आप्नोत्याराधक शश्वत् सकामो नियतव्रत ॥

ततस्तोरणदेशस्थ रथ कृत्वाऽर्चयेत् प्रभुम् ।
पाद्यार्घ्यपुष्पधूपैश्च नमस्कृत्य च पाठयेत् ॥ ३८३ ॥

उत्तिष्ठेति द्विपटकार्ण सजिततं—तु चाखिलम् ।
सपठन् पौरुषं सूक्त यागवेश्म प्रवेशयेत् ॥ ३८४ ॥

शय्याया प्राक्शिरोबिम्ब शाययेद्धृदयेन तु ।
देशिको मूर्तिपै सार्ध यात्राहोम समा येत् ॥ ३८५ ॥

ततस्तच्छिरसोद्देशे चक्राकारस्थिते घटे ।
पूर्वोक्तलक्षणे नेत्रमस्त्रसपुटित यजेत् ॥ ३८६ ॥

पूजयेन्मङ्गलान्यष्टौ प्रागादौ तु स्वनामभि ।
अष्टासु तत्र कुम्भेषु पुरैव स्थापितेषु च ॥ ३८७ ॥

वासुदेवादय. पूज्या. प्रभावाप्यययोगत. ।
हृदादि यद्वा दिक्स्थेषु विदिक्स्थेषु तदस्त्रपम् ॥३८८॥

यद्वा प्राच्या तु वाराहो नारसिंहस्तु दक्षिणे ।
प्रतीच्यां श्रीधरो देवो हयवक्त्रस्तथोत्तरे ॥ ३८९ ॥

आग्नेय्यां भार्गवो रामो नैर्ऋते राम एव च ।
वायव्ये वामनश्चापि विष्णुरीशानगोचरे ॥ ३९० ॥

स्वनाम्ना पूजयित्वैतानर्घ्यगन्धादिभिस्तत ।
पूजयित्वार्घ्यपुष्पाद्यै. शयनस्थं विभु तत. ॥ ३९१ ॥

वर्मणाच्छादनपट दत्वा धूपाधिवासितम् ।
मूलेन शयनस्थस्य कुर्यादाप्यायनं ततः ॥ ३९२ ॥

देवाङ्घ्रिनिकटोद्देशे उपविष्टस्तु देशिक. ।
मन्त्रविद्देवबिम्बस्य मन्त्रन्यासं समाचरेत् ॥ ३९३ ॥

लेख्यादौ मन्त्रबिम्बे तु प्रासादस्थे द्विजोत्तम ! ।
उत्सवं कर्मबिम्बे तु विष्टरे वा प्रकल्प्य तु ॥ ३९४ ॥

प्रस्थाप्य शयने प्राग्वत् प्रासादं संप्रविश्य च ।
मन्त्रन्यासादिक कुर्याद्वक्ष्यमाणविधानतः ॥ ३९५ ॥

सुविस्तृतं तद्विधानमिदानीवधारय ।
पीठे पुष्पाञ्जलि कृत्वा गन्धयुक्त च साक्षतम् ॥३९६॥

आमूर्ध्नश्चरणान्त तु द्वादशार्ण तु विन्यसेत् ।
अङ्गोपाङ्गस्थिति कुर्यात् स्थानेषु हृदयादिषु ॥ ३९७ ॥

हृदि मूर्ध्नि शिखाया तु स्कन्धयो करमध्यत ।
नेत्रयोरुदरे पृष्ठदेशे बाहुद्वये ततः ॥ ३९८ ॥

ऊरुभ्यां जानुयुग्मेऽथ पादयोस्तदनन्तरम् ।
देवस्य दक्षिणे हस्ते चक्रं शङ्ख तु वामत ॥ ३९९ ॥

वामहस्ते गदाखड्गौ ह्यथवा दक्षवामयो ।
क्रमाल्लाञ्छनमन्त्रास्तु चक्रादीन् लाञ्छनान् न्यसेत् ॥

किरीट शिरसोद्देशे श्रीवत्स च गलादध. ।
वक्षसोऽवामभागे तु विन्यसेत्तदनन्तरम् ॥ ४०१ ॥

कौस्तुभं हृदये न्यस्य वनमालां च कण्ठत ।
श्रियं दक्षिणभागे तु पुष्टिमुत्तरतो न्यसेत् ॥ ४०२ ॥

ऊरुमूले वैनतेयमथेदानी निबोध मे ।
चतुर्भुजस्य देवस्य चक्रादेर्विनिवेशनम् ॥ ४०३ ॥

मुख्यदक्षिणहस्तेऽब्जं गदां वामकरे न्यसेत् ।
अपरे दक्षिणे चक्रं शङ्खं वामकरे परे ॥ ४०४ ॥

अन्यान् लाञ्छनमन्त्रास्तु यथायोगं तु विन्यसेत् ।
अन्येषु षड्भुजाद्येषु मुख्यदक्षादित. क्रमात् ॥ ४०५ ॥

सर्वान् लाञ्छनमन्त्रास्तु यथास्थानगतान् न्यसेत् ।
संस्थाप्य भगवन्मूर्तिर्धत्ते चक्रादिलाञ्छनम् ॥ ४०६ ॥

हस्ते येन क्रमेणैव लाञ्छनानि न्यसेत्तथा ।
मन्त्रान् किरीटपूर्वाश्च प्राग्वत् सर्वत्र विन्यसेत् ॥

पादादिद्वादशाङ्गेषु ततो दामोदरादिकान् ।
तच्छक्तिकांस्तथा मन्त्रान् प्राग्वद्व्यापकलक्षणान् ॥

ऐश्वरेणाथ बीजेन यथावस्थेन भावयेत् ।
पादादितन्मयेनैव तद्वन्मन्त्रवरेण तु ॥ ४०९ ॥

प्राग्वदप्ययुक्त्वा तु ह्यन्तर्ज्योतिर्मयात्मना ।
विभुना वाकस्वरूपेण तद्देवाय परं पदम् ॥ ४१० ॥

सुशान्तं सर्वगं बुद्ध्वा निस्तरङ्गमिवोदधिम् ।
विद्याङ्गदामित्याद्यं यत् पाठयेत् पाञ्चरात्रिकान् ॥

देहसान्यासिकं मन्त्रं धारणाख्यमनन्तरम् ।
जीमूतस्येति ऋग्वेदान् नासदासीति पाठयत् ॥४१२॥

क्रमेणानेन हुत्वा तु पादार्धशतसंख्यया ।
तिलानां च तथा मन्त्रैराज्यस्येभिर्महामते ! ॥ ४१३ ॥

दत्वा पूर्णाहुतिं प्राग्वदुपसंहारलक्षणाम् ।
ततस्तत् परमं ब्रह्म ह्युदितं पूर्ववत् स्मरेत् ॥ ४१४ ॥

सर्वशक्तिमयेनैव स्वभावेन सकेन तु ।
ओजोबलात्मना यद्वद्गन्धो द्रव्यात्मना तु वै ॥ ४१५ ॥

बीजं तरुस्वरूपेण समुद्रो बुद्बुदात्मना ।
एवमव्यपदेश्या या शक्तिः स्वे शक्तिदर्पणे ॥ ४१६ ॥

स्थितमादाय विश्वेशः स्वातन्त्र्याच्च महामते ! ।
मन्त्ररूपा तनुं धत्ते सम्यगाराधनाय च ॥ ४१७ ॥

नानात्वमुपयातस्य प्रसरं तस्य च स्वयम् ।
निष्प्रभत्वं प्रयातस्य चिद्बीजनिचयस्य च ॥ ४१८ ॥

आविष्कृतस्य भेदेनाप्यमूर्तेन बलियसा ।
अज्ञानगहनेनैव नित्यानित्यामलात्मना ॥ ४१९ ॥

स्मृत्वैवं मूलमन्त्रं तु विग्रहत्वमग स्मरेत् ।
षट्शक्तिकिरणोपेतं तैस्तद्द्रव्यमयीं तनुम् ॥ ४२० ॥

संस्मरेत् संहरन्तं च प्रागुक्तेनैव वर्त्मना ।
स्वरूपममलं भूयः स्मरेन्मूर्त्यात्मना तु तत् ॥ ४२१ ॥

नयन्तं पूर्वविधिनाप्येवं स परमेश्वरः ।
मन्त्रात्मना स्वतन्त्रत्वमुपयातो यदा तदा ॥ ४२२ ॥

"सहस्रशिरसं देव"मिति सर्वास्तु चोदयेत् ।
पाठयेद्ब्राह्मणान्—धातर्यध्यक्षेति च मन्त्रपम् ॥४२३॥

यो विश्वतश्चक्षुरिति, यातव्यो भवतीति च ।
द्वासुपर्णेति तदनु, अतो देवेति वै तत ॥ ४२४ ॥

ऋङ्मयान् पौरुषं सूक्तं ततः परतमा त्विति ।
शाश्वता च ततः कालकलेति समुदाहरेत् ॥ ४२५ ॥

एषा बुद्धिः सप्तधेति "अत्रेदानीं"च पाठयत् ।
एवं मन्त्रानुसन्धानं कथितं च पराभिधम् ॥ ४२६ ॥

सूक्ष्मसंज्ञं मुनिश्रेष्ठ ! विध्यन्तरमथोच्यते ।
वेभव देवताचक्रं व्यूहाख्यं तदनन्तरम् ॥ ४२७ ॥

सूक्ष्मं नापि मुनिश्रेष्ठ ! पाठयोर्हृदि मूर्धनि ।
प्रपूज्य पुष्पधूपाद्यैर्मुद्राभिः प्रणमेदथ ॥ ४२८ ॥

गत्वा कुण्डसमीपं तु व्यापारेष्वखिलेषु च ।
होमं कुर्याद्यथाशक्ति तिलाद्यैः शतपूर्वकम् ॥ ४२९ ॥

स्मृत्वैकैकं तु वै कर्म कर्ता मन्त्रोदितेन च ।
हृन्मन्त्रेण समूलेन दत्त्वा पूर्णाहुतिं ततः ॥ ४३० ॥

आप्लावनाच्च तत् काले कर्मणां पूरणाय च ।
ततः शान्त्युदकं मूर्ध्नि होमान्ते चात्मनो द्विज ! ॥

दत्त्वा तु विग्रहशिरसि मूलेनोदकमेव तत् ।
जपं च कर्ममन्त्राणां यथाशक्ति समाचरेत् ॥ ४३२ ॥

भूतानां बलिदाने च कृते कुण्डेषु मूर्तिषु ।
स्वे स्वे मन्त्रे सहस्रं वा शतं वाष्टौ तु होमयेत् ॥४३३॥

तेभ्यश्च शान्त्युदकं मूर्ध्नि विभ्वे वै दापयेद्गुरुः ।
अथाधिवासनं कुर्याद्विधिदृष्टेन कर्मणा ॥ ४३४ ॥

ध्यानाख्यं निष्कलं शुद्धं येन संविहितः सदा ।
मन्त्रो ह्यर्चागतो विप्र ! स्यात् पटस्थोऽथवा मुने ! ॥

न चोपसंहृतो यावद्गुरुणा तत्त्ववेदिना ।
प्राकसर्वमुपसंहृत्य संहारक्रमयोगतः ॥ ४३६ ॥

स्वरूपे विकृते शुद्धे गुरुरास्ते द्विजोत्तम ! ।
स्वहृद्रश्मिमये पद्मे स्थितिं कृत्वा पुरात्मनः ॥ ४३७ ॥

एवमेवाविनाशं च निरस्तावयवं यथा ।
बोधविज्ञानदेहं च बिम्बं संभाव्य वै तथा ॥ ४३८ ॥

द्वौ सुषुम्नात्मकौ मार्गौ प्रज्वलद्भास्कराकृती ।
हृत्पद्मगोलकाच्चैव एकदेशसमुत्थितौ ॥ ४३९ ॥

मणिप्रभेव चोर्ध्वाधो व्यापकत्वेन संस्थितौ ।
यथात्मनि तथा देवे तथाऽऽत्मनि विभाव्य च ॥

ततो यायाद्दक्षिणेन घ्राणान्वयपथा मुने ! ।
स्वदेहाद्धृदय देवं वाममार्गेण सविशेत् ॥ ४४१ ॥

यथात्मनाऽऽत्मा हृदये ह्यनुभूतो ह्यनूपम. ।
तथा तद्धृदयान्तस्थ स्मरेद्विज्ञानगोलकम् ॥ ४४२ ॥

दृष्ट्वा स्वरश्मिखचितमानन्दापूरित महत् ।
गमागमैकनिष्ठ तु शक्तो ब्रह्मण्यथात्मनि ॥ ४४३ ॥

देवदेहस्थितेनैव विज्ञानेन सहैकता ।
निष्पाद्या यावदस्पन्दकालमान स्वदेहकम् ॥ ४४४ ॥

परं यदात्मना विप्र ! केवलेनानुभूयते ।
स्पन्दप्रवर्तितेनाथ कालेनैकात्मना द्विधा ॥ ४४५ ॥

यथाऽऽत्मनि तथा देवे निष्कामेऽथ साधक ।
देव दक्षिणमार्गेण विशेद्वामेन चात्मनः ॥ ४४६ ॥

हृदयं भासुराकार ज्ञानामृतपरिप्लुतम् ।
योगोऽय मुनिशार्दूल ! बिम्बस्य द्रव्यजस्य च ॥ ४४७ ॥

आपादान्मूर्धपर्यन्तं नाडीवृन्दस्य व्यञ्जक ।
येन सर्वेशिता विप्र ! बिम्बस्यास्य प्रजायते ॥ ४४८ ॥

तं योगमधुना वच्मि एकाग्रमवधारय ।
हृत्पुण्डरीकमध्यस्थ साधको वृत्तिवर्जित. ॥ ४४९ ॥

मन्त्रोच्चारप्रयोगेण प्राग्वत् पद्मनामयम् ।
यायादूर्ध्वप्रवाहेण, तस्माज्ज्ञेय प्रवर्तते ॥ ४५० ॥

अव्युच्छिन्नोऽव्यथेऽक्षुब्धो स्वेच्छया क्षोभमेति च ।
यथा सन्नतरो दीपो ह्यकम्प. कम्पमेति च ॥ ४५१ ॥

कोशकारो यथा तन्तु गृहीत्वा संप्रवर्तते ।
विज्ञानशक्तिमालम्ब्य एवम्भूतो हृदम्बुजम् ॥ ४५२ ॥

स्वकीयमायया, ऽऽचार्य. पूर्ववत् संविशेत्ततः ! ।
देवस्य हृदयाम्भोज विलोक्य सह तेन वै ॥ ४५३ ॥

भावयित्वाथ विज्ञान बोधशक्त्या ततो व्रजेत् ।
तद्द्वादशान्तमागत्य ज्ञेयाख्य न च नासिकम् ॥

तत्पादात् पूर्वयुक्त्या तु दैवं हृदयमाश्रयेत् ।
ततो वै देवहृदयात् प्रविश्य हृदयं स्वकम् ॥ ४५५ ॥

मध्यमार्गेण हृदयादेत्य स्व नेत्रगोलकम् ।
एवं देवेऽनुसन्धाय निरीक्ष्य च परस्परम् ॥ ४५६ ॥

देवालोकेन वात्मानमनुविद्ध च संस्मरेत् ।
आत्मालोकेन देवेशं भिन्न सर्वत्र भावयेत् ॥ ४५७ ॥

एतदीश्वरसन्धान भिन्नमेकात्मलक्षणम् ।
सर्वैश्वर्यप्रद विद्धि सर्वदा प्रतिमासु वै ॥ ४५८ ॥

अथ शब्दानुसन्धानमेकेकाङ्गतदर्शनम् ।
वक्ष्यामि येन वै मन्त्रो बिम्बेनैकात्मता व्रजेत् ॥

निष्कम्पबोधसामान्यरूपो भूत्वा पुन. स्वयम् ।
ये शब्दजनिता भावा. सूक्ष्मै. सूक्ष्मतराऽखिलाः ॥

सामान्यबोधशब्देन तान् पश्यन्नेकतां गतान् ।
सङ्कल्पपूर्व सर्वोत्थशब्दमात्रेण वर्जितान् ॥ ४६१ ॥

स चाभिमुखमायाति सङ्कल्पादुत्थितस्य च ।
शब्दरूपपदार्थस्य शब्दस्य परमौजस ॥ ४६२ ॥

सङ्कल्पपदवीरूढ स्फुरत्यन्तस्थित स्फुटम् ।
पदार्थोपरि य शब्दो मध्यमं विद्धि तन्मुने ! ॥४६३॥

हृत्पद्मकर्णिकासस्थ. प्रयत्नपदवीषु च ।
विद्यासु करणोत्थासु यश्चाभिव्यक्तिमेति च ॥ ४६४ ॥

वाच्यवाचकरूपेण स शब्द. स्थूल उच्यते ।
अतिस्थूलपरत्वेन स च वारिविषये पुनः ॥ ४६५ ॥

दृश्यादृश्येषु भावेषु अभिव्यक्ति प्रयाति च ।
स हि स्थूलतर. शब्दो व्यवहारेऽखिले स्थितः ॥

तस्माच्छब्दमयो देह इति चेतसि वै पुरा ।
निष्कम्प साधकः कृत्वा बिम्बं भाव्यं तदात्मकम् ॥

शब्दसंहारयोगेन सबिम्बं ब्रह्मसंयुतम् ।
निष्कम्पयोगयुक्तात्मा यो गुरुः संप्रविश्यति ॥ ४६८ ॥

पूर्वोक्तक्रमयोगेन शब्दब्रह्म ह्यनागतम् ।
पश्येत् परिणतं विप्र ! क्रमाद्विश्वात्मना तु वै ॥४६९॥

तेन सस्थापितं विम्बं भुक्तिमुक्तिफलप्रदम् ।
एवं शब्दानुसन्धानं कृत्वा विम्बस्य सत्तम ! ॥ ४७० ॥

ततो वै मन्त्रसन्धानमारभेत प्रयत्नतः ।
अशब्ददेह शब्दात्मा नित्योदितमनामयम् ॥ ४७१ ॥

स्वहृत्पद्मस्थितं मन्त्रमुदितं नालसूत्रवत् ।
निस्सृत मध्यमार्गेण विम्बान्त सविशन् स्मरेत् ॥४७२॥

स्फुरत्तारकरूपं च मन्त्रैर्व्याप्ति तथाखिलै ।
मन्त्रात्मान जगन्नाथ विम्बहृत्पद्ममध्यगम् ॥ ४७३ ॥

संस्मरेत् सृष्टिसंहारौ कुर्वन्त साधकोत्तम ।
पर स एव बोद्धव्य सुसूक्ष्मः स च निष्कल ॥ ४७४ ॥

सकल चेत्र बोद्धव्यमुभयात्मकमित्यपि ।
विज्ञानरजनीमध्ये ज्ञेय निद्रारसास्थितम् ॥ ४७५ ॥

तत्वग्रामप्रभातेऽथ संभोगमिव सोदये ।
प्रबुद्धं सस्मरेद्देवमवतीर्ण परात् पदात् ॥ ४७६ ॥

सर्वाध्वभोगपीठ तत्तेनाक्रान्तं च भावयेत् ।
भोगभूसंस्थितं देव स्थितिमन्तं विभाव्य च ॥ ४७७ ॥

स्थितिराधारशक्तिर्वे विभोर्मन्त्रात्मकस्य च ।
तस्माद्ब्रह्मशिलापीठ विम्बमेकीकृत स्मरेत् ॥ ४७८ ॥

नानाधिवासयोगेन पूजयेत्तदनन्तरम् ।
मन्त्रन्यासं पुरा कृत्वा त्रिधा पूर्वक्रमेण तु ॥ ४७९ ॥

हस्तन्यासं विना विप्र ! लययुक्त्यानु चाखिलम् ।
कथितं सूक्ष्मसन्धानं स्थूलं विध्यन्तरं शृणु ॥ ४८० ॥

संस्कृतं देवदेवस्य त्वचादेह सुलक्षणम् ।
संस्मरेच्च सुसंपूर्ण मणिरत्नमयैर्विना ॥ ४८१ ॥

स्वदेहवदुपादेयैर्नाडीव्यूहैः सवायवैः ।
धातुभिः सोमसूर्याग्निसहज्ञानादिकैर्गुणै ॥ ४८२ ॥

गुणकारणतः क्ष्मान्तं यदन्यत्तत्वसंग्रहम् ।
द्रव्यमाश्रित्य वै विम्ब वर्तते यदसन्महत् ॥ ४८३ ॥

तत्र हृत्कमलाकाशे मन्त्रं रत्नप्रभोज्ज्वलम् ।
ब्रह्मभावनया न्यस्त यच्छति प्रातिमं फलम् ॥ ४८४ ॥

श्रद्धापराणा कर्तृणा फलतोऽभ्येति च स्थिराम् ।
प्रतिपत्ति परा ब्राह्मीमाकारं प्रति सर्वदा ॥ ४८५ ॥

प्राप्नोति यद्वशादन्ते ज्ञानमात्मप्रकाशकम् ।
उक्तमेतत्तु सकलमाकर्णय सुविस्तृतम् ॥ ४८६ ॥

पूर्ववद्धारणामिस्तु सहारक्रमयोगत ।
तद्विम्बमुपसहृत्य स्वरूपेऽविकृते परे ॥ ४८७ ॥

तत क्रमेण वै सृष्ट्वा विम्ब ज्योतिर्मय स्मरेत् ।
एव पूर्वोदित ध्यात्वा नाडीवृन्दस्य व्यञ्जकम् ॥ ४८८ ॥

ततस्तासा तु नाडीना व्यायेद्व्यक्ति सुविस्तृताम् ।
द्वासप्ततिसहस्र तु नाड्य परिकीर्तिता ॥ ४८९ ॥

दशप्रधानास्तासा तु वायवश्च तथा दश ।
इडा च पिङ्गला चैव सुषुम्ना च तथा परा ॥ ४९० ॥

गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुसा कुहूश्चैव कौशिकी दशमा स्मृता ॥ ४९१ ॥

प्राणापानसमानाश्च व्यानोदानौ तथैव च ।
नाग कूर्मश्च कृकरः देवदत्तो धनञ्जय ॥ ४९२ ॥

आनीय त्रितय कुर्याद्देवे पूरककुम्भकौ ।
पूरके नाडिका सर्वा पूर्यन्ते नात्र सशयः ॥ ४९३ ॥

ततो हृदयपद्म च विकासमुपयास्यति ।
कुम्भकेन निरुद्ध तद्भवेदूर्ध्वमुख द्विज ! ॥ ४९४ ॥

सवायूना च नाडीना स्थिति स्मृत्वा ततः परम् ।
रसलोहितमासाना मेदोमज्जास्थिनां तथा ॥ ४९५ ॥

धातूना शुक्रधात्वन्तं स्मृत्वान्त संस्थिति क्रमात् ।
स्मृत्वा हृदयपद्मे तु सोमसूर्याग्निमण्डलान् ॥ ४९६ ॥

आपादात् ब्रह्मरन्ध्रान्त सर्वविद्येषु सत्तम ! ।
प्रकृतीना च तत्वाना कुर्यात् सम्यङ्निवेशनम् ॥

आपादाद्ब्रह्मरन्ध्रान्तमव्यक्तान्तं क्रमेण तु ।
क्षित्यादिकाना पादान्तमव्यक्त वा धरान्तिकम् ॥

मूर्ध्नि भ्रूमध्यपर्यन्तं प्रधानं भावयेद्द्विज !।
सिन्दूरपुञ्जसंकाशा तालुमध्ये धियं स्मरेत् ॥ ४९९ ॥

सितेन्दुरश्मिवर्णाभ खद्योतमिव खेचरम्।
तालुमूले त्वहकारं कुसुम्भरससन्निभम् ॥ ५०० ॥

संस्मरेन्मानस तत्व तालुकण्ठान्तरे द्विज !।
राजोपलद्युतिमुप कदम्बकुसुमोपमम् ॥ ५०१ ॥

कण्ठाद्धृत्पद्मपर्यन्तं स्मरेत् पञ्चपदे समे।
श्रोत्रादीनथ वै पञ्च प्रस्फुरतारकोज्ज्वलान् ॥ ५०२ ॥

पद्मस्थानाच्च नाभ्यन्तं प्राग्वत् पञ्चपदान्तरे।
वागादीन् वै स्थितान् पञ्च क्रमेण विनिवेशयेत् ॥

आनाभेर्वस्तिशीर्षान्तं सुसमे पदपञ्चके।
शब्दतन्मात्रपूर्वाणि गन्धमात्रावसानत. ॥ ५०४ ॥

स्वै. स्वैर्गुणैश्च युक्तानि भास्वज्ज्योति.प्रभाणि तु।
ऊरुमूले तथा मध्ये सन्धिदेशे ततस्त्वध. ॥ ५०५ ॥

दण्डे मर्मावसाने तु सर्वसिश्चरणे क्रमात्।
खं वाय्वग्न्युदकक्ष्मान्त चिन्तयेद्भूतपञ्चकम् ॥५०६॥

नीरूपाञ्जनवर्ण तु संस्मरेद्व्योमगोलकम्।
वायव्य नीलपीत च तैजस मधुपिङ्गलम् ॥ ५०७ ॥

मुक्ताफलनिभ चाप्यं रक्तपीत तु पार्थिवम्।
अथवा तत्वविन्यासमेवमेव समाचरेत् ॥ ५०८ ॥

प्रकृति हृदये न्यस्त्वा धीमनोममता तथा।
कण्ठहृन्नाभिषु न्यस्त्वा तन्मात्रं शब्दसंज्ञितम् ॥५०९॥

खभूतयुक्त शिरसि तालो. कण्ठान्तकं तथा।
स्पर्शाख्यं वायुना सार्ध रूपाख्यं वह्निना सह ॥ ५१० ॥

कण्ठात् प्रभृति नाभ्यन्त रसाख्येन जलं सह।
नाभेर्जान्वन्तर यावज्जानो. पादान्तक न्यसेत् ॥ ५११ ॥

धरां गन्धेन तत्पश्चात् स्वे स्वे स्थाने तु विन्यसेत्।
बुद्ध्यक्षाणि क्रमेणैव तथा कर्मेन्द्रियाण्यपि ॥ ५१२ ॥

यद्वा प्रधानमामूर्ध्नो यावद्वक्ष.स्थल न्यसेत्।
नाभौ बुद्धिमहङ्कारं कटिमूलाश्रितं स्मरेत् ॥ ५१३ ॥

ऊरुभ्यां शब्दतन्मात्रं स्पर्शाख्य सन्धिदेशगम्।
जङ्घाभ्या रूपतन्मात्र गुल्फयो रससञ्ज्ञितम् ॥५१४॥

पादाभ्या गन्धसंज्ञ तु स्वबीजध्यानसंयुतम्।
अथवा सप्तधा तत्वक्लृप्तौ स्थानक्रम शृणु ॥ ५१५ ॥

गुल्फजानुकटीवक्ष कण्ठभ्रूकावटावधि।
बुद्ध्यन्ताना धरादीना क्रमादवनिसप्तकम् ॥ ५१६ ॥

आपादनाभिदेशं वा महाभूतैर्धरादिकै।
व्याप्त चतुर्भिर्वाय्वन्तैस्तदूर्ध्वं नभसा पुन ॥ ५१७ ॥

पूरितं हृदयान्त च तदुद्देशाच्छिखावधि।
विभाव्य मनसा व्याप्त तदूर्ध्वं द्वादशान्तकम् ॥ ५१८ ॥

प्रधानापरपर्याय बुद्धितत्व तु विन्यसेत्।
अथ द्वेधा तत्वक्लृप्तौ विधानमवधारय ॥ ५१९ ॥

आमूर्ध्नो नाभिपर्यन्त प्रधानं परिभावयेत्।
आनाभे. पादपर्यन्त स्मरेत्तन्मात्रकं गणम् ॥ ५२० ॥

यद्वा व्यक्तौ प्रधानं तु व्यापकं देवरूपधृक्।
सर्वतत्वमयं मन्त्र तस्य वा केवल हृदि ॥ ५२१ ॥

प्राधानिकं योजनीयमभिन्न तत्वकारणम्।
एवमिच्छानुरूपेण तत्वविन्यासमाचरेत् ॥ ५२२ ॥

ज्ञानादिगुणषट्क च हृदयादिषु विन्यसेत्।
प्राग्वदीश्वरसन्धानमाचरेन्मुनिपुङ्गव ! ॥ ५२३ ॥

ततः शब्दानुसन्धानं प्रागुक्त तु समाचरेत्।
तथैव वर्णभेदेन स्थानभेदे च विन्यसेत् ॥ ५२४ ॥

कदम्बकुसुमाकार मकारं विन्यसेद्द्विज !।
शिखाया, शिखारोद्देशे आकार कुङ्कुमप्रभम् ॥ ५२५ ॥

तप्तचामीकराकारमिकारं मुखमण्डले।
ईकार कण्ठदेशे तु कुन्देन्दुसदृशप्रभम् ॥ ५२६ ॥

उकार जत्रुभागे तु शुद्धस्फटिकवर्चसम्।
ऊकारं वक्षसि तथा सिन्दूरसदृशाकृतिम् ॥ ५२७ ॥

ऋकारं हृदये न्यस्येच्छुक्लवर्ण महाप्रभम्।
ॠकार जाठरे भागे लाक्षारससमद्युतिम् ॥ ५२८ ॥

लृकारं नाभिभागे तु तप्तकाञ्चनसन्निभम् ।
लॄकारं लिङ्गदेशस्थं विन्यसेदसितप्रभम् ॥ ५२९ ॥

एकारं द्रुतहेमाभमूरुयुग्मं समाश्रितम् ।
ऐकारं जानुयुग्मे तु सन्ध्याजलदसन्निभम् ॥ ५३० ॥

ओकार जङ्घयोस्तद्वच्छुक्लवर्ण द्विजोत्तम ! ।
औकारं रक्तवर्ण च गुल्फद्वयगतं तथा ॥ ५३१ ॥

अङ्कार पादयोर्ब्रह्मन्नयस्कान्तसमप्रभम् ।
अः कार चरणाङ्गुष्ठे पद्मरागसमप्रभम् ॥ ५३२ ॥

ककारं तु ललाटस्थ रक्तवर्ण तु विन्यसेत् ।
खकारं पीतलनिभ भ्रुवोर्मध्यमदेशगम् ॥ ५३३ ॥

गकारं नासिकाया तु तुषारसदृशाकृतिम् ।
घकार सितवर्ण तु दशनस्थानसश्रितम् ॥ ५३४ ॥

ङकार चिबुकोद्देशे शरद्गगनसन्निभम् ।
चकारं रक्तवर्ण च कृकाटीगोचरे न्यसेत् ॥ ५३५ ॥

छकारं पृष्ठभागे तु ज्वलितानलसन्निभम् ।
जकार कटिदेशस्थ काञ्चनाद्रिसमप्रभम् ॥ ५३६ ॥

झकारमूरुमूले तु शुद्धस्फटिकसन्निभम् ।
ञकार पादगुल्फाग्रे पद्मरागसमप्रभम् ॥ ५३७ ॥

टकार भ्रूयुगगतं तुषारसदृशाकृतिम् ।
ठकार नेत्रयोर्ब्रह्मन् ! रक्तवर्ण महाप्रभम् ॥ ५३८ ॥

डकार गण्डयोश्चैव पीतवर्ण महाद्युतिम् ।
ढकारं हनुयुग्मस्थमिन्द्रनीलसमप्रभम् ॥ ५३९ ॥

णकार कुचयुग्मे तु हरितालसमद्युतिम् ।
तकार श्रवसोर्युग्मे प्रवालोपलसन्निभम् ॥ ५४० ॥

थकारं स्कन्धयुगले चम्पकप्रसवाकृतिम् ।
दकार भुजयोर्मध्ये ज्वलितानलसन्निभम् ॥ ५४१ ॥

धकारं तु प्रकोष्ठस्थ खद्योतचयदीधितिम् ।
नकारं करयोर्न्यस्य पद्मपत्रसमद्युतिम् ॥ ५४२ ॥

पकारं रोमकूपस्थं पलाशदलसन्निभम् ।
फकारं कक्षभागस्थं सन्ध्याभ्रसदृशप्रभम् ॥ ५४३ ॥

बकारं पार्श्वयुग्मे तु पूर्णचन्द्रसमप्रभम् ।
भकारं सक्थिदेशस्थं नीलाञ्जनचयोपमम् ॥ ५४४ ॥

मकारं पिण्डिकासंस्थं शरद्गगनसन्निभम् ।
यकार पाञ्चजन्ये तु धूम्रवर्ण च विन्यसेत् ॥ ५४५ ॥

रकार च सहस्रारे रक्तपङ्कजसन्निभम् ।
लकारं च गदाया वै सौदामिनिसमप्रभम् ॥ ५४६ ॥

वकारमरविन्दे तु शारदाभ्रसमप्रभम् ।
शकारं शोणिते न्यस्य अमृताभासविग्रहम् ॥ ५४७ ॥

षकारमस्थिनिचये शशशोणितसन्निभम् ।
सकारं मासदेशे तु हिमकुन्दसमप्रभम् ॥ ५४८ ॥

हकार प्राणदेशस्थं शुद्धस्फटिकविग्रहम् ।
क्षकार सर्वतोव्याप्त सूर्यवैश्वानरप्रभम् ॥ ५४९ ॥

अथवा मातृकान्यासमेवमेव समाचरेत् ।
अकार तालौ विन्यस्य मुखे चाकारमेव च ॥ ५५० ॥

इई लोचनयोर्न्यस्य उऊ श्रवणयोस्तथा ।
ऋॠ नासापुटे चैव ऌॡ गण्डद्वये तथा ॥ ५५१ ॥

एऐ दशनपङ्क्तौ च ओ औ ओष्ठगतौ स्मरेत् ।
अं इत्येव ललाटे तु विसर्ग रसने तथा ॥ ५५२ ॥

यकारं त्वग्गत न्यस्य रेफं चक्षुषि विन्यसेत् ।
लकारं नासिकायां तु वकार दशनाग्रतः ॥ ५५३ ॥

श्रोत्रे शकार विन्यस्य षकारमुदरे तथा ।
सकारं कटिदेशे तु हकार हृदये तथा ॥ ५५४ ॥

क्षकार नाभिदेशे तु विन्यसेद्द्विजसत्तम ! ।
पवर्गो बाहुरेकस्तु तवर्गस्तु द्वितीयक. ॥ ५५५ ॥

टवर्गश्च चवर्गश्च जङ्घाद्वयमुदाहृतम् ।
कवर्गोऽङ्गुलय सर्वा विज्ञातव्या द्विजोत्तम ! ॥ ५५६ ॥

एवं हि वर्णसन्धानं कृत्वा चैव ततः परम् ।
आमूर्ध्नश्चरणान्तं च विन्यसेद्द्वादशाक्षरम् ॥ ५५७ ॥

अङ्गोपाङ्गस्थितिं कुर्यात् स्थानेषु हृदयादिषु ।
चक्रादिवैनतेयान्तं प्रागवन्यस्त्वा क्रमेण तु ॥ ५५८ ॥

सर्वान् लाञ्छनमन्त्रांस्तु ततो दामोदरादिकान् ।
तच्छक्तिकास्तथा मन्त्रान् पूर्ववद्विनिवेशयेत् ॥ ५५९ ॥

उपसंहृतिपूर्वान्तं सर्वं कृत्वा क्रमेण तु ।
ततस्तत्परमं ब्रह्म हृदिस्थं पूर्ववत् स्मरेत् ॥ ५६० ॥

ततस्तु मन्त्रसन्धानं कृत्वा पूर्वोक्तवर्त्मना ।
सहस्रशिरसं दैवमित्यादीन् पाठयेत् क्रमात् ॥५६१॥

एवं स्थूलानुसन्धानमेतत्ते कथितं मया ।
एषु प्रोक्तेषु विप्रेन्द्र ! सन्धानेषु परादिषु ॥ ५६२ ॥

सन्धानमेकं कृत्वा तु गुरुरिच्छानुरूपतः ।
ततोऽर्चयित्वा देवेशं शयने विम्बवृत्तिकम् ॥ ५६३ ॥

सास्पर्शिकैरासनाद्यैर्विविधैरौपचारिकैः ।
हृदयङ्गमसंज्ञैश्च मधुपर्कादिभिर्द्विज ! ॥ ५६४ ॥

परमान्नादिभिश्चान्नैः पवित्रै पानकैस्तथा ।
अन्यैश्च विविधैर्भोगैर्यथा चानुक्रमेण तु ॥ ५६५ ॥

सर्वं तु संप्रदानान्तं कृत्वा पश्चात्तु मण्डले ।
सन्निधीकृत्य सपूज्य महता विभवेन तु ॥ ५६६ ॥

अग्नौ सन्तर्पयेत् साङ्गं समित्सप्तकपूर्वकम् ।
जुहुयुर्मूर्तिपाश्चापि स्वे स्वे कुण्डे यथाक्रमम् ॥५६७॥

प्रागादिदिक्षु कुण्डेषु क्रमेण समिधः स्मृताः ।
पलाशवृक्षखदिरबिल्वोदुम्बरभूरुहाम् ॥ ५६८ ॥

आग्नेयादिविदिक्षु स्यु पिप्पलप्लक्षसंभवाः ।
न्यग्रोधप्रभवाश्चैव काश्मर्यप्रभवास्तथा ॥ ५६९ ॥

पलाशसमिधोऽन्यत्र भूयसा परिकल्पने ।
उक्ताभावे तु सर्वत्र पालाश्यः समिधो मताः ॥ ५७० ॥

चतस्रो धेनव स्थाप्या दक्षिणस्यामुदङ्मुखाः ।
गङ्गासरस्वतीगोदायमुनारूपधारिणी ॥ ५७१ ॥

दुग्धैस्तदीयैः श्रपणं चरूणामाहुतीस्तथा ।
श्रपयेत् पयसा पूर्वं शालितण्डुलमाढकम् ॥ ५७२ ॥

कृसरैर्दक्षिणाग्नौ तु पाश्चात्ये गुलमिश्रितम् ।
उदीच्याग्नौ हरिद्रान्नं शुद्धान्नमितराग्निषु ॥ ५७३ ॥

प्रत्येक शतमष्टौ च होमा स्युः समिदादिभिः ।
तदर्धं वाथ पादं वा देशकालानुरूपतः ॥ ५७४ ॥

तिलशालियवावेणुर्होमबीजान्यनुक्रमात् ।
तिलैरितरकुण्डेषु तैर्वा सर्वत्र कल्पयेत् ॥ ५७५ ॥

स्वमूर्तिकुम्भान्मन्त्रेण जलमुद्धृत्य भाजने ।
बिम्बमूर्ध्नि क्रमाद्देय सर्वैरेकायनादिकैः ॥ ५७६ ॥

चतुर्दर्भकृतेनैव कूर्चेन तु ततो द्विज ! ।
पलाशखदिराश्वत्थबिल्वशाखाभिरम्बुभिः ॥ ५७७ ॥

सिञ्चेयुर्मूर्तिपा सम्यग्वेदिकाकलशै स्थितै ।
आचार्य कोणदेशस्थैस्तोयैर्वेतसशाखया ॥ ५७८ ॥

सन्तर्पयित्वा तदनु मन्त्रं सपरिवारकम् ।
आज्यादिना प्रभूतेन दत्वा पूर्णाहुति ततः ॥ ५७९ ॥

दीक्षाविधिक्रमेणैव सकला तत्वपद्धतिम् ।
सशोध्य परभागस्थस्त्वाचार्य सुसमाहितः ॥ ५८० ॥

भगवन्तं कृते त्वेवं बिम्बस्थं श्रावयेत् क्रमात् ।
मनसा सुविशुद्धेन इदं मन्त्रमुपस्थितः ॥ ५८१ ॥

"त्वया सन्निहितेनात्र भवितव्यमधोक्षज ! ।
मत्पूर्वाणा हि भक्ताना सिद्धिहेतोर्निरञ्जन ! " ॥५८२॥

ततः स भगवान्मन्त्र प्रबुद्ध कमलेक्षणः ।
बिम्बमुत्थापयन् ध्यायेदाचार्येण तु संमुखम् ॥ ५८३ ॥

कृत्वा तु पादपतनं अष्टाङ्गेन तु साधक ।
बिम्बात्मना प्रयातानां क्ष्मादीनामङ्गरूपिणाम् ॥५८४॥

आपादनेऽपि पूर्णार्थं पिण्डीभूतार्थमेव च ।
आरम्भादेव जातानां छिद्राणां शमने तु वै ॥ ५८५ ॥

आप्यायनार्थं मन्त्राणा द्रव्यैर्होमं समाचरेत् ।
द्विषट्केनाहुतीना च एकैकेन चतुर्हृदा ॥ ५८६ ॥

आचाङ्त्रेर्जानुपर्यन्तं स्पृष्ट्वाज्यं होमयेत् पुरा ।
आनाभिजानुदेशाच्च तथैव जुहुयाद्दधि ॥ ५८७ ॥

नाभेराकण्ठतः क्षीरमामूर्ध्नः कण्ठतो मधु ।
संमिश्र्य जुहुयात् सर्व स्पृष्ट्वा देहं तु चाखिलम् ॥

दत्वा घृतेन वै पश्चात् पूर्णां मूलेन तत्परम् ।
संस्कृत्य बिम्बवत् पीठं भिन्नं ब्रह्मशिला तथा ॥ ५८९ ॥

प्राणाभिमानदेवं वा यस्य यो विहितस्तु वै ।
वेष्टयित्वाम्बरैश्चित्रैश्चक्रमन्त्रेण वै तत ॥ ५९० ॥

कार्यो ब्रह्मशिलाहोम शताष्टाधिकसख्यया ।
[2]गायत्रीभिस्तदर्धं च बह्वृचाद्यै पृथक् पृथक् ॥

[1]अजस्य नाभावित्यादिमन्त्रैरेकायनैस्तत. ।
[3]अब्धादि भूतमूर्तिं तु भोग्यं वाप्यपृथक् स्थितम् ॥

देवताना त्वधिष्ठान पीठं कृत्वा तु बुद्धिगम् ।
होतव्य प्रणवेनैव स्वय व्याहृतिभिस्तत ॥ ५९३ ॥

अपरैर्बलमन्त्रेण प्रणवान्तेन "लाङ्गलिन्" ।
ततो हवनमन्त्रेण तर्पणीय तदेव हि ॥ ५९४ ॥

स्वनाम्ना प्रणवेनैव स्वाहान्तेनापरैस्तथा ।
संरोधस्तर्पिताना च कार्य पूर्णान्तमेव हि ॥ ५९५ ॥

साम्भसा विष्टरेणैव भावेन सजपेन तु ।
सर्वै स्वकस्य देवस्य स्वकीयासु च मूर्तिषु ॥ ५९६ ॥

शब्दात्मिकासु मूर्तासु तद्वच्छ्रुतिमयस्य च ।
प्रासादस्याथ परित कुण्डेष्वष्टासु च क्रमात् ॥५९७॥

कुण्डसंस्कारपूर्वं तु सर्व कृत्वा तु मूर्तिषु. ।
हवनं विधिवत् कुर्याद्द्रव्यै पूर्वोदितै. क्रमात् ॥

कृत्वैवं च तदा दिक्षु मूर्तिपान् विनिवेश्य च ।
पार्श्वदेशे तु कुण्डाना तर्पयेत् पायसेन तु ॥ ५९९ ॥

दक्षिणां च यथाशक्ति दद्याद्धेमादिकी तत. ।
गृहीत्वा दक्षिणां, मन्त्रः प्रीणनीयस्तु तैस्तत. ॥

बिम्बस्य निकटे स्थित्वा इम मन्त्रमुदीरयेत् ।
प्राप्ते लग्नोदये विप्र ! सन्निरोद्ध्य जगद्गुरुम् ॥

"क्षणं क्षमस्व भगवन् ! सर्वज्ञ ! करुणात्मक !
निवेशयामि ते यावत् प्रासादे ब्रह्मपीठिकाम्" ॥

अथ निद्रायमाण तु देवं स्तुत्वावकुण्ठ्य च ।
अर्चयित्वा नमस्कृत्य तत्र सर्वान् प्रवेशयेत् ॥ ६०३ ॥

विप्रानेकायनान् वापि तथा वै बह्वृचादिकान् ।
स्वस्वशाखोत्थितान् मन्त्रान् पाठयेत् क्रमयोगत. ॥

स्तुतिपाठकपूर्वांश्च नृत्तगीतपरायणान् ।
वीणावेणुमृदङ्गादीनितराश्च प्रवेशयेत् ॥ ६०५ ॥

विदिक्स्थान् प्रणवे जापे मूर्तिपास्तु निवेदयेत् ।
दिक्स्थितान् मूर्तिपान् विप्र ! द्वादशार्णे निवेदयेत् ॥

रक्षामुद्रा तत कृत्वा दर्शयेत् सर्वदिक्ष्वथ ।
शाययेद्दर्भशय्याया यजमानमुपोषितम् ॥ ६०७ ॥

स्थण्डिले स्वप्नसिद्ध्यर्थं प्राक्शिरस्क ततो द्विज ! ।
एवं कृत्वाधिवास तु जागरेण नयेद्गुरु. ॥ ६०८ ॥

प्रभाताया तु शर्वर्या कृत्वा स्नानादिका क्रिया ।
प्रतिष्ठामारभेत् पश्चाद्देशिक. शास्त्रवित्तम ॥ ६०९ ॥

प्रबुद्धं यजमानं तु स्वप्नं पृच्छेच्छुभाशुभम् ।
तत्राशुभोपशान्त्यर्थं तदानी जुहुयाद्गुरु. ॥ ६१० ॥

शत सहस्रं साष्ट वा यथाशक्त्यथवा द्विज ! ।
मध्वाज्यक्षीरसमिश्रान् सफलाश्च तिलानपि ॥ ६११ ॥

अस्त्रसंपुटितेनैव नाम्ना स्वाहान्वितेन च ।
दोषं जहि जहीत्येवं पदं नामावसानकम् ॥ ६१२ ॥

केवलेनाथवाज्येन सिंहमन्त्रेण होमयेत् ।
एवं दु.स्वप्नशान्तिं तु कृत्वा स्थापनमाचरेत् ॥६१३॥

प्रासादं दर्भशाखाभिर्बहिरन्तश्च मार्जयेत् ।
विकीर्य साक्षतं पुष्प गुग्गुलुं धूपयेत् पुनः ॥ ६१४ ॥

सहमूर्तिधरैर्विप्र ! शिल्पिभिश्चाथ देशिक. ।
सार्घ्यपुष्पाक्षतकर प्रासादान्तं व्रजेत्तत. ॥ ६१५ ॥

हन्यात् सिद्धार्थकैस्तत्स्थान् विघ्नानस्त्राभिमन्त्रितै. ।
प्राङ्मध्ये विधिनानेन श्वभ्र वा साम्प्रतं खनेत् ॥६१६॥

तदर्थं गर्भगेहं तु सूत्रपातैर्विभाजयेत् ।
तद्विधान मुनिश्रेष्ठ ! यथावदवधारय ॥ ६१७ ॥

प्रासाद एकद्वारे तु गर्भमान विनिश्चितम् ।
द्वारात् पश्चिममिन्त्यंतं दक्षिणोत्तरमायतम् ॥ ६१८ ॥

सप्तधा विभजेत् सम्यक्, पैशाचः प्रथमः स्मृतः ।
द्वितीयो मानुषो भागस्तृतीयो दैवसञ्ज्ञितः ॥ ६१९ ॥

ब्राह्मश्चतुर्थो विज्ञेयः क्रमादन्ये त्रयस्तथा ।
दैवमानुषपैशाचा विज्ञेया द्विजसत्तम ! ॥ ६२० ॥

अथवा नवधा कुर्याद्दक्षिणोत्तरमायतम् ।
पैशाचः प्रथमो भागो द्वितीयो मानुषः स्मृतः ॥६२१॥

तृतीयश्च चतुर्थश्च भागौ दैविकसंज्ञकौ ।
ब्राह्मस्तु पञ्चमो भागो वेदितव्यस्ततः परम् ॥ ६२२ ॥

दैवमानुषपैशाचाश्चत्वारोऽन्ये क्रमेण तु ।
प्रासादे तु चतुर्द्वारे चतुर्दिक्षु समे पदे ॥ ६२३ ॥

विभजेत् सप्तधा मध्ये भागः स्याद्ब्राह्मसञ्ज्ञितः ।
दिव्यमानुषपैशाचाः क्रमात् षड्भिक्रमेण तु ॥ ६२४ ॥

अथवा चाष्टधा कृत्वा मध्ये ब्राह्मं चतुष्पदम् ।
दिव्यादिसञ्ज्ञितं विप्र ! क्रमात् षड्भिस्त्रयं भवेत् ॥

अथवा नवधा गर्भं विभजेत् सर्वदिक्पदे ।
मध्यमं तु भवेद्ब्राह्मं दिव्यं षडभिस्त्रयेण वा ॥ ६२६ ॥

दिव्यब्राह्मं भवेत् षडभिस्त्रया षडभिस्त्रया दैविकसञ्ज्ञितम् ।
मानुषं तद्बहिः षड्भिस्त्रया पैशाचं तद्बहिर्भवेत् ॥६२७॥

यद्वा द्विरष्टधा भङ्क्त्वा ब्राह्ममध्ये चतुष्पदम् ।
दिव्यब्राह्मं बहिः षडभिस्त्रया दिव्यं षड्भिस्त्रयेण च ॥

षड्भिर्द्वयं मानुषं स्यात् पैशाचं षड्भिर्जं भवेत् ।
एकद्वारेऽपि भवने एवं वा परितो भजेत् ॥ ६२९ ॥

चतुर्द्वारेऽपि भवने ब्राह्माख्ये मध्यमे पदे ।
चतुर्दिग्वीक्षमाणस्य स्थापनं चतुरात्मनः ॥ ६३० ॥

प्रासादे एकद्वारे तु एकवेरं द्विजोत्तम ! ।
ब्राह्मदैविकभागाभ्यां दैवमानुषयोस्तु वा ॥ ६३१ ॥

ब्राह्मे वा दैविके वाथ तस्मिन् दिव्याश्रिते तु वा ।
मानुषाश्रितदैवे वा स्थापयेत् फलभेदतः ॥ ६३२ ॥

चतुर्द्वारे तु भवने बहुवेरं निवेशयेत् ।
विबुधब्रह्मभागाभ्यां दिव्यमानुषयोस्तु वा ॥ ६३३ ॥

ब्राह्मादिमानुषान्तेषु त्रिषु भागेषु वा द्विज ! ।
ब्राह्माश्रिते तु दिव्ये वा तस्मिन् वा मानुषाश्रिते ॥

सपीठबिम्बमानानां बृहत्त्वस्यानुरूपतः ।
चतुर्द्वारे तु भवने ब्राह्मं एव भवेत् सदा ॥ ६३५ ॥

ब्राह्मादिमानुषान्तेषु त्रिषु भागेषु चोत्तमम् ।
शयनं, ब्राह्मदिव्याभ्यां मध्यमं, त्वधमं स्मृतम् ॥

दिव्यमानुषभागाभ्यामेव विद्धि त्रिधा स्थितम् ।
ब्राह्मे वा ब्राह्मदिव्ये वा दिव्ये वा ब्रह्मसंश्रिते ॥६३७॥

दिव्यमानुषयोर्वापि दिव्ये वा मानुषाश्रिते ।
आसनं विहितं विप्र ! स्थानेऽप्येवं विधीयते ॥ ६३८ ॥

यानगं स्थापयेद्ब्राह्मे दिव्यमानुषयोस्तु वा ।
एकवेरविधाने तु तदग्रं भागयोर्द्वयोः ॥ ६३९ ॥

आराधनार्थतो वेदिं स्थापयेन्मुनिपुङ्गव ! ।
यदा चोत्सवबिम्बादिबिम्बानां संस्थितिस्तदा ॥

अग्रपीठोपगं भागं तृतीयं वा समे पदे ।
सप्ताष्टनवधा वापि भजेद्भित्तिद्वयान्तरे ॥ ६४१ ॥

द्विरष्टधा वा, मध्ये तु क्रमाद्भागत्रयं त्यजेत् ।
चतुष्कं त्रितयं षट्कं ततः शेषेषु दक्षिणे ॥ ६४२ ॥

स्थापयेदौत्सवं बिम्बं देवीयुक्तं तु वामतः ।
भागेषु क्रमशो विप्र ! तीर्थबिम्बसमन्वितम् ॥ ६४३ ॥

बिम्बं नित्योत्सवार्थं च तथा शयनकौतुकम् ।
निमित्तस्नपनार्थं च बिम्बं तरुणकौतुकम् ॥ ६४४ ॥

आराधनार्थं देवस्य मध्ये भागद्वयोरपि ।
स्नपने मूलबिम्बस्य क्रियमाणे बहूदके ॥ ६४५ ॥

यथा चौत्सवबिम्बाद्या स्नानीयजलबिन्दुभिः ।
न स्पृश्यते तथा तेषां स्थापनं तु समाचरेत् ॥ ६४६ ॥

सङ्कटे सति तद्देशे बाह्ये तु मुखमण्डपे ।
स्थापयेत् सर्वबिम्बानि तत्रापि सति संकटे ॥ ६४७ ॥

प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।
स्थानं सुविस्तृतं कृत्वा प्रासादाग्रं च वर्त्यदिक् ॥

दिक्त्रयेऽभिमते कुर्याद् विदिक्ष्वभिमतेषु वा ।
खट्वरिकाप्रदेशे वा सुदेशे सुपरीक्षिते ॥ ६४९ ॥

स्थापयेद्विधिना यात्राबिम्ब देवीसमन्वितम् ।
अन्यानि सर्वबिम्बानि बहि(र्वै)र्न स्थापयेत् क्वचित् ॥

शास्त्रज्ञो देशिकेन्द्रस्तु बहुबेरविधावपि ।
निमित्तस्नपनादौ तु योग्ये बृहति सत्तम ! ॥ ६५१ ॥

स्थापिते मूलबिम्बे तु एवमेव समाचरेत् ।
विना वै कर्मबिम्ब च बिम्ब नित्योत्सवार्थत ॥६५२॥

उभय स्थापयेन्नित्य प्रासादाभ्यन्तरे क्वचित् ।
अयोग्ये मूलबिम्बे तु सदा स्नपनकर्मणि ॥ ६५३ ॥

यात्राबिम्बादिबिम्बानि सदा गर्भगृहान्तरे ।
सर्वाणि स्थापनीयानि न बाह्ये तु कदाचन ॥ ६५४ ॥

बहुबेरविधौ भागे तदग्रे सप्तभाजिते ।
भागमेक परित्यज्य दक्षिणेऽथ पदद्वये ॥ ६५५ ॥

स्थापयेदौत्सव बिम्बं चतुर्थे स्नपनास्पदम् ।
कर्मबिम्बं च तद्वामे तीर्थबिम्बादियोजनम् ॥ ६५६ ॥

वेदि. स्थाप्या तदन्यस्मिन् भागे भागद्वयोऽपि वा ।
पैशाचमथवाप्यग्रे त्यक्त्वा भागद्वयोरपि ॥ ६५७ ॥

स्थाप्य बिम्ब तदूर्ध्वे तु कर्मबिम्बस्य चास्पदम् ।
तस्य दक्षिणपार्श्वे तु यात्रामूर्ति तु विन्यसेत् ॥ ६५८ ॥

वामपार्श्वे ततोऽन्येषा स्थापन विहितं भवेत् ।
अष्टधा नवधा भाक्ते स्थापयेत् पञ्चमे पदे ॥ ६५९ ॥

कर्मबिम्बं तु नवमे पदे षोडशभाजिते ।
अन्येषा सर्वबिम्बाना प्राग्वत् स्थापनमाचरेत् ॥६६०॥

मूलबिम्बे शयाने तु विशेष. कथ्यते शृणु ।
सप्तभाक्तेऽग्रभागे तु प्राग्वद्भित्तिद्वयान्तरे ॥ ६६१ ॥

दत्त्वा दक्षिणभागे तु भागाना तु चतुष्टयम् ।
स्थापयेत् पञ्चमे वापि चतुर्थे कर्मकौतुकम् ॥ ६६२ ॥

अष्टधा नवधा भाक्ते षष्ठे वा पञ्चमेऽपि वा ।
अग्रे द्विरष्टधा भाक्ते द्वादशैकादशे तु वा ॥ ६६३ ॥

दशमे नवमे वापि स्थापयेत् कर्मकौतुकम् ।
दक्षिणोत्तरयो. प्राग्वदन्येषां न्यसन भवेत् ॥ ६६४ ॥

आराधनार्थतो वेदि. स्थापनीया तु पूर्ववत् ।
परित. सप्तधा भक्ते नवधाष्टद्विरष्टधा ॥ ६६५ ॥

मूलबिम्बाग्रत पङ्क्त्या द्वितीयायामथापि वा ।
सर्वेषां कर्मबिम्बानां प्राग्वत् स्थापनमाचरेत् ॥ ६६६ ॥

स्थापनीया च विप्रेन्द्र ! प्राग्वदर्चनवेदिका ।
पीठोपर्यपि वा देवं य त्वाराधयते सदा ॥ ६६७ ॥

मध्ये रत्नोपलं पीठे न्यस्त्वोर्ध्वे स्थापयेत्तु ताम् ।
देवीसमन्वित यत्र स्थापनं भवति द्विज ! ॥ ६६८ ॥

मूलबिम्बस्य पार्श्वे तु पीठदेशं विसृज्य च ।
सपीठाना तु देवीना स्थापन तु समाचरेत् ॥ ६६९ ॥

एका सव्ये दक्षिणे वा, स्थाप्या द्वे दक्षवामयो ।
चतस्रस्तु क्रमेणैव स्थाप्या दक्षिणवामयो ॥ ६७० ॥

प्रासादे चलबिम्बं तु स्थाप्यते यत्र सत्तम ! ।
मध्ये वेदि तु संस्थाप्य तदूर्ध्वे स्थापयेत्तु तत् ॥६७१॥

यद्वा दिव्ये मानुषे वा पीठं स्थाप्य तदूर्ध्वत. ।
सन्निवेश्य च तद्बिम्ब पूजाकाले ह्युपस्थिते ॥ ६७२ ॥

मध्ये भद्रासन न्यस्त्वा तदूर्ध्वे विनिवेश्य च ।
तत् पूजयित्वानुदिन भूय पीठोपरि न्यसेत् ॥ ६७३ ॥

स्वयंव्यक्ते विमानादौ स्थाने सिद्धप्रतिष्ठिते ।
मुनिमुख्यैस्तु तत्रैवं विशेष शृणु सत्तम ! ॥ ६७४ ॥

सपीठ भगवद्बिम्बं मूलाख्यं स्थापित पुरा ।
देशे यावति, तद्देशद्वारयोरन्तरं तु यत् ॥ ६७५ ॥

तत् त्रिधा सुसमं कृत्वा आरभ्य द्वारपार्श्वतः ।
पैशाचं मानुषं दिव्य क्रमाद्भागत्रयं भवेत् ॥ ६७६ ॥

दक्षभित्ते. समारभ्य दिव्यभागं भजेत् समम् ।
सप्तधा वामभित्त्यन्त ततो वै दक्षिणादित. ॥ ६७७ ॥

पञ्चमे वा चतुर्थे वा स्थापयेत् कर्मकौतुकम् ।
तस्य दक्षिणपार्श्वे तु लक्ष्मीपुष्टिसमन्वितम् ॥ ६७८ ॥

स्थापयेदौत्सवं बिम्बं वामपार्श्वे नियोजयेत्।
अन्यानि सर्वबिम्बानि यथावत् क्रमयोगत. ॥ ६७९ ॥

द्वारात् पश्चिममित्यन्त यद्वा कृत्वा तु सप्तधा।
सन्त्यज्य द्वारपार्श्वे तु भाजयेद् द्वितयं पुन. ॥ ६८० ॥

तृतीयं दैविकं सप्त कृत्वा भित्तिद्वयान्तरे।
कर्मबिम्बादिबिम्बाना पूर्ववत् स्थापनास्पदम् ॥ ६८१ ॥

तत्रापि शयने विप्र! विधानमवधारय।
पञ्चमे षष्ठभागे वा कर्मबिम्ब नियोजयेत् ॥ ६८२ ॥

अन्येषा सर्वबिम्बाना पूर्ववत् स्थापन भवेत्।
स्वयव्यक्ते चतुर्द्वारे परित सप्तधा भजे(वे)त् ॥ ६८३ ॥

पैशाचं मानुष त्यक्त्वा तृतीये दैविके पदे।
अग्रभागे तु सौम्ये वा ईश्वरप्राग्वशेन तु ॥ ६८४ ॥

ईशानदिव्यभागे वा कर्मबिम्ब नियोजयत्।
यत्र प्रासादगर्भे तु एकस्मिन् न्यस्य पीठके ॥ ६८५ ॥

चतुरो वासुदेवाद्यानथवा केशवादिकान्।
प्रादुर्भावसमूह वा पङ्क्तिरूपेण योजयेत् ॥ ६८६ ॥

दिव्यक्रमेण तत्राय विशेष कथ्यते शृणु।
द्वारादिभित्तिपर्यन्तं दक्षिणोत्तरमायते ॥ ६८७ ॥

विभक्ते सप्तधा गर्भे ब्राह्मादिषु पदेषु च।
स्थापयेत् पङ्क्तिरूपेण पूर्वोक्तेनैव वर्त्मना ॥ ६८८ ॥

तत्रापि दक्षिणाशादिस्थापयेदुत्तरान्तिमम्।
यत्र चावृतिरूपेण स्थापयेत्तत्र सप्तधा ॥ ६८९ ॥

विभक्ते परितो गर्भे मध्ये ब्राह्मे नियोजयेत्।
प्रधानमूर्ति परितो दिव्ये वा मानुषे द्वयो ॥ ६९० ॥

अन्याश्च सकला मूर्ती स्थापयेदावृतिक्रमात्।
चतुर्व्यूहप्रतिष्ठाया वासुदेवं तु मध्यमे ॥ ६९१ ॥

तद्बहिर्दिव्यपङ्क्तौ तु संकर्षणं तु दक्षिणे।
प्रद्युम्नं पश्चिमे भागे अनिरुद्धं तथोत्तरे ॥ ६९२ ॥

स्वस्वकारणसंयुक्त मूर्त्यन्तरगतस्य च।
चातुरात्म्यचतुष्कस्य एवमेव नियोजयेत् ॥ ६९३ ॥

चातुरात्म्येषु नवसु नवमूर्तिमयेषु च।
आद्ये मध्ये वासुदेव प्रागाद्ये दिक्चतुष्टये ॥ ६९४ ॥

वासुदेवादिचत्वार स्थापनीया क्रमेण तु।
पञ्चमूर्तिप्रतिष्ठाख्ये द्वितये मध्यमे पदे ॥ ६९५ ॥

वासुदेव ततो दिव्ये संस्थाप्या दिक्चतुष्टये।
नारायणान्ताश्चत्वार सकर्षणपुरस्सरा ॥ ६९६ ॥

एव क्रमात् प्रतिष्ठानमाचरेत् सप्तकेऽपि च।
नवमूर्तिप्रतिष्ठाया वासुदेव तु मध्यमे ॥ ६९७ ॥

तद्बहिर्दिव्यभागस्थपदेष्वष्टासु च क्रमात्।
अष्टौ सकर्षणाद्याश्च वराहान्ताश्च मूर्तय ॥ ६९८ ॥

केशवादिप्रतिष्ठाया वासुदेव तु मध्यमे।
विभज्य दिव्यभाग तु द्वादशारोक्तवर्त्मना ॥ ६९९ ॥

प्रागादि स्थापयेद्देवान् केशवाद्यास्तु द्वादश।
यद्वा मानुषपङ्क्तौ तु कोणभागचतुष्टयम् ॥ ७०० ॥

संत्यक्त्वाऽन्येषु भागेषु प्रागादि स्थापयेत् क्रमात्।
संकटे सति वै कुर्याद्दिव्यमानुषयोरपि ॥ ७०१ ॥

एकबेरे समुदितस्थानभेदात् फलं शृणु।
ब्राह्मभागे तु मोक्ष स्याद्दिव्ये स्थानाभिवृद्धिकृत् ॥

भोगमोक्षफलावाप्तिर्ब्राह्मे दिव्यसमाश्रिते।
दिव्यभागफलावाप्तिर्मानुषाश्रितदैविके ॥ ७०३ ॥

दैवमानुषभागाच्च त्वैहिकामुष्मिकं फलम्।
विबुधब्रह्मभागाच्च सैहिकं तु गुणाष्टकम् ॥ ७०४ ॥

बहुबेरविधाने तु फलभेदं शृणु द्विज!।
ज्ञानादिगुणषटकस्य प्राप्तिर्ब्रह्मपदे भवेत् ॥ ७०५ ॥

सर्वकामफलप्राप्तिर्दैविके ब्रह्मसश्रिते।
विबुधब्रह्मभागे च दिव्यमानुषयोरपि ॥ ७०६ ॥

मानुषाश्रितदिव्ये च पूर्वमेवोदितं फलम्।
ब्राह्मादिमानुषान्तेषु भागेषु स्थापने सति ॥ ७०७ ॥

स्थानस्य यजमानस्य वृद्धि. स्याद्राजराष्ट्रयो.।
कर्मार्चास्थापने विप्र! फलभेदस्तु कथ्यते ॥ ७०८ ॥

ब्राह्मे सप्तविभक्ते तु चतुर्थे स्थापनं भवेत् ।
मोक्षद पञ्चमे भागे तत्सामीप्यफलप्रदम् ॥ ७०९ ॥

अष्टधा प्रविभक्ते तु पञ्चमे तु गुणाष्टकम्।
स्थापनं षष्ठभागे तु तत्सालोक्यफलप्रदम् ॥ ७१० ॥

नवधा प्रविभक्ते तु एवमेव भवेत् फलम् ।
तस्मिन् षोडशधा भक्ते नवमे गुणषट्कदम् ॥ ७११ ॥

दशमे स्थापनं विप्र ! द्वादशेकादशेपि च ।
विष्णुलोकपदावासमचिरात् संप्रयच्छति ॥ ७१२ ॥

दैविके सप्तभक्ते तु चतुर्थे स्थापन द्विज ! ।
सद्विवेक च धर्म च सौमनस्य प्रयच्छति ॥ ७१३ ॥

स्थापनं षष्ठभागे तु पुष्टिसौभाग्यवर्धनम् ।
अपमृत्युजय दद्याद्बलोत्साहसमृद्धिकृत् ॥ ७१४ ॥

विभक्ते नवधा तस्मिन्नेवमेव भवेत् फलम् ।
द्विरष्टधा विभक्ते तु नवमे स्थापनं द्विज ! ॥ ७१५ ॥

दिव्यभोगफलावाप्ति प्रयच्छत्यचिरेण तु ।
दशमेकादशे भागे द्वादशे च नियोजनम् ॥ ७१६ ॥

धनधान्यसमृद्धि च भूमिप्राप्ति ददाति च ।
एष तु परितो भक्ते ब्राह्मभागे नियोजनम् ॥ ७१७ ॥

शश्वत् कैवल्यफलद अग्रदिव्यपदे तु तत् ।
भोगप्रद तथा चैव बलोत्साहसमृद्धिकृत् ॥ ७१८ ॥

ईशानदिव्यभागे तु स्थापनं सप्रयच्छति ।
आयुरारोग्यमैश्वर्य राज्ञा विजयमेव च ॥ ७१९ ॥

स्थानस्य महतीं वृद्धि तथा जनपदस्य च ।
स्थापनं सौम्यदिव्ये तु भोगमोक्षफलप्रदम् ॥ ७२० ॥

दिव्यब्रह्माख्यपङ्क्तौ तु दिव्यवत् स्थापनं भवेत् ।
यत्र यत्र पदे प्रोक्त बिम्बाना सन्निवेशनम् ॥ ७२१ ॥

तत्तत्समं द्विधाकृत्वा स्थापने ह्यमृताशके ।
फलान्युक्तानि सिध्यन्ति आग्नेये विपरीतकृत् ॥

प्रासादस्यान्तरे विप्र ! यात्राबिम्बस्य योजनम् ।
स्थानस्य यजमानस्य राज्ञो जनपदस्य च ॥ ७२३ ॥

ददाति महती लक्ष्मीं तेजश्चापि दिने दिने ।
एतदेव फल विप्र ! मध्यम मुखमण्डपे ॥ ७२४ ॥

प्रथमावरणादौ च स्थाने मन्दफल भवेत् ।
एवमेव फलं विप्र ! अन्येषा स्थापनेऽपि च ॥ ७२५ ॥

मूलबिम्बादिबिम्बाना सर्वेषा च महामते ! ।
प्रमादाद्बुद्धिपूर्वाद्वा स्वं स्व स्थान यथोदितम् ॥

परित्यज्य तदन्यस्मिन् स्थाने संस्थापिते सति ।
स्थानं च यजमानश्च राजा राष्ट्रं विनश्यति ॥ ७२७ ॥

तद्देशवासिन सर्वे जना व्याध्यादिपीडिता ।
भवेयु स्यादनावृष्टिर्दुर्भिक्ष शत्रुपीडनम् ॥ ७२८ ॥

तस्माद्धितैषी राष्ट्रस्य स्वस्य राज्ञस्तथैव च ।
तथा यथोदितस्थानव्यत्ययं न समाचरेत् ॥ ७२९ ॥

प्रमादालस्यपूर्वेण दोषेण स्थापनेऽपि च ।
व्यत्ययादचल बिम्ब वर्जयित्वा तु जङ्गमम् ॥ ७३० ॥

स्वे स्वे यथोदिते स्थाने संस्थाप्य परिपूजयेत् ।
विशेषेण स्वयव्यक्ते सिद्धाद्येश्च प्रतिष्ठिते ॥ ७३१ ॥

प्रासादे चलबिम्ब तु स्वे स्वे स्थाने निवेशयेत् ।
भिन्ने प्रेक्षावशान्मध्ये सति भूय समाचरेत् ॥ ७३२ ॥

क्षालितेऽस्याम्बुना, लिप्ते हृदा वै चन्दनादिना ।
श्वभ्रेऽधोघटरुद्धाना मन्त्राणा च निरोधनम् ॥ ७३३ ॥

पूर्वोक्तेन विधानेन धिया स्वे स्वेऽयने तथा ।
कृत्वार्चनं यथोद्दिष्टं पूर्णान्तं तत्र विन्यसेत् ॥ ७३४ ॥

बाहुल्येन तु षट्पञ्चचतुर्गोलकसमिताम् ।
पीठाद्विनिर्गता किञ्चिद्भूतले सुस्थिरा शिलाम् ॥

ग्रस्ता पीठेन मुक्त्यर्थं नवरन्ध्रकृता पुरा ।
समन्त्रेण तु तत्रापि प्रतिष्ठासीति पाठयेत् ॥ ७३६ ॥

प्रागादौ प्राभवेनाथ पञ्चकं पञ्चक न्यसेत् ।
शिलावटेषु द्रव्याणा तत्र वज्र च हाटकम् ॥ ७३७ ॥

हरितालमुशीरं च व्रीहयो दक्षिणे त्वथ ।
इन्द्रनीलमयश्चैव कासीसं चन्दनं तिला ॥ ७३८ ॥

मुक्ताफल च रजतं पारदं चाप्यदिक् तथा।
सहोशीराश्च वै मुद्गा. पद्मरागमथोत्तरे ॥ ७३९ ॥

कास्य च राजपाषाणं राजेन्द्र चणकै सह।
विशक विन्यसेन्मध्ये पूर्वमेव ततो बहि ॥ ७४० ॥

विदिक्ष्वप्यययोगेन त्वेवमन्यत् पृथक् पृथक्।
लोह वैडूर्यपूर्व तु चक्राङ्कं चाभ्रकं तथा ॥ ७४१ ॥

पाष्टिक त्वीशदिग्वायो पुष्यरागो हरीतका।
गैरिकं शारिकाश्चैव मसूराण्यथ यातुदिक् ॥ ७४२ ॥

महानीलं च वङ्ग च तथा पाषाणमाक्षिकम्।
यवाः सागरुकाश्चैव आग्नेय्या स्फटिक तथा ॥

ताम्र मनश्शिला चैव गोधूमा शङ्खपुष्पिका।
मध्ये सर्वाणि तदनु ततो गर्तगणं तु तत् ॥ ७४४ ॥

लेपैराच्छादितं कृत्वा साङ्ग मन्त्रं पदे पदे।
पूजयित्वा यजुर्वेदाश्चमषट्काश्च पाठयेत् ॥ ७४५ ॥

तदूर्ध्वे विन्यसेत् पीठं तच्छुभ्रे विनिवेश्य च।
अष्टलोहमयं चक्रं तदूर्ध्वे तु महामते ! ॥ ७४६ ।

द्वादशाख्याविशेषोक्त आधारो यस्य य स्वक.।
हैम तदूर्ध्वे कमल तज्ज वा ताम्रमेव वा ॥ ७४७ ॥

यथाक्रमस्थितं ह्येतत् पञ्चकं चतुरात्मनि।
न्यसेदनन्तं चक्रस्य मीनकूर्मौ तु तस्य वै ॥ ७४८ ॥

कूर्मानन्तौ तु मीनस्य मीनानन्तौ तु तस्य च।
सर्वस्य विहितं पद्म तस्यानन्तं तु विन्यसेत् ॥ ७४९ ॥

लक्ष्म्यादीना च शक्तीना चक्रं स्थापनकर्मणि।
न्यस्य पूर्णान्तिक कृत्वा कर्मण्यत्र च तर्पणम् ॥ ७५० ॥

मण्डपे तु खगेशस्य एवमेव समाचरेत्।
सह मूर्तिधरै प्राग्वत् कार्या दर्भोदककिया ॥ ७५१ ॥

अथ विध्यन्तर वक्ष्ये समाकर्णय साम्प्रतम्।
पुरैव संस्कृता विप्र ! न्यसेद्ब्रह्मशिला तत. ॥ ७५२ ॥

किञ्चित्पीठतलान्न्यूना समा श्लक्ष्णा दृढा द्विज !।
कृत्वा नवपदा पूर्व पद्म तस्या पदे पदे ॥ ७५३ ॥

विलिख्य रेखया सम्यक् खनेत सर्वेषु कर्णिकाम्।
गर्भम ये शिलामात्राद्व्यायामयो खनेत् ॥ ७५४ ॥

तत्पूर्वसूत्रमार्गेण संचार्योत्तरदिङ्नयेत्।
श्वभ्र तत्रापि मध्ये तु शुभ कुर्यात् षडङ्गुलम् ॥ ७५५ ॥

तस्मिस्तु रत्नसंपूर्ण हेमज वाथ ताम्रजम्।
चतुरङ्गुलमात्र तु कलशं कम्बुरूपिणम् ॥ ७५६ ॥

हृन्मन्त्रेण तु संमन्त्र्य गायत्र्या विनिवेश्य च।
सापिधानं तु त कृत्वा सुधालेप तथोपरि ॥ ७५७ ॥

दत्वा ब्रह्मशिला न्यस्येत् प्राङ्मन्त्रपरिभाविताम्।
व्यापकत्वं समालम्ब्य स्वयमेव तथा गुरु ॥ ७५८ ॥

ता शिला व्यापिका व्यायेदाधाराधेयविग्रहाम्।
तत्र सर्वाध्वगन्यास मूलमन्त्रेण भावयेत् ॥ ७५९ ॥

एव तत्सन्निधि कृत्वा पश्चात्तदुपरि द्विज !।
न्यासं रत्नादिक कुर्यात्तथा तदवधारय ॥ ७६० ॥

हैममग्नि, तथानन्तं राजतं, हेमजा धराम्।
अष्टलोहमयं पद्मं मध्ये ब्रह्मशिलोपरि ॥ ७६१ ॥

प्राच्यादौ पद्मगर्भेषु क्रमादीशानगोचरम्।
वज्र च सूर्यकान्त च इन्द्रनीलं तथैव च ॥ ७६२ ॥

महानीलं मुनिश्रेष्ठ ! मुक्ताफलमत परम्।
पुष्यरागं ततश्चैव पद्मरागमत. परम् ॥ ७६३ ॥

ऐशान्ये न्यस्य वैडूर्य मध्यत स्फटिकम् न्यसेत्।
प्रागादौ रजत ताम्र त्रपु वङ्गं च रीतिकम् ॥ ७६४ ॥

लोह तथायस कास्यं मध्ये हेम निवेश्य च।
तालं मनश्शिला, छिन्नपिष्टकं कुष्ठमेव च ॥ ७६५ ॥

स्रोतोञ्जन तु दरदं सौराष्ट्री हेमगैरिके।
मध्ये तु राजपाषाण पारदं वापि सर्वत ॥ ७६६ ॥

गोधूमाश्च यवान् वन्यान् मुद्गमाषास्तथैव च।
चणकान् मुनिशार्दूल ! कुलुत्थ च मसूरकम् ॥ ७६७ ॥

क्रमादष्टासु विन्यस्य मध्ये सिद्धार्थकास्तिलान्।
ह्रीबेर रजनी मांसी सहदेवी वचा तथा ॥ ७६८ ॥

विष्णुक्रान्ता वला मोटा श्यामाकं शङ्खपुष्पिकाम् ।
प्रागादौ मध्यपर्यन्त विन्यसेन्मूलसन्ततिम् ॥ ७६९ ॥

रत्नानामप्यलाभे तु शस्तं मुक्ताफलं भवेत् ।
लोहानामप्यभावे तु सुवर्णं शस्यते परम् ॥ ७७० ॥

धातूनामप्यलाभे तु हरिताल विशिष्यते ।
अलाभे सर्वबीजाना शालिबीज प्रशस्यते ॥ ७७१ ॥

अलाभे सर्ववस्तूना हेम सर्वत्र विन्यसेत् ।
तदभावे तु रजतं न्यसेन्मुक्ताफलानि वा ॥ ७७२ ॥

घृतेन पयसा चाथ भावितेन पुरैव तु ।
प्रदद्याल्लेपन विप्र ! सर्वगर्तेषु चैव हि ॥ ७७३ ॥

अहत सुसितं पश्चात्तत्रोपरि दुकूलकम् ।
अन्त· श्लक्ष्णं सुधालेप दत्वा, पीठ तु विन्यसेत् ॥

सन्धाय पूर्ववत्तच्च शिलया ब्रह्मसत्तम ! ।
पीठश्चभ्रेऽथ विन्यस्य सौवर्ण गारुड महत् ॥ ७७५ ॥

क्षीरं दधिघृतं लाजान्मधुपुष्पफलानि च ।
सर्वगन्धानि विप्रेन्द्र ! सर्वौषधियुतानि च ॥ ७७६ ॥

भावयेत् पूर्ववत् पीठ धर्माद्यैरखिलैर्युतम् ।
चिदासनमयीं व्याप्ति पुनस्तत्रोपरि न्यसेत् ॥ ७७७ ॥

हृदा तु विष्णुगायत्र्या एकैकमभिमन्त्र्य च ।
विन्यस्य कुर्याद्धवन यस्मिन् यस्मिस्तु कर्मणि ॥

पीठन्यासावधि यावत्तत पूर्णा जुहेद्गुरु· ।
चतुर्गुणितसूत्रेण वेष्टयेद्देवमन्दिरम् ॥ ७७९ ॥

च्छादयेन्नववस्त्रेण तथा वे दर्भमालया ।
ततस्तु मूर्तिपै· सार्ध प्रविशेद्यागमण्डपम् ॥ ७८० ॥

प्रतीक्षेल्लग्नकालं तु यावत् काल न याति च ।
तावद्विनोदैर्होमेश्च हास्यै· पाठैश्च संक्षिपेत् ॥ ७८१ ॥

प्राप्ते लग्नोदये विप्र ! शयनस्थं प्रबोधयेत् ।
अर्घ्यालिभनमाल्याद्यैरर्चयित्वा त्विमं पठेत् ॥ ७८२ ॥

" मन्त्रात्मन् ! रूपमात्मीयमाग्नेयमुपसंहर ।
समाश्रयस्व सौम्यत्वं स्थित्यर्थं परमेश्वर ! ॥ ७८३ ॥

नमस्तेस्तु हृषीकेश ! उत्तिष्ठ परमेश्वर ! ।
मदनुग्रहहेत्वर्थं पीठभूमि समाक्रम ! " ॥ ७८४ ॥

उद्धृत्य हृदयेनाथ त्यक्तनिद्रं च मन्त्रपम् ।
उत्थाप्य मूर्तिमन्त्रेण सहमूर्तिधरैर्बलात् ॥ ७८५ ॥

कुम्भं समुद्धरेत् सास्त्र स्वकुण्डनिकटे स्थितम् ।
उद्धरेयुर्दिशाहोमकर्तारो मङ्गलै· सह ॥ ७८६ ॥

अष्टौ विद्येश्वरान् कुम्भानाचार्यः पुरतो व्रजेत् ।
शलाकामात्रयाऽच्छिन्नधारया कुम्भमुद्वहन् ॥ ७८७ ॥

यद्वा प्रक्षिपमाणस्तु रत्नाश्च विविधान् बहून् ।
नानाविधैस्तु कुसुमैर्लाजाद्यान् मिश्रितान् बहून् ॥

प्रतिमामुद्वहन्तो ये मूर्तिधारास्त्वनन्तरम् ।
अन्ये यथा न गच्छेयुरन्तराचार्यविम्बयो· ॥ ७८९ ॥

अष्टकुम्भधराश्चान्ये ये च मङ्गलधारका ।
परितस्तेऽपि गच्छेयु पठन्त· " शाकुन " तथा ॥

वाग्यतो यजमानस्तु कुशपाणि प्रणामवान् ।
तेषां वै पृष्ठतस्त्वन्ये गच्छेयु· परिचारका· ॥ ७९१ ॥

तोरणेन च निष्क्रम्य प्रदक्षिणचतुष्टयम् ।
कुर्यात् प्रासादपीठस्य द्वाराग्रे सन्निरोध्य च ॥ ७९२ ॥

पाद्यार्घ्याचमनं दत्वा हृन्मन्त्रेण प्रवेशयेत् ।
शाखाद्यमस्पृशन्तं च पाठयेत्तद्विदस्तत· ॥ ७९३ ॥

चतुश्चक्रेति तदनु पुरमेकादशेति यत् ।
वर्माभिमन्त्रितेनाथ दुकूलेन सितेन च ॥ ७९४ ॥

पादाम्बुरुहनाल प्राक शिखामन्त्रेण वेष्टयेत् ।
अग्नीषोमौ समीकृत्य प्रणवाद्यन्तकेन नु ॥ ७९५ ॥

मूलमन्त्रेण पीठोर्ध्वे बिम्बं संस्थापयेत् स्थिरम् ।
द्वारमध्यं न सन्त्याज्यं देवस्थापनकर्मणि ॥ ७९६ ॥

न ततश्चाग्रत· स्थाप्य न पार्श्वे न च पृष्ठत· ।
वामतो मारुत पश्चात् सन्त्यजेद्देशिकोत्तम· ॥ ७९७ ॥

प्रतिष्ठालिङ्गशब्दौ च द्वौ मन्त्रौ पाठयेत् क्रमात् ।
शान्तं ब्रह्ममय रूपं स्वकं समवलम्ब्य च ॥ ७९८ ॥

यत्रापि केवले ब्राह्मे स्थापन समुदीरितम्।
तत्रापि वामत. किञ्चिद्दिव्यभाग समाश्रयेत् ॥ ७९९ ॥

यतो हिनार्थ सर्वेषां निर्गत षड्गुणात्मना।
अतो ब्रह्मपदादीषत् देवभागे समानयेत् ॥ ८०० ॥

मोक्षादिफलसिद्धीना प्राप्तये ह्यविचारत.।
करस्थमथ मोक्तव्य कौतुक हृदयेन तु ॥ ८०१ ॥

सर्वाङ्गमर्घ्य मन्त्रेण दत्वा मूलमनुस्मरेत्।
हृदास्त्रपरिजप्तेन वज्रालेपेन वै तत ॥ ८०२ ॥

विम्बपीठशिलाना चाप्येकत्वेनाऽचरेत् स्थितिम्।
ओङ्कार पूर्वमुच्चार्य गुरु. प्रणतमस्तक ॥ ८०३ ॥

"आराधितोऽसि भगवन्! साधकाना हिताय च।
त्वयाप्यनुग्रहार्थं च वस्तव्यमिह सर्वदा ॥ ८०४ ॥

त्वं तिष्ठसि प्रभो! यत्र तत्र सिद्धिर्न दूरत.।
भवेद्वै साधकेन्द्राणामित्युक्त च पुरा त्वया ॥ ८०५ ॥

तस्माद्ध्रुव. सदा तुष्टः सानुकम्प. परो महान्।
सदाप्यनुग्रहपरस्तिष्ठस्वाचन्द्रतारकम्" ॥ ८०६ ॥

एवमुक्त्वा ततो दद्यादर्घ्य शिरसि पादयो.।
मूलबिम्बे मुनिश्रेष्ठ! मृदादिद्रव्यनिर्मिते ॥ ८०७ ॥

कर्मार्चायां विष्टरे वा दर्भमञ्जरिजे द्विज!
प्रबोधन च वै कर्म तथा प्रादक्षिणक्रियाम् ॥ ८०८ ॥

प्रासादे सम्प्रवेशं च कृत्वान्यत् सर्वमाचरेत्।
मूलबिम्बे क्रमेणैव देशिकेन्द्रः समाहित. ॥ ८०९ ॥

कुर्यात्ततोऽनुवेधं च आधाराच्च शिखावधि।
सामर्थ्यशक्तिसूत्रेण ऐश्वरेण क्रमेण तु ॥ ८१० ॥

सति येन विलुप्तेऽपि बिम्बाद्यैरयनस्य च।
न जहाति च मन्त्रौघस्तस्य कालान्तरेण च ॥ ८११ ॥

अप्रबुद्ध. प्रबुद्धो वा तस्मिन्नायतने पुमान्।
निवेशयति यो बिम्बमपरद्रव्यजं तु वै ॥ ८१२ ॥

तद्विज्ञानानुविद्धं च जायते समनन्तरम्।
एवं विधस्य स्थानस्य त्रैलोक्येऽस्मिन् महामते! ॥

प्रतीत्यायतनत्वेन भवत्याचन्द्रतारकी।
मूलमन्त्रं तु वै ध्यात्वा संशान्तब्रह्मलक्षणम् ॥ ८१४ ॥

आधारादिध्वजाग्रान्तं व्याप्तं तेनाखिल स्मरेत्।
इति सामान्यसन्धान कृत्वाऽध्वव्याप्तिमाचरेत् ॥

भुवनाध्वमयीं व्याप्तिं कुर्यात् प्रासादपीठगाम्।
अनुविद्धां पदाध्वाद्यैरन्यै. सत्तास्वरूपकै. ॥ ८१६ ॥

परस्परं हि सर्वत्र व्यापकै परलक्षणैः।
भूलोकांश विना ब्रह्मन्! तथान्यैरुज्झित हि तत् ॥

रजस्तमोमहत्वाच्च ईषत् सत्वगुणात्तु वे।
सत्वैकगुणरूपाणामन्येषामत एव हि ॥ ८१८ ॥

भूर्लोकश्च पृथक्संस्थ पदाद्यध्वगणस्य च।
कूर्मे ब्रह्मादिसंज्ञायां शिलाया च पदत्रयम् ॥ ८१९ ॥

न्यस्तव्यं जाग्रदाद्यन्यद्रत्नन्यासे कृते सति।
तुर्यब्रह्मसमोपेतं मन्त्राध्वा प्रतिमासने ॥ ८२० ॥

नाभ्यन्तं पादतो न्यस्य तत्वाध्वा द्विजसत्तम!।
आनाभेर्मूर्धपर्यन्तं कलाध्वा भावयेत्तत. ॥ ८२१ ॥

तद्ब्रह्मरन्ध्रकमले वर्णब्रह्मपदक्षितौ।
कर्णिकायां पर ब्रह्म सामान्य शाश्वतं विभुम् ॥ ८२२ ॥

एवं कृत्वाध्वकी व्याप्ति मूलमन्त्रं तु भावयेत्।
स्थूलसूक्ष्मपरत्वेन स्थूलं पीठा शिलान्तगम् ॥ ८२३ ॥

पिण्डिकायांतथा सूक्ष्मं तत्परं बिंबविग्रहे।
विन्यासं पीठमूलेऽथ देवताना समाचरेत् ॥ ८२४ ॥

भवोपकरणीयानां एतासा तु महामते!।
विन्यासं मन्त्रबिम्बे तु न कदाचित् समाचरेत् ॥

पीठोर्ध्वे तु मुनिश्रेष्ठ! प्रतिष्ठेयं विनैव तु।
न्यसेद्विभवदेवांस्तु ह्युपर्युपरि पूर्ववत् ॥ ८२६ ॥

घटोद्देशात् समारभ्य परमर्चागतं तत.।
एवं हि सर्वदेवानां विनिवेशवशात्तु वै ॥ ८२७ ॥

चिन्तामणिमयो न्यासः कृतो भवति सिद्धिदः।
तत्वसंस्थापनं कुर्यात् प्रकृतिस्थापनादनु ॥ ८२८ ॥

विज्ञानानन्दकल्लोलैर्ज्ञेयभासा यथा रवे ।
अनेकाह्लादजनितैराधारात्तच्छिरोवधि ॥ ८२९ ॥

पश्येन्मन्त्रमय बिम्बमनेकाद्भुतविग्रहम् ।
एव सर्वसमुत्पत्तिस्थान संकल्पसिद्धिदम् ॥ ८३० ॥

बिम्बं मन्त्रमयं वृक्षं प्रतिष्ठाप्यामलात्मना ।
तद्विज्ञानमयी शाखा प्रवरा यतिनोन्नताम् ॥ ८३१ ॥

अनन्तगगनाक्रान्ता भावयेत् साधको द्विज ! ।
प्रसृतेन तु वै तस्मादनौपम्यामृतेन तु ॥ ८३२ ॥

मन्त्रबिम्बमय वृक्षं सरसं भावयेत् सदा ।
यथा भौमेन तोयन गगनोत्थेन नारद ! ॥ ८३३ ॥

मन्दारपुष्पविटपस्तद्वदेव हि नान्यथा ।
मन्त्रन्यासं तत कुर्याद्बिम्बस्य च यथाविधि ॥ ८३४ ॥

सृष्टिसंस्थितिसंहारन्यासं कुर्यात् त्रय विभो ।
स्थितेपि च तथासीने शयाने यानगेऽपि च ॥ ८३५ ॥

एतेष्वपि च सर्वेषु कुर्यान्न्यासत्रय द्विज ! ।
यद्वा स्थिते स्थितिन्यासमासीने सृष्टिसञ्ज्ञितम् ॥

शयाने सहृतिन्यासमाचरेद् द्विजसत्तम ! ।
अङ्गोपाङ्गस्थिति कुर्यात् स्थानेषु हृदयादिषु ॥ ८३७ ॥

अन्यानि लाञ्छनादीनि संस्थाप्या गरुडान्तिमम् ।
तत. संपूजयेत्तत्र लययागेन चाखिलम् ॥ ८३८ ॥

पीठस्थं भोगयागेन मन्त्रचक्रं यजेत् पुन. ।
पीठीयं मन्त्रसंघं च विलोमेनाथ पूजयेत् ॥ ८३९ ॥

आधारशक्तिपर्यन्त सृष्टिन्यासेन सत्तम !
स्वनाम्नि स्वामिशब्द तु समारोप्य पर तु वा ॥ ८४० ॥

हरिकेशवपूर्व तु ततस्तारसमन्वितम् ।
प्रब्रूयुर्मूर्तिपाद्या वैः सुप्रतिष्ठितमस्त्विति ॥ ८४१ ॥

पुष्पाक्षताञ्जलि पूर्ण क्षिपमाणाश्च सर्वत. ।
सर्वे वदेयुस्तत्रस्थाः सुप्रतिष्ठितमस्त्विति ॥ ८४२ ॥

"आत्वा हार्षे"ति सहवै प्रतिष्ठासीति पाठयेत् ।
विश्वस्य मित्रमित्यादि मन्त्रमेकायनान् द्विज ! ॥

ओ नमोऽस्तु नमश्चातो ऋग्वेदाद्यैस्तु तै सह ।
ओं नमो ब्रह्मणेऽभीक्ष्ण जित ते त्येवमेव हि ॥ ८४४ ॥

जयशब्दसमोपेत स्तोत्रं श्रोत्रमनोहरम् ।
देशिक सह सवस्तु वाग्भिरुच्चाभिरुच्चरेत् ॥ ८४५ ॥

जीवभूतेन चैतेन विभुना मन्त्रमूर्तिना ।
प्रतिष्ठितेन विप्रेन्द्र ! विद्धि सर्व प्रतिष्ठितम् ॥ ८४६ ॥

पूर्व कृत्वाधिवासादि मूलबिम्बेन वै सह ।
स्थापयेत् कर्मबिम्बादीन् स्वे स्वे स्थाने यथोदिते ॥

लक्ष्म्यादीश्च तथा शक्ती स्थापयेत्तु विधानतः ।
प्रासादेऽपि च पूर्वोक्त लोकाद्य स्थापयेत् क्रमात् ॥

स्थितेपि तन्मुहूर्तांशे स्थापनीयश्च पक्षिराट् ।
स्नातोऽनुलिप्तो मन्त्रेण स्वेन य संस्कृतः पुरा ॥

ज्ञशक्तया सह बिम्बेन यस्माद्भिन्नेषु वस्तुषु ।
बिम्बसन्निकटस्थेषु अथवान्यत्र सत्तम ! ॥ ८५० ॥

तत्कालमङ्गभावत्वं व्रजमानेषु सर्वदा ।
हवनान्तं च नि.शेष ध्यानार्चनपुरस्सरम् ॥ ८५१ ॥

स्वयमेवानुरूपेण कर्मसामान्यता व्रजेत् ।
तस्मात्तद्यागभवनादुत्थाप्यादाय बिम्बवत् ॥ ८५२ ॥

देव प्रदक्षिणीकृत्य प्राग्वत् सस्थापनापदे ! ।
एकस्मिन् मध्यरन्ध्रे तु वज्राद्य पञ्चकं न्यसेत् ॥ ८५३ ॥

एकमेव तदूर्ध्वेऽथाप्याधारो य उदीरित. ।
प्राग्वन्निवेशनीयश्च तत्पीठेऽध्वा च भौवनः ॥ ८५४ ॥

भावनीयं शरीरे च विशेषं विज्ञभिलक्षणम् ।
पाठयेद्ब्राह्मणास्तद्वत् सुपर्णोसीतिमन्त्रराट ॥ ८५५ ॥

तमेवास्त्रार्चित कृत्वा त्वथ प्राक् शाङ्करे तत ।
सोमेशानान्तरे वापि अङ्गणे वापि तत्पदे ॥ ८५६ ॥

अथवा मूर्तिपीठस्थं भवनाभ्यन्तरेपि च ।
खगोक्तेन विधानेन विष्वक्सेन निवेश्य च ॥ ८५७ ॥

द्वारस्थानखिलान् देवास्तथा चावरणस्थितान् ।
पूर्वोदितान् क्रमेणैव स्थापयेद्देशिकोत्तम. ॥ ८५८ ॥

संप्रोक्ष्य कुम्भतोयेन यायाद्देवनिकेतनम् ।
कलशैः पृष्ठभागस्थैः स्नापनीयस्ततो विभु ॥ ८५९ ॥

सहमूर्तिधरैः सर्वैर्यथा चानुक्रमेण तु ।
सहाघमर्षणेनैव गायत्र्यावर्तितेन तु ॥ ८६० ॥

प्रागृङ्मयस्तु, तदनु चतुर्धावर्तितैः स्वयम् ।
हृदाद्यावर्तितैः षड्भिः यजुर्ज्ञस्तेन सेचयेत् ॥ ८६१ ॥

भूय स्वयं तथा कुम्भैः सामवित् स्नापयेत्ततः ।
षड्भिरन्यैः स्वयं पश्चात्तेनैवाथर्वणस्तत ॥ ८६२ ॥

पवित्रावर्तितैरेव कलशैरन्तरान्तरा ।
सह वैकायनीयैस्तु स्नापनीयमनन्तरम् ॥ ८६३ ॥

चतुर्मूर्तिमयैर्मन्त्रैर्बहुशः परिभावितैः ।
स्नापयेत् कलशेनाथ शेषमादाय वै घटम् ॥ ८६४ ॥

तच्छतावर्तितं कृत्वा समूलेनाद्य मूर्तिना ।
सार्घ्यं वै देवदेवस्य मूर्ध्नि चोत्कीर्य पाठयेत् ॥ ८६५ ॥

जितन्त इति वै सर्वास्ततश्चास्त्रोदकेन तु ।
प्रासाद शोधयित्वा तु गत्वा व कुम्भसन्निधिम् ॥

तत्र सपूज्य देवेशं पूर्वोक्तेन क्रमेण तु ।
मण्डले पूजयित्वाथ प्रयायाद्बिम्बसन्निधिम् ॥ ८६७ ॥

तत्र सपूज्यैवं स्नानवर्जं विशेषत ।
सास्पर्शिकैरासनाद्यैर्विविधैरौपचारिकैः ॥ ८६८ ॥

हृदयङ्गमसङ्ग्रैश्च पायसाद्यैश्चतुर्विधैः ।
अन्नैः प्रभूतैरन्यैस्तु भक्ष्यभोज्यादिभिस्तथा ॥ ८६९ ॥

सम्प्रदानावसानान्त क्रमात् कृत्वा द्विजोत्तम ! ।
सदक्षिण विशेषेण गुरौ मूर्तिधरेषु च ॥ ८७० ॥

समित्सप्तकपूर्वं तु वह्नौ सन्तर्प्य वै क्रमात् ।
देवं प्रणम्य विज्ञाप्य कर्मणा मनसा गिरा ॥ ८७१ ॥

"त्वमर्चान्तर्गतो देव ! मया यच्चानलादिषु ।
नीतोऽसि चाभिमुख्य तु क्षन्तव्य तन्ममाच्युत ! ॥"

एव प्रणम्य विज्ञाप्य क्षान्त्वा निष्क्रम्य संमुखम् ।
आमूलाद् ध्वजपर्यन्तं प्रासादो यः पुरा कृतः ॥ ८७३ ॥

देवं प्रदक्षिणीकृत्य अष्टाङ्गेन प्रणम्य च ।
गृहीत्वा चार्घ्यपात्रं तु यायाद्देवगृहाद्बहि ॥ ८७४ ॥

स्नानादिना समभ्यर्च्य वाहन भगवन्मयम् ।
पूर्वोदितानां द्वास्थानां दिक्पतीनां तथैव च ॥ ८७५ ॥

पूर्ववत्तु बलि दद्यात् क्रमेण च तत परम् ।
प्रभूतानां च भूतानां बलिदान समा(चरे)रभेत् ॥

गृह्णन्तु भगवद्भक्ता भूता प्रासादबाह्यगाः ।
बलीरत्र पवित्राश्च, तेषामनुचराश्च ये ॥ ८७७ ॥

एवं क्रमाद्बलि दत्त्वा सर्वेषां पाठयेत्तत ।
ऋग्विद्भिरण्यगर्भेति यादेवास्त्विति वै क्रमात् ॥

सामज्ञश्चान्नसामानि सह धेनुमयेन च ।
सर्वेष्वावरणेष्वेव बल्यर्थं तु प्रदक्षिणम् ॥ ८७९ ॥

कृत्वा तु देशिकः पश्चादाचम्य भवन विशेत् ।
न्यूनातिरिक्तशान्त्यर्थं पूर्णान्ति जुहुयाच्छतम् ॥ ८८० ॥

हृन्मन्त्रेण तु सास्त्रेण दत्त्वा पूर्णाहुति तत ।
जपेदाद्यन्तसरद्ध चक्रमन्त्रेण तद्बहि ॥ ८८१ ॥

मण्डले चाग्रतोर्चायां सर्वच्छिद्रप्रपूरणे ।
तत सथ्रावयेद्देव कृताञ्जलिपुट स्थितः ॥ ८८२ ॥

प्रासादद्वारदेशस्थो भूमौ कृत्वा तु जानुनी ।
"त्वच्छक्त्या प्रेरितेनाद्य यदिद वै मया कृतम् ॥"

तेन चैवाभिषेक्तव्य कर्ता कलशवारिणा ।
दद्याद्दिनचतुष्कं तु होमदानपुरस्सरम् ॥ ८८४ ॥

प्रारम्भदिनदानेन हवनेनार्चितेन तु ।
लोकत्रय तु भूराद्य तृप्तिमभ्येति चाखिलम् ॥ ८८५ ॥

चतुर्भिर्महदाद्य तु अतो दिनचतुष्टयम् ।
कलशे मण्डलेऽग्नौ च प्राग्वत् कुर्यात् समर्चनम् ॥

भूराद्य सत्यलोकान्तं सप्तक तृप्तिमेति च ।
सप्तकेन दिनाना तु दानहोमार्चनादिना ॥ ८८७ ॥

प्राप्तेऽहनि चतुर्थे तु अपनीय स्रगादिकम् ।
कलशान्मण्डलाद्बिम्बात् ततो यागगृहेऽर्चनम् ॥

होमावसानं मन्त्रस्य कृत्वा पूर्वं यथा पुरा ।
आचम्य च बलिं दत्वा यायाद्देवगृहं ततः ॥ ८८९ ॥

तत्रासनादिकैरिष्ट्वा स्नानान्तै पूर्ववत् प्रभुम् ।
अपनीताम्बरैः कुम्भैर्धान्यपीठोपरि स्थितैः ॥ ८९० ॥

हृन्मन्त्रपूजितैर्भूयः सलिलेन प्रपूरितैः ।
सहमूर्तिधरैः प्राग्वदन्तरान्तरयोगत ॥ ८९१ ॥

कार्यं वै स्नानकर्मादि विधिदृष्टेन कर्मणा ।
निरोदकेऽथ प्रासादं पुनराराध्य पूर्ववत् ॥ ८९२ ॥

भोगैरासनपूर्वैस्तु सप्रदानान्तमच्युतम् ।
मुद्रा बध्वा जपेन्मन्त्र स्तुत्वा क्षान्त्वा बहिर्व्रजेत् ॥

शत सहस्र साष्ट वा जुहुयान्मन्त्रराट् स्वयम् ।
साङ्ग सपरिवार च संहितोच्चारयुक्तितः ॥ ८९४ ॥

मूर्तिपैः प्रणवाद्याभिर्गायत्रीभि शत शतम् ।
एकायनैरभिज्ञाभिः स्वकीयाभिश्च तत्समम् ॥ ८९५ ॥

प्रदापयेत्तत पूर्णामृग्वेदाद्यास्तु मूर्तिपान् ।
एकायनास्तदन्ते तु क्रमात्तान् पाठयेत्तत ॥ ८९६ ॥

पूर्णात्पूर्णेति वा मन्त्रमाद्यात् पूर्णमसीति यत् ।
सनमस्केन मन्त्रेण स्वय साङ्गेन निक्षिपेत् ॥ ८९७ ॥

बलिभिस्तु तत सर्वान् भूतपूर्वा तु तर्पयेत् ।
प्रविश्याचम्य तदनु क्षान्त्वा देवं तु कुम्भगम् ॥८९८॥

पूर्ववन्मण्डलस्थ तु कुण्डस्थं तदनन्तरम् ।
विष्वक्सेनं यजेत् प्राग्वदिष्टशिष्टैः क्रमेण तु ॥ ८९९ ॥

भूषयेद्गुरुपूर्वास्तु मूर्तिपान् कटकादिकै ।
गुरोर्वा गुरुपुत्रस्य यागद्रव्य निवेदयेत् ॥ ९०० ॥

स्वय वाथ प्रतिष्ठानमाचार्यस्त्वाचरेद् द्विज ! ।
ततो विभजनीयं तन्मूर्तिपादिष्वनुक्रमात् ॥ ९०१ ॥

एवं सर्वेषु यागेषु कर्तव्यं देशिकेन तु ।
सिद्धेरभीप्सितार्थं च स्नायादवभृथेन च ॥ ९०२ ॥

इत्येतत् साधकस्योक्त मन्त्राराधनकाङ्क्षिणः ।
मन्त्रमूर्तिप्रतिष्ठानं यत्रस्थः सिद्धिमाप्नुयात् ॥ ९०३ ॥

स्थापने यजमानस्य फलं वक्ष्ये समासतः ।
आदेवालयभूभागाद् ध्वजान्ताच्चापि मण्डपात् ॥

सर्वोपकरणोपेताम् सर्वेष्वावरणेषु च ।
समन्तात् परमाणूना सर्वेषां द्विजसत्तम ! ॥ ९०५ ॥

यावती जायते संख्या तावत् कर्ता समावसेत् ।
भोगभुग्विष्णुलोके च यात्यन्ते परम पदम् ॥ ९०६ ॥

कर्ता वै ब्राह्मणो विप्र ! सर्वविद्याधिपो भवेत् ।
क्षत्रियो यजमानस्तु सर्वदेशाधिपो भवेत् ॥ ९०७ ॥

वैश्यस्तु यजमान स्याद्धनधान्यसमृद्धिमान् ।
शूद्रस्तु यजमान स्यान्मोदते बन्धुभि सह ॥ ९०८ ॥

स जन्मना च ज्ञानेन एवमेव भवेत् स्त्रिय ।
पुत्रार्थी पुत्रमाप्नोति राज्यार्थी राज्यमाप्नुयात् ॥

यद्यत् कामयते कर्ता तत्तत् सर्व समाप्नुयात् ।
अकामाना तु भक्ताना भक्तिरव्यभिचारिणी ॥ ९१० ॥

यच्चापि शाश्वत ज्ञान भवेत्तद्धर्मणा सह ।
स्वय कृताना बिम्बाना स्थापन संप्रकीर्तितम् ॥

एव बिम्बं प्रतिष्ठाप्य प्रासादे स्वगृहे तु वा ।
तत प्रभृति तामर्चा पूजयेत् प्रतिवासरम् ॥ ९१२ ॥

जीर्णोद्धारावधिर्यावत्तावत्काल विधानतः ।
प्रमादाद्बुद्धिपूर्वाद्वा पूजालोप न कारयेत् ॥ ९१३ ॥

तत्तद्बिम्बस्य विहितं कर्म वापि न लोपयेत् ।
कर्मणा स्नपनादीना यत् कर्म विहित द्विज ! ॥ ९१४ ॥

यस्मिन् वै कर्मबिम्बे तु तत्रैव तु समाचरेत् ।
तत्तत्कर्मार्थबिम्बे तु विभवे सहिते सति ॥ ९१५ ॥

तत्तत्कर्मविशेषाणा व्यत्ययं न समाचरेत् ।
असन्निधाने तेषा तु राष्ट्रभङ्गादिदोषतः ॥ ९१६ ॥

तद्देशकालानुगुणं तत्र सन्निहित भवेत् ।
यद्यत्कर्मार्थबिम्बं तु तत्र सर्व समाचरेत् ॥ ९१७ ॥

स्नपनद्वितयं चैव नित्यनैमित्तिकात्मकम् ।
नित्योत्सवविधानं च तथा नैमित्तिकोत्सवम् ॥९१८॥

तीर्थयात्राविधान च एव कर्माणि पञ्च वै ।
शयनोत्थापन कर्म तदा कृच्छ्रे समाचरेत् ॥ ९१९ ॥

यद्वा शोभार्थबिम्बे तु पूज्यमाने प्रतिष्ठिते ।
एवं कथितमेकस्मिन् बिम्बे सन्निहिते सति ॥ ९२० ॥

बिम्बद्वये सन्निहिते तत्तत्कर्मविभेदत ।
कृत्वा तदन्यत् सकल यथायोग समाचरेत् ॥ ९२१ ॥

एवमभ्यूह्य कर्तव्य तत्तद्बिम्बे प्रकाशिते ।
सर्वेषु कर्मबिम्बेषु तत्र सन्निहितेषु वै ॥ ९२२ ॥

तदा तेषा तु बिम्बाना व्यत्ययं न समाचरेत् ।
तदा शोभार्थबिम्बे तु प्राप्त उत्कृष्टलोहजे ॥ ९२३ ॥

वर्णमृत्स्थापिते तत्र स्वकुलोद्धारणाय च ।
अङ्गबिम्बोदित कर्म न कदाचित् समाचरेत् ॥ ९२४ ॥

यद्याचरेत् प्रमादेन राजा राष्ट्र विनश्यति ।
विशेषेण स्वयंव्यक्ते दिव्ये सैद्धेऽपि चार्षके ॥ ९२५ ॥

स्थाने तु कर्मबिम्बाना व्यत्ययं न समाचरेत् ।
तानि बिम्बानि विप्रेन्द्र ! यादृशानि भवन्ति हि ॥

लक्षणैश्च प्रमाणैश्च युक्तानि रहितानि वा ।
उत्कृष्टलोहजातानि अपकृष्टोत्थितानि वा ॥ ९२७ ॥

तादृशानि भवन्त्येव न कुर्यादन्यथा बुध ।
न लक्षणान्तरं कुर्यान्न प्रमाणान्तरं तथा ॥ ९२८ ॥

न तु द्रव्यान्तरं चैव न तु कुर्यात् क्रियान्तरम् ।
मन्त्रान्तरं न युञ्जीत सर्व कुर्यात्यथापुरम् ॥ ९२९ ॥

कुर्याच्चेल्लक्षणादीना विपर्यास महामते ! ।
राज्ञो राष्ट्रस्य नाश स्यात् तत्रापि सहसन्तते. ॥

न कुर्यान्मूलबिम्बेऽपि लक्षणादिविपर्ययम् ।
तस्मात् पौराणिके स्थाने न विपर्यासमाचरेत् ॥९३१॥

एवं स्थाने मानुषेऽपि लक्षणादिविपर्ययम् ।
जीर्णाख्यस्य विधे. पूर्व न कदाचित् समाचरेत् ॥

स्वयंव्यक्तादिके वापि स्थाने मनुजनिर्मिते ।
अजीर्णे नाङ्गहीने वा धाम्नि बिम्बेऽथवा द्विज ! ॥

प्राक्स्थितस्योपमर्दन कुर्याद्धामान्तरं न च ।
न तु बिम्बान्तर कुर्याद्यामोहाद्यदि कल्पयेत् ॥९३४॥

आत्महीनो भवेत् कर्ता राजा च सहसन्ततिः ।
महद्भय भवेत्तस्य राष्ट्रस्य सनृपस्य च ॥ ९३५ ॥

अथ जीर्णविधान तु समासात् कथ्यतेऽधुना ।
मनुष्यनिर्मिते स्थाने तावज्जीर्णविधि शृणु ॥ ९३६ ॥

धातुमृच्छैलदारूत्थो वस्त्रादिष्ववतारित. ।
यो यो भगवदाकारस्तस्य तस्य महामुने ! ॥ ९३७ ॥

जीर्णत्वे वाङ्गभङ्गे वा क्षते वा तत्र तत्र च ।
सन्धानयोग्य सन्धेयमयोग्य तु परित्यजेत् ॥ ९३८ ॥

परित्यक्त तु तद्बिम्ब धातुद्रव्योद्भवं विना ।
जलाशये ह्यगाधे वा समुद्रे विधिना क्षिपेत् ॥ ९३९ ॥

भूमौ वा निखनेद्विप्र ! देशकालानुरूपत. ।
विधिवत् प्रतिपत्तौ तु जातायामादितोन्यतः ॥

अङ्गभङ्गादिदोषेषु सम्यग्भूतेषु सत्स्वपि ।
सति सन्धानयोग्यत्वे न कदाचित् परित्यजेत् ॥

तस्य त्यागो विनाशश्च ह्युपर्युपरि बाधकृत् ।
बिम्बादीना तु बृहता परित्यागो न युज्यते ॥ ९४२ ॥

उत्कृष्टाना हेम तारताम्रजानां विशेषतः ।
नोचित. स्यात् परित्यागस्तस्मात् सन्धानमाचरेत् ॥

प्रयत्नेनाप्ययोग्यत्वे परित्यागं समाचरेत् ।
द्रव्येण तज्जातीयेन कुर्याद्बिम्बान्तरं तत. ॥ ९४४ ॥

धातुद्रव्यमयोद्भूतै पूर्वलोहैर्द्विजोत्तम ! ।
तैस्तैरमूर्तता नीतैस्तत्तज्जातीयलोहजैः ॥ ९४५ ॥

तत्तज्जातीयलोहैर्वा समुत्कृष्टैर्महामते ! ।
अथवा राजतं बिम्ब हैमं चोत्कृष्टताम्रजम् ॥ ९४६ ॥

संदध्यात्तु प्रयत्नेन न कदाचित् परित्यजेत् ।
हीनताम्रमयं यत्तदारकूटमयं तु तत् ॥ ९४७ ॥

सन्धानकरणायोग्यं तद्द्वयं तु परित्यजेत् ।
परित्यक्तं तु तद्बिम्बं क्षिपेत् पूर्वेण वर्त्मना ॥ ९४८ ॥

ततो बिम्बान्तरं कुर्याद्राजतं वा सुवर्णजम् ।
उत्कृष्टतत्तज्जातीयद्रव्यजं वा महामते ! ॥ ९४९ ॥

कर्मबिम्बेषु सर्वेषु ह्येवमेव तु कारयेत् ।
मृत्काष्ठशैलजे बिम्बे तथा रत्नमयेऽपि च ॥ ९५० ॥

केनापि हेतुना भग्ने कृत्वा बालगृहादि तत् ।
त्यक्त्वा तदन्यत् संपाद्य बिम्बसंस्थापनं चरेत् ॥ ९५१ ॥

दिव्यसिद्धादिके स्थाने विशेषमवधारय ।
मृण्मये मूलबिम्बे तु जीर्णे वाथ जलादिभिः ॥

हीनाङ्गे वा तदा कुर्यात् संधानं तु प्रयत्नतः ।
एवं वर्णविहीनेऽपि सन्धानं तु समाचरेत् ॥ ९५३ ॥

मृत्तिकाशूलरज्ज्वादीन्न कदाचित् परित्यजेत् ।
बिम्बे धातुमये जीर्णे सन्दध्यात् स्वर्णपूर्वकैः ॥ ९५४ ॥

जीर्णे लोहमये बिम्बे सन्दध्यात् काञ्चनेन तु ।
एवं रत्नमये बिम्बे सन्धानं च समाचरेत् ॥ ९५५ ॥

जीर्णं तु यद्यत् त्याज्यं स्यात् तत्तत् त्यक्त्वा ततः परम् ।
सन्दध्यात्तु ततो विप्र ! न कुर्यादन्यथा पुनः ॥

न बालगेहं तद्बिम्बं तत् कर्मापि समाचरेत् ।
नित्यनैमित्तिकाद्येषु वर्तमानेषु कर्मसु ॥ ९५७ ॥

प्रागुक्तं सकलं कुर्याद्यथावित्तानुसारतः ।
लक्षणादिष्वपि तथा न कुर्यादन्यथा पुनः ॥ ९५८ ॥

येषु व्यक्तेषु चिह्नानि नाभिव्यक्तानि सत्तम ! ।
तान्यपि स्वानि चिह्नानि ललाटे वासपट्टके ॥ ९५९ ॥

पृष्ठे वाथङ्गपट्टे वा पाणिपादतलेषु वा ।
मूर्ध्नि वा दधते तस्मात् तत्र तत्र निरीक्षयेत् ॥ ९६० ॥

तस्मादलक्षणा व्यक्तिर्विद्यते न कदाचन ।
एवं तदीया विप्राश्च क्षत्रिया वैश्यजातयः ॥ ९६१ ॥

मौद्गल्याद्यास्तथान्ये च न तच्चिह्नविवर्जिताः ।
भवेयुः सर्वथा तस्माच्चक्रशङ्खगदाम्बुजैः ॥ ९६२ ॥

लोहैरनलसन्तप्तैस्तत्तन्मन्त्राधिवासितैः ।
पूजितैरर्घ्यगन्धाद्यैरङ्कितव्याः क्षणेन तु ॥ ९६३ ॥

त्रैविद्या ज्ञानसम्पन्ना यथोक्ताचारनिष्ठिताः ।
विप्राद्यास्तेऽपि शूद्राश्च यदैव कृतलक्षणाः ॥ ९६४ ॥

तदा तु योग्या विज्ञेया समयश्रवणादिषु ।
शास्त्रोदितासु सर्वासु सामग्रीषु महामते ! ॥ ९६५ ॥

यागोपकरणान्येवमर्घ्यपात्रादिकान्यपि ।
संयोज्यानि यथायोगं शङ्खचक्रादिलक्षणैः ॥ ९६६ ॥

तथा यानासनादीनि विभो सर्वाणि यत्नतः ।
स्वात्मोपकरणं सर्वमासनादिविवर्जितम् ॥ ९६७ ॥

अङ्गुलीयकपर्यन्तं भूषणं कटकादिकम् ।
उत्तमाङ्गसमुद्धार्यं सर्वगुणीपपूर्विकम् ॥ ९६८ ॥

चक्रादिलाञ्छितं कुर्यात् तदीयाश्च गवादयः ।
विप्रादिवल्लाञ्छितव्यास्तदीया भूरुहादयः ॥ ९६९ ॥

लाञ्छितव्या यथायोगं चक्रशङ्खादिलक्षणैः ।
आराधकाद्या कर्मण्या एव चक्रादिलाञ्छिताः ॥

देवतान्तरचिह्नैस्तैरकर्मण्यास्तु लाञ्छिताः ।
यत्र वा भगवन्मूर्तौ लाञ्छनं न प्रदृश्यते ॥ ९७२ ॥

तत्रापि लक्षणन्यासं न कुर्यात् स्वेच्छया द्विज ! ।
यथास्थितैव सा व्यक्तिः पूज्या व्यापकमन्त्रतः ॥

तदन्ये लाञ्छितव्याः स्युः सर्वे पूर्वमलाञ्छिताः ।
इति सम्यक् प्रतिष्ठानं देवस्य परिकीर्तितम् ॥ ९७३ ॥

स्थानसंरक्षणार्थं तु तस्मिन् कालेऽन्यदा तु वा ।
प्रासादाग्रेऽथवा विप्र ! प्राङ्गणे यत्र कुत्रचित् ॥ ९७४ ॥

चक्रं संस्थापयेत्तत्र अमूर्तं शिखरोपरि ।
मूर्तमङ्कणदेशे तु षोडशाष्टभुजं तु वा ॥ ९७५ ॥

अमूर्तं द्वादशारं तु अष्टारं षडरं तु वा ।
शङ्खादीन्यायुधान्येवं विदध्याद्ङ्कणादिके ॥ ९७६ ॥

द्वितीयावरणे वापि तृतीयावरणेऽपि वा ।
चक्रादिबिम्बनिर्माणमुत्तरत्र प्रवक्ष्यते ॥ ९७७ ॥

सह संस्थापने प्राग्वत् कर्मभेदो न विद्यते ।
पृथक् संस्थापने कुर्यात् सर्वकर्म यथाविधि ॥ ९७८ ॥

तत्तत्स्थापनकाले तु तत्तत्संज्ञामनु जपेत्।
विद्या गदामित्याद्य यत् पाठयेत्तद्विदो जनान् ॥९७९॥

चमूपच्छब्देन इति च प्रविष्णो इति त्वृचौ।
पाठयेद्बह्वृचान् पश्चाच्छाकुनं सूक्तमेव च ॥ ९८० ॥

धृतोर्ध्वपुण्ड्र कृतचक्रे इति मन्त्र कठान् परम्।
पवित्र ते विततमित्येतान् मन्त्रान् यजुर्मयान् ॥९८१॥

आरोहेति च सामज्ञान् पवित्र ते अग्निरित्यपि।
एभिर्वयमुरुक्रमस्येत्याथर्वणान् द्विजान् ॥ ९८२ ॥

एभि संस्थाप्य विधिवन्नवभि कलशैस्तत।
स्नपयेद्ब्रह्मसूक्तस्यैर्मन्त्रैरष्टाभिरेव च ॥ ९८३ ॥

सर्वस्य वशिनं देवमिति प्राक् स्थापितेन तु।
"वहिरावरणे नास्ती"त्यग्निदिक्संस्थितेन तु ॥

यन्नाभिपद्माद्भवदिति याम्यस्थितेन तु।
धृतोर्ध्वपुण्ड्र इति च यातुधानगतेन तु ॥ ९८५ ॥

दक्षिणे तु भुजे विप्र! इति पश्चिमगेन तु।
विष्णुनाकमश्नन्तीति वायुदिक्संस्थितेन च ॥ ९८६ ॥

पुंप्रधानेश्वरो विष्णुरिति सोमगतेन वै।
इम महोपनिषदमितीशानगतेन तु ॥ ९८७ ॥

मन्त्रैरेतैः समस्तैस्तु मध्यकुम्भेन सेचयेत्।
प्रासादाग्रस्थिते चक्रे प्रोक्षणं तु समाचरेत् ॥ ९८८ ॥

महोपनिषदन्तस्थानष्टौ मन्त्रान् पुरोदितान्।
यद्वा पुरुषसूक्तं तु सर्वशान्त्यै ततो जपेत् ॥ ९८९ ॥

अत्रानुक्तं तु सकलं पूर्वोक्तं तु समाचरेत्।
सम्यगुक्तं प्रतिष्ठान किमन्यच्छ्रोतुमिच्छसि ॥ ९९० ॥

सनक —

कथितं नित्यपूजादौ त्वया नीराजनं पुरा।
तद्विधानं मुनिश्रेष्ठ! प्रब्रूहि मम विस्तरात् ९९१ ॥

शाण्डिल्य —

नीराजनविधानं तु समाकर्णय साम्प्रतम्।
नित्ये नैमित्तिके विप्र! तथा काम्येऽपि पूजने ॥

अन्ततः स्नानभोगाना कुर्यान्नीराजन विभो।
सर्वदोषप्रशान्त्यर्थं सर्वरक्षार्थमेव हि ॥ ९९३ ॥

अलकारासनोक्ताना भोगानामन्ततोऽपि वा।
उभयत्रापि वा कुर्याद्विभवेच्छानुसारतः ॥ ९९४ ॥

यद्वा प्रदोषवेलायां तत् कुर्यात् प्रतिवासरम्।
साय पूजासमारम्भात् पूर्वमेव द्विजोत्तम! ॥ ९९५ ॥

अथवा पूजने कुर्याद्दीपदानात् पुरैव तु।
यद्वा नैवेद्यपर्यन्ते पूजाया तत् समाचरेत् ॥ ९९६ ॥

तदपि त्रिविध प्रोक्तं सात्विकादिविभेदत।
स्नानान्ते भोगयज्ञान्ते द्वितय सात्विक भवेत् ॥९९७॥

सायकाले प्रतिदिन कुर्याद्राजससञ्ज्ञितम्।
पूजाया दीपदानाग्रे नैवेद्यान्तेपि तामसम् ॥ ९९८ ॥

कुर्यात् प्रासाद एकस्मिस्तेषामेक न तु त्रयम्।
स्वयव्यक्ते तथान्यैस्तु विबुधैश्च प्रतिष्ठिते ॥ ९९९ ॥

प्रासादे मुनिमुख्यैश्च सात्विकाख्य समाचरेत्।
ब्राह्मणैः क्षत्रियैर्वैश्यैः स्थापिते राजसं भवेत् ॥१०००॥

शूद्रैस्तु स्थापिते स्त्रीभिस्तामसाख्यं समाचरेत्।
एतेषा सात्विकादीना शृणु सम्यग् विधि क्रमात्॥

स्नानावशिष्टतोयेन संपूर्ण कलशं द्विज!।
सौवर्ण राजत वापि ताम्रज मृण्मय तु वा ॥ १००२ ॥

सुपिष्टै रूर्ध्वतो लिप्त हरिद्राशालितण्डुलै।
स्रजा वाश्वत्थपत्रेण युत वा कण्ठदेशत ॥ १००३ ॥

तं कृत्वा वामपाणौ तु अपरस्मिंस्तु मल्लकम्।
पुष्पप्रकरसंपूर्ण धूपपात्राग्निना युतम् ॥ १००४ ॥

धूमायमानं सिद्धार्थैर्धूपद्रव्येण वा सह।
एकधा देवदेवस्य भ्रामयित्वा तु मूर्द्धनि ॥ १००५ ॥

दीक्षितेन जनेनैव परिचर्यापरेण तु।
शुद्धया योषिता वा तद् द्वारपार्श्वे विसर्जयेत् ॥

कल्पयेत् स्नाननभोगान्ते एतन्नीराजनं सदा।
कृतं पूर्वोदितैर्द्रव्यैः कुम्भमापूर्य वारिभिः ॥ १००७ ॥

अर्घ्यपात्रोद्धृतैर्यद्वा केवलैर्गालितै. पुन. ।
अन्तः सिद्धार्थकान् क्षिप्त्वा कण्ठे कुर्यादलंकृतिम् ॥

अश्वत्थपल्लवै. स्रग्भिश्चन्दनेनाक्षतैरपि ।
अन्यत्र रजनीपिष्टैर्लेपयेत् सर्वतो द्विज ! ॥ १००९ ॥

तदास्ये मल्लक पुष्पसंपूर्ण तु नियोजयेत् ।
संस्कृताग्निसमुद्भूतान् पुरा दीपान् प्रदीप्य तु ॥

विभवेच्छानुरूपेण चतुर्विंशादिकान् द्विज ! ।
पाकस्थानात्तु वै दीपादुच्छ्रिता चतुरङ्गुलै ॥१०११॥

प्रदीप मल्लके कृत्वा सकुम्भ विनिवेशयेत् ।
अग्रतो देवदेवस्य सदाधारोपरिस्थितम् ॥ १०१२ ॥

तमर्घ्यगन्धस्रग्धूपैर्हृन्मन्त्रेण तु पूजयेत् ।
केवलं सार्घ्यपुष्पेण साधकस्तदनन्तरम् ॥ १०१३ ॥

दद्यादाचमनान्तेऽर्घ्य मन्त्रेशस्याथवा द्विज ! ।
अर्घ्यालभनमाल्यानि धूपं चाप्यर्घ्यमेव वा ॥ १०१४ ॥

दीपकुम्भ तु पाणिभ्यामुद्धृतं परिचारिणा ।
देवस्य दक्षिणं पादमारभ्येतरपश्चिमम् ॥ १०१५ ॥

भ्रामयेत् सर्वतोऽङ्गानि एकधा वा द्विधा तिधा ।
जपन् वै नेत्रमन्त्र तु हृन्मन्त्र वा यथारुचि ॥ १०१६ ॥

एव कुम्भं परिभ्राम्य पूर्ववत्तु विसर्जयेत् ।
ततस्तु देवदेवस्य दद्यादर्घ्य तु मूर्द्धनि ॥ १०१७ ॥

पाकस्थानात्तदर्थ तु दीप अनीयते यदा ।
तदानीं तद्विधान तु समाकर्णय साम्प्रतम् ॥ १०१८ ॥

दीक्षिताः सुविनीताश्च सुस्नाता. परिचारका. ।
वदनं नासिकारन्ध्रे स्थगयित्वाम्बरेण तु ॥ १०१९ ॥

सितोष्णीषधरा. सर्वे सितचन्दनरूषिता. ।
सौवर्णानि च पात्राणि विततानि यथारुचि ॥१०२०॥

राजतान्यथ ताम्राणि आरकूटमयानि वा ।
कांस्यानि वापि सपाद्य यथा वित्तानुसारत. ॥१०२१॥

एकत्रिपञ्चसप्तापि नवैकादश वा तथा ।
द्वि षट् षोडश वा यद्वा चतुर्विंशतिसंख्यया ॥

पाकालयं समासाद्य तत्राग्ने संस्कृतात् पुरा ।
तेषा मध्ये वर्तिदीपान् पात्राणा तु महामुने ! ॥१०२३॥

चतुरङ्गुलिकोत्सेधान् सघृतान् दीपयेत् पुन ।
उद्धृत्य तानि पात्राणि करैस्तु परिचारका ॥ १०२४ ॥

वहेयु पङ्क्तिबन्धेन तदग्रे गणिकाजना. ।
गच्छेयुर्भगवद्भक्ता. कुर्वन्तो नृत्तगीतके ॥ १०२५ ॥

तदग्रे शङ्खभेर्यादिसमुद्घोषणतत्पराः ।
तदग्रे वेत्रिणोऽस्पृश्यजनोत्सारणतत्परा. ॥ १०२६ ॥

गच्छेयु परितस्तेषा दीपिकाधारिणो जना ।
एवं क्रमात् समासाद्य तिष्ठेयुर्देवसन्निधौ ॥ १०२७ ॥

अथान्यो दीक्षितो विप्र कुम्भमापाद्य पूर्ववत् ।
समल्लकं तदूर्ध्वे तु तेष्वेकस्मात् प्रदीप्य तु ॥ १०२८ ॥

पाकस्थानादाहृतेषु प्रदीपं विनिवेश्य च ।
सदाधारस्थित कुर्यात् तत साधकसत्तम. ॥ १०२९ ॥

कुम्भं प्राग्वत् समभ्यर्च्य देवेश च तत. परम् ।
भ्रामयेत् पूर्ववत् कुम्भं तस्मिन् काले द्विजोत्तम ! ॥

ऋगाद्यध्ययन कुर्याद्द्विजा प्रागादिदिक्स्थिता. ।
सन्निधौ देवदेवस्य नृत्य तु गणिकास्तदा ॥ १०३१ ॥

मङ्गलानि च गीतानि सर्वे गायन्तु गायका. ।
स्वरेणोच्चतरेणैव स्तुवन्तु स्तोत्रपाठका ॥ १०३२ ॥

भेरीमृदङ्गशङ्खादीन् घोषयेयु. समन्तत ।
एवं सर्वत्र वै कुर्याद्ऋगाद्यध्ययनादिकम् ॥ १०३३ ॥

कुम्भमेव परिभ्राम्य दत्वा तं परिचारिण. ।
हस्तेऽस्य दीपपात्राणि दर्शयेदितराणि च ॥ १०३४ ॥

दृष्ट्वा सम्यक् ततो दद्यादर्घ्य देवस्य मूर्धनि ।
कुम्भपूर्वाणि पात्राणि वहन्त परिचारकाः ॥१०३५॥

प्रदक्षिणक्रमात् सार्ध पूर्ववद्गणिकादिभि. ।
क्षिपेयुर्द्वारबाह्ये वा बाह्यद्वारस्य बाह्यत ॥ १०३६ ॥

अथवा विनियुक्तानि तानि संगृह्य योषित. ।
सुस्नाता धौतवसना द्विजातिभाविनाम्मनः ॥ १०३७॥

अर्घ्यं पाद्यं तथाऽऽचाम देवस्य विनिवेद्य च ।
ततोन्नपिण्डमैन्द्रस्य दूर्वामुष्टिं तथैव च ॥ १०६८ ॥

चक्रमन्त्रेण सम्भ्राम्य देवस्य शिरसोपरि ।
तत्पुनर्देवदेवस्य प्राच्या दिशि विनिक्षिपेत् ॥ १०६९ ॥

एवं दक्षिणदिक्स्थस्य भ्राम्य दक्षिणतः क्षिपेत् ।
पश्चिमस्थः परिभ्राम्य पश्चिमस्यां दिशि क्षिपेत् ॥

उत्तरस्थः परिभ्राम्य उत्तरस्यां दिशि क्षिपेत् ।
देवस्य तिलकं कुर्याद्दीपपात्रोत्थभस्मना ॥ १०७१ ॥

एवं नीराजनं कुर्याद्दीपदानात् पुरैव तु ।
हेमादि द्रव्यजं पात्रं षड्विंशाङ्गुलविस्तृतम् ॥१०७२॥

कृत्वा सुवृत्तं तन्मध्ये पद्मं कुर्यात् सकर्णिकम् ।
पत्राष्टके कर्णिकायां दीपगर्तं प्रकल्पयेत् ॥ १०७३ ॥

दीपान् प्रज्वालयेत्तत्र षडङ्गुलसमुच्छ्रितान् ।
सिद्धार्थदधिदूर्वादिबीजैश्च परिपूरितम् ॥ १०७४ ॥

पूजितं गन्धपुष्पाद्यैः पात्रमादाय साधकः ।
त्रिः प्रदक्षिणमावर्त्य पाणिभ्यां देवमूर्धनि ॥ १०७५ ॥

प्राकारावरणाद्बाह्ये दिवा सोमदिशि क्षिपेत् ।
प्रागन्नपिण्डभ्रमणादन्ते धूपोत्थभस्मना ॥ १०७६ ॥

रक्षया सपुटीकुर्यादेवं नीराजनं द्विज ! ।
एवं नीराजनं कुर्यान्निवेद्यान्ते विभो सदा ॥ १०७७ ॥

एवं नीराजनं प्रोक्तं द्विविधं तामसाह्वयम् ।
गीतनृत्तादिकं सर्वं प्रागवदत्र समाचरेत् ॥ १०७८ ॥

कुर्यात् स्नानावसानेऽपि ऋगाद्यध्ययनादिकम् ।
अन्यादिभोगैर्यजनं वर्जयेत् तत्र सर्वदा ॥ १०७९ ॥

सायंकाले विनान्यत्र नीराजनविधौ द्विज ! ।
न कुर्याद्देवदेवस्य मन्त्रन्यासं कदाचन ॥ १०८० ॥

नीराजनं सात्विकाख्यं प्रवृत्तं यत्र तत्र तु ।
राजसं तामसं वापि न कदाचित् समाचरेत् ॥१०८१॥

राजसं तामसं वापि प्रवृत्तं यत्र तत्र वै ।
नीराजनं सात्विकाख्यं कुर्यादिच्छानुरूपतः ॥ १०८२ ॥

सपूर्णं भगवद्यागात् फलमिच्छन् महामते ! ।
उक्तमार्गविपर्यासं न कदाचित् समाचरेत् ॥ १०८३ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे प्रतिष्ठाविधानं नाम पञ्चदशोऽध्यायः ॥

श्रीः

षोडशोऽध्यायः ॥

सनक —

स्थापनं मन्त्रबिम्बानां परिज्ञातं यथाविधि ।
महोत्सवविधानं तु श्रोतुमिच्छामि साम्प्रतम् ॥ १ ॥

शाण्डिल्य —

महोत्सवं प्रवक्ष्यामि यथावन्मुनिपुङ्गव ! ।
सव इत्युच्यते दुःखं विद्वद्भिः समुदाहृतम् ॥ २ ॥

उद्गतः स सवो यस्मात् तस्मादुत्सव उच्यते ।
नित्यो नैमित्तिकः काम्यस्त्रिविधः स महोत्सवः ॥ ३ ॥

वत्सरे वत्सरे यस्तु क्रियते स तु नित्यकः ।
भूमिकम्पे दिशां दाहे महोत्पातेषु सत्सु च ॥ ४ ॥

दुर्भिक्षे व्याधिते राष्ट्रे तथा वै शत्रुसंकटे ।
अनावृष्टौ च सर्वत्र नक्षत्रपतने च खात् ॥ ५ ॥

हसने भगवन्मूर्तेरङ्गाना चलने सति।
रोदने चालनाद्बिंबे परिभ्रमति सत्तम ! ॥ ६ ॥

व्यत्यासे शशि (दिशि) सूर्यस्य तथान्येष्वेवमादिषु।
शान्त्यर्थं यत् प्रकुर्वीत स नैमित्तिक उच्यते ॥ ७ ॥

चतुर्णां पुरुषार्थानामुद्दिश्यान्यतम फलम्।
उत्सवोऽनुष्ठित काम्य संकल्पितफलप्रद ॥ ८ ॥

एकेकमुत्सवं विद्धि त्रिविध मुनिपुगव !।
उत्तमादिविभेदेन तत्र चोत्सवकौतुके ॥ ९ ॥

क्रियते ह्युत्सवो यस्तु स उत्तम उदाहृत ।
नित्य स्वपनविधेय स म यत्र उदीर्यते ॥ १० ॥

बिंबे नित्योत्सवार्थे तु य स्यात् स तु कनीयस (!)।
कुम्भे वा विष्टरे चक्रे य स आभाससंज्ञित ॥ ११ ॥

अन्येनापि प्रकारेण भूयस्त्रैविध्यमुच्यते।
परिभ्रमणकाले तु यात्राविवस्य पूर्वत ॥ १२ ॥

कुमुदाद्यैस्तु भूतेशे पटेषु लिखितैर्द्विज !।
सभ्यानांसिद्धये यद्वा हेमादिद्रव्यनिर्मितै ॥ १३ ॥

विभवस्यानुगुण्येन रक्षार्थं हेतिना तथा।
सर्वसंपूरणार्थं तु गरुडेनापि वै सह ॥ १४ ॥

ग्रामादौ बलिदानं तु यत्र नित्य समाचरेत्।
स एष उत्सवो विप्र ! भवेदुत्तमसंज्ञित ॥ १५ ॥

परिभ्रमसमारम्भात् पूर्वमेव महामते !।
नित्योत्सवार्थबिंबस्य सन्निधावत्रमूर्तिना ॥ १६ ॥

सार्धं च चक्रराजेन, अथवा केवलस्य तु।
सन्निधौ बलिबिंबस्य बलि दत्वा विधानत ॥ १७ ॥

प्रासादे बलिबिंबादि प्रवेश्य तदनन्तरम्।
यत्र यात्रार्थबिंबस्य परिभ्रमणमाचरेत् ॥ १८ ॥

ग्रामे वा नगरे वापि स तु मध्यमसंज्ञित ।
सन्निधौ चक्रराजस्य बलि दत्वा पुरैव तु ॥ १९ ॥

देवयात्रा भवेद्यत्र भवेत् स तु कनीयस. (!)।
मुख्यानुकल्पभेदश्च द्विविध. परिकीर्तित. ॥ २० ॥

कलशे मण्डले बिंबे वह्नौ च यजनं विभो ।
नित्यश क्रियते यत्र मुख्यकल्प स कीर्तित ॥ २१ ॥

बिंबे वह्नौ च यजन यत्र स्यात् सोऽनुकल्पकः।
परसूक्ष्मस्थूलभेदाद्वैकस्त्रिविध स्मृत ॥ २२ ॥

एकत्रिपञ्चसप्ताहो नवाहश्च पर. स्मृत ।
द्वादशाहोऽर्धमासश्च एकविंशतिवासर ॥ २३ ॥

सूक्ष्म, स्थूल सप्तविंशदिनो मासस्तथा ऋतु.।
षण्मास अब्दमेव हि उत्सवास्तु त्रयोदश ॥ २४ ॥

भूयो मुख्यादिभेदेन त्रिविध स तु कीर्तित ।
उत्सवाहर्गणात् पूर्वं यथोक्ते वासरे द्विज ! ॥ २५ ॥

ध्वजस्यारोहण कृत्वा तत्पश्चात् क्रियते तु य ।
मुख्यकल्पमिदं विद्धि दवाह्वा मानुषात्तु वा ॥ २६ ॥

कुतश्चित् कारणाद्विप्र ! पूर्वमुक्ते तु वासरे।
न कृते ध्वजारोहे तूत्सवारम्भवासरे ॥ २७ ॥

ध्वजस्यारोहण कृत्वा तत्पश्चात् क्रियते तु य ।
अनुकल्पमिदं विद्धि ह्येष तु त्रिविध. स्मृत ॥ २८ ॥

ध्वजारोहणपूर्वस्तु देवताह्वानपूर्वक ।
अङ्कुरार्पणपूर्वस्तु तथा च मुनिपुगव ! ॥ २९ ॥

ध्वजारोहणपूर्वस्तु राजराज्यसुखप्रद.।
देवताह्वानपूर्वस्तु स्वर्गभोगफलप्रद. ॥ ३० ॥

अङ्कुरार्पणपूर्वस्तु सर्वेषा मोक्षदो भवेत्।
उत्सवारम्भदिवसे दिवारोप्य ध्वजं निशि ॥ ३१ ॥

भेरीताडनमन्वक् च पालिकास्वंकुरान् क्षिपेत् ।
ध्वजारोहणपूर्वस्तु ह्येष उत्सव उच्यते ॥ ३२ ॥

आघोष्य भेरी प्रथमं ध्वजारोहणमन्वत ।
ततोऽङ्कुरार्पण ह्येष देवताह्वानपूर्वक ॥ ३३ ॥

अङ्कुरारोपण विप्र ! पूर्वं तु रजनीमुखे।
ततोऽन्वक् स्याद्ध्वजारोहो भेरीताडनमन्वत ॥ ३४ ॥

अङ्कुरारोपपूर्वस्तु ह्येष उत्सव उच्यते।
उत्सवं ह्युत्तम विद्धि त्रिवारं प्रतिवत्सरम् ॥ ३५ ॥

द्विवारं मध्यम प्रोक्तं ह्येकवारं कनीयसम् ।
चतुर्वार पञ्चवारं षड्वार विभवे भवेत् ॥ ३६ ॥

मन्त्रमूर्तिप्रतिष्ठानकाल एव महामते ! ।
प्रासादस्य शिखाग्रे तु स्थापित खगराड्-वज ॥

हेतिराजसमायुक्तौ यत्र तत सदा द्विज ! ।
विना त्वन्यध्वजारोहमुत्सवं परिकल्पयेत् ॥ ३८ ॥

तत्रापन्यध्वजारोह कुर्याद्वा विभवे सति ।
कुर्यादुत्सवमन्यत्र ध्वजारोहणपूर्वकम् ॥ ३९ ॥

तीर्थयात्रानुगुण्येन ध्वजारोह प्रकल्पयेत् ।
उत्सवेषु च सर्वेषु तीर्थयात्रादिन शृणु ॥ ४० ॥

चैत्रादिषु च मासेषु श्रवणर्क्षेऽयनद्वये ।
विषुवद्वितये वापि चन्द्रसूर्योपरागयो. ॥ ४१ ॥

द्वादश्या पौर्णमास्या च दर्शे च नवमीतिथौ ।
मासर्क्षेपि च रोहिण्या तथा चोत्तरफल्गुने ॥ ४२ ॥

पुनर्वस्वाश्वयनक्षत्रे प्रतिष्ठादिवसे तथा ।
नगरग्रामजन्मर्क्षे प्रासादारम्भवासरे ॥ ४३ ॥

राज्ञा जन्मदिने वापि अभिषेकदिने तथा ।
एकस्मिन्नेषु सर्वेषु तीर्थयात्रा समाचरेत् ॥ ४४ ॥

एतेषु यस्मिन्नक्षत्रे तीर्थयात्रा प्रकल्पिता ।
यदा तु तत् स्याद्द्विगुण मासि ह्युत्सवकल्पिते ॥

तदा कुर्यात् तीर्थयात्रा मासान्तस्थे तु तद्दिने ।
फाल्गुणादिषु सर्वेषु मासेष्वेवं प्रकल्पयेत् ॥ ४६ ॥

पञ्चाहात्तु समारभ्य एकत्रिंशद्दिनान्तिमम् ।
तीर्थयात्रादिनादर्वागेकविंशतिमे दिने ॥ ४७ ॥

ध्वजस्यारोहणं कुर्यादुत्सवार्थं प्रयत्नत. ।
यद्वा कल्याणदिवसं त्रिगुणीकृत्य तावताम् ॥ ४८ ॥

आदौ दिनाना कर्तव्यो ध्वजारोहो द्विजोत्तम ! ।
सप्तविंशतिमे ब्रह्मन् ! उत्सवारम्भवासरात् ॥ ४९ ॥

पूर्वं दिने तु तत्संख्ये ध्वजमारोहयेत् सुधी ! ।
त्रिंशद्दिने तु तत्संख्ये दिने पूर्वं समाचरेत् ॥ ५० ॥

ऋतूत्सवादित्रितये ह्युत्सवारंभवासरात् ।
एकोनविंशतिदिने ध्वजारोहणमाचरेत् ॥ ५१ ॥

अष्टादशदिने वापि द्वादशाहेथवा भवेत् ।
एकविंशद्दिनाद्य(द्वे)वमुत्सवाना त्रिकेपि च ॥ ५२ ॥

एवमेव ध्वजारोहमाचरेद्देशिकोत्तम. ।
अकुरानर्पयित्वा हि पुण्ये पूर्वं यथोदिते ॥ ५३ ॥

ध्वजमारोहयेत् पश्चान्मङ्गल मङ्गले दिने ।
यस्मिन् दिने ध्वजारोह कुर्यात् तत्पूर्वमेव तु ॥ ५४ ॥

द्वादशाहे नवाहे वा सप्ताहे पञ्चमेहनि ।
तृतीयेऽहनि वा कुर्यादकुरारोपणं द्विज ! ॥ ५५ ॥

तद्विधान हि विस्तारात् समाकर्णय साम्प्रतम् ।
त्रिविधानि च पात्राणि मगलाकुररोपणे ॥ ५६ ॥

पालिका घटिकाश्चेति शरावाश्चेतिभेदत ।
पालिकानामथोच्छ्राय. पञ्चविंशागुलो भवेत् ॥ ५७ ॥

तदाननस्य विस्तारो भवेद्वै षोडशागुल ।
अष्टागुलस्तदुच्छ्रायो ह्य(द्व्य)गुलं वलयं तत. ॥ ५८ ॥

भवेत् कण्ठविल विप्र ! ततोष्टागुलविस्तृतम् ।
आरभ्य वक्त्रवलयात् यावत्कण्ठविलं द्विज ! ॥ ५९ ॥

ह्रासयेदनुपातेन, तत्राल द्वादशागुलम् ।
उच्छ्रायादथ विस्तारान्मध्यतस्तु षडंगुलम् ॥ ६० ॥

अधस्तादंगुलाना तु चतुष्कं विस्तृतं भवेत् ।
तत कण्ठविलाच्चैव ह्रासयेदनुपाततः ॥ ६१ ॥

पादपीठमधोत्सेधाद्विज्ञेय चतुरंगुलम् ।
दशागुलस्तद्विस्तारस्तत्संधिश्चागुलो भवेत् ॥ ६२ ॥

तत्सन्धेश्च भवेन्नाह सार्धमेकांगुलं द्विज ! ।
उन्मत्तकुसुमाकारं वक्त्र पद्माकृतिर्भवेत् ॥ ६३ ॥

पालिकोत्सेधतुल्यास्तु घटिका. समुदाहृता ।
अंगुलत्रयहीना वा तदूर्ध्वं कलशाकृतिः ॥ ६४ ॥

घटिका. पञ्चवक्त्राः स्युरेतासा मध्यमं मुखम् ।
षडगुलं च विस्तीर्ण चतुर्दिक्षु चतुष्टयम् ॥ ६५ ॥

चतुरंगुलविस्तार कलशोदरविस्तृति ।
षोडशांगुलमानोत्था शेष प्राग्वत् समाचरेत् ॥ ६६ ॥

यदांगुलत्रयन्यूनास्तदा सप्तांगुलोच्छ्रितम् ।
तदाननं तु तन्नाल अर्धोत्तरदशांगुलम् ॥ ६७ ॥

सार्धत्रयांगुलं पीठ प्राग्वत् सर्वत्र विस्तर. ।
शरावा पालिकोत्सेधतुल्या पञ्चभिरंगुलै ॥ ६८ ॥

हीना वा, वक्त्रविस्तारात् समारभ्य महामते ! ।
पादपीठस्य विस्तार यावत्तावत्क्रमेण तु ॥ ६९ ॥

पूर्वोक्तात् पादहीना तु भवेत् सर्वत्र विस्तृति ।
भवेत् त्रिपादहीना तु पादपीठस्य विस्तृति. ॥ ७० ॥

यदा शरावा हीना स्युरंगुलै पञ्चभिस्तदा ।
मुखं षडंगुलोच्छ्राय तन्नाल तु दशांगुलम् ॥ ७१ ॥

त्र्यंगुल पादपीठ स्यात् प्राग्वत् सर्वत्र विस्तृति ।
तदुत्तममान तु पात्राणा कथित द्विज ! ॥ ७२ ॥

एतदेव मुनिश्रेष्ठ ! पादहीन तु मध्यमम् ।
अर्धहीन तु तन्मानमधम परिकीर्तितम् ॥ ७३ ॥

अतो न्यूनं न कर्तव्य कदाचित् सिद्धिकाङ्क्षिभि ।
हेमादिलोहजा सर्वे मृण्मया वा यथावसु ॥ ७४ ॥

प्रत्येकं पालिकादीना द्विषट्कं चोत्तम भवेत् ।
द्विरष्टक वा षट्त्रिंशद्विभवे सति कल्पयेत् ॥ ७५ ॥

प्रत्यष्टक मध्यमं स्याच्चतुष्कमधम भवेत् ।
सर्वार्थे पालिका. प्राग्वत् षोडशाष्टौ यथाबलम् ॥

चतस्रो वा ततस्तासु मंगलाकुरकल्पनम् ।
अयुग्मा मानुषे कार्ये दैवे युग्मास्तु पालिका ७७ ॥

महोत्सवे ध्वजारोहे हयुत्सवावसरेऽथवा ।
पवित्रारोहणे चैव तथा स्थापनकर्मणि ॥ ७८ ॥

जीर्णोद्धारविधौ चापि सहस्रकलशे तथा ।
त्रिवर्गपालिका यद्वा भवेदुत्तमसख्यया ॥ ७९ ॥

भवेन्मध्यमया वापि नान्यथा द्विजसत्तम ! ।
कर्मस्वन्येषु सर्वेषु यथावित्त यथारुचि ॥ ८० ॥

अंकुरावापनस्थानमण्टप परिकल्पयेत् ।
प्रथमावरणे वापि द्वितीयावरणेपि वा ॥ ८१ ॥

तृतीयावरणे वापि चतुर्थावरणेपि वा ।
शुभे विविक्तेऽभिमते देशे वै देशिकोत्तम ॥ ८२ ॥

चतुर्दिक्षु चतुर्द्वार चतुर्वन्दनमालिकम् ।
दर्भमालापरिक्षिप्त मुक्तादामविराजितम् ॥ ८३ ॥

वितत क्षौमसंछन्न गोमयालिप्तभूतलम् ।
प्रदीपमालावितत मक्षतैश्चापि सर्वत. ॥ ८४ ॥

सुधाचूर्णश्च धवले चित्रिताभ्यन्तरस्थलम् ।
मण्टप कल्पयित्वैव यद्वा स्नपनमण्टपे ॥ ८५ ॥

यागाख्यमण्डपे वापि कुर्यादंकुररोपणम् ।
अंकुरानर्पयेद्रात्रौ य उच्छेद्राष्ट्रवर्धनम् ॥ ८६ ॥

बीजानामधिप सोम ओषधीशोऽमृतात्मक ।
न प्रीणाति सदा ब्रह्मन् ! अंकुरार्पणमद्रि चेत् ॥ ८७ ॥

तस्मात् सर्वप्रयत्नेन रात्र्यामेवांकुरार्पणम् ।
कुर्यात् सम्यग्विधानेन भगवद्भक्तिसंयुत ॥ ८८ ॥

तस्मिन् जगत्प्रिये प्रीते शीतांशौ प्राणिजीवने ।
तद्देशे सर्वसस्याना संपत्तिर्महती भवेत् ॥ ८९ ॥

गवा च लोकमातृणा नृणामपि च सर्वश ।
अज्ञानादहि कुर्याच्चेदंकुराणामथार्पणम् ॥ ९० ॥

अशोभनं भवेद्राष्ट्र असमृद्धजनान्वितम् ।
सद्य कालीनके विप्र ! कर्मणि स्याद्विपि च ॥ ९१ ॥

यद्यदत्रोपयोग्य स्यात्तत् सर्व तु समार्जयेत् ।
सभृत्य सर्वसभारानाचार्यो मूर्तिपै सह ॥ ९२ ॥

स्नात कृताह्निकश्चैव सोत्तरीय स्वलकृत. ।
नूतनक्षौमवसन सोष्णीप. सांगुलीयक. ॥ ९३ ॥

सुरभीकृतसर्वांग. स्रग्वी संमृष्टकुण्डल. ।
श्वेतया मृत्स्नया सम्यक् परिक्लृप्तोर्ध्वपुण्ड्रक. ॥९४॥

पवित्रपाणिर्नियत प्राणायामपरायण ।
कृताचामः कृतन्यासो जपन् वै द्वादशाक्षरम् ॥ ९५ ॥

तदर्थमर्थयित्वा तु यजमानसमन्वित ।
भगवन्त जगद्योनि पूजयित्वा विधानत ॥ ९६ ॥

कलशे मण्डले बिम्बे वह्नौ सन्तर्प्य व क्रमात् ।
बिम्बेऽग्नौ वथ बिम्बे वा उत्तमादिव्यपेक्षया ॥ ९७ ॥

ततस्त्वभिनवे पात्रे सौवर्ण राजतेऽथवा ।
तिलसर्षपनीवारशालिमाषप्रियंगव ॥ ९८ ॥

कुलुत्थमुद्गनिष्पावयवगोधूमवेणव ।
बीजानि द्वादशैतानि पृथक् पात्रेषु वा द्विज ! ॥ ९९ ॥

संभृत्य तु मुनिश्रेष्ठ ! स्थापयित्वा तु मूर्धनि ।
दीक्षितस्य तु विप्रस्य पुष्पाक्षतकराञ्जलि ॥ १०० ॥

आचार्य प्रविशेत् सार्धं साधकैर्भगवन्मये ।
प्रासादाभ्यन्तर विप्र ! तत्राधारोपरि न्यसेत् ॥१०१॥

बीजपात्र ततोऽर्घ्येण गन्धै पुष्पैश्च धूपकै ।
संपूज्य मूलबिम्बस्थं तथा चोत्सवबिम्बगम् ॥ १०२ ॥

बीजपात्रं ततोऽभ्यर्च्य देवाय विनिवेदयेत् ।
सह शङ्खनिनादैश्च मङ्गलैर्गीतनिस्वनै ॥ १०३ ॥

तूर्यनादैश्च विविधै श्रुतिघोष समन्तत ।
ततो विज्ञापयेन्मन्त्रमिममुच्चस्थया गिरा ॥ १०४ ॥

"देवदेव ! जगन्नाथ ! यात्रोत्सवनिमित्तत ।
ध्वजार्थमंकुरारोपं करिष्यामि प्रसीद ओम्" ॥१०५॥

इति विज्ञाप्य देवस्य तत्रानुज्ञामवाप्य च ।
स्थापयित्वा तु तत् पात्रं दीक्षितस्यैव मूर्धनि ॥१०६॥

साधकैः सहितो विप्र ! बहिर्निर्गत्य देशिक ।
विष्वक्सेनं तु वा तार्क्ष्य हनुमत्प्रमुख तु वा ॥ १०७ ॥

हेतीश वापि वस्त्राद्यैरलङ्कृत्य विशेषत ।
यानादिकं समारोप्य प्रक्षाल्याद्भि खनित्रकम् ॥

नवेन वाससाच्छाद्य भूषयित्वा तु माल्यकै ।
देशिको वाहयेद्विप्रै शूद्रैर्वा दीक्षितैर्द्विज ! ॥ १०९ ॥

च्छत्रध्वजपताकाभिः साधमंकुरपात्रकै ।
त्रिविधैः पालिकाद्यैश्च शंखतूर्यादिभि सह ॥ ११० ॥

आम्नायोद्घोषणपरैर्भक्तैर्भागवतैर्विभो ।
गायकैर्गणिकाभिश्च तथान्यैर्मङ्गलै सह ॥ १११ ॥

क्रमात् प्रदक्षिणीकृत्य सर्वेष्वावरणेषु च ।
दिश प्राचीमुदीची वा अथवा नागुदग्दिशम् ॥११२॥

अदूरं समनुप्राप्य तत्रोद्याने मनोहरे ।
केवले वा शुचौ देशे मृदं शुद्धा समाहरेत् ॥ ११३ ॥

अस्त्रमन्त्रेण धरणी संप्रोक्ष्य प्रथम गुरु ।
महीसूक्तेन संस्पृश्य ध्यायन्नेकाग्रचेतसा ॥ ११४ ॥

मूर्ति देवस्य वाराहीमभ्यर्च्य कुसुमैर्मुनम् ।
अस्त्रावुना प्रोक्षितेन पुष्पैरभ्यर्चितेन च ॥ ११५ ॥

खनित्रेण खनेद्भूमि प्राङ्मुख क्रोडमन्त्रत ।
लोहजे भाजने मृत्स्ना वेत्रजे वा यथारुचि ॥ ११६ ॥

गृहीत्वा मूलमन्त्रेण वेष्टयित्वा च वाससा ।
प्रत्यग्रेण तथा नद्या वालुका गोमयं तथा ॥ ११७ ॥

गोकुलात् पूर्ववत् पात्रे गृहीत्वाऽऽच्छाद्य वाससा ।
यानादिके समारोप्य यद्वा दीक्षितमूर्धनि ॥ ११८ ॥

गत्वा प्रदक्षिण ग्रामं प्रविशेन्मण्टप तत ।
मण्टपं शोधयित्वा तु स्रुपनोदितवर्त्मना ॥ ११९ ॥

ततो मण्टपमध्ये तु सूत्राण्यास्फालयेत् क्रमात् ।
प्रागायतानि प्रथमं क्रमात् सप्तदश क्षिपेत् ॥ १२० ॥

उदगायतसूत्राणि चतुर्दश निपातयेत् ।
सूत्रात् सूत्रादन्तराल षोडशाङ्गुलसम्मितम् ॥ १२१ ॥

त्रयाधिकदशैव स्यु पूर्वपश्चिमपङ्क्तय ।
एव षोडशसंख्याता दक्षिणोत्तरपङ्क्तय ॥ १२२ ॥

बीजपात्रप्रतिष्ठार्थं पूर्वपश्चिमपङ्क्तिषु ।
मध्ये पङ्क्तित्रयं स्थाप्य वीथ्यर्थं द्वितय सृजेत् ॥

भूयश्च पङ्क्तित्रितय स्थापयेत् पार्श्वयोर्द्वयो ।
दक्षिणोत्तरमध्ये तु स्थाप्यं पङ्क्तिचतुष्टयम् ॥ १२४॥

द्वितय द्वितयं पार्श्वे वीथ्यर्थं विसृजेत् पुन ।
चतुश्चतुश्च पङ्क्तीना स्थापयेत् क्रमयोगत ॥ १२५॥

अशास्वष्टासु मध्ये च शरावघटपालिका ।
द्वादश द्वादश स्थाप्या शतमष्टोत्तरं भवेत् ॥ १२६ ॥

आग्नेये दक्षिणे भागे नैर्ऋतेपि च पालिका ।
घटिका वारुणे ब्राह्मे तथा पौरन्दरेपि च ॥ १२७ ॥

शरावा मारुते सौम्ये त्वीशाने च यथाविधि ।
प्रत्येकं पालिकादीना षोडशत्वेन कल्पयेत् ॥ १२८ ॥

दक्षिणोत्तरगं सूत्रपञ्चकं विनिवेशयेत् ।
प्रागायतानि सूत्राणि पूर्ववद्विनिवेशयेत् ॥ १२९ ॥

आचरेत् पूर्ववद्विप्र ! प्राक्प्रत्यक्पङ्क्तिकल्पनम् ।
तत्र दक्षिणत पङ्क्तिचतुष्के स्थापयेत् क्रमात् ॥

पालिका षोडश पुरो मध्ये पङ्क्तिचतुष्टये ।
घटिका षोडश न्यस्य उत्तरे विनिवेशयेत् ॥ १३१ ॥

शरावानपि तत्सख्यानथ द्वादशकल्पने ।
दक्षिणोत्तरसूत्राणि चत्वार्यत विनिक्षिपेत् ॥ १३२ ॥

पूर्वापराणि सूत्राणि पूर्ववद्विनिपातयेत् ।
अष्टाधिकानि कोष्ठानि चत्वारिंशद्भवन्ति हि ॥ १३३ ॥

याम्ये द्वादश कोष्ठानि स्थापयित्वा ततो मृजेत् ।
वीथ्यर्थं भागषट्कं तु मध्यत स्थापयेत् तत ॥ १३४ ॥

भागद्वादशक पश्चात् भागषट्कं विलोपयेत् ।
भूयश्चोत्तरदिक्स्थाप्यं कोष्ठद्वादशक क्रमात् ॥ १३५ ॥

न्यसेत्तु पालिकादीनि भागद्वादशकत्रये ।
आग्नेयादीशपर्यन्त दक्षिणाशादित. क्रमात् ॥ १३६ ॥

प्रत्येकं पालिकादीनामष्टसंख्याप्रकल्पने ।
दक्षिणोत्तरसूत्राणि त्रितयं तु निपातयेत् ॥ १३७ ॥

अन्यत् सर्व भवेत् प्राग्वत्, अथ प्रतिचतुष्टये ।
दक्षिणोत्तरग सूत्र त्रितयं विनिपातयेत् ॥ १३८ ॥

पूर्वपश्चिमसूत्राणि ह्येकादश विनिक्षिपेत् ।
सर्वार्थं पालिकाना तु षोडशाना परिग्रहे ॥ १३९ ॥

पञ्च दक्षिणसूत्राणि प्राक्सूत्राणि तथा क्षिपेत् ।
प्राक्सूत्रान् पञ्च चाष्टाना दक्षसूत्रत्रय क्षिपेत् ॥ १४० ॥

चतुर्विंशतिसख्याना पालिकाना परिग्रहे ।
पूर्वदक्षिणसूत्राणा सप्तक पञ्चकं क्षिपेत् ॥ १४१ ॥

चतु परिग्रहे सूत्रत्रितयं त्रितय क्षिपेत् ।
पूर्ववत् सूत्रपात स्यादाद्य सख्यासु पञ्चसु ॥

एवमास्फाल्य सूत्राणि विभवेच्छानुसारत ।
पदेषु पालिकादीना शालिभिर्व्रीहिभिस्तथा ॥ १४३ ॥

आढकादिमितै प्राग्वदुत्तमादिव्यपेक्षया ।
वृत्ता वा चतुरश्रा वा कल्पयेत् पीठिका क्रमात् ॥

पालिकादीनि पात्राणि क्षालयेन्मूलमन्त्रत ।
सहदेवी च दूर्वा च सार्धमन्त्रप्रपल्लवे ॥ १४५ ॥

शिरीषपल्लवैश्चापि निशापत्रैस्तथैव च ।
कण्ठेषु पालिकादीना बन्धयेत्तदनन्तरम् ॥ १४६ ॥

कुशकाशतृणैस्तेषा विलमूलानि पूरयेत् ।
विलानि प्रथम मृद्भिर्वालुकाभिरनन्तरम् ॥ १४७ ॥

करीषचूर्णैरुपरि समृद्ध पूरयेद्विलम् ।
यद्वा मृदादिक विप्र ! सर्व समिश्रय पूरयेत् ॥ १४८ ॥

कोष्ठेषु विन्यसेत्तानि पालिकादीन्यनुक्रमात् ।
आग्नेयादीशपर्यन्त प्रतिस्कन्ध द्विजोत्तम ! ॥ १४९ ॥

द्वादशाना तु नवक अष्टोत्तरशेन न्यसेत् ।
ब्राह्मादीशानपर्यन्तमुदितक्रमयोगत. ॥ १५० ॥

एवं सर्व समापाद्य दीक्षितैः परिचारकैः ।
तत्तत् सर्व समापाद्य यद्यत् प्रागनुपार्जितम् ॥ १५१ ॥

समारभेत् तत. कर्म देशिक प्राङ्मुखः पदे ।
पश्चिमे घटिकास्थानादुपाविश्यासने शुभे ॥ १५२ ॥

न्यासमुद्दिश्य विधिना प्रोक्षणार्घ्य प्रकल्पयेत् ।
देहविन्यस्तमन्त्राणा कुर्यादर्घ्यादिनार्चनम् ॥ १५३ ॥

द्वारपालार्चन कृत्वा विभवेच्छानुरूपतः ।
तोरणानि ध्वजाश्चैव द्वारकुम्भाश्च पूजयेत् ॥ १५४ ॥

सौवर्ण राजतं वापि ताम्रजं मृण्मय तु वा ।
सुगन्धतोयैः संपूर्णमुपरिष्टाद्विभूषितम् ॥ १५५ ॥

स्रक्चन्दनाक्षतै. कुम्भमाधारस्योपरि न्यसेत् ।
आत्मनस्त्वग्रत पश्चाद् वह्नवृचादीन् क्रमेण तु ॥

वाचयेत् स्वस्तिपुण्याह देशिकेन्द्र स्वय तत ।
आचार्यै. साधकैश्चापि सार्धमर्घ्यादिपूजितै ॥

पुण्याहं वाचयेद्विप्र ! मङ्गलं कलश वहन् ।
यजेदर्घ्यादिभि. पश्चात् पालिकाद्यधिदेवता ॥१५८॥

अञ्जनाभं परं चैव पद्मनाभ ध्रुवं तथा ।
पात्रस्कन्धत्रिके विप्र ! क्रमेण परिपूजयेत् ॥ १५९ ॥

पालिकाना द्वादशके वह्न्यादीशानपश्चिमम् ।
अनन्तादि द्वादशकं घटिकाद्वादशे तत ॥ १६० ॥

कूर्मादीना द्वादशक शरावाणा तु द्वादशे ।
द्विषट्कमेकशृंगाद्य क्रमेण परिपूजयेत् ॥ १६१ ॥

प्रत्येकं पालिकादीना कृते षोडशकल्पने ।
अनन्ताद्यं च षट्त्रिंशत् पातालशयनान्तिमम् ॥१६२॥

लक्ष्म्यादिमतिपर्यन्तं शान्तिद्वादशक यजेत् ।
प्रत्येकं पालिकादीना षट्त्रिंशत् परिकल्पने ॥ १६३ ॥

चतुष्टय तु मूर्तीना स्वप्राख्यपदसंस्थितम् ।
प्रभवाप्यययोगेन जाग्रद्रूपं तथाष्टकम् ॥ १६४ ॥

मूर्त्यन्तराणा द्वादशकं तच्छक्तीना चतुस्त्रयम् ।
अनन्ताद्यं च षट्त्रिंशत् पातालशयनान्तिमम् ॥

स्वधादीना च शक्तीना चतुस्त्रिंशच्च तत्परम् ।
चक्रशंखौ क्रमाद्भोगैरर्घ्यगन्धादिभिर्यजेत् ॥ १६६ ॥

अष्टके केशवाद्याश्च तदीयाः शक्तयो यजेत् ।
चतुष्के केशवाद्यास्तु केवलान् द्वादशे यजेत् ॥ १६७ ॥

सर्वार्थे पालिकाना तु क्रमात् षोडशके यजेत् ।
वासुदेवादिचतुर केशवादींश्च द्वादश ॥ १६८ ॥

अष्टके वासुदेवादीन् प्रभवाप्यययोगत ।
चतुष्के वासुदेवादीन् प्रभवानुक्रमेण तु ॥ १६९ ॥

एमभिष्ट्वा क्रमेणेव बीजानि क्षालयेत् तत. ।
गव्येन पयसा सम्यङ्मन्त्रेण द्वादशात्मना ॥ १७० ॥

बीजानां नामधेयैस्तु चतुर्थ्यन्ते पृथक् पृथक् ।
अर्घ्याद्यै. पूजयित्वा तु वाससा परिवेष्ट्य च ॥ १७१ ॥

हुतावशिष्टमाज्य तु तदन्यं वापि सस्कृतम् ।
आदाय लोहजे पात्रे मृण्मये वा यथारुचि ॥ १७२ ॥

उभाभ्या चैव हस्ताभ्या दूर्वामादाय मूलत. ।
घृते निमज्य चाग्राणि पालिकादिषु सेचयेत् ॥ १७३ ॥

हस्तव्यत्यासमार्गेण वह्न्यादीशानपश्चिमम् ।
प्रतिस्कन्ध घृतारोपे दूर्वाभेद प्रकीर्तित ॥ १७४ ॥

एव कृत्वा घृतारोपं भूय स्कन्धादिदेवता ।
प्रपूज्य सर्वबीजानि मन्त्रयेद्द्वादशात्मना ॥ १७५ ॥

आचार्यादीननुज्ञाप्य देशिकेन्द्र उदङ्मुखः ।
प्राङ्मुखो वा मुहूर्ते तु शोभने पालिकादिषु ॥ १७६ ॥

द्वादशाक्षरमन्त्रेण सर्वबीजानि वापयेत् ।
यद्वा जितन्तामन्त्रेण हयुभयेनाथवा द्विज ! ॥ १७७ ॥

आग्नेयादीशपर्यन्तं प्रतिस्कन्ध क्रमेण तु ।
शंखदुंदुभिनिर्घोषजयनादसमन्वितम् ॥ १७८ ॥

बीजानि द्वादशोक्तानि वपेद्द्वादशसु क्रमात् ।
यद्वा सर्वाणि सम्मिश्र्य वपेदिच्छानुरूपत ॥ १७९ ॥

बीजानामप्यलाभे तु मुद्गमेक तु वापयेत् ।
आचार्यानुमताश्चान्ये देशिका. साधका अपि ॥१८०॥

वपेयुर्ध्यानसयुक्ता केवल गुरुरेव वा ।
हरिद्राचूर्णसमिश्रैर्जलै. कुसुमवासितै. ॥ १८१ ॥

बहुभि. सेचयेद्विप्र ! देशिकेन्द्रः क्रमेण तु ।
प्रतिस्कन्धोपरिष्टात्तु चन्द्रमण्डलमध्यगम् ॥ १८२ ॥

तत्कान्तिसन्निभ देवं स्वदेहोत्थैर्निरन्तरै. ।
सिचन्तममृतौघैस्तु बीजान्युप्तानि सर्वत. ॥ १८३ ॥

ध्यात्वार्चयित्वा पात्राणि नवैस्तु सदृशौ शुभै. ।
आच्छादयित्वा वसनै प्रतिस्कन्धं क्रमेण तु ॥ १८४ ॥

वासुदेव जगद्योनि सर्वेषामूर्ध्वतो यजेत् ।
भूतकूरबलि दद्यादष्टदिक्षु द्विजोत्तम ! ॥ १८५ ॥

भूताना कुमुदादीना पूर्वादिक्रमयोगत'।
तदाप्रभृति ते सर्वे (ता सर्वा) रक्षन्ति कुमुदादय' ॥

आचार्याश्च गुरून् सर्वान् साधकान् वैष्णवानपि।
प्रभूतैस्तु ततोद्दिष्टैस्ताम्बूलीसुमन फलै ॥ १८७ ॥

गुरु च तोषयेद्वित्तैर्यजमामान प्रयत्नवान्।
क्रमादुत्पद्धृत्य तान् सर्वान् सुगुप्ते स्थापयेत् तत ॥

मण्टपेशानकोणे वा देशेऽन्यत्र यथारुचि।
तत्रापि पालिकादीना परितोऽग्रासु दिक्षु च ॥ १८९ ॥

भूताना कुमुदादीना ऐन्द्रादिक्रमयोगत ।
वलि तु मण्टपे दद्यात् भूतकरविधानत ॥ १९० ॥

दीपान् बहूननिर्वाणान् परित. परिदीपयेत्।
ऊनाधिक्योपशान्त्यर्थं शतमष्टोत्तरं हुनेत् ॥ १९१ ॥

द्वादशाक्षरमन्त्रं तु जपेद्वा विनसन्निधौ।
कुम्भादिस्थानगस्याथ विभो. कुर्याद्विसर्जनम् ॥

परित पालिकादीनां प्रतिरात्र पृथक् पृथक्।
दद्याद्दिवा रजन्या वा वलि कालद्वयेपि वा ॥ १९३ ॥

प्रात कर्मदिने दद्याद्वलि देशिकसत्तम ।
यदा चोप्तानि बीजानि तदाप्रभृति नित्यश' ॥ १९४ ॥

न कश्चित् प्रविशेत् तत्र न स्पृशेद्वा कथचन।
आचार्य एव प्रविशेत् तच्छिष्यो वा समाहित. ॥

उच्छिष्टादीनि सर्वाणि दूरत परिवर्जयेत्।
अदत्वा तु वलि कांचिन्न कुर्यात् पालिकाक्रियाम् ॥

हरिद्रावारिभि सिञ्चेदङ्कुराण्यभिवृद्धये।
अंकुरान् श्यामलान् रक्तान् कृष्णान् तिर्य्यग्गतांस्तथा॥

अप्ररूढान् मुनिश्रेष्ठ ! वर्जयेत्तु प्रयत्नत.।
श्यामेषु द्रव्यनाश. स्याद्रक्तेषु कलहो भवेत् ॥ १९८ ॥

कृष्णेषु मानसी पीडा रोगी तिर्यग्गतेषु च।
अप्ररूढेषु मरणं भवेत् तत्र न संशयः ॥ १९९ ॥

शुभं पीतेषु शुक्लेषु ऋजुष्वूर्ध्वगतेष्वपि।
सर्वसंपत्समृद्धिश्च कर्तु कारयितुर्भवेत् ॥ २०० ॥

कर्मार्थमङ्कुराण्यादौ य समारोपयेद्गुरु'।
स एव कर्म कार्त्स्न्येन कुर्यात् प्राज्ञोपि नेतर. ॥ २०१ ॥

अनुज्ञया वा तत्पुत्र. शिष्यो वा तत् समापयेत्।
एव सर्वेषु यागेषु अङ्कुरारोपणं भवेत् ॥ २०२ ॥

देश काल यथा वित्त ज्ञात्वा स्वाधीनता तथा।
उक्त सर्व समभ्यूह्य कुर्यात् कर्म प्रधानकम् ॥ २०३ ॥

एव कृत्वाकुरारोपं ध्वजार्थं पटमाहरेत्।
यथावित्तानुसारेण क्रीत वाऽभिनव शुभं ॥ २०४ ॥

दुकूलपट्ट देवाङ्ग चित्रक्षौममथापि वा।
अथ कार्पासिक वापि नीलरोमादिवर्जितम् ॥ २०५ ॥

सुलक्षण दृढ स्निग्धं, हस्तमानमिहोच्यते।
शिष्यदेशिककर्तृस्थैर्हस्तैर्मान प्रकल्पयेत् ॥ २०६ ॥

आद्य द्वादशहस्त स्यात् दशहस्त तु मध्यमम्।
अधम चाष्टहस्त स्यात् विस्तार च चतुष्करम् ॥२०७॥

उत्तमं स्यात्, त्रिहस्तं तु मध्यमर्धाधिक भवेत्।
त्रिहस्तमधमं विद्धि तत्राद्ये द्विजसत्तम ! ॥ २०८ ॥

द्विहस्तं शिखरार्थं तु कल्पयेद्देशिकोत्तम.।
तद्वत् पुच्छ प्रकुर्वीत अधोभागे ध्वजस्य तु ॥ २०९ ॥

मध्यत सप्तहस्तेन लेखयेद्विनतासुतम्।
शिरोदण्डनिवेशार्थं हस्तार्ध परिकीर्तितम् ॥ २१० ॥

पाददण्डनिवेशार्थं तद्वन्मानं भवेद्द्विज !।
मध्यमस्याथ वक्ष्यामि समासादवधारय ॥ २११ ॥

हस्तमर्धादिकं विप्र ! सयुक्त त्रिभिरंगुलै ।
कल्पयेच्छिखरार्थं तु तद्वत् पुच्छं प्रकीर्तितम् ॥२१२॥

मध्यतो हस्तषट्केण गरुडं तु समालिखेत्।
दण्डद्वयनिवेशार्थं शेषं तु परिकल्पयेत् ॥ २१३ ॥

अधमस्याथ वक्ष्यामि पटस्य मुनिपुंगव !।
पादाधिकेन हस्तेन शिखरं स्यात् तथा भवेत् ॥ २१४ ॥

अध. पुच्छ तु हस्तार्थं दण्डद्वयनिवेशनम्।
मध्यतः पञ्चहस्तेन वैनतेयं समालिखेत् ॥ २१५ ॥

भूयो विध्यन्तरं वक्ष्ये विभवेच्छानुसारत ।
आद्य त्रिपञ्चहस्त स्यान्मध्यम तु त्रयोदशम् ॥

एकादशकरायाममधमं परिकीर्तितम् ।
अर्धाधिक चतुर्हस्तं विस्तारं चोत्तम भवेत् ॥ २१७ ॥

पादाधिक मध्यमं स्यादधम पादहीनकम् ।
पादाधिकं द्विहस्तं तु उत्तमे शिखरार्थत. ॥ २१८ ॥

तद्वत् पुच्छ तु हस्तेन दण्डद्वयनिवेशनम् ।
मध्यतश्चाष्टभिर्हस्तैर्गरुड तु समालिखेत् ॥ २१९ ॥

मध्यमे शिखरं हस्तयुग्मं पुच्छमधस्तथा ।
दण्डद्वयनिवेशार्थं अष्टाशोनेन हस्तत ॥ २२० ॥

त्र्यंगुलोत्तरसप्ताधैर्हस्तैर्गरुडमालिखेत् ।
अधम त्वथ वक्ष्यामि पादोनान्तु करद्वयात् ॥ २२१ ॥

शिखरं स्यात्तथा पुच्छ पादोनेन करेण तु ।
दण्डद्वयनिवेश स्यात् पादोनकरसप्तके ॥ २२२ ॥

गरुड तु लिखेद्विद्वान्, भूयो विध्यन्तर शृणु ।
उत्तमं नवहस्त तु सप्तहस्त तु मध्यमम् ॥ २२३ ॥

अधम पञ्चहस्तं तु त्रिविध पट उच्यते ।
तदर्ध चैव विस्तारं तदर्ध शिखरं भवेत् ॥ २२४ ॥

तत्समं पुच्छमप्युक्तं कर्णपुच्छं तथैव च ।
मूलविवसमायाम द्वारायाममथापि वा ॥ २२५ ॥

आयामार्धेन विस्तीर्ण पादेन कृतशेखरम् ।
शिखरेण समं पुच्छं तदर्ध कर्णपुच्छकम् ॥ २२६ ॥

पक्षद्वयेपि पूर्वोक्तं कर्णपुच्छेन कल्पयेत् ।
बालाख्यध्वजवस्त्र तु पटाख्यपरिसम्मितम् ॥ २२७ ॥

विस्तारं पटतुल्यं तु पूर्ववच्छिखरं भवेत् ।
निर्णेजितं खलीयुक्तं शोषितं लक्षणान्वितम् ॥ २२८ ॥

पटं विचित्रयेद्विद्वान् शिल्पिना कुशलेन वै ।
च्छत्रं तु शिखरे कुर्यात् पार्श्वयो. श्वेतचामरे ॥२२९॥

अधोऽनेकदलं पद्मं तदध. पूर्णकुम्भकम् ।
कुम्भस्य पार्श्वे विलिखेत् सांकुर पालिकागणम् ॥

दीपौ सुशोभनौ कुर्यात् पालिकाना तु पार्श्वयो ।
ध्वजं तु गरुडाकारं एकमूर्तेस्तु सत्तम ॥ २३१ ॥

सत्य. सुपर्णो गरुडस्तार्क्ष्यश्च चतुरात्मन ।
पञ्चमूर्तेस्तु चत्वारो विहगेश्वरसंयुताः ॥ २३२ ॥

सुपर्णतालमकरकृश्या वा चतुरात्मन ।
तत ऊर्ध्वं तु सर्वेषा व्यूहाना गरुडो ध्वज. ॥ २३३ ॥

पटमध्ये तु गरुड द्विभुज विधृताञ्जलिम् ।
पुष्पाञ्जलिपुट वाथ सुवर्णाचलसन्निभम् ॥ २३४ ॥

गगने गमनारम्भपक्षविक्षेपणान्वितम् ।
कुञ्चितो वामपादस्तु दक्षिण पृष्ठत. स्थित ॥ २३५ ॥

किंचिदायतवृत्ताक्ष नीलदीर्घाग्रनासिकम् ।
अतीव शान्तवेष तु तथा प्रहसिताननम् ॥ २३६ ॥

बालचन्द्रसमाकारदंष्ट्राद्वयविराजितम् ।
कुटिलभ्रकुटीभग भंगुरालकशोभितम् ॥ २३७ ॥

कम्बुग्रीव बृहद्बाहु पीनांसं दृढवक्षसम् ।
पृथूदरं निम्ननाभि रोमराजिविराजितम् ॥ २३८ ॥

सुवृत्तकनकस्तम्भपीवरोरुद्वयान्वितम् ।
हेमरम्भासमाकारजंघाक्रान्तपदद्वयम् ॥ २३९ ॥

करण्डमकुटाक्रान्तपुष्पापीडविराजितम् ।
वृत्तवैपुल्यमानेन लोचने पद्मपत्रवत् ॥ २४० ॥

भ्रूयुग्मं नारसिंहोक्त घ्राणाग्र शुकतुण्डवत् ।
सिंहवन्मध्यदेशस्तु तद्वशं गजपृष्ठवत् ॥ २४१ ॥

तदेव दैर्घ्येण विस्तृतं हसपक्षवत् ।
स्वपक्षमानाद्द्विगुणं तत्पुच्छ शतशाखिनम् ॥ २४२ ॥

सर्वेषा विद्धि सामान्यं विशेषाख्यमथोच्यते ।
मकुटादिसपादान्त नानारत्नेन शोभितम् ॥ २४३ ॥

हारकेयूरकटकब्रह्मसूत्रविभूषितम् ।
प्रलंबकर्णपाशान्तविश्रान्तशुभकुण्डलम् ॥ २४४ ॥

ललाटतिलकोपेत पुष्पकर्णावतंसकम् ।
रत्नांगुलीयकोपेतं शिंजिनीरञ्जितांघ्रिकम् ॥ २४५ ॥

अन्येराभरणैर्दिव्यैर्भूषित सर्पभूषणम् ।
नीलांबरधरं नीलवारवाणविराजितम् ॥ २४६ ॥

फुल्लरक्तोत्फलदलस्रग्भिर्मण्डितकन्धरम् ।
तथाविचित्रकुसुमस्रग्भिरन्याभिरुज्ज्वलम् ॥ २४७ ॥

अनन्तो वामकटको, यज्ञसूत्र तु वासुकि ।
तक्षक कटिसूत्रं तु, हार कार्कोटकस्तथा ॥ २४८ ॥

पद्मो, दक्षिणकर्णे तु महापद्मस्तु वामत ।
शख. शिर प्रदेशे तु गुलिकं च भुजान्तरे॥ २४९ ॥

एतैरष्टोरगैराद्यैर्भूषितं भुजगोत्तमे ।
अनन्त शुक्लवर्णाभ., रक्तवर्णस्तु वासुकि. ॥२५०॥

तक्षक पीतवर्णाभो वृत्र कार्कोटकस्तथा ।
शखस्तुहिनवर्णाभो गुलिकस्त्वलिलक्षिम ॥ २५१ ॥

पद्म पद्मसमानाभो महापद्मस्तु पिगल ।
पञ्चवर्णैर्लिखेदेव देव पञ्चायुध तथा ॥ २५२ ॥

चक्र खड्ग शर चैव शंखं शार्ङ्ग गदा क्रमात् ।
पटोर्ध्वे ह्युभये पार्श्वे विलिखेच्च यथाविधि ॥ २५३ ॥

तदधो दक्षिणे भागे वह्निमण्डलमालिखेत् ।
तद्वल्लिखेद्वामभागे स्वस्तिकं उष्णान्वितम् ॥ २५४ ॥

लेपयेत् पटशेषं तु श्यामलेनासितेन वा ।
विचित्रपुष्पसयुक्तपत्रवल्लीसमन्वितम् ॥ २५५ ॥

एव शिल्पिवरेणैव कारयेद्देशिकोत्तम. ।
शूद्रेण वा द्विजश्रेष्ठ ! दीक्षितेन यथाविधि ॥ २५६ ॥

कुलालेनाथवा मन्त्री कारयेत् कुशलेन च ।
सामान्यलक्षण ह्येतत् कीर्तित द्विजसत्तम ! ॥ २५७ ॥

अङ्गुलादिविभागेन विशेषमवधारय ।
अष्टाधिकशतैकाशाद्यद्विवेऽगुलमीरितम् ॥ २५८ ॥

तत्रैव मूलविवोत्थैरङ्गुलै परिकल्पयेत् ।
तद्वाहनस्य मानं तु विभागमवधारय ॥ २५९ ॥

तस्य बिंबसमुत्थेन तालेन मुखमण्डलम् ।
द्व्यगुलं तु लल्पटोर्ध्वं जटाबन्धो द्विलोचनम् ॥ २६० ॥

द्व्यंगुलेनोन्नतं कण्ठ उर पञ्चाङ्गुलं स्मृतम् ।
अष्टाङ्गुल तदुदर कटि पञ्चाङ्गुलोन्नता ॥ २६१ ॥

नवाङ्गुलोन्नतावूरू जानुनी द्व्यङ्गुले स्मृते ।
अष्टाङ्गुलोच्छ्रिते जघे द्व्यंगुले पादपिण्डिके ॥ २६२ ॥

शममेक कलाहीनं तद्ग्रीवायाश्च वेष्टनम् ।
विवतुल्या परिज्ञेया सर्वदास्यागविरतति ॥ २६३ ॥

द्विपडभागादिक विद्धि वेष्टन ह्युदरस्य वा ।
परिधि कटिदेशस्य चतुर्णवाधिकस्तु वै ॥ २६४ ॥

विवोकसदृशं विद्धि तदूर्वोमूलवेष्टनम् ।
तदेव जघाम यस्य जघान्तस्य तदेव हि ॥ २६५ ॥

पाद पञ्चकलायामश्चतुरंगुलविस्तृत ।
त्र्यगुल पार्ष्णिदेशाच्चाप्यंगुष्ठौ च कलासमौ ॥ २६६ ॥

विज्ञेयास्त्वधिदेर्ध्या(!)यवोनाङ्गुलय क्रमात् ।
नाभिरन्ध्र सुविस्तीर्ण द्व्यर्धलोचनविस्तृतम् ॥ २६७ ॥

[2]तद्बाहुमस्तकं विद्धि उच्छ्रायेण द्विलोचनम् ।
[3]भुजोपभुजयुग्म यत् तद्द्वितालसम स्मृतम् ॥

[1]मध्यमाङ्गुलिपर्यन्त मणिवन्धाच्चवाङ्गुलम् ।
[4]त्रिकल पाणिविस्तारस्तन्मध्या निशितोन्नता ॥

कलार्धेनाधिकं बाहोस्तदर्ध बाहुवेष्टनम् ।
विवोकाशद्वयेनैव स्तनभूर्लोचनेन तु ॥ २७० ॥

वृत्तवैपुल्यमानेन लोचने पद्मपत्रवत् ।
भ्रुयुग्म नारसिहोक्तं घ्राणाग्रं शुकचञ्चुवत् ॥ २७१ ॥

कलार्धमानदीर्घ च तद्वंशं गजपृष्ठवत् ।
स्वायामदीर्घ तत्पक्षयुगल कुक्षिदेशगम् ॥ २७२ ॥

तदेव दैर्घ्यार्धेन विस्तृत हंसपक्षवत् ।
स्वपक्षमानाद्द्विगुणं तत्पुच्छं शतशाखिन. (खकम्)॥

सपक्षमेवमायाम सार्त्यं त्वव्ययवान्वितम् ।
सर्वेषां विद्धि सामान्य विशेषास्यमथोच्यते ॥ २७४ ॥

ऊरु, द्व्यान्नयेद्ध्रासमङ्गुलाना त्रयं तथा ।
जंघाकाण्डोच्छ्रितेः कुर्याज्जङ्घाभ्यां चाव वेष्टनम् ॥

विवाख्यमणिबन्धस्य समं मूलान्महामते ।
जंघादेशात्तदर्धेन सह चार्धाङ्गुलेन तु ॥ २७६ ॥

पादे जालं परिज्ञेय विस्तारेण षडगुलम् ।
शेषं सत्योदितं सर्वं सर्वेषा विद्धि सर्वदा ॥ २७७ ॥

किन्तु पादोत्थितौ पक्षौ दैर्घ्यात्तद्दलविस्तृतौ ।
एषा चोड्डीयमानाना सायामा पक्षविस्तृति ॥२७८॥

पञ्चाना च परिज्ञेया स्थितानामर्धलक्षणा ।
पटे तु लिख्यमाने तु पक्षदैर्घ्यं तु पार्श्वयो ॥ २७९ ॥

यावत् पटसमाप्ति. स्यात् पक्षास्त्वग्रसमन्विता ।
संख्याता संख्यया विप्र ! पञ्च सप्ताद्ययुग्मया ॥

यद्वा विवोक्तमार्गेण अष्टोत्तरशताङ्गुलै ।
सत्यादीना तु पञ्चानां अगप्रत्यगकल्पना ॥ २८१ ॥

यद्वा मध्याङ्गुलैर्मध्यपर्वदैर्घ्यसमुत्थितै ।
देशिकीयैरङ्गुलैस्तु शतैरष्टाभिरेव च ॥ २८२ ॥

सत्यादीनां तु पञ्चाना मान कुर्यात्तु देशिक ।
मूलविवस्य वाह्वन्तो नाभ्यन्तो वा तदुच्छ्रय ॥ २८३ ॥

मानमेतत्तु कथितमुन्मानमवधारय ।
गरुडस्य पटस्थस्य सत्यादीनां तथा यदा ॥ २८४ ॥

मध्यमाङ्गुलमव्यस्थदीर्घपर्वेण कल्पयेत् ।
देशिकीयेन मान तु अष्टोत्तरशताङ्गुले. ॥ २८५ ॥

शिर.प्रभृति पादान्तं तदाचोन्मानमुच्यते ।
अंगुलत्रितयं मूर्ध्नि मुख षडगोलक भवेत् ॥ २८६ ॥

कण्ठ त्र्यङ्गुलमान स्यात् तदधो द्वादशाङ्गुलम् ।
स्तनान्तर समारभ्य नाभ्यन्त षट्कलं भवेत् ॥ २८७ ॥

तदध. कटिपर्यन्तं भवेदङ्गुलपञ्चकम् ।
तदधो योनिपर्यन्त अङ्गुलाना च सप्तकम् ॥ २८८ ॥

जान्वन्तं द्वादशकलं त्र्यंगुल जानुमण्डलम् ।
तदधो गुल्फकान्तं तु भवेद्द्वादशगोलकम् ॥ २८९ ॥

त्र्यंगुल गुल्फमान स्यात् प्रमाणं क्रमत. शृणु ।
मुखभागेऽक्षिसूत्रान्त उपरिष्टाद्द्विगोलकम् ॥ २९० ॥

तथा नासापुटान्तं च चिबुकान्त तथैव च ।
षट्कल. कर्णसूत्रान्त मध्यतो मुखविस्तर. ॥ २९१ ॥

नवाङ्गुलो ह्यधोभागे ललाटाशे दशाङ्गुलि ।
केशभ्रूरेखयोर्मध्यमेकांगुलमिदं भवेत् ॥ २९२ ॥

अक्षिभ्रुवोरन्तरं स्यात् सपादाङ्गुलिविस्तरम् ।
नेत्रायामस्तु पादोनमंगुलत्रितयं भवेत् ॥ २९३ ॥

तद्विस्तारस्तु पादोनमंगुलिद्वितय भवेत् ।
एकाङ्गुल तारकं स्यान्नासाया मूलविस्तर. ॥ २९४ ॥

द्व्यङ्गुल मध्यत सांश तत् त्र्यङ्गुलमधा भवेत् ।
तदग्रायाम एक स्यात् तदर्ध विस्तृतिर्भवेत् ॥२९५॥

आस्यायामो द्विगोल स्यात् तद्विस्तारोऽङ्गुलो भवेत् ।
साधरोष्ठ तदोष्ठ स्याद्व्यायामो द्व्यङ्गुल भवेत् ॥

सपादो दृष्ट्योर्मध्ये तयोरायाम ईरित ।
सपादमङ्गुलं विप्र ! विस्तारोऽयांगुलो भवेत् ॥ २९७ ॥

मूलदेशे तयोरग्रौ शितौ चन्द्रदलाग्रवत् ।
पचांगुल कण्ठदेर्घ्य विस्तारो गोलक भवेत् ॥ २९८ ॥

षडङ्गुल पाददैर्घ्य कर्णाधारश्चतुष्कल ।
सार्धाङ्गुल स्यात्तदधोवक्ष पीठोर्ध्वदेशत. ॥ २९९ ॥

अष्टादशकलस्तारो बाहुव्यासावधि द्विज ! ।
तदध कक्षपर्यन्तं तारो द्वादशगोलक ॥ ३०० ॥

तदधोभागविस्तार साङ्गुल नवगोलकम् ।
उदरस्य तु विस्तार एकविंशाङ्गुलो भवेत् ॥ ३०१ ॥

तत्रैकाङ्गुलिसन्नाह नाभिवृत्तं सुशोभनम् ।
श्रोणीभागस्य विस्तार. सांगुलं नवगोलकम् ॥३०२॥

ऊरुमूलस्य विस्तारस्त्रयोदशांगुलो भवेत् ।
तन्मध्ये विस्तृतिर्विप्र ! द्वादशाङ्गुलसम्मिता ॥ ३०३ ॥

सप्तांगुलमुपस्थं स्यात् त्रिकला जानुविस्तृति. ।
अध पञ्चांगुल सार्ध पदेर्घ्य सप्तगोलकम् ॥ ३०४ ॥

अङ्गुष्ठाग्रावधिर्यावत् पार्ष्ण्योः प्रभृति तत्र तत् ।
अङ्गुष्ठ त्र्यङ्गुल सार्ध अन्या अंगुलय. क्रमात् ॥

अङ्गुलाधांशहीनाः स्युः अंगुष्ठस्य तु विस्तृति ।
सार्धांगुला तदन्यासा क्रमान्न्यूना तु पूर्ववत् ॥ ३०७ ॥

अंगुष्ठनखदैर्घ्यं तु सार्धमेकाङ्गुलं भवेत् ।
तद्विस्तारस्त्रिपादः स्यात् तदन्या ह्रासयेत् क्रमात् ॥

कनीयो नखदैर्घ्यं तु यदा चार्धांगुलं भवेत् ।
तद्विस्तारस्तदर्धं स्यादंगुलीपल्लवेशत ॥ ३०८ ॥

चरणस्य तु विस्तारः सार्धश्चांगुलो भवेत् ।
पञ्च मध्ये पार्ष्णिभागे सार्धं तु चतुरंगुलम् ॥ ३०९ ॥

शाखापार्श्वे तदुच्छ्रायस्त्र्यंगुलं परिकीर्तितम् ।
मध्यतस्तद्भवेत् सार्धं भुजयोरथ तच्छृणु ॥ ३१० ॥

स्कन्धाग्रात् कूपरान्तं च चतुर्विंशाङ्गुलो भवेत् ।
भुजायामोऽस्य मूलस्य विस्तारः स्यात् षडंगुलम् ॥

तदर्धं पञ्चकं सार्धं कूपरात्त्र्यंगुलकम् ।
मणिबन्धावसानं स्याद्दैर्घ्यं कूर्परविस्तृतिः ॥ ३१२ ॥

सार्धं षडङ्गुलं विप्र ! मणिबन्धादिकं भवेत् ।
अंगुलत्रयविस्तारं कराग्रं पट्टकलायतम् ॥ ३१३ ॥

विस्तारो द्विकलः प्रोक्तो वामे तु द्व्यंगुलं भवेत् ।
दृश्यं तिरोहितं चान्यद्द्वयं दक्षकरे तु वै ॥ ३१४ ॥

मध्यमाङ्गुलदैर्घ्यं तु पञ्चांगुलविनिर्मितम् ।
अनामितर्जनीन्यूनशाखाना तु क्रमेण तु ॥ ३१५ ॥

अर्धार्धाङ्गुलहीनं स्यादंगुलं मध्यमार्धकम् ।
मध्यमाङ्गुष्ठयोस्तारः सार्धमेकाङ्गुलं भवेत् ॥ ३१६ ॥

तर्जन्यनामयोरेकं कनीयस्यास्त्रिपादकम् ।
सार्धांगुलं नखायामं तदर्धं विस्तृतिर्भवेत् ॥ ३१७ ॥

मकुटस्योच्छ्रयो विप्र ! भवेदष्टादशांगुलः ।
तन्मूलविस्तृतिर्विप्र ! षोडशांगुलसम्मिता ॥ ३१८ ॥

षट्कला मध्यतो ज्ञेया अग्रतस्त्रिकला भवेत् ।
शिखामणेः समुच्छ्रायं कल्पयेत् सार्धमङ्गुलम् ॥३१९

विस्तारः स्यात् सपादस्तत्पक्षयामं त्रितालकम् ।
यद्वा पटावसानं स्याद्यथाशोभानुरूपतः ॥ ३२० ॥

एकैकपक्षतिस्तारः त्र्यंगुलं त्र्यंगुलं भवेत् ।
नागानामाश्यदैर्घ्यं तु सार्धमेकाङ्गुलं भवेत् ॥ ३२१ ॥

तद्विस्तारोऽङ्गुलं विप्र ! तत्सार्धाङ्गुलविस्तृतिः ।
त्र्यंगुलं तदधस्तात् स्यात् बालमध्यांगुलं तथा ॥

यथा क्रमेण हीनं स्यान्नागानां भोगविस्तरः ।
अनन्तस्य प्रधानस्य दैर्घ्यं त्र्यंगुलसम्मितम् ॥ ३२३ ॥

तत्तारः सार्धमेकं स्याद्द्वयं तद्दलविस्तरः ।
तदधो द्वितयं सार्धं शीर्षाणीतरनागवत् ॥ ३२४ ॥

बालाग्रमेकविस्तारं यथा स्यात् कल्पयेत् तथा ।
नागानां भोगदैर्घ्यस्य मानं कुर्याद्यथारुचि ॥ ३२५ ॥

दैर्घ्यं विष्टरपद्मस्य पञ्चाशच्चतुरंगुलम् ।
षड्गोलकस्तद्विस्तारः कर्णिकायां समायति ॥३२६॥

एकविंशत् कला प्रोक्तास्तद्विस्तारस्त्रिगोलकः ।
अन्यच्च वैनतेयस्य मानं यत्तत् प्रकल्पितम् ॥ ३२७ ॥

सुसमं यद्विभक्तं स्यादष्टोत्तरशतांगुलम् ।
प्रागवत् तदंगुलं कृत्वा उन्मानाद्यं प्रकल्पयेत् ॥ ३२८ ॥

तदंगुलानुसारेण नागाद्यं चापि कल्पयेत् ।
आत्मपक्षे तु नागाद्यं कुर्यादाद्यानुसारतः ॥ ३२९ ॥

पञ्चांगभूषणायुक्तं वस्त्रस्रग्गन्धवासितम् ।
एवं सर्वं समापाद्य देशिकः सुसमाहितः ॥ ३३० ॥

ध्वजारोहणनक्षत्रात् पूर्वेद्युश्च निशामुखे ।
प्रयायात् कर्मशाला च साहितो मूर्तिधारकैः ॥ ३३१ ॥

लिखितं पटमालोक्य लक्षणं सुपरीक्ष्य च ।
शंखदुन्दुभिनिर्घोषैः काहलध्वनिभिस्तथा ॥ ३३२ ॥

गीतैश्च विविधैः रम्यैः श्रुतिघोषैः पृथग्विधैः ।
सहध्वजपटं तस्मादानयेन्मुखमण्टपे ॥ ३३३ ॥

प्रविश्याभ्यन्तरं मूलविरस्थं परमेश्वरम् ।
अभिवाद्यार्घ्यगन्धाद्यैः पूजयेत् पुष्पधूपकैः ॥ ३३४ ॥

विसृज्य शिल्पिनं पश्चात् संप्रोक्ष्याभ्यर्चया पटम् ।
सिद्धार्थकान्वितैः पुष्पैः ताडयेदस्त्रमन्त्रितैः ॥ ३३५ ॥

दर्शयेद्देवदेवस्य सम्मुखं साधकोत्तमः ।
दहनाप्यायनं कुर्यात् विधिदृष्टेन कर्मणा ॥ ३३६ ॥

भूयोऽर्घ्यगन्धपुष्पाद्यैः प्रपूज्य परमेश्वरम् ।
गिरोच्चया त्विमं मन्त्रं बद्धाञ्जलिकरः पठेत् ॥ ३३७ ॥

" भगवन्! पुण्डरीकाक्ष! सर्वेश्वर! जगन्मय! ।
त्वया यथा तु कथितं तथा कर्तुं न शक्यते ॥ ३३८ ॥

अस्वातन्त्र्यादसामर्थ्यात् श्रद्धादीनामभावतः ।
तस्मान्मानादिसर्वेषां न्यूनाधिक्योपशान्तये ॥३३९॥

समालोक्य नेत्राभ्यां शीतलाभ्यां पटस्थितम् ।
सर्वदोषापहारिभ्यां वैनतेय प्रसीद ओम् " ॥ ३४० ॥

दीक्षितानां ततो विप्र! हस्ते दत्वा तु तं पटम् ।
चतुः प्रदक्षिणीकृत्य तेन सार्धं तु देशिकः ॥ ३४१ ॥

प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।
प्रविशेद्यजमानेन प्रासादाग्रस्थमण्डपम् ॥ ३४२ ॥

तत्र न्यस्त्वा भद्रपीठं तदूर्ध्वे शालितण्डुलैः ।
वेदिं कृत्वा तु तत्पृष्ठे भद्राख्यं मण्डलं लिखेत् ॥३४३॥

विभवे सति वस्त्रं तु समास्तीर्य तदूर्ध्वतः ।
तिलराशिं समुत्कीर्य तन्मध्ये स्वस्तिकं लिखेत् ॥

तस्योपरिष्टात् संस्थाप्य प्रासादाभिमुखं पटम् ।
उपविश्यासने पश्चादाचार्यः सुसमाहितः ॥ ३४५ ॥

करशुद्ध्यादि पूर्वोक्तं स्वदेहार्चनपश्चिमम् ।
सर्वं खगेशमन्त्रेण सागेन तु समाचरेत् ॥ ३४६ ॥

द्वारस्थतोरणकुम्भादियजनं प्राग्वदाचरेत् ।
ततः पुण्याहघोषं तु कारयेत् पूर्ववद्द्विज! ॥ ३४७ ॥

गरुडस्याग्रतः प्राग्वत् कुम्भं करकसंयुतम् ।
भारमात्रोपकल्प्ते तु धान्यपीठे तु विन्यसेत् ॥३४८॥

जलद्रोण्यादिकं पात्रं गन्धतोयैः सुपूरितम् ।
दक्षिणे करकस्याथ विनिवेश्य च तत्र तु ॥ ३४९ ॥

सद्यश्छायाधिवसनमाचरेद्गरुडस्य तु ।
स्नपनानां पुरोक्तानां पूर्वसिद्धवके द्विज! ॥ ३५० ॥

अधमाधममार्गेण स्नपनं तु समाचरेत् ।
अग्रतो वैनतेयस्य वेदिकोपरि संस्थिते ॥ ३५१ ॥

दर्पणे तु, ततः पश्चान्मुहूर्ते शोभने गुरुः ।
नयनोन्मीलनं कुर्यात् प्रागुक्तेनैव वर्त्मना ॥ ३५२ ॥

सर्वेषामपि सर्पाणां नेत्रोन्मीलनमाचरेत् ।
प्राग्वत् सशुद्धदेहस्तु शिल्पी प्रकटनां नयेत् ॥

सर्वं तु पूर्ववत् कुर्यात्त्रयो पूरणादिकम् ।
कुम्भे च करके चैव आसनं परिकल्प्य च ॥ ३५४ ॥

कुम्भे गरुडमावाह्य करके मन्त्रमस्त्रपम् ।
पूजयित्वार्घ्यगन्धाद्यैस्ततो दिक्कलशाष्टके ॥ ३५५ ॥

इन्द्रादिलोकपालांस्तु प्रादक्षिण्येन पूज्य च ।
भित्तिसंसेचनं कृत्वा भूयः संस्थाप्य तत्र तु ॥ ३५६ ॥

ततो ध्वजपटे प्राग्वदासनं परिकल्प्य च ।
ततो गरुडमन्त्रं तु सहस्रादित्यभास्वरम् ॥ ३५७ ॥

सर्वरोगप्रशमनं सर्वोपद्रवनाशनम् ।
सर्वसिद्धिप्रदं नृणां सर्वदारिद्र्यनाशनम् ॥ ३५८ ॥

हृदयाद्रेच्य विप्रेन्द्र! पटस्थगरुडे न्यसेत् ।
सकलीकरणं कृत्वा सन्निधिं च समाचरेत् ॥ ३५९ ॥

सन्निरोधं च साम्मुख्यं मुद्रानन्धं तथैव च ।
लययागं भोगयागं यथावद्द्विजसत्तम! ॥ ३६० ॥

सर्वं गरुडमन्त्रेण सागेन तु समाचरेत् ।
कुम्भे च करके चैव पटे च क्रमयोगतः ॥ ३६१ ॥

महता विभवेनैव पूजनं तु समाचरेत् ।
अलंकारासनान्तं च यथोक्तेन क्रमेण तु ॥ ३६२ ॥

कृत्वा संपूजनं विप्र! गरुडस्य, ततः परम् ।
प्रासादाभ्यन्तरे विप्र! देशिकानुमतेन तु ॥ ३६३ ॥

अन्येन गुरुणा यद्वा साधकेन विशेषवत् ।
पूजनं कारयेत् सम्यङ्मूलमूर्तिगतस्य च ॥ ३६४ ॥

यात्रामूर्तिगतस्यापि विभोर्दानान्तमेव च ।
स्नपनं गरुडस्थस्य विशेषार्चनपूर्वकम् ॥ ३६५ ॥

तत्परं वैनतेयस्य भोज्यासनपुरस्सरैः ।
विविधैर्मधुपर्कान्तं हृद्यैः सकलमूलकैः ॥ ३६६ ॥

अन्नैरतिप्रभूतैश्च तथान्यैर्विविधैरपि ।
भोगैरिष्ट्वा जपान्तं च पूर्ववत् क्रमयोगतः ॥ ३६७ ॥

संप्रदानं पृथक् कुर्यात् कारिभ्यस्तु यथाविधि ।
मन्त्रास्त्रकुम्भयोर्दत्तमाचार्येभ्यो ददेत् ततः ॥ ३६८ ॥

पटस्थस्यापि नैवेद्यं किंचिदादाय पात्रगम् ।
देशिकः स्वयमादद्याद् गुर्वादिभ्योपि वै ददेत् ॥३६९॥

मूलविवस्थितस्यापि यात्राविवस्थितस्य च ।
देवस्य मधुपर्काद्यैर्नैवेद्यं विनिवेदितम् ॥ ३७० ॥

दापयेद्देशिकादिभ्यस्ततो होमं समाचरेत् ।
कुण्डं सलक्षणं कृत्वा प्राग्भागे गरुडस्य तु ॥ ३७१ ॥

तत्रानलं च संस्कृत्य आवाह्य विहगेश्वरम् ।
समिधा सप्तकं हुत्वा शान्त्यर्थं तु तिलैर्घृतैः ॥ ३७२ ॥

आहुत्यष्टोत्तरशतं हुत्वा पूर्णां निवेदयेत् ।
यद्वा नैमित्तिके कुण्डे होमं कुर्यात्तु देशिकः ॥ ३७३ ॥

ततस्तु यजमानाय स्नानाद्यै प्रयतात्मने ।
गरुडस्य पटस्थस्य नैवेद्यं यन्निवेदितम् ॥ ३७४ ॥

तत्र किंचित् समादाय दत्वा वै देशिकः स्वयम् ।
तत्तच्छिष्टं तु नैवेद्यं कृत्वा तु कवलं पृथक् ॥ ३७५ ॥

नारीणमप्रजानां तु नराणां रोगिणामपि ।
दद्याद्गरुडमन्त्रं तु ध्यायमानः समाहितः ॥ ३७६ ॥

प्राङ्मुखं प्राशयित्वा च तत्तीर्थं त्वथ पाययेत् ।
एवं कृत्वाधिवासं तु जागरेण नयेन्निशाम् ॥ ३७७ ॥

ततः प्रभाते सुस्नातस्वाचान्तो देशिकोत्तमः ।
नित्यार्चनं विभो कृत्वा विशेषयजनं तथा ॥ ३७८ ॥

वैनतेय ततोऽभ्यर्च्य कुम्भपूर्वं यथाविधि ।
महाहविर्निवेद्याथ होमं कृत्वा तु पूर्ववत् ॥ ३७९ ॥

ततश्चतुर्थावरणे अन्तरा गोपुरस्य तु ।
चतुर्हस्तं द्विहस्तं वा ध्वजपीठं समन्ततः ॥ ३८० ॥

सार्धहस्तोच्छ्रितं विप्र ! हस्तोच्छ्रितमथापि वा ।
शिलाभिरिष्टकाभिश्च पक्वाभिर्वा यथारुचि ॥ ३८१ ॥

खातं कुर्यात्तु तन्मध्ये यावद्भूमितलं द्विज ! ।
तृतीयावरणे वापि बलिपीठात्पहिर्द्विज ! ॥ ३८२ ॥

द्वितीयावरणे वा तद्भवेत् कालानुरूपतः ।
उत्तरे ध्वजपीठस्य पूर्वस्यां दिशि वा द्विज ! ॥ ३८३ ॥

शाययेत्तु ध्वजस्तंभं ध्वजयष्टिसमन्वितम् ।
पूर्वाग्रमुत्तराग्रं वा लक्षणाढ्यं सुशोभनम् ॥ ३८४ ॥

अन्तस्सारो बहिस्सारो निस्सारश्च त्रिधा भवेत् ।
वपको देवदारुश्च चन्दनः खदिरस्तथा ॥ ३८५ ॥

सालवृक्षश्च बिल्वश्च ककुभालकौ यथा ।
इत्यवमादयो वृक्षा अन्तस्सारा उदाहृताः ॥ ३८६ ॥

क्रमुको नालिकेरश्च हिन्तालस्ताल एव च ।
वेणुश्चापि बहिस्सारा प्रशस्ता ध्वजकर्मणि ॥ ३८७ ॥

किंशुकाद्यास्तु ये विप्र ! निस्सारा समुदाहृताः ।
निस्सारं वर्जयेत् स्तंभं सर्वदा ध्वजकर्मणि ॥ ३८८ ॥

आर्द्रं नवं ऋजु स्निग्धं वक्रस्फोटनवर्जितम् ।
अयुग्मपर्वकं शुद्धं सत्वचं सुस्थिरं द्विज ! ॥ ३८९ ॥

ग्राहयित्वा ध्वजस्तम्भं शास्त्रदृष्ट्या परीक्षयेत् ।
अशीतिताल मुख्यं स्यान्मध्यमं षष्टितालकम् ॥३९०॥

पञ्चाशत्तालमधमं पञ्चतालाधिकं तु वै ।
मध्यमोत्तममुद्दिष्टं पञ्चाशत्तालसम्मितम् ॥ ३९१ ॥

पञ्चतालविहीनं तद्भवेन्मध्यममध्यमम् ।
मध्यमाधममुद्दिष्टं द्विविंशत्तालसम्मितम् ॥ ३९२ ॥

सप्तत्रिंशच्च तालानां पञ्चत्रिंशत्तथैव च ।
द्वात्रिंशच्च त्रयं विप्र ! अधमोत्तमपूर्वकम् ॥ ३९३ ॥

मात्राङ्गुलवशेनात्र प्रमाणपरिकल्पनम् ।
सभवे सति विप्रेन्द्र ! शततालं प्रकल्पयेत् ॥ ३९४ ॥

अन्यच्च नवभेदं तु प्रमाणमधुनोच्यते ।
कराणां पञ्चविंशच्च तयोविंशत्तथैव च ॥ ३९५ ॥

एकविंशच्च विंशच्च तदेकोनं च सत्तम !
अष्टादश ततोन्यच्च तथा षोडशक द्विज ॥ ३९६ ॥

तिपञ्च च क्रमेणैव नवक परिकीर्तितम् ।
मानाङ्गुलेन मान स्यात् त्रिविधेन यथाबलम् ॥ ३९७ ॥

तदभावे तु मान स्यादन्त्र मात्राङ्गुलेन वा ।
प्रासादशिखराग्रोच्च प्रासादोच्चमथापि वा ॥ ३९८ ॥

कण्ठोच्च गोपुरोच्च वा यथावित्तानुरूपत ।
ध्वजस्तम्भस्य मूलान्तु नाह तु यथा भवेत् ॥ ३९९ ॥

मूले द्वादशताल तु नवताल तु सप्तकम् ।
तन्मध्ये षष्ठताल तु पञ्चतालं तथा भवेत् ॥ ४०० ॥

तदग्र पञ्चतालं तु चतुस्ताल द्वितालकम् ।
द्वादशाङ्गुलमानेन नाहमष्टाङ्गुल भवेत् ॥ ४०१ ॥

चतुर्विंशदङ्गुल स्तम्भनाहेन व्रेधदम् ।
त्रिधा विभज्य तत् स्तम्भ त्रिधा कृत्वा तृतीयकम् ॥

अधोभागे ह्यधस्ताच्च मध्यभागे तु मध्यत ।
अग्रतो ह्यूर्ध्वभागे तु यज्ञकाष्ठविनिर्मितम् ॥ ४०३ ॥

मसूरकत्रय कृत्वा सुषिरत्रय नयुतम् ।
दण्डयष्टिनिवेशार्थ सुवृत्त पार्श्वयोर्द्विज ! ॥ ४०४ ॥

एणकाष्ठस्तमानाच्च द्विनवाङ्गुलविस्तृता ।
मूलदेशग्रदेश तु चतुरङ्गुलविस्तृता ॥ ४०५ ॥

द्वितालं सार्धताल तु एकतालं तु वा द्विज ! ।
त्यक्त्वा स्तम्भाग्रतो विप्र ! न्यसेदग्रमसूरकम् ॥ ४०६ ॥

अन्यद्द्वय समुदिते स्थाने सम्यङ्निवेश्य च ।
यद्वा स्तम्भाग्रत. प्राग्वन्न्यसेदूर्ध्वमसूरकम् ॥ ४०७ ॥

अधो हस्तद्वयं सार्ध त्यक्त्वा मध्यमसूरकम् ।
तदधस्तु तथा त्यक्त्वा न्यसेदन्यमसूरकम् ॥ ४०८ ॥

एवं तालत्रयं त्यक्त्वा ततस्तस्मिन्निवेशयेत् ।
ध्वजयष्टि दृढा ऋज्वीं लोहयन्त्रसमन्विताम् ॥ ४०९ ॥

वेष्टयेद्दर्भमालाभिर्ध्वजदण्डं प्रदक्षिणम् ।
एवं कृत्वा ध्वजस्तम्भ प्रोक्षयेदस्त्रवारिणा ॥ ४१० ॥

ध्वजपीठस्थिते गर्ते रत्नधान्यानि निक्षिपेत् ।
देशिकस्तार्क्ष्यमन्त्रेण ततो ब्राह्मणसत्तमै ॥ ४११ ॥

शूद्रैर्वा दीक्षितैर्विप्र ! देवदासैरथापि वा ।
शङ्खभेर्यादिनिर्घोषगीतवादित्रसंयुतम् ॥ ४१२ ॥

स्थापयेत्तु ध्वजस्तंभ तस्मिन् गर्ते ऋजुस्थितम् ।
प्रासादाभिमुख स्थाप्य वालुकाभिश्च पूरयेत् ॥ ४१३ ॥

हस्तिपादादिभि कृत्वा सुदृढ च यथा भवेत् ।
यद्वा रजन्या पूर्वस्या कृत्वा स्तम्भाधिवासनम् ॥ ४१४ ॥

अद्यत्वे स्थापयेत् पश्चाद् गत्वा गरुडसन्निधिम् ।
रथे वा कुञ्जरे याने ध्वजमारोप्य यत्नत. ॥ ४१५ ॥

प्रभया चित्रकुसुमै कृतया भूषयेद् ध्वजम् ।
वासोविभूषणै स्त्रग्भिर्विचित्राभिश्च पूजयेत् ॥

छत्रचामरपूर्वैश्च माधूरव्यजनैस्तत ।
विचित्रैस्तालवृन्तैश्च आतपत्रैर्मनोहरे ॥ ४१७ ॥

केतुदण्डैर्विचित्रैश्च दुकूलपटशोभितै ।
चतुर्वेदमयोद्घोष स्तोत्रघोषसमन्विते ॥ ४१८ ॥

गीतकैर्विविधैर्वाद्यै शङ्खकाहलनिस्वनै ।
भेरीमृदङ्गपूर्वाणा घोषैरन्यैश्च मङ्गलै ॥ ४१९ ॥

ब्राह्मणैर्ध्रियमाणैश्च सांकुरै पालिकागणै. ।
सुवेषगणिकासंघैस्तथा भक्तजनै. सह ॥ ४२० ॥

क्ष्वेलितास्फोटितैर्युक्त जयशब्दसमन्वितम् ।
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमम् ॥ ४२१ ॥

भ्रामयित्वा क्रमेणैव सर्वाण्यावरणानि च ।
ग्राम प्रदक्षिण नीत्वा ग्राममध्ये स्थितो ध्वजम् ॥

श्रावयेच्चतुरो वेदान् सेतिहासपुराणकान् ।
सौपर्णमपि वै सूक्त तत्र सदर्शयेत् पुन ॥ ४२३ ॥

गेयं नृत्तं च वाद्य च आतोद्यं च चतुर्विधम् ।
उपहाराश्च माल्यादीन् ताम्बूलान् विनिवेद्य च ॥

तत. प्रवेशयेद्विप्र ! प्रासाद गरुडध्वजम् ।
अंकुरार्पणपूर्वं तु उत्सवे द्विजसत्तम ! ॥ ४२५ ॥

गरुडस्य पटस्थस्य पश्चाद्भागे यथाविधि ।
तद्रात्रौ बलिसंयुक्त यात्राविधं परिभ्रमेत् ॥ ४२६ ॥

साधनादेरसपत्ते पृथङ्नेतुमशक्यत ।
तत्रापि सति योग्यत्वे पृथगेव परिभ्रमेत् ॥ ४२७ ॥

अन्यत्र केवलं विप्र ! ध्वजमेव नयेत् सदा ।
पत्तने नगरे वापि बलिभ्रमणसयुत ॥ ४२८ ॥

उत्सवो विहितो यत्र तत्र वै गरुडध्वजम् ।
भ्रामयेद्द्वितये तस्मिन् यात्राविधसमन्वितम् ॥४२९॥

तन्मात्राणा योग्यताये पवितीकरणाय च ।
ग्रामे तेन च वै सार्धं भ्रामयेद्विधमौत्सवम् ॥ ४३० ॥

एव प्रदक्षिणं नीत्वा धाम ग्रामादिक तथा ।
ध्वज तु मण्डपे स्थाप्य न कृत यदि पूर्वत ॥ ४३१ ॥

स्थापनं ध्वजदण्डस्य स्थापयित्वा तु तत्तदा ।
प्रासाद संप्रविश्याथ यात्राविध विवेपत ॥ ४३२ ॥

विचित्रैर्वसनै रम्यै. भूषणैर्विविधैरपि ।
माल्यैश्च विविधै रम्यैरलंकृत्य तत परम् ॥ ४३३ ॥

शिविकादौ समारोप्य सर्वसाधनसयुतम् ।
आस्थानमण्डपे नीत्वा ध्वजपीठस्य सन्मुखम् ॥ ४३४ ॥

सौवर्णे विष्टरे रम्ये तल्पाद्यगोपशोभिते ।
विचित्रेण वितानेन उपरिष्टाद्विभूषिते ॥ ४३५ ॥

सन्निवेश्य ततः पश्चादाचार्य. सुसमाहित ।
साधकाद्यैः परिवृतो ह्यादाय गरुडध्वजम् ॥ ४३६ ॥

सह शखनिनादाद्यै. प्रादक्षिण्येन योगत ।
ध्वजपीठे समानीय स्तंभं प्रक्षाल्य सज्जलैः ॥ ४३७ ॥

विभवे सति वस्त्रेण संवेष्ट्य ध्वजदण्डकम् ।
गरुड पूजयित्वा तु पुष्पांजलिपुरस्सरम् ॥ ४३८ ॥

अर्घ्य पाद्य तथाचामं गन्ध माल्य च धूपकम् ।
अपूपान् पृथुकाश्चापि पानकं तर्पणं तथा ॥ ४३९ ॥

नालिकेरजलैर्युक्तमाचामं तदनन्तरम् ।
कर्पूरादिसमोपेतं दत्वा ताम्बूलमुत्तमम् ॥ ४४० ॥

तन्मुद्रा दर्शयित्वा तु रज्जुमादाय वै दृढाम् ।
त्रिवृत्कृतेस्तु कार्पासस्त्वरनिदृढै कृताम् ॥ ४४१ ॥

यष्ट्यग्रसस्थिते यन्त्रे योजयित्वा तया तत ।
ध्वजस्य शिखर विप्र ! बन्धयेत् सुदृढ यथा ॥ ४४२ ॥

बालध्वजेन सहित घण्टया च समन्वितम् ।
पुण्याह वाचयित्वा तु सप्रोक्ष्यास्त्रोदकेन तु ॥ ४४३ ॥

महाकुम्भस्थतोयेन सप्रोक्ष्य गरुड तत ।
महाकुम्भस्थगरुड पटस्थे तु निवेशयेत् ॥ ४४४ ।

स्तम्भमूले समुत्कीर्य सास्त्रकुम्भ ल तत ।
कलशाष्टकतोय च स्तम्भमूले विनिक्षिपेत् ॥ ४४५ ॥

आचार्य मन्त्रन्यासं तु पुष्पाजलिपुरस्सरम् ।
सन्निधि सन्निरोध च साम्मुख्य च समाचरेत् ॥४४६॥

" अस्माद्दिनात् समारभ्य यावत्तीर्थदिनान्तिमम् ।
सन्निधि कुरु पक्षीन्द्र ! राज्ञो जनपदस्य च ॥ ४४७ ॥

ग्रामस्य यजमानस्य वैष्णवानां विशेषत ।
तुष्टये पुष्टये चैव सर्वशत्रुजयाय च ॥ ४४८ ॥

अपमृत्युजयार्थं च विहगेश ! प्रसीद ओम् । "
इति विज्ञाप्य पक्षीन्द्र विकिरेत् कुसुमांजलिम् ॥४४९॥

पूर्वाह्णे वाथ मध्याह्ने मुहूर्ते शोभने गुरु. ।
रज्जुनारोहयेद्घोश ध्वजस्थमनुचिन्तयन् ॥ ४५० ॥

रज्जुं च बन्धयेत् स्तंभे प्रादक्षिण्यक्रमेण तु ।
प्रासादाभिमुख स्तम्भे स्थापयेद्गरुडध्वजम् ॥ ४५१ ॥

विहगेश्वरबिंबं च स्तम्भाग्रे योजयेन्न वा ।
सन्निधौ देवदेवस्य गत्वा पुष्पाजलि क्षिपेत् ॥ ४५२ ॥

' ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया ।
तत् सर्व पूर्णमेवास्तु सुतृप्तो भव सर्वदा ॥ ४५३ ॥

ओमच्युतक्ष ! जगन्नाथ ! मन्त्रमूर्ते ! जनार्दन ! ।
रक्ष मां पुण्डरीकाक्ष ! क्षमस्वाज ! प्रसीद ओम् " ॥

इति विज्ञाप्य देवेशं यात्रामूर्तिगतं विभुम् ।
अन्यत्र मण्डपे नीत्वा विशेषार्चनपूर्वकम् ॥ ४५५ ॥

प्रभूतान्न निवेद्याथ सर्वं हवनपश्चिमम् ।
कृत्वा यथाक्रमेणैव प्रासाद तु प्रवेशयेत् ॥ ४५६ ॥

ध्वजपीठोपरिष्टात्तु स्तम्भमूले प्रकल्पयेत् ।
अष्टपत्र तु कमल चतुरावरणान्वितम् ॥ ४५७ ॥

सकर्णिकं यथा स्तम्भ कर्णिकास्थो विराजते ।
चतुरंगुलविस्तारास्तावन्मानेन चोन्नता ॥ ४५८ ॥

कर्तव्या मेखला. सर्वाश्चतुरश्रा द्विजोत्तम ! ।
स्तम्भमान विना पद्मं षडंगुलसमन्वितम् ॥ ४५९ ॥

तावद्विस्तारसयुक्त मेखलोपरि विन्यसेत् ।
पीठोर्ध्वे तु प्रपा कुर्यात् चतुस्तम्भसमन्विताम् ॥

यद्वा स्तंभाष्टकोपेता षोडशस्तम्भसंयुताम् ।
चतुस्तोरण संयुक्ता दर्भमालापरिष्कृताम् ॥ ४६१ ॥

भूषितां तु पताकाद्यैर्बाह्ये यवनिकान्विताम् ।
दीपान् प्रदीपयेत्तत्र अनिर्वाणान् सनन्तत ॥ ४६२ ॥

तद्वासरात् समारभ्य पुष्पयागादिनान्तिमम् ।
त्रिसन्ध्यमर्चनं कुर्यात् सविशेषं जपान्तिमम् ॥ ४६३ ॥

उत्सवारम्भदिवसात् त्रिसप्तदिनमाचरेत् ।
पूजालोपो न कर्तव्यो द्विगुणीकृत्य आचरेत् ॥ ४६४ ॥

बलिकाले बलि दद्यादस्यापि प्रतिवासरम् ।
प्रदोषे समनुप्राप्ते यात्राविजगर्त विभुम् ॥ ५६५ ॥

अलंकृत्य यथान्याय नयेदास्थानमण्टपम् ।
भद्रासने समारोप्य विभवेन तु पूर्ववत् ॥ ४६६ ॥

कृत्वा होमावसान तु भेरीताडनमाचरेत् ।
अग्रतस्तु विभो स्थाप्य भेरी वै धान्यविष्टरे ॥४६७॥

तत्पूर्वे शखनिकर वह्नौ काहलसंचयम् ।
याम्ये तु मद्दलं तन्त्री वंशयुक्ता तु यातुदिक् ॥

वारुण्या तु मृदगं च डुड्डुकान् ह्रस्वमद्दलान् ।
वायव्ये झल्लरी न्यस्य कांस्यतालसमन्विताम् ॥

पटहं ह्रस्वपटहं सोमे डुड्डुकसंयुतम् ।
ऐशान्यां डुड्डुकां झल्लीं हस्तघटासमन्वितात् ॥

तेषां बाह्ये तु विप्रेन्द्र ! दक्षिणे गणिकाजनम् ।
न्यसेन्मंगलगानार्थं तत्पार्श्वे मन्त्रगायकान् ॥ ४७१ ॥

नर्तकानग्रत स्थाप्य उत्तरे वन्दिवृन्दकान् ।
स्वे स्वे स्थानेषु सस्थाप्य अन्यान् वै वाद्यकोविदान् ।

एव क्रमेण सस्थाप्य सभवानुगुणं द्विज ! ।
वाससा वेष्टयेद्वापि भेरीं वित्तानुरूपत. ॥ ४७३ ॥

शब्दविग्रहमाकाश भेर्या संस्मृत्य पूजयेत् ।
कोणं तद्दाक्षिणे स्थाप्य वायु तत्र सुपूजयेत् ॥ ४७४ ॥

तत. पारशव स्नान दर्भपाणिमलकृतम् ।
उपवीतादिसयुक्त अग्रत स्थाप्य वीक्षयेत् ॥ ४७५ ॥

अस्त्रेण प्रोक्षयेत् पश्चादव्यतोयेन तत्परम् ।
तेनैव ताडयेद्भेरी गीतनृत्तपुरस्सरम् ॥ ४७६ ॥

शखगद्यादि संयुक्तं मथवा देशिक. स्वयम् ।
मुहूर्ते शोभने प्राप्ते ताडयित्वा तु भेरिकाम् ॥ ४७७ ॥

कोणेन प्रथमं ध्यायन् हयग्रीवं जनार्दनम् ।
त्रिस्थानादिषु देवानां त्रिधा वै तेन ताडयेत् ॥ ४७८ ॥

तत पारशवेनैव ताडयेत्तु यथेच्छया ।
देवतावाहनी गाथां संस्कृता प्राकृता तु वा ॥ ४७९ ॥

द्रामिडी वा यथेच्छातस्तदा संश्रावयेद्विभुम् ।
तत्काले देवतानृत्तं तत्तद्गीतादिसयुतम् ॥ ४८० ॥

दर्शयेद्देवदेवस्य देवताना सुतृप्तये ।
ततस्तु देवदेवेशं गर्भगेहे प्रवेशयेत् ॥ ४८१ ॥

पायसं द्रोणमान तु समादायाथ पात्रत. ।
तथार्घ्यगन्धमाल्यादि धूपं ताबूलमेव च ४८२ ॥

प्रासादद्वारमारभ्य बहिर्द्वारावसानकम् ।
आवृतिष्वपि सर्वासु वीथ्याचरणपश्चिमम् ॥ ४८३ ॥

बलि प्रदाय विधिना गीतनृत्तादिसंयुतम् ।
तत प्रविश्य ग्रामं तु पूर्वस्या दिशि संस्थित. ॥४८४॥

देवतावाहन कुर्यात् प्राङ्मुखो देशिकः स्वयम् ।
तत्पुत्रस्तस्य शिष्यो वा स्वरेणोच्चतरेण तु ॥ ४८५ ॥

"आगच्छतामरगणा ! प्रागाशा येऽधिशेरते।
विरूपाश्च सुरूपाश्च सपर्यामुद्यतामिमाम् ॥ ४८६ ॥

गृहीत्वा पान्तु नस्तृप्ता कुमुदस्यानुयायिन ।
महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व ॥४८७॥"

अनेन मन्त्रेणावाह्य कुमुद सगणं तत ।
अर्घ्यालेपनमाल्यादि धूप तोयं यथाक्रमम् ॥ ४८८ ॥

पायसान्नं पुनस्तोय ताम्बूलं च प्रदापयेत्।
पश्चात् सतोषयेद्रम्यैर्महद्भि शङ्खजै रव ॥ ४८९ ॥

तदीयतालसङ्गीतनृत्तैश्चापि, तत परम्।
"आगच्छतामरगणा ! येऽग्न्याशामधिशेरते ॥ ४९०॥

भीमाभीममुखा रौद्रा सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ता कुमुदाक्षानुयायिन ॥

महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व ।"
अनेन कुमुदाक्ष तु समावाह्य गणाधिपम् ॥ ४९२ ॥

प्राग्वत् सन्तोषयित्वा तु, तत संप्राप्य याम्यदिक्।
"आगच्छत पितृगणा ! याम्याशामधिशेरते ॥

दारुणाऽदारुणाचारा सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ता पुण्डरीकानुयायिन. ॥४९४॥

महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व ।"
अनेन पुण्डरीकाख्य समावाह्य गणेश्वरम् ॥ ४९५ ॥

क्रमेण पूजयित्वा तु गत्वा वै यातुधानदिक्।
"आगच्छत यातुगणा ! यात्वाशा येधिशेरते ॥

क्रव्याशिन क्रूरधिय. सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ता वामनस्यानुयायिन ॥

महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व ।"
इत्यावाह्य गणेश तु वामनं पूजयेत् क्रमात् ॥ ४९८ ॥

वारुणाशा ततो गत्वा शकुकर्ण गणेश्वरम्।
"आगच्छताऽहिप्रथमा. ! प्रतीचीं येऽधिशेरते ॥

महद्विषा दन्दशूका सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ता शंकुकर्णानुयायिन. ॥ ५०० ॥

महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व. ।"
इत्यावाह्य यजेत् प्राग्वत्, पश्चात् संप्राप्य वायुदिक ॥

"आयान्तु गन्धर्वगणा ! वाय्वाशा येऽधिशेरते।
सुदर्शना भीमवेगा सपर्यामुद्यतामिमाम् ॥ ५०२ ॥

गृहीत्वा पान्तु नस्तृप्ता स(पि)र्वनेत्रानुयायिन ।
महमिममुपयातु प्रीतास्तेभ्यो नमोऽस्तु व ॥ ५०३ ॥

अनेनावाह्य सगणं सर्वनेत्रं तु तोषयेत्।
तत सोमदिश गत्वा सुमुख तु गणाधिपम् ॥ ५०४ ॥

आगच्छत यक्षगणा ! उदीची येऽधिशेरते।
विरूपा दण्डहस्ताश्च सपर्यामुद्यतामिमाम् ॥ ५०५ ॥

गृहीत्वा पान्तु नस्तृप्ता सुमुखस्यानुयायिन ।
महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व ॥ ५०६ ॥

इति मन्त्रेण चावाह्य तोषयत् पूर्ववर्त्मना।
ततस्त्वीशदिश गत्वा गणेश सुप्रतिष्ठितम् ॥ ५०७ ॥

आयान्तु पिशाचगणा ईशाशा येऽधिशेरते।
सशूला युधहस्ताश्च सपर्यामुद्यतामिमाम् ॥ ५०८ ॥

गृहीत्वा पान्तु नस्तृप्ता सुप्रतिष्ठानुयायिन ।
महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व ॥ ५०९ ॥

मन्त्रेणावाह्य सपूज्य गत्वा वै ग्राममध्यत ।
तत्र चावाहयेदूर्ध्वं पृश्निगर्भं गणेश्वरम् ॥ ५१० ॥

आगच्छत सिद्धगणा ! गगन येऽधिशेरते।
शुचिमतय शुचय सपर्यामुद्यतामिमाम् ॥ ५११ ॥

गृहीत्वा पान्तु नस्तृप्ता पृश्निगर्भानुयायिन ।
महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व. ॥ ५१२ ॥

आवाह्य तोषयित्वा तु, अवस्तान्मानव तत ।
आगच्छताधरगणा ! पृथिवी येऽधिशेरते ॥ ५१३ ॥

बहुरूपा बहुज्ञाना सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ता मानवस्यानुयायिन ॥ ५१४ ॥

महमिममुपयान्तु प्रीतास्तेभ्यो नमोऽस्तु व ।
आवाह्य तोषयेत् प्राग्वत् क्रमान्नृत्तावसानकम् ॥

तृप्तये सर्वभूतानां बलिशेषं ततः क्षिपेत् ।
बलिदाने तु पूर्वादिवैश्वतदिगन्तिमम् ॥ ५१६ ॥

आचार्यः प्राङ्मुखः स्थित्वा कुर्यादावाहनादिकम् ।
यात्वादिदिक्क्रिये कुर्यात् पूर्वोदितमुदङ्मुखः ॥ ५१७ ॥

सोमेशदिग्द्वये ग्राममध्येऽपि प्राङ्मुखो भवेत् ।
समतालस्तथावद्धस्तालो वै भृङ्गिणी तथा ॥ ५१८ ॥

मल्लतालो मगलश्च जयतालस्तु भद्रकः ।
ढक्करीसंज्ञितस्तालो व्रतताल स्तथैव च ॥ ५१९ ॥

अनन्तताल इत्येते दश तालाः प्रकीर्तिताः ।
कुमुदादिगणेशानां दशानां क्रमशो द्विज ! ॥ ५२० ॥

षड्जर्षभौ च गान्धारौ मध्यमः पञ्चमस्तथा ।
धैवतश्चैव निषादो धैवतो मध्यमस्तथा ॥ ५२१ ॥

पञ्चमश्च क्रमेणैव कथिता स्युर्दश स्वराः ।
गान्धारराग कौलयाख्य केशिको नट्टभाषिकः ॥

श्रीकामदश्च तत्केशी दक्षरागस्तथैव च ।
चोलापाण्यभिधो रागो मेघरागश्च पश्चिमः ॥

इत्येते कुमुदादीनां दश रागाः प्रकीर्तिताः ।
विलासः सर्वतोभद्रः खेटकः चक्रमण्डलम् ॥ ५२४ ॥

कान्तारकुट्टिमः पृष्ठकुट्टिमः कटिबन्धनम् ।
वामजानूर्ध्वनृत्तं च आदिमं च द्वयं पुनः ॥ ५२५ ॥

एते नृत्तविशेषाश्च कुमुदानां क्रमात् स्मृताः ।
एते ह्यावृतिदेवानां क्रमात्तालादयः स्मृताः ॥ ५२६ ॥

अन्येषां सर्वदेवानां तालो भद्रः प्रशस्यते ।
भवेद्गारूडतालस्तु पक्षीशस्य तु, मध्यमः ॥ ५२७ ॥

स्वरो, रागस्तु गौडः स्यान्नृत्तं वै विष्णुकान्तकम् ।
विष्वारेर्जयतालः स्यान्नृत्तं स्वस्तिकमुच्यते ॥ ५२८ ॥

ऋषभस्तु स्वरः प्रोक्तो वराटीराग एव च ।
भेरीताडनपूर्वं तु देवतावाहनं चरेत् ॥ ५२९ ॥

घोषयेद्गारुडं तालमन्तराले तु वै दिशाम् ।
तत्काले देशिकेन्द्रेण स्वयं संस्कृतगाथया ॥ ५३० ॥

अन्ये चतुर्मुखमुखा आहूतव्या मरुद्गुणाः ।
देवस्योत्सवसेवार्थं तथान्ये भगवद्गणाः ॥ ५३१ ॥

तथान्ये भगवद्भक्ता जनास्तत्पदवासिनः ।
यद्वा गुरोरनुमतैर्भगवद्भक्तिबृंहितैः ॥ ५३२ ॥

आहूतव्यास्तु तैर्विप्रैर्दिव्यया गाथया द्विज ! ।
एवं ग्रामं परिभ्राम्य प्रासादं संप्रविश्य तु ॥ ५३३ ॥

गरुडस्थानमासाद्य तोषयित्वा खगध्वजम् ।
तालादिकैस्ततस्त्वेनं विष्वक्सेनं तु तोषयेत् ॥ ५३४

देवतावाहनं येऽत्र द्रष्टुकामाः समाहिताः ।
भेरीताडनशब्दं च तथा शृण्वन्ति ये जनाः ॥ ५३५ ॥

तद्देशात्तु न गच्छेयुर्यावत्तीर्थदिनान्तिमम् ।
मोहेन यदि गच्छेयुस्ते भविष्यन्ति रोगिणः ॥ ५३६

न कुर्युस्ते नदीतारं न यानं योजनात् परम् ।
यातास्चेत् पुनरागत्य गरुडं संप्रपूज्य तु ॥ ५३७ ॥

तीर्थयात्रां तु संसेव्य ते भविष्यन्ति नीरुजः ।
एवं तु ध्वजमुत्थाप्य गुरुं पश्चात् समाहितः ॥५३८

देवानां केशवादीनां मन्त्रैर्द्वादशभिः क्रमात् ।
द्वादशाहं व्रतं कुर्यात् यात्रारम्भदिनादितः ॥ ५३९ ॥

स्नानार्चनादिकं कृत्वा पीत्वा तच्चरणोदकम् ।
कुशोदकसमायुक्तं जपेद्वै द्वादशाक्षरम् ॥ ५४० ॥

नैवेद्यप्राशनं पूर्वं कुर्यान्नक्ताशनं द्विज ! ।
जपेद्द्वादशनामानि क्रमाद्वाच्यमनुस्मरन् ॥ ५४१ ॥

अङ्कुरारोपणदिनाद्यावत्तु ध्वजवासरम् ।
दिनषट्केन विप्रेन्द्र ! प्रत्यहं व्रतमाचरेत् ॥ ५४२ ॥

द्वादशाक्षरमन्त्रेण कुर्यादङ्कुरवासरे ।
द्वितीये तुर्यमन्त्रेण, परे सुषुप्तिवाचकैः ॥ ५४३ ॥

स्वप्नमन्त्रैश्चतुर्थे तु, जाग्रन्मन्त्रैस्तु पञ्चमे ।
केशवादिषु योनीनां मूर्तीनां वाचकैः परैः ॥ ५४४ ॥

उत्सवारम्भणदिनाद्यावत्तीर्थदिनान्तिमम् ।
वाचकैर्नवमूर्तीनां नवाहं व्रतमाचरेत् ॥ ५४५ ॥

यद्वा द्विषट्कमन्त्रेण सर्वत्रापि व्रतं चरेत् ।
ध्वजार्थाकुरनक्षत्राद्यावत्तीर्थदिनान्तिमम् ॥ ५४६ ॥

एव व्रतसमायुक्त आचार्य कृत्यमाचरेत् ।
सकल्प्योत्सवमादौ तु व्रतसकल्पपूर्वकम् ॥ ५४७ ॥

ध्वजार्थमकुरारोप कुर्याद्यो देशिकोत्तम. ।
कुर्याद्ध्वजावरोहान्तं सर्व कर्म स एव तु ॥ ५४८ ॥

प्राज्ञोपि नतर कुर्यात , यदि , कृता विनश्यति ।
मृते वा व्याधिते तस्मिन् तदनुज्ञामवाप्य च ॥५४९॥

नित्यानुष्ठानलोपाच्च वेधुर्यादिविदूषिते ।
अभ्यनुज्ञा गुरोस्तस्य सत्राप विधिपूर्वकम् ॥ ५५० ॥

शेष कुर्यात्तु तत्पुत्रस्तच्छिष्यो वा समाहित ।
अन्यो वा यदि वा भ्राता प्रायश्चित्तपुरस्सरम् ॥५५१॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहितायां क्रियाकाण्डे देवतावाहनान्तविधान नाम षोडशोऽध्याय ॥

श्री

सप्तदशोऽध्यायः ॥

शाण्डिल्य —

अथोत्सवविधान तु वक्ष्यामि शृणु सत्तम ! ।
उत्सवारम्भदिवसात् पूर्वस्मिन् पञ्चमेऽहनि ॥ १ ॥

अकुरारोपण कुर्यात् पूर्वोक्तविधिना तत ।
पूर्ववत्यागसदनं कल्पयित्वा विभूषयेत् ॥ २

आचार्यान् देशिकेन्द्रस्तु चतुरो वरयेद्गुरु ।
अथवाष्ट द्वादश वा विनीतान् सयतान् शुचीन् ॥ ३ ॥

तत्तत्कर्मप्रयोगेषु कुशलान् शास्त्रकोविदान् ।
सोष्णीषैरुत्तरीयैश्च गन्धद्रव्यैश्च संयुतान् ॥ ४ ॥

यजमानेन ते सर्वे शोभनीयाः प्रयत्नत. ।
केचिद्गुरुनियुक्तास्तु कुम्भमण्डलपूजनम् ॥ ५ ॥

कुर्यु, रन्ये बलि दद्युरन्ये बिम्बगतं विभुम् ।
पूजयेयुर्यथायोगं स्वयं वापि समाचरेत् ॥ ६ ॥

वरयेत् साधकान् वापि कञ्चुकाद्यैस्तु भूषितान् ।
विनयादिगुणोपेतान् कुशलान् नयकोविदान् ॥ ७ ॥

उत्सवारम्भदिवसात् पूर्वेद्युश्च निशामुखे ।
कृताह्निको देशिकेन्द्र प्रासाद संप्रविश्य च ॥ ८ ॥

मूलमूर्तिगत देवमभ्यर्च्य सप्रपूज्य च ।
तत्पादगौ करौ कृत्वा देव विज्ञापयेदिदम् ॥ ९ ॥

" भगवन् ! पुण्डरीकाक्ष ! करिष्ये कौतुकक्रियाम् ।
महोत्सवार्थ देवेश ! तदर्थ त्व प्रसीद ओम् " ॥ १० ॥

इति विज्ञाप्य देवेशमाज्ञाप्योत्सवकौतुके ।
अर्घ्यगन्धादिनाभ्यर्च्य वासोभिर्विविधै शुभै ॥ ११ ॥

भूषणैर्दिव्यगन्धैश्चाप्यलंकृत्य विशेषत ।
सौवर्ण यानमारोप्य शङ्खभेर्यादिसयुतम् ॥ १२ ॥

छत्राद्यैश्च समायुक्तं प्रादक्षिण्यक्रमेण तु ।
आस्थानमण्टप नीत्वा सौवर्णे भद्रविष्टरे ॥ १३ ॥

तत्र मुक्तावितानाद्यैरुपरिष्टाद्विभूषिते ।
सर्वसाधनसयुक्ते समारोप्य विधानत. ॥ १४ ॥

पूजयित्वा जगन्नाथ प्रभूतार्घ्यं निवेद्य च ।
कृत्वा संतर्पणान्त च प्रासाद संप्रवेशयेत् ॥ १५ ॥

ततस्तु हेमज पात्र राजतं वा समाहरेत् ।
शालिजैस्तण्डुलैर्विप्र ! भारमात्रे सपूजिते ॥ १६ ॥

तदर्धैर्वापि तत्पादैः षट्शैर्वाष्टमाशकैः ।
तदूर्ध्वं हेमजं सूत्रं क्षौमं कार्पासमेव च ॥ १७ ॥

पट्टजं पञ्चभिः सूत्रैश्चतुर्भिः सप्तभिस्तु वा ।
कृतं न्यस्य सतावूलं तत्पातं विन्यसेत्ततः ॥ १८ ॥

गर्भाग्रमण्टपे पीठे शालिभिः परिकल्पिते ।
भारमानैस्तदर्धैर्वा एव शालिविनिर्मिते ॥ १९ ॥

पीठे पात्रान्तरं न्यस्येदापूपिकसमन्वितम् ।
अर्घ्यादिना समभ्यर्च्य सम्यगाच्छाद्य वाससा ॥ २० ॥

पात्रद्वयं दीक्षितयोर्न्यस्त्वा शिरसि देशिकः ।
यानादिके वा संस्थाप्य विभवानुगुणं द्विज ! ॥ २१ ॥

सह ताभ्यां तु पात्राभ्यां नृत्तगीतादिसंयुतम् ।
प्रदक्षिणं परिभ्रम्य सर्वेष्वावरणेष्वपि ॥ २२ ॥

एकस्मिन् वा चतुः कृत्वा ग्रामादौ वा प्रदक्षिणम् ।
नीत्वैकधा ततो विप्र ! प्रविशेन्मूलमन्दिरम् ॥ २३ ॥

यद्वा सुदर्शनोपेतं विष्वक्सेनं तु वा द्विज ! ।
खगेशं वा हनूमन्तं विभीषणसमन्वितम् ॥ २४ ॥

यानादिके समारोप्य भ्रामयेत्तु यथारुचि ।
गर्भगेहं प्रविश्याथ देवदेवस्य सन्निधौ ॥ २५ ॥

पात्रद्वयं तु विन्यस्य आधारोपरि पूजयेत् ।
द्वादशार्णेन मन्त्रेण अर्घ्यगन्धादिकैस्तथा ॥ २६ ॥

कृत्वा पुण्याहघोषं च अर्घ्याद्यैर्देवमर्च्य च ।
प्रथमं देवदेवस्य मूलमूर्तिगतस्य च ॥ २७ ॥

बन्धयेत् कौतुकं सूत्रैर्हेमजैः पट्टजैस्तु वा ।
हेमजं सूत्रमादाय गन्धेनालिप्य बन्धयेत् ॥ २८ ॥

देवस्य दक्षिणे हस्ते यात्रामूर्तिगतस्य तु ।
जितन्ताख्येन मन्त्रेण शंखगीतादिसंयुतम् ॥ २९ ॥

स्पृष्ट्वा दक्षिणहस्तेन सूत्रमस्त्रशतं जपेत् ।
श्रियो वामकरे कुर्यात् पट्टसूत्रेण कौतुकम् ॥ ३० ॥

श्रीसूक्तमुच्चरन् वापि तन्मन्त्रेण द्विजोत्तम ! ।
पुष्ट्यास्तु वामहस्ते तु क्षौमसूत्रेण बन्धयेत् ॥ ३१ ॥

कुर्यात् स्नपनबिंबस्य पट्टसूत्रेण कौतुकम् ।
कौतुकं देशिकेन्द्रस्तु कार्पासेन स्वदक्षिणे ॥ ३२ ॥

करे तु द्वादशार्णेन बन्धयेच्च ततः परम् ।
देवमर्घ्यादिनाभ्यर्च्य अपूपान् विनिवेदयेत् ॥ ३३ ॥

सर्वदोषप्रशान्त्यर्थं दर्पणादि च दर्शयेत् ।
अनुक्तमत्र यत्किंचित् तत्सर्वं प्राग्वदाचरेत् ॥ ३४ ॥

एवं हि देवदेवस्य कृत्वा कौतुकबन्धनम् ।
ततः समानयेद्देवं मण्टपे पुरतः स्थिते ॥ ३५ ॥

ततो देवं समभ्यर्च्य यावदात्मनिवेदनम् ।
पूर्वोदितक्रमेणैव ततो वै स्नानविष्टरे ॥ ३६ ॥

स्नानासनोदितैर्भोगैः सर्वैरिष्ट्वा तु पूर्ववत् ।
अलंकारासने नीत्वा पूजयेत् क्रमयोगतः ॥ ३७ ॥

नैवेद्यमधुपर्काद्यैर्द्रव्यैश्च विविधैस्ततः ।
प्राग्वदिष्ट्वा ततः स्तोत्रैः स्तुवीत पुरुषोत्तमम् ॥ ३८ ॥

ततस्तु नूपुरान्तैश्च विविधैर्हेमभूषणैः ।
सद्रत्नघटितैश्चापि तथा मुक्तामयैर्द्विज ! ॥ ३९ ॥

किरीटाद्यैरलंकृत्य प्रणामैः सप्रदक्षिणैः ।
यथोदितं प्रतिष्ठाया तथाशयनकल्पनम् ॥ ४० ॥

बिंबं चोपरि विन्यस्य शयने स्थापयेच्छुभे ।
कोणेषु स्थापयेद्दीपान् पालिकाः साकुरास्तथा ॥४१॥

तूर्यघोषैस्तथा वेदैः स्तोत्रैः स्तुत्वा मधुद्विषम् ।
जागरेण निशां नीत्वा तस्मादुत्सवकौतुकम् ॥ ४२ ॥

प्रवेशयेद्गर्भगेहं प्रभातसमये ततः ।
आचार्यः स्नानपूर्वं तु नित्यं निर्वर्त्य पूर्ववत् ॥ ४३ ॥

यागार्थमण्टपे सर्वसंभारान् संप्रवेश्य च ।
अतीते याममात्रे तु पूर्वाह्णे देशिकः स्वयम् ॥ ४४ ॥

आचार्यैः साधकैश्चापि यजमानेन चान्वितः ।
मुहूर्ते शोभने प्राप्ते प्रविश्य भगवद्गृहम् ॥ ४५ ॥

अग्रतो देवदेवस्य स्थित्वा विज्ञापयेदिदम् ।
' प्रसीद देवदेवेश ! उत्सवः क्रियते मया ॥ ४६ ॥

अस्मात् काललावद्यावत्पुष्पयागदिनान्तिमम्।
त्वत्प्रीतये जगन्नाथ! यद्यत् कर्म करोम्यहम् ॥ ४७ ॥

तत्सर्वमात्मसात्कृत्वा कृपया मे प्रसीद ओम्"।
इति विज्ञाप्य देवेशं मूलमूर्तिगतं विभुम् ॥ ४८ ॥

अर्घ्यगन्धादिनाभ्यर्च्य यात्रामूर्तिगत तथा।
पूजयित्वा जगन्नाथ पादुके विनिवेद्य च ॥ ४९ ॥

श्रुतिघोषैश्च पुण्याहघोषैर्मङ्गलनिस्स्वनैः।
तथा जयजयारावैः शङ्खकाहलनिस्वनैः ॥ ५० ॥

भेरीपटहवादित्रनृत्तगीतसमन्वितैः।
लाजाना प्रकरैः सार्धं पुष्पप्रकरमिश्रितैः ॥ ५१ ॥

मूर्तिपैर्देवदेवेशं तस्मादानीय वाह्यत।
देवं प्रागाननं कृत्वा दर्शयित्वा समागतान् ॥ ५२ ॥

पुरुषानुत्सव द्रष्टु यात्रोपकरणान्यपि।
छत्रचामरपूर्वाणि विविधानि विशेषत ॥ ५३ ॥

यानमारोप्य देवेश सौवर्णप्रभयान्विते।
अर्घ्याद्यैरर्चयित्वा तु पृथुकानि निवेद्य च ॥ ५४ ॥

वहेयुर्ब्राह्मणा यान ध्यायन्तो विहगेश्वरम्।
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमम् ॥ ५५ ॥

प्रदक्षिणक्रमेणैव परिभ्रमणमाचरेत्।
ब्राह्मणैर्ध्रियमाणैश्च कञ्चुकोष्णीषधारिभिः ॥ ५६ ॥

मौलिकैरातपत्रैश्च मायूरैश्च सुशोभनैः।
हेमदण्डसमायुक्तैस्तालवृन्तैस्तथाविधैः ॥ ५७ ॥

पट्टजैर्विविधैश्चापि चामरैश्च सितासितैः।
केतुदण्डैश्च विविधैर्वैजयन्तीविभूषितैः ॥ ५८ ॥

केवलै रत्नदण्डैश्च तथान्यैर्माङ्गलीयकैः।
वन्दिवृन्दैश्च विविधैर्वीणावेणुस्वनैस्तथा ॥ ५९ ॥

सुवर्णशृंगघोषैश्च तथाऽन्यैर्मङ्गलस्वनैः।
गणिकादेवदासीभिस्तथा नागरिकैर्जनैः ॥ ६० ॥

विप्रैर्वेत्रलताहस्तैः कञ्चुकोष्णीषभूषितैः।
अन्यैश्च भगवद्भक्तैः ब्राह्मणैः क्षत्रियादिभिः ॥ ६१ ॥

राजोचितैः परिकरैरन्यैश्च विविधैः सह।
एवं कृत्वा तु देवेशं नयेदास्थानमण्टपे ॥ ६२ ॥

समारोप्य च सौवर्णे विष्टरे जगतांपतिम्।
अर्घ्यं पाद्यं तथाचामं गन्धमाल्यैश्च धूपकम् ॥ ६३ ॥

अथार्हणजल स्वच्छमपूपान् पृथुकानपि।
तर्पण नारिकेलोत्थरसमाचमन तथा ॥ ६४ ॥

मुखवाससमोपेत ताम्बूल च क्रमेण तु।
निवेद्य देवदेवाय उपहारास्तु दर्शयेत् ॥ ६५ ॥

ततस्तु मण्टपात्तस्मादानयेद्यागमण्टप।
तत्र देवेशमारोप्य सौवर्णे भद्रविष्टरे ॥ ६६ ॥

भूषणादीनि सर्वाणि तत्काले तु विसर्जयेत्।
स्नानपीठे समारोप्य नववस्त्रास्तृते विभुम् ॥ ६७ ॥

ततो यात्राधिवासार्थमारभेन्मूलपूजनम्।
कुम्भस्थानसमीपे तु उपविश्यासने शुभे ॥ ६८ ॥

करशुद्ध्यादिपूर्वं तु सर्वं कृत्वा विधानत।
प्राग्वद्यजेद्विभुं सास्त्रं कुम्भे च करकान्विते ॥ ६९ ॥

स्थापनं तोरणादीनामर्चनं प्राग्वदाचरेत्।
अर्चनं कुमुदादीनामाचरेत्तु समाहितः ॥ ७० ॥

कुमुदादिद्वयोर्मध्ये गरुडं पूजयेत्ततः।
पुण्डरीकादिमध्ये च चक्रं संस्थाप्य पूजयेत् ॥ ७१ ॥

शंखं चक्रं तथा लक्ष्मी कुम्भं श्रीवत्समेव च।
दर्पणं स्वस्तिक मत्स्ययुग्मं वै मगलाष्टकम् ॥ ७२ ॥

कुमुदादिसमीपे तु विन्यसेत् क्रमयोगतः।
सवस्त्रधान्यपीठे तु यथावित्तानुरूपतः ॥ ७३ ॥

एकभारैर्द्विभारैर्वा शालिभिः परिकल्पिते।
प्रत्येक तण्डुलैश्चापि तिलैर्युक्ते सवस्त्रके ॥ ७४ ॥

अष्टमंगलवियासेयेवं सर्वत्र कल्पयेत्।
प्राग्वत् स्थले समावाह्य मन्त्रेशं पूजयेत्ततः ॥ ७५ ॥

स्नपनाना पुरोकाना पूर्वस्मिन्नवके द्विज!।
अधमोत्तमसंज्ञं तु स्नपनं परिकल्पयेत् ॥ ७६ ॥

मण्डलस्येन्द्रदिग्भागे तत्पश्चाद्विबसन्निधिम् ।
गत्वा समारभेत् पूजां यथोक्तविधिना द्विज ! ॥ ७७ ॥

सर्वं कृत्वा क्रमेणैव यावदात्मनिवेदनम् ।
कृत्वा पुण्याहघोषं च कुर्यात् कौतुकबन्धनम् ॥ ७८ ॥

स्नानासनादिभिर्भोगैरङ्गा चामलकान्तिमम् ।
स्नपनं विधिवत् कृत्वा शिरः प्रोतादिकं तथा ॥ ७९॥

दत्वा समानयेद्देवं प्राग्भागे मण्डलस्य तु ।
सौवर्णे विष्टरे तत्र यजेत् सर्वेश्वरं विभुम् ॥ ८० ॥

अलंकारासनाद्येश्च भोगे परमपावने ।
प्रभूतमथ नैवेद्यं विनिवेद्य यथाक्रमम् ॥ ८१ ॥

सर्वं द्विजप्रदानान्तं कृत्वा वै कुण्डसन्निधिम् ।
गत्वा संस्कारपूर्वं तु संप्रेक्षापाद्य तत तु ॥ ८२ ॥

पूर्णाहुत्यवसानं तु गत्वा वै बिबसन्निधिम् ।
होमार्पणं समापाद्य संपूज्याज्यादिना तत ॥ ८३ ॥

पितॄणां संविभागं तु कृत्वा दत्वा बलिं क्रमात् ।
विष्वक्सेनं नयेत् सार्धं ततस्तस्माज्जगत्पतिम् ॥

आस्थानमण्टपे नीत्वा समारोप्य च विष्टरे ।
प्राप्तेऽपराह्णसमये कृत्वा संग्रहणं द्विज ! ॥ ८५ ॥

पूर्ववत्तु मृदादीनां कृत्वा ग्रामप्रदक्षिणम् ।
पूर्वोदितविधानेन कुर्यादंकुररोपणम् ॥ ८६ ॥

तत्काले देवदेवस्य विभवस्यानुगुण्यतः ।
विधिवत् पूजनं कृत्वा प्रभूतान्नं निवेदयेत् ॥ ८७ ॥

स्थले भस्मनिभे पूर्वं पूजयेन्निष्फलं भवेत् ।
योजयित्वा तु कुम्भस्थे वर्तयेन्मण्डलं ततः ॥ ८८ ॥

सिताद्यैः पावनैः रागैस्ततः कुम्भे समर्पयेत् ।
यथावद्देवदेवेशं पूजयेन्मण्डलं तत ॥ ८९ ॥

यथोक्तेन विधानेन गत्वा वै बिबसन्निधिम् ।
तत्र संपूजयेद्देवं महता विभवेन तु ॥ ९० ॥

अग्नौ सन्तर्पणं कुर्यात् यथोक्तविधिना तत ।
गत्वा बिम्बसमीपे तु कृत्वा होमनिवेदनम् ॥ ९१ ॥

सर्वं तु सविभागान्तं क्रमात् कृत्वा ततःपरम् ।
विभवे सति वै कुर्याद्भूयः संपूजनं विभोः ॥ ९२ ॥

होमान्तमखिलं कृत्वा ततस्त्वास्थानमण्टपात् ।
नयेत्तु देवदेवेशं प्रासादमुखमण्डपे । ॥ ९३ ॥

प्रागानन समारोप्य सौवर्णे भद्रविष्टरे ।
यात्रार्थं देवदेवस्य कुर्यात् कौतुकबन्धनम् ॥ ९४ ॥

आदाय चरुपूर्वाणि बलिद्रव्याणि होमयेत् ।
प्रत्येकं मूलमन्त्रेण द्वाविंशत्परिसंख्यया ॥ ९५ ॥

ध्यात्वा ध्यात्वा तु होतव्यं तत्तद्राज्यधिदैवतम् ।
भवेत् प्रथमरात्रे तु वासुदेवाधिदैवतम् ॥ ९६ ॥

संकर्षणदैवतं विद्धि द्वितीयं तु तृतीयकम् ।
प्रद्युम्नदैवतं चान्यदनिरुद्धाधिदैवतम् ॥ ९७ ॥

भवेत् पञ्चमरात्रे यत् तन्नारायणदैवतम् ।
हयग्रीवाधिदैवं तु षष्ठरात्रमुदाहृतम् ॥ ९८ ॥

सप्तमं वैष्णवं त्वन्यन्नरसिंहाधिदैवतम् ।
वराहदैवतं रात्रं नवमं द्विजसत्तम ! ॥ ९९ ॥

एकाहमुत्सवं विद्धि वासुदेवाधिदैवतम् ।
त्र्यहं तु वासुदेवादिप्रद्युम्नान्ताधिदैवतम् ॥ १०० ॥

पञ्चाहं वासुदेवादिपञ्चमूर्त्यधिदैवतम् ।
सप्ताहं वासुदेवादिसप्तमूर्त्यधिदैवतम् ॥ १०१ ॥

द्वादशाहोत्सवं विप्र ! केशवाद्यधिदैवतम् ।
सर्वं पञ्चदशाहादि वासुदेवाधिदैवतम् ॥ १०२ ॥

दद्यात् प्रथमरात्रे तु बलिं बलिविधानवत् ।
पललै रजनीचूर्णैः सलाजदधिसक्तुभिः ॥ १०३ ॥

दिनेष्वपि च सर्वेषु द्रव्यैरेभिर्बलिं ददेत् ।
यद्वा द्वितीयरात्रे तु दद्याच्च तिलतण्डुलैः ॥ १०४ ॥

दद्यात् तृतीयरात्रौ तु धानास्त्वविकलाजकैः ।
दद्याच्चतुर्थरात्रे तु बलिं देशिकसत्तम ।
नालिकेरपयःसक्तुशालिपिष्टैर्विमिश्रितैः ।
पञ्चमे तु बलिं दद्यात् पक्वान्नैः सहाक्षतैः ॥ १०६ ॥

षष्ठरात्रे बलिं दद्यादपूपैश्चरुणा सह ।
अथवा सर्वरात्रेषु प्रदद्याच्चरुणा सह ॥ १०७ ॥

तत्तद्दिनोदितैर्द्रव्यैर्बलिं तु द्विजसत्तम ! ।
सप्तमे तु गुडान्नेन, पायसान्नेन चाष्टमे ॥ १०८ ॥

नवमे कृसरान्नेन बलिं दद्याद्विचक्षण ।
द्वादशाहोत्सवे विप्र ! माषान्नं दशमेऽहनि ॥ १०९ ॥

शुद्धान्नमथवा विप्र ! मुद्गान्नं तु परेऽहनि ।
द्वादशे सर्ववलयं शुद्धान्नं शालिजं तु वा ॥ ११० ॥

क्षीरं दध्याज्यसंयुक्तं गुडखण्डसमन्वितम् ।
इतः परं तु सर्वत्र शुद्धान्नं पायसं तु वा ॥ १११ ॥

एकाहादिचतुष्के तु भवेत्तत्तद्दिनोदितम् ।
प्रत्येकमाढकं ग्राह्यं बलिद्रव्यं द्विजोत्तम ! ॥ ११२ ॥

तदर्धं वाऽथ पादं वा यथावित्तानुरूपतः ।
एवं द्रव्याणि हुत्वा तु अलंकृत्य विशेषतः ॥ ११३ ॥

यात्राविवर्गतं देवं विचित्रैर्वसनैस्तथा ।
विचित्रैर्भूषणैश्चापि माल्यैर्नानाविधैस्तथा ॥ ११४ ॥

मुहूर्ते शोभने प्राप्ते सर्वमंगलसंयुतम् ।
स्यन्दनं वा गजं वापि यानं सौपर्णमेव वा ॥ ११५ ॥

सपुष्पहेमप्रभया युक्तं पुष्पाद्यलंकृतम् ।
सौवर्णेन विमानेन युक्तं मायूरकेन वा ॥ ११६ ॥

समानीय तु संप्रोक्ष्य ध्यात्वा गरुडरूपिणम् ।
तन्मन्त्रेण समभ्यर्च्य यानमर्घ्यादिभिस्ततः ॥ ११७ ॥

कृत्वा पुण्याहघोषं च श्रुतिघोषसमन्वितम् ।
शङ्खतूर्यादिसंयुक्तं प्रादक्षिण्यक्रमेण तु ॥ ११८ ॥

याने तत्र समारोप्य यात्रामूर्तिगतं विभुम् ।
यात्रार्थं तत्र देवाय सार्घ्यं पाद्यं तथैव च ॥ ११९ ॥

आचामं गन्धमाल्ये च दीपं धूपं तथैव च ।
अर्हणं मधुपर्कं च नैवेद्यं विविधं तथा ॥ १२० ॥

पृथुकाद्यं पानकं च तर्पणाचमने तथा ।
ताम्बूलं विनिवेद्याथ जपं कृत्वा विधानतः ॥ १२१ ॥

अग्नौ सतर्पणं कुर्यात् तत्काले वापि होमयेत् ।
बलिद्रव्याणि सर्वाणि यथाकालानुरूपतः ॥ १२२ ॥

रथयाने विशेषं तु समाकर्णय सांप्रतम् ।
मुक्ताप्रपावितानैश्च सौवर्णैर्मञ्जरीगणैः ॥ १२३ ॥

मुक्तादामसमेतैश्च विचित्रैः पुष्पदामभिः ।
हैमेन च वितानेन प्रभया च विशेषतः ॥ १२४ ॥

मध्यतो भद्रपीठेन सौवर्णेन तथैव च ।
ध्वजैश्च विविधैः रम्यैः पताकाभिश्च सर्वतः ॥ १२५ ॥

भूषयेद्रथयानं तु तथा गरुडकेतुना ।
तत्र देवं समारोप्य पूजयेत् पूर्ववर्त्मना ॥ १२६ ॥

आचार्यः साधकश्चापि रथस्योर्ध्वतलस्थितौ ।
तस्याधस्तात् स्थले स्थाप्यौ पश्चिमे छत्रधारकौ ॥

तत्र तत्पार्श्वतः स्थाप्यौ मायूरच्छत्रधारिणौ ।
दक्षिणोत्तरपार्श्वस्थावग्रे चामरधारिणौ ॥ १२८ ॥

सारथिस्तत्स्थले स्थाप्यस्त्वग्रतो मध्यदेशतः ।
ततस्तु गरुडाद्येश्च चक्रेण गरुडेन वा ॥ १२९ ॥

अष्टाभिर्मंगलैश्चापि दीक्षितैर्ब्राह्मणैर्वृतैः ।
अर्घ्यगन्धादिभिश्चैव सार्धं घण्टारवैस्तथा ॥ १३० ॥

शङ्खभेर्यादिभिश्चैव छत्रेण दीपधारकः ।
आचार्यः साधको वापि बलिं दद्याद्विधानतः ॥१३१॥

प्रासादद्वारमारभ्य ग्राममध्यान्तमेव च ।
प्रथमावृतिमारभ्य सर्वेष्वावरणेष्वपि ॥ १३२ ॥

देवयानं परिभ्राम्य प्रादक्षिण्यक्रमेण तु ।
रथ्यावरणपर्यन्तं तत्पश्चाद्भ्रामयेद्द्विज ! ॥ १३३ ॥

ग्रामे वा नगरे वापि पत्तने वा महामते ! ।
बृहति स्यन्दने याने यानेनान्येन वान्तरा ॥ १३४ ॥

भ्रामयित्वा तु तत्पश्चाद्बृहति स्यन्दनादिके ।
देवेशं तु समारोप्य भ्रामयेद्ग्रामवीथिषु ॥ १३५ ॥

देवस्य पुरतो दूराद्गच्छेयुर्बलिदायिनः ।
ध्वजदण्डधराः पश्चाच्छत्रकाहलधारकाः ॥ १३६ ॥

भेरीपटहपूर्वाणां वाद्यानां घोषणोन्मुखा ।
तत्पृष्ठे गीतकाश्चापि वन्दिवृन्दास्तथैव च ॥ १३७ ॥

सुवेषा भगवद्भक्तास्तथैव गणिकाजना ।
दासीगणाश्च तत्पृष्ठे शोणदण्डवहा जना ॥ १३८ ॥

लीलागानि विचित्राणि धारयन्तस्तथैव च ।
वहन्त पादुकादीनि ततो देवस्य पार्श्वत ॥ १३९ ॥

अग्रत. पृष्ठतश्चापि जनाश्चामरधारिण ।
आतपत्रांश्च विविधान् तालवृन्तास्तथैव च ॥ १४० ॥

धारयन्तो द्विजाश्चापि ततो देवस्य दक्षिणे ।
"कर्मारंभादि" पठतो विप्रानेकायनान् न्यसेत् ॥

ऋक्सामपूर्वान् वामेपि पृष्ठतो वा निवेशयेत् ।
सुमृष्टधूपपात्राश्च वहन्त. पृष्ठतस्तथा ॥ १४२ ॥

पुरतो "ऽस्त्र" स्मरन् यायात् स्वय विघ्नास्तु सूदयन् ।
अनेकशतसख्याश्च दीपानतिसमुज्ज्वलान् ॥ १४३ ॥

धारयन्तो जना विप्र! देवस्योभयपार्श्वयो ।
गच्छेयु. पङ्क्तिरूपेण यावन्तो वलिवाहका. ॥ १४४ ॥

सर्वाणि राजचिह्नानि वहन्तो देवसन्निधौ ।
गच्छेयुरन्ये भक्ताश्च ब्राह्मणा. अतियास्तथा ॥ १४५ ॥

वैश्या. शूद्राश्च चत्वारो ह्याश्रमस्थास्तथैव च ।
सर्वशास्त्रेषु कुशला भगवद्भाविनस्तथा ॥ १४६ ॥

सेवेरन् सर्वतोदिक्कं वीक्षमाणा. परं विभुम् ।
ग्रामस्यैन्द्रादियोगेन दिशासु विदिशासु च ॥ १४७ ॥

मध्ये च कुमुदादीनां सगणाना क्रमेण तु ।
पीठिकासु वलि दद्यान्निर्मितासु पुरैव तु ॥ १४८ ॥

कुमुदादेर्गणाना तु नामानि क्रमशः शृणु ।
उत्कटः प्रकटश्चैव उन्मुखो विमुखस्तथा ॥१४९॥

अश्वग्रीवोऽश्ववदनः अश्वजिह्वस्तथैव च ।
हस्तिवक्त्रश्च कुमुदः हस्तिपादश्च केशवः ॥ १५० ॥

वामनो नरकश्चापि नरो मर्दन एव च ।
मन्दहृष्टिश्च कन्तुश्च तथा कन्तुकलोचन. ॥ १५१ ॥

पटहाक्षो विशालाक्ष क्षामक. क्षमकस्तथा ।
पाण्डर पाण्डुपृष्ठश्च दुर्दिनः सुदिनस्तथा ॥ १५२ ॥

वामदेवो महादेवो महाग्निर्मधुसूदन. ।
कनक कालकश्चैव भावनो यवनस्तथा ॥ १५३ ॥

भानुमान् भानुवेगश्च भास्करश्चाप्यभास्करः ।
विश्वसेनो विसेनश्च विष्वक्सेनो विसारणः ॥ १५४ ॥

विस्तारो निस्तरश्चैव विदण्डी दण्ड एव च ।
कामदः कामुकश्चापि कामभृत् कामनाशनः ॥ १५५ ॥

पञ्चाशच्च गणा ह्येते प्राची दिशमुपाश्रिता ।
एते पारिषदा प्रोक्ताः कुमुदस्य वशानुगाः ॥

शत शत गृहगणा. एकैकस्यानुयायिन. ।
एषा कुमुदपूर्वाणां क्रमेण च वलि हरेत् ॥

पार्श्वस्थमण्डलेष्वेवं गृहेभ्यस्तु वलि हरेत् ।
देवा एते गृहाश्चापि ऐन्द्रे तु वलिभागिनः ॥

आग्नेयो निधनश्चैव अग्निजिह्वो हुताशन ।
अग्निरूपोऽग्निवर्णश्चाप्यग्निवर्णोऽहिरेव च ॥ १५९ ॥

अग्निवक्त्रो महावक्त्रो महासेनो महोदर. ।
कराल. काकजिह्वश्च काकवक्त्रोऽग्निवक्त्रकः ॥ ११०॥

मण्डूकमण्डूकवक्त्रश्च देवो देवलकस्तथा ।
शर्वक. शमकश्चापि शकु. शकुश्रवास्तथा ॥ १६१ ॥

मारीचो द्रोणमारीचो महिषो माहिषस्तथा ।
कुम्भनासो विनासश्च कुम्भकर्णो विकर्णक ॥ १६२ ॥

विदारी विक्रमश्चैव मस्करी मस्करस्तथा ।
सूकरः सूकरास्यश्च शश शशमुखस्तथा ॥ १६३ ॥

सिह. सिहमुखश्चैव नरसिंहो नरस्तथा ।
कालधूक्कालसूत्रश्च सूत्रक. सूत्र एव च ॥ १६४ ॥

विनाली नालकण्ठश्च आग्नेयी दिशमाश्रिता. ।
कुमुदाक्षगणा ह्येते संयुक्ता आसुरैर्गणै. ॥

आग्नेय्या पीठिकाया तु कुमुदाक्षबलिं हरेत् ।
धर्मो धर्मधरो धर्मो धर्मराजो धनुर्धर ॥ १६६ ॥

विनय प्रश्रयश्चैव निश्रेयो निर्गुणस्तथा।
अलस. कुणपश्चैव क्रूरबाहुश्च कुंजर. ॥ १६७ ॥

प्राशुर्दमननिष्कोपौ निरनुक्रोशनिर्ममौ।
विभवोऽविभवश्चैव हुताशो वहुरेव च ॥ १६८ ॥

ऊर्ध्वरक्षणसन्नश्च एकल. पाकलस्तथा।
कक्ट. कटकश्चैव अवट शंखचक्रिणौ ॥ १६९ ॥

गदी खड्गी च शार्ङ्गी च तथा शार्ङ्गधरो मुने!।
वासुदेवोऽपि भद्रश्च केतुमान् केतुकस्तथा ॥ १७० ॥

क्षमी च ज्वलनश्चापि किन्नरोऽश्वत्थ एव च।
सुप्त सुजपनश्चापि जप पश्चिम एव च ॥ १७१ ॥

कैक्षिकश्च तथा स्वजो वाडवश्चाक्षमी तथा।
गणा पञ्चाशदेते तु दक्षिणा दिशमाश्रिता ॥

पुण्डरीक वशाह्येते पितृगृहसमन्विता।
सर्वत्रैवं समुद्दिष्टा. पञ्चाशच्छक्तिका गृहा. ॥

प्रदद्यात् पुण्डरीकाक्षायैभिर्युक्ताय वै वलिम्।
निष्कृति प्रकृतिश्चैव सुकृतिर्विकृतिस्तथा ॥ १७४ ॥

दारुणो दमकश्चैव रक्षको लक्षकस्तथा।
माधवो मासकश्चैव निष्ठुर. खरभाषण. ॥ १७५ ॥

प्रलंवो लम्बकश्चैव प्राणन प्रणयस्तथा।
वीरसेनोंगदश्चैव विभाषश्च विभीषणः ॥ १७६ ॥

रक्ताक्षो लोहिताक्षश्च रक्तजिह्वो विजिह्वक।
विद्युत्केशो विशालाक्षो विक्षरो वीरहा तथा ॥१७७॥

अक्षर. प्राक्षरश्चैव कामरूपविरूपिणौ।
सर्वग. सर्वविद्वौर. सभव. प्रभवस्तथा ॥ १७८ ॥

वारुणो वसुरेवापि विमर्दो दमनस्तथा।
वैकर्तनो विकर्ता च कपर्दी च प्रभुस्तथा ॥ १७९ ॥

कन्दकी कन्दकश्चापि नाकी च वरुणोऽरुण।
गणा एते च पञ्चाशन्नैर्ऋति दिशमाश्रिता ॥

यातुगृहैस्तु संयुक्ता वामनस्यानुगा इमे।
एभिर्युक्ताय विधिना वामनाय वलि ददेत् ॥

वरुणो वारुणश्चैव पाशी पाशधरो गुरुः।
क्षेपण. क्षोभणश्चैव नारद सर्वदो रवि ॥ १८२ ॥

सुमना नामनो हंसो वैकुण्ठ परम पर।
हनुमान् वसुमान् भद्रो भद्रव. प्रभवस्तथा ॥ १८३ ॥

महाकर्णो विकर्णश्च शशक शलक. पिक.।
वानरो नरकश्चैव कार्ष्णि कर्णधरोंऽशुमान् ॥ १८४ ॥

चक्रोऽग्रश्च तथा वज्री वज्रनाभो विनाभक।
करभ कुरभश्चैव दाक्षिणो दक्षिण सुहृत् ॥ १८५ ॥

दुर्गन्ध प्रतिगन्धश्च तार्क्ष्यो गरुड एव च।
विरोधो रोधको रोध ककणश्च वृकोदर ॥ १८६ ॥

एते गणाश्च पञ्चाशत् पश्चिमा दिशमाश्रिताः।
शंकुकर्णवशा ह्येते पाशग्रहगणान्विता ॥

सहेभि शकुकर्णाय पीठिकाया वलि ददेत्।
मरुमारुतगो रुर्वी आखुर्वायुसुतोऽनिल ॥ १८८ ॥

गलर्तो वर्तक कंको मार्गण प्राकणोऽचल।
वलो वलनिधिर्वीरो विरोधो रोधको विधि ॥ १८९ ॥

सिद्धव सुयवश्चैव शकरो धीरकस्तथा।
माली मालाविधिर्वस्तु समर्थ सुमहोत्सव. ॥ १९० ॥

कर्कट कटकश्चैव गन्धो गन्धवह. पर.।
सिक्तक सिकरोगी च सेवक. सेवन सव ॥ १९१ ॥

औषधो भेषजो वापि रोगी रोगभवस्तथा।
कारण करण कर्ता गरवीरोऽखलस्तथा ॥ १९२ ॥

वलश्च वाकुवाहश्च सुचारश्च तथैव च।
गणा. पञ्चाशदेते तु वायव्या दिशमाश्रिता ॥

सर्वनेत्रानुगान् नित्य गन्धर्वगृहसंयुता।
प्रदद्यात् सर्वनेत्राय एभिर्युक्ताय वै वलिम् ॥

सोमः सोमकल सोम्यः सामवित् सामनायकः।
सुधा सुधाता धाता च सुराष्ट्र काष्ठक कलि ॥

कालवृक्कालचक्रश्च कालकूटविषो वल।
अमृतोऽमृतनाथश्च केयूरी केवली वली ॥ १९६ ॥

विष्णु कृष्णपिशगागी रेखालेख. पिक शुक ।
लूवकश्च शुकश्चैव श्येन श्येनमुखस्तथा ॥ १९७ ॥

मार्जारो मरुभृङ्गालो गुल्म कणवक कण ।
शेषो विशेष उच्छेप. कर्दम. प्रतिविग्रह ॥ १९८ ॥

साम्व· संवत्सरश्चैव वेगी वेगधरो मरुत् ।
गणा. पञ्चाशदेते तु सोमस्य दिशमाश्रिता. ॥

सुमुखस्य वशा ह्येते यक्षग्रहसमन्विता ।
सुमुखाय बलि दद्यादेभि सह यथाविधि ॥

ईशान ईश्वरो व्यापी व्यसनो विनशो बुध ।
धरो वको विशो वाद शकुनि शकटो घट ॥ २०१ ॥

वृक्ष कक्ष क्षमी क्षान्तिर्मातृरोमा कपिजल ।
ब्रह्मण्यो ब्रह्मविद्ब्रह्मी ब्रह्मात्मा ब्रह्मसाधन. ॥ २०२ ॥

वेदी वेदविदुन्मत्त शमर शाकरस्तथा ।
धीमान् विसृष्टिरिष्टात्मा दुष्टात्मा दुष्टकर्मकृत् ॥

विनेता विकचो वादी नोदी विवक एकभुक् ।
सर्वभुक सर्वग सन सर्वभंग सनातन ॥ २०४ ॥

गोविन्दो गोपतिश्चैव गोप्ता चैव महेश्वर ।
पञ्चाशच्च गणा ह्येते ऐशानी दिशमाश्रिता ॥

सुप्रतिष्ठवशा होते पिशाचगृहसयुता ।
सुप्रतिष्ठितसंज्ञाय एभि सार्धं बलि ददेत् ॥

सिद्धो धाता विधाता च धाता चैव प्रजापति. ।
लोकेशो लोककृत् कर्ता स्रष्टा ब्रह्मा तथात्मभू ॥

सुतापश्च तुलश्चैव तथा वै रीतिवर्धन ।
अव्यक्तो गुणवान् गौणो गुणभुक्च तथैवहि ॥ २०८ ॥

उद्गीत· प्रणवश्चापि हिरण्यगर्भसञ्जित. ।
विरिञ्चि पुष्करश्चैव भासनो भास एव च ॥ २०९ ॥

विकर्णो विजयश्चैव तथा चैव रथंतर ।
छन्दो यजुस्तथा ऋक च अथर्वा च नत. परम् ॥

मरीचिरंगिराश्चैव पुलह क्रतुरेव च ।
वसिष्ठश्च प्रचेताश्च शलभो भीष्म एव च ॥ २११ ॥

हेमन्त शिशिरश्चापि कुसुमाकरसंज्ञित ।
कलहश्च विरागिश्च अमर्षो रोषणस्तथा ॥ २१२ ॥

शोषणश्च गतिश्चैव हर्षणो वर्धनस्तथा ।
गणा. पञ्चाशदेते तु व्योमसिद्धगृहान्विता: ॥

प्रदद्यात् पृश्निगर्भाय सार्धमेभिर्बलि द्विज ! ।
मनुष्यो मानवश्चैव मण्डको मानवस्तथा ॥ २१४ ॥

मकरश्च तथा चोर कपश्चैव प्रकपन ।
अलपटश्च पटद योजको भजको ग्रही. ॥ २१५ ॥

रेचको रोचको मायो धारो वारो रसश्चल ।
चापालिक कपिर्वाणो ग्रजनो गर्जनो गुड ॥ २१६ ॥

तित्तरश्चटको ध्वाडक्षो वलीवर्दो महानट. ।
हर्षो धर्मप्रशास्ता च शमको दुन्दुभि· शठ ॥ २१७ ॥

कुक्षि कुमार कायस्थो लावकोऽनशुन शुन ।
लवणो रवणो क्रुद्धो राजसस्तामसोऽचल. ॥ २१८ ॥

कल्याणो भगदत्तश्च पृथिवीतलसंस्थिता ।
गणा पञ्चाशदेते तु भूमिग्रहसमन्विता ॥

महाबला दुराधर्षा मानवस्य वशानुगा ।
मानवाय बलि दद्यादेभिर्युक्ताय साधक. ॥

एते पञ्चाशत प्रोक्ता गणानामधिपा द्विज ! ।
ऐकैकस्य भवेदेवा गणाश्चान्ये शतं शतम् ॥ २२१ ॥

एवं पञ्चाशत्सहस्रं एतेषा परिचारका. ।
चत्वरे च चतुष्के च सभाया ग्राममध्यके ॥ २२२ ॥

ग्रामद्वारेषु सर्वेषु तिष्ठन्ति विविधायुधा ।
जनानयोग्यान् बाधन्ते तथा पाषण्डिनोऽपि च ॥

नद्यादिषु च देशेषु सचरन्ति यथारुचि ।
दशाना कुमुदादीना गणेशानां द्विजोत्तम ! ॥ २२४ ॥

गणानामुत्कटादीनामुदितानां क्रमेण तु ।
प्रणवाद्यैर्नमोन्तैस्तु स्वैस्वैर्नामभिरेव च ॥ २२५ ॥

अर्घ्य गन्धं तथा माल्यं धूपं गन्धाम्बुपूर्वकम् ।
बलि भूयो जलं चापि ताम्बूलं क्रमशो ददेत् ॥ २२६ ॥

गीतनृत्तादिकं सर्वं पूर्ववत् परिकल्पयेत् ।
पञ्चाशता सहस्राणां गणशो गणशो द्विज ! ॥ २२७ ॥

नमः पारिषदेभ्यश्च इत्युक्त्वा बलिविस्तरम् ।
भूमौ प्रतिदिशं कुर्यात् सर्वशान्तिकरं शुभम् ॥२२८॥

पञ्चाशता सहस्राणां एकैकस्य पृथक् पृथक् ।
शतं शतं परिवारा एते ग्रहगणाः स्मृताः ॥ २२९ ॥

एषां ग्रहगणानां तु परिवाराः सहस्रशः ।
असंख्येयाश्चरन्तस्तु सर्वतः पृथिवीमिमाम् ॥ २३० ॥

संचरन्ति ग्रहगणा उक्ता दशविधा महीम् ।
देवा दैत्याश्च पितरः राक्षसा नागनायकाः ॥ २३१ ॥

गन्धर्वयक्षाः पिशाचाः सिद्धाश्चापि धराधराः ।
एते दशविधा ब्रह्मन् ! दशदिक्षु स्थिताः सदा ॥ २३२ ॥

उक्ता पञ्चदशानां तु एतेषां नायकाः गणाः ।
तेषां तु पूजया सर्वे सुखं यान्ति न संशयः ॥ २३३ ॥

पीठोर्ध्वे कुमुदादीनां बलिं दद्याद्विचक्षणः ।
भूतले गोमयाद्येन लेपिते वा यथारुचि ॥ २३४ ॥

गणानामुत्कटादीनां बलिं तत्परितो ददेत् ।
अन्येषामपि सर्वेषां तद्बहिर्विकिरेद्बलिम् ॥ २३५ ॥

अमुक्तानां च सर्वेषां ग्राममध्ये बलिं क्षिपेत् ।
कुमुदादिगणेशानाम् अनुकल्पे विधानतः ॥ २३६ ॥

बलिं दत्वाऽवशिष्टानां सर्वेषामपि वै पृथक् ।
नमः पारिषदेभ्यश्चेत्युक्त्वा तस्माद्बलिं द्विज ! ॥ २३७ ॥

अवशिष्टं बलिद्रव्यं ग्राममध्ये विनिक्षिपेत् ।
संतर्पणार्थं भूतानां सर्वदेशनिवासिनाम् ॥ २३८ ॥

रात्र्यामावाहनं ब्रह्मन् ! ध्वजारोहणवासरे ।
न कृतं कुमुदादीनां सगणानां ततोऽद्य तु ॥ २३९ ॥

तेषामावाहनं कुर्याद् बलिं दद्याद्विधानतः ।
ध्वजारोहदिने पूर्वं तेषामावाहने कृते ॥ २४० ॥

तद्वासरात् समारभ्य यावदुत्सववासरम् ।
पायसेन बलिं दद्याच्छुद्धान्नेनाथवा द्विज ! ॥ २४१ ॥

दिवा वापि रजन्यां वा कालयोरुभयोस्तु वा ।
भवेत् कर्तुर्महान् दोषः आहूतानामनर्चनात् ॥ २४२ ॥

केनापि हेतुना यत्र बलिदानं न शक्यते ।
यात्रारंभदिने तत्र तेषामावाहनं चरेत् ॥ २४३ ॥

एवन्तु बलिसंयुक्तं देवेशं भ्रामयेद्द्विज ! ।
प्रादक्षिण्येन वै ग्रामे नगरे वापि पत्तने ॥ २४४ ॥

यात्रायां वर्तमानायां देवदेवाय भक्तितः ।
सुखवासं सताम्बूलं बहुशोऽथ निवेदयेत् ॥ २४५ ॥

चन्दनं श्रमशान्त्यर्थं कर्पूराद्यैः सुभावितम् ।
प्रदद्याद्देवदेवाय माल्यानि विविधान्यपि ॥ २४६ ॥

शीतलं तर्पणजलं नारिकेलजलान्वितम् ।
श्रमशान्तिनिमित्तानि अन्यान्यपि निवेदयेत् ॥ २४७ ॥

दिगष्टके तु ग्रामादेस्तन्मध्ये च विशेषतः ।
गीतकैर्विविधैर्नृत्तैस्तन्त्रीवाद्यसमन्वितैः ॥ २४८ ॥

शंखभेरीमृदंगाद्यैर्देवेशं परितोषयेत् ।
एवं देवं परिभ्राम्य ग्रामादौ बलिसंयुतम् ॥ २४९ ॥

पुनः प्रदक्षिणं कृत्वा प्रासादाद्यङ्गणेषु च ।
प्रासादद्वारदेशे तु देवदेवस्य भक्तितः ॥ २५० ॥

अर्घ्यं पाद्यं तथाचामं गन्धं माल्यं च धूपकम् ।
निवेद्य देवदेवेशं स्वस्थाने सन्निवेशयेत् ॥ २५१ ॥

ततो यागगृहं गत्वा देशिकः सुसमाहितः ।
तिलैराज्यैश्च पूर्णान्तं यात्राहोमं समापयेत् ॥ २५२ ॥

एवं बलिसमायुक्तमन्येषु दिवसेष्वपि ।
अह्नि रात्रौ तु देवस्य परिभ्रमणमारभेत् ॥ २५३ ॥

तीर्थयात्रादिने कुर्यात् परिभ्रमणमह्नि वै ।
कुर्यात् स्नपनबिंबे च स्नपनं तु दिवानिशम् ॥ २५४ ॥

आरम्भदिनमारभ्य यावदन्तिमवासरम् ।
तत्रापि चाङ्कुरारोपं सप्तमे पञ्चमे तु वा ॥ २५५ ॥

वासरे पूर्ववच्चापि कुर्यात् कौतुकबन्धनम् ।
द्वितीये वासरे प्राप्ते देवमास्थानमण्टपे ॥ २५६ ॥

यागागारेऽथवानीय समारोप्य च विष्टरे ।
ततो यागगृहं गत्वा देशिको विधिना यजेत् ॥ २५७ ॥

कलशे मण्डले चैव ततो गत्वा तु मण्टपम् ।
पूजयेद्देवदेवेशं महता विभवेन तु ॥ २५८ ॥

ततो यागगृहे सम्यग्वह्नौ सन्तर्प्य पूर्ववत् ।
ततस्तस्मात् समानीय महदास्थानमण्टपम् ॥ २५९ ॥

तत्र सम्यक् समभ्यर्च्य देवं नीराजनान्तिमम् ।
महाहविर्निवेद्याथापूपादिसमन्वितम् ॥ २६० ॥

तस्माद्देव समानीय मण्टपे यागनिर्मिते ।
तत्र देव समभ्यर्च्य अर्घ्यपाद्यादिभिस्तत ॥ २६१ ॥

अग्नौ सन्तर्प्य विधिवत् पूर्णाहुत्यावसानिकम् ।
अलङ्कृतं तु देवेशं पूर्ववद्वसनादिकै. ॥ २६२ ॥

यानादिके समारोप्य पूर्वोक्तक्रमयोगत ।
भ्रामयित्वा तु देवेशं ग्रामे त्वन्त. प्रवेशयेत् ॥ २६३ ॥

मण्टपे देवदेवेशमानीय स्नानविष्टरे ।
समारोप्यार्घ्यपाद्यैश्च दद्यादाचमन विभो ॥ २६४ ॥

गन्ध पुष्प च धूप च दीप नीराजनान्तिमम् ।
वेदघोषैश्च गीताद्यैर्हर्णोदपुरस्सरम् ॥ २६५ ॥

कदलीफलसयुक्तमपूप गुलसंयुतम् ।
पानक तर्पणजलं नालिकेररसान्वितम् ॥ २६६ ॥

ताम्बूल शशिसंयुक्तम् ततो यात्रार्थकल्पितम् ।
वसनाद्य परित्यज्य स्नानशाटी निवेद्य च ॥ २६७ ॥

तैलेनाभ्यंजनं कृत्वा समुद्वर्त्य यथाविधि ।
शिरस्यामलकं दत्वा संस्नाप्य बहुभिर्जलै. ॥ २६८ ॥

वर्णकेन समालिप्य क्षालयित्वा तु वारिणा ।
समालिप्य सुगन्धेन भक्तितश्चन्दनादिना ॥ २६९ ॥

सहस्रधारया विप्र ! स्नानं कृत्वा तत परम् ।
दत्वा सचन्दनं पश्चात् शिरः प्लोतादिशाटकम् ॥

दत्वा देव समारोप्य तदन्यस्मिस्तु विष्टरे ।
करशुद्ध्यादि सर्व तु कृत्वान्तर्यागपश्चिमम् ॥ २७१ ॥

ततो यथाक्रमेणैव देवं संपूजयेद् द्विज ! ।
यद्वा दिनोत्सवे वृत्ते देवमानीय मण्टपे ॥ २७२ ॥

वितते भद्रपीठे तु समारोप्याथ पूर्ववत् ।
अर्घ्यादि सकल विप्र ! ताम्बूलान्तं निवेद्य च ॥२७३॥

वस्त्राद्य पूर्वकल्प्त यत् क्रमात् सर्व विसृज्य च ।
विनिवेद्य च वस्त्र तु श्रमनिर्हरणार्थत ॥ २७४ ॥

समालभ्य तु देवेशं सुगन्धैश्चन्दनादिके. ।
ततस्तु विधिना पूज्य यावदात्मनिवेदनम् ॥ २७५ ॥

स्नानार्थ देवदेवस्य विज्ञाप्य विनिवेद्य च ।
पादुके देवदेवेशं छत्राद्यैश्च समन्वितम् ॥ २७६ ॥

तस्मादानीय पीठे तु स्नानार्थ परिकल्पिते ।
समारोप्य तदाद्यैस्तु भोगै सर्वैस्तु पूर्ववत् ॥ २७७ ॥

इष्ट्वा ताम्बूलदानान्तं स्कन्धशाटी निवेदयेत् ।
ततस्तैल समादाय कर्पूराद्यै सुभावितम् ॥ २७८ ॥

देवस्य केशानालोड्य हस्ताभ्या कंकतेन तु ।
अधिवास्य सुगन्धैस्तु धूपैरभ्यजयेत् तत ॥ २७९ ॥

शिरो निष्पीड्य देवस्य बहुधा च तत परम् ।
केशानावध्य मालाभि सूक्ष्मेण प्लोतकेन तु ॥२८०॥

ललाटोपरि बध्वा तु तथा मुखसरोरुहे ।
देवस्य तैलनिष्यन्दा नापतन्ति यथा द्विज ! ॥ २८१ ॥

तत. स्कन्धप्रदेशात्तु यावत्पादावसानकम् ।
अभ्यंजयेच्च तैलेन सर्वगात्राणि मर्दयेत् ॥ २८२ ॥

तस्मिन् काले बहुविधैस्तालवृन्तैश्च चामरै. ।
तत्तापशमनार्थ तु वीजयेयु. समन्तत ॥ २८३ ॥

ततस्तु वाससोद्वर्त्य तथा चूर्णै पुरोदितैः ।
चमर्षी च खलि दत्वा दद्यादुष्णोदकं तत. ॥ २८४ ॥

चन्दनं मुखलेपार्थ घृष्ट कर्पूरभावितम् ।
ततस्त्वामलकं कल्कं गन्धद्रव्यै सुसंस्कृतम् ॥ २८५ ॥

दत्वा शिरसि देवस्य प्रक्षाल्य बहुभिर्जलै ।
शनै शनै. समालोड्य ततोऽर्घ्यं विनिवेद्य च ॥ २८६ ॥

लोध्र कालेयकं चैव क्षालनार्थ्यसमन्वितम् ।
दत्वा केशान् समावध्य देवस्य प्लोतवाससा ॥ २८७ ॥

अधः शटीं निवेद्याथ पात्रे कृत्वा तु वर्णकम् ।
कर्पूरचूर्णसमिश्रं सम्यग्धूपाधिवासितम् ॥ २८८ ॥

तेन देवस्य गात्राणि लेपयेत्तु शनै. शनै ।
आकण्ठात् पादपर्यन्त तत. प्रक्षालयेज्जलै ॥ २८९ ॥

अपास्याथ शिर प्लोतम् दद्यादर्घ्य तु मूर्धनि ।
ग्रन्थिपल्लवतोयादि सर्वरत्नोदकान्तिमम् ॥ २९० ॥

सस्नाप्य सप्तभिस्तोयै. शिर प्लोतं ददेद्द्विज ! ।
विनिवेद्याप्यथ शाटी चन्दनेन सुगन्धिना ॥ २९१ ॥

शशिचूर्णसमेतेन वासितेन हिमाबुना ।
धूपाधिवासितेनापि समालभ्य विशेषत ॥ २९२ ॥

गात्राणि देवदेवस्य तथा वै कुंकुमेन च ।
उपवीतं सोत्तरीय दत्वा प्लोतमपास्य च ॥ २९३ ॥

शिरस्यमथ केशास्तु गन्धधूपाधिवासितान् ।
आवध्य विविधैर्माल्यै स्रग्दामानि निवेद्य च ॥२९४॥

ततस्तु बहुभिस्तोयै संस्कृतैश्चन्दनादिना ।
सहस्रधारया स्नानमाचरेद्देशिको विभोः ॥ २९५ ॥

व्यापकान् चतुरो मन्त्रान् जपेदेकाग्रमानस. ।
तस्मिन् काले बह्वृचाद्या द्विजा. प्रागादिदिक्स्थिता ॥

सूक्तानि पौरुषाद्यानि अधीयीरन समाहिता. ।
शखभेर्यादिकान् सम्यग् घोषयेयु. समन्तत ॥२९७॥

मंगलानि च गीतानि तदा गायन्तु गायका ।
एवं स्नाने कृते पश्चात् देशिकेन्द्रः समाहितः ॥ २९८ ॥

पूर्णकुम्भं समादाय विभो. स्नपनमाचरेत् ।
जपन् पवित्रमन्त्रं च तस्य निर्वचनं तथा ॥ २९९ ॥

एवं स्नान समापाद्य दद्यान्नीराजन विभो ।
सवन्दनाख्यं तत्पश्चच्छाटक विनिवेद्य च ॥ ३०० ॥

कचोदकापकर्षार्थमपर देहवारिभृत् ।
अधरोत्तरवस्त्रे द्वे गन्धधूपाधिवासिते ॥ ३०१ ॥

स्कन्धप्लोत निवेद्याथ शिर. स्नानं निवेद्य च ।
चन्दनादि सुगन्धं समाल्यानि विनिवेद्य च ॥३०२॥

पादुके विनिवेद्याथ तस्मात् स्थानात् समानयेत् ।
तृतीयं रत्नखचितं आसनं विनिवेद्य च ॥ ३०३ ॥

तत्रस्थं देवदेवेशमर्घ्याद्यै. पूजयेत् क्रमात् ।
सर्व होमावसानं च कृत्वा भूय. प्रपूज्य च ॥ ३०४ ॥

महाहविर्निवेद्याथ सर्व प्राग्वत् समाचरेत् ।
एव प्रतिदिनं चैव यावत्तीर्थदिनान्तिमम् ॥ ३०५ ॥

स्नपनं पूजन चैव विभो. कुर्यादतन्द्रितः ।
नित्योत्सवादौ देवस्य स्नपन तु समाचरेत् ॥ ३०६ ॥

दिनोत्सवसमारम्भे नाचरेत् स्नपन विभो ।
यद्वोभयसमारम्भे कुर्यादिच्छानुरूपत ॥ ३०७ ॥

कलशे मण्डले चैव अह्नि रात्रौ च पूजनम् ।
कुर्यात् प्रतिदिनं सम्यगेकवारं यथाविधि ॥ ३०८ ॥

विवस्थं देवदेवेशमह्नि रात्रौ च पूजयेत् ।
एकवारं द्विवारं वा त्रिवारं वा यथारुचि ॥ ३०९

प्रासादे मूलविवस्थं सविशेषं यजेत् सदा ।
पञ्चमे वासरे प्राप्ते पूर्वाह्णे तु दिनोत्सवम् ॥

कृत्वा ततस्तु देवेश महास्नपनपूर्वकम् ।
महता विभवेनैव लक्ष्मीपुष्टिसमन्वितम् ॥ ३११ ॥

महाहविर्विधानेन विभवे सति पूजयेत् ।
षष्ठे दिने तु संप्राप्ते कुम्भाचनपुरस्सरम् ॥

अग्निसंतर्पणान्तं च पूजयित्वा विधानत. ।
पूर्ववद्देवदेवेश लक्ष्मीपुष्टिसमन्वितम् ॥ ३१३ ॥

यानादिके समारोप्य प्रासादस्य वहि. क्वचित् ।
उद्याने सुशुभे रम्ये पादपैर्वकुलादिभि ॥ ३१४ ॥

प्रोच्छ्रितैर्विविधैर्वापि समन्तात् परि शोभिते ।
पुष्पिताभिर्लताभिश्च सर्वत. परिभूषिते ॥ ३१५ ॥

नीत्वा देव समारोप्य यथार्हे विष्टरे पुरः ।
श्रीपुष्टिसहितं प्राग्वद्धोमान्तं परिपूजयेत् ॥ ३१६ ॥

सूक्ष्मवस्त्रदुकूलानि सरत्नाभरणान्यपि ।
सुधाकस्तूरिकर्पूरादिव्यगन्धसमन्वितम् ॥ ३१७ ॥

सर्वाङ्गदेवदेवेशं मृगस्नेहेन लेपयेत् ।
पुष्पापचयमाल्यादिभूषितानां विशेषतः ॥ ३१८ ॥

परस्परं वा शक्तीनां क्रीडार्थं वाप्यलंकृताम् ।
गरुडारूढदेवाय पारिजातहरं स्मरन् ॥ ३१९ ॥

प्राभृतान्यपि पुष्पाणि देवदेवाय दर्शयेत् ।
इदमस्मात् समायात इत्युक्त्वा देशिकः स्वयम् ॥

पुष्पापचयकर्मार्थमेवं कृत्वा निवेद्य च ।
तत्र वाऽन्यत्र वा स्थाने कर्तुरिच्छानुरूपतः ॥ ३२१ ॥

ततस्तु देवदेवेशं लक्ष्मीपुष्टिसमन्वितम् ।
पूर्ववद्भ्रामयेत् ग्रामे शेषं प्राग्वत् समाचरेत् ॥ ३२२ ॥

सप्तमे दिवसे प्राप्ते प्रासादं सम्प्रविश्य च ।
देशिकः साधकैः सार्धं प्रणिपत्य जगद्गुरुम् ॥३२३॥

विज्ञापयेत्तु देवाय सम्यगुच्चस्थया गिरा ।
"भगवन् पुण्डरीकाक्ष शरणागतवत्सल ! ॥ ३२४ ॥

अस्मिन्नहनि कर्तव्या जलक्रीडा त्वया विभो ।
शुद्धये सर्वलोकानां देवानां प्रीतयेऽपि च ॥ ३२५ ॥

यात्रा तदर्थं कर्तव्या मदनुग्रहकाम्यया ।"
इति विज्ञाप्य देवाय प्रणम्य च पुनः पुनः ॥ ३२६ ॥

यानादौ देवमारोप्य लक्ष्मीपुष्टिसमन्वितम् ।
नीत्वा मज्जनशालां तु स्नानोपकरणैर्युताम् ॥ ३२७ ॥

तद्गतान् सर्वसंभारान् दर्शयित्वा विभोस्ततः ।
चन्दनाद्यैः समालभ्य देवं माल्यैर्विभूष्य च ॥ ३२८ ॥

विनिवेद्य च ताम्बूलं मुखवाससमन्वितम् ।
समाहूय च तत्रस्थानाज्ञाप्य परिचारकान् ॥ ३२९ ॥

प्राप्तेऽपराह्णसमये जलक्रीडा भविष्यति ।
तदर्थाः सर्वसंभाराः स्थापितव्यास्तु मण्टपे ॥ ३३० ॥

इत्याज्ञाप्य ततस्तस्माद्धान्यागारं प्रविश्य च ।
दर्शयित्वा तु धान्यानि विभोस्तेषां समृद्धये ॥ ३३१ ॥

उद्यानादौ समानीय विनिवेद्य च तत्स्थितान् ।
उपहारान् यथायोगं तत आस्थानमण्टपे ॥ ३३२ ॥

पूजयेद्देवदेवेशं श्रीपुष्टिभ्यां समन्वितम् ।
सविशेषं ततो लक्ष्मीं पुष्टिमन्तः प्रवेशयेत् ॥ ३३३ ॥

प्राग्वद्दिनोचितं सम्यक् कृत्वा पश्चात्तु मण्टपे ।
देवदेवं समानीय समारोप्य च विष्टरे ॥ ३३४ ॥

अर्घ्यात् ताम्बूलपर्यन्तं सर्वं प्राग्वन्निवेद्य च ।
स्नानार्थं शाटिकां वापि विनिवेद्य जगत्पतेः ॥ ३३५ ॥

मण्टपस्यैकदेशे तु शालितण्डुलनिर्मिते ।
विष्टरे तु जलद्रोणीं सौवर्णीं वापि राजतीम् ॥ ३३६ ॥

ताम्रजं वा यथालाभं चतुस्त्रिद्विकरायताः ।
तदर्धविस्तृतामूर्ध्वे मूले तत्पादविस्तृताम् ॥ ३३७ ॥

वृत्तायतामधोभागे प्रणालेन समन्विताम् ।
उन्मत्तकुसुमाकारसदृशामथवा द्विज ! ॥ ३३८ ॥

विमानानुरूपां तां सर्वलक्षणसंयुताम् ।
निवेश्य तां समापूर्य गालितेन जलेन तु ॥ ३३९ ॥

कुंकुमक्षोदयुक्तेन चन्दनेनान्वितेन च ।
कर्पूरचूर्णयुक्तेन कुसुमैर्वासितेन च ॥ ३४० ॥

तत्पार्श्वे देवमानीय चार्घ्याद्यैः परिपूज्य च ।
भेरीपटहवादित्रशंखघोषसमन्वितम् ॥ ३४१ ॥

स्तुतिमंगलघोषैस्तु श्रुतिघोषसमन्वितम् ।
सूक्तेन पौरुषेणैव विभोः कृत्वावगाहनम् ॥ ३४२ ॥

याने देवं समारोप्य सह स्नानार्द्रवाससा ।
कुंकुमेन समालिप्य आपादान्मस्तकावधि ॥ ३४३ ॥

भ्रामयेत् प्रांकणं वीथीं प्रीतये वरुणस्य च ।
जनानामपि सर्वेषां पवित्रीकरणाय च ॥ ३४४ ॥

तत्काले देवदेवेशं भक्त्या पश्यन्ति ये जनाः ।
ते सर्वे धूतपाप्मानो भवन्ति निरुपद्रवाः ॥ ३४५ ॥

ततस्तु मण्टपे देवं विष्टरे विनिवेश्य च ।
स्नानवस्त्रादि सकलमाचार्यः स्वयमाहरेत् ॥ ३४६ ॥

ततो निशोत्सवान्तं च सर्वं पूर्ववदाचरेत्।
अष्टमे दिवसे प्राप्ते आचरेन्मृगया विभो॰ ॥

प्रातरारभ्य पूर्वाह्णे देवमिष्ट्वा तु पूर्ववत्।
अश्वरत्नं समानीय सर्वालंकारशोभितम् ॥ ३४८ ॥

बहुभिस्तुरगैः सार्धं हस्तिनं वा तथाविधम्।
स्वभावं कृत्रिमं वापि तत्रारोप्य जगत्पतिम् ॥ ३४९ ॥

मृगयानुगुणैः सर्वैर्भूषणाद्यैर्विभूषितम्।
आरोप्य याने सौवर्णे श्रियं च धरणीं तथा ॥ ३५० ॥

ताभ्यां सह परिभ्राम्य ग्रामादौ पूर्ववद्विभुम्।
सैन्यैश्च विविधैः सार्धं भक्ताद्यैश्च तथैव हि ॥ ३५१ ॥

ततो ग्रामस्य बाह्ये तु क्रोशमात्रान्तरीकृते।
उद्याने विततेरम्ये विचित्रे पादपैर्द्विज! ॥ ३५२ ॥

सरसीभिर्विचित्राभिः लताबृन्दैश्च पुष्पितैः।
शोभिते च समानीय देवं तन्मध्यसंस्थिते ॥ ३५३ ॥

मण्टपे तु वितानाद्यैः सर्वतः परिभूषिते।
सौवर्णे विष्टरे रम्ये समारोप्य जगत्पतिम् ॥ ३५४ ॥

श्रीभूमिसहितं पश्चाच्छीतलैर्व्यजनानिलैः।
चन्दनाद्यैः सुगन्धैश्च हिमतोयैश्च शीतलैः ॥ ३५५ ॥

स्वेदशान्तिं समापाद्य विशेषाद्राजराजवत्।
ततोऽर्घ्यादिभिरभ्यर्च्य दध्यन्नं विनिवेदयेत् ॥ ३५६ ॥

मरीचिचूर्णसंमिश्रं जीरकादिसन्वितम्।
गुलखण्डयुतं शुद्धं पानकानि बहूनि च ॥ ३५७ ॥

कदलीफलपूर्वाणि मधुराणि फलान्यपि।
सर्वं ताम्बूलदानान्तं क्रमात् कृत्वा ततः परम् ॥३५८॥

स्नानपूर्वं समभ्यर्च्य महता विभवेन तु।
यथाक्रमेण देवेशं लक्ष्मीपुष्टिसमन्वितम् ॥ ३५९ ॥

निवेद्य च प्रमूतान्नमलंकृत्य विशेषतः।
तुरगादौ समारोप्य अस्तं याते दिवाकरे ॥ ३६० ॥

दीपानेकशतैर्युक्तं ग्रामं नीत्वा प्रदक्षिणम्।
देवगेहे प्रवेश्याथ प्राग्वत् कुर्यान्निशोत्सवम् ॥३६१॥

तद्रात्रौ तीर्थविवस्य कुर्यात् कौतुकबन्धनम्।
आचार्यो यजमानेन साधकैश्च समन्वितः ॥ ३६२ ॥

प्रासादं सम्प्रविश्याथ प्रणम्य च मुहुर्मुहुः।
दण्डवत्प्रणिपातेन इमं मन्त्रमुदीरयेत् ॥ ३६३ ॥

'तीर्थयात्रा त्वया देव! श्वः कर्तव्या सुरेश्वर!।
तत्र प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि' ॥ ३६४ ॥

इति विज्ञाप्य देवस्य तीर्थविवं समानयेत्।
तदलाभे मुनिश्रेष्ठ! नित्यस्नपनकौतुकम् ॥ ३६५ ॥

अलाभे त्वस्य विवस्य बलिविंबं तु वा द्विज!।
मूलविवस्य पुरतः संस्थाप्याबाह्य पूज्य च ॥ ३६६ ॥

प्रासादाभ्यन्तरे कुर्याद्वेदिकां व्रीहिभिः शुभाम्।
हस्तमात्रोन्नतायामविस्तारां पद्मसन्निभाम् ॥ ३६७ ॥

वासोभिर्वेष्टयित्वा तां चतुरश्रायतां ततः।
पालिकां साकुरां बाह्ये स्थापयेत् ककुभष्टके ॥ ३६८ ॥

तद्बहिर्घटिकास्तद्वच्छरावास्तद्बहिस्तथा।
तदूर्ध्वं देवमारोप्य घृतारोपणमाचरेत् ॥ ३६९ ॥

देवस्य पुरतः स्थाप्य पात्रं लोहविनिर्मितम्।
घृतेनापूर्य तत् पात्रं प्राग्वत् संस्कृत्य देशिकः ॥३७०॥

उभाभ्यां चैव हस्ताभ्यां दूर्वामादाय मूलतः।
घृते निमज्य चाग्राणि देवपादेषु सेचयेत् ॥ ३७१ ॥

ततस्तु कण्ठपार्श्वे तु ततो देवस्य मूर्धनि।
पाणिप्रक्षालनं कुर्यादन्तरान्तरयोगतः ॥ ३७२ ॥

दूर्वाभेदस्तथा प्रोक्तो घृतारोपणकर्मणि।
हस्तव्यत्यासमार्गेण घृतारोपणमाचरेत् ॥ ३७३ ॥

पादे "सुमंगलं चे' ति कर्णे भद्रमिति द्विज!।
"सुशोभनं" तु शिरसि क्रमान्मन्त्रं प्रतिष्ठितः ॥

यद्वा सर्वस्य मन्त्रस्य द्वादशाक्षरसंज्ञितः।
अक्षतस्यार्पणं कृत्वा कुर्यात् कौतुकबन्धनम् ॥ ३७५ ॥

ऊर्णामयेन सूत्रेण क्षौमसूत्रेण तेन च।
प्राग्विधानेन तत्पश्चाच्चामराद्यैश्च वीजयेत् ॥ ३७६ ॥

दर्शयेद्दर्पणं छत्रमन्यानि मंगलान्यपि ।
निवेद्य पायसं पश्चाद्विभवानुगुणं ततः ॥ ३७७ ॥

शिरसा शाययित्वा तु देवेशं शयनोपरि ।
गुग्गुल्वगरुधूपैश्च धूपयित्वा समन्ततः ॥ ३७८ ॥

अनिर्वाणैः प्रदीपैस्तु रात्रिशेषं समापयेत् ।
आचार्यः प्रातरुत्थाय कृत्वा स्नानादिकं ततः ॥

देवमुत्सवबिम्बस्थं प्राग्वत्पूज्य विधानतः ।
पूर्वाह्णे वाथ मध्याह्ने कृत्वा पूर्वं रथोत्सवम् ॥ ३८० ॥

कारयेत्तीर्थपूर्वाह्णे अथ मध्याह्नपूर्ववत् ।
देवं गेहे समानीय स्वस्थाने सन्निवेशयेत् ॥ ३८१ ॥

देवोपयुक्तमाल्यानि चन्दनादीन्यपि द्विज ! ।
प्रदद्याद्देशिकेन्द्राय सोपि तैः परिभूषितः ॥ ३८२ ॥

कारयेत्तीर्थयात्रां च देवेशस्य विधानतः ।
तीर्थविवगतं देवं शयनात् प्रतिबोध्य च ॥ ३८३ ॥

पूजयित्वार्घ्यगन्धाद्यैरानीयास्थानमण्टपे ।
पूजयित्वार्घ्यपाद्याद्यैर्घृतारोपं तु पूर्ववत् ॥ ३८४ ॥

कृत्वा पुरोदितानां तु स्नपनानां चतुर्थके ।
नवके स्नपनं स्थाप्य मध्यमध्यमसञ्ज्ञितम् ॥ ३८५ ॥

पुरतः स्थण्डिलं कृत्वोलूखलं तत्र विन्यसेत् ।
मुसलानि चतुर्दिक्षु विन्यस्योलूखलोपरि ॥ ३८६ ॥

मुसलोलूखले गृह्य दूर्वाकाण्डानि बन्धयेत् ।
नववस्त्रेण संवेष्ट्य तत्र चूर्णं विनिक्षिपेत् ॥ ३८७ ॥

सौवर्णरजनीचूर्णसंमिश्रं गन्धसंयुतम् ।
चतुर्भिर्वैष्णवैर्विप्रैर्वैष्णवीभिस्तु वा द्विज ! ॥ ३८८ ॥

कारयेदवघातं तु गीयमानेषु मंगले ।
स्थापितस्नपनाद्विप्र ! प्राग्भागे वा तदुत्तरे ॥ ३८९ ॥

तण्डुलैः पीठिकां कृत्वा तत्र कुंभं निवेश्य च ।
ससूत्रं तत्र निक्षिप्य चूर्णं वस्त्रेण वेष्ट्य च ॥ ३९० ॥

अथवा पञ्च नव वा कलशाश्चूर्णपूरितान् ।
अर्चयित्वा तु मूलेन ततः संस्नापयेद्विभुम् ॥ ३९१ ॥

तैलेनाभ्यज्य देवेशं समुद्वर्त्य च पूर्ववत् ।
ततः संस्नाप्य विधिना घृताद्यं मंगलान्तिमम् ॥

सहस्रधारया स्नानं कृत्वा सशुद्धवारिणा ।
अधरोत्तरवस्त्राभ्यां नवाभ्यां परिधाप्य च ॥ ३९३ ॥

सूक्ष्माभ्यां धूपिताभ्यां च ततो देवं समर्च्य च ।
अर्घ्यालभनमाल्याद्यैर्हेमचूर्णादिपूरितम् ॥ ३९४ ॥

कुम्भमादाय तेनैव चूर्णैः समभिषेचयेत् ।
अर्घ्याद्यैः पूजयित्वा तु बिंबं तु परिमृज्य च ॥ ३९५ ॥

भुक्तावशिष्टं तच्चूर्णं भक्तानां मूर्ध्नि दापयेत् ।
गंगास्नानफलं चूर्णं सर्वपापप्रणाशनम् ॥ ३९६ ॥

क्रीडया वापि तच्चूर्णं शिरसा धारयेन्नरः ।
तस्य देहगतं पापं तत्क्षणादेव नश्यति ॥ ३९७ ॥

ततो देवं समभ्यर्च्य परमान्नं निवेद्य च ।
मुद्गान्नं चापि शुद्धान्नं तदन्यत्र विधानतः ॥ ३९८ ॥

सर्वं द्विजप्रदानान्तं कृत्वा देशिकसत्तमः ।
यात्रावसान्नात् प्रागेव सर्वं चोक्तं समाचरेत् ॥३९९॥

ततस्तु रजनीपिण्डं प्रभूतं कुंकुमान्वितम् ।
निवेद्य देवदेवाय दद्याद्वै देशिकोत्तमः ॥ ४०० ॥

आचार्येभ्यः साधकेभ्यस्तथा चान्येभ्य एव च ।
तत्तत्कर्म नियुक्तेभ्यस्तेऽपि पिण्डेन तेन वै ॥ ४०१ ॥

आलभ्य सर्वगात्राणि तथा संहृष्टमानसाः ।
उपतिष्ठन्तु देवेशं प्रणामैः सप्रदक्षिणैः ॥ ४०२ ॥

यात्रावाहनमानीय रथाद्येकतमं तु यत् ।
तत्र देवं समारोप्य ततोऽन्यस्मिंस्तु यानके ॥ ४०३ ॥

आरोप्य चक्रं तार्क्ष्यं वा हनुमन्तं विभीषणम् ।
छत्रचामरशङ्खादिसर्वसाधनसंयुतम् ॥ ४०४ ॥

प्रदक्षिणं परिभ्राम्य सर्वेष्वावरणेष्वपि ।
तीर्थपार्श्वे समासाद्य बिंबं पीठे निवेश्य च ॥ ४०५ ॥

प्रभया पुष्पया चैव वितानाद्यैरलंकृते ।
प्रणामं दण्डवत् कृत्वा पुष्पांजलिपुरस्सरम् ॥ ४०६ ॥

तत: संस्थाप्य देवेशं साधकस्यैव मूर्धनि।
भूषितस्य च वस्त्राद्यैस्तीर्थमासाद्य तत्र तु ॥ ४०७ ॥

नाभिदघ्ने जले स्थित्वा देशिकेन्द्र समाहित.।
तत्तीर्थे सर्वतीर्थानि समावाह्य द्विजोत्तम! ॥ ४०८ ॥

कृत्वा पुण्याहघोषं च अर्घ्याद्यै. संप्रपूज्य च।
मुहूर्ते शोभने प्राप्ते रवौ मध्यन्दिनं गते ॥ ४०९ ॥

शखतूर्यादिसंयुक्त देवमादाय देशिक ।
वामहस्ततले कुर्यात् क्ष्मामण्डलगतं त्विव ॥ ४१० ॥

विधृयान्मध्यभागे तु पाणिना दक्षिणेन तु।
जपन् वै मूलमन्त्रं तु निमज्जेत् सह तेन वै ॥ ४११ ॥

तार्क्ष्यादिमूर्तिभि सार्धमाचार्य. साधकैस्तथा।
स्वयंव्यक्तादिके स्थाने मध्याह्ने वाऽपराह्णके ॥ ४१२ ॥

रजन्या पूर्वभागे वा कुर्यादवभृथं विभो ।
मुहूर्तातिक्रमप्राप्तदोषस्तत्र न विद्यते ॥ ४१३ ॥

जलद्रोण्यादिके पात्रे गन्धतोयै सुपूरिते।
मुहूर्ते मज्जयेद्देवं अर्घ्याद्यै. संप्रपूज्य च ॥ ४१४ ॥

तत्काले ये नरा स्नान कुर्वन्ति विमलाशया.।
विमुक्तकल्मषास्ते वै प्राप्नुयु. परमा गतिम् ॥ ४१५ ॥

ततस्तीरे समारोप्य विष्टरे हेमनिर्मिते।
शाटकद्वितयं दत्वा स्नानवस्त्रे विसृज्य च ॥ ४१६ ॥

देशिकः स्वयमादाय ते वस्त्रे मूर्ध्नि धारयेत्।
अर्घ्याद्यैस्तु समभ्यर्च्य अलकृत्य विशेषत. ॥ ४१७ ॥

याने देवं समारोप्य प्रासादं प्रविशेत् तत ।
सुस्नाता धौतवसनास्तत्काले गणिकाजना. ॥ ४१८ ॥

जलेनापूरितं पात्रं दीपपात्रं च दर्पणम्।
धारयन्त्योऽग्रतो विप्र! गच्छेयुर्मगलार्थत ॥ ४१९ ॥

अनुधारापदेनैव प्रादक्षिण्यक्रमेण तु।
द्वितीयावरणद्वार समासाद्याथवा द्विज! ॥ ४२० ॥

प्रथमावरणद्वारमन्त. कृत्वा तु मण्डलम्।
सुवृत्त गोमयेनैव सुधाचूर्णरलंकृतम् ॥ ४२१ ॥

आशासु दीपान् संस्थाप्य पालिका विदिशासु च।
संपूर्णमभसा कुभ स्रगाद्य परिभूषितम् ॥ ४२२ ॥

आधारस्योपरि स्थाप्य मध्ये पुष्पेण पूज्य च।
सकृत् प्रणवजपेन ततो वै तज्जलेन तु ॥ ४२३ ॥

अचयेद्देवदेवेश पुष्पाजलिपुरस्सरम्।
प्रासादद्वारदेशे तु अर्घ्याद्यै संप्रपूज्य च ॥ ४२४ ॥

देव निवेश्य स्वस्थाने मूलबिंबे विसर्जयेत्।
पश्चादुत्सवबिंबं तु स्नानाद्यैस्तु विधानत. ॥ ४२५ ॥

पूर्ववत् पूजयेद्विप्र! परिभ्रमणवर्जितम्।
दशमेऽहनि संप्राप्त देशिकेन्द्र समाहित. ॥

प्रातस्नानादिक कृत्वा वसनाद्यैर्विभूषित.।
देशिकै साधकै. सार्ध यजमानेन चैव हि ॥ ४२७ ॥

प्रासादं संप्रविश्याथ प्रणम्य च मुहुर्मुहु.।
देवेशस्याग्रत. स्थित्वा विज्ञापनमथाचरेत् ॥ ४२८ ॥

"भगवन्! पुण्डरीकाक्ष! शरणागतवत्सल!।
ध्वजाथाकुरमारभ्य उत्सवावभृथान्तिमम् ॥ ४२९ ॥

यन्मयानुष्ठितं कर्म तव सप्रीतये विभो!।
तथाऽन्यैर्मदनुज्ञातैर्देशिकैश्चापि यत् कृतम् ॥ ४३० ॥

साधकैश्च तथान्यैश्च विविधै परिचारकै.।
तत्तत्संपूरणार्थं च न्यूनाधिक्योपशान्तये ॥ ४३१ ॥

त्वामद्य वासरे यष्टु चतु स्थानस्थितं विभो!।
प्रवृत्तमनुजानीहि मदनुग्रहकाम्यया" ॥ ४३२ ॥

इति विज्ञाप्य देवस्य तत्रानुज्ञामवाप्य च।
देवमुत्सवबिंबस्थ यानमारोप्य देशिक ॥ ४३३ ॥

आस्थानमण्टपं नीत्वा तत्र वै दर्भविष्टरे।
देवमारोप्य तत्पश्चात् वेदाध्ययनतत्परान् ॥ ४३४ ॥

इतिहासपुराणज्ञान् तथा मंगलगायकान्।
नर्तकाश्च यथायोग विनोदार्थं जगत्पते ॥ ४३५ ॥

तत्तत्स्थाने समावेश्य ततो देशिकसत्तम ।
तस्मिन् वा मण्टपे न्यस्य विस्तारस्यानुरूपत. ॥४३६॥

यागगेहोदितै. सर्वैर्वितानाद्यैरलङ्कृते ।
तन्मध्यदेशमाश्रित्य कुर्याच्चक्राब्जमण्डलम् ॥ ४३७ ॥

मातुलुंगसमाकारैर्द्वादशारै' परिष्कृतम् ।
सपीठद्वारमार्गाद्य पञ्चरंगपुरान्वितम् ॥ ४३८ ॥

अथवा भूषित विप्र ! पीठेन सपुरेण तु ।
पञ्चपुष्पोज्ज्वलेनैव केवलेन पुरेण वा ॥ ४३९ ॥

यथाकालोद्भवै रम्यैस्तत्तद्वर्णसमन्वितैः ।
स्वयं भगवता प्रोक्त. पौष्करे त्वस्य विस्तर. ॥ ४४० ॥

एवं सर्वं समापाद्य साधकैश्चक्रपङ्कजम् ।
सम्प्राप्य साधकै. सार्धं देशिको देवसन्निधिम् ॥

विज्ञाप्य देवमानीय पश्चिमे मण्टपस्य तु ।
भद्रासने तु सौवर्णे मन्मरकवरान्विते ॥ ४४२ ॥

शुभास्तरणसंयुक्ते प्राङ्मुखं निवनिवेश्य च ।
यागपूर्वोक्तमार्गेण कलशे चक्रपंकजे ॥ ४४३ ॥

गीतं नृत्तं च वाद्यं च चतुर्दिग्वेदघोषितम् ।
विबे च पूजन कुर्याद्देशिक. सुसमाहित. ॥ ४४४ ॥

सविशेष यथावद्वै द्विजदानावसानकम् ।
तत्काले तु विशेषेण गुरो समानमाचरेत् ॥ ४४५ ॥

वसनैश्च दुकूलाद्यैर्देवस्य प्राङ्निवेदितै. ।
विविधै स्रग्वरैश्चापि सुगन्धैश्चन्दनादिकै ॥ ४४६ ॥

आचार्योपि समादाय दुकूलाद्यमनुत्तमम् ।
बद्ध्वा चोष्णीपवत् स्वस्मिन् शिरसि द्विजसत्तम ! ॥

माल्यादि च यथायोगं धारयन् प्रणिपत्य च ।
मुहुर्मुहुर्देवदेव ततो यागनिकेतनम् ॥ ४४८ ॥

संप्राप्य तत्र वै कुण्डे होम कृत्वा यथापुरम् ।
गत्वा देवसमीप तु कृत्वा होमसमर्पणम् ॥ ४४९ ॥

संविभागं पितृणा च यथावत् प्रतिपाद्य च ।
कुमुदादींश्च चक्रं च खगेशं गणनायकम् ॥ ४५० ॥

इन्द्रादिलोकपालाना दापयित्वा बलिं क्रमात् ।
ततश्चैकायनी शाखा त्रयी चाथर्वसंयुताम् ॥ ४५१ ॥

इतिहासं पुराणं च वैष्णवं स्तोत्रमद्भुतम् ।
गीतं नृत्त च वाद्य च शंखभेर्यादिकास्तथा ॥ ४५२ ॥

वन्दिमंगलशब्दांश्च तथा मगलगीतकम् ।
श्रावयित्वा यथायोग दर्शयित्वा विभोस्ततः ॥ ४५३ ॥

कुम्भस्थ मण्डलस्थ च देवं हृदि विसृज्य च ।
विष्वक्सेनं समभ्यर्च्य प्राग्वन्मण्डलमध्यतः ॥ ४५४ ॥

ततो देवं समारोप्य यानादौ हेमनिर्मिते ।
सर्वमगलसंयुक्तं सर्वाण्यावरणानि च ॥ ४५५ ॥

परिभ्रम्य च बाह्यादि त्वन्तरावरणान्तिकम् ।
प्रथमावरणे वापि द्वितीयावरणेपि च ॥ ४५६ ॥

मण्टपे देवदेवेश विष्टरे विनिवेशयेत् ।
तत्काले यजमानस्तु अलंकृत्य तु देशिकम् ॥ ४५७ ॥

वस्त्रस्रक्चन्दनाद्यैश्च समारोप्य च यानके ।
शंखकाहलवादित्रभेरीपटहसंयुतम् ॥ ४५८ ॥

छत्रदीपसमायुक्त गायकादिसमन्वितम् ।
देशिकं देववत् स्मृत्वा स्वगृहे संप्रवेशयेत् ॥ ४५९ ॥

अथानुयागमाचार्य कुर्याद्बन्धुसमन्वित. ।
अस्तगते दिनकरे देवं संपूज्य वै क्रमात् ॥ ४६० ॥

गुलखडादिसंयुक्त मुद्गान्नं तु निवेदयेत् ।
ततस्तु भगवद्भक्ता देशान्तरनिवासिन. ॥ ४६१ ॥

देवस्योत्सवसेवार्थं ये नरा. पूर्वमागता. ।
तेषा स्वदेशयानार्थं देवानुज्ञापुरस्सरम् ॥ ४६२ ॥

कृत्वा विसर्जनं पश्चात् देवं यागनिकेतने ।
नीत्वा तत्र समावेश्य विष्टरे शुभसंस्तरे ॥ ४६३ ॥

कुम्भपूर्वं क्रमेणैव चतुः स्थानस्थितं विभुम् ।
यथाविधि समभ्यर्च्य प्रभूतान्नसमन्वितम् ॥ ४६४ ॥

उत्सवान्तोदित कृत्वा स्नपन चापि कल्पयेत् ।
यात्राबिबे द्विजश्रेष्ठ ! बिबे वा स्नपनार्थतः ॥ ४६५ ॥

एव क्रमेण संपूज्य प्रदाप्य विधिना बलिम् ।
कुम्भमण्डलकुण्डस्थान् मन्त्रेशान् मन्त्रवित्तम. ॥

विसर्जयेद्यथावच्चयथोक्तविधिना ततः।
विष्वक्सेनं यजेत् पश्चाद्देवमन्तः प्रवेशयेत् ॥ ४६७ ॥

अर्घ्यगन्धादिनाभ्यर्च्य मूलबिम्बे विसर्जयेत्।
ग्रामे चावाहितान् विप्र! कुमुदादीन् गणान्वितान् ॥

सन्तोष्य बलिदानेन सविशेषं विसर्जयेत्।
ध्वजस्थानं समासाद्य कुम्भं संस्थाप्य पूर्ववत् ॥ ४६९ ॥

पतत्रीशं समभ्यर्च्य ध्वजस्थं च विशेषतः।
महाहविर्निवेद्याथ ध्वजस्थं विहगेश्वरम् ॥ ४७० ॥

विसर्जयित्वा स्वहृदि कुम्भस्थे वा खगेश्वरे।
ततोऽवरोहयेद्विप्र ध्वजं पूर्वक्रमेण तु ॥ ४७१ ॥

कुम्भस्थं विहगेशं तु स्वस्मिन् हृदि विसर्जयेत्।
यद्वा गरुडगेहं तु गत्वा कुम्भस्थवारिणा ॥ ४७२ ॥

संप्रोक्ष्य गरुडं तत्र कुम्भस्थं तु विसर्जयेत्।
ध्वजदण्डं ध्वजपटं तद्यष्टिं तत्प्रपां तथा ॥ ४७३ ॥

आचार्यः स्वयमादद्याद् यागोपकरणान्यपि।
अन्यथा चेन्महान् दोषः कर्तुर्देशाधिपस्य च ॥ ४७४ ॥

निष्फलं स्यात् कृतं कर्म विहगेशोपि कुप्यति।
यागकर्मणि पर्याप्ते तद्रात्रौ वाऽपरेह्नि ॥ ४७५ ॥

यजमानो गुरुं हैमैर्भूषणैः कटकादिभिः।
वसनैर्गन्धपुष्पाद्यैः अलंकृत्याभिपूज्य च ॥ ४७६ ॥

उत्तमां दक्षिणां दद्यात् स्वर्णनिष्कशतान्विताम्।
ततोधिकां तु वा दद्यात् विभवस्यानुगुण्यतः ॥४७७॥

तदर्धं मध्यमं विद्धि तत्पादं ह्यधमं भवेत्।
यथावित्तानुरूपं तु यथाश्रद्धं तु वा ददेत् ॥ ४७८ ॥

तदर्धं ऋत्विजां दद्यात् तदर्धं परिचारके।
अन्यान् गायकपूर्वांस्तु यथावित्तानुसारतः ॥ ४७९ ॥

यागस्तु दक्षिणाहीनो निष्फलः स्यान्न संशयः।
तस्माद्वित्तानुगुण्येन देया चाल्पापि दक्षिणा ॥ ४८० ॥

एवं तु गदितः सम्यक् यात्राख्योत्सवविस्तरः।
तत्र यो यो विशेषस्तु तं तमाकर्णयाधुना ॥ ४८१ ॥

देशिके साधके वापि एकस्मिन्नेव कल्पिते।
स एव सकलं कर्म कुर्यात् पूर्वोदितं क्रमात् ॥ ४८२ ॥

बहुष्वेतेषु कल्पेषु त्वेकं कुर्याद्यथाक्रमम्।
ध्वजांकुरं ध्वजारोपं उत्सवार्थांकुरार्पणम् ॥ ४८३ ॥

उत्सवारम्भदिवसात् पूर्वतः कौतुकक्रियाम्।
उत्सवारम्भदिवसे अधिवासार्थमीरितम् ॥ ४८४ ॥

चतुःस्थानार्चनं विप्र! तथा तीर्थांकुरार्पणम्।
तद्रात्रावपि यात्रार्थं चतुःस्थानार्चनक्रियाम् ॥ ४८५ ॥

यात्राप्रतिसरान्धं तथा चावभृथक्रियाम्।
पुष्पयागदिने वापि चतुःस्थानार्चनं तथा ॥ ४८६ ॥

कुम्भमण्डलकुण्डस्थमन्त्राणां च विसर्जनम्।
ध्वजावरोहणं चैव प्रयत्नान्नियतव्रत ॥ ४८७ ॥

तदन्ये देशिकाः कुर्युः साधका वा यथाक्रमम्।
अन्यानि सर्वकर्माणि यथायोगं समाचरेत् ॥ ४८८ ॥

कुम्भस्थस्यार्चनं केचित् केचिद्विग्रहस्य पूजनम्।
अग्नौ संतर्पणं केचित् केचित् स्नपनकौतुके ॥ ४८९ ॥

स्नपनाद्यर्चनं केचित् यथाकालं यथाविधि।
यद्येकेनैव शक्यं स्याच्चतुःस्थानार्चनं द्विज! ॥ ४९० ॥

कर्तुर्न कर्तृभेदः स्याच्चतुःस्थानार्चनाविधौ।
एकस्मिन् पूजने विप्र! वर्तमानेपि मध्यतः ॥ ४९१ ॥

केनचिद्व्याधिना कर्तुरशक्तिर्यदि संभवेत्।
अंगादंगान्तरारम्भे आसनादासनस्य हि ॥ ४९२ ॥

शेषमन्येन कर्तव्यं जप्त्वा मूलं सहस्रकम्।
अन्यथासंभवेत्सा चेत् कर्तुरन्यस्तु पूजकः ॥ ४९३ ॥

भूयश्चादित आरभ्य पूजनं तु समाचरेत्।
दिनोदितेन मार्गेण कुर्याच्चेदन्यथा द्विज! ॥ ४९४ ॥

कर्तुः स्यान्मानसी पीडा पूजनं चापि निष्फलम्।
यदोत्सवे नियुक्तं तु नित्यस्नपनकौतुकम् ॥ ४९५ ॥

तदेकदैव कुर्वीत रात्रावहनि वोत्सवम्।
यदा महोत्सवविधौ बलिबिम्बं प्रयुज्यते ॥ ४९६ ॥

कालयोरुभयो. कुर्यात् कर्तुरिच्छानुरूपतः ।
यावाविबे नियुक्ते तु कुर्यात् कालद्वये सदा ॥ ४९७ ॥

उत्सवं मुख्यकल्पे तु अनुकल्पे महामते ।
दिवा वापि रजन्या वा कुर्याद्यात्रोत्सवं द्विज ! ॥

कुम्भे वा विष्टरे चक्रे यदा कुर्यान्महोत्सवम् ।
तदानी मूलबिबे तु यात्रा बिबोदिता क्रियाम् ॥४८९॥

सर्वामपि क्रमात् कृत्वा परिभ्रमणवर्जितम् ।
कुम्भे वा विष्टरे वापि दर्भमजरिजे शुभे ॥ ५०० ॥

चक्रे वा देवमावाह्य अर्च्यार्घ्यं परिपूज्य च ।
यानादिके समारोप्य सर्वसाधनसंयुतम् ॥ ५०१ ॥

ग्रामादौ भ्रामयेत् प्राग्वत् बलिदानसमन्वितम् ।
ग्रामादि बलिदानोक्तकाले दद्यात् बलिं सदा ॥ ५०२ ॥

कुमुदादि गणेशाना पालिकावसथेपि च ।
उत्सवे देवदेवेश सदा सर्वत्र पूजयेत् ॥ ५०३ ॥

वस्त्रपुष्पादिकैर्भोगै. यथाभिमतदिङ्मुख ।
आसीनो वा स्थितो वापि साधकस्तु यथारुचि ॥

एवं तु भ्रमणं कुर्यात् एकाहाद्युत्सवेष्वपि ।
एकाहे पूर्वरात्रे वा यात्रा बिबाधिवासनम् ॥ ५०५ ॥

तीर्थबिबाधिवास च तथा कर्मदिने तत ।
प्रातर्ग्रामं परिभ्राम्य यात्राबिंब तु पूर्ववत् ॥ ५०६ ॥

तत्पश्चादाचरेत् प्राग्वत् तीर्थबिबाधिवासनम् ।
अपरस्मिन् दिने कुर्यात् पुष्पयागं न वा द्विज ॥५०७।

त्रिवासरेपि पञ्चाहे सप्ताहे तूत्सवे द्विज ! ।
आरंभाद्दात्तु पूर्वेद्युः यात्रा बिबाधिवासनम् ॥ ५०८ ॥

तीर्थाहात् पूर्वरात्रौ तु तीर्थबिबाधिवासनम् ।
तीर्थाहादपरस्मिन् वै पुष्पयाग समाचरेत् ॥ ५०९ ॥

एकाहात् सप्तरात्रान्तमुसवानां चतुष्टये ।
पुष्पापचयलीलां च मृगयामपि नाचरेत् ॥ ५१० ॥

दशाहादिषु सर्वेषु नवाहोदितवर्त्मना ।
सर्वं कुर्याद्यथायोगं कर्तुरिच्छानुरूपतः ॥ ५११ ॥

स्वयं व्यक्ते विमानादौ स्थाने तु न समाचरेत् ।
एकाहात् सप्तरात्रान्तमुत्सवाना चतुष्टयम् ॥ ५१२ ॥

तथा तत्रानुकल्पोक्तमुत्सवं न समाचरेत् ।
स्वयं व्यक्ते जलक्रीडा भवेन्नान्यत्र कल्पयेत् ॥ ५१३ ॥

एकाहाद्यास्तु सकला उत्सवा वत्सरान्तिमाः ।
बहुबेरविधाने तु कर्तव्या द्विजसत्तम ! ॥ ५१४ ॥

एकत्रिपञ्चसप्ताहनवाहद्वादशाहिका. ।
एकबेरविधाने तु कर्तव्या नान्यथा भवेत् ॥ ५१५ ॥

ग्रामे वा नगरे वापि प्रतिलोमानधिष्ठिते ।
अशून्ये पत्तने वापि रथ्यासु सुसमाचरेत् ॥ ५१६ ॥

बलिदानादिकं सर्व अन्यथा चेद् द्विजोत्तम ! ।
अन्तरावरणे वेव विभो कुर्यान्महोत्सवम् ॥ ५१७ ॥

देवस्य यात्राकर्मार्थं प्रवेशश्च विनिर्गम. ।
भवेत्तद्द्वारेण सर्वे वावरणेष्वपि ॥ ५१८ ॥

प्रवेशनिर्गमौ स्याता ग्रामाद्यभिमुखेन वा ।
प्रधानैर्नेतरैर्द्वारै. कार्यौ वेशविनिर्गमौ ॥ ५१९ ॥

नोपद्वारैर्न शोभैश्च नोपशोभै कदाचन ।
यदि कुर्यात् प्रमादेन तद्देशनृपतेर्भवेत् ॥ ५२० ॥

प्रधानस्य विपर्यास स्वस्थानप्रच्युतिस्तथा ।
ग्रामादावपि विप्रेन्द्र ! प्राकारादिपरिष्कृते ॥ ५२१ ॥

यात्रा कर्मणि देवस्य प्रवेशश्चापि निर्गम ।
उपद्वारैर्न कर्तव्यः कृते यात्रादि निष्फलम् ॥ ५२२ ॥

ग्रामस्यापि विनाश. स्यात् ततो देशाधिपस्य च ।
चतुर्ष्वपि प्रधानेषु विशेषमवधारय ॥ ५२३ ॥

देवागारस्य पूर्वस्या दिशि ग्रामादिकं यदि ।
प्रत्यक्दिक्सस्थितद्वारा भवेत्तत्रोदितद्वयम् ॥ ५२४ ॥

ग्रामादिकं भवेत् प्रत्यक् यदा देवगृहस्य तु ।
प्राग्द्वारेण तदा स्याता प्रवेशश्च विनिर्गम. ॥ ५२५ ॥

यदा ग्रामादिकं कल्प्तं प्रासादस्य तु दक्षिणे ।
तदानीमुत्तरद्वारा प्राग्द्वारा वा पुरोदिता ॥ ५२६ ॥

अन्यथा तत्परित्यागे दोष स्याद्राजराष्ट्रयो.।
एवं तु देवदेवस्य उत्सवं कल्पयेत्तु य. ॥ ५५७ ॥

इह लोके सुख भुक्त्वा चिर भोगान् यथेप्सितान्।
देहसन्यासकाले तु प्राप्नोति भगवत्पदम् ॥ ५५८ ॥

यात्राया वर्तमानाया अनुगच्छन्ति ये विभुम्।
पदे पदे क्रतुफलं लभन्ते ते नरोत्तमाः ॥ ५५९ ॥

ये तोषयन्ति ते काले देवदेव जगत्पतिम्।
विविधैरूपचारैस्तु छत्रचामरपूर्वकै. ॥ ५६० ॥

ऐहिकामुष्मिकान् भोगान् प्राप्नोत्यभिमतान् सदा।
इति सम्यङ्मुनिश्रेष्ठ! कीर्तितो वत्सरोत्सव ॥ ५६१ ॥

एव नैमित्तिकं चान्यं कुर्यादेकाहमुत्सवम्।
ध्वजारोहादिपूर्वोक्तयात्रागपरिवर्जितम् ॥ ५६२ ॥

विभवानुगुणं विप्र! विशेषस्नपनान्वितम्।
महता हविषा युक्तं यथाश्रद्धानुरूपत ॥ ५६३ ॥

तस्मिन् प्रधाननक्षत्रे पत्रपुष्पफलान्विते।
पञ्चविंशतिकुम्भास्तु स्थापयित्वाभिषेचयेत् ॥ ५६४ ॥

चैत्रे मासि पुनर्वस्वो वसन्तोत्सवमाचरेत्।
तस्मिंस्तु शुक्लद्वादश्या कुर्याद्दमनकोत्सवम् ॥ ५६५ ॥

पवित्रारोहवत् कुर्यात् चतुस्थानार्चनादिकम्।
भूषणान्युत्तमादीनि कुर्याद्दमनकैस्तथा ॥ ५६६ ॥

तत्तु संख्याविरहितं यथाशोभानुरूपत ।
पञ्चविंशतिकुम्भास्तु स्थापयित्वाभिषेचयेत् ॥ ५६७ ॥

एको ह वै नारायण इति प्राक्कलशेन तु।
तस्य ध्यानान्तस्थस्येति द्वितीयकलशेन तु ॥ ५६८ ॥

अथ पुनरेव नारायण इति तृतीयकलशेन तु।
अथ पुनरेव नारायण इति चतुर्थत. ॥ ५६९ ॥

सहस्रशीर्षा पुरुष इति पञ्चमकुम्भत ।
पति विश्वस्यात्मेश्वरमिति वै षष्ठकुम्भत. ॥ ५७० ॥

नारायण परं ब्रह्म इति वै सप्तमेन तु ।
यच्च किंचिज्जगत्यस्मिन् इति ह्यष्टमकुम्भत. ॥ ५७१ ॥

अनन्तमव्यय कविमिति नवमेनाभिषेचयेत्।
अतो निष्ठ्या वितस्त्या तु इति स्याद्दशमेन वै ॥५७२॥

सन्तत शिराभिस्तु लमित्येकादशेन तु।
तस्य मध्ये महानग्निरिति द्वादशमेन वै ॥ ५७३ ॥

सन्तापयति स्व देहमिति त्रयोदशमेन वै।
नीलतोयदमध्यस्था इति चतुर्दशमेन वै ॥ ५७४ ॥

तस्याश्शिखाया मध्ये इति पञ्चदशमेन वै।
सर्वस्य वशिन देव इति षोडशमेन तु ॥ ५७५ ॥

बहिरावरणस्थैस्तु कलशैरभिषेचयेत्।
बहिरावरणे नास्ति इति प्राक्संस्थितेन तु ॥ ५७६ ॥

यज्ञाभिपद्माद्भवदिति वह्निगतेन तु।
धृतोर्ध्वपुण्ड्र परमेति याम्यदिकसंस्थितेन तु ॥ ५७७ ॥

दक्षिणे तु भुजे विप्र इति यातुगतेन वै।
विष्णुनाक्तमश्नन्तीति वारुणीदिकस्थितेन तु ॥ ५७८ ॥

पुंप्रधानेश्वरो विष्णुरिति वायुगतेन वै।
य इमां महोपनिषदमिति सोमगतेन तु ॥ ५७९ ॥

ओमिति प्रथमं नाम इतीशानगतेन तु।
पुरुषोहं वै वासुदेव इति मध्यगतेन तु ॥ ५८० ॥

यद्वा पुरुषसूक्तीयैर्मन्त्रै. षोडशभि क्रमात्।
बहिरावरणस्थैस्तु कलशैरभिषिच्य च ॥ ५८१ ॥

पूर्वोक्तैर्ब्रह्मसूक्तस्थैर्मन्त्रैर्द्विद्विकसंख्यया।
अन्तरावरणस्थस्तु संस्नाप्य कलशै. क्रमात् ॥ ४८२ ॥

अवशिष्टैस्त्रिभिश्चान्ते मध्यकुंभेन सेचयेत्।
रजनीचूर्णसंपूर्णान् सस्थाप्य नवकुम्भकान् ॥ ५८३ ॥

अर्घ्याद्यैरर्चयित्वा तु चक्ररश्मिसमप्रभान्।
रजनीचूर्णनिचयान् ध्यात्वा तैरभिषेचयेत् ॥ ५८४ ॥

सर्वविघ्ननिरासार्थं सर्वसंपूरणाय च।
दक्षिणे तु भुजे विप्र! इति प्राक्संस्थितेन च ॥५८५॥

निचिकिद्वा सुपर्णमिति वह्निगतेन तु।
प्रते विष्णो अब्ज चक्रे इति याम्यगतेन तु ॥ ५८६ ॥

एभिर्वयमुरुक्रमस्येति यातुगतेन तु ।
धृतोर्ध्वपुण्ड्र कृतचक्रेति पश्चिमाशागतेन तु ॥ ५८७ ॥

पवित्रमित्यग्निरिति वायुगतेन तु ।
चरणं पवित्र विततमिति सोमगतेन तु ॥ ५८८ ॥

लोकस्य द्वारमर्चिमदिति रुद्रगतेन तु ।
मन्त्रैरेतैस्तु चाष्टाभि अन्यै सौदर्शनैस्तथा ॥ ५८९ ॥

सस्नाप्य मध्यकुम्भेन शुद्धोदैरभिषिच्य च ।
महोपनिषदन्तस्थै ब्रह्मसूक्तै पुरोदितैः ॥ ५९० ॥

मन्त्रैश्चतुर्भि. पुसूक्तै मन्त्रै. षोडशभिस्तथा ।
वासुदेवद्विषट्कार्णब्राह्मणद्वितयेन तु ॥ ५९१ ॥

ओंकारादिपवित्रान्तैः चतुर्भिर्व्यापकैस्तथा ।
सहस्रधारया देव स्नापयेद्विधिपूर्वकम् ॥ ५९२ ॥

यद्वा द्विषट्कमन्त्रेण सर्व स्नपनमाचरेत् ।
ततोऽन्यैः सकलैर्भोगै प्राग्वदिष्ट्वा क्रमेण तु ॥ ५९३ ॥

सर्वै. पुरोदितैर्मन्त्रैः द्विषट्कार्णेन वा द्विज !
होमं कृत्वा विशेषेण समिद्भिस्त्रिमधुप्लुतै· ॥ ५९४ ॥

ततो दमनकारोपमाचरेत्तु यथाविधि ।
अत्रानुक्त तु सकल पवित्रारोहवद्भवेत् ॥ ५९५ ॥

माघमासे पुनर्वस्वोश्चैत्रे वा द्वितयेपि वा ।
वैशाखे श्रवणे ऋक्षे रोहिण्या श्रवणे तथा ॥ ५९६ ॥

आर्द्रायां मार्गशीर्षाख्ये आषाढे हस्ततारके ।
कार्तिके मासि रोहिण्यामन्येष्वेवंविधेष्वपि ॥ ५९७ ॥

अवतारदिनेष्वेव कुर्यादेकाहमुत्सवम् ।
ग्रामे वा नगराद्ये वा सर्वेष्वावरणेषु वा ॥ ५९८ ॥

शुभलीलासमायुक्तमाचरेत्तु परिभ्रमम् ।
पक्षे पक्षे च द्वादश्या मासि मासि तथैव च ॥ ५९० ॥

अमावास्या पौर्णमास्या श्रवणे चोत्तरे दिने ।
अन्येष्वपि प्रशस्तेषु विभवेच्छानुरूपत. ॥ ६०० ॥

यजमानादिजन्मर्क्षे चैत्रादि विषुवद्वये ।
अयनद्वितये चापि सूक्ष्मस्थूले विशेषत ॥ ६०१ ॥

तथा चाग्रयणाख्य तु वत्सरे वत्सरे द्वयम् ।
आषाढे पूर्वफल्गुन्या पुष्ये चैव विशेषत. ॥ ६०२ ॥

माघमासे तु पञ्चम्या सप्तम्यामथवा द्विज ! ।
विशेषयजन कुर्याद्विभवेच्छानुरूपत ॥ ६०३ ॥

एकादश्यां मार्गशीर्षे पूर्वपक्षे विशेषतः ।
कुर्याद्विशेषयजनं तत्र संश्रावयेद्विभुम् ॥ ६०३ ॥

सदागमादिकान् सर्वान् वेदान् वै वेदघोषणम् ।
इतिहासपुराण च तथा दैवं च मानुषम् ॥ ६०५ ॥

वेदोपबृंहण त्वन्यत् सस्कृत प्राकृतं तु वा ।
भाषान्तरगतं वापि यथाश्रद्धानुरूपत. ॥ ६०६ ॥

एवं विशेषयजन द्वादश्या तु समाचरेत् ।
पायसान्नं गुलान्न वा प्रभूत विनिवेदयेत् ॥ ६०७ ॥

समाप्ते भगवद्यागे पारण तु समाचरेत् ।
एतत्तिथिद्वययुतमुत्तम व्रतमीरितम् ॥ ६०८ ॥

अत परं स्याद्विस्तारो विभवेच्छानुरूपत ।
तदादिपौर्णमास्यान्तं पञ्चम्यन्त तु वा द्विज ॥ ६०९ ॥

दशम्यमावास्यान्तं वा पञ्चमी दशमी तु वा ।
एव त्रिशद्दिनान्त तु विभवानुगुणं भवेत् ॥ ६१० ॥

वैशाखे च विशाखर्क्षे विशेषयजनं भवेत् ।
सहकारफलै पक्वैः गुलक्षीरादिपाचितैः ॥ ६११ ॥

कार्तिके मासि कार्तिक्या विशेषार्चनमाचरेत् ।
घृततैलमहादीपै. प्रभूतैर्दर्शयेत् प्रभुम् ॥ ६१२ ॥

शुभैरन्यैर्लाजपूर्वैः शुभैर्भक्ष्यादिभि सह ।
फलपुष्पादिकैः पूतै· तत्तत्काले समर्चयेत् ॥ ६१३ ॥

पौषे मासि च पुष्ये तु विशेषस्नपनान्वितम् ।
कार्तिके मासि विप्रेन्द्र ! शुक्लैकादशिका तु या ॥

तस्यामुपोष्य रात्र्या तु जागरेण जगत्पतिम् ।
तत्कालोचितरागोत्थै. तोषयित्वा तु गीतकै· ॥

ब्राह्मे मुहूर्ते संप्राप्ते विशेषेण यजेद्विभुम् ।
सश्रावयेद्गीतकानि स्तोत्राणि विविधा. कथाः ॥६१५॥

होमावसान सर्वं तु सविशेष समाचरेत् ।
तत्काले ये च गायन्ति तच्च शृण्वन्ति ये जना. ॥
तेषा पुण्यफलावाप्ति क. शक्तोत्यभिवर्णितुम् ।
आचार्या. साधका वापि कुर्वीरन्नेवमुत्सवम् ॥ ६१८ ॥

आचार्यास्तेषु सोष्णीषा भवेयुस्सोत्तरीयका. ।
अकंचुका. सदा विप्र ! साधका. स्यु. सकञ्चुकाः ॥
सकञ्चुका यद्याचार्यास्तत्पूजा निष्फला भवेत् ।

इति श्रीपाञ्चरात्रे पारमेश्वरसंहिताया क्रियाकाण्डे महोत्सवादिविधिर्नाम सप्तदशोऽध्याय ।

श्रीः

अष्टादशोऽध्यायः ॥

सनक —
नित्यनैमित्तिकाद्येषु यागेषु वदतां वर ।
मानं तु प्रापणादीना श्रोतुमिच्छामि तद्वद ॥ १ ॥

शाण्डिल्य —
नित्ये नैमित्तिके काम्ये प्रायश्चित्ते तथैव च ।
मान नवविधं विप्र ! शृणु मुख्यानुकल्पयो. ॥ २ ॥

क्रमात् प्रापणपूर्वाणा द्रव्याणामुत्तमादिकम् ।
अत्रैकमूर्तेरेकस्मिन् काले भारद्वयेन तु ॥ ३ ॥

कल्पयेत् प्रापण चैतदुत्तमोत्तमसंज्ञितम् ।
एकैकं द्रोणमानेन क्रमाद्ध्रासं समाचरेत् ॥ ४ ॥

अधमाधमसज्ञं स्याद्यथा द्रोणचतुष्टयम् ।
मुख्यकल्पमिमं विद्धि अनुकल्पं शृणुष्व मे ॥ ५ ॥

मुख्यमूर्तेस्त्वथैकस्मिन् यागे भारेण कल्पितम् ।
उत्तमोत्तमसंज्ञ तु प्रापणं द्विजसत्तम ! ॥ ६ ॥

आढकद्वयहीन तद्भवेदुत्तममध्यमम् ।
अधमाधमकं यावदेवं ह्रासं समाचरेत् ॥ ७ ॥

यथा द्रोणद्वयं विप्र ! अधमाधमसंज्ञितम् ।
यद्वाढकद्वय प्रोक्तमधमाधमसज्ञितम् ॥ ८ ॥

क्रमेण तस्मादारभ्य द्रोणार्धं वर्धयेद्द्विज ! ।
अथोत्तमोत्तमं विप्र ! सार्धद्रोणचतुष्टयम् ॥ ९ ॥

कुर्यादाढकमात्र तु प्रापण संकटे सति ।
पुरुषाशनमात्रं वा भवेद् द्रव्यानुरूपत ॥ १० ॥

आढकद्वयमानेन तदर्धेनाथवा द्विज ! ।
पृथक्पात्रेषु निर्दिष्ट यावद्भारद्वयावधि ॥ ११ ॥

नित्ये नैमित्तिके काम्यप्रायश्चित्ताख्ययोरपि ।
विधिरेष समान. स्यादत ऊर्ध्व महाहवि. ॥ १२ ॥

दशैकभारमात्रं तु उत्तमोत्तमसज्ञितम् ।
महोदनोऽनुकल्पे तु भारं (एकै) क ह्रासमाचरेत् ॥१३॥

अधमाधमपर्यन्तमस्मिन् भारद्वय यथा ।
यद्वा विशतिभारं तु उत्तमोत्तमसंज्ञितम् ॥-१४ ॥

भारद्वयद्वयह्रासं यथा स्यादधमाधमे ।
चतुर्भारप्रमाणं तु मुख्यकल्पे विधि शृणु ॥ १५ ॥

एकभारविहीनैस्तु त्रिशद्भारैः प्रकल्पितम् ।
उत्तमोत्तमसंज्ञं तु भाराणा तु त्रयं त्रयम् ॥ १६ ॥

ह्रासयेत्क्रमयोगेन यथा स्यादधमाधमे ।
पञ्चभारप्रमाण तु एवं वा परिकल्पयेत् ॥ १७ ॥

पञ्चाशद्भारमात्र स्यात् उत्तमोत्तमसंज्ञितम् ।
पञ्चपञ्चपरित्यागादेवं नवविधं भवेत् ॥ १८ ॥

दशभारप्रमाणं तु यथा स्यादधमाधमे ।
अस्मादूर्ध्व तु गृह्णीयान्महोदनविधौ द्विज ! ॥ १९ ॥

सहस्रभारपर्यन्त विभवेच्छानुरूपतः।
मात्रार्थं तण्डुलं श्रेष्ठमाढकत्रयकल्पितम् ॥ २० ॥

अधमाधमपर्यन्त प्रस्थं प्रस्थ तु ह्रासयेत्।
मुख्यकल्पे भवेच्छ्रेष्ठं सार्धद्रोणविनिर्मितम् ॥ २१ ॥

प्रस्थद्वयद्वयह्रासमाचरेत्तु यथाक्रमम्।
अधमाधममानं स्याद्यथा द्रोणार्धकल्पितम् ॥ २२ ॥

अधमाढकमानस्य हविषो मुख्यकल्पने।
मात्रार्थं तण्डुल प्रस्थं तदर्धमनुकल्पके ॥ २३ ॥

हविर्वृद्धिक्रमेणैव मात्रावृद्धि समाचरेत्।
अधमस्यैककल्पे तु द्रोणार्ध परिकल्पयेत् ॥ २४ ॥

मात्रार्थमनुकल्पे तु आढक परिकल्पयेत्।
तण्डुलाद्द्विगुण शालिर्मात्रा स्यादुत्तमोत्तमा ॥ २५ ॥

समाना मध्यमा प्रोक्ता तदर्धा कीर्तिताधमा।
शालिवत्कल्पितव्या स्याद्बीजमात्रा त्रिधा स्थिता ॥

बीजानामप्यभावे तु मुद्गमेक प्रशस्यते।
बीजेष्वेकतमं वापि तत्तत्कालानुरूपतः ॥ २७ ॥

तण्डुलेन समा मुख्या तिलमात्रा प्रकीर्तिता।
तदर्धा मध्यमा प्रोक्ता पादमाना कनीयसी ॥ २८ ॥

यथा विभवमानः स्याद्रिक्तवित्ताढ्यमानयोः।
शालिमात्रा न कर्तव्या यागे स्नपनवर्जिते ॥ २९ ॥

अन्या मात्राः प्रकल्प्याः स्युः सर्वस्मिन्नर्चनाविधौ।
मुख्यमूर्त्युचितान्मानादधिकेन न कल्पयेत् ॥ ३० ॥

प्रमाणेनाङ्गबिम्बाना सर्व तु हविरादिकम्।
तद्यागेऽधिककालं तु हविराद्यं न कल्पयेत् ॥ ३१ ॥

अन्नादाढकमानात्स्यात् पुरुषाशनमात्रकात्।
प्रासादयजने ह्रासं न कदाचित् समाचरेत् ॥ ३२ ॥

मात्रा तण्डुलमानं च शालिमानं तथैव च।
न ह्रासयेन्मुनिश्रेष्ठ! मानादाढकनिर्मितात् ॥ ३३ ॥

स्वगृहे यजने कुर्याद्विभवेच्छानेरूपतः।
आज्यादीनामथो मानं वक्ष्ये तदवधारय ॥ ३४ ॥

अन्नस्याढकमानस्य घृत तु कुडवत्रयम्।
उत्तमोत्तमसंज्ञ तु मुख्यकल्पक्रमेण तु ॥ ३५ ॥

एकैकमुष्टिहान्या तु नवधैतत् प्रकीर्तितम्।
अनुकल्पे घृतं विप्र! सार्ध तु कुडवं भवेत् ॥ ३६ ॥

अर्धार्धमुष्टिहान्या तु तच्चापि नवधा स्मृतम्।
द्विगुण घृतमानं स्यात् मुद्गान्नपरिकल्पने ॥ ३७ ॥

अन्नवृद्धिक्रमेणैव घृतवृद्धि समाचरेत्।
कर्मव्यान्युपदशार्थं मूलानि च फलानि च ॥ ३८ ॥

विशत्पलानि प्रोक्तानि उत्तमोत्तमसंज्ञया।
अन्नस्याढकमानस्य मुख्यकल्पक्रमेण तु ॥ ३९ ॥

एकैकपलहान्या तु तदेतन्नवधा भवेत्।
उत्तमं द्वादशपलमनुकल्पे क्रमेण तु ॥ ४० ॥

एकैकपलहानिः स्यादधमाधमपश्चिमम्।
मुद्गभेदोपदंशस्तु आढके घृतमानवत् ॥ ४१ ॥

मुद्गान्ने मुदमानस्तु तण्डुलेन समो भवेत्।
मुख्यः पादविहीनस्तु मध्यमः परिकीर्तितः ॥ ४२ ॥

अर्धमानोऽधमः प्रोक्तस्तस्मान्न ह्रासमाचरेत्।
नालिकेरफल चैकमाढकस्य प्रकीर्तितम् ॥ ४३ ॥

तदर्ध मध्यमं प्रोक्त तदर्धमधमं भवेत्।
लवणं च मरीचादि यथायोगं समाचरेत् ॥ ४४ ॥

तण्डुलादष्टगुणितं पयः स्यात् पायसोदने।
मध्यमं पादहीनं स्यादधमं स्यात्तदर्धकम् ॥ ४५ ॥

क्षीराभावे नालिकेरपयसा परिकल्पयेत्।
उभयो पयसोर्वापि मिश्रण सममानयो ॥ ४६ ॥

गुडान्नस्याढकस्याथ गुलाना त्रिशतं पलम्।
उत्तमं विशतिश्चैव मध्यमे दशम भवेत् ॥ ४७ ॥

तण्डुलादर्धमानो वा मुद्गभेदस्तदर्धक।
अथवा सममानो वा पायसान्नगुळान्नयोः ॥ ४८ ॥

एक चापूपमान स्यात् कुडवद्वयकल्पितम्।
मुख्यं तदर्ध मध्य स्यात्तदर्धमधमं भवेत् ॥ ४९ ॥

मुद्गभेदस्तण्डुलार्धस्तत्पादो वा यथारुचि ।
एकस्यापूपमानस्य पट्पल तु गुळ भवेत् ॥

अथवैकपलं वापि सकटे परिकल्पयेत् ।
नालिकेरपलं चैकं तदर्ध पादमेव वा ॥ ५१ ॥

एकस्यापूपमानस्य यथापाकं घृत भवेत् ।
लवनं च मरीचाद्य यथायोगं तु पूपवत् ॥ ५२ ॥

शतत्रयं षष्ट्यधिकमपूपाना तदुत्तमम् ।
चत्वारिशत्क्रमाद्भारे चत्वारिशत्तथान्तिमे ॥ ५३ ॥

पूगीफलानि ताम्बूलीदलाश्चाशीतिसङ्ख्यया ।
एवं प्रकल्पितं ब्रह्मन्नेक ताम्बूलमुच्यते ॥ ५४ ॥

तस्मान्न्यून न कर्तव्यं प्रासादेषु कदाचन ।
मुख्यकल्पे द्विसाहस्र क्रमुकीफलमुच्यते ॥ ५५ ॥

तस्माद्द्विगुणमान तु ताम्बूलीदलमीरितम् ।
उत्तमोत्तममेतत्तु अशीतिर्द्विचतु क्रमात् ॥ ५६ ॥

ह्रासयेदुभय विप्र ! यथा स्यादधमाधमे ।
शतानि सप्त, विशच्च फलानि स्युर्दलानि च ॥ ५७ ॥

चतुर्दशशतानि स्युश्चत्वारिशच्च सत्तम ! ।
एकस्य ताम्बूलकस्य अङ्गाना मानमुच्यते ॥ ५८ ॥

एलालवङ्गतक्कोलजातीना निष्कपादकम् ।
मानं स्याच्चन्दनस्यापि चूर्णस्यापि तथैव च ॥ ५९ ॥

कर्पूरमष्टमानं तु नालिकेरफलार्धकम् ।
मातुळङ्गफलार्ध च तैलमुष्टयष्टमाशकम् ॥ ६० ॥

एवमेव क्रमेणैव ह्यङ्गाना वृद्धिमाचरेत् ।
उत्तमोत्तमपूजाया चन्दन द्विपलं भवेत् ॥ ६१ ॥

सपाद, मुख्यकल्पे तु, द्विद्विनिष्कविहीनकम् ।
अधमाधमकं याव, दनुकल्पे शृणुष्व मे ॥ ६२ ॥

पलमेक सनिष्क स्यान्निष्कैक ह्रासयेत् क्रमात् ।
चन्दन निष्कमान तु यथा स्यादधमाधमे ॥ ६३ ॥

स्नपने चन्दन मानं मुख्यकल्पेऽवधारय ।
अष्टादशपलं मानमुत्तमोत्तमसञ्ज्ञितम् ॥ ६४ ॥

पलद्वयद्वयह्रासो यावत् स्यादधमाधमम् ।
अनुकल्पे नव पलं स्नपने चन्दनं भवेत् ॥ ६५ ॥

होमे चन्दनमानं तु पूजोक्तादर्धकं भवेत् ।
तदर्ध वा यथायोग बाहुलिके मानमुच्यते ॥ ६६ ॥

पूजाचन्दनवन्मानं मुख्यकल्पानुकल्पयोः ।
तथा कर्पूरमान तु तदर्ध वा द्विजोत्तम ! ॥ ६७ ॥

आढकं हैममुदकं कुडवद्वयसंयुतम् ।
कुडवद्वयद्वयह्रासमाचरेदन्तिमावधि ॥ ६८ ॥

मुख्यकल्पमिमं विद्धि, ह्यनुकल्पे तदर्धकम् ।
कृष्णाङ्गराग मुख्ये तु सार्धनिष्कचतुष्टयम् ॥ ६९ ॥

निष्कार्धक्रमह्रासेन नवधा परिकीर्तितम् ।
अनुकल्पे तदर्धेन नवधा मानमीरितम् ॥ ७० ॥

कृष्णाङ्गरागवन्मान भवेन्मृगमदस्य च ।
कस्तूरिकायाश्च तथा मानं नवविधं भवेत् ॥ ७१ ॥

द्रव्याणा स्नपनोक्ताना निष्काष्टादशकं तु वा ।
नवक वोत्तमोत्कृष्ट यथा स्यादधमाधमम् ॥

निष्कद्वयं तथैकं वा भवेत्तत्कल्पयेत्तथा ।
एवं विज्ञाय मानाद्य संस्कृत्य हविरादिकम् ॥ ७३ ॥

आराधयेद्देशिकेन्द्रो यथा शास्त्रोदितक्रमात् ।
आचार्य साधको वाऽन्नं पाचयेत्पाचकैः सदा ॥७४॥

स्वयं वाऽपि यथायोगं मन्त्रज्ञानामसन्निधौ ।
तेषामाचार्यपूर्वाणा सङ्ख्यानियम उच्यते ॥ ७५ ॥

श्रीरङ्गाख्यविमानादौ स्वयं व्यक्ते महामते !
प्रासादे च तथा सिद्धैः विबुधैश्च प्रतिष्ठिते ॥ ७६ ॥

आचार्यान् शास्त्रविहितांश्चतुर परिकल्पयेत् ।
अष्टौ द्वादश षड्वाथ कल्प्याः स्युः पञ्च वा मुने !

प्रधानगुरुणा सार्ध कल्प्या ह्येकोत्तरास्तु वा ।
यथा विहितसङ्ख्या वा सह तेन महामुने ! ॥ ७८ ॥

एवमेव भवेत् सङ्ख्या ऋषिभिः परिकल्पिते ।
मनुष्यनिर्मिते स्थानेऽप्येवमेव समाचरेत् ॥ ७९ ॥

आचार्याणां यथोक्तानां योग्यानामन्यसन्निधौ ।
आचार्यास्तु त्रयः कल्प्याः द्वावेको वा महामते ! ॥

मूलबिम्बादि पूजार्थमाचार्या मुख्यकल्पके ।
कल्प्याः साधकमिश्रा वा मध्यकल्पेऽनुकल्पके ॥

केवला साधका कल्प्या यथा विहितसङ्ख्यया ।
चत्वारः साधकाः कल्प्याः षडष्टौ द्वादशाथवा ॥८२॥

षोडशाथापि विभवे नान्यथा परिकल्पयेत् ।
स्वयव्यक्तादिकेवेवं कल्प्या पञ्चविधेष्वपि ॥ ८३ ॥

स्थानेषु मानुषेष्वत्र विशेषः परिकीर्त्यते ।
व्यामिश्रयाजिभिर्वर्णैः स्थाने तु परिकल्प्यते ॥ ८४ ॥

एवं विहितसङ्ख्या स्युराचार्या साधकास्तथा ।
मुख्यकल्पेऽनुकल्पे तु केवलाराधकान् दश ॥ ८५ ॥

यथोक्तसङ्ख्यैराचार्यैः सहितान् परिकल्पयेत् ।
मूलबिम्बस्य पूजार्थं तदेवंसङ्ख्यकास्तुते ॥ ८६ ॥

कल्पने पञ्चसङ्ख्यायास्तथा पञ्चदश स्मृताः ।
तेषां तु देशिकेन्द्राणामेकाद्वित्वकल्पने ॥ ८७ ॥

एकादश द्वादश च त्रयोदश च ते क्रमात् ।
तस्मादाराधकानां तु दशसङ्ख्या तु केवलाम् ॥ ८८ ॥

न कल्पयेत्तु सर्वत्र तस्माच्छास्त्रोक्तमाचरेत् ।
मानुष्याद्यतिरिक्तेषु स्वयं व्यक्तादिषु द्विज ! ॥ ८९ ॥

यथा विहितसङ्ख्या स्युराचार्यास्साधकास्तथा ।
नित्ये नैमित्तिके काम्ये प्रायश्चित्तेऽपि सर्वदा ॥ ९० ॥

दशसङ्ख्या न कल्प्या स्यात् उक्तन्यायेन कल्पयेत् ।
मूलबिम्बादिपूजार्थं तथा बाह्यस्थमूर्तिषु ॥ ९१ ॥

कृते सति महान् दोषस्तदा स्याद्राजराष्ट्रयोः ।
महद्भयं स्यात् स्थानस्य कर्तुः कारयितुस्तथा ॥ ९२ ॥

तस्मादुक्तेन मार्गेण तत्तत्सङ्ख्या प्रकल्पयेत् ।
परिवारेषु यागः स्याच्चतुर्भिर्वा षडष्टभिः ॥ ९३ ॥

द्वादशभिः षोडशभिः साधकैः परिकल्पितैः ।
गोपुरे मण्डपे साले प्राङ्गणे मालिकादिके ॥ ९४ ॥

स्थापिते बेरभे मूर्ते प्रादुर्भावे तु वा द्विज ! ।
प्रादुर्भावान्तरे मुख्ये यद्यन्मूर्ते प्रतिष्ठितम् ॥ ९५ ॥

तत्तद्यागेऽथ चत्वारः षडष्टौ द्वादशाथ वा ।
सङ्कल्प्या साधका विप्र ! कल्प्याः षोडश वा द्विज ! ॥

त एव परिवारार्थं कल्पनीयास्तु वा द्विज ! ।
गोपुरादौ स्थापितेषु बिम्बेष्वपि सदार्चने ॥ ९७ ॥

देशिका एव सकल्प्याः तत्रोग्यानामसन्निधौ ।
परिवारपदे योग्या अनन्या ब्राह्मणा द्विज ॥ ९८ ॥

दीक्षिता ब्राह्मणा वापि कर्मज्ञा कर्मकौशलाः ।
श्रीरङ्गादौ स्वयं व्यक्ते स्थाने तु परिचारकाः ॥ ९९ ॥

अशीतिसङ्ख्यासङ्ख्याताः पाचकाश्च त एव हि ।
सिद्धप्रतिष्ठिते स्थाने सप्तत्येव तु ते स्मृताः ॥ १०० ॥

देवप्रतिष्ठिते षष्टिर्द्वात्रिंशदपि कल्पिते ।
मनुष्यनिर्मिते स्थाने त्रिंशद्विंशतथापि वा ॥ १०१ ॥

अथवा भारमात्रान्नपचनादिषु कर्मसु ।
एकायत्ता दीक्षिता वा चत्वारो वा त्रयोऽपि वा ॥

एवं भारानुसारेण क्रमेण परिवर्धयेत् ।
यथा स्यादतुभारेषु (द्वि) द्वादशाष्टादश द्विज ! ॥

एकस्तु कल्पनीयः स्यात्ताम्बूलापूपसाधने ।
एकस्तु कल्पनीयोऽन्तः परिचारककर्मणि ॥ १०४ ॥

चत्वारिंशत्समाख्याता तदेव परिचारकाः ।
पक्षभारोदनानां तु साधने तु चतुर्गुणाः ॥ १०५ ॥

अपूपसाधने द्वौ तु द्वौ तु ताम्बूल साधने ।
चत्वारस्तु तथात्वन्तः परिचारककर्मणि ॥ १०६ ॥

एवं त्वशीतिसङ्ख्याः स्युः पक्षभारान्नसाधने ।
वर्धयेदत ऊर्ध्वं च तत्तद्भारानुसारतः ॥ १०७ ॥

ह्रासस्तदनुसारेण कर्तव्योऽभ्यूह्य सर्वदा ।
एवं स्याद्भारमात्रे तु त्रयाणां परिकल्पने ॥ १०८ ॥

चतुर्णां कल्पने वाऽपि तत्क्रमेण विवर्धयेत् ।
साधकाः पाचकाश्चैव ह्याचार्यवशवर्तिनः ॥ १०९ ॥

आचार्यसाधकाना च आज्ञासन्धारणोद्यता ।
सर्वदा पाचका सर्वे भवेयु परिचारका ॥ ११० ॥

पाचका एव शास्त्रेषु कीर्त्यन्ते परिचारका ।
अन्तरङ्गा बहिरङ्गा द्विविधा परिचारका ॥ १११ ॥

अन्तरङ्गास्तु संप्रोक्ता पाचकाः परिचारका ।
बहिरङ्गास्तु संप्रोक्ता पुष्पाद्याहरणोद्यता ॥ ११२ ॥

अन्येऽपि ये निबद्धा स्युस्तत्तत्कर्मानुरूपत ।
तेऽपि सर्वे यथायोगमाचार्यवशवर्तिनः ॥ ११३ ॥

वाहका गायकाश्चैव पाचकोक्तक्रमेण तु ।
वर्धनीया यथायोगमन्ये स्यु कर्मकारिणः ॥ ११४ ॥

आचार्याश्चैव चत्वारः तथा षोडश साधका ।
अशीतिसङ्ख्यासङ्ख्याता पाचका परिचारका ॥

एवमेकायनाना तु चतु सङ्ख्याप्रकल्पनम् ।
मुख्यकल्पमिमं विद्धि तदभावे महामते ! ॥ ११६ ॥

तेषा दीक्षितमिश्राणां कल्पन मध्यकल्पनम् ।
अधम कल्पन विद्धि सङ्ख्यास्वन्यास्वपि द्विज ! ॥

मुख्यादिप्रविभागत्वमेवमभ्यूह्य कल्पयेत् ।
पुत्रदीक्षाभिषेकेण संस्कृतास्तत्र कल्पयेत् ॥ ११८ ॥

समये दीक्षाभिषेके संस्कृतान् वा न चान्यथा ।
आचार्यैः साधकाश्चैव केवलास्त्वथवा द्विज ! ॥११९॥

बहिरङ्गेषु सर्वेषु कल्याः समयदीक्षिता ।
यया कया च विधया दीक्षिताऽदीक्षितास्तु वा ॥

भूयः कश्चिद्विशेषोऽयं कथ्यते तमिमं शृणु ।

सनक —

मुनीन्द्र प्रापणादीना सङ्ख्यामानमुदाहृतम् ॥ १२१ ॥

इदानी सविशेषेण चैतेषा मानलक्षणम् ।
शालिमुद्गादिभेदं च साधनं मन्त्रपूर्वकम् ॥ १२२ ॥

निवेदनप्रकारं च कारिणा सप्रदानकम् ।
यथावत् सर्वमेवैतत् पृच्छतो मे प्रकाशय ॥ १२३ ॥

शाण्डिल्य —

शृणु सम्यक् प्रवक्ष्यामि यथा पृष्ट त्वया मुने ! ।
येन संसाधितेनैव संपूर्ण पूजन भवत् ॥ १२४ ॥

नित्यं नैमित्तिकं काम्य त्रिविध हविरुच्यते ।
प्रथम नित्ययागे तु हविषो लक्षणं शृणु ॥ १२५ ॥

स्वहस्तेनाष्टतालोच्चो य स मध्यमपूरुष ।
तस्य देशिकमुख्यस्य मध्यमाङ्गुलिसंभव ॥ १२६ ॥

द्विपर्वस्थाविणी विन्दुः द्वात्रिंशद्विन्दुभिस्त्रुटि ।
त्रुटिद्वयं तथा शुक्तिस्तद्द्वयं प्रसृत भवेत् ॥ १२७ ॥

प्रसृताभ्या प्रकुंजं तु तद्द्वय कुडवं भवेत् ।
मानिका कुडवाभ्या तु प्रस्थ तन्मानिकाद्वयम् ॥१२८॥

प्रस्थद्वयं शम प्रोक्तं तद्द्वयं चाढक भवेत् ।
शिवमाढकयुग्मं तु द्रोण तद्द्विगुणं भवेत् ॥ १२९ ॥

द्रोणद्वयं तु खारी स्यात् तत्त्रय भारमुच्यते ।
शालितण्डुलमुद्गादि दधिक्षीरादिकान्यपि ॥ १३० ॥

प्रोक्तेनानेन मीयन्ते हविष्पाकादिकर्मसु ।
चत्वारो व्रीहय कुंजः तेऽष्टौ माञ्जिष्ठमुच्यते ॥ १३१ ॥

तच्छत षष्टिरधिकं निष्क निष्काष्टकं पलम् ।
चन्दनादीनि गन्धानि गुळखण्डयुतानि च ॥ १३२ ॥

कदलीपनसाम्राणि कूष्माण्डप्रमुखानि च ।
तुलया तुलितानि स्युः यथोक्तपलमानत ॥ १३३ ॥

ज्ञात्वैवं नियतं मानं हविषा साधनाय च ।
शालिमुद्गयवा माषा गोधूमाश्च प्रियङ्गवः ॥ १३४ ॥

तिलाः सप्त इमे ग्राम्या वै चरुकर्मणि ।
वेणुश्यामाकनीवारा जर्त्तिलाश्च गवीधुका ॥ १३५ ॥

मर्कटा कनका सप्त विज्ञेयास्तु वनोद्भवा ।
शालयस्तेषु मुख्या स्युस्तदन्यास्तदभावतः ॥ १३६ ॥

रक्तशाल्यो महाशाल्य कळमा गन्धशालय ।
श्वेतशाल्य सशूकाश्च हेमाभा गर्भशालय ॥ १३७ ॥
सुकुमाराश्च सूक्ष्माश्च दशैता शालय स्मृता ।
अन्तर्भेदाश्च बहव सप्तमुद्गा उदाहृता ॥ १३८ ॥

मुद्गा. कृष्णाश्च हेमाश्च श्वेता पीता महत्तरा.।
अञ्जनाभाश्च सप्तैते अन्तर्भेदा उदाहृता. ॥ १३९ ॥

श्वेताः कृष्णाश्च पीताश्च वन्याश्चैव महातिला ।
तिलाना पञ्चभेदास्तु ग्राह्या. स्यु परिकीर्तिता. ॥

उपाहृतानि केदाराद् दैवीयाच्च कृषीवलैः ।
शालिमुद्गादिभेदानि कर्मण्यान्यर्चने विभो. ॥ १४१ ॥

अवपन्नादिभिर्दोषैरष्टभिर्वर्जितानि च ।
आनयेदवघातार्थं अवघातगृहे पुरा ॥ १४२ ॥

गोमयेन समालिप्ते सुधाद्यै. परिमण्डिते ।
शोधिते शतधारेण पवित्रेण कुशाम्बुभि. ॥ १४३ ॥

स्थले प्रणवमुच्चार्य प्राङ्मुखैर्वाऽप्युदङ्मुखैः ।
दीक्षितैर्नियतैर्विप्रैर्वृतचक्रादिलक्षणैः ॥ १४४ ॥

सुस्नातैर्लोहदार्वश्ममृण्मयानि समन्तत. ।
स्थापयित्वोलूखलानि क्षालितैः खादिरैर्दृढैः ॥ १४५ ॥

मुसलैरवहन्युस्ते द्वादशाक्षरविद्यया ।
निस्तुषानिष्कणान् कृत्वा तण्डुलान् शूर्पकोटरैः ॥

तैस्तावदवहन्तव्या यावन्मुक्ताफलप्रभाः ।
अखण्डिताश्चानणव. कृष्णबिन्दुविवर्जिता. ॥ १४७ ॥

मुद्गभेदास्तथा कार्या सारवन्तश्च निस्तुषा ।
साध्वीभिर्ब्राह्मणीभिर्वा दीक्षितानामभावत. ॥ १४८ ॥

शूद्रैर्वा दीक्षितैर्देवदासीभिर्देवसद्मनि ।
हविःपाकादिकर्मार्थं कार्याऽवहननक्रिया ॥ १४९ ॥

वैष्णवाना गृहे शुद्धे दीक्षिताना गृहेऽपि वा ।
तण्डुलास्तु प्रगृह्णीयाद्विधिश्चुण्णास्तु देशिक ॥ १५० ॥

अकणानतुषानेव क्रिमिहीनानपि क्रमात् ।
केशपाषाणहीनास्तु प्राण्यङ्गरहितास्तथा ॥ १५१ ॥

भस्माङ्गारविहीनास्तु अभग्नानलघूनपि ।
कणैस्तु भवति व्याधिस्तुषैर्दारिद्र्यकं भवेत् ॥

कृमिभि. पुत्रनाश स्यात् केशैर्दारविनाशनम् ।
पाषाणैर्मरणं विद्धि अशन्या वह्निना जलैः ॥

प्राण्यङ्गैर्व्याधय प्रोक्ता भग्नना कलहो ध्रुव. ।
अङ्गारैर्वह्निना वायो भग्ने भङ्गस्तु विग्रहे ॥ १५४ ॥

प्रवासो लघुभिश्चैव तस्मात्तान् परिवर्जयेत् ।
संभारानखिलानेव प्राक्संकल्पितसंमतान् ॥ १५५ ॥

संभृत्य देशिकास्मार्थं साधकैः पाचकैरपि ।
अवघातगृह प्राप्य तत्रस्थं तण्डुलादिकम् ॥ १५६ ॥

ब्रह्मशुक्रमिवेत्युक्त्वा नेत्रेणैवावलोकयेत् ।
प्राग्वत् सशोधयेत्तानि दहनाद्यायनादिभि. ॥ १५७ ॥

पैद(त्त)लादिषु शुद्धेषु पात्रेषु वितनेष्वपि ।
पचनार्थं समुद्धृत्य तत् सर्वं तण्डुलादिकम् ॥ १५८ ॥

तत्तत्पात्रसमुद्धारे निपुणै. परिचारकै ।
सुस्नातैश्च सुवेषैश्च वस्त्रेणाच्छादितानने. ॥ १५९ ॥

आनयेत् पचनागारं शङ्खतूर्यादिमङ्गलै. ।
द्वारस्योत्तरपार्श्वे तु गोमयेनोपलेपिते ॥ १६० ॥

प्रदेशे निक्षिपेत्तानि भाजनानि यथाक्रमम् ।
गुळोपदंशपूर्वाणि लवणादिरसानि च ॥ १६१ ॥

विन्यसेद्वायुदिग्भागे दधिक्षीरघृतानि च ।
निदध्यान्नैर्ऋते भागे होमोपकरणान्यपि ॥ १६२ ॥

चतुर्भिर्व्यापकैर्मन्त्रै. पञ्चपूतेन वारिणा ।
क्षालयित्वा चतुर्धा च यथा स्यात्तण्डुलादिषु ॥ १६३ ॥

शिलाशकलनिर्मुक्त निस्तुषं निष्कणं यथा ।
अपक्वव्रीह्यवहततण्डुलेनैव साधितम् ॥ १६४ ॥

गव्यदुग्धाज्यसंपृक्तं गुळखण्डपलान्वितम् ।
अक्षारलवणोपेत देवाना हविरुच्यते ॥ १६५ ॥

तदेव परमान्नं स्यात् क्षीराज्यगुडपाचितम् ।
घृतसिक्त तु शुद्धान्नमभावे हविरुच्यते ॥ १६६ ॥

अक्षारलवणं सिद्ध गुळक्षीरफलान्वितम् ।
शान्तिके व्रतयज्ञे च संसाध्यं हविरुत्तमम् ॥ १६७ ॥

पायसान्न, गुळान्नं च मुद्गान्न, केवलोदनम् ।
दध्यन्न, च तिलान्नं च, नेशान्नं, सर्वमिश्रितम् ॥

इत्यष्टधा समुद्दिष्टं हविर्देवस्य समतम् ।
सर्वमाज्येन सम्मिश्र्य सोपदंशं निवेदयेत् ॥ १६९ ॥

तेषां समाधनार्थं तु लोहजा वाऽथ मृण्मया. ।
स्थालय. सशरावाश्च कल्पनीया. पुरैव तु ॥ १७० ॥

देशिकेन्द्रकराङ्गुष्ठजठरोत्थाङ्गलेन तु ।
षोडशाङ्गुलकोन्माना स्थाल्य स्यु पाककर्मणि ॥

उच्छ्रायादुदरं तत्र द्वादशाङ्गलसंमितम् ।
जठरे, मूलविस्तार. कलया तुलितो भवेत् ॥ १७२ ॥

अङ्गुलान्तरित कार्यं कण्ठे सूत्रचतुष्टयम् ।
एव लक्षणयुक्ताया विस्तारोच्छ्रायमानयो ॥ १७३ ॥

अर्धाधिकं वा द्विगुणं मध्यमोत्तमवाञ्छया ।
एवमाकृतिरुद्दिष्टा स्थालीना पाककर्मणि ॥ १७४ ॥

शरावाणामथान्येषा लक्षणं शृणु सत्तम ! ।
अष्टाङ्गुलायत सूत्र भूमौ प्राग्य परिभ्रमेत् ॥ १७४ ॥

नव्यतो जठर तस्य षोडशाङ्गलविस्तृतम् ।
अष्टाङ्गुलान्तमुच्छ्रायमर्धचन्द्रसमाकृति ॥ १७६ ॥

कण्ठोच्च त्र्यङ्गल चोर्ध्व वलय द्व्यङ्गल भवेत् ।
दशाङ्गुल चास्यतार वलयेन समन्वितम् ॥ १७७ ॥

कण्ठोच्चादुदरोच्चान्तं ऋजुमूत्रद्वयेन तु ।
गुळसिद्ध च कुर्वीत प्राग्वत् सूत्रचतुष्टयम् ॥ १७८ ॥

हवि सङ्ख्यानुगुण्येन वल्य. स्थाल्यस्तथेतरा ।
तथोपदंशपात्राणा सर्वेषामास्यविस्तृते. ॥ १७९ ॥

अधिकान्यपिधानानि तत्तद्द्रव्यमयानि च ।
सुवृत्तानि पिधेयानि पादचन्द्राकृतीनि च ॥ १८० ॥

तथा पाकोपयोग्यानि पात्राण्यन्यानि सत्तम ! ।
प्राग्वन्मध्याद्यपेक्षाया समभ्यूह्य प्रकल्पयेत् ॥ १८१ ॥

घृततप्तोपदंशार्थमम्बरीषमयायसम् ।
जलद्रोण्य. कटाहाश्च बहव. क्षीरपाचने ॥ १८२ ॥

घृतपाके तथापूपसाधने पात्रसञ्चयम् ।
अन्यानि च समुत्पाद्य द्रव्यादीनि विधानत ॥ १८३ ॥

प्रारभेत हवि पाक वक्ष्यमाणेन वर्त्मना ।
आहृत्योदनपाकाग्नि कुण्डादौपासनानलात् ॥ १८४ ॥

चुल्या निधाय "तारेण" "सप्तते"न्न इतीरयन् ।
इन्धनानि विनिक्षिप्य यज्ञदारुमयानि च ॥ १८५ ॥

क्रिमिकीटादिहीनानि "ज्योतिरात्री"तिमन्त्रत. ।
प्रज्वाल्य व्यजनेनैव तत स्थालीश्च ताम्रजाः ॥१८६॥

प्रक्षाल्य तिन्त्रिणीतोयै केवलैर्मृण्मयास्तत ।
प्रक्षाल्य द्वादशाणेन वीर्यमन्त्रेण मन्त्रवित् ॥ १८७ ॥

घृतेनालेपयेत्तासामन्तर व्यूहविद्यया ।
तण्डुलान् प्रक्षिपेत्तासु गायत्र्या विष्णुपूर्वया ॥ १८८ ॥

अमस्यपार इति च मन्त्रेण स हृदा पुन. ।
जलेनापूरयेदूर्ध्वं तण्डुलान् प्रतिपात्रगान् ॥ १८९ ॥

तण्डुलाढकमानस्य षट्प्रस्थमुदक भवेत् ।
कर्मारंभेण ता स्थालीश्चुल्यामारोपयेत्तत. ॥ १९० ॥

चक्रमन्त्रेणापिधानीस्ता संछाद्य यथाक्रमम् ।
पाककाले समुद्धाट्य वीर्यमन्त्रेण तद्वनिम् ॥ १९१ ॥

निरीक्ष्य नेत्रमन्त्रेण दर्व्या 'मूलं' समुद्धरन् ।
चतुर्धा वर्तयेच्चैव चक्रेणाच्छादयेत् पुन. ॥ १९२ ॥

पक्वे जलमविस्राव्य द्वादशार्णं समुच्चरन् ।
विद्रावितेन गव्येन हविषा चाभिघार्य च ॥ १९३ ॥

शुचीन् सत्क्रियतेत्यादि मन्त्रेणाधारपृष्ठत. ।
शोधिते भूतले वाथ व्रीहिभिर्वा प्रसारिते ॥ १९४ ॥

एव हवींषि सिद्धानि पाणिभ्यामवरोप्य च ।
अस्त्राभिमन्त्रितेनैव पर्हि प्रक्षाल्य वारिणा ॥ १९५ ॥

तन्मन्त्रितेन शुद्धेन वस्त्रेणोद्वर्तयेत्तत. ।
भस्मना मथितेनाद्भिर्वासुदेवादिवाचकै ॥ १९६ ॥

तर्जन्याद्यङ्गुलीभिश्च कुर्याद्दिक्ष्वूर्ध्वपुण्ड्रकम् ।
समाच्छाद्य पिधानैश्च वसनै क्षालितैस्ततः ॥ १९७ ॥

इत्युक्त साधनं सम्यक् शुद्धान्नस्य विशेषत ।
अन्येषा साधनं वक्ष्ये परमान्नपुरस्सरम् ॥ १९८ ॥

तण्डुलस्य तु तुर्यांशं पायसे मुद्गसारकम्।
तन्मानं घृतमुद्दिष्टं प्रागेव कथितं पयः॥ १९९॥

चतुर्गुणं तण्डुलाच्च खण्डचूर्णसमन्वितम्।
साधयेदुक्तमार्गेण समन्त्रं केवलोदने॥ २००॥

"हंसः शुचिष" दित्यत्र गोक्षीरस्य नियोजनम्।
तदभावे नियोक्तव्यं नालिकेरोद्भवं पयः॥ २०१॥

"अज्जागोजे"ति तत्क्षेपः स्याद्द्रव्यप्रतियोजने।
गुडान्नपाचने क्षीरमपहायैक्षवं रसम्॥ २०२॥

कथितं गुडखण्डं वा क्षीरमानानुसारतः।
क्षीरप्रक्षेपमन्त्रेण गुडादीनि नियोजयेत्॥ २०३॥

मुद्गान्ने तण्डुलं सम्यक् मुद्गसारं नियोजयेत्।
शुद्धान्ने तु पुरा प्रोक्तं विशेषेण घृताप्लुतम्॥ २०४॥

दध्योदने दधिक्षेपः क्षीरार्धपरिसंमितः।
कदलीपनसाम्रादिगुडखण्डसमन्वितम्॥ २०५॥

खण्डचूर्णसमोपेतं कृसरान्ने तु मुद्गकम्।
आढकस्य हरिद्रान्ने निशापिष्टं पलं भवेत्॥ २०६॥

मुद्गसारसमोपेतं गुडखण्डादिसंयुतम्।
मिश्रान्ने योजयेत् किंचित् क्षीराज्यघृतसप्लुतम्॥

शान्त्यर्थं पयसा मिश्रं पुष्ट्यर्थं गुडमिश्रितम्।
वश्यार्थं मुद्गसारोत्थमाकृष्टौ दधिमिश्रितम्॥ २०८॥

कृसरान्नं तु पित्र्यर्थं मारणोच्चाटनेऽपि च।
स्तंभने च हरिद्रान्नं मिश्रान्नं मोहने भवेत्॥ २०९॥

साधारणं तु शुद्धान्नं यात्रासु मृगयादिके।
विशेषेण तु दध्यन्नं हैमराजतपात्रगम्॥ २१०॥

मरीचिशुण्ठीलिकुचतिन्त्रिणीरसमिश्रितम्।
चूर्णेन जीरकोत्थेन संस्कुर्याद्रसवस्तुभिः॥ २११॥

रसभेदसमुत्थानि पनसद्वितयोद्भवम्।
चूतभेदसमुत्थानि नातिपक्वानि कालतः॥ २१२॥

बृहत्युर्वारुवार्ताककूष्माण्डप्रभवानि च।
कारवल्लीलतोत्थानि कार्कोटप्रभवानि च॥ २१३॥

पटोलद्वितयोत्थानि कोशातक्युद्भवे तथा।
अलाबुककर्करीनिम्बभेदोत्थं तिन्त्रिणीफलम्॥ २१४॥

क्षुद्रकन्दसमेतं च वल्लीकन्दद्वयं तथा।
सूरणद्वयकन्दं च तथा पिण्डारकद्वयम्॥ २१५॥

पद्मोत्पलसमुत्थं च हविर्योग्यं विशेषतः।
उच्छिष्टं कृमिदष्टं च शिवाद्यैर्दशितं तथा॥ २१६॥

व्रात लालाजलस्पृष्टममेध्यस्थलसंभवम्।
पादस्पृष्टमकालोत्थमाहृतं चाशुचिस्थले॥ २१७॥

भुक्तशेषं तथाऽस्पृश्यस्पृष्टं दत्तावशेषकम्।
परीक्ष्य बहुधा मन्त्री वर्जयेत् पाककर्मणि॥ २१८॥

जीवन्ती वास्तुकं शाकं कारवल्लीदलं तथा।
तुम्बीदलं च पिण्डी च चमू (पुच्छ) मुद्गदलानि च॥

शाकिनी शतपर्वाणं तथैव श्वासमर्दितम्।
आगस्त्यं पाचयेच्छाकं विहितं ब्राह्मणस्य च॥ २२०॥

एकमूलानि चान्यानि गृह्णीयादनिषेधने।
छेदयित्वा लवित्रेण वीर्यमन्त्रं समुच्चरन्॥ २२१॥

निरीक्ष्य कृमिकीटादीन् शाकांश्च बहुधा तथा।
प्रक्षाल्य तेषु पात्रेषु निधाय बहुधा जलैः॥ २२२॥

प्राग्वत् स्थालीषु निक्षिप्य प्रत्येकं वाऽथ मिश्रितम्।
सैन्धवैः समरीचैश्च सर्षपैर्जीरकैरपि॥ २२३॥

श्रीपर्णीदलसंमिश्रैः पयोभिर्नालिकेरजैः।
तत्फलैरपि संघृष्टैर्मृदुभिर्घृतमिश्रितैः॥ २२४॥

मसूरमाषनिम्बादिमुद्गभेदसमन्वितम्।
सयूषान् मुद्गभेदादीनयूषान् लवणादिभिः॥ २२५॥

रसभेदैः समेताश्च साधयेत्तदनन्तरम्।
त्वचो व्यपोह्य मुद्गोत्थैः सारैः क्षीरेण पाचितैः॥

मरीचजीरलवणैर्घृतयुक्तैश्च मर्दितैः।
दर्व्यादिभिश्च संस्कुर्यात् गुल्माषं सरसं यथा॥२२७॥

स्थालीशरावपूर्णेषु पाचितानि पुरैव तु।
कदलीपनसादीनि नालिकेरफलानि च॥ २२८॥

कूश्माण्डबृहतीपूगकारवल्लीफलानि च ।
क्षुद्रकन्दसमेतानि वल्लीपिण्डारकानि च ॥ २२९ ॥

अम्बरीषादिपात्रेषु विततेषु समन्तत. ।
घृतलिप्तेषु तप्तेषु समारोप्य प्रसार्य च ॥ २३० ॥

चूर्णीभूतैर्मरीचैश्च जीरकेन घृतेन च ।
प्रतापितानि स्निग्धानि दर्व्यालोड्य पुन. पुन. ॥

स्थापनीयानि भाण्डेषु छादितान्यम्बरादिभि. ।
आम्रादीनि च शुष्काणि अशुष्काणि फलानि च ॥

तिन्त्रिणीगुडमिश्राणि मरीचैर्जीरकैरपि ।
नालिकेरोत्थपयसा सर्पिषा पेषितैरपि ॥ २३३ ॥

स्थापयेदाम्रसारोत्थ लवणेन समन्वितम् ।
शृङ्गिबेर तथार्द्र च दलितं रहित च वा ॥ २३४ ॥

वासितं लवणोपेतं लिकुचोत्थरसेन तु ।
कदलीपनसाम्राणा केवलानि फलानि च ॥ २३५ ॥

गोधूमशालिजै पिष्टैर्गुडपाकेन लोलितै ।
पाचितैर्मुद्गसारैश्च शकलैर्नालिकेरजै. ॥ २३६ ॥

जीरकैः समरीचैश्च घृतेऽपूपानि पाचयेत् ।
सुवृत्तान्याम्रतुल्यानि धात्रीफलसमानि च ॥ २३७ ॥

न्यग्रोधफलतुल्यानि लिकुचाद्याकृतीनि च ।
अन्तर्निक्षिप्तमुद्गानि रसवन्ति समन्तत ॥ २३८ ॥

गुडपिष्टेन बद्धानि नालिकेराकृतीनि च ।
नानाभेदसमुत्थानि घृतेऽपूपानि साधयेत् ॥ २३९ ॥

शालिव्रीहिसमुत्थाश्च शालिषु स्फुटितानि च ।
लघूनि वह्नितप्तानि गुडपाकान्वितानि च ॥ २४० ॥

चूर्णितैश्च मरीचैश्च जीरकै. खण्डितैरपि ।
नालिकेरफलैः शुष्कै. पृथुकानि च साधयेत् ॥२४१॥

भर्जितै. शालिपिष्टैश्च मिश्रितैर्जीरकादिना ।
लोलितैर्गुडपाकेन पिण्डीभूतै. पृथक् पृथक् ॥ २४२ ॥

सक्तु स्यात् साधितं तद्वत्तिलै पिण्ड. सुभर्जितै. ।
तिलपिण्ड इति ख्यात. सदा देवस्य समत. ॥ २४३ ॥

सुश्रुत च घनीभूतं खण्डचूर्णसमन्वितम् ।
क्षीर च मधुसर्पिर्भ्या सपृक्त सुघनं दधि ॥ २४४ ॥

तरुणै. शकलीभूतैरुर्वारुसहकारयो. ।
रूक्षसर्पपसमिश्रं समरीचं तथा दधि ॥ २४५ ॥

पृथक्पात्रगत शुद्ध गालितं माक्षिकं मधु ।
द्राक्षापनसरम्भाम्रसमुत्थैर्मर्दितै रसैः ॥ २४६ ॥

लोलित गुडखण्डेन जीरकादिसमन्वितम् ।
रसालमेतद्विज्ञेयं दधिमिश्रं तु पानकम् ॥ २४७ ॥

केवल दधिसमिश्रं वारिणा तत्समेन तु ।
मथितं समरीचं च लवणैश्चाधिवासितम् ॥ २४८ ॥

खण्डचूर्णसमोपेत पानकं श्रमशान्तिकृत् ।
अज्ञानामपि संस्कारे पुरा मन्त्राः प्रकीर्तिता. ॥

तदन्येषा तु संस्कारो द्वादशार्णेन वा हृदा ।
साङ्गेन मूलमन्त्रेण सर्व संसाधयीत वा ॥ २५० ॥

विष्णुगायत्रिया वाऽथ पञ्चोपनिषदाथवा ।
संसाध्य परमान्नाद्यमुपदंशान्वितं क्रमात् ॥ २५१ ॥

फलकादिषु संस्थाप्य चोर्ध्वपुण्ड्राद्यलंकृतम् ।
महानसद्वारभूमेरालयद्वारपश्चिमम् ॥ २५२ ॥

गोमयेनानुलिप्तेन सुधाचूर्णेन शोभिना ।
पथास्त्रमन्त्रसंजप्तवारिधारापुरस्सरम् ॥ २५३ ॥

शङ्खतूर्यादिघोषेण तथा मङ्गलगीतिभि. ।
प्रदीपच्छत्रयुक्तैश्च हवि पालनतत्परैः ॥ २५४ ॥

वेत्रपाणिभिरन्यैश्च नास्तिकोत्सारणोद्यतै. ।
स्नाता. शुक्लाम्बरा दक्षा. कृतपादावनेजना ॥ २५५ ॥

स्वाचान्ता. कुशहस्ताश्च मृदा वा चन्दनादिना ।
धृतोर्ध्वपुण्ड्रा नियता. मनोवाक्कायकर्मभि. ॥ २५६ ॥

सितकञ्चुकधर्तार स्थगिताननना सिका. ।
बलमन्त्रेण भाण्डानि वहेयु परिचारकाः ॥ २५७ ॥

मूलालयाग्रदेशस्थमण्टपे विततेऽथवा ।
प्रथमावरणे धाम्नो दक्षिणे मालिकावनौ ॥ २५८ ॥

सुगुप्ते सुवितानाढ्ये दीपमालाद्यलंकृते ।
प्रदेशे वस्त्रसञ्छन्ने स्थापयानि फलकादिके ॥ २५९ ॥

हविः प्रमाणतुल्याश्च हेमराजतकाम्रजा. ।
स्थालिकाश्च यथालिप्ता. प्रक्षाल्यास्त्रेण वारिणा ॥

पाणिना दक्षिणेनैव परामृश्य च तेन च ।
तारेण तासु निक्षेप्या धाराऽज्यस्य समन्तत ॥२६१॥

स्थालीभ्य समुपाहृत्य दर्व्या हेमादिकल्पतया ।
तदूर्ध्वे निक्षिपेन्मौनी पायसादीन्यनुक्रमात् ॥ २६२ ॥

घृतेनाप्लाव्य मधुरव्यञ्जनानि समन्तत. ।
दधिक्षीरादिपूर्णानि चषकाण्यूर्ध्वतो न्यसेत् ॥ २६३ ॥

सिद्धान्यपूपभेदानि पृथुकादीनि यान्यपि ।
पानकानि विचित्राणि पृथक्पात्रगतानि च ॥ २६४ ॥

कर्पूरचन्दनक्षोदप्रसूनैश्चाधिवासितम् ।
शीतलं वस्त्रसञ्छन्नं पानीय करकादिषु ॥ २६५ ॥

एलालवङ्गतक्कोलजातीपूगफलान्वितम् ।
कर्पूरतैलसमिश्रं खण्डितं च क्षुरादिभि ॥ २६६ ॥

नागवल्लीदलोपेतं सचूर्णं चेन्दुसयुतम् ।
ताम्बूल च प्रतिष्ठाप्य पात्रेष्वब्जाकृतीषु च ॥ २६७ ॥

चन्दनादीनि गन्धानि तथा नानाविधा स्रज. ।
स्थापयित्वा यथास्थानमाराधकमुखेन तु ॥ २६८ ॥

विज्ञापयेयुर्देवस्य तत्तत्कर्माधिकारिण. ।
भोज्यासनाधिरूढस्य देवस्याराधक स्वयम् ॥ २६९ ॥

अर्घ्याद्यैः प्राग्वदभ्यर्च्य साध्यबीजावसानिकैः ।
द्वारस्याभ्यन्तरगते देवस्य पुरत. स्थले ॥ २७० ॥

शोधिते चार्घ्यतोयेन चन्दनाद्यैश्च मण्डिते ।
मण्डले तु परिस्तीर्य तण्डुलानि यथारुचि ॥ २७१ ॥

क्षालितं वस्त्रतुण्डं तु तदूर्ध्वे संप्रसार्य च ।
अन्नाधारं प्रतिष्ठाप्य तदूर्ध्वे लोहनिर्मितम् ॥ २७२ ॥

ऊर्ध्वतो वसनावद्ध तदूर्ध्वे स्रोतसंप्लुते ।
न्त्यसेवि परमान्नादि पात्राण्येकैकश क्रमात् ॥२७३॥

तर्पण तु प्रतिष्ठाप्य हस्तप्रक्षालनाम्भसा ।
कुर्याद्दक्षकरे दैवे प्रागुपस्तरणार्हणम् ॥ २७४ ॥

ततो देवादिमूर्तीना हवींषि विनिवेदयेत् ।
प्रथम पायस, पश्चात् गुडान्नं मुद्गभेदितम् ॥ २७५ ॥

शुद्धान्नं तिलसंमिश्रं निशान्न, दधिमिश्रितम् ।
मिश्रान्नं च क्रमाद्दद्यादपूपानि तदन्तिमे ॥ २७६ ॥

पृथुकानि च सक्तूनि तिलपिण्डान्वितानि च ।
कदलीपनसादीनि फलानि विविधानि च ॥ २७७ ॥

रसभेदसमेतानि पानकानि च तर्पणम् ।
नालिकेररसं चैव हस्तप्रक्षालनं तत ॥ २७८ ॥

उपस्पर्श च ताम्बूलं दत्वा प्रागुक्तमाचरेत् ।
राजभिर्हविषो नित्य प्राचुर्ये कल्पिते सति ॥ २७९ ॥

आधारेषु प्रतिष्ठाप्य वितते गर्भमन्दिरे ।
निवेद्यानि यथायोगमन्यथा सकटे भुवि ॥ २८० ॥

तदेकस्मिन् दृढाधारे वस्त्रच्छन्ने यथाक्रमम् ।
निधाय विनिवेद्याय तथातमपनीय च ॥ २८१ ॥

प्रोक्षिते चास्त्रमन्त्रेण निक्षेप्यं हविरन्तरम् ।
निवेदयेद्यथापूर्व विशेषोऽत्र समीरित. ॥ २८२ ॥

मन्त्रक्रियाविहीनं च गन्धदुष्ट विवर्णकम् ।
अतिपक्वमपक्वं च विस्रावितजलं तथा ॥ २८३ ॥

अदीक्षितैश्च पतितैरीक्षितं प्रतिलोमजै ।
अत्युष्णमतिशीत च प्रमाणरहितं तथा ॥ २८४ ॥

समुद्धृत च नि.शेषं मुखवातादिदूषितम् ।
व्यञ्जनादिविहीनं चाप्यपात्रस्थमगोपितम् ॥ २८५ ॥

अन्तस्तण्डुलसंयुक्त भिन्नभाण्डगतं तथा ।
अनाधारं परस्पृष्टं अर्कतापहतं तथा ॥ २८६ ॥

अङ्गारतुषसंयुक्त केशपाषाणसंयुतम् ।
कृमिलोष्टादिभिर्जुष्टं प्राण्यङ्गादिसमन्वितम् ॥ २८७ ॥

अपूर्णपाकमाधाररहितव्यञ्जनोज्झितम् ।
गव्याज्यदधिनिर्मुक्त काङ्क्षितं चेतरैर्जनै. ॥ २८८ ॥

अपिधानविनिर्मुक्तं देवतान्तरसंमतम् ।
एव दुष्टं हविर्बुध्वा प्रक्षिपेज्जलमध्यत ॥ २८९ ॥

मोहात् त्यक्त हविर्विष्णो. यदि दद्यात्तदर्चनम् ।
निरर्थकं स्यात् कर्तृणा विनाशश्च भवेद् ध्रुवम् ॥२९०॥

तस्मात्तदैव मूलस्य सहस्र जपमाचरेत् ।
ततस्तत्राश्रयाणा च स्थापिताना विधानत ॥ २९१ ॥

विभवव्यूहमूर्तीना मण्टपे गोपुरादिषु ।
स्थापिताना च मूर्तीना प्रादुर्भावात्मनामपि ॥ २९२ ॥

पूजिताना यथान्यायं सत्यादीना खगात्मनाम् ।
कुमुदादिगणेशाना द्वास्थानामपि सद्मनि ॥ २९३ ॥

प्रतिष्ठिताना भक्ताना प्रागुक्ताना विधानत ।
तत्तन्मन्त्रेण विधिवत्सिद्धानि च पृथक् पृथक् ॥

हवीपि पायसादीनि क्रमेण विनिवेदयेत् ।
गारुडेनैव मन्त्रेण बल्यर्थं साधयेद्धवि ॥ २९५ ॥

अन्येषा प्रणवेनैव सिद्धमन्न निवेदयेत् ।
अग्निकार्य हविस्साध्य यथा मूलालयाकृते. ॥ २९६ ॥

सर्वाण्यपूपभेदानि नाग्निकार्ये हितानि वै ।
अन्यानि पायसादीनि नित्यनैमित्तिकादिषु ॥ २९७ ॥

होतव्यानि विशेषेण फलानि विविधानि च ।
भूताना बलिदानेषु पायसादीनि नित्यश. ॥ २९८॥

अपूपानि च सक्तूनि पृथुकानि फलानि च ।
तिलपिण्डसमेतानि मिश्रितान्यथवा पृथक् ॥ २९९ ॥

दातव्यानि यथान्यायं तेषा तृप्तिकरं यतः ।
तेन क्रादिभिर्ब्रह्मन् ! उत्सवादिषु कर्मसु ॥ ३०० ॥

तत्र तत्रोक्तविधिना बलिद्रव्याण्युपाहरेत् ।
अभावे सर्ववस्तूना सोदक केवलोदनम् ॥ ३०१ ॥

तण्डुलं वोदकेनैव दातव्य मन्त्रवित्तमै ।
इति सम्यक् समाख्यातं हविषा साधनादिकम् ॥

निवेदनप्रकारश्च नित्ये मूलादिमूर्तिषु ।
तथाश्रयेषु प्रासादे वाह्यतो वाऽङ्कणादिके ॥ ३०३ ॥

प्रासादेषु च कल्पेषु स्थापितेष्वाश्रयादिषु ।
प्राकारगोपुरद्वारमण्टपेषु समन्तत ॥ ३०४ ॥

विभवव्यूहविम्बेषु तथाङ्गालयमूर्तिषु ।
प्रासादाभ्यन्तरस्थाना देवतानां यथार्चने ॥ ३०५ ॥

निवेदनार्थं नादद्यात् द्वारबाह्ये प्रतिष्ठितम् ।
निषिद्धान्न निवेद्यं तद् दूषितं राक्षसादिभि. ॥ ३०६ ॥

देवेन प्रागनुज्ञातं रक्षसा दितिजन्मनाम् ।
अन्येषा भरणीयाना भूताना पिशिताशिनाम् ॥३०७।

तस्यात्तत्स्था अनादेया बलवीर्यादिशक्तय. ।
विभूत्या वाऽविभूत्या वा हविष. प्राप्तये पृथक् ॥

पृथक्पात्रगत सिद्धं द्वारस्यान्ते निवेशितम् ।
निवेदनीयं क्रमश परमान्नपुरस्सरम् ॥ ३०९ ॥

काम्ये नैमित्तिकेप्येवं महतो हविषोर्चने ।
प्रासादाभ्यन्तरस्थस्य सकर्मार्चादिकस्य च ॥ ३१० ॥

आढ्यैर्द्विजातिभूपाद्यै यथाविभवमादरात् ।
निवेदनीय यत्रैक पात्रस्थं मूलकौतुके ॥ ३११ ॥

अन्नपूरं प्रतिष्ठाप्य प्रासादाग्रस्थमण्टपे ।
मूलमूर्ति समभ्यर्च्य कर्मार्चाभिः सशक्तिभि ॥

स्नापयेत् कर्मविम्बस्थं कलशै. प्रागुदीरिते. ।
मूले प्राग्वत् पृथक्पात्रे निवेद्य च हविस्तत. ॥ ३१३ ॥

कर्मविम्बगतं देवमानीयाग्रस्थमण्टपे ।
तस्मिन्निवेदयेन्मन्त्री मूलमूर्त्यवलोकितम् ॥ ३१४ ॥

महद्धविश्च तत्रस्थं परमान्नादिसत्कृतम् ।
मखकौतुकपूर्वासु क्रमेणाभ्यर्चितासु च ॥ ३१५ ॥

निवेद्य च यथायोग पात्रस्थानि पृथक् पृथक ।
वत्सरोत्सवपूर्वेषु नानावैशेषिकेष्वपि ॥ ३१६ ॥

यात्रामूर्ति समानीय वाह्यतो यत्र कुत्रचित् ।
विस्तरेणार्चयित्वा तु महदन्नं निवेदयेत् ॥ ३१७ ॥

तदर्थं विधिवत् कुर्यात् स्नपनं स्नानकौतुके ।
मृगयाद्युत्सवे प्राप्ते बहिरुद्यानभूमिषु । ३१८ ॥

महोदनसपर्याथमालयाभ्यन्तरस्थिते।
स्नापयेद्विधिवन्मन्त्री तद्बिम्बं स्नानमण्टपे ॥ ३१९ ॥

द्वादश्यादिषु कालेषु तथा च अवणादिषु।
वत्सरोत्सवनिष्टेषु नानावैशेषिकेष्वपि ॥ ३२० ॥

साधंन हविषामेतत् साधारणमुदाहृतम्।
अथोत्सवार्चामानीत्र कुत्रचिन्मण्टपादिके ॥ ३२१ ॥

यथाविधि समाराध्य वहुधा पायसादिना।
यथालब्धेन चान्नेन प्रीणेयेद्भक्तिपूर्वकम् ॥ ३२२ ॥

विशेषमथ वक्ष्यामि महतो हविषोर्चने।
नित्ये महाहविर्यागो न च कार्यो हितैषिभिः ॥३२३॥

वितते गर्भगेहे वा प्रासादाग्रस्थमण्टपे।
बाह्यतः स्नपनार्थं यागार्थं वा प्रकल्पिते ॥ ३२४ ॥

प्रागुक्तेन प्रमाणेन त्वेकपात्रे समर्पितम्।
यत्तन्महाहवि प्रोक्तं हरेः प्रीतिकरं सदा ॥ ३२५ ॥

प्रासादाभ्यन्तरे कल्प्यमुपपात्रोज्झितं हविः।
तदन्यत्र विशेषेण विस्तृतं परिकल्पयेत् ॥ ३२६ ॥

मूलमूर्तिं पुराऽभ्यर्च्य तदर्थं मन्त्रवित्तमः।
अभ्यर्च्यार्घ्यादिभिर्मन्त्रैः प्राग्वद्धूपान्तिमैस्ततः ॥

तस्मात् स्नपनबिम्बस्य हृदयाम्भोरुहोदरे।
चिच्छक्तिमवतीर्याथ तथाचोत्सवकौतुके ॥ ३२८ ॥

समभ्यर्च्य यथा पूर्वमानीय स्नानमण्टपे।
स्नानकौतुकमासाद्य कलशैरभिषिच्य च ॥ ३२९ ॥

निवेद्य च हविः पश्चादानयेद्गर्भमन्दिरम्।
तस्मिन् विन्यस्य तन्मन्त्रं मूलमूर्तौ नियोजयेत् ॥

यानादौ तु समारोप्य उत्सवार्चामलङ्कृताम्।
यागार्थमण्टपे वाथ नयेदास्थानमण्टपे ॥ ३३१ ॥

हेमादिनिर्मिते तत्र विततेभद्रविष्टरे।
समारोप्य च देवेशं महद्भिर्भोगसञ्चयैः ॥ ३३२ ॥

प्रदक्षिणप्रणामान्तैर्मूलमन्त्रेण देशिकः।
समाराध्यार्घ्यपुष्पाद्यैस्तोयदानपुरस्सरम् ॥ ३३३ ॥

दद्यात्तदादिनो भोगान् मात्रान्ताश्च निवेदितान्।
निवेदनार्थं हविषा मण्टप विस्तृत कृतम् ॥ ३३४ ॥

वितानध्वजपूर्वैश्च यथा यवनिकापटैः।
अलंकृत मध्यभूमौ हविष्पूरप्रमाणतः ॥ ३३५ ॥

कुर्यात्तालोच्छ्रया वेदिमुपपीठसमाकृतिम्।
इष्टकाद्यैश्च तुर्यश्रा दृढा समतला शुभाम् ॥ ३३६ ॥

गोमयेन समालिप्य सुधाद्यैर्वर्णकैरपि।
पिष्टचूर्णैश्च परित शोभयित्वा च पश्चिमे ॥ ३३७ ॥

दुकूलतूलसञ्छन्नं मसूरकसमन्वितम्।
भोज्यासन प्रतिष्ठाप्य नात्युच्च नातिनीचकम् ॥ ३३८ ॥

साधितानि यथापूर्वं हविः पात्राणि पाचकाः।
परमान्नाद्युपेतानि सोपदंशफलानि च ॥ ३४० ॥

भक्ष्यभोज्यसमेतानि मधुरादिरसानि च।
छत्रदीपसमोपेतभेरीपटहनिःस्वनैः ॥ ३४० ॥

शङ्खशृङ्गादिघोषेण दुर्जनोत्सारणोद्यतैः।
पुरावच्छोधितेनैव यथा वै गोमयादिना ॥ ३३१ ॥

सूत्रितेन सुधाचूर्णः पार्श्वयोरस्त्रवारिणा।
प्रोक्षितेन पवित्रेण ततस्तस्मान्महानसात् ॥ ३४२ ॥

अनुधारापदं प्रोक्तं निनयेद्यागमण्टपम्।
यातुद्वारुणमध्ये वा सोमसामीरणान्तरे ॥ ३४३ ॥

शालिव्रीहिपरिस्तीर्णे स्थले मखतरूद्भवे।
फलके सप्रतिष्ठाप्य वस्त्रच्छन्नेऽस्त्रमन्त्रिते ॥ ३४४ ॥

ततो वेद्या परिस्तीर्य तण्डुलाञ्छालिसंभवान्।
कसादि धातवो नेष्टा महोदननिवेदने ॥ ३४५ ॥

अच्छिन्नानि सुपूतानि कदल्यादिदलानि वा।
प्रागग्राण्युदगग्राणि बहुशः क्षालितानि च ॥ ३४६ ॥

निधाय च यथापूर्वमुपस्तीर्य घृतेन तु।
पात्रेष्वन्येष्वथादाय दर्व्या मूलेन तद्धविः ॥ ३४७ ॥

मध्यगे विततेपात्रे प्रतिष्ठाप्य यथाक्रमम्।
सुवृत्तं चतुरश्रं वा दर्व्या तं (सं) सेचयेत्ततः ॥ ३४८ ॥

संस्कृतैर्घृतपूरैश्च विद्रुतैर्वातशीतळै. ।
मूलमन्त्र समुच्चार्य पुनरप्यभिघार्य च ॥ ३४९ ॥

परितो मुद्गभेदेन गुल्भापं ' हृदयेन " तु ।
गुडखण्डानि " शिरसा " खण्डचूर्णान्वितानि च ॥

उपदंशानि " शिखया " पाचितानि यथाविधि ।
कदलीपनसाम्राणि फलानि विविधानि च ॥ ३५१ ॥

कालपक्वानि हृद्यानि " कवचं " समुदीरयन् ।
घृततप्तोपदंशानि तदूर्ध्वं " नेत्र "मुच्चरन् ॥ ३५२ ॥

पुटीकृते तदूर्ध्वं तु वीर्यमन्त्रेण साधितम् ।
चूर्णितैः समरीचैश्च जीरकैश्च गुळान्वितै. ॥ ३५३ ॥

दधिपूर तु संपूर्य खण्डचूर्णसमन्वितम् ।
एवं प्रतिष्ठिते पूर्वमेकपात्रे महाहवि ॥ ३५४ ॥

पूरितान्युप पात्राणि परित. पायसादिभि. ।
प्राग्वद्घृतोपदंशाद्यैश्चाधारेषु निवेशयेत् ॥ ३५५ ॥

महान्नस्य तु पाश्चात्यप्रमुखासु दिशास्वपि ।
द्वन्द्वयोगेन निक्षेप्यं पायसादिकमष्टकम् ॥ ३५६ ॥

एकैक ह्रासयेद्वाथ क्षीरान्नादिचतुष्टयम् ।
तत्तत्स्थानेषु शुद्धान्नमपूपादीनि विन्यसेत् ॥ ३५७ ॥

पायसान्न गुडान्न वा मुद्गान्नं केवलोदनम् ।
स्थाप्यं वा, मध्यकल्पे तु पाश्चाप्यादिष्वनुक्रमात् ॥

मुद्गान्नं मधुर वाथ क्षीरान्नादित्रिकं तु वा ।
गुळपायसयोरेकं शुद्धान्नं वाथवार्पयेत् ॥ ३५९ ॥

अनुकल्पेन शुद्धान्नं भक्तिश्रद्धावशेन तु ।
यथाकल्पं तु संकल्प्य पायसादिष्वथेच्छया ॥ ३८० ॥

सुगन्धिशालिसंपन्नमभावाच्छालिसंभवम् ।
मध्यतो घृतसंपूर्णसौवर्णचषकान्वितम् ॥ ३६१ ॥

पात्रं पाश्चात्यदिङ्मध्ये व्यञ्जनादि परिष्कृतम् ।
प्रापणार्थं प्रतिष्ठाप्यमुच्चाधारोपरिस्थितम् ॥ ३६२ ॥

मध्यत. पायसद्रोणीं गुळान्नपरिपूरिताम् ।
प्रतिष्ठाप्याथ परितस्त्वन्यान्यूह्य प्रकल्पयेत् ॥ ३६३ ॥

पानीय गन्धपुष्पाद्यैर्वासितं करकादिषु ।
प्रच्छादनाम्बरादिनि मण्टपस्य तु दक्षिणे ॥ ३६४ ॥

मधुपर्क च गोमात्रा साध्यवीजानि पश्चिमे ।
ताम्बूलतिलरत्ना(त्नोत्था)र्थमात्रा गन्धस्रगादयः ॥

यागद्रव्याणि चान्यानि त्वक्षसूत्रादिकानि च ।
स्थापयित्वोत्तरस्या च ततस्तत्कर्मकारिभि. ॥ ३६६ ॥

पूजितस्य विशेषेण देवस्य पुरत. स्थित. ।
विज्ञापयेद्देशिकेन्द्र. प्रणत. पुरुषोत्तमम् ॥ ३६७ ॥

" भगवन् ! पुण्डरीकाक्ष ! सच्चिदानन्दलक्षण ! ।
बलवीर्यमयैर्भोगैर्नित्यतृप्तस्त्वमव्ययः ॥ ३६८ ॥

तथापि चात्मसिध्यर्थं मदता हविषाऽधुना ।
भवन्तं तर्पयिष्यामि संपूर्ण तत् प्रकल्पितम् ॥ ३६९ ॥

अनुग्रहार्थं भक्ताना भोक्तुमासादय प्रभो ! " ।
विज्ञाप्यैवं तत. पश्चात्प्राग्वन्नीराजयेद्विभुम् ॥ ३७० ॥

स्वर्णादिनिर्मिते याने देवमारोप्य मूर्तिपा. ।
सर्वालङ्कारसंयुक्त नयेयुर्भोजनास्पदम् ॥ ३७१ ॥

आरोपयित्वा प्रागास्यं तत्रस्थे भोजनासने ।
अर्घ्य पाद्यं तथाचामं प्रदद्यात् सप्रतिग्रहम् ॥ ३७२ ॥

प्रच्छादनपट चाथ मधुपर्क यथाविधि ।
गोमात्रा साध्यवीजानि दत्वाऽऽचामजलेन तु ॥

हस्तौ प्रक्षाल्य देवस्य पानीयं चार्घ्यवारिणा ।
प्रतिष्ठाप्य समासीन पीठे देवस्य दक्षिणे ॥ ३७४ ॥

अथार्हणजलं त्वर्घ्यादुद्धृतं विनिवेदयेत् ।
विलोक्य नेत्रमन्त्रेण पृथक् पात्रगणान्वितम् ॥ ३७५ ॥

सव्यञ्जनं सभक्ष्यं च परमान्नादिक हवि. ।
" पवित्रेण " समभ्युक्ष्य " शतधारेण " पूर्ववत् ॥

दहनाप्यायने कृत्वा सर्व सुरभिमुद्रया ।
ध्यात्वा तन्मन्त्रमुच्चार्य त्वमृतीकृत्य तद्घृतम् ॥ ३७७ ॥

वलं वीर्यं च तेजश्च त्वर्घ्यपुष्प समुत्क्षिपेत् ।
" कवचेन " च सास्त्रेण नेत्रमन्त्रेण भावयेत् ॥ ३७८

ततः स्वदक्षिणे हस्ते विज्ञानैश्वर्यशक्तयः ।
स्मर्तव्या. स्वस्वमन्त्रेण भोजका. करणात्मका. ॥

तेनाथ "विष्णुहस्तेन" परमान्नपुरस्सरम् ।
स्पृष्ट्वा स्पृष्ट्वा यथायोगं बद्धया ग्रासमुद्रया ॥ ३८० ॥

निवेदनीया वै विष्णोरन्नमूर्त्यन्तरस्थिता ।
रसरूपादिभेदोत्थास्तेजोवीर्यबलात्मका. ॥ ३८१ ॥

षाड्गुण्यविग्रहस्यापि देवस्यार्चाभिमानिन. ।
प्रीणनं परमं ह्येतद्धविर्मन्त्रै. सुसस्कृतम् ॥ ३८२ ॥

ज्ञात्वैवं शंखशृङ्गादिभेरीपटहनि.स्वनै ।
घण्टारवसमेताभिर्मङ्गलाभिश्च गीतिभि ॥ ३८३ ॥

श्रुतिस्मृतीतिहासाना भगवद्गुणशालिनाम् ।
स्तोत्राणा च पुराणाना वैष्णवाना च नि स्वने. ॥

प्रदक्षिणक्रमेणैव पायसाद्युपपात्रकम् ।
प्रभूतान्नं तत. पश्चात् प्रापणान्नपुरस्सरम् ॥ ३८५ ॥

भक्ष्याण्यपूपपूर्वाणि भोज्यानि च फलानि च ।
लेह्यानि मधुपूर्वाणि चोष्याण्याम्रादिकान्यपि ॥

पेयानि क्षीरपूर्वाणि अनुपानान्वितानि च ।
विनिवेद्य च देवाय विन्यस्तान्योऽनोपरि ॥ ३८७ ॥

बलवीर्यादिसन्मन्त्रान् सवीर्यादिविवर्जितान् ।
ओमित्युपाहरेन्मन्त्री तत. संहतिमुद्रया ॥ ३८८ ॥

पूर्णात्पूर्णमिति प्राज्ञो जप्त्वा मन्त्रं समाहित. ।
सुतृप्त भावयेद्देवं सुतृप्तमिति चोच्चरन् ॥ ३८९ ॥

शीतलं तर्पणजलं शङ्खशुक्त्याकृतिष्वपि ।
पात्रेषु पूरितं तर्प्य चूर्णं निष्पुंसनाय च ॥ ३९० ॥

तदर्थं शाटकं चाथ हस्तप्रक्षालनं तत. ।
समाचमनतोयं च घृष्टकर्पूरभावितम् ॥ ३९२ ॥

चन्दनं करशुध्यर्थं मात्रा करसमुद्भवाम् ।
सरत्ना विनिवेद्यथ ताम्बूलं शशिभावितम् ॥३९२॥

दत्वाऽथ मूलमुद्रा तु दर्शयेन्मूलमुच्चरन् ।
जपं कृत्वा यथापूर्वमर्घ्याद्यैर्धूपपश्चिमैः ॥ ३०३ ॥

समभ्यर्च्य, समाहूय गुरुपूर्वांश्च साधकान् ।
सिद्धान्तनिरताश्चाथ पञ्चकालपरायणान् ॥ ३९४ ॥

दीक्षिताश्च यथान्यायं त्रैविद्यास्तदभावत. ।
अर्घ्यानुलेपनाभ्या तु स्रग्वरैर्धूपपश्चिम ॥ ३०५ ॥

समभ्यर्च्य ततस्तेषा दद्यादर्घ्योदकं करे ।
परित. पायसादीनि पात्रस्थानि पृथक पृथक् ॥

महोदनं च मध्यस्थं चतुर्धा संविभज्य च ।
प्रयच्छेदकमश तु कारिभ्य. श्रेयसे तत. ॥ ३९७ ॥

द्वितीयमोदनं दद्यात् सेनेशाय तत. परम् ।
तृतीयमन्नं दातव्यं सर्वेषा परिचारिणाम् ॥ ३९८ ॥

चतुर्थं वैष्णवाना च देवायतनवासिनाम् ।
आराधकप्राशनार्थं प्रापणान्नं समाचरेत् ॥ ३९० ॥

गोमात्रा साध्यबीजानि शालिमुद्गादिकानि च ।
मात्रा च तिलरत्नोत्था तथा चाच्छादनाम्बरम् ॥

निष्पुंसनपटं चाथ ताम्बूल च विशेषत. ।
प्रयच्छेद्देशिकेन्द्राय नियुक्तायाचने क्षणे ॥ ४०१ ॥

महाविभूतिर्देवेश. सर्वसङ्कल्पसिद्धिद ।
यस्मात् प्रागात्मसात्कुर्याद्भोगशक्तिमनश्वरीम् ॥४०२॥

व्यक्ता गुर्वादिवक्त्रेण भुनक्ति तदनन्तरम् ।
तस्मान्निवेदित सर्व वासुदेवस्य वै विभो ॥ ४०३ ॥

प्रदद्याद् गुरुपूर्वेभ्यो नियतेभ्य सदार्चने ।
रक्षणीयमभक्तभ्यस्तद्दान विष्णुयाजकै. ॥ ४०४ ॥

प्रायश्चित्ती भवेद्दाता अपात्रप्रतिपादनात् ।
प्रक्षिपेज्जलमध्ये तु विश्वक्सेननिवेदितम् ॥ ४०५ ॥

जलजाना तीरजाना जन्तूना तृतयेऽथवा ।
जले किञ्चिद्विनिक्षिप्य शेषमन्न तदग्रत ॥ ४०६ ॥

तद्भक्ताना द्विजातीना निरताना स्वकर्मसु ।
एवं सन्तर्प्य देवेश महता हविषा तत ॥ ४०७ ॥

भोज्यासनगतं पश्चादन्यत्र शयनास्पदे ।
सुवितानपताकाढ्ये पुष्पमालावलंकृते ॥ ४०८ ॥

सर्वोपकरणोपेते पर्यङ्कस्योर्ध्वतो नयेत् ।
अपनीय च माल्यानि गन्धानि वसनानि च ॥ ४०९ ॥

स्वयं किञ्चित् समादाय विष्वक्सेनस्य वै ततः ।
प्रदद्यादवशिष्टं तु पर्यङ्कस्थस्य वै विभो ॥ ४१० ॥

अर्घ्यं पाद्याम्बुना शाटी तथा पादानुलेपनम् ।
सप्रतिग्रहमाचामं हस्तसंमार्जनाम्बरम् ॥ ४११ ॥

दत्वा ततः सुगन्धैस्तु चन्दनाद्यैः समालभेत् ।
व्यजनैः श्रमशान्त्यर्थं संवीज्य च समन्ततः ॥ ४१२ ॥

कथितं च मृगस्नेहं शशिचूर्णाधिवासितम् ।
मर्दयित्वाथ देवस्य केशपाशे प्रसारिते ॥ ४१३ ॥

नानाविधैर्गन्धवद्भिः पुष्पैः संवलितान्तरम् ।
स्रग्भिर्नानाविधाभिश्च केशान् संवेष्टयेत्ततः ॥ ४१४ ॥

निवेदयेदपूपानि पृथुकानि फलानि च ।
पानकं तर्पणजलं नालिकेररसान्वितम् ॥ ४१५ ॥

ताम्बूलं शशिसंयुक्तं साङ्गं विज्ञाप्य वै विभुम् ।
छत्रदीपान्वितो यायादर्घ्यभृत् पाचनालयम् ॥ ४१६ ॥

तत्र नैमित्तिके कुण्डे नित्ये वा संस्कृते पुरा ।
तथैव संस्कृते वह्नौ प्राग्वत् संतर्पिते सति ॥ ४१७ ॥

तस्मिन् ज्वाला जटाधारे हुत्वा मन्त्रनायकम् ।
अवतीर्य समिद्भिश्च सप्तभिस्तर्पयेत्ततः ॥ ४१८ ॥

पायसाद्यैर्विशेषेण पाचितैरखिलैरपि ।
शङ्खभेरीनिनादेन घण्टारवसमन्वितम् ॥ ४१९ ॥

पूर्णाहुतिं ततो दद्यादाज्यस्याच्छिन्नधारया ।
कर्मशेषं समापाद्य दद्याच्छिष्टं चरुं गुरोः ॥ ४२० ॥

ततो देवान्तिकं प्राप्य होमकर्म समर्पयेत् ।
संविभज्य पितॄन् प्राग्वत् संप्रदानसमन्वितम् ॥ ४२१ ॥

अर्चयित्वार्घ्यगन्धाद्यैः प्राग्वत् कुर्यात् प्रदक्षिणम् ।
विज्ञाप्य यानगं कृत्वा देवमन्तः प्रवेशयेत् ॥ ४२२ ॥

स्वस्थानस्थस्य देवस्य दद्यादर्घ्यादिकत्रयम् ।
तत्र संरोधितं मन्त्रं प्राग्वन्मूले नियोजयेत् ॥ ४२३ ॥

तत्रापि पूजयेद्भोगैरर्घ्याद्यैर्धूपपश्चिमैः ।
ततो विज्ञापयेद्देवं पुष्पाञ्जलिपुरस्सरम् ॥ ४२४ ॥

"पूजितोऽसि जगन्नाथ ! महता हविषा विभो ! ।
त्वदीये मयि वात्सल्यात् तृप्तो भवितुमर्हसि ॥"

इति विज्ञाप्य देवस्य चरणाम्बुरुहद्वये ।
मूलमन्त्रं समुच्चार्य प्रक्षिपेत् कुसुमाञ्जलिम् ॥ ४२६ ॥

महोदनसपर्यादौ प्राप्ते नैमित्तिकादिषु ।
पूजनादुत्सवार्चायाः पुरस्ताद्वाथ पश्चिमात् ॥ ४२७ ॥

सशक्तिकं मूलबिम्बं साङ्गं बिम्बं च साश्रयम् ।
विहगेशावृतिद्वारपालभक्तैः समन्वितम् ॥ ४२८ ॥

विमानेषु बहिष्ठेषु मण्टपे गोपुरादिषु ।
विभवव्यूहमूर्तीनां स्थापितानां विधानतः ॥ ४२९ ॥

प्राग्वत् सपूजनं कृत्वा महान्नं विनिवेदयेत् ।
मुख्यकल्पमिदं प्रोक्तं मध्यकल्पे यथाबलम् ॥ ४३० ॥

एकैकस्याढकाद्येन मानेनान्नं प्रकल्पयेत् ।
मूलालयगतं देवं केवलं वा समर्चयेत् ॥ ४३१ ॥

प्रासादस्थस्य नित्ये तु न संकल्प्यं महाहविः ।
तदर्थं बलियानं तु नाचरेत्तव्यं हितेच्छुना ॥ ४३२ ॥

महोदनं च स्नपने स्नपनं च महोदने ।
कर्तव्यमविनाभूतं द्वितयं मुख्यकल्पने ॥ ४३३ ॥

अनुकल्पे तदन्योन्यमेकैकेन विना कृतम् ।
प्रभूतोदनयागार्थमन्ययागार्थमेव वा ॥ ४३४ ॥

बिम्बे कस्मिंश्चिदावाह्य पूजिते तु यथाविधि ।
समारब्धे समाप्तेऽस्मिन् यागेऽकस्माद् द्विजोत्तम ! ॥

अन्ये महाहवियागे प्राप्ते नैमित्तिकादिषु ।
दातव्यं तत्र मन्त्रैरन्यत्रोद्वासनादिकम् ॥ ४३६ ॥

तत उद्वासयेदत्र स्नपनेऽप्येवमेव हि ।
मूलबिम्बे यथा देयं मन्त्रिभिस्तु महाहविः ॥ ४३७ ॥

तृतीयावरणाद्बाह्ये तथैवाभ्यन्तरेऽपि वा ।
महोत्सवविधौ दद्यात् कुत्रचिद्वा महाहविः ॥ ४३८ ॥

महताऽनेन हविषा भक्त्या यः पूजयेद्धरिम् ।
स भुक्त्वा विपुलान् भोगानिह लोके चिरतनान् ॥
कालान्तरेऽस्यये प्राप्ते प्राप्तं यात्यच्युतं पदम् ।
विशेषादभिषिक्तैश्च भूपैर्भूतहिते रतैः ॥ ४४० ॥
विधिनानेन कर्तव्य महोद्दनसमर्चनम् ।
प्राप्नुवन्ति च ते शश्वत् प्रतिभूपालमण्डलम् ॥ ४४१ ॥
वारण च वराश्व च तदीय कोशसञ्चयम् ।

इति श्रीपाञ्चरात्रे पारमेश्वरसहितायां क्रियाकाण्डे प्रापणादिमान साधननिवेदनादिप्रकारो नाम अष्टादशोऽध्याय ।

श्री.

एकोनविंशोऽध्यायः ॥

सनक —
मुने ! सिद्धान्तनिष्ठस्य समाराधनकाङ्क्षिणः ।
समयाचारवैकल्ये प्रायश्चित्तमुदीरय ॥ १ ॥
शाण्डिल्य —
शृणु सम्यक् प्रवक्ष्यामि प्रायश्चित्त मुने ! हितम् ।
यत् कृत्वा देशिकादीना चतुर्णा शुभमेधते ॥ २ ॥
अस्नात्वा विधिवन् मन्त्री नद्यादौ पूजयेद्यदि ।
स्नात्वा मूलसहस्रं तु जप्त्वा संपूजयेद्विभुम् ॥ ३ ॥
जीर्ण पर्युषितं वासो दधानो यदि पूजयेत् ।
स्नात्वा विशुद्धवासोभृन्मूलमन्त्रं जपेत्तथा ॥ ४ ॥
ध्यानहीनस्त्वनाचान्तः पवित्ररहिताङ्गुलिः ।
केशास्थिलोष्टसिरासृगस्पृश्यस्पर्शनेऽपि च ॥ ५ ॥
स्नात्वा यथापुरं पूज्य मूलमन्त्रायुतं जपेत् ।
उदक्यासूतिकाऽपेयचण्डालाद्युपवर्तक. ॥ ६ ॥
स्पृशेच्चेद्भगवद्बिम्बं स्नात्वा पूर्वं स्वयं ततः ।
पञ्चगव्येन देवेशमभिषिच्य समर्चयेत् ॥ ७ ॥
उदक्यासूतिकाद्यैश्च स्पृष्टः संस्पृश्य कौतुकम् ।
स्नात्वोत्तमेन देवेशमभिषिच्याथ शान्तये ॥ ८ ॥
हुत्वाऽथ मूलमन्त्रेण जपेच्चायुतसङ्ख्यया ।
सूतके मृतके बिम्बं स्पृशेद्वा पूजयेद्यदि ॥ ९ ॥
अधमोत्तमेन सस्नाप्य प्राग्वद्धुत्वा जपेन्मनुम् ।
महापातकिभि स्पृष्टो विण्मूत्रापेयपैस्तथा ॥ १० ॥
पूजयेद्यदि देवेशं पुनः स्नात्वा विधानत ।
पूर्ववत् स्नपन कृत्वा शान्तिहोमादिक चरेत् ॥ ११ ॥
निष्ठीवरुधिरस्वेदयुक्तो देवं स्पृशेद्यदि ।
कुशोदकेन सस्नाप्य विशेषेण यजेद्विभुम् ॥ १२ ॥
दिवा गत्वा स्त्रिय स्वीयामस्नात्वा चेत् स्पृशेद्विभुम् ।
उपोष्य पञ्चभिर्गव्यै. कुशोदै. स्नापयेद्विभुम् ॥ १३ ॥
परस्त्रीगमनासक्तश्चीर्णदुश्चरितो विभुम् ।
पूजयेद्वा तथा स्पृष्टे देवबिम्बेऽभिषेचयेत् ॥
मध्यमाधममार्गेण हुत्वा मन्त्र जपेच्छतम् ।
कृमिकीटास्थिकेशादिपतङ्गनखरादिकै. ॥ १५ ॥
प्राण्यङ्गतुषभस्मादिदुष्टैः पत्रफलादिभि. ।
पुष्पैस्तोयैस्तथाप्यन्यैश्चन्दनाद्यैश्च भूषणै ॥ १६ ॥
तथोपचारैरन्यैश्च वर्जितैरपि वस्तुभिः ।
तथा पर्युषितै पत्रपुष्पाङ्कुरफलादिभि. ॥ १७ ॥
अस्पृश्यप्राणिभिः स्पृष्टैस्तथा चास्पृश्यवस्तुभि. ।
चण्डालसूतिकाद्यैश्च निषादपतितादिभि. ॥ १८ ॥
सस्पृष्टैश्च परिम्लानै. सरजोभिर्यजेद्यदि ।
जपेदष्टोत्तरशतं मूलमन्त्रमनन्यधी. ॥ १९ ॥

एतैर्दुष्टैस्तु वस्त्राद्यैर्देवं संपूजयेद्यदि ।
संस्नाप्य चाधमेनैव पूजयित्वा विधानतः ॥ २० ॥

शान्तिहोमं प्रकुर्वीत सहस्राहुतिभिः क्रमात् ।
चण्डालसूतिकोदक्याशवरापेयपायिभिः ॥ २१ ॥

संस्पृष्टे पानभक्ष्यादौ देवेशस्य निवेदिते ।
मृण्मयानि परित्यज्य क्षालयित्वेतराणि च ॥ २२ ॥

स्नात्वा कुशोदकं पीत्वा स्नापयेदधमेन तु ।
पुनः संपूज्य जुहुयान्मूलेन शतसङ्ख्यया ॥ २३ ॥

विड्वराहसृगालाभिः काकश्येनखरादिभिः ।
एवमादिभिरन्यैश्च स्पृष्टेऽन्नादौ निवेदिते ॥ २४ ॥

पूर्ववच्छान्तिरेव स्यात्ततः शुद्धं निवेदयेत् ।
परस्त्रीगमनासक्तैर्मक्ष्याभक्ष्याविवेकिभिः ॥ २५ ॥

यथेष्टाचारनिरतैरवैष्णवकुलोद्भवैः ।
पक्वं स्पृष्टं तथा दृष्टं दुष्टं पूयासृगादिभिः ॥ २६ ॥

अमत्या चेद्धविर्दत्तं पूर्ववच्छान्तिमाचरेत् ।
शवादिदूषितान्नस्य पक्वस्य विनिवेदने ॥ २७ ॥

पूर्ववत् पूज्य देवेशं शान्तिहोमं समाचरेत् ।
त्यक्तमन्नादिकं दद्याद्यदि पूज्य पुनस्तिलैः ॥ २८ ॥

सघृतैर्जुहुयान्मन्त्री सहस्रशतसङ्ख्यया ।
तथा पर्युषितान्नस्य प्रदाने शान्तिमाचरेत् ॥ २९ ॥

त्यक्तं हविः फलं पुष्पं पवित्रान्नरसादिकम् ।
त्यजेज्जलाशये वाग्नौ भुवि वा गोष्वलोलुपः ॥ ३० ॥

मक्षिकाघुणभृङ्गाद्यैर्दष्टं दुष्टं पुरीषगैः ।
पत्रपुष्पफलाद्यन्नं त्यक्तव्यं, तदधिष्ठितम् ॥ ३१ ॥

अस्त्रोदकेन संप्रोक्ष्य दद्याद्देवाय भक्तितः ।
महाहविर्विधाने तु विशेषमवधारय ॥ ३२ ॥

पचनालयमन्यत्र साधितं दीक्षितेतरैः ।
अमन्त्रसंस्कृतं चान्नमविभक्तमलक्षणम् ॥ ३३ ॥

निरीक्षितमयोग्यैश्च संपृष्टं मक्षिकादिभिः ।
सप्रोक्ष्य चास्त्रतोयेन निवेद्यं यत्नगौरवात् ॥ ३४ ॥

सेनेशाय न दातव्यं होमं कुर्याद्यथारुचि ।
कारिभ्य संप्रदानं च बलिदानं न कारयेत् ॥ ३५ ॥

अभ्यागतेष्वनाप्तेषु दीनानाथजनेष्वपि ।
प्रदेयमन्यथा शान्तिहोमं कुर्यादनन्यधीः ॥ ३६ ॥

बिडालभूषिकासर्पमण्डूकाद्यैश्च जन्तुभिः ।
कृमिकीटपतङ्गाद्यैर्वायसाद्यैश्च खेचरैः ॥ ३७ ॥

न देयं देवदेवाय दुष्टं स्पृष्टं महाहविः ।
दत्ते हुत्वा च जप्त्वा च पुनर्दद्यान्महाहविः ॥ ३८ ॥

भोगमन्त्रक्रियाध्यानं मुद्राणामङ्गरूपिणाम् ।
द्वारावरणपूर्वाणां बिम्बपीठादिकारिणाम् ॥ ३९ ॥

कालानामपि चान्येषां नित्यनैमित्तिकात्मनाम् ।
विपर्यासे प्रवृत्ते तु दिव्यैर्व्यापकपञ्चकैः ॥ ४० ॥

प्रत्येकं जुहुयान्मन्त्री तिलैश्चान्यैः शतं शतम् ।
समित्परिधिदर्भाणां कूर्चानां हविषामपि ॥ ४१ ॥

आज्यस्थाल्यादिपात्राणामग्नेः स्थण्डिलकुण्डयोः ।
स्रुक्स्रुवस्य प्रणीतायाः अभावे लक्षणोज्झिते ॥ ४२ ॥

शान्त्यर्थं जुहुयान्मन्त्री प्राग्वद्व्यापकपञ्चकैः ।
अभावे काष्ठसमिधामाज्येन चरुणा हुनेत् ॥ ४३ ॥

समिद्भिराज्याभावे तु तिलैर्वा होममाचरेत् ।
अलाभे हविषोऽन्येषामाज्येन जुहुयात् सुधीः ॥ ४४ ॥

सर्वथा होमकर्मार्थं तिलमाज्यं न लोपयेत् ।
तिलाज्ययोरभावे तु हवनं स्यान्निरर्थकम् ॥ ४५ ॥

शान्तिहोमं प्रकुर्वीत प्रदिष्टाया यथोदितम् ।
वह्नौ कुण्डे स्थले चुल्या संस्कृतेऽनुगते गते ॥ ४६ ॥

पुनराधाय संस्कृत्य शान्तिहोमादिकं हुनेत् ।
वह्नौ स्पृष्टे तथाऽस्पृश्यैः केशास्थिनखरैरपि ॥ ४७ ॥

यथावन्मूलमन्त्रेण जुहुयात् सर्पिषा शतम् ।
उदक्यासूतिकाद्यैश्च सन्निकृष्टेऽयुतं हुनेत् ॥ ४८ ॥

संस्पृष्टेऽन्यं समाधाय जुहुयाच्चायुतं जपेत् ।
असमिद्धे हुते वह्नौ पुनर्होमं समाचरेत् ॥ ४९ ॥

नैमित्तिकेषु काम्येषु चोत्सवेषु विशेषतः।
तदङ्गहुतभुग्यागं कुण्डेऽन्यस्मिन् समाचरेत् ॥ ५० ॥

शान्तिहोमं प्रकुर्वीत कृते चेत्तद्विपर्यये।
परिवारानमूर्तांश्च मूर्तांश्चैव यथाक्रमम् ॥ ५१ ॥

अनर्चयित्वाऽहोरात्रं जपेत्तत्र पुरोऽन्तिके।
तन्मन्त्राश्छतमष्टौ तु प्रत्येकं पूजनादिकम् ॥ ५२ ॥

पतने बलिवस्तूनामस्पृश्यस्पर्शनेऽपि वा।
तथैव पात्रेऽभिमते केशलोष्टादिदूषिते ॥ ५३ ॥

तत्त्यक्त्वाऽन्येन निर्वर्त्य शान्तिहोमं समाचरेत्।
बलिं दुष्टे न दद्याच्चेच्छान्तिहोमपुरस्सरम् ॥ ५४ ॥

बलिं दत्वा विशेषेण प्राग्युक्तं मन्त्रवान् जपेत्।
नित्योत्सवाथबिम्बे तु यानान्निपतिते सति ॥ ५५ ॥

तदेवोद्धृत्य तद्बिम्बमक्षतं स्नाप्य मन्त्रवित्।
अधमाधममार्गेण शान्त्यर्थं जुहुयादनु ॥ ५६ ॥

तथैव च क्षतं बिम्बं समाधाय यथापुरम्।
कृत्वा प्रातिष्ठिकं कर्म स्वस्थाने स्थापयेदनु ॥ ५७ ॥

यावत्समाधिकालं तु तावद्बिम्बान्तरेण वा।
कूर्चेन वाऽन्यबिम्बेन कुर्यान्नित्योत्सवं हरेः ॥ ५८ ॥

अस्पृश्यैर्वाथ सस्पृष्टे बलिबिम्बेऽभिषेचयेत्।
अधमाधममार्गेण शान्तिहोमपुरस्सरम् ॥ ५९ ॥

यानस्थे त्वथ बिम्बे तु व्यूढेऽयोग्यजनैः सति।
कुशोदकेन संप्रोक्ष्य शान्तिहोमं समाचरेत् ॥ ६० ॥

अस्पृश्यैर्यदि सस्पृष्टो बलिबिम्बस्य वाहकः।
पञ्चगव्येन संप्रोक्ष्य शुचिनाऽन्येन वाहयेत् ॥ ६१ ॥

मुद्रामन्त्रक्रियाध्यानद्रव्याणां भोगरूपिणाम्।
विशेषाद्बलिकाले तु हानिरुत्पद्यते यदि ॥ ६२ ॥

जपेन्मूलसहस्रं तु मन्त्री ध्यानसमन्वितः।
न दत्तं यदि दातव्यं फलपुष्पोदनादिकम् ॥ ६३ ॥

देवोपभुक्तं योग्याय मूलमन्त्रायुतं जपेत्।
हुतशेषे हविश्शेषे भुक्ते योग्यजनैर्विना ॥ ६४ ॥

जपेन्मूलायुतं मन्त्री दाता किल्बिषशान्तये।
सात्वतैः सत्वनिरतैः सदा भगवत प्रियैः ॥ ६५ ॥

तत्तं भगवते यद्यत् तत्तत् पावनपावनम्।
ब्रह्मघ्नस्य सुरापस्य स्वर्णस्तेयरतस्य च ॥ ६६ ॥

गुरुतल्परतस्यापि संयुक्तस्यापि तैः सह।
प्राशनं सर्वपापघ्नमन्येषामपि किं पुनः ॥ ६७ ॥

तस्मात्तत् सम्प्रदातव्यं ज्ञानिना मुख्यकल्पने।
त्रैवर्णिकानां दातव्यं दीक्षितानां तु मध्यमे ॥ ६८ ॥

केवलानां तु भक्तानां त्रैविद्यानां द्विजन्मनाम्।
प्रधानमनुकल्पे स्यादन्यथा प्राशयेत् स्वयम् ॥ ६९ ॥

विष्वक्सेनस्य यद्दत्तं पूजान्ते मन्त्रिभिर्विभोः।
न भोक्तव्यविशेषेण त्यक्तव्यं भूजलादिषु ॥ ७० ॥

गोषु वा विष्णुभूतानां तृप्तये हितमिच्छताम्।
भोक्ता किल्बिषशान्त्यर्थं व्रतं चान्द्रायणं चरेत् ॥ ७१ ॥

संकल्प्य यागं होमान्तं हवनं न कृतं यदि।
द्विगुणं हवनं कृत्वा पूर्णान्तं मन्त्रवित्तमः ॥ ७२ ॥

एकद्वित्रिचतुःपञ्चषट्कालेषु यथाक्रमम्।
एकादिदिनमासर्तुवत्सरेषु तथैव च ॥ ७३ ॥

वह्निकार्येषु लुप्तेषु नित्यनैमित्तिकेष्वपि।
द्विगुणं मिश्रितैर्होमैरधमस्नपनं चरेत् ॥ ७४ ॥

पूजालोपे प्रवक्ष्यामि प्रायश्चित्तं मुने शृणु।
औपचारिकसास्पर्शहृदयंगमरूपिणाम् ॥ ७५ ॥

परिच्युतौ च भोगानां त्रयाणां क्रमशो मुने!।
पूजान्ते सर्ववीजानि मात्रावित्तं घृतोदनम् ॥ ७६ ॥

निवेदनीयं देवस्य विशेषेज्यापुरस्सरम्।
एककाले च दिवसे पक्षे वैशेषिकार्चनम् ॥ ७७ ॥

तत्तद्द्विगुणितैर्द्रव्यैर्बलिहोमान्तमाचरेत्।
एकमासीयपूजायां यावद्द्वादशमासिकी ॥ ७८ ॥

तावद्द्विगुणितैर्द्रव्यैर्मासिकसङ्ख्यार्चनेऽपि च।
स्नपनं चापि नवकमधमाधमपूर्वकम् ॥ ७९ ॥

मुख्योत्तमावसान तु सहस्रकलशाप्लवम् ।
संप्रोक्षणं च विध्युक्त प्रतिष्ठा च क्रमाच्चरेत् ॥ ८० ॥

आरभ्य मासिकी पूजा यावद्द्वादशमासिकी ।
तावदेकैकवृद्ध्या तु महता हविषा यजेत् ॥ ८१ ॥

समिद्भिः सप्तभिर्हुत्वा पुरा पश्चाद्घृताप्लुते. ।
घृतैश्च जुहुयान्मन्त्री त्वासहस्राद्यथाबलम् ॥ ८२ ॥

तथैव च जपं कुर्यान्मूलमन्त्रस्य सादरम् ।
बलिप्रदानहीने तु हुत्वा मूलशत तत ॥ ८३ ॥

तत्तदावरणद्वारदेवाना स्वस्वसंज्ञया ।
जुहुयात्तिलमिश्रेण घृतेनैव शतं शतम् । ॥ ८४ ॥

प्रायश्चित्तं प्रवक्ष्यामि नित्यादिस्नपनेषु ते ।
गृहार्चने प्रकुर्वीत नित्यादिस्नपन सुधी. ॥ ८५ ॥

तत्र स्नानीयतोयेन पूजार्थमभिषेचयेत् ।
बहुबेरे तु कर्मार्चा स्नापयेदग्रमण्टपे ॥ ८६ ॥

प्रासादे वितते ब्रह्मभागस्थे भद्रविष्टरे ।
स्नापयेत् स्नानकलशै स्थापितैरग्रमण्टपे ॥ ८७ ॥

मध्याह्ने चापि सायाह्ने स्नानीयकलशोद्धृतै. ।
स्नानद्रव्यसमेतैर्वा वारिभि. प्रोक्षयेत् क्रमात् ॥ ८८ ॥

मूलबिम्बादिबिम्बाना कुर्याद्वा विनिवेदनम् ।
बहुबेरेऽभिषेकार्चा ता गृहीत्वाग्रमण्टपात् ॥ ८९ ॥

न गच्छेद्बाह्यतो मन्त्री स्नपनार्थ बहिर्गते ।
शान्तिहोमं प्रकुर्वीत तस्य दोषस्य शान्तये ॥ ९० ॥

एकबेरे बृहद्रूपे कर्मार्चामभिषेचयेत् ।
बृहद्घटैश्च बहुभिः सहस्रकलशादिभिः ॥ ९१ ॥

यदाभिषेको बाह्यस्थे मण्टपे स्नानकौतुकम् ।
संस्नाप्य विधिवन्मन्त्री महता विभवेन तु ॥ ९२ ॥

पूजयित्वोत्सवार्चाया विनिवेद्य महाहविः ।
कलशस्नपनार्थं चेत्र कुयादङ्कुरार्पणम् ॥ ९३ ॥

तथा प्रतिसराबन्धं मूलमन्त्रायुत जपेत् ।
पुरस्तादङ्कुरानर्प्य बद्ध्वा बिम्बेऽपि कौतुकम् ॥

अमत्या वा समत्या वा स्नपनं नाचरेद्यदि ।
शान्तिहोमं पुरा कृत्वा जपेदष्टोत्तरायुतम् ॥ ९५ ॥

कौतुकाङ्कुरपूर्व तु पुनरेवाभिषेचयेत् ।
अकृत्वाङ्कुरयागं तु तथा कौतुकनन्धनम् ॥ ९६ ॥

स्नापितो यदि देवेश. स्नानं तन्निष्फल भवेत् ।
विधिवच्चाङ्कुरावापं तथा कौतुकवन्धनम् ॥ ९७ ॥

स्नापयेद्विधिवन्मन्त्री शान्तिहोमपुरस्सरम् ।
संकल्पिते तु स्नपने त्वकृते द्विगुणं चरेत् ॥ ९८ ॥

नासादितैर्द्रव्यहीनै. स्नापितेऽप्येवमाचरेत् ।
अधिवासितकुम्भस्थतोयाना पूर्वमेव तु ॥ ९९ ॥

न पर्युषितहानिः स्यान्मन्त्रन्यासैस्तथार्चनै. ।
स्थापितेष्वथ कुंभेषु हीनेषु स्थाप्य पूर्ववत् ॥ १०० ॥

जपेत् कलशदैवत्यं मन्त्रमष्टोत्तर शतम् ।
समुद्धृतेषु कुम्भेषु रिक्तेषु सुषिरादिना ॥ १०१ ॥

प्राग्वदन्यं प्रतिष्ठाप्य जपेदष्टोत्तरं शतम् ।
अस्पृश्यैश्च तथा स्पृष्टे मार्जाराद्यैश्च दंशिते ॥ १०२ ॥

श्वादिभिः कुक्कुटाद्यैर्वा शवराद्यैर्विजातिभि. ।
केशास्थिलोष्टसंदुष्टे पुन कलशसञ्चये ॥ १०३ ॥

सद्द्रव्य पूर्ववत् स्थाप्य तद्दैवत्यं जपेच्छतम् ।
दुष्टे संस्नापिते देवे पुनरप्यभिषेचयेत् ॥ १०४ ॥

व्यापकै पञ्चभिर्मन्त्रै. प्रत्येक जुहुयाच्छतम् ।
पूर्ववत् कुम्भदैवत्य जपेद्ध्यानसमन्वितम् ॥ १०५ ॥

अक्रमेण समुद्धारे स्थापने द्रव्ययोजने ।
अनर्चने च मन्त्राणा जपेदष्टोत्तरं शतम् ॥ १०६ ॥

माहिषाजोष्ट्रसंभूतैः दधिक्षीरघृतादिभि ।
स्नपनाद्देवदेवस्य मूलमन्त्रेण मन्त्रवित् ॥ १०७ ॥

समिद्भिः सप्तभिर्होम कुर्यादष्टोत्तरं शतत् ।
गेयमङ्गलवादित्रस्तोत्रनृत्तादिभिर्विना ॥ १०८ ॥

वीणावेणुनिनादैश्च तथा पुण्यहवाचनै. ।
विनाभिषेचिते मूलं शतमष्टोत्तरं जपेत् ॥ १०९ ॥

बिम्बेऽभिषिच्यमाने तु पतिते स्नानविष्टरात् ।
चलिते वा विशेषेण प्रतिष्ठास्नपनं चरेत् ॥ ११० ॥

चरुणा सर्पिषा चैव प्रागुक्तैर्मूलमन्त्रकैः ।
हुत्वा चाष्टोत्तरशतं तत्राङ्ख्यं च जपेत्ततः ॥ १११ ॥

प्रभापीठास्त्रवस्त्राङ्गभेदभङ्गादिदूषिते ।
तत्तद्बिम्बगतां शक्तिं नियोज्य ध्रुवकौतुके ॥ ११२ ॥

सन्धानं शिल्पिभिः कृत्वा सुसंस्कृत्य तदेव तु ।
शेषकर्मणि निर्वृत्ते स्नापयेदुत्तमक्रमात् ॥ ११३ ॥

तिलेन चरुणाज्येन प्रत्येकं च सहस्रशः ।
जुहुयान्मूलमन्त्रेण तेन शान्तिर्भविष्यति ॥ ११४ ॥

तदा न घटितुं शक्तिर्यदि स्याद्यत्नगौरवात् ।
शोभार्थबिम्बैः पुरतः स्थापितैः शयमाचरेत् ॥ ११५ ॥

एवमुत्सवतीर्थार्थशयनादिषु मूर्तिषु ।
तत्तदङ्गादिसन्धानं स्थापनं योजनं पुनः ॥ ११६ ॥

उक्तप्रमाणादधिके हीने स्नपनवस्तुनि ।
शरावे कलशे कूर्चे वस्त्रे कोष्टे सदस्यपि ॥ ११७ ॥

पालिकादौ तथा पीठे तोरणे चाष्टमङ्गले ।
द्वारमङ्गलकुंभेषु साधनेष्वितरेष्वपि ॥ ११८ ॥

मूलमन्त्रं जपेन्मन्त्री शतमष्टाधिकं सुधीः ।
मोक्षार्थी स्नापयेद्देवं सर्वकाले यथाविधि ॥ ११९ ॥

रिपूणां निग्रहार्थाय दिवा कुर्यात्तु सर्वदा ।
स्वर्गकामस्तु पूर्वाह्णे धर्मार्थी दिनमध्यमे ॥ १२० ॥

विनान्ते सर्वभोगार्थी प्रायश्चित्तेषु सर्वदा ।
चन्द्रसूर्योपरागे च तत्काले स्नापयेद्विभुम् ॥ १२१ ॥

संक्रान्तिषु च सूर्यस्य प्राग्वत् पश्चात्तथैव च ।
सङ्क्रान्तिकालविज्ञानान्नाड्यः षोडश षोडश ॥१२२॥

तदानीं स्नापयेद्देवमनुक्रान्ते हुनेन्मनुम् ।
सहस्रकृत्वस्तदनु तत्समं जपमाचरेत् ॥ १२३ ॥

पुरस्तात् सर्वकर्मार्थमङ्कुरेष्वर्पितेष्वनु ।
रक्तेषु श्यामवर्णेषु तथा तिर्यग्गतेषु च ॥ १२४ ॥

वक्रेषु चाप्ररूढेषु दक्षिणाभिमुखेषु च ।
विधिहीनेषु चास्पृश्यस्पृष्टेष्वविकृतैर्विना ॥ १२५ ॥

पालिकादिषु भिन्नेषु नष्टेषु पतितेषु च ।
मूषिकाद्यैश्च दष्टेषु मूलमन्त्रायुतं जपेत् ॥ १२६ ॥

पुरस्तादेकयागार्थमङ्कुरेष्वर्पितेषु च ।
असमाप्ते ततस्तस्मिन् प्राप्ते वैशेषिकान्तरे ॥ १२७ ॥

तदर्थमपि कुर्वीत पालिकास्वङ्कुरार्पणम् ।
उत्सवाद्यन्तयोर्मध्ये रक्षासूत्रविवर्जितम् ॥ १२८ ॥

बद्धप्रतिसरे बिम्बे स्नपनार्थं तु मन्त्रिणा ।
संप्राप्ते स्नपनेऽन्यस्मिन् शीघ्रकर्मनिमित्ततः ॥ १२९ ॥

तदर्थं कौतुकं बध्वा स्नानकर्म समाप्य च ।
पूर्वार्ध्यं प्रकुर्वीत प्रायश्चित्तादनन्तरम् ॥ १३० ॥

अन्यत्र क्रमशः कुर्यात् पूर्वार्ध्यं समाप्य च ।
अन्यथा चेदिदं कर्म निष्फलं भवति द्विज ! ॥ १३१ ॥

तद्दोषपरिहारार्थं शान्तिहोमो जपस्तथा ।
सहस्रसङ्ख्यया युक्तो मूलमन्त्रेण मन्त्रिन् ॥ १३२ ॥

स्नपनेऽस्मिन्नतिक्रान्ते मूलमन्त्रायुतं जपेत् ।
मूषिकासर्पमण्डूकचुचुंदर्यादिजन्तुभिः ॥ १३३ ॥

स्थापिते कलशे स्पृष्टे लङ्घिते सति तं त्यजेत् ।
पुनरन्यं तथा स्थाप्य जपेन्मूलशतं गुरुः ॥ १३४ ॥

प्रायश्चित्तेष्वनुक्तेषु एवमादिषु सत्सु च ।
मूलमंत्रायुतं चैव जपेदष्टोत्तरं गुरुः ॥ १३५ ॥

प्रायश्चित्तं प्रवक्ष्यामि महोत्सवविधौ मुने !
गृहे प्रतिष्ठिते बिम्बे न कुर्वीत महोत्सवम् ॥ १३६ ॥

स्वतन्त्रं परतन्त्रं च दिव्याद्यायतनं द्विधा ।
पर्वताग्रे नदीतीरे तीर्थानां निकटे विभोः ॥ १३७ ॥

स्थापितस्थालयं विद्धि स्वतन्त्रमिति सत्तम ।
ग्रामाद्यङ्गतया कल्प्तमस्वतन्त्रमितीरितम् ॥ १३८ ॥

तयोर्महोत्सवं कुर्यात् त्रयोदशविधं मुने ! ।
सङ्कल्प्यैकतमे तत्र प्रवृत्ते वत्सरं प्रति ॥ १३९ ॥

न तु कुर्याद्विभूत्यर्थं तस्मान्न्यून दिनोत्सवम् ।
अमत्या यदि कुर्वीत कुर्यादूर्ध्वं गतोत्सवम् ॥ १४०॥

प्राक् प्रवृत्त तु शान्त्यर्थमन्यथा स्यान्नृपक्षय ।
प्रमाणरहिते वंशे पटे वालध्वजेऽपि च ॥ १४१ ॥

वर्णभूषणमानाद्ये दण्डे यष्टौ च वैणवे ।
फेणके चावटे पीठे प्रपाया ध्वजरज्जुनि ॥ १४२ ॥

विधिवच्छान्तिहोमं तु जपान्तं प्राग्वदाचरेत् ।
छिन्ने भिन्नेऽग्निना दग्धे नष्टे मूषिकदंशिते ॥ १४३ ॥

विण्मूत्रश्वधिरापेयरेतोनिष्ठीवनादिभि ।
दूषितं ध्वजमुत्सृज्य प्राग्वदन्यं समाहरेत् ॥ १४४ ॥

प्रतिष्ठाप्याथ दण्डाग्रं मानयित्वाधमेन तु ।
संस्नाप्य दोषशान्त्यर्थं जुहुयात् सर्पिषा शतम् ॥

स्तम्भाग्रे ध्वजवस्त्रस्य रक्षाकार्याय दीयते ।
आरोहणं न दोषोऽत्र रक्षाहेतोर्द्विजादिभि. ॥ १४६ ॥

सुजीर्णान् फेणदण्डादीन् परित्यज्य ततोऽपरान् ।
संस्कृत्य योजयेत्तत्र वध्वा तु ध्वजमञ्जसा ॥ १४७ ॥

मध्यमस्नपनान्त तु शान्तिहोम समाचरेत् ।
वर्षवातातपस्पर्शै लुप्तवर्णे खगध्वजे ॥ १४८ ॥

न किंचिदप्यनिष्ट स्यात् स्तम्भाग्रे यावदुत्सवम् ।
वध्वा ध्वजपटे स्तम्भे वातवेगादिहेतुभि. ॥ १४९ ॥

मूलदेशे तु विच्छिन्ने सध्वजे पतिते सति ।
अकृत्वा ध्वजविश्लेष स्थापयेच्छेषमञ्जसा ॥ १५० ॥

स्नपनं चोत्तमं कुर्यात् चतु. स्थानार्चनादिकम् ।
गोभूहेमयवादीना दान शक्त्या समाचरेत् ॥ १५१ ॥

उत्सवध्वजभङ्गेन राज्याद्भ्रष्टो भवेन्नृप. ।
तस्मात्तत्परिहारार्थं त्वरया शान्तिमाचरेत् ॥ १५२ ॥

हेतुभिर्वातवेगाद्यैर्ध्वजे निपतिते भुवि ।
क्षिप्रमुद्धृत्य तद्ध्वा स्नपनं चाधमेन तु ॥ १५३ ॥

शान्त्यर्थं जुहुयादाज्य तिलेन शतसङ्ख्यया ।
ध्वजे निपतिते छिन्ने कुर्यात् स्नपनमुत्तमम् ॥ १५४ ॥

पुनरन्य समुत्पाद्य वध्नीयात् संस्कृत तथा ।
अन्यथा यदि दोष स्याद्राज्ञो राष्ट्रस्य मन्त्रिण ॥१५५॥

पक्षीशाधिष्ठिते कुभे नष्टे वा पतिते भुवि ।
स्पृष्टेऽस्पृश्यैस्तथा केशलोष्टास्थिशकृदादिभि. ॥१५६॥

कुंभेऽन्यस्मिन् समारोप्य ता शक्ति कुभमध्यगाम् ।
जप्त्वा मूलाद्युतं मन्त्री शेषकर्म समाचरेत् ॥ १५७ ॥

अनुक्ताना तु सर्वेषा जपेदेवं यथाबलम् ।
देवतावाहनार्थं तु भेरीताडनकर्मणि ॥ १५८ ॥

वाद्यजातेषु सर्वेषु मृदङ्गवणयादिषु ।
न स्थापितेषु स्वस्थानेतत्पूजातविलोपने ॥ १५९ ॥

पुण्याहपाठराहित्ये तथावाहनगाधया ।
सगणेषु च भूतेषु सगृहेषूत्कटादिषु ॥ १६० ॥

स्वासु दिक्षु यथान्यायमनाहूतेषु सत्सु च ।
द्वारावरणरक्ष्यासु ग्रामवास्तुष्वनुक्रमात् ॥ १६१ ॥

बलिप्रदानहीने तु तथा ताळस्वरादिषु ।
गेयनृत्तेषु हीनेषु शान्तिहोमपुरस्सरम् ॥ १६२ ॥

प्रत्येक देवतामन्त्रमष्टधाऽऽवर्तयेद्बुध ।
पुनरुत्वादयेत् सर्व देवतावाहनादिकम् ॥ १६३ ॥

अनङ्कुरार्पणाग्रं तु प्रारभेच्च महोत्सवम् ।
पुन. प्राप्ते दिने वाथ सद्यः कृत्वाऽङ्कुरार्पणम् ॥

शान्तिहोमं प्रकुर्वीत पूर्ववच्छतसङ्ख्यया ।
तथैव तीर्थयात्रार्थं भूतरात्रादिसिद्धये ॥ १६५ ॥

परिच्युतौ तथाङ्गानामङ्कुरार्पणकर्मणि ।
न कृतं चेत्तया साङ्ग तथा कौतुकबन्धनम् ॥ १६६ ॥

कर्तव्या पूर्ववच्छान्तिर्होमेन सजपेन च ।
उत्सवार्थाधिवासेषु चतु.स्थानार्चनेऽपि च ॥ १६७ ॥

आरंभकलशस्नाने स्नानबेराभिषेचने ।
महाहविषि होमे च दिवसेषु तथा निशि ॥ १६८ ॥

भूतादिरात्रिदेवाना बलिर्द्रव्यैर्यथोदितै. ।
हवने च तथोद्याने लीलया मृगयोत्सवे ॥ १६९ ॥

मृगयाया विशेषेण लोपः सञ्जायते यदि।
शान्तिहोमादिकं तत्तत् कृत्वा शेष समाचरेत्॥

अधिष्ठितेषु बिम्बेन यानेषु पतितेषु वा।
भिन्नेष्वपि च वाहेषु प्रमादाद्यत्र कुत्रचित्॥ १७१॥

यानान्तरे समारोप्य वाहने वाऽथ कौतुकम्।
शान्तिहोम पुरा कृत्वा जपेन्मूलसहस्रकम्॥ १७२॥

गोभूहेमादिक दद्याद्वेष्णवेभ्यो गुरोरपि।
यानाद्वा वाहनाद्वाऽपि बिम्बे तु पतिते सति॥ १७३॥

बलिबेरोक्तविधिना समाधानपुरस्सरम्।
स्नपनं शान्तिहोम च मन्त्रजापान्तमाचरेत्॥ १७४॥

समाधौ दीर्घकालीने कुर्याच्छोभार्थकौतुके।
शेषकर्म महार्चाया निर्वृत्ते सन्धिकर्मणि॥ १७५॥

पूर्ववत्ता प्रतिष्ठाप्य यथावच्छान्तिमाचरेत्।
शून्येषु ग्रामनगरपत्तनादिषु चोत्सवम्॥ १७६॥

बलिदानं न कुर्वीत कृते तत्रापि निष्फलम्।
समाहिते तु ग्रामादौ महाशान्तिपुरस्सरम्॥१७७॥

पुनरप्युत्सवं कुर्यात् ब्राह्मणानामनुज्ञया।
ग्रामादावग्निना दग्धे वात्याऽऽसारादिदूषिते॥१७८॥

शान्तिहोम पुरा कृत्वा पश्चादुत्सवमाचरेत्।
स्थापिते पर्वताग्रेषु दवबिम्बे महोत्सवम्॥ १७९॥

यथावकाशं कुर्वीत तत्रैव बलिपूर्वकम्।
तदासन्नेऽग्रहारादौ शक्यं चेत् कर्तुमुत्सवम्॥ १८०॥

बलिप्रदानरहितं तत्र कुर्यात् परिभ्रमम्।
देवताह्वानवेलायामाहूताना विभो पुरा॥ १८१॥

देवासुरगणादीनां भूतानामप्यनुक्रमात्।
उत्सवार्थबलि दद्यान्महापीठे दिवानिशम्॥ १८२॥

ध्वजार्थमङ्कुरानर्प्य ध्वजमुत्थाप्य वा तथा।
दीक्षार्थं कौतुकं बध्वा पुरा तीर्थावमर्षणात्॥ १८३॥

देशिके व्याधिते वाऽथ मृते कार्यान्तरोद्यते।
सूतकाद्युपघाते च शेषकर्मसमापनम्॥ १८४॥

कर्तव्यं गुरुणाऽन्येन जप्त्वा मूलायुतं जपेत्।
रिपुचोराग्निवृष्ट्यादिभयाद्विघ्ने महोत्सवे॥ १८५॥

जाते दद्याद्बलि तस्मिन्नष्टेऽप्यहनि देशिकः।
अतीतं तु बलि दद्याच्छान्तिहोमजपान्वितम्॥

कुर्यादुत्सवायात्रा च विहितेऽह्नि महोत्सवम्।
भ्रष्टाया तीर्थयात्रायामवारुह्य खगध्वजम्॥ १८७॥

पूर्ववद्ध्वजमुत्थाप्य कुर्यात्तीर्थान्तमुत्सवम्।
प्रतिरात्रिबलिद्रव्यव्यत्यासे सर्पिषा शतम्॥ १८८॥

हुत्वाऽग्नौ मूलमन्त्रेण जपेदष्टोत्तरं शतम्।
कालेऽन्यस्मिन् बलि दद्यात्तत्काले प्राप्तमञ्जसा॥

व्यासे बलिदेवाना जपो होमश्च तादृश।
अङ्कुरार्पणपूर्वश्च नारब्धश्चेन्महोत्सव॥ १९०॥

तथैव चाङ्कुरावाप कृत्वा मूलायुतं जपेत्।
विशेषात् पालिकावासे रथ्यावृतिषु चोत्सवे॥

ग्रामवास्तुषु रथ्यासु भूतानां बलिमाचरेत्।
न चाश्रये प्रकुर्वीत राजराष्ट्रविवृद्धये॥ १९२॥

दद्याद् ग्रामादिवृद्ध्यर्थं तस्मिन्नप्यालये बलिम्।
शान्तिहोमं प्रकुर्वीत बलिदानेऽन्यथाकृते॥ १९३॥

खद्योतपासुनीहारवर्षवातातपादिभि।
बिम्बे महोत्सवे स्पृष्टे सजपं होममाचरेत्॥ १९४॥

प्रपामण्टपपात्राणामग्निदाहे च पूर्ववत्।
निर्वापितेषु दीपेषु पूर्ववच्छान्तिरीरिता॥ १९५॥

वस्त्रभूषणमाल्याना हेतीना च तथैव च।
छत्रचामरपूर्वाणा महता मङ्गलात्मनाम्॥ १९६॥

ध्वजतोरणपूर्वाणा पीठानामङ्गरूपिणाम्।
अग्निदाहे समुत्पन्ने पुनरुत्पाद्य तानपि॥ १९७॥

सजप शान्तिहोम तु कुर्याद्दशोत्तरं शतम्।
प्रागुक्ताना च सर्वेषा दीपाना तु विशेषत॰॥ १९८॥

पतने भुवि सञ्जाते मूलमन्त्रेण मन्त्रवित्।
अष्टोत्तरसहस्र तु हुत्वा तत्सङ्ख्यया जपेत्॥ १९९॥

दिवारात्र्युत्सवं कुर्यादासूर्यास्तमयोदयात् ।
कालयोर्विपरीतश्चेदधमस्नपनं चरेत् ॥ २०० ॥

तीर्थयात्रा प्रकर्तव्या सूर्यस्यास्तमयात् पुरा ।
पूर्वभागे रजन्या वा कुर्यात् स्वव्यक्तदिव्ययो ॥

उत्तमस्नपनं कुर्यात्तीर्थकालविपर्यये ।
द्विवारयुक्ते तीर्थर्क्षे पुरूहूतक्षणान्वितम् ॥ २०२ ॥

पुण्यं भवेत्तत्पूर्वं स्यादुभयोर्विद्यते यदि ।
देवस्योत्सवयात्राया स्पृष्टेऽस्पृश्यैस्तु देशिके ॥

न दोषस्तत्र विज्ञेयो विशेषाद्देवसन्निधौ ।
उत्सवे होमविधुरे द्विगुण जुहुयाज्जपेत् ॥ २०४ ॥

नेत्रास्त्रसहित मूल प्रत्येकं शतसङ्ख्यया ।
सर्वभक्तजनैर्देवो यथाभिमुखदिङ्मुखैः ॥ २०५ ॥

स्रग्गन्धवस्त्रक्षीरान्नपानकापूपसत्फलैः ।
ताम्बूलैर्गन्धसमिश्रैस्तोषणीयो यथाबलम् ॥ २०६ ॥

सुस्थितैर्वाऽऽसनासीनैर्देशिकैर्वाथ साधकैः ।
पूजिते सति देवेशे न दोषो भक्तिगौरवात् ॥ २०७ ॥

बिम्बे चोरादिभिर्नष्टे वर्तमाने महोत्सवे ।
बिम्बान्तरं समापाद्य प्रतिष्ठाप्य यथापुरम् ॥ २०८ ॥

महाभिषेक हवन जप कृत्वा यथाविधि ।
कुर्यादुत्सवशेष तु कर्मार्चादिषु वाऽऽचरेत् ॥ २०९ ॥

निशाया सर्वशान्त्यर्थी पुष्ट्यर्थी मध्यमे दिने ।
आप्यायनार्थी पूर्वाह्णे धर्मार्थी मध्यतो निशि ॥ २१० ॥

तथा रिपुक्षयार्थी च पुष्पयागं समाचरेत् ।
न च पर्युषितैः पुष्पैः परिम्लानैस्तदार्चयेत् ॥ २११ ॥

तद्दोषशान्तये कुर्यात् स्नपनं मध्यमं चरेत् ।
न कृते पुष्पयागेऽस्मिन् कुर्यात् स्नपनमुत्तमम् ॥२१२॥

देशिकाः षट् समाख्याताः पुष्पयागे विशेषतः ।
चतुस्थानार्चनार्थं तु चत्वारः परिकीर्तिताः ॥

तथैकं स्नपनार्चाया बल्यादिषु तथेतरः ।
जलोत्थितानि पुष्पाणि त्रिरात्रोपोषितान्यपि ॥२१४॥

पुष्पयागे नियुञ्जीत न दोषस्तेषु सत्तम ! ।
तथैव पुष्पपूजार्थं कल्हारकुसुमान्यपि ॥ २१५ ॥

तथैव दमनीपत्रं पुष्पयागे विशेषतः ।
पूर्वरात्रोपोषितैश्च दिवा संपूजयेत् प्रभुम् ॥ २१६ ॥

न पूर्वाह्णोषितैस्तद्वन्निशाया तु समर्चयेत् ।
महोत्सवान्ते स्नपने न कृते स्नापयेत्ततः ॥ २१७ ॥

अधमोत्तममार्गेण शान्त्यर्थं जुहुयात्तत ।
तद्रात्रौ ध्वजदण्डाग्रादवरोप्य खगध्वजम् ॥ २१८ ॥

ग्रामादिवास्तुनिष्ठाना बलि दत्वा विसर्जयेत् ।
उत्सवान्ते ध्वजे नष्टे पुरस्तादवरोहणात् ॥ २१९ ॥

प्राग्वद् ध्वज समुत्थाप्य पुनरेवावरोहयेत् ।
एकाहो द्विबलिर्वाथ तथैकबलिरेव वा ॥ २२० ॥

बलितीर्थविहीनो वा परिभ्रमणवर्जितः ।
चतुर्भिर्बलिभिर्युक्तः त्रियहः पञ्चवासरात् ॥ २२१ ॥

पञ्चानामुपरिस्थानामानक्षत्रदिनोत्सवात् ।
द्विगुण दिनसङ्ख्याया विहीने बलिमाचरेत् ॥

ऊनाऽधिकैश्चेद्बलिभिर्युक्तास्त्वेते महोत्सवाः ।
कर्तुः कारयितुश्चापि राज्ञो राष्ट्रस्य मन्त्रिणः ॥ २२३ ॥

दारुणा व्याधयो नित्य भविष्यन्त्यसुखान्यपि ।
तद्दोषशान्तये कुर्यात् स्नपनं चाधमोत्तमम् ॥ २२५ ॥

वैशेषिकेषु प्राप्तेषु वर्तमाने महोत्सवे ।
द्वादश्यादिषु तत् सर्वं यथान्यायं समर्चयेत् ॥ २२६ ॥

न लोपयेत् प्रयत्नेन प्राप्तं वैशेषिकं सुधीः ।
जपेदस्त्रायुत मन्त्री त्वकृतेषु च शान्तये ॥ २२६ ॥

प्रायश्चित्तमितो वक्ष्ये पवित्रारोहणाय ते ।
अप्रमाणे पवित्राणा कुण्डमण्डलयोरपि ॥ २२७ ॥

अस्त्रमन्त्रायुतं जप्त्वा पूजयेदस्त्रबन्धनम् ।
पत्रपुष्पफलादीना पूरकाणां तथैव च ॥ २२८ ॥

अतीत उक्तकाले तु चातुर्मास्यस्य मध्यतः ।
मध्यम स्नपनं कृत्वा कालेऽन्यस्मिन् तदाचरेत् ॥

कालात्यये तथान्येषु शान्तिरेवं विधीयते।
पवित्रे केशपाषाणचर्माङ्गारनखादिभिः ॥ २३० ॥

दूषिते वह्निना दग्धे छिन्ने दष्टेऽथ भक्षिते।
मूषिकाद्यैश्च काकाद्यैः स्पृष्टे त्यक्त्वा तु तत् पुन ॥

सूत्रैस्तथाविधं कृत्वा त्वधिवास्य यथापुरम्।
उत्तमं स्नपन कृत्वा समारोप्य पवित्रकम् ॥ २३२ ॥

शान्त्यर्थं जुहुयान्मन्त्री मधुक्षीरादिभि. क्रमात्।
अष्टोत्तरं शतं मूलमन्त्रादि च तथा जपेत् ॥ २३३ ॥

अस्पृश्यैरपि संस्पृष्टममत्यारोपित यदि।
पुनरन्यं समारोप्य पूर्ववच्छान्तिमाचरेत् ॥ २३४ ॥

स्थापित पूजितं कुंभमस्पृश्य संस्पृशेद्यदि।
कुभान्तरे समावाह्य जपेन्मूलसहस्रकम् ॥ २३५ ॥

कुभभेदे तथा स्थाप्य मूलमन्त्रायुत जपेत्।
अत्र बिम्बस्य पतने भेदे च्छेदे यथापुरम् ॥ २३६ ॥

समाधानादिकं कृत्वा स्थाप्य शान्ति समाचरेत्।
पवित्रैरक्रमेणैव पूजयेद्यदि देशिक. ॥ २३७ ॥

शान्तिहोम पुरा कृत्वा मूलमन्त्रं शतं जपेत्।
मुहूर्ते समतिक्रान्ते शुभे यजनविस्तरात् ॥ २३८ ॥

तदन्यस्मिन् समारोप्य कृत्वा स्नपनमुत्तमम्।
स्थापिते वहुबेरे तु दिव्याद्यायतनेषु च ॥ २३९ ॥

मुख्यकल्पविधाने तु पवित्रारोहकर्मणि।
देशिका वहव. प्रोक्ताः ध्यानमन्त्रक्रियान्विता. ॥

तेष्वेक. कुंभपूजायामितरो मण्डलार्चने।
अर्चायामितरो विद्वानितरः पावकार्चने ॥ २४१ ॥

मूलालये तथैकश्च अन्यः शोभाश्रयार्चने।
गरुडस्यार्चने त्वन्यो विष्वक्सेनार्चने पर ॥ २४२ ॥

तथैक. स्नानबेरे स्याद्बलिदाने तथा पर.।
नित्याग्निहवने त्वन्यो महोदनविधौ परः ॥ २४३ ॥

अष्टभिर्वा समारोप्यं कर्मलाघवमीक्ष्य च।
तत्र तत्र च तै. कार्यं पवित्रारोहणं परम् ॥ २४४ ॥

एकाहमुत्सवं कृत्वा तस्मिन्नहनि पूर्ववत्।
तीर्थयात्रा प्रकुर्वीत तदन्यस्मिन् दिने दिवा ॥ २४५ ॥

द्विरात्रौ प्राग्दिनादौ वा कुर्यात्तीर्थावमर्पणम्।
द्वितीयादौ चतुर्थाहमाचरेत् त्रियहोत्सवम् ॥ २४६ ॥

प्रधानदिनमारभ्य सप्ताहो वा महोत्सव.।
तयोरन्तेऽपि कर्तव्या तीर्थयात्रा यथापुरम् ॥ २४७ ॥

एवं तीर्थान्तिमा. कल्याः पवित्रारोहणक्रिया.।
न कृता तीर्थयात्रा चेन्निष्कृति स्नपनोत्तमम् ॥२४८॥

अङ्कुरार्पणपूर्वं तु प्रारभ्यात् प्राग्वदुत्सवम्।
तत्तीर्थदिनयामिन्या पवित्राणा विसर्जनम् ॥ २४९ ॥

कृत्वा गुरो प्रदातव्य पाञ्चरात्रार्थकोविदैः।
तदभावात्तदन्येषा माचार्याणा यथाक्रमम् ॥ २५० ॥

समर्पणीयमन्येषामयोग्यानां नियोजनात्।
पुनर्निवेद्य विधिवत् पवित्राणि प्रदाय च ॥ २५१ ॥

मध्यमं स्नपन कृत्वा शान्तिहोमं समाचरेत्।
प्रकल्पे वा यथापूर्वं चातुर्मास्ये विधानत. ॥ २५२ ॥

मुख्यमध्याधमे चैव प्रागुक्तेषु दिनेषु च।
न कल्पिते तथैकस्मिन् चान्द्रायणपुरस्सरम् ॥ २५३ ॥

तदनन्तरसंप्राप्ते दिवसे प्रारभेच्च तत्।
तदाद्यमष्टपक्षं च विधिवन्नियतो भवेत् ॥ २५४ ॥

चातुर्मास्यं तु संकल्प्य वर्तमाने व्रतोत्तमे।
विच्छिन्ने सति मध्येऽस्य पारतन्त्र्यादिहेतुना ॥२५५॥

कालान्तरे च संकल्प्य कार्यश्चान्द्रायणादिक ।
काले तस्मिन् प्रकुर्वीत यथावच्छयनादिकम् ॥ २५६ ॥

तद्व्युत्यये विलोपे च चतु. स्थानार्चनादिकम्।
जप्त्वा मूलायुतं मन्त्री शान्त्यर्थं जुहुयात्तदा ॥ २५७॥

नृसिंहकपिलक्रोडहयहंसादिरूपिणाम्।
तथा वक्त्रविशिष्टाना शक्तीशस्य विशेषतः ॥ २५८ ॥

तथा च जामदग्न्यस्य विश्वरूपस्य वै प्रभोः।
पारिजातहरस्यापि तथा कल्क्यात्मनो हरे ॥ २५९ ॥

शयनं न तु कुर्वीत प्रासादेषु स्थिरस्थितौ ।
सौम्यरूपं समासाद्य कौतुक कारणावशात् ॥ २६० ॥

तदर्थं शाययेद्वाथ चातुर्मास्ये विधानत. ।
उत्थापिते तु देवेशे चतुःस्थानेऽर्चिते सति ॥ २६१ ॥

वस्त्राभरणमाल्याद्यैर्यथाशोभमलंकृतम् ।
विहगेशे प्रतिष्ठाप्य उत्सवार्चागत विभुम् ॥ २६२ ॥

अशेषभुवनग्रामं विधिना दोषशान्तये ।
महोत्सवोक्तविधिना परिभ्राम्य विशेषतः ॥ २६३ ॥

एकरात्रादियोगेन प्रागुक्तविधिना तत ।
कुर्यादवभृथं स्नानं नदीतीरादिषु प्रभोः ॥ २६४ ॥

अनुकल्पे विधानं तद्विना तीर्थावमर्षणम् ।
मध्ये सूर्यस्य सङ्क्रान्त्योर्दर्शद्वयसमन्वितः ॥ २६५ ॥

तद्वद्दर्शवियुक्तश्च मलमास इतीरित. ।
चातुर्मास्योऽयमग्राह्यः सदारंभावसानयोः ॥ २६६ ॥

दिनत्रये तु प्रागुक्ते प्रारब्धे सति मध्ययोः ।
मलमासस्य सङ्गत्या कदाचिच्च न दोषत. ॥ २६७ ॥

अधिके मासि सर्वत्र तथाऽस्ते गुरुशुक्रयो ।
औत्सव. प्रथमारंभः न कार्यो हितमिच्छता ॥ २६८ ॥

स्वयंव्यक्तालयाद्येषु तीर्थेषु गिरिमूर्धनि ।
नदीतीरेषु रम्येषु वनेषूपवनेषु च ॥ २६९ ॥

गोष्ठेषु मुनिमुख्यानामाश्रमेषु हरेः पुनः ।
सङ्कल्प्य नियतं वासमभीष्टव्रतसिद्धये ॥ २७० ॥

नेतव्यं देशिकेन्द्राद्यैस्तथा मासचतुष्टयम् ।
नदीनगादितरणं नाचर्तव्यं कदाचन ॥ २७१ ॥

नद्यादिव्यवधानेऽपि दिव्यमायतनं प्रति ।
गन्तव्यं योजनादर्वाक् शुभयात्राधिकारिभि. ॥

विशेषेण द्विषट्कार्णपूर्वैर्व्यापकपञ्चकै ।
सदाराधननिष्ठाना पञ्चकालरतात्मनाम् ॥ २७२ ॥

दिव्यक्षेत्राभिगमनं न खण्डयति तद्व्रतम् ।
सूतक मृतकं नैव कालेऽस्मिन् नियतात्मनाम् ॥

प्राणिहिंसा न कर्तव्या द्रुमविच्छेदनं तथा ।
नदीकेदारकूलाना भेदनं सस्यशोषणम् ॥ २७५ ॥

देवतायतनादीना पीडन तन्निवासिनाम् ।
वापीकूपतटाकाना पूरणं मृच्छिलादिभि. ॥ २७६ ॥

बन्धनं च द्विजातीना सहवासं विजातिभिः ।
सभाषणं तथा तेभ्यो मात्रा वित्तपरिग्रहम् ॥ २७७ ॥

तस्मिन् काले विशेषेण वर्जयेद् बुद्धिमान्नरः ।
य एवं कुरुते तस्य प्रायश्चित्तेन निष्कृति ॥ २७८ ॥

कदाचिज्जायते वाऽथ नानाधर्मप्रतिष्ठया ।
स्थापनं वासुदेवस्य तेषु मुख्यं प्रकीर्तितम् ॥ २७९ ॥

एकान्तिद्विजमुख्याना स्थापनं मध्यमं भवेत् ।
अन्येषामपि सर्वेषा प्रतिष्ठा चरमा भवेत् ॥ २८० ॥

प्रतिष्ठाया प्रवक्ष्यामि प्रायश्चित्त यथाक्रमम् ।
क्ष्माशिलातरुसल्लोहपूर्वाणां तु परिग्रहे ॥ २८१ ॥

तत्तदङ्गे यथोदीर्णद्रव्यमन्त्रक्रियादिषु ।
परिच्युतेषु तद्भूयः शान्तिहोमजपादिकम् ॥ २८२ ॥

समाचरेद्यथा शास्त्रमन्यथा निष्फलं तु तत् ।
अकृते सति सर्वस्मिन् वास्तुदेशपरिग्रहे ॥ २८३ ॥

आनीतस्यालयक्षेत्रे शिल्पिभि. सत्क्रियां विना ।
यथावदाचरेद्विद्वानर्चाद्रव्यस्य संग्रहम् ॥ २८४ ॥

मृद्दारुवसनादीनामेवमेव समाचरेत् ।
अन्यालयार्थमानीता शिलामर्चा सुनिर्मिताम् ॥२८५॥

सर्वावयवसपन्ना स्थापने तु विलम्बिताम् ।
न्यायेनादाय तामर्चा स्थापयेत् सिद्धसद्मनि ॥ २८६ ॥

प्राग्वदन्यां समापाद्य स्थापयेत् प्राक् प्रकल्पिते ।
निर्मिता प्रतिमा शीघ्रं स्वगृहे न निवेशिताम् ॥२८७॥

राज्ञो राष्ट्रस्य तत्कर्तुररिष्टमुपपादयेत् ।
एकविंशद्दिनादूर्ध्वमासुरी सा भवेद्ध्रुवम् ॥ २८८ ॥

कृत्वा महाभिषेकाद्यं स्थापयेदन्यथा त्यजेत् ।
प्रमाणरहिते बिम्बे पीठशस्त्रप्रभादिके ॥ २८९ ॥

वस्त्रे वा भूषणे वाऽथ शमीपत्रसमन्वितम्।
घृतसिक्तेश्च बहुशः सतिले. शालितण्डुले. ॥ २९० ॥

जुहुयात् पञ्चभिर्मन्त्रै. प्रत्येक शतसङ्ख्यया।
जलाधिवासस्नपने तथा नयनमोक्षणे ॥ २९१ ॥

शयने वेदिकाया च मन्त्रन्यासादिकर्मसु।
कुम्भमण्डलपूजाया द्वारतोरणकुम्भयोः ॥ २९२ ॥

अयथाकारणे नूनं पूर्ववच्छान्तिरिष्यते।
अस्थाने स्थापिते बिम्बे पादाधारशिलान्वितम् ॥

तदानीमेव चोद्धृत्य स्थापयेत् सम्यक् पदे।
मध्यमस्नपनं कृत्वा शान्तिहोम समाचरेत् ॥ २९४ ॥

न स्थापिते मुहूर्तेऽस्मिन् तदा बिम्बमुद्धरेत्।
पूर्ववत् स्नपने होमे कृते शान्तिर्भविष्यति ॥ २९५ ॥

स्थापनेऽधिकृते मुख्ये देशिके व्याधिते सति।
न्यस्तदेहेऽथवा मध्ये वर्तमाने क्रियाक्रमे ॥ २९६ ॥

क्रियामन्त्रोपदेष्टा च प्रतिष्ठाकर्मणि स्थित.।
पुत्रो वा देशिकेन्द्रस्य स्थापने शेषमाचरेत् ॥ २९७ ॥

अन्ते सहस्रकलशैरभिषिच्य सुरेश्वरम्।
चक्राम्बुरुहकुण्डे तु मधुक्षीरादिभि क्रमात् ॥ २९८ ॥

शान्त्यर्थमयुतं हुत्वा तत्सङ्ख्य जपमाचरेत्।
ब्राह्मणैः क्षत्रियैर्वैश्यै. शूद्रैर्वा भगवन्मय. ॥ २९९ ॥

सकामैरथ निष्कामैर्मन्त्राराधनतत्परैः।
साधकैर्भगवद्बिम्बस्थापनार्थं सदैव हि ॥ ३०० ॥

पुरा प्रसावनीयश्च प्रार्थनापूर्वकं तु वा।
अधिकारपरस्थश्च द्विजेन्द्र पाञ्चरात्रिक ॥ ३०१ ॥

वेत्ता यो व्यूहपूर्वस्य व्यक्तस्य परमात्मनः।
सोऽन्येषा भगवद्बिम्बस्थापनेऽधिकृतः सदा ॥ ३०२ ॥

अनुग्रहप्रतिष्ठा चाप्यधिकारनिरूपणा।
अनन्यैरुपपन्नाना भक्तानां कार्यमुच्यते ॥ ३०३ ॥

अनन्याः पञ्चकालज्ञा व्यतिरिक्ता न ये प्रभोः।
प्राक् सृष्टास्तन्मुखोद्भूताः द्विषट्काध्यात्मचिन्तकाः ॥

चातुर्व्यूहपरत्वेन येषा वै प्रभवाप्ययौ।
कर्मणामपि सन्न्यासं कुर्वन्त्यव्यक्षत. क्रमात् ॥ ३०४ ॥

अतोऽमी दुर्लभतरा. पारम्य यस्य न प्रति।
प्रमेयनिष्ठा श्रद्धा वा स्फुटास्तत्कर्मणि स्थिता. ॥

परत्वमन्यमार्गस्था नेच्छन्ति च परस्परम् ॥
य इच्छन्ति विभोस्तेषा स्थितिर्नास्ति तथा कृतौ ॥

मुक्ताधिकारिणं त वै लब्धलक्षमकृत्रिमम्।
पञ्चकालरत सिद्धं तन्त्रसिद्धान्तपारगम् ॥ ३०८ ॥

तेनैव श्रुतिमन्त्राणा स्थूलानामपि चोदना।
प्रतिकर्मणि वै कार्या यथावसरलक्षणा ॥ ३०० ॥

यस्मादब्जसमुद्भूतमण्डलादिषु वृत्तिषु।
स्वार्थतो वा परार्थेन सदाराधनकर्मणि ॥ ३१० ॥

नित्यसिद्धे तदाकारे तत्परत्वेऽपि सन्ततम्।
यस्यास्ति सक्तिर्हृदये तस्यासौ सन्निधि व्रजेत् ॥

मन्त्ररूपी जगन्नाथ परमात्माच्युत प्रभु.।
अत्यौत्सुक्यं विना विप्र! मनस प्रीतये त्वपि ॥

कामाप्तये वा कीर्त्यर्थं तस्य तद्विहित द्विज!।
सध्यानेन प्रतिष्ठान प्रासादे स्वगृहेऽपि वा ॥ ३१३ ॥

इति सम्यक् समाख्यात मुख्यकल्प महामते!।
अनुकल्पं यदन्यत् तत्समासान्निबोध तु ॥ ३१४ ॥

प्राक् प्राप्तदीक्षितैर्विधिवत्, त्रयीधर्मस्थितैर्द्विजै.।
नित्याराधनसक्तैस्तु भक्तैर्भगवतो विभो. ॥ ३१५ ॥

धारणाध्यानपूर्वाणा लब्धलक्षैस्तु कर्मणाम्।
मन्त्रमण्डलमुद्राखकुण्डादीना कृतश्रमै. ३१६ ॥

पडङ्गव्याप्तिनिष्ठैस्तु त्यागशीलैरमत्सरै।
अनुज्झितक्रमैर्दक्षै. स्वकर्मपरिपालकै. ॥ ३१७ ॥

सत्कीर्तिप्रथितेर्लोके तथाऽकीर्तिविहिष्कृतै।
प्रतिष्ठा लभते कर्ता ते प्रतिष्ठापने कृते ॥ ३१८ ॥

निषिद्धमरविन्दाक्षे अतोऽन्येषा हि सर्वदा।
महामहं प्रतिष्ठाख्यं कर्तुर्व्यामिश्रयाजिनाम् ॥ ३१९ ॥

ये पुनर्लोकधर्मस्थाः समबुद्धिपदे स्थिताः ।
भगवत्यविशेषज्ञा नित्यं कार्यवशेन तु ॥ ३२० ॥

वाङ्मात्रेण परत्वं वै सर्वेषां प्रवदन्ति वै ।
अधिकारं विना येऽत्र प्रेरिता देवतार्चने ॥ ३२१ ॥

व्यामिश्रयाजिनस्ते वै पातित्यपदसंस्थिताः ।
नयन्ति नरकं नूनमेवमेव प्रवर्तिनः ॥ ३२२ ॥

न तु सद्भक्तिपूतानां वासुदेवरतात्मनाम् ।
कदाचित्तत्कृते दोष विदधाति च खण्डना ॥ ३२३ ॥

अतस्तावन्महाबुद्धे ! कर्तव्य भक्तिपूर्वकम् ।
भक्त्या वै मन्त्रनिष्ठाना तन्मन्त्रो जपकर्मणि ॥ ३२४ ॥

वर्णव्यत्ययमापन्नो लुप्तस्तेन स्वरेण वा ।
स्वरादिनाधिकश्चैव मन्त्रोऽनर्थप्रदः सदा ॥ ३२५ ॥

अचिरात्तत्प्रयोक्तृणा तथापि कमलोद्भव ! ।
अतिभक्तिप्रभावाच्च वाञ्छितं संप्रयच्छति ॥ ३२६ ॥

यस्मात् सद्भक्तिपूतानां प्रपन्नाना क्रम विना ।
प्रसादमेति मन्त्रेशस्त्वचिराद्भावितात्मनाम् ॥ ३२७ ॥

कि पुनर्वै क्रियाज्ञानसंपूर्णानां द्विजोत्तम ! ।
श्रद्धाभक्तिपराणा च बोधिताना च देशिकैः ॥ ३२८ ॥

तस्मात् सर्वप्रयत्नेन शासनेऽस्मिन्महामते ! ।
कार्य दीक्षादिक सर्व भक्ताना भक्तवत्सले ॥ ३२९ ॥

मामसंप्रतिपन्नोऽपि मत्प्राप्त्यर्थ करोति च ।
मन्दमध्यमभक्तानां कामभोगरतात्मनाम् ॥ ३३० ॥

भविना मामकी दीक्षां मोहाद्वा स्थापनादिकम् ।
स नयत्यचिरात्तस्य भक्तिर्बीजेन वै सह ॥ ३३१ ॥

समन्त्रं कर्मतन्त्रं च सिद्धयश्च पराङ्मुखम् ।
इहैव शीघ्रं विप्रेन्द्र ! दहान्ते गतसन्ततिः ॥ ३३२ ॥

घोरं प्रयाति नरकं भुक्त्वैवं दुष्कृतं महत् ।
भगवन्मन्त्रमाहात्म्यात्तद्यापारवशात्तु वै ॥ ३३३ ॥

संसर्गोत्थमघं याति प्राक संस्कारवशात् पुनः ।
चीर्णदुश्चरितो भूयः प्राप्नुयान्मानुषी तनुम् ॥ ३३४ ॥

प्रयत्नमाचरेच्छुभ्रं येन शान्तिमवाप्नुयात् ।
साहङ्कारः स आचार्य स्वभक्तो नाधिकार्यपि ॥

प्राप्नोति नूनं स्वगति स्वकामो नारकी तथा ।
सर्वगस्त्वपि मन्त्रात्मा सर्वानुग्रहकृद्द्विजः ॥ ३३६ ॥

यद्यप्येवं हितं तत्र न भजेत्तत्र सन्निधिम् ।
प्रतिमामभ्यदेहान्तं नूनमावाह्य तत्क्षणात् ॥ ३३७ ॥

भूतवेताळयक्षाद्याः कुर्वन्त्यर्थादिकक्षयम् ।
अन्यदर्शनसस्था ये नानुग्राह्यास्ततो मुने ! ॥ ३३८ ॥

नोपास्यो हि तथाचार्य संसारभयभीरुणा ।
सम्यग्भक्तिपरेणैव डम्भरागोज्झितेन च ॥ ३३९ ॥

अत एव महाबुद्धे ! प्रतिष्ठाख्यं मखोत्तमम् ।
निर्वर्तनीयमामूलाद्वैष्णवान। च वैष्णवै ॥ ३४० ॥

एवं द्रव्यमयो यत्र सन्निवेशो मुनीश्वर ! ।
उभयानुग्रहं नित्य करुणाभक्तिलक्षणम् ॥ ३४१ ॥

प्रतिष्ठाख्यं हि तत् कर्मभुक्तिमुक्तिफलप्रदम् ।
तच्च सद्ब्रह्मनिष्ठाना द्विजानामात्मसिद्धये ॥ ३४२ ॥

कर्तव्यत्वेन वै नित्य प्रसिद्धममलेक्षण ! ।
तद्दोषाच्च यतस्तेषा विस्तारो हि न विद्यते ॥ ३४३ ॥

देहपातादृते नान्य तत्पातस्त्वतिदोषकृत् ।
आदावेव हि तत्तस्मा आचर्तव्य कृतात्मभिः ॥ ३४४ ॥

तत्कर्मप्रतिपन्नानां चतुर्णामपि तैः सदा ।
कार्य सम्यक् प्रतिष्ठानमनुग्रहधिया मुने ! ॥ ३४५ ॥

नोपरोधः स्वभावेन न लोभेन न नामतः ।
प्राप्ते ह्याकस्मिके दोषे त्वङ्गभङ्गादिके मुने ! ॥ ३४६ ॥

भक्तानामनुकपार्थ दिव्यैर्मन्त्रैर्बलादिकैः ।
द्वादशाक्षरपूर्वैश्च मोक्षैकफललक्षणैः ॥ ३४७ ॥

संपूजिते तु तैर्भक्तैः कुरुते निष्कृति सदा ।
सर्वनाशेन बिम्बानामङ्गमात्रोपकल्पना ॥ ३४८ ॥

तत्तत्कर्तव्यमुद्दिश्य विशेषः प्रागुदीरितः ।
तथापि विस्तरेणात्र विधानमवधारय ॥ ३४९ ॥

देवसिद्धमुनीन्द्राद्यैरेवंसंस्थापिते सति ।
बिम्बे चोरादिभिर्नष्टे सद्य संपाद्य पूर्ववत् ॥ ३५० ॥

स्थापयेद्विधिवन्मन्त्री रात्रावहनि सन्ध्ययोः ।
न कालोऽत्र परिज्ञेयो नष्टोद्धारे विशेषतः ॥ ३५१ ॥

बालालये तु प्रथमे जीर्णोद्धारे तथान्तिमे ।
प्रायश्चित्तं प्रवक्ष्यामि मुने ! सम्यक् शृणुष्व मे ॥

अतीते प्रार्थिते काले कृत्वा प्रासादबेरयोः ।
निर्माणे स्नपनं कार्यमुत्तमं शास्त्रचोदितम् ॥ ३५३ ॥

पश्चादप्यर्थयेत् कालं वाञ्छितं तत्समापने ।
न कृत्वैवं गते पश्चात् काले द्वादशवार्षिके ॥ ३५४ ॥

पुनः प्रतिष्ठां कुर्वीत मूले बालालये तु वा ।
बिम्बे चोरादिभिर्नष्टे बालगेहे प्रमादतः ॥ ३५५ ॥

तथैवापाद्य तामर्चां प्रतिष्ठाप्य यथाविधि ।
अधमस्नपनं कृत्वा शान्तिहोमं समाचरेत् ॥ ३५६ ॥

स्वस्थानाच्चलिते तस्मिन् हेतुना येन केनचित् ।
यथापूर्वं प्रतिष्ठाप्य स्नापयेत्पुरुषोत्तमम् ॥ ३५७ ॥

सर्वं बालगृहे कार्यं नित्यनैमित्तिकात्मकम् ।
एकबेरविधानेन पवित्रारोहणश्चिमम् ॥ ३५८ ॥

स्तेनैर्नष्टे तथा बिम्बे तत्तद्द्रव्येण पूर्ववत् ।
निर्माय लक्षणोपेतं प्रतिष्ठाप्य तथैव तु ॥ ३५९ ॥

पूर्ववत् पूजयेन्मन्त्री बिम्बं सर्वत्र सर्वदा ।
द्रव्यान्तरेण वा कुर्याद्देशिको यागसिद्धये ॥ ३६० ॥

चोरैरपहृतं बिम्बं पुनः प्राप्तं यदि द्विज ! ।
पुनः प्रतिष्ठां कुर्वीत नयनोन्मीलनं विना ॥ ३६१ ॥

चोरभूतैर्द्विजैः स्पृष्टे अधमस्नपनं चरेत् ।
उत्तमस्नपनं कुर्यात् प्रवेशे गर्भवेश्मनि ॥ ३६२ ॥

चिरोषिते तु संस्पृष्टे प्रतिष्ठां पुनरारभेत् ।
श्वसृगालबिडालाद्यैः प्रविष्टे गर्भवेश्मनि ॥ ३६३ ॥

अधमस्नपनेनैव शान्तिहोमं समाचरेत् ।
अधिष्ठितेङ्गणे चैतैः शान्त्यर्थं जुहुयाच्छतम् ॥ ३६४ ॥

एतैर्बिम्बे तु संस्पृष्टे स्नापयेन्मध्यमोत्तमम् ।
स्पृष्टे तु पक्षिभिः कैश्चिद्दोष आयतने भवेत् ॥ ३६५ ॥

काककुक्कुटगृध्राद्यैः स्पृष्टे बिम्बे प्रमादतः ।
पूर्ववत् स्नपनं कृत्वा शान्तिहोमं समाचरेत् ॥ ३६६ ॥

खद्योताद्यैस्तु संस्पृष्टे अधमस्नपनं चरेत् ।
न भृङ्गमक्षिकाद्यैस्तु स्पृष्टे दोषो भवेद्ध्रुवम् ॥ ३६७ ॥

तथा पिपीलिकाद्यैस्तु न तत्प्रायैर्विशेषतः ।
रेतोरुधिरविण्मूत्रापेयमांसादिवस्तुभिः ॥ ३६८ ॥

देवबिम्बे तु संस्पृष्टे कुर्यात् स्नपनमुत्तमम् ।
एते स्पृष्टेऽङ्गणादौ तु तस्माद्दूरत्य तत्क्षणात् ॥ ३६९ ॥

गोमयेनोपलिप्याथ प्रोक्षयेद्द्रव्यपञ्चकैः ।
शान्त्यर्थं जुहुयान्मन्त्री तिलाज्याभ्यां शतं शतम् ॥

वैश्यैश्च वैष्णवैर्बिम्बे शूद्रैः स्त्रीभिर्विशेषतः ।
विमाने स्थापिते स्पृष्टे क्षालयेत् पञ्चगव्यकैः ॥

शान्तिहोमं प्रकुर्वीत मधुक्षीरादिभिः शतम् ।
बिम्बेऽनुलोमैः संस्पृष्टे प्रतिलोमैश्च गर्हितैः ॥ ३७२ ॥

स्नपनं शान्तिहोमं च सदानं सर्वदा चरेत् ।
वैखानसैस्तु संस्पृष्टे पयःस्नानेन शुध्यति ॥ ३७३ ॥

आराधिते स्वमार्गेण प्रतिष्ठामाचरेत् पुनः ।
प्रतिमा चैव तत्पीठं प्रासादो गर्भमन्दिरम् ॥ ३७४ ॥

विग्रहं देवदेवस्य चतुष्टयमिदं समम् ।
समाधिश्च तथा शान्तिः कार्या तत्र सदा समा ॥

वेदिकायां तथा चक्रे पङ्कजे चक्रपङ्कजे ।
हेमादिद्रव्यरचिते मण्डले रजसा कृते ॥ ३७६ ॥

समाधिश्चैव शान्तिश्च प्रतिपत्तिश्च तादृशी ।
प्राकारे गोपुरद्वारमण्टपादिपरिष्कृते ॥ ३७७ ॥

शिवादिभिर्न दोषोऽस्ति प्राङ्गणादावधिष्ठिते ।
प्रविष्टे यजनस्थाने प्रोक्षयेत् पञ्चगव्यकैः ॥ ३७८ ॥

मण्टपाङ्गणशालासु मालिकाद्यासु भूमिषु ।
पूजाङ्गत्वेन विहितैर्गुरुसाधकदीक्षितैः ॥ ३७९ ॥

न दोषो द्विजशार्दूल! शयनासनभोजनै ।
पादप्रक्षालनाचामस्नानाभ्यङ्गादिकैरपि ॥ ३८० ॥

अन्ये. क्लृप्तेषु चैतेषु गोमयेनोपलिप्य च ।
प्रोक्षयेत् पञ्चभिर्गव्यैः कुशोदकसमन्वितै. ॥ ३८१ ॥

बिडालमूषिकासर्पमण्डूककृकलासकै. ।
आखुचुचुन्दरी गोधाराजिलाद्यैश्च जन्तुभि ॥

अधिष्ठिते गर्भगेहे शान्तिहोमं समाचरेत् ।
मक्षिकावासवल्मीककृमीणा निचयेष्वपि ॥ ३८३ ॥

बिम्बे विमाने जातेषु तदैवोद्धृत्य तान् पुन ।
समाधाय यथापूर्वं चतु स्थानार्चनादिकम् ॥ ३८४ ॥

स्नपन देवदेवस्य कुर्यादुत्तममध्यमम् ।
मण्टपादौ तु सर्वत्र कुत्रचिद्वा हरेर्गृहे ॥ ३८५ ॥

ब्रह्मदण्डादिगेहे च छत्राकाणा समुत्थितौ ।
दुष्टसत्त्वगणापूर्वपक्षिसद्मसमाकुले ॥ ३८६ ॥

शान्तिहोमं प्रकुर्वीत तान् व्यपोह्य तदैव तु ।
विमाने तेषु जातेषु मध्यमस्नपन चरेत् ॥ ३८७ ॥

बिम्बे यदि तदा कार्यं प्रवासावसथादिकम् ।
कर्म कृत्वा यथापूर्वं त्यागान्तं तु नृपाज्ञया ॥ ३८८ ॥

नवीकृत्य पुनर्बिम्बं पुरावत् स्थापयेद्बुध ।
एकस्त्रीषु समुत्पन्नास्वर्चायामेवमेव तु ॥ ३८९ ॥

समाधाय प्रतिष्ठाप्य शान्त्यर्थं पुनरेव तु ।
स्नापयेद्देवदेवेशमुत्तमोत्तमवर्त्मना ॥ ३९० ॥

विमान आसु जातासु कुर्यात् स्नपनमध्यमम् ।
मण्टपादिषु जातासु स्नपनं च समाचरेत् ॥ ३९१ ॥

दृष्टास्वेतासु विप्रेन्द्र! प्राङ्गणादौ तु कुत्रचित् ।
तास्तदैव समुद्धृत्य गव्यैः सप्रोक्षयेत्ततः ॥ ३९२ ॥

शान्त्यर्थं जुहुयान्मन्त्री वह्निश्चेत् सघृतैस्तिलै. ।
देवालयेष्वकर्तव्ये कृते कर्मणि कुत्रचित् ॥ ३९३ ॥

मध्यमावरणादन्तः स्नपनं होमपश्चिमम् ।
शान्तये जुहुयान्मन्त्री वह्निश्चेज्ज्वलितेऽनले ॥ ३९४ ॥

छर्दिनिष्ठीवलालाद्यैर्दूषिते देवसद्मनि ।
तदैव तद्व्यपोह्यात्र पञ्चगव्यैर्विलिप्य च ॥ ३९५ ॥

जपेदस्त्रशतं मन्त्री हृन्मन्त्रं च विधानत. ।
प्रायश्चित्तं प्रवक्ष्यामि शवस्पृष्टौ विशेषत ॥ ३९६ ॥

द्विजातिशवसंस्पृष्टे प्रमादाद्देवकौतुके ।
एकाशीतिघटै स्नाप्य मूलमन्त्रायुत हुनेत् ॥ ३९७ ॥

क्षत्रविट्छूद्रजातीना शव. स्पृष्टे तु कौतुके ।
मध्यमेनोत्तमेनैव सहस्रकलशेन तु ॥ ३९८ ॥

क्रमेण स्नापयेद्देवमेकैकेन यथाविधि ।
शान्त्यर्थं हवनं कृत्वा यथापूर्वं तथा जपेत् ॥ ३९९ ॥

अनुलोमशवस्पृष्टौ संप्रोक्षणमथाचरेत् ।
चण्डालपतितोदक्यासूतिकाशवदूषिते ॥ ४०० ॥

बिम्बे प्रतिष्ठा कुर्वीत सहस्रकलशाप्लवम् ।
शान्तिहोमायुत तद्वज्जपं कुर्याद्यथाक्रमम् ॥ ४०१ ॥

विमाने ब्राह्मणादीनामनुलोमादिकस्य च ।
शवस्पृष्टौ तु सक्षाल्य बहूदकघटेन तु ॥ ४०२ ॥

उत्तमोत्तमनिष्ठ तु स्नपन मध्यमाधमात् ।
सस्नाप्य देवदेवेशमेकैकेन क्रमेण तु ॥ ४०३ ॥

शान्तिहोमं प्रकुर्वीत पश्चान्मन्त्र तथा जपेत् ।
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमे ॥ ४०४ ॥

दूषिते प्राङ्गणक्षेत्रे प्रागुक्तै. क्रमशो भुवः ।
स्थलं संशोध्य विधिवद्दीक्षितैर्मन्त्रवित्तमै ॥ ४०५ ॥

मुख्योत्तमात्तु स्नपनान्नीचान्तिममनुक्रमात् ।
स्नापयित्वा विशेषेण शान्तिहोमं समाचरेत् ॥४०६॥

एवमेवान्त्यजातीना शवस्पृष्टौ समाचरेत् ।
सालमण्टपपीठेषु गोपुरे मन्दिरेऽपि वा ॥ ४०७ ॥

विमानाद्बाह्यत क्वाऽपि परिवारालयादिषु ।
वर्णाना ब्राह्मणादीनामनुलोमादिकस्य च ॥ ४०८ ॥

मरणेष्वपि जातेषु तत्तदावरणोक्तवत् ।
पश्वादिषु मृतेष्वेषु गजाश्वोष्ट्रखरादिषु ॥ ४०९ ॥

मरणादिषु सर्वत्र भूशुद्धि पुरतश्चरेत् ।
श्वसृगालशवाद्येषु काकश्येनादिजन्तुषु ॥ ४१० ॥

मार्जारवानराद्येषु तथान्येष्वेवमादिषु ।
सप्रोक्ष्य पञ्चगव्येन शान्तिहोम समाचरेत् ॥ ४११ ॥

मृते मूषिकसर्पादौ भूशुद्धि च जप चरेत् ।
मरणादिषु सर्वत्र भूशुद्धि पुरतश्चरेत् ॥ ४१२ ॥

सर्वावासे महापीठे तथा शैलमयेष्वपि ।
प्रदेशेषु समालिप्य गोमयेन समन्तत ॥ ४१३ ॥

प्रोक्षयेत् पञ्चभिर्गव्यै पुण्याहोक्तिपुरस्सरम् ।
गृहार्चाया न दोषोऽस्ति मृते पूजागृहाद्बहि. ॥ ४१४ ॥

क्षालनालेपनाद्येन व(क)र्मणा तत्र शोधयेत् ।
सन्निकर्षे गृहार्चाया· क्षीरेण स्नाप्य पूजयेत् ॥ ४१५ ॥

देवसिद्धमुनीन्द्राद्यै कल्पिते भगवद्गृहे ।
तत्तदङ्गतया क्लृप्ते ग्रामादौ राष्ट्रसंकुलात् ॥ ४१६ ॥

चण्डालपतितोदक्यासूतिकाशवरादिभि ।
दूषिते भगवद्बिम्बे संप्रोक्षणविधि चरेत् ॥ ४१७ ॥

सहस्रकलशैर्देवं सन्निकृष्टेऽभिषिच्य च ।
शान्तिहोम प्रकुर्वीत चतु स्थानार्चनादिकम् ॥

सहस्रकृत्वस्तदनु जप कुर्यात्तथाविधम् ।
प्रासादे वाऽङ्कणद्वारि मण्टपे पचनालये ॥ ४१९ ॥

पुष्पावासे जलागारे धनधान्यालयादिषु ।
ध्वजपीठे महापीठे रथ्यावृतिगणेष्वपि ॥ ४२० ॥

उत्सवाङ्गतया क्लृप्ते ग्रामादौ राष्ट्रसंकुलात् ।
चण्डालपतितोदक्यासूतिकाशवरादिभि ॥ ४२१ ॥

वर्णाना ब्राह्मणादीनामनुलोमविलोमयो. ।
शवास्थिभिश्च सन्दुष्टा सर्वत्रैकत्र वा क्षितिम् ॥४२२॥

खात्वा मृदं समुद्धृत्य वहि. प्रक्षिप्य शुद्धया ।
संपूर्य च समीकृत्य कुशाद्भि परिमृज्य च ॥ ४२३ ॥

गोमयेनोपलिप्याथ पुण्याहवचनादिकम् ।
पञ्चगव्येन चाभ्युक्ष्य गोगणं तत्र वासयेत् ॥ ४२४ ॥

वाचयित्वा महाशान्ति ब्राह्मणैर्वेदपारगै ।
भोजयित्वा द्विजास्तत्र तेभ्यो दद्यात्तु दक्षिणाम् ॥

कृत्वैवं स्थूलशुद्धि तु शान्ति कुर्यादनुक्रमात् ।
पञ्चयज्ञमयी पुण्या सर्वदोषापनुत्तये ॥ ४२६ ॥

एव वर्षावधिर्यावन्न कृता शान्तिकी क्रिया ।
सहस्रकलशेनैव पवित्रावर्तितेन च ॥ ४२७ ॥

व्यापकै. पञ्चभिर्मन्त्रै. पञ्चधा स्नापयेद्विभुम् ।
ध्वजमुत्थाप्य विधिवन्नवाह्यान्युत्सवं पुरा ॥ ४२८ ॥

शान्त्यर्थ सर्वदोषाणा कुर्यात्तीर्थावमर्पणम् ।
चक्रशङ्खगदापद्मवृत्तकुण्डेष्वनुक्रमात् ॥ ४२९ ॥

तत् कुर्यात् पञ्चभिर्मुख्यैर्द्वादशार्णपुरस्सरै ।
मधुक्षीरादिभिर्द्रव्यै. पञ्चभिर्नियुतारयया । ४३० ॥

सङ्ख्यया जुहुयान्मन्त्री लक्षसङ्ख्या भवेत्तथा ।
अनुकल्पे विधिरयं शान्तिकर्मणि संमत ॥ ४३१ ॥

मुख्यकल्पो विशेषेण वक्ष्यते होमकर्मणि ।
स्थापनोक्तविधानेन कल्पिते मण्टपे शुभे ॥ ४३२ ॥

चक्राम्बुरुहपूर्वेषु यथावत्कल्पितेषु च ।
क्लृप्तेषु दशसङ्ख्येषु ब्रह्मवृक्षादिसभवै. ॥ ४३३ ॥

समिद्गणैस्तिलैराज्यै सेचितै प्राग्दीरितै ।
पञ्चभिर्मधुराद्यैश्च मिश्रीभूतै क्रमेण तु ॥ ४३४ ।

महत्तराणा दोषाणा शान्तये मन्त्रवित्तमै ।
अयुत नियुतं लक्षं कोटिनिष्ठ यथाबलम् ॥ ४३५ ॥

होतव्यं पूर्णया सार्ध दशभिर्मन्त्रसत्तमै ।
कुण्डेषु मध्यपूर्वेषु, मन्त्राणा नियम शृणु ॥ ४३६ ॥

चक्राब्जे द्वादशार्णेन वस्वश्रेऽष्टाक्षरेण तु ।
षडर्णेन षडश्रे तु शङ्खाभे प्रणवेन तु ॥ ४३७ ॥

जितंतया च तुर्यश्रे विश्वत्राता त्रिकोणके ।
द्वात्रिंशद्दलपद्माख्ये नृसिंहानुष्टुभेन तु ॥ ४३८ ॥

सौदर्शननृसिंहेन चक्रकुण्डेऽक्षरारके ।
वराहेणार्धचन्द्राख्ये वृत्ते सौदर्शनेन तु ॥ ४३९ ॥

धिष्ण्यद्वयं मध्यवेद्या. प्रागुक्तं दक्षिणोत्तरे ।
शेषाणि परितः कुर्याद्दिक्षु चैवं विदिक्षु च ॥ ४४० ॥

सिद्धमन्त्रा नियोक्तव्या होतारः शान्तिकर्मणि ।
सर्वकुण्डानि सर्वेषां मन्त्राणामिच्छया गुरो. ॥ ४४१ ॥

कल्पनीयानि वा मन्त्रा यत' सर्वफलप्रदाः ।
न्यस्तमन्त्रैर्यथान्यायं जप्यास्ते सङ्ख्यया तया ॥

गोभूहेमतिलान्नाना दानैर्योग्यजनस्य च ।
तृप्ति. कार्या विशेषेण दिव्यायायतनस्य च ॥ ४४३ ॥

प्रजापालनशीलेन भूपेनात्महितेच्छुना ।
शान्तिरेवंविधा कार्या शास्त्रोक्तैर्हुभिर्धने ॥ ४४४ ॥

प्राचुर्यात् सर्वदोषाणा धर्मज्ञ. शान्तिकी क्रिया ।
निवर्तु न तु शक्या सेन्द्रा स्नानादिपञ्चकम् ॥

महादानावसाने च कार्य दिव्यालयादिषु ।
पौन.पुन्येन विधिवच्छुद्धेन द्रविणेन च ॥ ४४६ ॥

उल्काशन्यादिपाते च नक्षत्रपतने च खात् ।
सधूमे च दिशादाहे भूतावावेशिते नृपे ॥ ४४७ ॥

दुर्भिक्षे व्याधिते राष्ट्रे तथा वै शत्रुसङ्कटे ।
सूर्योदयस्य व्यत्यासे भूकम्पे तद्विदारणे ॥ ४४८ ॥

अतिवृष्टावनावृष्टौ देवताहसने हति ।
रोदने च तथा खिन्ने तथार्चाचलनेऽपि च ॥ ४४९ ॥

भ्रमणे च तथा पीठाद्दण्डभङ्गादिके सति ।
शैथिल्ये सरघादीनामुद्भवे बहुधा गृहे ॥ ४५० ॥

एवमादिषु चान्येषु दुर्निमित्तेषु सत्सु च ।
शान्तिरेतैश्च जायेत क्रियमाणैरनुक्रमात् ॥ ४५१ ॥

चतु.स्थानार्चनं कार्य दोषमात्रसमुद्भवे ।
यथाशक्ति दरिद्राणा दानमात्रं कथञ्चन ॥ ४५२ ॥

प्रासादे मण्टपे साले गोपुरे मालिकादिके ।
प्रमादादग्निना दग्धे ता नीत्वाऽन्यत्र देवता. ॥

यथापूर्वं नवं कृत्वा प्रतिष्ठाप्य विधानतः ।
उत्तम स्नपनं कुर्यात्तस्य दोषस्य शान्तये ॥ ४५४ ॥

हीनैकदेशे प्रासादे हुतभुग्वातवृष्टिभिः ।
कारणै कैश्चिदन्यैर्वा सन्धेयं तच्च शिल्पिभि. ॥

अथर्मं स्नपनं कृत्वा शान्तिहोमं समाचरेत् ।
विमाने सर्वतो भग्ने बालस्थान प्रकल्प्य च ॥ ४५६ ॥

तथैव बाले बिम्बे तु नित्यनैमित्तिकादिकम् ।
पवित्रारोहणान्तं च सर्वकर्म समाचरेत् ॥ ४५७ ॥

तद्दोषशान्तये कार्य स्नपनं मध्यमं पुनः ।
भग्नबिम्बसमाधाने विशेष. प्रागुदीरित. ॥ ४५८ ॥

तथापि विस्तरेणाद्य प्रोच्यते तद्विधि शृणु ।
मूलबिम्बेऽग्निना दग्धे बालस्थाने तथार्चयेत् ॥

सहस्रकलाशस्नानमाचर्तव्यं विधानत ।
वर्षिना क्रमविम्बादौ वैवर्ण्य समुपागते ॥ ४६० ॥

तत्तद्बिम्बेषु कुर्वीत स्नपनं चोत्तमं क्रमात् ।
वर्षिवातादिवेगेन मन्त्रिणामपराधतः ॥ ४६१ ॥

सौवर्णे राजते बिम्बे ताम्ररीतिमये तु वा ।
भिन्नाङ्गे सति सधेय तत्क्षणाच्छिल्पिवित्तमैः ॥ ४६२ ॥

लोहान्तरेण तद्बिम्बं न सन्धेयं प्रयत्नत. ।
ताम्ररीतिमय यद्वा सन्धयेद्धित्तवर्जित. ॥ ४६३ ॥

यद्द्रव्येणादित. क्लृप्त तद्द्रव्येणाथ सन्धयेत् ।
त्यक्त बिम्ब समुद्रान्त. प्रक्षिपेच्छास्त्रवर्त्मना ॥

सुवर्णरजतोत्थं यत् महाङ्गेषु च सक्षतम् ।
न त्याज्यं तत् समाधेयं तत्स्थां शक्ति विसृज्य च ॥

तद्द्रव्येण यथापूर्वं बिम्बकर्म समापयेत् ।
मृत्काष्ठोपलजे भग्ने बिम्बे केनापि हेतुना ॥ ४६६ ॥

बालालयगते बिम्बे तां शक्ति सन्निरोध्य च ।
दुष्टामर्चां परित्यज्य कृत्वा बिम्बान्तरं पुनः ॥ ४६७ ॥

न त्याज्या मृत्तिकाशूलरज्वाद्या देवनिर्मिते ।
देवयक्षमुनीन्द्राद्यैरन्यै. पौराणिकैस्तु वा ॥ ४६८ ॥

प्रतिष्ठिते तथा जीर्णे बिम्बे स्वर्णादिलोहजे ।
तदङ्ग सन्धयेत् पश्चात् सुवर्णेनैव नान्यथा ॥ ४६९ ॥

भग्ने शिलामये बिम्बे देवमुन्यादिकल्पिते।
तदङ्गं रुक्मजं कृत्वा सन्धेयं तद्दृढं यथा ॥ ४७० ॥

देवादिस्थापिते बिम्बे हीनाङ्गे मृण्मये सति।
कदाचिन्न परित्याज्यं तत् सन्धेयं तदा शनैः ॥ ४७१ ॥

एवं जीर्णं तथाभूतं तदङ्गं सन्धयेत् सदा।
न बालगेहबिम्बाद्यमन्येनैव तु कारयेत् ॥ ४७२ ॥

नित्यादौ वर्तमानेऽत्र सर्वं कार्यमतन्द्रितैः।
एवमेव स्वयव्यक्ते कारयेत्तन्त्रवित्तमः ॥ ४७३ ॥

देवादिपूजिते वाऽपि स्वयंव्यक्ते तु कौतुके।
मृद्दारुजे तु सञ्जीर्णे कृमिवह्निजलादिभिः ॥ ४७४ ॥

तत्तद्बालगृहं कृत्वा पूज्यमाने तु पूर्ववत्।
क्रमादर्चान्तरं कृत्वा स्थापयेच्च यथाविधि ॥ ४७५ ॥

बालबिम्बे तु जीर्णेऽत्र कुर्यादेवं पुनःपुनः।
मनुष्यनिर्मिते जीर्णे नष्टे दुष्टे तु वा क्वचित् ॥ ४७६ ॥

वर्णशोभादिहीने च बिम्बे शैलमये सति।
विशेषान्मृण्मये वाऽपि चित्राभासपटादिषु ॥ ४७७ ॥

बालबिम्बे समाङ्कृत्य चित्रयित्वा तु पूर्ववत्।
पुनः प्रतिष्ठां कुर्वीत विधिवन्मन्त्रवित्तमः ॥ ४७८ ॥

रीतिजे ताम्रजे वाऽपि आरकूटविनिर्मिते।
प्रणीते पूज्यमाने तु काम्यबिम्बादिके सति ॥ ४८० ॥

कालान्तरेण जीर्णेऽस्मिन्नुत्कृष्टे समुपस्थिते।
निकृष्टं सन्त्यजेद्विद्वान्न दोषस्तत्र विद्यते ॥ ४८१ ॥

लोहपाषाणमृत्काष्ठैः स्थापिते मूलकौतुके।
न संपाद्यमतोऽन्येन कदाचिन्मुख्यवस्तुना ॥ ४८२ ॥

पुरावज्जीर्णता यातं कर्तव्यं मूलकौतुके।
बहुबेरैकबेराभ्यां स्थापिताभ्यां गृहान्तरे ॥ ४८३ ॥

जीर्णोद्धारेऽपि कर्तव्यं पूर्ववत् स्थापितं बुधैः।
लक्ष्म्यादिकान्तारहिते बहुबेरे पुरा स्थिते ॥ ४८४ ॥

जीर्णे तु पश्चाद्देवीभ्यां सहितं वा प्रकल्पयेत्।
सर्वथा बहुबेरत्वंहानिर्न स्याद्विपर्ययात् ॥ ४८५ ॥

देवयक्षमुनीन्द्राद्यैः स्थापिते लक्षणोज्झिते।
बिम्बे विमाने प्राकारे गोपुरे द्वारि मण्टपे ॥ ४८६ ॥

पीठे वा पचनावासे कोशागारादिवस्तुषु।
जीर्णेषु पूर्ववत् कुर्यान्न कुर्याल्लक्षणान्तरम् ॥ ४८७ ॥

पापिष्ठैरतिनष्टेऽस्मिन् त्रिदशादिप्रतिष्ठिते।
बिम्बादौ वैष्णवे चिह्ने लक्षणैश्चापि वर्जिते ॥ ४८८ ॥

युक्ते वा पूर्ववत् कुर्यात् पूर्वरूपानुसारतः।
राजराष्ट्रविनाशः स्यादन्यथा कल्पिते सति ॥ ४८९ ॥

देवसिद्धमुनीन्द्राद्यैः स्थापिता पूजिता पुरा।
विद्युत्प्रपातपूर्वैश्च दोषैर्या चातिदूषिता ॥ ४९० ॥

निर्दोषादासनात्तस्मात्तामुत्थाप्य विसृज्य च।
पूर्ववन्निर्मिता पीठे प्रतिष्ठाप्य विधानतः ॥ ४९१ ॥

पीठभङ्गे तथान्यस्मिन् कल्पिते योजयेद्दृढम्।
क्ष्मामेदजलवेगाद्यैः पतितं भगवद्गृहम् ॥ ४९२ ॥

प्राग्बिम्बसहितं तस्माद्देशादन्यत्र कल्पयेत्।
नष्टे सबिम्बे सदने दिव्यादौ प्राग्वदाचरेत् ॥ ४९३ ॥

चोरनद्यादिवेगाद्यैरतिनष्टे तु मानुषे।
बिम्बे पश्चात् प्रकुर्वीत पूर्ववद्वान्यथापि वा ॥ ४९४ ॥

न शून्यमूलबिम्बत्वाद्बालार्चावाहनादिकम्।
न कार्यं देशिकेन्द्रेण पूर्ववत् स्थाप्य पूजयेत् ॥ ४९५ ॥

एवं हि सर्वदेवानां परव्यूहादिरूपिणाम्।
विष्वक्सेनगणेशादिपरिवारगणस्य च ॥ ४९६ ॥

क्लृप्तानां गोपुराद्येषु विभवव्यूहरूपिणाम्।
सान्निध्यातिशयात्तेषु पूजितानां दिनं प्रति ॥ ४९७ ॥

जीर्णोद्धारविधाने च विशेषः कथितो मया।
मन्त्रसिद्धैश्च विविधैर्मुनिभिर्मनुजैस्तथा ॥ ४९८ ॥

प्रतिष्ठितानां गेहानां चिरकालवशेन तु।
पतनस्फोटभेदादिनाशकं भगवद्गृहे ॥ ४९९ ॥

निर्वाहकानां भक्तानां शास्त्रज्ञानामनुज्ञया।
बाह्ये बाह्यान्तरे तेषां रक्षणार्थं शिलादिभिः ॥ ५०० ॥

निपुणै. शिल्पिभि कार्यो भित्तिबन्धः समन्ततः ।
प्रासादे मण्टपे चाग्रये प्राकारे गोपुरे तु वा ॥ ५०१ ॥

प्राङ्गणे पचनावासे कोशागारेऽम्बरास्पदे ।
पुष्पपानीयशालायामवघातगृहादिषु ॥ ५०२ ॥

स्नानार्थमण्टपे वाऽपि तथा वे यागमण्टपे ।
जीर्णे कालान्तरे चैव विभूत्या विस्तृते गृहे ॥ ५०३ ॥

रक्षार्थं विनियोगार्थं तद्बाह्ये तु विवर्धयत् ।
अभ्यन्तरात् समारभ्य ह्रासयेन्न तु कुत्रचित् ॥ ५०४ ॥

प्रमुखे सर्ववस्तूनि बन्धयेन् परितोऽथवा ।
प्रागुदग्वा न वृद्धि स्यात् पृष्ठे वारुणयाम्ययो. ॥

उत्तरे पश्चिमे वाऽथ वृद्धि कुर्यान्महानसे ।
पौराणिकालयं पीठ तथा तीर्थ सरोवरम् ॥ ५०६ ॥

मठं वा मण्टपाद्य वा चिह्नं सौदर्शनादिकम् ।
न चालयेत् प्रयत्नेन सालादीना च कल्पने ॥ ५०७ ॥

बाह्यतः कल्पयेत्तानि लघयित्वा पुरातनम् ।
प्राक् स्थितस्य बहिश्चान्तर्वर्धिते ह्रासिते सति ॥

पाश्चात्ये न तु दोष. स्यादायामोच्छ्रायविस्तरे ।
ब्रह्मरुद्रेन्द्रयक्षाद्यैस्तथा क्लृप्त पुरातनम् ॥ ५०९ ॥

चिरायुषोऽर्थवृध्यर्थी चालयेन्न तु कुत्रचित् ।
तथा सरोवर कूपं मृदाद्यैर्न तु पूरयत् ॥ ५१० ॥

अल्पीयासि विमानानि विभूत्या श्रद्धयाऽथवा ।
महान्ति कारयेत् पश्चान्न दोष उपजायते ॥ ५११ ॥

सालगोपुरपीठाना मण्टपाद्यङ्गरूपिणाम् ।
प्रथमे कल्पने चेव नष्टोद्धारे विशेषत. ॥ ५१२ ॥

एकस्मिन् प्राक् स्थिते वस्तुन्यशक्तौ स्थानसङ्कटे ।
ग्रहणं न तु दोष. स्यादमुख्यं मुख्यगौरवात् ॥ ५१३ ॥

यद्यत् पादप्रतिष्ठाया प्रासादस्य जगत्पते. ।
पादाधारशिलाद्यं वै तथा ब्रह्मशिलादिकम् ॥ ५१४ ॥

विना प्रतिष्ठिते बिम्बे कुर्यात् स्नपनमुत्तमम् ।
मधुना पयसा दध्ना घृतेन चरुणा सह ॥ ५१५ ॥

शान्तिहोमं प्रकुर्वीत सहस्रशतसङ्ख्यया ।
प्रासादश्च तथा बिम्बो येन शास्त्रेण निर्मितौ ॥ ५१६ ॥

प्रतिष्ठाप्य च तेनैव नित्यादौ पूजयेद्धरिम् ।
योऽर्चयेदन्यमार्गेण तथा चार्चापयेत्तु यः ॥ ५१७ ॥

तावुभौ कलुषात्मानौ राज्ञो राष्ट्रस्य वै गुरो. ।
कुलं च व्याधितं चेव विप्लव दु.खमञ्जसा ॥ ५१८ ॥

वित्तहानि विशेषेण कुर्यातामालयस्य च ।
न कुर्यात् तन्त्रसाकर्य पञ्चरात्रपरायणः ॥ ५१९ ॥

पुन. प्रतिष्ठा कर्तव्या कृते चेत्तन्त्रसकरे ।
वैखानसादिभिस्तन्त्रै प्रासादार्थं पुरैव तु ॥ ५२० ॥

गर्भन्यासे कृतेऽप्यत्र पञ्चरात्राभिलाषया ।
तदैवोद्धृत्य त गर्भ पञ्चरात्रोक्तमाचरेत् ॥ ५२१ ॥

चतुर्धा भेदभिन्नस्तु पञ्चरात्राख्य आगम ।
तल्लक्षणं च प्रागुक्तं तथाप्यत्राप्युदीर्यते ॥ ५२२ ॥

पूर्वमागमसिद्धान्तं द्वितीयं मन्त्रसंज्ञितम् ।
तृतीयं तन्त्रमित्युक्तमन्यत् तन्त्रान्तरं भवेत् ॥ ५२३ ॥

आद्य नित्योदितव्यूहस्थापनादिप्रकाशकम् ।
अपौरुषेयं सद्ब्रह्मवासुदेवाख्ययाजिनाम् ॥ ५२४ ॥

लक्ष्यभूतं द्विजेन्द्राणा हृदिस्थमधिकारिणाम् ।
ब्रह्मोपनिषदाख्यं च दिव्यमन्त्रक्रियान्वितम् ॥ ५२५ ॥

विवेकदं परं शास्त्रमनिच्छातोऽपवर्गदम् ।
एवं नित्योदिताख्यस्य नित्याकारस्य च प्रभोः ॥ ५२६॥

वासुदेवाभिधानस्य षाड्गुण्यादिमहोदधे. ।
प्रथमं लक्षण विद्धि हृदयाद्यङ्गशब्दवत् ॥ ५२७ ॥

एतदागमसिद्धान्तं श्रुतिरूपं तु विद्धि तत् ।
एष कार्तयुगो धर्म. सर्वधर्मोत्तम. स्मृत. ॥ ५२८ ॥

ततस्त्रेतायुगस्यादौ भोगमोक्षप्रसिद्धये ।
तस्मादागमसिद्धान्तान्निःसृत बहुभेदकम् ॥ ५२९ ॥

मन्त्रसिद्धान्तसंज्ञ तज्जाग्रद्व्यूहादिमूर्तिना ।
समुत्कीर्ण द्वितीयस्य सात्वतस्य महात्मनः ॥ ५३० ॥

तेन प्रद्युम्नसंज्ञस्य तेन तुर्यात्मनो विभो. ।
तेन वागीश्वराख्यस्य तस्माद्विद्याख्यविग्रहे ॥ ५३१ ॥

संक्रान्तं च ततः पश्चाद्रुद्रादित्येन्द्रवह्निषु ।
तथैव नारदाद्येषु देवर्षीणा गणेष्वपि ॥ ५३२ ॥

संक्रात मन्त्रसिद्धान्तं भेदभिन्नमनेकधा ।
यत्र शान्ततर व्यूह शान्तोदितमनन्तरम् ॥ ५३३ ॥

सुषुप्तिसंज्ञं स्वप्नाख्यं जाग्रद्व्यूहं यथोदितम् ।
मूर्त्यन्तर केशवाद्यं प्रादुर्भाव तथान्तरम् ॥ ५३४ ॥

हृत्पद्मपद्मपीठादौ लक्ष्मीपुष्ट्यादिशक्तिभि ।
लाञ्छनै शङ्खचक्राद्यैः गरुडप्रमुखैरपि ॥ ५३५ ॥

भूतसिद्धादिभि. सास्त्रपर्यन्तैर्यजन हितम् ।
विश्वत्रातृनृसिंहस्य दीक्षापूर्व तथा परम् ॥ ५३६ ॥

विहगव्यूहसूक्ष्माख्यमधिकारं यथाक्रमम् ।
समयी पुत्रकादीना चतुर्णामभिषेचनम् ॥ ५३७ ॥

तथैव समयाचारमूर्तीना स्थापनक्रमम् ।
मन्त्रमण्डलमुद्राणा कुण्डादीना च लक्षणम् ॥ ५३८ ॥

कर्मणामेवमादीना विधान यत्र पुष्कलम् ।
मन्त्रसिद्धान्तसज्ञ तद्बहुभेदसमन्वितम् ॥ ५३९ ॥

परव्यूहादिभेदेन विनैकैकेन मूर्तिना ।
साङ्गेन केवलेनाथ कान्ताव्यूहेन भूषणै ॥ ५४० ॥

तथास्त्रैर्विग्रहोपेतैरावृतं तन्त्रसज्ञितम् ।
नृसिंहकपिलक्रोडहंसवागीश्वरादय. ॥ ५४१ ॥

मुख्यादिवृत्तिभेदेन केवला वाङ्गसंयुता. ।
चक्राद्यस्त्रवरैश्चाथ भूषणैर्मकुटादिभि ॥ ५४२ ॥

कान्तागणैश्च लक्ष्म्याद्यैः परिवारै खगादिकै ।
पूजिता विधिना यत्र तत्तन्त्रान्तरमीरितम् ॥ ५४३ ॥

ये जन्मकोटिभिः सिद्धास्तेषामन्तोऽत्र जन्मन ।
यस्मात्तस्माद्विवेदैष सिद्धान्ताख्यो यथार्थतः ॥

शास्त्रमन्त्रक्रियादीना मूर्तीना भवनस्य च ।
देशिकस्याभिजातस्य यथापूर्व परिग्रह. ॥ ५४५ ॥

तथैव यावत्कालं तु नाचर्तव्यं तदन्यथा ।
विपर्यासे कृते चात्र राजराष्ट्राद्यनर्थकृत् ॥ ५४६ ॥

तत. समाचरेद्यत्नात् प्रतिष्ठा प्राक् प्रयत्नतः ।
तत. सिद्धान्तसाङ्कर्य न कर्तव्यं कृतात्मभि. ॥ ५४७ ॥

यद्यदिष्टतमं लोके पूर्वसिद्धाविरोधि तत् ।
प्रतिग्राह्यमतोऽन्योन्यविरुद्ध संत्यजेद्बुधः ॥ ५४८ ॥

वैखानसेषु तन्त्रेषु शैवपाशुपतेषु च ।
विहितान्यत्रजातानि विरुद्धानीति कि पुन ॥ ५४९ ॥

पञ्चरात्रविधानेन पूज्यमाने प्रतिष्ठिते ।
नान्येन पूजनं कार्य विदुषाऽपि कदाचन ॥ ५५० ॥

सद्ब्रह्मनिरतैर्मुख्यै. पञ्चरात्रपरायणै. ।
पूजनीय विशेषेण मुख्यकल्पाधिकारिभि. ॥ ५५१ ॥

त्रयीधर्मरतैर्विप्रै. सिद्धान्तेष्वपि दीक्षितै ।
सदाचाररतैर्वाथ तदलाभेऽनुकल्पके ॥ ५५२ ॥

प्रासादे स्थापितो देवो नैकेनार्च्यो विशेषत. ।
बलिहोमादिसंयुक्ते वित्ताढ्ये त्वपि कि पुनः ॥ ५५३ ॥

पञ्चकालरतैर्मुख्यैर्मन्त्रसिद्धान्तवेदिभि. ।
पदार्थसप्तकप्राज्ञैर्द्वादशाध्यात्मकोविदै. ॥ ५५४ ॥

त्रयोदशविधे कर्मभिरन्धिपरै सदा ।
कर्मसन्न्यासिभिश्चाप्तै मुख्यकल्पाधिकारिभि. ॥

तथान्यैर्वा त्रयीनिष्ठै. सिद्धान्तार्थविशारदै. ।
समर्चनीयमनिशं द्विचतु.षडभिरष्टभि. ॥ ५५६ ॥

द्विषट्षोडशविंशद्भिश्चतुर्विंशतिभिस्तु वा ।
तेष्वेक पूजयेदन्त. पर्यायेण दिन प्रति ॥ ५५७ ॥

द्वौ च त्रयो वा चत्वार. कुर्युरेवं पुनः पुन. ।
परिवारानर्चयेयुरन्ये देशिकसत्तमा. ॥ ५५८ ॥

अन्योऽग्निकार्य कुर्वीत कुर्यादन्यो बलि क्रमात् ।
एतेषामुपकुर्वीरन्नन्ये भागवतोत्तमा ॥ ५५९ ॥

गुर्वादिष्टेन विधिना कुर्युरन्ये च साधका ।
सर्वमेकेन वा कार्य बहुना संयतात्मनाम् ॥ ५६० ॥

प्रवीणानामभिज्ञानां दीक्षितानामसन्निधौ ।
वैदेशिकेषु प्राप्तेषु बहुप्लायतनार्चने ॥ ५६१ ॥

मूलादावाह्य बिम्बेषु कुर्वीरन् प्रतिकर्मणि ।
उत्सवं स्नपन यात्रा प्रभूतान्ननिवेदनम् ॥ ५६२ ॥

तत्तद्बिम्बेषु कुर्वीरन् मन्त्रिणो बहवो यदि ।
नित्येऽप्येवं हि कुर्वीरन् पूजन वह्नितर्पणम् ॥

बलियानादिकं सर्वमेकदैव तु मन्त्रिण. ।
न दोषोऽत्र तु विज्ञेय. कालकर्मनिमित्तत. ॥ ५६४ ॥

न गृहे बहुभि. कार्य नित्यनैमित्तिकादिकम् ।
एकदेव तु यजनमन्यथा दोषद भवेत् ॥ ५६५ ॥

तद्दोषशान्तये कुर्याच्छान्तिहोमसमन्वितम् ।
यथाशक्ति जपेन्मन्त्री मूलमन्त्रस्य सादरम् ॥ ५६६ ॥

भक्तैर्भागवतैरेवं प्रासादे च प्रतिष्ठितः ।
समर्चनीयो नित्यादौ राजराष्ट्रसमृद्धये ॥ ५६४ ॥

अन्यैः संपूजितो देवो न कदाचित् प्रसीदति ।
प्रयच्छत्यशुभं शश्वद्विशेषाद्राजराष्ट्रयो ॥ ५६८ ॥

तद्दोषशान्तये कार्य स्नपनं चोत्तमोत्तमम् ।
आवाहिते प्रतिष्ठायामर्चासु जगतः पतौ ॥ ५६९ ॥

नोद्वास्यः सर्वपूजानामावाह्य पुरतोऽर्चनात् ।
त्रिकालमङ्गबिम्बेषु कर्मार्चादिषु सत्स्वपि ॥ ५७० ॥

आवाह्य पूजयेन्मूलाद्विशेषेष्वपि कार्यतः ।
तत्तत्कर्मावसाने तु पुनर्मूले नियोजयेत् ॥ ५७१ ॥

यद्यन्यथा कृतेऽर्चासु मूलमावाहनादिके ।
शान्तये स्नपन कुर्यात् अधमाधमसञ्ज्ञितम् ॥ ५७२ ॥

प्रायश्चित्तेषु सर्वेषु दोषगौरवलाघवम् ।
समीक्ष्य चाङ्कुरानर्प्य पुण्याहोक्तिपुरस्सरम् ॥ ५७३ ॥

चतुःस्थानार्चनं चैव महता हविषार्चनम् ।
स्नपनं जपसंयुक्तमाचार्याणां च दक्षिणाम् ॥ ५७४ ॥

गोभूहेमादिदानं च पञ्चकालज्ञभोजनम् ।
कार्यं च यथाशक्ति मुख्यकल्पे विशेषत. ॥ ५७५ ॥

पूजनं स्नपनं होममनुकल्पे समाचरेत् ।
अतिक्रूरैरवाच्यैस्तु भुवं दोषैश्च दूषिताम् ॥ ५७६ ॥

खननाद्यैश्च संशोध्य दशभिर्विधिचोदितैः ।
यथावत् कर्षयित्वा तु रत्नकाञ्चनज रज. ॥ ५७७ ॥

विकीर्य सर्वतो दिक्षु जुहुयात्तत्र शान्तये ।
देवालयेषु शून्येषु महास्नानादिकं चरेत् ॥ ५७८ ॥

स्वतन्त्रपरतन्त्रेषु शून्यग्रामादिवास्तुषु ।
मार्जनालेपनाभ्या च गव्यैरभ्युक्षणेन च ॥ ५७९ ॥

संशोध्य तत्तन्मन्त्रे तु वापयेद्द्रव्यपञ्चकम् ।
बलिदान प्रकुर्वीत वास्तुदेवगणस्य च ॥ ५८० ॥

गोभूहेमादिक दद्याद्गुर्वादीनां यथाबलम् ।
भूपति. सत्वनिष्ठस्तु प्रजापालनतत्पर ॥ ५८१ ॥

द्विजेन्द्रः पञ्चकालज्ञ. प्रयत्नाच्छान्तिमाचरेत् ।
अन्यथा यद्युपेक्षेत शान्तिकर्म नराधिप ॥ ५८२ ॥

स्वमात्मान स्वराष्ट्रं च स्वकोशं वाहनादिकम् ।
कलत्रपुत्रपौत्राश्च नाशयत्यविसंशयम् ॥ ५८३ ॥

तस्मादेतानि रक्षेत भूपतिर्भूतितत्परः ।
स्वबुध्या परबुध्या वा कृते वापदि संकटे ॥ ५८४ ॥

तुलापुरुषदानेन सुवर्णेनोपशाम्यति ।
तथा हिरण्यगर्भस्य कुर्याद्दानमलोलुप. ॥ ५८५ ॥

काले काले विशेषेण ब्राह्मणानामनुज्ञया ।
समठं साग्रहारं च प्रासादं परिकल्प्य च ॥ ५८६ ॥

सर्वदेवमयो देवः सर्ववेदमयो हरिः ।
सर्वयज्ञमयो विष्णु. सर्वलोकमयो विभुः ॥ ५८७ ॥

सर्वधर्ममयोऽनन्तः सर्वभूतमयो ध्रुवः ।
सर्वतीर्थमयो योगी प्रतिष्ठाप्यो विधानतः ॥ ५८८ ॥

अन्यत्र विततं कुण्डे यथाभिमतमेखले ।
पावनैर्वैष्णवैः सर्वदोषघ्नैः श्रुतिचोदितैः ॥ ५८९ ॥

मन्त्रै. प्रयोगकुशलै. जुहुयुर्ब्राह्मणोत्तमा ।
दिव्यन्तरिक्षभौमेषु महोत्पातेषु सत्स्वपि ॥ ५९० ॥

यथाभिमतदिग्वक्त्रे पुरस्ताद्भगवद्गृहे ।
त्रिवर्ग मण्टप कुर्याच्चतुरश्रं समन्ततः ॥ १८ ॥

सप्तविशत्कर क्षेत्रं सप्तधा संविभज्य च ।
हस्तोच्छ्राया महावेदि सर्वालङ्कारमण्डिताम् ॥ १९ ॥

दिक्षु चारोहणैर्युक्ता त्रिभिर्मध्ये प्रकल्पयेत् ।
तदूर्ध्वे मध्यतो दिक्षु पार्थिवं पीठपञ्चकम् ॥ २० ॥

तालोन्नतं त्रिहस्तं च त्रिस्थानयजनाय च ।
भूपतेरधिवासार्थं स्वर्णादेरपि वस्तुन. ॥ २१ ॥

तुलाया. खड्गमुख्यस्य भूषणाना च वाससाम् ।
मण्डल मध्यमे पीठे, प्राक्स्थं चक्राब्जसन्निभम् ॥२२॥

कुण्ड दक्षिणदिक्पीठ नृपजागरणास्पदम् ।
प्रत्यक्स्थे कुभयाग तु, सौम्यस्थे स्वर्णसञ्चय ॥ २३ ॥

तुलादीना च संस्कार कार्यस्तेषा च नाह्नतः ।
हस्तमात्र परित्यज्य दिक्कुण्डानि प्रकल्पयेत् ॥ २४ ॥

चतुरश्रं च चक्राभ शङ्खाभं चाम्बुजाकृति ।
विदिक्षु वह्न्यादीशान्तं शृणु कुण्डगण क्रमात् ॥ २५ ॥

योन्याकारं त्रिकोणं च वस्वश्राद्धेन्दुलक्षणे ।
पीठोर्ध्वे कल्पनीयानि चक्राद्यैरङ्कितानि च ॥ २६ ॥

परितोऽपि त्रियंशेन चतुर्द्वारसमन्वितम् ।
कोणेषु च सुभित्याढ्यं मुखभद्रविराजितम् ॥ २७ ॥

विविधारोहणैर्युक्तं सर्वालङ्कारमण्डितम् ।
पुरोभागे प्रपा कार्या मानाद्यागालयोपमा ॥ २८ ॥

मध्यतो रङ्गसंयुक्ता पश्चिमाशा विसृज्य च ।
प्राक् दक्षिणोत्तराशासु द्विभक्त्या प्रावृता दृढा ॥

महोत्सवे प्रतिष्ठाया पवित्रारोहणादिषु ।
पुरा यथोक्तं बहुधा तेष्वेकस्मिन् प्रकल्पिते ॥ ३० ॥

मण्टपे वा प्रकुर्वीत तुलारोहादिकं द्वयम् ।
पुरस्तादेवमापाद्य मण्टपं पूर्वतोमुखम् ॥ ३१ ॥

पश्चादारोहणतुला विधेया विधिचोदिता ।
एकाङ्गुलघने तुल्ये सुवृत्ते हस्तनिर्मिते ॥ ३२ ॥

घटे हेमादिना कार्ये प्रोद्यदर्कसमप्रभे ।
परिधावङ्गुल त्यक्त्वा वलयैर्दिक्षु कीलिते ॥ ३३ ॥

तुलादण्डसमायामे शृङ्खलापाशयोजिते ।
काळायसमयं दण्डं कार्यं हस्तत्रयायतम् ॥ ३४ ॥

त्रितालनाहं मध्ये तु द्वितालं पार्श्वयोर्द्वयोः ।
तालमात्रं परित्यज्य कालायसमयं चलम् ॥ ३५ ॥

बालचन्द्रसमाकारवक्त्रादंष्ट्राद्वयं द्वयोः ।
शृङ्खलापाशयोगार्थं कृत्वा, मध्ये तदूर्ध्वत. ॥ ३६ ॥

तीक्ष्णाग्रा स्थापयेज्जिह्वामचला षोडशाङ्गुलाम् ।
शसन्ती साम्यवैषम्ये, तदूर्ध्वे तोरण चलम् ॥ ३७ ॥

अष्टादशाङ्गुलायाम विश्रान्तं पार्श्वयोर्द्वयोः ।
वलाकावदन, वक्त्र योजयेत्तोरणोपरि ॥ ३८ ॥

तुलामेवं समापाद्य लक्षणेनोपलक्षिताम् ।
प्रसिद्धयज्ञदारूत्थौ सारवन्तौ ऋजू दृढौ ॥ ३९ ॥

द्विहस्तपरिणाहौ च हस्तैः षड्भि. समुच्छ्रितौ ।
मूलतश्चतुरश्राभौ मध्यतोऽष्टाश्र लक्षितौ ॥ ४० ॥

ऊर्ध्वतो वर्तुलाकारौ शिरिपश्रेष्ठेन निर्मितौ ।
चतुरश्रस्य कुण्डस्य प्राच्या द्वारस्य चान्तरे ॥ ४१ ॥

दक्षिणोत्तरयोः स्थाप्यौ द्विहस्तेनान्तरीकृतौ ।
हस्तै. पञ्चभिरुच्छ्राये निखातौ हस्तमानत. ॥ ४२ ॥

समानजातिवृक्षोत्थं योजयेदुत्तरं तयोः ।
स्तंभाग्रतुल्यविस्तारं तावन्मानोन्नतं दृढम् ॥ ४३ ॥

मङ्गलैरष्टभिर्जुष्टं पार्श्वयोश्च श्रियान्वितम् ।
मध्यतस्तदधस्ताच्च कीलयेद्वलयं दृढम् ॥ ४४ ॥

तुलावलम्बनार्थं च ताम्रजं वाऽयसं तु वा ।
कार्याथ ताडनीयष्टिरायामात् षोडशाङ्गुला ॥ ४५ ॥

प्रकोष्ठपरिणाहा च लौही वा सारदारुजा ।
यागोपकरणान्यत्र होमोपकरणान्यपि ॥ ४६ ॥

स्रुक्स्रुवादीनि सर्वाणि कुभाश्च करकादय. ।
तथाष्टमङ्गळादीनि शक्त्या हेमादिजानि वा ॥ ४७ ॥

अङ्कुरानर्पयित्वाऽथ प्रागुक्तेऽन्यतमे दिने।
पालिकादिषु पात्रेषु मङ्गळार्थं प्रयोगवित् ॥ ४८ ॥

संभाराणि च सर्वाणि सम्भर्तव्यानि सादरम्।
मण्टपालंक्रियार्थं च त्रिस्थानयजनाय च ॥ ४९ ॥

चन्दनादीनि गन्धानि पत्रपुष्पफलानि च।
सितादिवर्णयुक्तानि वासांसि विविधानि च ॥ ५० ॥

सर्वकुण्डेषु होमार्थं समिधा सप्तकं बहु।
दिक्कुण्डेषु च होतव्याः सिद्धार्थाः काम्यकर्मणाम् ॥

पलाशखदिराश्वत्थोदुम्बरप्रभवा अपि।
विदिक्षु पिप्पलप्लक्षवटकाश्मर्यजातयः ॥ ५२ ॥

समिधः सर्वकुण्डेषु पालाश्यस्तद्वलाभतः।
हेमराजतताम्रोत्थाः कलशा मृण्मयास्तु वा ॥ ५३ ॥

शालिपूर्वाणि धान्यानि बीजानि च विशेषतः।
दधिक्षीराज्यकुंभानि षड्विधानि रसान्यपि ॥ ५४ ॥

तण्डुलानि विशुद्धानि पाकयोग्यान्यनुक्षणम्।
कर्मण्यान्युपदंशानि पाकपात्राण्यनेकशः ॥ ५५ ॥

निवेशनार्थस्थालीका पात्राण्यर्घ्यादिकस्य च।
प्रदीपधूपपात्राणि सुगुणान्यद्भुतानि च ॥ ५६ ॥

पाद्यप्रतिग्रहादीनि यागोपकरणानि च।
गुग्गुल्वगरुपूर्वाणि धूपद्रव्याणि यान्यपि ॥ ५७ ॥

स्नानकुंभोपयोग्यानि यानि सर्वौषधानि च।
दानार्थं ब्राह्मणादीनां धनधान्याम्बराणि च ॥ ५८ ॥

भूषणानि महार्हाणि देशिकेन्द्रस्य ऋत्विजाम्।
हेमादि दक्षिणार्थं च संभर्तव्या यथाबलम् ॥ ५९ ॥

यागालयमलंकुर्यात् पवित्रारोहणे यथा।
वितानैर्ध्वजिकाभिश्च तुङ्गैर्यवनिकापटैः ॥ ६० ॥

क्षौमैर्नानाविधैर्वस्त्रैर्घण्टाचामरदर्पणैः।
व्यालम्बिदर्भमालाभिः कदळीपनसादिभिः ॥ ६१ ॥

सुगन्धपुष्पमालाभिः सौवर्णैर्मञ्जरीगणैः।
सफलैः कदळीपूगनालिकेरादिभूरुहैः ॥ ६२ ॥

प्रदीपैः प्रकरैः पुष्पैः सिताद्यैर्वर्णकैरपि।
तोरणैर्द्वारकुंभैश्च सवन्सैः सुरभीगणैः ॥ ६३ ॥

मण्डितैः खलु शृङ्गादौ क्षौमस्रग्भूषणादिभिः।
एवमाद्यैरलंकृत्य यथाशोभं तु मण्टपम् ॥ ६४ ॥

तृतीये वासरे पूर्वे कर्माहाद्दिवसक्षये।
ऋत्विग्भिर्देशिकेन्द्रस्तु कृतसन्ध्याविधिक्रमः ॥ ६५ ॥

प्रविश्य मण्टपं प्राग्वत् पुण्याहोक्तिपुरस्सरम्।
अर्चनं वासुदेवस्य सहोम प्राक् समाप्य च ॥ ६६ ॥

यागालयं तु सर्वत्र गव्यैरभ्युक्ष्य पञ्चभिः।
द्रव्याणि यागयोग्यानि तत्तत्स्थाने नियोजयेत् ॥

प्रभातायां तु शर्वर्यां पूर्वाह्णे दहशुद्धये।
उत्तरोमनखश्मश्रुभूषितिर्नियतः शुचिः ॥ ६८ ॥

धौतदन्तश्च सुस्नातः परिशुद्धाम्बरावृतः।
सितालेपनपुष्पाद्यरञ्चित संस्मरन् हरिम् ॥ ६९ ॥

उपोषितो घृतं प्राश्य ब्राह्मणैर्वेदपारगैः।
पारायणमृचा शृण्वन्नासीत सपुरोहितः ॥ ७० ॥

निशामुखे प्रवृत्ते तु ऋत्विग्भिर्देशिकोत्तमः।
प्रविशेद्यागसदनं कृत्वा द्वार्स्थार्चनं सुधीः ॥ ७१ ॥

त्रिस्थानस्य जगन्नाथं यजेद्दीक्षाविधेः समम्।
पुण्याहं पूर्वमुच्चार्य ऋत्विग्भिः कुंभमुद्वहन् ॥ ७२ ॥

कुंभमण्डलयोः पूजा विस्तरेण समाप्य च।
स्वकुण्डे हवनं कुर्यात् समिद्भिः सप्तभिः पुरा ॥ ७३ ॥

शान्तिहोमं ततः पश्चान्मधुक्षीरादिभिः क्रमात्।
प्रत्येकं शतसङ्ख्यं च पूर्णान्तं मूलमुच्चरन् ॥ ७४ ॥

स्वमार्गेण तु संस्कृत्य गुरुः कुण्डगणं ततः।
तेषु प्रभवयोगेन होमार्थं दिक्षु योजयेत् ॥ ७५ ॥

चतुरो वासुदेवादिनाम्ना एकायनान् द्विजान्।
तैः स्वशाखोदितैर्मन्त्रैः होतव्यं तु क्रमेण तु ॥ ७६ ॥

ऋगाद्याश्चतुरो वेदान् विदिक्कुण्डेषु विन्यसेत्।
मन्त्रैरर्चितलिङ्गैस्तु स्वशाखोत्थैश्च पावनैः ॥ ७७ ॥

होम कुर्याद्यथायोगं पुंसूक्तेनैव वा द्विज ।
भू स्वाहेति भुव. स्वाहा, स्वः स्वाहेति तथैव च ॥

भूर्भुवस्सुव.स्वाहेति मन्त्रैर्वा वह्निदिक्क्रमात् ।
भू. पुरुषाय स्वाहा, भुवः पुरुषाय स्वाहा ॥ ७९ ॥

स्व. पुरुषाय स्वाहा, भूर्भुवस्स्वः पुरुषाय स्वाहा ।
एतैश्चतुर्भिर्मन्त्रैर्वा जुहुयाद्दिक्क्रमेण तु ॥ ८० ॥

सास्त्राणां लोकपालाना कुमुदादिगणस्य च ।
अष्टाना मङ्गळाना च प्राग्वत् स्यात् स्थापनादिकम् ॥

पालाशादिसमिद्भेदाश्चरुभेदाश्च पूर्ववत् ।
प्रतिकुण्डं च कुभाना स्थापनाद्य तु पूर्ववत् ॥ ८२ ॥

चतुर्णा ऋङ्मयादीना तथा चैकान्तिनामपि ।
निवेशनादिक कार्य पुरोदितविधानत ॥ ८३ ॥

एवं क्रमेण संपाद्य तदन्ते भूपति गुरुः ।
प्राशयेत् पञ्चगव्यं तु कुशोदकसमन्वितम् ॥ ८४ ॥

भगवत्पादतोयं च सर्वपापहरं शुभम् ।
भक्षयेच्चरुशेषं तु कोष्ठसंशोधनाय च ॥ ८५ ॥

कृत्वा दक्षिणपीठे तु शालिभारैस्तु विष्टरम् ।
नवसङ्ख्यैस्तदूर्ध्वे तु मार्ग चर्म तु विन्यसेत् ॥ ८६ ॥

व्याघ्रजं वा तदूर्ध्वे तु दर्भानास्तीर्य साक्षतान् ।
प्रागग्रानुदगग्रान् वा तस्मिन्नारोप्य भूपतिम् ॥ ८७ ॥

पूर्णोदकुभांश्चतुर. प्राग्वद्वस्त्रादिभूषितान् ।
चतुर्दिक्ष्वपि सस्थाप्य तेष्वर्च्या मूर्तयः क्रमात् ॥

चतुर्विधानि चान्नानि तासा दद्यात् क्रमेण तु ।
ततो होमश्च कर्तव्यः कुण्डेषु प्राक्क्रमेण तु ॥ ८९ ॥

ततो भूपस्य पुरत. उपविश्यासने गुरुः ।
तद्देहस्थिततत्वाना शुद्धि कुर्याद्विधानत. ॥ ९० ॥

प्राक् तेषा विलयं कृत्वा ततः सृष्टिं समाचरेत् ।
कुर्यात् कौतुकबन्धं च प्राग्वत्तस्यापि चात्मन ॥

स्वर्णसञ्चयमाहृत्य तिन्त्रिणीमिश्रवारिणा ।
निर्मलीकृत्य संप्रोक्ष्य वीर्यमन्त्रेण तत्पुन. ॥ ९२ ॥

उदक् दिक् सस्थिते पीठे शालिभारैस्त्रिभिः कृते ।
पीठे निवेश्याधिवास्य वासोलङ्कारपूर्वकम् ॥ ९३ ॥

अन्यच्च सर्व संस्थाप्य यर्मणा चावकुण्ठयेत् ।
ततश्चक्राब्जमालिख्य त्वन्यद्वा मण्डलं शुभम् ॥ ९४ ॥

रत्नजैर्धातुजैर्वापि वर्णकै. परिपूरयेत् ।
गीतनृत्तादिकै. स्तोत्रै. शङ्खवाद्यादिनिस्वनै ॥ ९५ ॥

मङ्गलैर्विविधैश्चान्यैर्जागरेण नयेन्निशाम् ।
दिव्याद्यायतने कार्य विशेषयजन विभो. ॥ ९६ ॥

तत कर्मदिने ब्राह्मे मुहूर्ते देशिक. स्वयम् ।
कृत्वा स्नानादिक सर्व नित्यकर्मविधानत ॥ ९७ ॥

ततो यजेद्विशेषेण कुभस्थं जगतीपतिम् ।
मण्डलस्थं क्रमेणैव विविधैर्भोगसञ्चयैः ॥ ९८ ॥

औपचारिकसास्पर्शहृदयङ्गमसंज्ञिते ।
परमान्नादिकैस्तत्र प्रभूतैरन्नसञ्चयै. ॥ ९९ ॥

एवमिष्ट्वा ततोऽग्निस्थं विभु सन्तर्पयेत् क्रमात् ।
समित्सप्तकपूर्वैस्तु मूलेन सघृतैस्तिलै. ॥ १०० ॥

सहस्रमाहुतीना तु शत वाऽपि समाचरेत् ।
सर्वविघ्नविनाशार्थमस्त्रेणापि तथाचरेत् ॥ १०१ ॥

ऋत्विजश्च स्वकुण्डेषु जुहुयुः पूर्ववत् क्रमात् ।
पतितासु च पूर्णासु सर्वकुण्डेषु वै क्रमात् ॥ १०२ ॥

संस्नाप्य मूलमन्त्रेण, पुंसूक्तेन तथैव च ।
सुप्रक्षालितपाण्यङ्घ्रि स्वाचान्तं परिभूषितम् ॥

निशाधिवासितै सर्ववस्त्रमाल्यानुलेपनैः ।
सर्वैराभरणैश्चैव महार्घैर्विविधैरपि ॥ १०४ ॥

खड्गखेटकहस्तं च समादाय गुरुः स्वयम् ।
मुहूर्ते शोभने प्राप्ते पाणिना पृथिवीपतिम् ॥ १०५ ॥

पुण्याह वाचयित्वा तु सर्वमङ्गलसंयुतम् ।
कलशस्थलदिक्कुंभसर्वकुण्डेषु संस्थितम् ॥ १०६ ॥

विभुं प्रदक्षिणीकृत्य कारयित्वा नमस्क्रियाम् ।
ब्राह्मणाग्र्याननुज्ञाप्य तुलां नीत्वा प्रदक्षिणम् ॥

तस्याः पश्चिमदिक्संस्थे भूय· प्रागानन घटे ।
आरोपयेन्मूलमन्त्रं साङ्गमावर्तयन् गुरुः ॥ १०८ ॥

दिव्यान् बलादिकान् मन्त्रान् तथा सूक्तं तु पौरुषम् ।
प्राग्पात्रे भूपतिसमं निक्षिपेत् स्वर्णसञ्चयम् ॥ १०९ ॥

निशाधिवासित त्वेष तुलाभारः समो भवेत् ।
एवं वाऽपि तुलाभारे प्राक् घटे विन्यसेन्नृपम् ॥

प्रत्यङ्मुखं पश्चिमे तु निक्षिपेत् स्वर्णसञ्चयम् ।
शतनिष्काधिक· श्रेष्ठो, मध्यमोऽर्धाधिको भवेत् ॥

शतपादाधिक· स स्यात्तुलाभार· कनिष्ठकः ।
तत्काले ऋङ्मयाद्याश्च चत्वारो दिक्षु सस्थिता· ॥

स्वशाखा· समधीयीरन्, विदिशासु च सस्थिता ।
सङ्घशत्रा अधीरयन् शाखा· परमपावना ॥ ११३ ॥

शङ्खकाहळभेर्यादिवाद्यानि विविधानि च ।
वादयेयु· समन्ताच्च तत्तद्वाद्यविशारदा ॥ ११४ ॥

गीतं तु विविधं कुर्यु· गीतशास्त्रविशारदा ।
विविधानि च नृत्तानि कुर्युश्च परितो दिश ॥ ११५ ॥

अन्यच्च मङ्गळं यद्यत् तत्तत् सर्व तु कारयेत् ।
ततस्तु सर्वकुण्डेषु शान्तिहोमं च कारयेत् ॥ ११६ ॥

तिलैराज्यैश्च बहुभि· शतमष्टोत्तर क्रमात् ।
भूपतिर्मनसा ध्यायेत् भगवन्तं जनार्दनम् ॥ ११७ ॥

एकनाडी तदर्ध वा आसीत नृपतिर्घटे ।
ततोऽवरुह्य वै तस्मात् प्रणमेद्दण्डवद्धरिम् ॥ ११८ ॥

ततस्तु भूषणैर्वस्त्रैर्भूषयेद्भूपतिर्गुरुम् ।
सुवर्णदक्षिणा दद्याच्छतनिष्का तु तत्समाम् ॥ ११९ ॥

ऋत्विग्भ्यस्तु तदर्ध वा ये चान्ये तत्र कर्मणि ।
नियोजितास्तु साहाय्ये तेभ्य कर्मानुरूपत· ॥ १२० ॥

द्रव्याणि दद्यान्नृपतिर्वस्त्राणि विविधानि च ।
सुवर्णसञ्चयास्ताश्च भूषणानि च भूपतिः ॥ १२१ ॥

स्वयं व्यक्तादिके स्थाने दद्याद्भगवतो विभो· ।
दानात् फलविशेषं तु समाकर्णय सांप्रतम् ॥ १२२ ॥

स्वयं व्यक्ते विभो· स्थाने यो दद्याद्भूपतिर्हरेः ।
सर्वपापविनिर्मुक्त सर्वामयवियोजित ॥ १२३ ॥

सर्वसपत्समृद्धश्च सर्वदेशाधिपो भवेत् ।
भुङ्क्ते च विविधान् भोगानिह लोके परत्र च ॥

कोटिकोटिगुणं दानं तथैव च फल भवेत् ।
दानं यद्दिव्यायतने तदनन्तगुण भवेत् ॥ १२५ ॥

आर्षे च सैद्धायतने दान लक्षगुण भवेत् ।
सद्विप्रकल्पिते दानं सहस्रगुणितं भवेत् ॥ १२६ ॥

सत्क्षत्रकल्पिते स्थाने दान शतगुणं भवेत् ।
सद्वैश्यकल्पिते स्थाने तदर्धगुणित भवेत् ॥ १२७ ॥

सच्छूद्रकल्पिते दत्तं द्विषट्कगुणितं भवेत् ।
अनन्यशरणैर्वर्णै· स्थाने तु परिकल्पिते ॥ १२८ ॥

दानं दशगुण प्रोक्त वर्णैर्व्यामिश्रयाजिभि ।
निर्मितायतने दत्त तत् पञ्चगुणितं भवेत् ॥ १२९ ॥

दाने मुख्यविधि· प्रोक्तस्त्वनुकल्पमत शृणु ।
तत्र ये श्रोत्रियाः प्राज्ञा वैष्णवा ब्राह्मणोत्तमा· ॥

सुवर्णसञ्चयाद्य च तेभ्यो दद्याद्यथाक्रमम् ।
यागोपकरणं सर्वमाचार्याय प्रदापयेत् ॥ १३१ ॥

यः कुर्याद्भूपति कश्चित् अन्यो वा धनवान् सकृत् ।
तुलाभाराह्वय कर्म सर्वपापै· प्रमुच्यते ॥ १३२ ॥

रोगैरनभिभूतश्च भविष्यति न संशय ।
य कुर्यान्नियमेनैव कर्मेतत् प्रतिवत्सरम् ॥

तस्य पुण्यफलावाप्ति कः शक्नोत्यभिवर्णितुम् ।
तत्काले भगवद्याग चतु·स्थानार्चनान्वितम् ॥

दिव्याद्यायतने सम्यक् कारयेत् पृथिवीपति ।
तदन्यस्मिन् दिने विप्र ! स्नापयेत् पुरुषोत्तमम् ॥

सहस्रकलशै· सम्यक् पुरोदितविधानत ।
यद्वान्यस्नपनेनैव तत्तत्कालोचितेन वै ॥ १३६ ॥

चतुस्थानार्चनं तत्र विशेषात् कारयेन्नृप ।
महाहविर्निवेद्यं च विशेषेणैव कारयेत् ॥ १३७ ॥

तत्रापि देशिकादिभ्यो दद्याद्वै दक्षिणां क्रमात् ।
दीनान्धकृपणानाथान् बालवृद्धकृशातुरान् ॥ १३८ ॥

भोजयेच्च विधानेन द्रव्यादीन्यपि दापयेत् ।
विविधानि च बीजानि शाल्यादीन्यपि दापयेत् ॥

बन्दीकृताश्च विसृजेत् कारागृहनिवेशितान् ।
एष ते कथितो विप्र ! तुलाभारविधिः क्रमात् ॥

हिरण्यगर्भाद्यन्येष्वप्येवमेव समाचरेत् ।
एवं कुर्यात्तुलाभारं य सकृद्बहुशोऽपि वा ॥ १४१ ॥

सर्वपापविमोक्षस्तु तस्य स्यान्नात्र संशयः ।
यो वा भगवतोऽर्थे तु मातापित्रोर्गुरोस्तु वा ॥

स्वप्राणास्त्यजता भक्त्या विप्रादीनां महामते ।
निमित्ती तु भवेत्तस्य तुलाभारादिकेन च ॥ १४३ ॥

बहुशोऽनुष्ठितेनैव सम्यगेव तु कर्मणा ।
अन्यैर्वा विहितैर्विप्र ! प्रायश्चित्तैः सुदुष्करैः ॥ १४४ ॥

ब्रह्महत्योऽत्थदोषस्य शुद्धिर्भवति वा न वा ।
प्राणत्यागं कृतस्तेन विष्वर्थे यन्महात्मना ॥ १४५ ॥

तस्मान्न निष्कृतिर्विप्र ! भवेत्तस्य निमित्तिनः ।
ब्राह्मणा क्षत्रिया वैश्या विष्वर्थे मौढ्लाभ्तु वा ॥

परित्यजेयुः स्वप्राणान् भगवद्भक्तिसंयुताः ।
भृग्वादिभिरुपायैस्तु पञ्चभिर्वा विषादिकैः ॥ १४७ ॥

अन्यैस्तेषां भवेत् सद्यो वाजपेयादिजं फलम् ।
सकामस्य तु निष्कामः प्राप्नुयात् परमां गतिम् ॥

महात्मनस्तु तान् विद्धि विष्वर्थे त्यक्तजीवितान् ।
आत्महत्योत्थदोषैस्ते न लिप्यन्ते कदाचन ॥ १४९ ॥

आत्महत्योत्थदोषा स्युरन्येषां सर्वदा द्विज ! ।
एव भगवदर्थे तु प्राणत्यागे कृतादरः ॥ १५० ॥

यमुद्दिश्य त्यजेत् प्राणान् त विद्याद्ब्रह्मघातकम् ।
मुख्यविप्रे मृते तस्य तद्दोषः स्याच्चतुर्गुणः ॥ १५१ ॥

क्षत्रिये ब्रह्महत्योत्थदोषस्तु त्रिगुणो भवेत् ।
निमित्तिनः स दोषः स्याद्द्विगुण संस्थिते विशि ॥

निमित्तिने मृते शूद्रे दोष एकगुणो भवेत् ।
एवं दोषविवृद्धिस्तु भवेद्विप्रे निमित्तिनि ॥ १५३ ॥

निमित्तिनि क्षत्रियादावेकैकगुणवर्धनात् ।
भवेत् पूर्वोक्तदोषस्तु अत्राथे नास्ति संशयः ॥ १५४ ॥

एव मृते विप्रमात्रे दोष उक्तो निमित्तिनः।
मुख्यदोषः पञ्चगुणो ब्रह्मचारिणि संस्थिते ॥ १५५ ॥
गृहस्थे यज्वनि मृते स दोष षड्गुणो भवेत् ।
वानप्रस्थे मृते मुख्यदोष सप्तगुणो भवेत् ॥ १५६ ॥

सन्न्यासाश्रमनिष्ठे तु संस्थिते तु निमित्तिनः ।
स्यान्मुख्यदोषोऽष्टगुण एव तु कथितो मुने ! ॥ १५७ ॥

निमित्तिनो दोषवृद्धिः विष्वर्थे मरणे सति ।
एवं निमित्तभूताना द्विजादीना न निष्कृतिः ॥ १५८ ॥

तत्र यत् ब्राह्मणैरुक्त विवेकनिरतैस्सदा ।
सर्वशास्त्रार्थतत्वज्ञैः तत् कुर्यादविचारतः ॥ १५९ ॥

अन्यथा तु महान् दोषो भवेद्देशाधिपस्य तु ।

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे प्रायश्चित्ततुलाभारविधिर्नाम त्रिंशोऽध्यायः ।

॥ श्री. ॥

॥ एकोविंशाऽध्यायः ॥

शाण्डिल्य —

मुने ! हिरण्यगर्भादौ विशेषो वक्ष्यतेऽधुना ।
हेमगर्भविधानं तु प्रथमं कथ्यते मया ॥ १ ॥

सनक —

यद्यदत्रोच्यते कर्म तुलाभारेऽपि नोदितम् ।
साधारणं भवेत्तत्तत् सर्वेषामपि कर्मणाम् ॥ २ ॥

तुलाभारादिकाना तु विभवाद्यानुगुण्यत. ।
प्राग्वन्मण्टपनिर्माणं पीठादिपरिकल्पनम् ॥ ३ ॥

प्रतिष्ठोदितमार्गेण कुर्याद्वा मण्टपादिकम् ।
यद्वाष्टसप्तषट्पञ्चचतुस्त्रिकरविस्तृतम् ॥ ४ ॥

त्रिशदङ्गुलमान तु गोलकैकैकहानित. ।
उन्नतं मध्यपीठ स्यात् तत्तत्क्षेत्रानुसारतः ॥ ५ ॥

चतुर्हस्त समारभ्य षट्षट्गोलकहानित. ।
विस्तृतं पार्श्वयो. पीठद्वितय परिकल्पयेत् ॥ ६ ॥

विशत्यंगुलमानाच्च द्विद्विकाङ्गुलहानित. ।
तदुन्नतिर्यथा साऽन्त्ये सार्धहस्ते दशाङ्गुला ॥ ७ ॥

द्वयोत्कमानादर्धं वा भवेत् सर्वत्र चोन्नति. ।
पीठानामन्तराळं तु कल्पयेत् करसंमितम् ॥ ८ ॥

करार्धं वर्धयेद्वापि भवेद्यावच्चतुष्करम् ।
अन्तराळं भवेत्तावद्यथा वा नातिसङ्कटम् ॥ ९ ॥

यथोदितेषु मानेषु यथाभिमतमानतः ।
कुर्यात् कुण्डगणं चापि लक्षणेनोपलक्षितम् ॥ १० ॥

आस्थानमण्टपाद्ये तु यथैतत् कल्पयेत्तदा ।
मध्यपीठोदितं कर्म तत्तदे(द्दे)वासने भवेत् ॥ ११ ॥

तदुदक् दक्षयो. पीठद्वयमुक्तप्रमाणतः ।
प्राक्दिक्कुण्डस्य वै प्राच्या पीठ कुर्यात् समं शुभम् ॥

सप्तषट्पञ्चहस्तं वा चतुस्त्रिद्विकर तु वा ।
एकहस्तोच्छ्रितं वाऽपि तदर्धोच्छ्रितमेव वा ॥ १३ ॥

तस्योपरिष्टात् कर्तव्य हेमगर्भनिवेशनम् ।
तुलाभारोदितं कर्म पीठोपर्यथवा चरेत् ॥ १४ ॥

यद्वा कुंभादियजनं अधिवासनकर्म च ।
मण्टपे कल्पयित्वा, तत्रपाया वा समाचरेत् ॥ १५ ॥

हेमगर्भनिवेशं तु प्रपाया वा समाचरेत् ।
कुभयागादिकं रूपं कर्तुरिच्छानुरूपत ॥ १६ ॥

तुलाभारादिकेऽन्यस्मिन् दिनेष्येवं समाचरेत् ।
तत. कुर्याच्च सौवर्णमेकाङ्गुलघनं दृढम् ॥ १७ ॥

अध. पात्र चोर्ध्वपात्रं यथासङ्गतयोस्तयो ।
सुखासनं स्यान्नृपतेर्विस्तृत कल्पयेत्तथा ॥ १८ ॥

अध. पात्रं सुवर्णाना सहस्रेण पलेन वा ।
यद्वा निष्कसहस्रेण, तदर्धनोर्ध्वपात्रकम् ॥ १९ ॥

एवं पात्रद्वय कुर्यात् सर्वालङ्कारसंयुतम् ।
विभवे सर्वपात्राणि कुर्याद्धेममयानि च ॥ २० ॥

अधिवासदिनोक्तं तु तुलाभारवदाचरेत् ।
पात्रद्वयस्योदक् पीठे ह्यधिवासं समाचरेत् ॥ २१ ॥

तत. कर्मदिनोक्तं तु प्राग्वत् कृत्वा क्रमेण तु ।
इन्द्रदिक्कल्पिते पीठे भारैर्द्वादशभिर्मुने ! ॥ २२ ॥

शालीना विष्टरं कृत्वा तदूर्ध्वे तण्डुलान् न्यसेत् ।
तदर्धमानास्तस्योर्ध्वे तदर्धास्तु तिलान् न्यसेत् ॥२३॥

शालिभि· समभारान् वा तण्डुलाश्च तिलान् न्यसेत् ।
अधिवासेप्येवमेव भवेद्वित्तानुसारतः ॥ २४ ॥

एवमेव भवेद्वापि तुलाभारादिकर्मणि ।
मार्गं वा व्याघ्रजं चर्म शाल्यादेरन्तरान्तरा ॥ २५ ॥

विन्यसेन्नववस्त्रं वा विभवे त्रितयं तु वा ।
अन्यच्च मङ्गळ कुर्याद्वस्त्रवेष्टनपूर्वकम् ॥ २६ ॥

अधः पात्रं तदूर्ध्वं तु न्यसेत् प्रागधिवासितम् ।
मुहूर्ते शोभने प्राप्ते गृहीत्वा भूपति गुरु· ॥ २७ ॥

सुस्नातं भूषितं प्राग्वद्वस्त्रमाल्यादिभूषणै· ।
महार्घैर्विविधैश्चापि खड्गखेटकवर्जितम् ॥ २८ ॥

प्राग्वत्तत्त्वोपसंहारं कृत्वा जीवावशेषितम् ।
शङ्खतूर्यनिनादाद्यै· सहचात्र निवेशयेत् ॥ २९ ॥

अधस्थे प्राङ्मुखं यद्वा विन्यसेत् प्रत्यगाननम् ।
वर्मणा विन्यसेदूर्ध्वं ह्यूर्ध्वपात्रमधोमुखम् ॥ ३० ॥

तदण्डान्त· समासीने तस्मिंस्तस्याग्रतो गुरुः ।
उपविश्यासने प्राग्वत् तत्त्वोत्पत्तिं समाचरेत् ॥ ३१ ॥

अण्डाज्जातं तु तं स्मृत्वा ततस्तस्मात्तु भूपतिम् ।
स्नानपीठे समावेश्य मङ्गळद्रव्यवासितैः ॥ ३२ ॥

नवभिः पञ्चभिर्वापि कुम्भैरुदकपूरितै· ।
वस्त्रादिवेष्टितै· कुर्याद्भूपतेरभिषेचनम् ॥ ३३ ॥

कल्पयेत् प्रोक्षणं वाऽपि ऋत्विग्भिः सह देशिक· ।
कृत्वा ततस्तं स्वाचान्तं भूषणादिविभूषितम् ॥ ३४ ॥

प्रणामं कारयेद्भूयो भूयो भगवतो विभोः ।
जातकर्मादिसंस्कारं जातार्थं जुहुयात् क्रमात् ॥ ३२ ॥

तिलैराज्यैश्च बहुभिः सर्वसंपूरणाय च ।
सर्वदोषविनाशाय ततः पूर्णां च पातयेत् ॥ ३६ ॥

भूषणानि च ते पात्रे नृपो दद्याद्धरेर्विभोः ।
दानात् फलं च पूर्वोक्तं विभोरायतने सदा ॥ ३७ ॥

स्वयव्यक्तादिके कुर्यात्तुलाभारादि कर्म च ।
तदाऽपि भूपस्य फलं भवेद्दानोदितं क्रमात् ॥ ३८ ॥

अनुकल्पे तदर्धं तु दद्याद्भगवतो विभो· ।
अर्धं दद्याद्ब्राह्मणेभ्यो तुलाभारे तथैव च ॥ ३९ ॥

तुलाभाराह्वयं कर्म हेमगर्भाभिधं च यत् ।
एतद्द्वयं तु मुख्यं स्यात् सर्वेषामपि कर्मणाम् ॥ ४० ॥

क्रमेण वक्ष्यमाणानां तिलपर्वतपूर्वकम् ।
अन्यत्तु सकलं कर्म तुलाभारवदाचरेत् ॥ ४१ ॥

हेमनिष्कसहस्रं वै दद्याद्वै गुरुदक्षिणाम् ।
तदर्धं शतनिष्कं वा तदर्धं वा यथावसु ॥ ४२ ॥

दशनिष्कं तदर्धं वा तदर्धं वाऽथ दक्षिणाम् ।
आचार्याय प्रदद्याद्वै न कदाचिददक्षिणम् ॥ ४३ ॥

तुलाभारादिकं कर्म· सर्वेषामपि ऋत्विजाम् ।
दक्षिणा तु तदर्धा स्यात् तदर्धा परिचारिणाम् ॥

अन्येषां तु यथाशक्ति, ततोऽन्यस्मिंस्तु वासरे ।
कुंभमण्डलकुण्डस्थविभोः कुर्याद्विसर्जनम् ॥ ४५ ॥

विशेषार्चनसंयुक्तं ततोऽन्यस्मिन्दिने तु वा ।
एवं सर्वत्र वै कुर्याद्विसर्जनविधिं द्विज ! ॥ ४६ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे प्रायश्चित्तहिरण्यगर्भविधिर्नाम एकविंशोऽध्यायः ।

श्रीः

द्वाविंशोऽध्यायः ॥

सनक —

संप्रोक्षणविधानं मे प्रब्रूहि मुनिसत्तम ! ।
प्रायश्चित्तेषु सर्वत्र प्रशस्तो यस्तु पूरकः ॥ १ ॥

शाण्डिल्य —

प्रासादप्रतिमापीठे प्रमादादेव दूषिते ।
समाहिते यथापूर्वं पूजालोपे विशेषतः ॥ २ ॥

चण्डालपतितोदक्यासूतिकादिशवादिभिः ।
सूतकैर्मृतकैर्वाऽपि नित्याशौचैश्च गर्हितैः ॥ ३ ॥

शिल्पिभिर्वेदबाह्यैश्च मूर्खैरज्ञातजातिभिः ।
विण्मूत्ररुधिरापेयरेतोभिर्दूषिते सति ॥ ४ ॥

जनने मरणे नृणां मन्दिरे राष्ट्रसंकुले ।
श्वसृगालखराद्यैश्च वायसश्येनजातिभिः ॥ ५ ॥

स्पृष्टे बिम्बे तु संदष्टे तन्त्राणां सङ्करे सति ।
एवमादिषु सर्वेषु संप्रोक्षणविधिर्भवेत् ॥ ६ ॥

दोषैरुपहतं ज्ञात्वा प्रासादप्रतिमादिकम् ।
असंप्रोक्ष्यार्चनं कुर्वन् राजान राष्ट्रमञ्जसा ॥ ७ ॥

देवतायतनं ग्रामं नाशयेन्नात्र संशयः ।
तस्मात् संप्रोक्षणं कार्यं प्रासादप्रतिमादिषु ॥ ८ ॥

पुरा संप्रोक्षणदिनं राजराष्ट्राभिवृद्धिदम् ।
निश्चयीकृत्य कालज्ञैः पुरस्तादुक्तवासरे ॥ ९ ॥

अंकुरानर्प्य विधिवत् पश्चात् संशोधिते गृहे ।
सर्वत्र गोमयाम्भोभिः पुण्याहोक्तिपुरस्सरम् ॥ १० ॥

संप्रोक्ष्य पञ्चभिर्गव्यैः कुशोदकसमन्वितैः ।
मूलबेरादिबिम्बानां षड्भिः सिद्धार्थकादिभिः ॥ ११ ॥

पवित्रावर्तितैरद्भिर्बहुशः क्षालने कृते ।
प्रधानदिनपूर्वस्यां रात्र्यां यागादिमण्टपे ॥ १२ ॥

तोरणद्वारकलशवितानध्वजशोभिते ।
दीक्षाधिवासवत् कृत्वा कुंभे वै मण्टपस्थले ॥ १३ ॥

पूजनं विभवेनैव जपान्तं मूलमन्दिरे ।
क्षीराद्यैः पञ्चविंशद्भिः स्नापयेद्ध्रुवकौतुकम् ॥ १४ ॥

लेपभित्तिपटस्थस्य पुरस्ताद्भद्रपीठके ।
कर्मार्चामथवा कूर्चं दर्पणे प्रतिबिम्बितम् ॥ १५ ॥

संस्नाप्य विधिवत् कुंभे स्थापितैरग्रमण्टपे ।
उत्सवार्चादि बिम्बानामङ्गानामाश्रयात्मनाम् ॥ १६ ॥

पूजनं स्नपनं कार्यं पाश्चात्य यागमण्डपे ।
तत्रस्थे हवन कुण्डे शङ्खचक्रादिलक्षणे ॥ १७ ॥

मधुक्षीरादिभिः कार्यं सहस्रशतसङ्ख्यया ।
कर्मबिम्बं विनान्येषां बिम्बानामङ्गरूपिणाम् ॥ १८ ॥

दक्षिणे मण्टपस्याथ शयनं कल्पयेन्महत् ।
तिलतण्डुलशालीनां भारैर्वस्त्रादिभिः सह ॥ १९ ॥

तदूर्ध्वे शाययेदर्चां विधिवद्बद्धकौतुकाम् ।
संपूज्य कम्बलाद्यैश्च छादयेत्तां सितादिभिः ॥ २० ॥

वर्णकैर्मण्डलं कुर्याच्चक्राम्बुरुहभूषितम् ।
यावत् प्रभातसमयं बिम्बस्थस्य समीपतः ॥ २१ ॥

देशिको मूलमन्त्रस्य जपेनैव नयेन्निशाम् ।
प्रभातायां तु शर्वर्यां कृतसन्ध्याविधिर्गुरुः ॥ २२ ॥

चतुःस्थानार्चनं कृत्वा पूर्ववत् स्नपनान्वितम् ।
मुहूर्ते शोभने प्राप्ते नववस्त्रपरिष्कृतम् ॥ २३ ॥

सोत्तरीयोपवीतं च कृतकौतुकबन्धनम् ।
समस्ततत्वविन्यस्तमभ्यर्च्यार्घ्यादिभिः क्रमात् ॥ २४ ॥

तासु स्वहृदयाम्भोजात् पुष्पाञ्जलिपुरस्सरम् ।
अग्राह्यमपरिच्छेद्यममूर्तममलं महत् ॥ २५ ॥

नित्यशुद्धमनौपम्यं सुसूक्ष्ममचलं स्फुटम् ।
सच्चिद्रूपं च सामान्यं भास्वरं सुदृढ महत् ॥ २६ ॥

[तेजस्तु संक्रमय्याथ दण्डवत् प्रणिपत्य तु ।
विनिवेद्य विभो. सर्वं कृतं कर्म द्विजोत्तमाः ॥ २७ ॥

उत्थाप्योत्सवबिम्बादीन् पूर्ववन्मङ्गलैः सह ।
महाकुम्भं च पुरतो वाहयन् मूर्तिपादिभिः ॥ २८ ॥

करकास्त्रं समादाय त्वाचार्यः पुरतो व्रजेत् ।
शलाकामात्रयाऽच्छिन्नधारया सेचयन् भुवम् ॥ २९ ॥

प्रादक्षिण्येन धामान्त. प्रवेश्य मुनिपुङ्गवा ! ।
महोत्सवोक्तमार्गेण कुम्भप्रोक्षणमाचरेत् ॥ ३० ॥

द्वारावरणदेवाश्च आलयश्रयवर्तिनः ।
खगेशविष्वक्सेनादीन् परिवाराश्च सर्वश. ॥ ३१ ॥

कुम्भावशिष्टतोयेन प्रोक्षयेत् सर्वत. क्रमात् ।
अवशिष्ट कुम्भतोयं वलिपीठेऽभिषेचयेत् ॥ ३२ ॥

एवं सम्प्रोक्ष्य विधिवत् प्रासादान्त. प्रविश्य च ।
करस्थं कौतुकं चाथ हृदयेन विसृज्य तु ॥ ३३ ॥

गोभूहेमादिकं दत्वा सर्वदोषप्रशान्तये ।
देवमर्घ्यादिनाभ्यर्च्य हविरन्तं विशेषत. ॥ ३४ ॥

ब्राह्मणान् भोजयेत् पश्चात् सहस्र शतमेव वा ।
सद्यो वा सकलं त्वेव कुर्यात् सप्रोक्षणं विभो ॥ ३५ ॥

पुष्पाकुरपुरस्कं तु तत्तद्दोषप्रशान्तये ।
न तिथिर्न च नक्षत्रं कालवेला न विद्यते ॥ ३६ ॥

सद्य सम्प्रोक्षणं विप्राः ! निशि वा दिवसेऽपि वा ।
प्रायश्चित्तविलम्बे तु कुर्यात् कालनिरीक्षणम् ॥ ३७ ॥

इति सम्प्रोक्षणं प्रोक्तं सर्वं चापि द्विजोत्तमा. ! ।]
स्थापनं पञ्चगव्यस्य सर्वाभ्युदयसाधनम् ॥ ३८ ॥

नागयोग इति ख्यात. सार्पर्क्षकरणक्षमैः ।
ऋक्षेण वानयोरेकयोगस्यान्नागसंज्ञितः ॥ ३९ ॥

पुरा तन्निश्चयीकृत्य कर्तव्यमिति सत्तमैः ।
तदर्थमंकुरानर्प्य द्रव्याणि समुपाहरेत् ॥ ४० ॥

मनश्शिलां हरीतालमञ्जनं श्यामसीसके ।
सौराष्ट्रं रोचन चैव गैरिकं पारदं तथा ॥ ४१ ॥

आदाय धातुरत्नानि पद्मरागपुरस्सरम् ।
मुक्ताफलं प्रवाळं च वज्रं वैडूर्यसंज्ञितम् ॥ ४२ ॥

गोमेदं पुष्यरागं च महानीलं च गारुडम् ।
रत्नान्येतानि संगृह्य बीजानि समुपाहरेत् ॥ ४३ ॥

शालिनीवारकंकूनि प्रियंगुतिलमाषकान् ।
मृद्गाश्च यववेणूश्च यवसाख्यान्यनन्तरम् ॥ ४४ ॥

हिरण्य रजतं ताम्रमायसं त्रपुसीसकम् ।
सौवर्णं कूर्मरूपं च सौवर्णं चक्रमम्बुजम् ॥ ४५ ॥

राजत पाञ्चजन्यं च समाहृत्य तत.परम् ।
कदलीपनसाम्राणा विल्वामलकयोरपि ॥ ४६ ॥

दाडिमीमातुलुङ्गस्य नालिकेरस्य कालत ।
पक्वानि समुपाहृत्य फलानि च ततः परम् ॥ ४७ ॥

चन्दनागरुकर्पूरकुंकुमादीन्युपाहरेत् ।
कोष्ठ मासी हरिद्रे द्वे मुराशैलेयचम्पकान् ॥ ४८ ॥

वचाकच्चोरमुस्तानि ह्रीबेरोशीरजान्यपि ।
मल्लिकाजातिवकुळनन्द्यावर्तकचंपकान् ॥ ४९ ॥

पाटलीपद्मकल्हाराण्युपाहृत्य ततः परम् ।
वस्त्रादीनि सितादीनि माल्यानि च विशेषतः ॥ ५० ॥

शालिपूर्वाणि धान्यानि कुशदूर्वादिकान्यपि ।
विल्वाश्वत्थकदम्बाम्रपल्लवादीनि यान्यपि ॥ ५१ ॥

हवि. पाकोपयोगयानि तण्डुलादीनि सत्तम ! ।
होमद्रव्याणि सर्वाणि पद्मपत्राणि मृण्मये ॥ ५२ ॥

द्वादशाङ्गुळविस्तीर्णे पक्वापक्वे घटे दृढे ।
नृहरेः पूजनार्थं तु कुभं सकरकं बृहत् ॥ ५३ ॥

एवमादीनि चान्यानि पुराऽऽहृत्य विधानतः ।
गृह्णीयात् पञ्चगव्यानि मृत्पात्रे नूतने शुभे ॥ ५४ ॥

गोमूत्रं गोमयं क्षीरं दधि मस्तु च पञ्चमम् ।
कपिलाया जराया वा पञ्चगव्यं प्रशस्यते ॥ ५५ ॥

अत्रग्रन्थपात ईश्वरसंहिताया १९ तमाध्याये अस्मिन्नेव प्रकरणे समानानुपूर्विकतया दृश्यमाना श्लोका [ ]

तयोरभावे चान्यासां गवां गव्यं विधीयते।
नार्ताया न च गर्भिण्या न वृद्धायाः कदाचन ॥ ५६ ॥

नावत्साया उपादेयं धेनोर्मूत्रं शकृद्द्वयम्।
भुविष्ठं गोमयं ग्राह्य सोष्णं कृम्याद्यदूषितम् ॥ ५७ ॥

निष्पीड्य सम्यग्गृह्णीयाद्गोमयस्य रसं पुन.।
सद्यस्तप्त घृतं शुद्धमहोरात्रोषितं दधि ॥ ५८ ॥

क्षीर ग्राह्यमतप्तं च दशाहाज्जन्मनः परम्।
गोमूत्रं विष्णुगायत्र्या 'गन्धद्वारे'ति गोमयम् ॥ ५९ ॥

'आप्यायस्वे'ति च क्षीरं 'दधिक्राव्णे'ति वै दधि।
घृत 'शुक्रमसी'त्येवं द्रव्याणि सह योजयेत् ॥ ६० ॥

विष्णुगायत्रिया यद्वा, पञ्चोपनिषदैस्तु वा।
'परमेष्ठी' शकृन्मन्त्रो गोमूत्रस्य तु 'पूरुषः' ॥ ६१ ॥

विश्वमन्त्रो भवेद्दध्नो निवृत्तिस्सर्पिषोभवेत्।
पयस सर्वमन्त्र स्यात्, सर्वेषा वाष्टवर्णकम् ॥ ६२ ॥

प्रोक्षणे स्नपने पञ्चगव्यमन्त्रा उदीरिताः।
सर्वदोषोपशान्त्यर्थं संप्राप्ते स्थापने सति ॥ ६३ ॥

सौदर्शननृसिंहस्य हृदाद्येर्नेत्रपश्चिमै.।
अङ्गमन्त्रैः प्रकल्प्यानि क्षीरान्तानि शकृद्रसात् ॥ ६४ ॥

दधि द्विगुणमाघारात् पीयूष त्रिगुणं तत.।
षड्गुण मूत्रमेतस्माच्छकृद्वारि चतुर्गुणम् ॥ ६५ ॥

स्थापने कथित मानमभिषेकविधावपि।
भूमिसंशोधनार्थं तत् प्रोक्षणे पञ्चक समम् ॥ ६६ ॥

गोमयेन समं मूत्र दधि स्याद्द्विगुणं ततः।
दध्नश्चतुर्गुणं सर्पि. सर्पिषोष्टगुणं पय.॥ ६७ ॥

प्राशने पञ्चगव्याना प्रमाणमिदमीरितम्।
स्थापनं स्नपनं ह्येतत् सर्वाघौघविनाशनम् ॥ ६८ ॥

ब्रह्मकूर्चसमोपेतं हन्यादागामिन त्वघम्।
तद्विधानं समासेन शृणु वक्ष्यामि तत्वतः ॥ ६९ ॥

चूर्णेन यववेणुभ्यां समेत तु कुशोदकम्।
ब्रह्मकूर्चमितिख्यातं वैष्णवास्त्रौघसप्रभम् ॥ ७० ॥

कुशोदं द्विविध प्रोक्तं शुष्काशुष्कविभागत ।
अशुष्कमथ निष्पीड्य वस्त्रेण रसमाहरेत् ॥ ७१ ॥

प्रहृत्य शुष्कमुदके प्रक्षिप्य जलमाहरेत्।
पवित्रं मन्त्रमुच्चार्य मूलं वास्त्रसमन्विम् ॥ ७२ ॥

गोमूत्रसंमितं मानाद्गृण्हीयात्तत् कुशोदकम्।
शकृद्रसप्रमाणेन चूर्णं तत्र नियोजयेत् ॥ ७३ ॥

चक्रास्त्रमन्त्रमुच्चार्य गायत्र्या विष्णुसंज्ञया।
ध्यात्वा च चक्रनृहरि तद्द्रव्येषु नियोजयेत् ॥ ७४ ॥

यद्वा पृथक् स्थापयित्वा पञ्चगव्यैः कुशोदके।
हृदयाद्यस्त्रपर्यन्तैरभिमन्त्र्य च योजयेत् ॥ ७५ ॥

प्रशस्तं प्राशनं ताभ्या प्रातः सर्वाघनाशनम्।
इति सम्यक् समाख्यातः पञ्चगव्यविधिस्तव ॥ ७६ ॥

मण्टपेऽथ पुरा क्लृप्ते यागस्नपनसिद्धये।
पञ्चगव्याधिवासार्थं यजनं प्रारभेद्गुरु.॥ ७७ ॥

पूर्वेद्यु. कर्मदिवसात् त्रिस्नायी समुपोषित.।
अहिर्बुध्न्ये मुहूर्ते तु ऋत्विग्भिः पाञ्चरात्रिकै.॥ ७८ ॥

पुण्याहं प्राग्वदुच्चार्य गव्यैरभ्युक्षयेत् स्थलीम्।
सद्रव्यामस्त्रमन्त्रेण प्राग्भागे धान्यविष्टरे ॥ ७९ ॥

दशारमष्टपत्रं तु चक्राब्जं भूपुरान्तके।
विलिख्य कर्णिकामध्ये त्रिकोणकृतसंपुटे ॥ ८० ॥

महाकुम्भं प्रतिष्ठाप्य सूत्रवस्त्रादिवेष्टितम्।
करकेण समोपेतं दिक्पालकलशान्वितम् ॥ ८१ ॥

पूरितं दधिमध्वाज्यक्षीरयुक्तेन वारिणा।
पिप्पलादिदळोपेतं गन्धस्त्रग्भिरलंकृतम् ॥ ८२ ॥

सकूर्च सफल सर्वरत्नहेमसमन्वितम्।
सर्वौषधिसमोपेतमक्षतैरपि चार्चितम् ॥ ८३ ॥

प्रदीप्य तैजसे पात्रे मृण्मये वा घृतेन तु।
कापिलेन चतुर्दिक्षु दीपं नेत्राभिमन्त्रितम् ॥ ८४ ॥

स्थापयेद्धान्यपीठस्थचक्राम्बुरुहमध्यतः।
कुम्भस्य पुरतः प्राग्वदुपविश्यासनोपरि ॥ ८५ ॥

प्राणायामादिकं कृत्वा भूतशुद्धिं यथाविधि ।
सौदर्शननृसिंहस्य मन्त्रं करशरीरगम् ॥ ८६ ॥

साङ्गं विन्यस्य हृदये चक्राम्बुरुहमध्यगम् ।
नादावसानगगनादवतार्य परादिना ॥ ८७ ॥

मूर्तिमन्त्रं स्वमन्त्रेण भावनामृतजैः शुभैः ।
अर्घ्याद्यैरखिलैर्भोगैरभ्यर्च्य प्रणवेन तु ॥ ८८ ॥

प्रीणयित्वा तथा हुत्वा नाभिकुण्डगतानले ।
बहिरभ्यर्चयेत् कुम्भे(ण्डे) मध्यस्थे चक्रवारिजे ॥ ८९ ॥

समावाह्य स्वमन्त्रेण मूर्तेरर्घ्यादिभिः क्रमात् ।
जपावसानं विधिवत् कुण्डे चक्राब्जलक्षणे ॥ ९० ॥

चक्रे वा पङ्कजे शङ्खे तुर्यश्रे स्थण्डिलेऽपि वा ।
समिद्भिः सप्तभिर्हुत्वा पूर्णान्तं तदनन्तरम् ॥ ९१ ॥

चन्दनेन प्रसूनैश्च गुग्गुल्वगरुणाऽपि च ।
दुग्धेन दधिना क्षौद्रगुडखण्डान्वितेन च ॥ ९२ ॥

शाल्यादीनां तथा बीजैः पायसाद्यैश्च सर्पिषा ।
हुत्वाऽथ पूर्णया तृप्तिं नीत्वा सम्यक् समर्प्य च ॥

ततः कलशनिष्ठस्य पुरस्ताच्छोधिते स्थले ।
सर्वधान्यमये पीठे लिखिते चक्रपङ्कजे ॥ ९४ ॥

स्वास्तृते नववस्त्रेण छादिते चोर्ध्वतः कुशैः ।
प्रागुक्तं कुम्भमादाय द्वादशाङ्गुलसंमितम् ॥ ९५ ॥

बहिरन्तश्च संक्षाल्य सूत्रेणावेष्ट्य पूर्ववत् ।
चन्दनाद्यैः समालिप्य प्रणवेन समाहितः ॥ ९६ ॥

चक्राब्जकर्णिकामध्ये विन्यसेत्तमधोमुखम् ।
ततो मानेन तत्तुल्यमपक्वं मृण्मयं घटम् ॥ ९७ ॥

संप्रोक्ष्य पञ्चगव्येन सास्त्रेण कुशवारिणा ।
चतुर्गुणेन सूत्रेण पञ्चैरन्तर्मुखैर्दलैः ॥ ९८ ॥

बन्धयित्वा तु सुदृढमास्यवर्जं समन्ततः ।
तं च तेनैव विन्यस्य जपस्तारमवाङ्मुखम् ॥ ९९ ॥

स्तृणीयादूर्ध्वतो दर्भान् कुम्भयोः परमेष्ठिना ।
प्रोक्षयेदर्घ्यतोयेन प्राङ्मुखः पुरुषात्मना ॥ १०० ॥

विश्वमन्त्रेण विकिरेदक्षतानि तदूर्ध्वतः ।
उत्तानयेन्निवृत्या तौ पाणिभ्यामुत्तरान्तिमम् ॥१०१॥

सर्पिषाष्टोत्तरशतं विष्णुगायत्रिया हुनेत् ।
सर्वात्मनाऽथ संस्पृश्य संपाताज्येन मन्त्रवित् ॥१०२॥

द्रव्याणि पक्वकुम्भेऽस्मिन् हृन्मन्त्रेण नियोजयेत् ।
मृत्कन्दधातुरत्नानि बीजलोहफलानि च ॥ १०३ ॥

चन्दनादीनि पुष्पाणि तथा सर्वौषधीनि च ।
कुशपल्लवदूर्वाश्च पूरयित्वा तदूर्ध्वतः ॥ १०४ ॥

योजयेत् पञ्चगव्येन प्राङ्मुखः सकुशोदकम् ।
अर्चयित्वाऽर्घ्यगन्धाद्यैः साङ्गं मूलं समुच्चरन् ॥ १०५ ॥

आच्छाद्य नववस्त्रेण दद्याद्भूतबलिं ततः ।
देवतायतनग्रामनगरेष्वपि पत्तने ॥ १०६ ॥

स्थापनास्पदमासाद्य शोभ(ध?)नं पञ्चगव्यकैः ।
तत्र मध्ये खनेच्छुंभ्रं मूलमन्त्रमुदीरयन् ॥ १०७ ॥

अङ्गुष्ठोदरमावृत्य त्रिधा सूत्रेण वेष्टयेत् ।
तेनैव भ्रामयेन्मध्ये स्थाप्य तत्रावटं खनेत् ॥ १०८ ॥

हस्तमानमधस्ताच्च षडङ्गुलसमन्वितम् ।
संप्रोक्ष्य पञ्चगव्येन तत्र रत्नादिकं न्यसेत् ॥ १०९ ॥

शेषं ध्यात्वा तदूर्ध्वं तु अभ्यर्च्यार्घ्यादिभिः क्रमात् ।
वाससाऽऽच्छाद्य दिग्बन्धमाचरेदस्त्रमुच्चरन् ॥ ११० ॥

संस्पृश्य गव्यं कुम्भाभ्यां ध्यात्वा मूलं जपेद्गुरुः ।
प्रभातायां तु शर्वर्यां कृत्वा स्नानादिकीः क्रियाः ॥

कुम्भस्थं नृहरिं पूज्य जपान्तं पूर्ववर्त्मना ।
पुण्याहवाचनं कृत्वा मुहूर्ते शोभने गुरुः ॥ ११२ ॥

पद्मपत्रावृतं कुम्भं श्वभ्रे तारेण विन्यसेत् ।
परितः सर्वधान्येन पूरयित्वाऽचलं यथा ॥ ११३ ॥

पञ्चगव्यं समुद्धृत्य घटस्थं कवचं लपन् ।
तेनैव पूरयेत् कुम्भं श्वभ्रस्थं मूलमुच्चरन् ॥ ११४ ॥

समभ्यर्च्यार्घ्यपुष्पाद्यैः पूरयेन्मृद्भिराहृतैः ।
नृसूक्तं भद्रसूक्तं च स्वस्तिसूक्तं च पाठयेत् ॥ ११५ ॥

शान्तिहोमं ततः कुर्याद्द्रव्यै. पूर्वोदितैः क्रमात्।
शतं शतार्धं पादं वा यथाशक्ति समाचरेत्॥ ११६॥

दक्षिणा गुरवे देया प्रतिष्ठाफलमिच्छता।
इति ते पञ्चगव्यस्य स्थापनं परिकीर्तितम्॥ ११७॥

सर्वोत्पातप्रशमनं महापातकनाशनम्।
सर्वसौख्यप्रद पुण्यं सर्वोपद्रववारणम्॥ ११८॥

सर्वारोग्यप्रदं नित्यं पुत्रपौत्रविवर्धनम्।
यद्यत् कामयते मन्त्री तत्तदाप्नोत्यसंशयम्॥ ११९॥

इति श्रीपाञ्चरात्रे पारमेश्वरसहिताया क्रियाकाण्डे प्रायश्चित्त सम्प्रोक्षण पञ्चगव्यस्थापन विधान नाम द्वाविंशोध्याय ।

॥ श्री ॥

त्रयोविंशोऽयायः ॥

सनक —

प्रशसित पुरा ब्रह्मन्! सुदर्शननृसिंहयो.।
एकरूप महायन्त्रस्थापनं स्थिरलक्षणम्॥ १॥

विस्तरेण समाचक्ष्व मयि सानुग्रहो यदि।

शाण्डिल्य —

पुरा नारायणेनोक्त पुण्ये वदरिकाश्रमे॥ २॥

ब्रह्मण. शीर्षविच्छेदमहापातकशान्तये।
पृच्छत' शङ्करस्याथ सर्वपापापनोदनम्॥ ३॥

सोऽपि तं विस्तराच्छ्रुत्वा कैलासशिखरोपरि।
प्रतिष्ठाप्य विधानेन यन्त्रे विष्टरसंस्थिते॥ ४॥

कल्पान्तानलसूर्याभमुभयाननमव्ययम्।
सर्वलोकमयं सर्वदेवतामयमद्भुतम्॥ ५॥

सर्वाधारमनाधार सर्वशक्तिक्रियात्मकम्।
दुष्टदोषगण सर्व निर्दहन्तं स्वतेजसा॥ ६॥

समाराध्याऽचिरेणैव पूतभावोऽभवद्भवः।
तथान्ये पुरूहूताद्या विद्यामेनामवाप्य च॥ ७॥

शङ्करात् पूर्णसंज्ञानात् स्वदिग्भागानपालयन्।
प्रजापालनशीलानां भूपानामेतदर्चनम्॥ ८॥

नैरन्तर्येण कर्तव्यमन्यथा जायतेऽवृति ।
जायते कथमेतेषामुपपातकिनामपि॥ ९॥

अकुर्वता जगत्स्थित्यै मर्यादाया विलोकनम्।
कुर्वता स्वस्वदुष्प्राप भूपतीना तु कि पुन.॥ १०॥

तथान्येषा द्विजातीना सर्वपापप्रणाशनम्।
प्रतिष्ठाप्यार्चनीय तत् सर्वकामसमृद्धिदम्॥ ११॥

तद्विधानं विशेषेण शृणु गुह्यतमं परम्।
दिव्याद्यायतने चित्रे प्राङ्गणादौ तु कुत्रचित्॥ १२॥

ग्रामादौ तु नदीतीरे विपिने पर्वतोपरि।
प्रासाद मण्टपं वाऽथ सचित्रं सर्वतोमुखम्॥ १३॥

प्राक्पश्चिमाननं वाऽथ सगवाक्षकवाटकम्।
एकादितलसंयुक्तं चक्रलाञ्छनलाञ्छितम्॥ १४॥

मुखभद्रसमोपेतमारोहणसमन्वितम्।
सप्राकारं समापाद्य प्रासादाभ्यन्तरे तते॥ १५॥

भद्रविष्टरमध्यस्थभूपुरे वज्रलाञ्छिते।
शेषादिभिर्दिक्षु मध्ये पट्कोणपुरभूषिते॥ १६॥

सवायुबीजवायव्यमण्डलेन विराजितम्।
दशारचक्रमध्यस्थदळाष्टककजान्तरे॥ १७॥

स्थापयेत्त महायन्त्र लक्षणेनोपलक्षितम् ।
आद्वादशाङ्गुलान्मानादेकैकाङ्गुलवर्धितात् ॥१८॥

चतुर्विंशाङ्गुलान्तानि मानानि स्युस्त्रयोदश ।
तेष्वेक निश्चयीकृत्य कर्तुरिच्छावशेन तु ॥ १९ ॥

पादाद्युष्णीषपर्यन्तं द्विषोढा वाष्टधा भवेत् ।
बेरार्धमानमादाय स्वभागार्थं समन्ततः ॥ २० ॥

सूत्रेण कर्णिकावृत्तं मध्यस्थेन, ततो वहि ।
एकैकाशानि पद्मानि षट् भवन्ति यथाक्रमम् ॥ २१ ॥

चतुष्पत्रं भवेदाद्यमष्टपत्रमनन्तरम् ।
द्विरष्टकेसर विद्यात् तृतीयं षोडशच्छदम् ॥ २२ ॥

द्वात्रिंशत्केसरं तुर्य द्वात्रिंशद्दळभूषितम् ।
अष्टाष्टकेसरोपेतं तथासङ्ख्यदळ वहि ॥ २३ ॥

तत् केसरविनिर्मुक्त अष्टपत्रं तथा वहि ।
भूपुरादीनि सार्धेन सपुटान्तानि वाह्यत ॥ २४ ॥

द्वाभ्या द्वाभ्या तथाशाभ्या वहिरावरणद्वयम् ।
पूर्वस्मिन् केशवाद्याश्च विष्णवाद्याश्च ततो वहि. ॥२५॥

जगत्स्थितौ समुद्युक्तानृपीकेशजनार्दनान् ।
वहिश्चक्रगदादीनामश तेषामधोर्ध्वत ॥ २६ ॥

भागद्वयं ततस्त्यक्त्वा वाराहनरसिंहयो. ।
समन्ताद्भूपुरस्याऽथ भोगार्थं (भागार्थं) यन्त्रकल्पने ॥

महायन्त्रस्य विस्तारे विभक्ते पञ्चधाऽथवा ।
सप्तधा, मध्यवाह्यस्थैर्नालास्त्र्यंशैः प्रकल्पयेत् ॥ २८ ॥

किञ्चिद्विष्टरपीठोच्चान् नाळानामधिकार्यातः ।
वराहवदनाकारा, पार्श्वयोर्मूलविस्तृते ॥ २९ ॥

दक्षिणाद्यनुपातेन त्वामूलादग्रपश्चिमम् ।
प्रमाणमेवं बुद्ध्वाऽत्र लोहदारुशिलादिकम् ॥ ३० ॥

समाहरेद्यथाशास्त्र प्रमाणेन यथाविधि ।
संपाद्या फलकाकारा भागैकेन घना दृढा ॥ ३१ ॥

स्यात् षडंशघना शैली चतुरंशघनाऽथवा ।
आकर्णिकावनेर्बाह्यचतुरश्रपुराकृति. (वधिः) ॥

प्रमाणादुत्तमादस्मान्मध्यमाधमवाञ्छया ।
त्र्यशेनार्धेन वा कुर्यान्मुख्यकल्पमुदीरितम् ॥ ३३ ॥

बेरोष्टं द्विगुणीकृत्य तत्प्रमाणेन कल्पयेत् ।
फलकामध्यतस्त्यक्त्वा लम्बमानं यथापुरा ॥ ३४ ॥

शेष द्विरष्टधा भङक्त्वा कर्णिकार्धेन तद्वहिः ।
प्राग्वदावृतिपद्मानि, भूपुरादीन्यथ त्रिभि. ॥ ३५ ॥

ततस्त्रिभिस्त्रिभि. कार्य मूर्तीनामावृतिद्वयम् ।
अर्धेन चतुरश्रं तु, मूर्तीनामावृतिद्वयम् ॥ ३६ ॥

एकैकं त्र्यंशसम्भूतं प्रमाणेन यथा भृशम् ।
कल्पयेत् केशवाद्यांश्च विष्णवाद्यांश्च द्विरष्टधा ॥ ३७ ॥

कुर्याद्वैकावृतौ बुद्ध्या संमन्त्र्य ध्यानयोगत. ।
मध्यत. कर्णिकाया तु परिधौ चन्द्रमण्डलम् ॥ ३८ ॥

तन्मध्ये तारकं कुर्यात् तन्मध्येन सुदर्शनम् ।
भुजै. षोडशभिर्युक्तमष्टाभिर्वाऽनलप्रभम् ॥ ३९ ॥

पिङ्गलोचनकेशाढ्य रक्ताम्बरधर विभुम् ।
दंष्ट्राकराळवदनविवरोद्भूतपावकम् ॥ ४० ॥

कुटिलभ्रुकुटीभङ्गभंगुराळकषट्पदम् ।
ललाटलोचनोद्गीर्णज्वालाज्वलितदिङ्मुखम् ॥ ४१ ॥

ऊर्ध्वज्वालागणालीढकिरीटतटशोभितम् ।
श्रीवत्सकौस्तुभोरस्कं ग्रैवेयकविराजितम् ॥ ४२ ॥

पादावलम्बिनी दिव्या दधानमुपवीतवत् ।
प्रत्यालीढेन तिष्ठन्तं चक्राक्रमणरूपिणा ॥ ४३ ॥

पादयोर्दक्षिणागुष्ठप्रान्तरेखात् तथेतरात् ।
पार्ष्णे. स्वमध्यतो मानं देहलब्धागुलेन च ॥ ४४ ॥

चत्वारिंशत् साष्टक स्यात् प्रत्यालीढ चिरान्वितम् ।
मुख्यदक्षिणहस्तादिमुख्यवामकरावधि ॥ ४५ ॥

द्विरष्टवाहुभिर्धत्ते प्रादक्षिण्यक्रमेण तु ।
शक्ति खड्ग, तथा चाग्नि, मङ्कुशं, दण्डकुन्तके ॥

परशुं च, सहस्रारं दरं च सशरं धनुः ।
पाशं, हलं, ततो वज्रं, गदां च मुसलं, तथा ॥ ४७ ॥

त्रिशूलमेतान्यस्त्राणि प्रत्येकं वीर्यवन्ति च ।
दुष्प्रधर्षं भयघ्नानि वहन्तमरिसूदनम् ॥ ४८ ॥

अन्यथाष्टभुजो धत्ते मुख्यदक्षकरादिकैः ।
पद्मा, कुशौ, च मुसल, चक्र, मत्युग्रतेजसम् ॥ ४९ ॥

शङ्खं च, सशरं चाप, पाशं, कौमोदकी क्रमात् ।
कृत्वैवमर्धचित्रं तु नवतालेन शिल्पिना ॥ ५० ॥

पादयोरन्तरे तस्य तिष्ठत. कर्णिकावनौ ।
शान्तिपुष्टिवशीकारविद्वेषाकर्षमारणान् ॥ ५१ ॥

उच्छाटनं वा यः कर्तुमिच्छेत् साधकसत्तम ।
तस्य साध्यं लिखेन्मन्त्री शक्त्या संपुटित विभोः ॥

इन्दुबिम्बस्य पर्यन्ते षट्कोणं क्रमशो लिखेत् ।
प्रागादिकोणषट्के तु प्रवर्तकनिवर्तके ॥ ५३ ॥

मन्त्राक्षराणि सादीनि सबिन्दूनि च वै पुरा ।
उपक्रम्य च वर्मास्त्रे लिखेदन्तर्मुखानमून् ॥ ५४ ॥

बहि. कोणान्तराळेषु प्रोक्तोऽयं दक्षिणादित. ।
आचक्रादीन्यथाङ्गानि ज्वालाचक्रान्तिमानि च ॥५५॥

चतुर्दळाग्रे प्रागादौ वर्मास्त्रे च सबिन्दुके ।
तदन्तराळेष्वन्तस्था बिन्दुना चान्तरानना. ॥ ५६ ॥

केसरेष्वष्टपत्रस्य स्वरानन्याश्च बिन्दुभि. ।
दळेष्वष्टाक्षराणानि तथा भूतानि, तद्बहि ॥ ५७ ॥

द्विरष्टपत्रकिञ्जल्कनिचये प्राक्प्रयोगत. ।
कादिसान्तानि वर्णानि सबिन्दूनि यथापुरा ॥ ५८ ॥

तद्दळेषु द्विषट्कार्णं , वर्मास्त्रे शिरसा सह ।
षोडशाक्षर इत्युक्तो, द्वात्रिंशत्केसरादिके ॥ ५९ ॥

आनुष्टुभं महामन्त्रं नृवराहनृसिंहयो. ।
बहिरष्टाष्टपत्रेषु पाताळनृहरेर्मनुम् ॥ ६० ॥

प्राग्वदक्षरशो न्यस्य, ततोऽष्टदळपङ्कजे ।
नारसिंहं तथाष्टार्णं, तद्बाह्यस्थे तु भूपुरे ॥ ६१ ॥

सप्तद्वीपसमुद्राढ्ये वज्रै. कोणेषु लाञ्छिते ।
प्रागाद्यासु महादिक्षु पार्थिवं बीजमुत्तमम् ॥ ६२ ॥

तन्नाममन्त्रसंयुक्तं, अन्तस्था कोणभूमिषु ।
तत. सपार्थिव बीजं कोणाभ्यन्तरबाह्ययोः ॥ ६३ ॥

तद्बहिः प्रातिलोम्येन स्वरषोडशकं न्यसेत् ।
सकारादीनि कान्तानि तथाभूतानि तद्बहि. ॥ ६४ ॥

परितोन्त्ययुगेनैव साध्यनामविदर्भणम् ।
कृत्वा प्रति प्रयोगेण बहिर्भूपुरसपुटात् ॥ ६५ ॥

पाशाङ्कुशाभ्यामावेष्ट्य द्वाभ्या वा बहुभिस्तु वा ।
पुरोदितक्रमेणैव स्वस्थाने केशवादय ॥ ६६ ॥

बाह्यावरण भूमिष्ठा. प्रागाद्यासु च विष्णव. ।
तत्कोणेषु हृषीकेश., तच्छिद्रेषु जनार्दना ॥ ६७ ॥

कल्पनीयाश्च, तन्मन्त्रा. प्रणवाद्या यथाक्रमम् ।
सजीवा. सञ्जयोपेता नमस्कारसमन्विता. ॥ ६८ ॥

अमुक रक्ष रक्षेति तदन्ते साध्यभूषिता. ।
प्रागादिदिक्षु तद्बाह्ये त्वन्तस्थाश्चाष्टभि सह ॥ ६९ ॥

यशौ रषौ लसौ चाथ वहावपि सबिन्दुकौ ।
विलिखेत् पुनरप्येतानेशान्याऽनल पश्चिमम् ॥ ७० ॥

पाशाङ्कुशाभ्यामावेष्ट्य द्वाभ्या वा बहुभिस्तथा ।
अधस्तान्नृवराहं च सर्वो वै नृहरेर्मनुम् ॥ ७१ ॥

क्रमश. केशवादीना ध्यान चाकर्णयामलम् ।
केशव. स्वर्णवर्णोऽब्जशङ्खचक्रगदाधरः ॥ ७२ ॥

नारायणो नीरदाभ. शङ्खचक्रगदाब्जधृक् ।
माधवोऽब्जगदाशङ्खचक्री नीलाब्जसन्निभ. ॥ ७३ ॥

गोविन्दो धवलश्चक्रगदाशङ्खपयोजधृक् ।
विष्णुर्गदाम्बुजदरचक्री बन्धूकसप्रभ. ॥ ७४ ॥

रक्तश्चक्रदराम्भोजशङ्ख(गदा)धृङ्मधुसूदन ।
त्रिविक्रमश्चक्रगदापद्मशङ्खी जपारुण. ॥ ७५ ॥

शङ्खचक्रगदापद्मधर. स्याद्वामनोऽरुण. ।
पद्मचक्रगदाशङ्खी श्रीधरश्चन्द्रसप्रभः ॥ ७६ ॥

विद्युत्प्रभो हृषीकेशो गदाचक्रदराब्जधृक् ।
गदाब्जचक्रविद्याभृत्पद्मनाभोऽरुणप्रभ ॥ ७७ ॥

दामोदरः पद्मशङ्खगदाचक्रधरोऽरुण. ।
मुख्यदक्षकराम्भोजात् मुख्यवामकरावधि ॥ ७८ ॥

पद्मादिकं धारयन्ते आयुधाना चतुष्टयम् ।
किरीटकौस्तुभधरा वनमालाविभूषिता. ॥ ७९ ॥

पीताम्बरधरा. सर्वे प्रसन्नवदनेक्षणाः ।
करुणापूर्णहृदया जगदुद्धरणोद्यता. ॥ ८० ॥

यन्त्रतेजोऽसहिष्णूना नराणा तापशन्तये ।
आसारैरमृतैर्नित्य सेचयन्तः समन्तत. ॥ ८१ ॥

विष्णु प्राच्यादिदिग्भागे हृषीकेशा विदिक्स्थिता. ।
जनार्दनाश्छिद्रगताश्चाष्टपादे(?) चतुर्भुजा. ॥ ८२ ॥

पृष्ठदक्षिणवामाभ्या चक्रशङ्खधरास्तथा ।
मुख्यवामकरेणेव वरदा वाऽभयप्रदाः ॥ ८३ ॥

विष्णवो दक्षिणैर्मुख्यैर्ज्वलत्पावकभीषणा. ।
चक्रकौमोदकीशार्ङ्गान् धारयन्त. सखड्गकान् ॥ ८४ ॥

वह्न्यादिकोणदेशस्था हृषीकेशा. सुवर्णभा. ।
शङ्ख हल च मुसलं वहन्तः शूलपश्चिमम् ॥ ८५ ॥

प्रागाग्नेयादिकच्छिद्रदेशस्थाश्च जनार्दना. ।
ज्वलन्मरतकाभाश्च वीक्षमाणाश्च दिक्स्थितान् ॥८६॥

दण्ड कुन्त च शक्ति च पाशं चाङ्कुशमेव च ।
वज्रं परशुसंज्ञ च तथा शतमुखानलम् ॥ ८७ ॥

दधाना. सुसमै स्थानैरुत्थिताः स्वस्तिकादिना ।
सुखासीनास्तु वा सर्वे केवला वा सशक्तिका. ॥ ८८ ॥

संकल्प्या. तदध. सर्वयज्ञाङ्ग. सूकराननः ।
कृष्णपिङ्गळवर्णाभ. पुण्डरीकनिभेक्षण. ॥ ८९ ॥

पश्चिमाभ्या च पाणिभ्या पूर्ववच्चक्रशङ्खभृत् ।
मुख्येन दक्षिणेनैव भीतानामभयप्रद ॥ ९० ॥

भूम्या. स्वाङ्के निपण्णाया वामेनाश्लेषतत्परः ।
परस्तान्नृहरिर्देवस्तुहिनाचलसन्निभ. ॥ ९१ ॥

करैरष्टभिरत्युग्र. पृष्ठतो दक्षिणादितः ।
शङ्खचक्राम्बुजगदा खड्गं च सशरं धनु. ॥ ९२ ॥

धत्ते षड्भिस्तु मुख्याभ्यां हिरण्यकशिपुं रुषा ।
विदारयंश्च स्वाङ्कस्थ नखरै. क्रकचोपमै. ॥ ९३ ॥

उद्धृत्य साम्बुजं पाणि केवलं वाऽभयप्रदः ।
हिरण्यरुधिरस्रोत पङ्कितोरस्थलः शुभ. ॥ ९४ ॥

सर्वानेतान् सजीवेन शक्तिबीजेन वेष्टयेत् ।
वह्नि प्राच्यादिदिग्देशे साकारानस्त्रविग्रहान् ॥ ९५ ॥

चक्रकौमोदकीशार्ङ्गनन्दकान् विलिखेदिमान् ।
केशवाद्यास्तथास्त्रान्ताश्चतुस्त्रिशत्तु मूर्तय. ॥ ९६ ॥

स्वतन्त्रं कल्पयेन्मन्त्री यद्वा चावरणक्षितौ ।
कृत्वैव प्राङ्मुखं यन्त्रमपराङ्गं प्रकल्पयेत् ॥ ९७ ॥

कर्णिकावलय कुर्यात् प्राक्प्रमाणेन मध्यत. ।
तदन्तरे कोणषट्कं प्रकाशाह्लादसपुटम् ॥ ९८ ॥

त्रिधा विभज्य तद्बाह्यं क्षेत्रार्धं च तदन्तरे ।
त्रिरष्टयेदुम्बराह्ये (?) कमलं द्वादशच्छदम् ॥ ९९ ॥

चतुर्विंशद्दलं चक्र नाभिनेमित्रयान्वितम् ।
प्रथिभिश्चावृतं वाह्ये नेमिस्थैस्तस्य वाह्यतः ॥ १०० ॥

शक्तिभिश्च जयाद्याभिरष्टाभि परिवारितम् ।
पूर्व द्वादशपत्राब्जकर्णिकामध्यकल्पिते ॥ १०१ ॥

त्रिकोणसंपुटाकारे प्रकाशाह्लादलक्षणे ।
षट्कोणे लक्षयेद्देवं कल्पान्तहुतभुक्प्रभम् ॥ १०२ ॥

नृपश्चवक्त्रं ज्ञानादिगुणपूर्णमहार्णवम् ।
त्रिलोचनं चतुर्बाहु चतुश्चक्रधरं परम् ॥ १०३ ॥

योगपट्टपिनद्धाङ्गं जान्वारूढभुजद्वयम् ।
श्रीवत्सकौस्तुभोरस्क भूषितं मकुटादिभि. ॥ १०४ ॥

हारशेखरकेयूरकटकैर्नूपुरान्तिमै ।
भक्ताना स्वानुरक्ताना सिद्धान्तनिरतात्मनाम् ॥ १०५ ॥

अशोकविटपिच्छायाव्याजेनार्तिविनाशनम् ।
साधुसंरक्षणोद्युक्तचेष्टितं हृषमानसम् ॥ १०६ ॥

अधस्ताच्चरणाम्भोजात् साध्यं बीजपुटीकृतम् ।
विलिख्य, कोणषट्केषु प्रागाद्येषु त्रिकं त्रिकम् ॥

सुदर्शननृसिंहस्य मन्त्राणानि यथाक्रमम्।
तदङ्गानि च तद्बाह्ये कोणाभ्यन्तरभूमिषु ॥ १०८ ॥

लिखेदावृत्तियोगेन क्षार्णं प्रथिजणेषु च।
प्रागादि चक्रबाह्ये तु [1]जया चन्द्रप्रभाविनी । १०९ ॥

नवदूर्वाङ्कुरश्यामा[2] मोहिनी,[3] विजया ततः।
राजोपलप्रभा कान्ता[4] ह्लादिनी पाटलप्रभा ॥

[5]अजिता कनकप्रख्या, [6]माया नीलोत्पलप्रभा ।
रक्ताऽ[7]पराजिता[8] सिद्धिर्धूम्रवर्णा स्वकं पतिम् ॥

वीक्षमाणाश्च सतत, नीलोत्पलविलोचनाः।
नवयौवनलावण्यविभवेनोपबृंहिताः ॥ ११२ ॥

करण्डमकुटोपेता· सर्वाभरणभूषिता ।
विचित्रक्षौमवसना. सर्वर्तुकुसुमान्विता ॥ ११३ ॥

द्विभुजा दक्षहस्तस्थपुष्पमालाभ्यलंकृता· ।
वामे चन्द्राशुसङ्काश चामरव्यजनोद्यता. ॥ ११४ ॥

भूपञ्चरौ नृसिंहस्य भीमोग्रौ भीषणद्युती ।
दंष्ट्राकराळवदनौ ज्वलत्पावकलोचनौ ॥ ११५ ॥

नीलनीरदसंकाशौ द्विभुजौ दण्डचक्रिणौ ।
उदग्रकायावत्युग्रौ वीक्षयन्तौ परस्परम् ॥ ११६ ॥

रक्ताम्बरधरौ रक्तकुसुमस्रग्विमण्डितौ ।
संपाद्यैव महायन्त्र सुदर्शननृसिंहयोः ॥ ११७ ॥

स्थापयेद्विधिवन्मन्त्री मध्ये प्रासादमण्टपे ।
क्ष्मापरिग्रहमारभ्य संपन्ने सर्वकर्मणि ॥ ११८ ॥

विन्यस्ते विष्टरे यन्त्रे प्रतिष्ठाप्य विधानतः।
त्रैकाल्यमर्चन कार्य तल्लक्षणमथोच्यते ॥ ११९ ॥

तद्दैर्घ्यं यन्त्रविस्तारादधिकं द्वादशाङ्गुलम्।
विभक्ते यन्त्रविस्तारे सप्तधा वाऽथ पञ्चधा ॥ १२० ॥

एकैकमन्तयोस्त्यक्त्वा भागैर्मध्यगतैरत. ।
पञ्चभिर्वा त्रिभि. कार्या विष्टरस्य तु विस्तृति. ॥१२१॥

एकैकं मध्यत स्थाप्य पार्श्वयो. सषडङ्गुलम् ।
यन्त्रपार्श्वस्थनाळाभ्या सुषिरद्वयमाचरेत् ॥ १२२ ॥

शिष्टानि मार्जयेन्मन्त्री चतुरश्रप्रसिद्धये ।
त्रिचतुःपञ्चधा वाऽथ यन्त्रोच्छ्राये विभाजिते ॥१२३॥

तत्तदेकाशमानेन कार्य स्याद्विष्टरोच्छ्रय. ।
पीठवत्तदलंकृत्य पञ्चाङ्गै. परितो बहिः ॥ १२४ ॥

तदूर्ध्वे विष्टरं यन्त्रं कल्पयेत्तद्विधि शृणु ।
पीडमध्यगतं भागं मध्यस्थेन तु तन्तुना ॥ १२५ ॥

कर्णिकार्थं परिभ्राम्य शेषे पोढा विभाजिते ।
द्विरष्टकेसरोपेतमष्टपत्राब्जमस्तके ॥ १२६ ॥

भागेन तद्बहिस्तद्वद् दशारं चक्रमुज्ज्वलम् ।
वायुमण्डलमध्येन पटकोणं तु बहिस्त्रिभिः ॥ १२७ ॥

वज्राङ्कितं कोणभूषु भागार्धेन तु भूपुरम् ।
यन्त्रमध्यमनाळस्य निवेशार्थं तु मध्यत. ॥ १२८ ॥

वेधयेत् तत्प्रमाणेन साध्यनाम समन्ततः।
विलिख्य तद्बहिर्वेष्ट्य केसराणा द्विरष्टके ॥ १२९ ॥

षोडशार्णं नृसिंहस्य तद्द्विपटकाक्षरावधौ ।
हुफट्स्वाहा समोपेतो नृहरे. षोडशाक्षरः ॥ १३० ॥

प्रागाद्यष्टदलेष्वस्य मन्त्रमानुपूर्व्य परम् ।
चतुष्टयक्रमेणैव प्रत्येकस्मिन् दळे न्यसेत् ॥ १३१ ॥

बहिर्दशारचक्रस्य प्रागराद्येषु मन्त्रपम् ।
सौदर्शननृसिंहस्य हनशब्दसमन्वितम् ॥ १३२ ॥

विलिखेद्द्वन्द्वयोगेन, बाह्ये वायव्यमण्डले ।
विलिखेद्वर्तुळाकारे वायव्यं बीजमुत्तमम् ॥ १३३ ॥

वर्म चास्त्रसमेतं च विलिखेदन्तरान्तरा ।
बाह्यस्थे कोणषट्के तु लिखेदाग्नेयमक्षरम् ॥ १३४ ॥

कल्पयेत् प्रतिकोणं तु बहिज्वालासमन्वितम् ।
कोणेषु भूपुरस्यान्त. पार्थिवं बीजमुल्लिखेत् ॥ १३५ ॥

अङ्कारोऽथ विदिग्भागे परितो भद्रपीठवत् ।
कण्ठदेश समाश्रित्य द्वौ द्वौ प्राच्या दिशि क्रमात् ॥

अन्योन्यमभिवीक्षन्तौ कल्पयेदुत्तमोत्तमे ।
यन्त्रसन्धारणोद्युक्तौ व्यात्तास्यावुग्रलोचनौ ॥ १३७ ॥

अनन्तगुलिकौ प्राच्यां, याम्याया शङ्खवासुकी।
सतक्षको महापद्मः प्रतीच्या उत्तरे तथा ॥ १३८ ॥

कार्कोटकस्तथापद्मो, विशेषस्तत्र कथ्यते।
विभज्य कर्णिकाभूमेर्भूपुरान्तं विधान्तरे ॥ १३९ ॥

नृसिंहयन्त्रं कुर्वीत, बाह्यतो यन्त्रविष्टरम्।
दिक्षु नारायणास्त्राणि तत्र कूर्चमयानि च ॥ १४० ॥

सितादिधातुजैर्वर्णैः कुङ्कुमाद्यैर्विमिश्रितैः।
विलिखेन्मुख्यमूर्त्यादि यथाशोभं मुखद्वये ॥ १४१ ॥

सुदर्शननृसिंहाभ्या वर्णशोभा समीरिता।
कर्णिका कनकप्रख्या, केसराण्यरुणानि तु ॥ १४२ ॥

पाण्डुरक्तानि पत्राणि, भूपुराणि समन्ततः।
कनकाभानि कार्याणि, मूर्तीना प्रागुदीरितम् ॥१४३॥

चक्रनाभिद्वयं कुर्याद्धेमपूर्वारुणप्रभम्।
शरदाकाशसंकाशान्यराणि, अरुणमन्तरम् ॥ १४४ ॥

हेमकुन्दसितं कुर्यात् क्रमाद्धेमित्रयं शुभम्।
पीतेन वा वळर्क्षेण लिखेन्मन्त्राक्षराणि वै ॥ १४५ ॥

पद्मकेसरपत्रेषु भूपुरेषु समन्तत ।
षट्कोणान्तरवाह्येषु चक्रनाभ्यरनेमिषु ॥ १४६ ॥

पृथक् कृतानि वर्णानि मान्त्राण्यन्तर्मुखानि च।
तारद्वयान्तरस्थानि विन्दुयुक्तानि चान्तत ॥ १४७ ॥

लेख्यान्येतानि सर्वत्र, मुख्यप्रणवसंपुटम्।
प्राकारसमुपेतानि नमस्कारान्वितानि च ॥ १४८ ॥

कुर्यान्नारायणास्त्राणि कूर्चानि हरिताणि च।
वद्धानि पद्मपाशेन ततो हयमुखानि च ॥ १४९ ॥

भूर्जपत्रे विलिख्येत कुंकुमागरुजै रसैः।
हरिचन्दनकर्पूरगव्यपञ्चकसाधुभि ॥ १५० ॥

सुवर्णसूच्या विधिवत् समाप्य गुलिकाकृतिम्।
सुवर्णपट्टेनावृत्य प्रतिष्ठाप्य विधानतः ॥ १५१ ॥

रक्ष्याणामायुरारोग्यधनधान्यादिवृद्धये।
पुत्रपौतादिसन्तानविजयेष्टादिसिद्धये ॥ १५२ ॥

धारयेच्छिरसा मन्त्री साधुसरक्षणे रत.।
यन्त्रमेतत् समाख्यात सुदर्शननृसिंहयो ॥ १५३ ॥

स्थापनं सर्वमूर्तीना यथावत् प्रागुदीरितम्।
तथैवैतत् प्रतिष्ठाप्य त्रिकाल वैककालिकम् ॥ १५४ ॥

पूज्यते यदि राजा च राष्ट्रं च सुखमेधते।

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे सुदर्शननृसिंहमहायन्त्रस्वरूपकथन नाम त्रयोविंशोऽध्याय ।

॥ श्रीः ॥

चतुर्विंशोऽध्यायः ॥

सनक —

मुने! सम्यक् समाख्यात सुदर्शननृसिंहयो।
पूर्वापरमुखं यन्त्रं नानामन्त्रार्णपूरितम् ॥ १ ॥

मध्यमारभ्य मन्त्राणां साङ्गाना लक्षण परम्।
न्यासार्थमर्चनार्थं च समाचक्ष्व यथाक्रमम् ॥ २ ॥

शाण्डिल्य —

साधु पृष्ट त्वया प्राज्ञारहस्याम्नायलक्षितम्।
सनक! त्वं शृणुष्वात्र मन्त्रजातं यथास्थितम् ॥ ३ ॥

संकर्षणात् पुरा तुष्टाच्छङ्करेण मयाऽपि च।
हिताय सर्वलोकाना यन्त्ररूप गुणोत्तरम् ॥ ४ ॥

सुगुप्ते भूतले शुद्धे वर्णचक्र परिस्तरेत्।
अकारादिक्षकारान्त सर्वार्णमयरूपिणम् ॥ ५ ॥

स्वक्षनाभ्यरनेमीभि. प्रथिभिश्चाप्यलंकृतम्।
कारणं सर्वमन्त्राणा अक्षे प्रणवमालिखेत् ॥ ६ ॥

अकाराद्या विसर्गान्ता स्वरा नाभ्यङ्गमाश्रिता।
ककारादीनि भान्तानि तदराणा त्रिरष्टके ॥ ७ ॥

मादिहान्तानि नेमौ तु क्षार्ण प्रथिगणे स्थितम्।
शब्दब्रह्ममयं चक्र पुरा वर्णगणं तत. ॥ ८ ॥

प्रणवाद्येर्नमोन्तैश्च संज्ञाभि· क्रमशस्तत।
विन्यस्य मातृकायन्त्रं स्वं देवं विधिवद्गुरु. ॥ ९ ॥

समभ्यर्च्यार्घ्यपुष्पाद्यैर्मातृकामन्त्रविग्रहम्।
तत समुद्धरेन्मन्त्रान् सर्वाभिमतसिद्धिदान् ॥ १० ॥

जेतुं शक्ताऽऽत्मनो यातु सृष्टिस्थितिलयोन्मुखी।
क्रियाशक्ति· समुद्दिष्टा सकल्पजननी पुरा ॥ ११ ॥

कालरूपमधिष्ठाय तयैतद्बृहितं जगत्।
कालचक्र जगच्चक्र तस्मात् सौदर्शन वपु. ॥ १२ ॥

तमधिष्ठाय सा शक्तिर्जीवभूता व्यवस्थिता।
विनाकृत तया सर्वमसत्कल्पमिद भवेत् ॥ १३ ॥

तस्मात् समुद्धरेच्छक्तिमग्नीषोमसमप्रभाम्।
अक्षाधारा तु वै नित्यामनाद्यन्ता च वैष्णवीम् ॥ १४ ॥

पूर्व नेम्यन्तिमद्वन्द्वं तदाद्य सानलद्वयम्।
नाभितुर्यान्तिमद्वाभ्या पिण्डमेतदलंकृतम् ॥ १५ ॥

सौदर्शनमहाशक्ति सर्वसिद्धिप्रदायिनी।
जीवभूता षडर्णस्य प्रकाशानन्दरूपिणी ॥ १६ ॥

हृदयाद्यङ्गसिध्यर्थं पिण्डमेतत् स्वरोज्झितम्।
दीर्घाद्यैस्त्रिभिश्चान्त्यैर्भेदयेन्नेत्रपञ्चमम् ॥ १७ ॥

प्रणवादीनि चैतानि कुर्याद्धृदयादिभि.।
नम. स्वाहा वषड्हुंफट्वौषडभिर्जातिभि. सह ॥ १८ ॥

क्रमान्नियोजनीयानि विज्ञानादिगुणे सह।
शक्तः प्रकृतिरूपस्य षडर्णस्योद्धृति शृणु ॥ १९ ॥

पूर्ववत् समुपाहृत्य चान्तिमे द्वयमन्तिमम्।
तत्राष्टं सतृतीयं स्यात् सार्ण(यान्त्य)सान्त्यंततोन्तिमम्॥

सपञ्चमस्वर तच्च कुर्यान्नेम्याद्यभूषितम्।
पश्चादेकादशारार्णयुक्तं तद्द्विगुणारगम् ॥ २१ ॥

अन्त्यार्णमविमुक्तं तु कुर्यात् पञ्चमषष्ठयो.।
अय सौदर्शनो मन्त्र षडर्ण. समुदीरितः ॥ २२ ॥

तृतीय पञ्चम. षष्ठः प्रत्येक त्र्यक्षरः स्मृत.।
अन्येऽवर्णसमोपेता वर्णा स्युर्द्व्यक्षरास्त्रय. ॥ २३ ॥

एष कालात्मनो विष्णोर्विश्वरूपस्य वाचक.।
सतारया च शक्त्यायमष्टार्णे परिकीर्तित. ॥ २४ ॥

क्षेत्रक्षेत्रज्ञयुक्त्या तु यथा प्रकृतिग. पुमान्।
स्थूलसूक्ष्मात्मको ध्येयस्तथा सौदर्शनो हरि. ॥ २५ ॥

दर्शनं परतत्वस्य स्यात्तदाख्यानदर्शनम्।
तन्निष्ठानामिदं नित्यमज्ञानतिमिरापहम् ॥ २६ ॥

छिनत्ति संशयं तेषा समु(दु)पायप्रवृत्तये।
रूपान्तरमिद तस्य सशयच्छेदकारिण. ॥ २७ ॥

नून वर्णाश्रमाचारनिष्ठानामाननेन तु।
भिनत्ति दूषकान् जन्तून् स्वकविद्याप्रभावत. ॥ २८ ॥

लाञ्छितानामनेनाशु भक्तानां भावितात्मनाम्।
करस्थो विजयस्तु स्यादिह लोके परत्र च ॥ २९ ॥

कि पुनर्विषये यन्त्रे स्थापिते पूजिते सति।
मुने! मन्त्रप्रभावोऽयमेवमुक्त परन्तप! ॥ ३० ॥

लक्षण हृदयाद्यस्य मन्त्रस्यास्य क्रमाच्छृणु।
प्रागेव हृदयादीनां मन्त्राणानि यथाक्रमम् ॥ ३१ ॥

विन्यसेद्बीजभूतानि तारान्ते विन्दुना तत.।
आविसूना क्रमादन्ते तथा सूर्याक्षरद्वयात् ॥ ३२ ॥

महासुदर्शनज्वालापदयोरन्तिमेऽपि च।
चक्रायेति पदं षोढा शिरोन्तं योजयेत् क्रमात् ॥ ३३ ॥

विज्ञानादिगुणोपेतै. तुर्यान्तैर्हृदयादिभि।
नमः स्वाहादिजात्यन्तै. प्रागुक्तविधिना लिखेत् ॥३४॥

ध्येयान्याकारवर्त्तीनि भोगस्थानेषु मूलवत् ।
वर्णभूषणवस्त्रास्त्रभुजसंस्थानचेष्टितै ॥ ३५ ॥

वर्मास्त्रेज्ञेयमन्त्रस्य चरमार्णद्वय स्मृतम् ।
नमो नारायणायेति स्यादष्टार्ण सतारकम् ॥ ३६ ॥

अस्य साङ्गान्युपाङ्गानि मन्त्रार्णैर्बिन्दुभूषितैः ।
चरमार्णेन शेषाणि चरणान्तान्यपि क्रमात् ॥ ३७ ॥

गुणैश्च हृदयाद्यैश्च तुर्याद्यैर्जातिभिस्सह ।
स्वरूप षोडशार्णस्य मन्त्रस्य प्रागुदीरितम् ॥ ३८ ॥

हृदयादिपदान्तानि कल्पनीयानि पूर्ववत् ।
तत्र द्वादशम बीज हुंफट्स्वाहान्तमुच्चरेत् ॥ ३९ ॥

विभोर्वराहवक्त्रस्य मन्त्रमानुष्टुभं शृणु ।
स्वराद्य पञ्चमं वर्णमेकीभूत समं पुरा ॥ ४० ॥

प्राग्वर्णमेवमुद्धृत्य जातिमाद्या समाहरेत् ।
अरान्तं तत् तृतीय च तदन्ते नेमिपञ्चमम् ॥ ४१ ॥

नाभ्येकादशमोपेतमरषोडशकं तत. ।
वराहरूपाय पदं तदूर्ध्व व्याहृतित्रयम् ॥ ४२ ॥

पतये पदमन्तेऽस्य भूपतित्वमनन्तरम् ।
मे देहीति तत. पश्चाद्दापयेति पद ततः ॥ ४३ ॥

शिरसा सह मन्त्रोऽयं द्वात्रिंशार्ण प्रकीर्तित ।
अङ्गानि कल्पयेदस्य विभक्तै पञ्चधा पदै. ॥ ४४ ॥

क्रमशः सप्तभिः षड्भि सप्तभिश्चाथ सप्तभि ।
पञ्चभिर्वर्ण सभूतै. प्रणवाद्यैर्गुणोत्तरै ॥ ४५ ॥

हृदयाद्यस्त्रपर्यन्तैस्तुर्यान्तैर्जातिभिः सह ।
अङ्गक्लृप्तिरियं प्रोक्ता मन्त्रस्यास्य सुलोचन! ॥ ४६ ॥

शक्ति. स्वाहास्य भूर्बीजं परिज्ञेयं ततोपरि ।
मन्त्रं नृसिंहरूपस्य प्राक्सङ्ख्यार्ण समुच्चरेत् ॥ ४७ ॥

पुरो दयाद्यं अग्रान्तं नाभ्यर्णान्ताद्यसंयुतम् ।
कवीना मध्यम, पूर्व रमाया , संमतान्तरम् ॥ ४८ ॥

स्वाहान्तं, विष्टराद्य च, कृष्णान्तं चोरुपूर्वकम् ।
नाभिपञ्चदशार्णेन संयुतं, तदनन्तरम् ॥ ४९ ॥

पूजान्तं, लोर्ध्वकं वाद्यमनन्तान्तं सबिन्दुकम् ।
सहस्राद्यं, अपूर्वान्तं, सर्वतोन्तमत परम् ॥ ५० ॥

मुकुटाद्यं, मुखान्तं च, नेम्याद्यर्णसमन्वितम् ।
किञ्चरान्तरमादाय ऋछयाद्यर्णोपरि स्थितम् ॥ ५१ ॥

अस्यन्तं, बिन्दुसंयुक्तं, हरेराद्यं, समं, तत ।
गंभीरमध्यं धिषणमध्यमं कर्पणान्तिमम् ॥ ५२ ॥

नाभ्यन्ताद्येन संयुक्तं, ततो भद्राद्यमेव च ।
उन्निद्रान्तमनुस्वारं अमृताभ्यन्तरं, द्विधा ॥ ५३ ॥

तयोरन्तेऽमृतान्तं स्यात् वायु तस्योपरि स्थितम् ।
ततोऽन्नान्त्यं रमान्तं च रम्यान्त हं समुद्धरेत् ॥ ५४ ॥

एवमानुष्टुभो मन्त्र. कीर्तितो नृहरे' पर. ।
पञ्चमं सस(त)कान्ताद्य बीजमस्य प्रकीर्तितम् ॥ ५५ ॥

शक्तिश्चैव सविज्ञेयमिन्दुपूर्व सबिन्दुकम् ।
पादैश्चतुर्भि., सर्वैश्च प्रणवाद्यैरनुक्रमात् ॥ ५६ ॥

पञ्चाङ्गान्यस्य मन्त्रस्य हृदयादीनि कल्पयेत् ।
पादान्ते योजयेदेताननन्तात्मन, उच्यते ॥ ५७ ॥

तत. प्रियात्मने इति, ज्योतिरात्मने इत्यपि ।
तुर्यो मायात्मने इति मन्त्रे चन्द्रात्मने पदम् ॥ ५८ ॥

ज्ञानादिहृदयादीनि जात्यन्तानि यथापुरा ।
पाताळनृहरेर्मन्त्रश्चाष्टाष्टाक्षर उच्यते ॥ ५९ ॥

क्रमात् स्वरान्तपूर्वाभ्या युक्तं प्रथ्यर्णमुच्चरेत् ।
अरद्विदशकं पश्चात् नेम्याद्यं प्रोतमोस्वरात् ॥ ६० ॥

अरान्तं च तृतीयं च तदन्ते नेमिपञ्चमम् ।
नाभ्येकादशमोपेतमक्षर षोडशारगम् ॥ ६१ ॥

[बिन्दुयुक्तं तत. शान्तहरेरेखाभिरन्वितम् ।
कुशेशयान्तमशीति च तदन्ते नेत्र पूर्वकम् ॥ ६२ ॥

त्रातुराद्यं यशाद्य च साद्यं पर्वतमध्यमम् ।
अष्टारभ समादाय नेमिपञ्चकसंस्थितम् ॥ ६३ ॥

रविनेमिपदं पश्चाच्छान्ताद्य यमलादिकम् ।
द्विनवारं च सान्तं च द्वयमेतद्विधोच्चरन् ॥ ६४ ॥

अरैकविंशं षष्ठ च द्विकमेतत्तथोच्चरन् ॥ ६५ ॥
नेमितृतीयमक्षान्तं भवेता पूर्ववद्द्विधा ॥ ६६ ॥]
क्रमेण भूषयेदेतमन्ते वर्माख्यशीर्षकै. ॥ ६७ ॥
पाताळनृहरेर्मन्त्र. चतुष्षष्ट्यर्णक. स्मृत ॥ ६८ ॥
बीजमाद्यक्षर प्रोक्तं शक्ति· स्वाहा च सानुगा ॥ ६९ ॥
अङ्गानि कल्पयेत् क्षार्णैः पूर्ववत् स्वरभूषितै ॥ ७० ॥
अन्ते बिन्दुसमोपेतै. प्रणवाद्यैरनुक्रमात् ॥ ७१ ॥
ज्ञानाद्यस्त्रावसानैश्च तुर्यान्तैर्हृदयादिभि ॥ ७२ ॥
पूर्ववत् समुपेतानि नम· स्वाहेति जातिभि. ॥ ७३ ॥
नारसिंहमथाष्टार्णमन्त्रं सर्वार्थसिद्धिदम् ॥ ७४ ॥
नमस. प्रणवाद्यस्य नरेत्यर्णमथान्तिमे ।
सिंहायेति पदान्तोऽयं नृसिंहाष्टार्ण ईरित. ॥ ७५ ॥
क्षौ बीजमस्य नाभ्यर्णस्तृतीय. शक्तिरुच्यते ।
कल्पयेद्धृदयादीनि बीजेनैव यथा पुरा ॥ ७६ ॥
क्रमश. केशवादीना मन्त्राणा लक्षणं शृणु ।
नवमं चाष्टम नेमावराद्य मातृकान्तिमम् ॥ ७७ ॥
त्रिधैकैकं क्रमात् कृत्वा बीजद्वादशकं यथा ।
पौन पुन्येन सर्वेषा यत्नवान् योजयेदध. ॥ ७८ ॥
नाभिषष्ठस्वरोर्ध्वस्थानङ्कयेद्बिन्दुनोपरि ।
तारादिहृदयान्तानि सज्ञाभिस्तुर्यया सह ॥ ७९ ॥
केशव. प्रथमो वाच्यस्ततो नारायणः पर. ।
माधवश्चैव गोविन्दो विष्णुश्च मधुसूदन· ॥ ८० ॥
त्रिविक्रमो वामनाख्यः श्रीधर. पद्मलोचनः ।
हृषीकेश. पद्मनाभो दामोदर इति श्रुत. ॥ ८१ ॥
बीजैर्दीर्घस्वरोपेतै प्राग्वदङ्गानि कल्पयेत् ।
तेषा श्रियादिकान्ताना शृणु मन्त्राननुक्रमात् ॥ ८२ ॥
मातृकान्त्यत्रयं क्षाद्यं चतुर्धा प्रस्तरेत् पुरा ।
विचक्रसुयोज्यमन्यर्णानि त्वधोभागे यथाक्रमम् ॥८३॥
अग्न्यम्बुपृथिवीवारिवह्निभूज्वलनाः क्रमात् ।
वारिद्वय च सोमं च पार्थिवाद्वितयं तत. ॥ ८४ ॥
योजयेदनल वर्ण षट्सप्ताष्टसु मूर्धनि ।
अधोनवद्वादशयोः सर्वेषा चोर्ध्वत. पुन. ॥ ८५ ॥
स्वरशक्तया समेतेन नाभ्यन्ताद्येन भूषयत् ।
स्वरजात्यादियुक्तानि बीजानि हृदयादयः ॥ ८६ ॥
वह्निश्चक्रगदाशार्ङ्गखड्गाद्यैर्दिक्षु भेदिता ।
विष्णवो वासुदेवाद्या एतेषां वाचकान् शृणु ॥ ८७ ॥
आद्ये चान्ते स्वरे नाभौ समुद्धृत्य सतारके ।
पूर्वे चक्रधरायेति सज्ञया विष्णवे नम ॥ ८८ ॥
अन्ये गदाधरायेति तृतीये शार्ङ्गधारिणे ।
खड्गधारिण इत्यन्ते चतुर्थस्य नियोजयेत् ॥ ८९ ॥
द्विषट्कार्णेन चोद्दिष्टा विष्णूनां वाचका. पृथक् ।
साङ्गान्युपाङ्गान्येतेषा मन्त्राद्ये प्राग्वदाचरेत् ॥ ९० ॥
बीजानि यानि विष्णूना विलोमेन स्वरान्तिमान् ।
तान्युक्तानि हृषीकेशव्यूहाना समुदीरिता ॥ ९१ ॥
जनार्दनाना वक्ष्यन्ते मन्त्रा. प्राच्यानलान्तगात् ।
इकारादीनि चत्वारि चेकारादीन्यनुक्रमात् ॥ ९२ ॥
कुर्यात् प्रणवपूर्वाणि तेषामन्ते यथा पुरा ।
पूर्वं दण्डधरायेति सर्वेषा नमसा न्यसेत् ॥ ९३ ॥
हृदादिचरणान्तानि मन्त्राणैस्तु यथा पुरा ।
नृसिंहक्रोडयोर्मन्त्रस्ते प्रागेव प्रदर्शित ॥ ९४ ॥
अन्तस्थाश्च ततोष्टार्णो वर्णन्ते च स्वरा हल ।
सुप्रसिद्धा. समाख्यातास्त्वपराङ्गे निबोध तु ॥ ९५ ॥
सुदर्शनषडर्णस्य प्राक्स्थमर्णचतुष्टयम् ।
पुराहृत्य तत पश्चात्तन्नेत्राद्ये चलान्तिमे ॥ ९६ ॥
नेमिस्थं पञ्चम वर्ण अरषोडशकोपरि ।
नेमिनाभ्योस्तृतीये च वियोज्य तदनन्तरम् ॥ ९७ ॥
नेम्याद्य सानलं हान्त नाभ्यन्तात्तद्द्वयाङ्कितम् ।
पिण्डमेतन्नृसिंहस्य विद्युद्वर्णसमन्वितम् ॥ ९८ ॥

सिंहान्तं हृदयाद्यं च द्विधोद्धृत्य द्वयं ततः ।
वर्मास्त्रे च शिरो जात्यायुक्तयं द्विनवाक्षरम् ॥ ९९ ॥

अस्यैव दशमो बीजं हृदाद्यं शक्तिरुच्यते ।
षडङ्गमस्य ताराद्यं हृदयाद्यं क्रमाच्छृणु ॥ १०० ॥

औकाररहितं बीजं षोढा कृत्वा यथा पुरा ।
स्वरैराद्यैर्विसर्गान्तैर्नपुंसकविवर्जितैः ॥ १०१ ॥

योजयित्वा तदूर्ध्वं तु पदानि क्रमशो न्यसेत् ।
चक्रराजपदं पूर्वं ज्वालाचक्रपदं ततः ॥ १०२ ॥

जगच्चक्रपदं पश्चादसुरान्तकसंज्ञितम् ।
पञ्चमं दीप्तचक्राख्यमन्ते माहासुदर्शनम् ॥ १०३ ॥

चतुर्थ्यन्तं नियोज्यान्ते पश्चाज्ज्ञानादिभिस्तथा ।
तुर्यान्तैर्हृदयाद्यैश्च स्वाहाद्यागिश्च जातिभिः ॥ १०४ ॥

द्वादशार्णे नृसिंहस्य बीजं पूर्वं मुने ! शृणु ।
नेमिसप्तममादाय प्रागरार्णोपलक्षितम् ॥ १०५ ॥

युक्तं स्वरान्त्यपूर्वाभ्यां कुर्याद्बीजं परं त्विदम् ।
नतिप्रणवमध्यस्थमेकवीरं महाप्रभम् ॥ १०६ ॥

सर्वेषां सिंहमन्त्राणां ध्यानभेदात्मनामिदम् ।
जीवभूतं स्वरूपस्य वाचकं विद्धि कामदम् ॥ १०७ ॥

मूर्तिमन्त्रान् शृणुष्वाथ द्वादशाक्षरमण्डितम् ।
प्रणवं हार्दबीजाद्यं तुर्यान्तं भगवत्पदम् ॥ १०८ ॥

नारसिंहाय दद्याद्वै पदं पञ्चाक्षरं ततः ।
विश्वत्त्रातृनृसिंहस्य मन्त्रोयं द्वादशाक्षरः ॥ १०९ ॥

तारान्तस्येद दशाक्षरः ।
वक्ष्यन्ते हृदयादीनि नेत्रान्तानि यथाक्रमम् ॥ ११० ॥

षोढास्य बीजं ताराद्यमाकारादिसमन्वितम् ।
बिन्दुनाङ्कितमेतेषां योजनं प्राग्वदाचरेत् ॥ १११ ॥

अङ्गोपाङ्गमयीं व्याप्तिं सबीजैर्द्वादशाक्षरैः ।
सबिन्दुभिर्गुणाद्यैश्च कल्प्य वा नतिभिः सह ॥ ११२ ॥

व्यापकोऽयं नृसिंहस्य मूर्तिभेदगतस्य च ।
साङ्गो मन्त्रः समुद्दिष्टः सर्वाभिमतसिद्धिदः ॥ ११३ ॥

अक्षमध्यगता वर्णा वर्णिताश्चक्रमध्यगाः ।
सज्ञा सबिन्दुप्राग्वर्णा नतिप्रणवमध्यगा ॥ ११४ ॥

तुर्यान्ताश्शक्तिसंवस्य जयाद्यस्य तु वाचकाः ।
भीमोग्राभ्यां च भूताभ्यां तथा मन्त्रद्वयं भवेत् ॥

विष्टरेऽभिनिविष्टानां मन्त्राणां लक्षणं शृणु ।
साध्यनामस्वरूपं तु व्यापकं वक्ष्यते पुनः ॥ ११६ ॥

तारान्ते बीजं शक्तिश्च दैवतं तस्य चेत्तत ।
शान्तिं पुष्टिं च वश्यं च विजयं चैवमादिकम् ॥

द्वितीयान्तं समुच्चार्य कुरुबीप्सान्वितं ततः ।
यच्छ यच्छ पदान्तं वा, प्राकस्थितं प्रणवान्तिमं ॥

अङ्कयेदवसाने च साध्यलक्षणमीरितम् ।
द्विरष्टवर्णं नृहरेर्मन्त्रमानुष्टुभं परम् ॥ ११९ ॥

पूर्वमेव समुद्दिष्टं वाह्ये वायव्यमक्षरम् ।
वर्मास्त्रजातियुक्तं च वाह्ने पार्थिवमक्षरम् ॥ १२० ॥

विस्तरेण पुरा प्रोक्तं तस्मान्नेह प्रतन्यते ।
वक्ष्यते यन्त्र धर्तॄणां नागानां क्षाद्यमान्वितम् ॥

बिन्दुस्वरान्वितं बीजं प्रणवाद्यं ततः परम् ।
युक्तं प्रत्येकसंज्ञाभिस्तुर्यान्ताभिर्नमोऽन्तिमम् ॥

इति शेषादिनागानां मन्त्रा सम्यगुदीरिताः ।
शक्त्या सतारया यन्त्रे सौदर्शनषडक्षरैः ॥ १२३ ॥

एकैकं भेदयेद्वर्णमष्टार्णस्योर्ध्वतोऽप्यथ ।
नारायणास्त्रमन्त्रोऽयं कल्पान्तहुतभुक्प्रभः ॥ १२४ ॥

अभिधायाक्षरं पूर्वं चक्राद्यस्त्रगणस्य तु ।
युक्तं वह्निविसर्गाभ्यां, बीजं वा, प्रणवान्वितम् ॥

ततः संज्ञा चतुर्थ्यन्ता योजनीया फडन्तिमा ।
चक्रादिषोडशास्त्राणामिति मन्त्रा प्रकीर्तिताः ॥

ज्ञात्वैव यन्त्रमाहात्म्यं योर्चयेद्विधिपूर्वकम् ।
दिग्बन्धं, वह्निप्राकारं, गायत्र्या, वाहनादिकैः ॥

यागोपकरणैर्मन्त्रैर्भोगं, दानं विवर्जितैः ।
क्रमात् सर्वफलावाप्तिर्मन्त्रसिद्धिश्च जायते ॥ १२८ ॥

दशदिग्बन्धमन्त्राणां वक्ष्यते लक्षणं पुरा।
ओं पूर्वं पुरुषायेति स्वाहान्तं तदनन्तरम् ॥ १२९ ॥

अस्त्रेण बन्धयामीति, स्वाहान्तं च षडक्षरम्।
इति दिग्बन्धमन्त्रोऽयमीरितो दुष्टदोषहृत् ॥ १३० ॥

प्रणवं प्राक् समुद्धृत्य मनुं वाग्भिजाययो।
आयान्तं विन्यसेच्चक्रमग्निप्राकारसंज्ञितम् ॥ १३१ ॥

कीर्तिता चक्रगायत्री शृणु चक्रप्रसादनीम्।
जातिपूर्वं पुरस्कृत्य चक्रायेति समुद्धरेत् ॥ १३२ ॥

द्वितीयं विष्णुगायत्र्या नृसूक्ताद्यक्षरत्रयम्।
नेत्राभ्यां पदमादाय नेमिपूर्वान्तयोजितम् ॥ १३३ ॥

धीमहीति तदन्ते नो जिनिवेश्योऽनिवारितं।
गायत्र्यन्तं समुद्धार्य तदन्ते चतुरक्षरम् ॥ १३४ ॥

सौदर्शनी समुद्दिष्टा गायत्री तारकाक्षरा।
सतारका पुरा चैव भवेदेकाक्षराधिका ॥ १३५ ॥

तारद्वयं पुरोद्धृत्य परमं पदमुद्धरेत्।
धामेतिवस्थितं चाथ नेम्याद्यं द्विनवारकम् ॥ १३६ ॥

द्विदशारगतं वर्णं नाभिपञ्चमपूर्वकम्।
ततस्तु गृह्णकाम्ययो इति पञ्चार्णमुद्धरेत् ॥ १३७ ॥

युतं नेमिद्वितीयेन द्विनवारगतं ततः।
षोडशारगतं वर्णं द्वितीयस्वरसंयुतम् ॥ १३८ ॥

नेमिपञ्चमवर्णं च षोडशारगतं पुनः।
नाभिद्वितीयसंभिन्नं नेम्यन्तं तारपश्चिमम् ॥ १३९ ॥

तृतीयस्वरसंयुक्तं तृतीयं नेमिमण्डलात्।
नेम्यन्तमास्वरोपेतमरान्तं च स्वरान्तरम् ॥ १४० ॥

नेम्याद्यं षोडशारस्थं नेम्यष्टममिकारगम्।
न्यूनविंशारगोर्ध्वं तद्द्विनवाक्षरमूर्धनि ॥ १४० ॥

स्वरं तृतीयं संयोज्य, ततश्च द्विनवारगम्।
पुनर्मन्त्रशरीरेति प्रणवान्तं ततो नमः ॥ १४१ ॥

पुनश्च नमसा युक्तो मन्त्र आवाहनोचितः।
प्रदाने सर्वभोगानां मन्त्रस्ते संप्रकाश्यते ॥ १४२ ॥

प्रणवं पूर्वमुच्चार्य सर्वभोगैककारणम्।
नेम्यन्तं विन्दुसंयुक्तं त्रिधेदं पदमग्रथ ॥ १४३ ॥

गृहाणेति शिरोऽन्तोऽयं भोगदानस्य वाचकः।
आवाहने तथार्घ्यायां विसर्जनविधौ तथा ॥ १४४ ॥

प्रणवं पूर्वमुद्धृत्य संबोध्य भगवन्निति।
मन्त्रमूर्तेपदं दद्यात् स्वपदं च द्वितीयया ॥ १४५ ॥

आसादय क्षमस्वेति प्रणवान्तं समुद्धरेत्।
परप्रयुक्तमन्त्राणां शक्तिह्रासननत्परः ॥ १४६ ॥

समस्तवीर्यमन्त्राढ्यं मुने! मन्त्रवरं शृणु।
प्रणवं पूर्वमुद्धृत्य प्रणवाद्यं सबिन्दुकम् ॥ १४७ ॥

षडर्णस्यास्त्रमन्तप्रावषडर्णं प्रणवोज्झितम्।
प्रोक्तस्यार्णद्वयं पूर्वं चक्रराजपदं ततः ॥ १४८ ॥

सर्वशब्दं दहेत्पूर्वं दुष्टभयंकरम्।
चिन्तामूलपदं पश्चाद्भिन्दि भिन्दीति वै ततः ॥

द्विधा विदारय पदं (र?) मन्त्र ह्रासय ह्रासय।
भक्षयेति पदद्वन्द्वं भूतानीति ततः परम् ॥ १५० ॥

त्रासय त्रासयेत्यन्ते वर्मास्त्रे च शिरोन्तिमे।
एकसप्ततिमन्त्रोऽयं शक्तिह्रासार्थ ईरितः ॥ १५१ ॥

मन्त्रमानुष्टुभं वक्ष्ये सर्वेषामभयप्रदम्।
भगवन्निति संबोध्य सर्वेति पदमुद्धरेत् ॥ १५२ ॥

विजयेति पदं पश्चात् सहस्रारेति तत्परम्।
अपराजितेति शरणं पदं त्वामित्यनन्तरम् ॥ १५३ ॥

प्रपन्नोऽस्मीति तत्पश्चाद्द्वितीयान्तश्चश्रीकरम्।
श्रीपदाद्यं ततः पश्चात् सुदर्शनमिति क्रमात् ॥ १५४ ॥

प्रपत्तिरिति विख्याता सर्वपापक्षयंकरी।
वक्ष्ये नृसिंहगायत्रीमपराङ्गस्य पूजने ॥ १५५ ॥

वज्रेति द्व्यक्षरं पूर्वं नखायेत्यत परम्।
आयान्तं तीक्ष्णदंष्ट्रेति विद्महेति पदं ततः ॥ १५६ ॥

वज्रेति त्र्यक्षरस्यान्ते नखायेति च धीमहि।
आद्यं च चरमाद्यं च गायत्र्याः पदमुद्धरेत् ॥ १५७ ॥

सिहेति सविसर्गं च गायत्र्यन्तं ततो न्यसेत् ।
आचरेदुक्तमन्त्राभ्यामावाहनविसर्जने ॥ १५८ ॥

दिग्बन्धं च सहास्त्रेण प्राग्युक्तेन समाचरेत् ।
अन्येषामङ्गमन्त्राणां विनियोगो यथा पुरा ॥ १५९ ॥

इति निगदितमेतन्मन्त्रजालं यथाव-
न्मुखयुगळसमेते यन्त्रराजे निविष्टम् ॥

हृदि बहिरपि भोगैर्यानि योज्यानि तानि ।
प्रकटयतु कदाचित् कष्टबुद्धेः परस्य ॥ १६२ ॥

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे यन्त्रराजमन्त्रोद्धारविधानं नाम चतुर्विंशोऽध्यायः ।

श्रीः

पञ्चविंशोऽध्यायः ॥

सनक —
भगवन्! सम्यगाख्यातं सुदर्शननृसिंहयोः ।
मन्त्ररूपं महायन्त्रं भजतामीप्सितप्रदम् ॥ १ ॥

तस्माद्भजनरूपं च वद सानुग्रहोऽसि मे ।
शाण्डिल्य —
हिताय सर्वलोकानां यन्त्रमेतदुदाहृतम् ॥ २ ॥

विधिना पूजितो येन सर्वं तेन समाप्यते ।
मया ते श्रोतुकामाय वक्ष्यते यजनक्रमः ॥ ३ ॥

प्राग्वत्स्नानादिकं कृत्वा प्रविश्य यजनालयम् ।
प्रक्षाल्य पादावाचम्य सोत्तरीयं स्वलंकृतः ॥ ४ ॥

धृतोर्ध्वपुण्ड्रः कुम्भुम्भे द्वारस्थानभ्यर्च्य पूर्ववत् ।
कवाटोद्घाटनं कृत्वा प्रविश्याभ्यन्तरे विभुम् ॥ ५ ॥

प्रणिपत्य च गायत्र्या पाणिप्रक्षालनादिमम् ।
अर्चायां विष्टरे यन्त्रे कृत्वा 'मार्गत्रयं' ततः ॥ ६ ॥

प्रासादं शोधयित्वाऽस्य पुरतः फलकादिके ।
प्रोक्षिते चास्त्रमन्त्रेण संमुखं रुचिरासने ॥ ७ ॥

समासीनः स्वपार्श्वस्थं याज्ञीयं चाधिवासनम् ।
करशुद्धिं स्थानशुद्धिं कृत्वाऽस्त्रेण यथापुरम् ॥ ८ ॥

पाणिभ्यामुक्तमन्त्रेण संयुक्तेनास्त्रमुद्रया ।
पूजास्थानगदान् विघ्नान् बाह्यतोऽदृश्यविग्रहान् ॥ ९ ॥

विरेच्य बन्धनं कुर्यात् दिक्षु चैव विदिक्षु च ।
कवचेनावकुण्ठ्याथ प्राणानायम्य पूर्ववत् ॥ १० ॥

तत्त्वानि चोपसंहृत्य देहस्थान्यात्मना सह ।
सर्वतत्त्वविनिर्मुक्तं विग्रहं केवलं ततः ॥ ११ ॥

शोधयेद्धारणाभिश्च शोषणाद्याभिरूर्ध्वतः ।
तुर्याद्यन्ते पदे देवं सुदर्शनतनुं स्मरेत् ॥ १२ ॥

बलात्मनाऽस्य मरुता कवचेन तनुं स्वकान् ।
शोषयित्वा, दहेद्देहं दक्षाङ्गुष्ठाग्र(देश)गतं ॥ १३ ॥

कल्पान्तपावकज्वाला सहस्रायुतदीधितिम् ।
भावयित्वा शिखामन्त्रं तेन दग्धमनुस्मरेत् ॥

इन्मन्त्रं पूर्णचन्द्राभममृतासारवर्षिणम् ।
वामाङ्गुष्ठाग्रतो ध्यात्वा सेचितं तेन भावयेत् ॥ १५ ॥

विनियुक्तास्ततो मन्त्रान् वर्माद्या छोषणादिषु ।
मन्त्रेश्वरे लयं यातानिति सञ्चिन्त्य भावयेत् ॥ १६ ॥

आनन्दामृतसंपूर्णशीताशुशतसप्रभम् ।
तत्प्रान्तैरमृतौघैश्च बृंहितं भावयेत्तनुम् ॥ १७ ॥

तस्मात्तत्त्वानि विन्यस्य सहतानि यथाक्रमम् ।
स्वात्मना तामधिष्ठाय मन्त्रन्यासं समाचरेत् ॥ १८ ॥

अकारादिक्षकारान्तमातृका मन्त्रमातरम् ।
विन्यसेत् करयोः पूर्वं विग्रहेचक्रमाल्लपन् ॥ १९ ॥

कृत्वैवं व्यापकन्यासमादित्यातपसप्रभ. ।
दक्षेतरक्रमेणव शाखासु तलयोरपि ॥ २० ॥

अंगुष्ठादिकनिष्ठान्तमेकैकस्याश्चतुश्चतु ।
एव त्रिविशकं न्यस्य तलयोर्दशक ततः ॥ २१ ॥

मध्ये च त्रि(दिक्) चतुष्के च पञ्चकं पञ्चक तथा ।
प्रणवद्वयमध्यस्थान्येव न्यस्त्वा करद्वये ॥ २२ ॥

व्यापकन्यासपूर्वं तु स्वशरीरेऽपि विन्यसेत् ।
मूर्ध्न. पादतल यावत् पाणिभ्या तपनाशुवत् ॥ २३ ॥

व्यापयित्वा ततो न्यास पृथगेव समाचरेत् ।
केशान्ते वक्त्रवृत्त च नेत्रयो. श्रवणद्वये ॥ २४ ॥

घ्राणरन्ध्रद्वये गण्डद्वये दक्षेतरक्रमात् ।
उत्तराधरयोगेन दन्तयोस्तच्छदद्वये ॥ २५ ॥

मूर्ध्नि न्यसेत् स्वरानन्यान् सविसर्गाननन्तरम् ।
कवर्ग दक्षिणे बाहौ सन्धिपञ्चगतं क्रमात् ॥ २६ ॥

वामे तथा चवर्ग च पादयोर्दक्षिणादित ।
सन्धिगौ टतवर्गा च पूर्ववत्तुन्दपार्श्वयो. ॥ २७ ॥

पृष्ठे नाभौ च हृदये पवर्ग धातुसप्तके ।
यादिसान्तानि वर्णानि हकारं हृदयान्तरे ॥ २८ ॥

क्षकारं हृदयाकाशे न्यस्त्वैव मातृका पुरा ।
तत शक्त्या षडर्ण तु न्यसेत् करशरीरगम् ॥ २९ ॥

करन्यास पुराविद्धि तच्छृणुष्व मुनीश्वर ! ।
पुटीकृतेन ताराभ्या मन्त्रेणैव सशक्तिना ॥ ३० ॥

नखान्त मणिबन्धाद्य प्राग्वत् पाणिद्वयं मृजेत् ।
आद्यन्ते तारशक्त्याढ्ये. षड्भिर्वर्णै. सविन्दुकै. ॥

अङ्गुष्ठादिकनिष्ठान्तं न्यस्त्वा मध्यमपर्वसु ।
विन्यसेत् करजाग्रेषु चरम वर्णमेव च ॥ ३२ ॥

एवमर्णानि विन्यस्य हृदयादीनि विन्यसेत् ।
मूलाग्रपर्वस्वङ्गानि वर्णन्यासक्रमेण तु ॥ ३३ ॥

पाणिभ्यामालभेद्देहमामूर्ध्नश्चरणावधि ।
कृत्वैवं व्यापकन्यासमङ्गन्यास समाचरेत् ॥ ३४ ॥

मूर्ध्नि वक्त्रे च हृदये नाभौ गुह्ये च पादयो. ।
सृष्टिन्यासो भवेदेष स्यादङ्गोपाङ्गवत् स्थिति. ॥ ३५ ॥

पादयोर्गुह्यके नाभौ हृदि वक्त्रे च मूर्धनि ।
पादादिश्च शिरोऽन्तस्तु संहृतिन्यास उच्यते ॥ ३६ ॥

हृदि मूर्ध्नि शिखाया तु स्कन्धयो. करमध्यतः ।
नेत्रयोर्न्यसनीयानि स्वैर्मन्त्रैरुदितै क्रमात् ॥ ३७ ॥

हृदयादीनि विन्यस्य पश्चात् पाणितलद्वये ।
विन्यसेदस्त्रसघ च अष्टक वा द्विरष्टकम् ॥ ३८ ॥

किरीट कौस्तुभ माला श्रीवत्स च यथापुरम् ।
दक्षिणोत्तरयोरंसे इच्छाशक्ति स्वपार्श्वयो. ॥ ३९ ॥

ऊरुमूले मनस्तत्व न्यस्त्वा मन्त्रमय स्वकम् ।
भावयेदहमित्यन्त सुदर्शनवपुर्हरि ॥ ४० ॥

गायत्र्या वर्तयेद्बाह्ये स्वात्मान चक्रमुद्रया ।
चक्रज्वालावलि विप्र ! परितो मंत्रवित्तम ॥ ४१ ॥

भावनाजनित यागमाचरेदादिचोदितम् ।
नियम्य करणग्राम प्राग्वद् वै ज्ञानगोचरे ॥ ४२ ॥

आसनं कल्पयेन्मान्त्रमामूलाद्हृदयावधि ।
आधारशक्तेरारभ्य चिद्भावासनपश्चिमम् ॥ ४३ ॥

पुरोक्त भावयेदूर्ध्वं मन्त्रैश्वर्य त्रिविष्टपम् ।
साधारणमिद ज्ञेय सुदर्शननृसिंहयो. ॥ ४४ ॥

पृष्ठभागेऽवतीर्णाभ्या बहिर्वा हृदयाम्बरे ।
विष्टरासनसङ्कल्पकार्ये भावापनोपहृत् ॥ ४५ ॥

हृत्पद्मकर्णिकोर्ध्वस्था शब्दब्रह्ममयी पुरा ।
अक्षरगर्भगत नाद नदन्ती मन्त्रगर्भितम् ॥ ४६ ॥

शक्ति. शान्तात्मनो विष्णो साधकैश्च वशीकृता ।
शब्दशक्ति समुद्गीता विष्टरार्कखमध्यगा ॥ ४७ ॥

वर्णत्व समनुप्राप्ता सन्ततिर्नादरूपिणी ।
अकारादिक्षकारान्तवर्णपारावसानत. ॥ ४८ ॥

निस्तरङ्गे परे व्योम्नि कलनारहिते शुभे ।
तुर्यातीते पदे देव. प्रकाशानन्दबृंहित. ॥ ४९ ॥

सद्ब्रह्मवासुदेवाख्य पूर्णषाड्गुण्यविग्रह ।
महाविभूतिसंपूर्णः सर्वशक्तिमयः प्रभुः ॥ ५० ॥

सशान्तपरमानन्दस्वरूप. सततोदित ।
शङ्खचक्राङ्कितनुर्वरदाभयपाणिकः ॥ ५१ ॥

सहस्रसूर्यसङ्काश सहस्रेन्दुगभस्तिमान् ।
स्वप्रकाशै किरीटाद्यै नूपुरान्तैरलंकृत ॥ ५२ ॥

श्रीवत्सकौस्तुभोपेतो वनमालाविराजित. ।
पीतकौशेयवसन. प्रसन्नवदनेक्षण. ॥ ५३ ॥

दन्तपंक्तिशशिज्योत्स्नाविद्योतितदिगन्तर. ।
सेवितश्च श्रिया पुष्ट्या विशेषाभ्या समन्तत ॥

शङ्खचक्रादिदिव्यास्त्रै. सर्वतत्त्वात्मकै सदा ।
विज्ञानभावनाभाव्यो निराशी कर्मकारिभि. ॥ ५५ ॥

अभ्यासयोगसिद्ध्यर्थं वहिरन्तश्च नित्यशः ।
विम्बपीठादिकल्पेषु वृत्तिस्थानेषु तेषु च ॥ ५६ ॥

परव्यूहादिरूपेण पूजितः सर्वमृच्छति ।
ततो नित्योदितस्तत्वात् प्रकाशाह्लादलक्षणात् ॥

साधर्म्यलक्षणं प्राप्य भक्तानुग्रहकाम्यया ।
क्रियाशक्तिमधिष्ठाय जगदुद्धरणोद्यताम् ॥ ५८ ॥

चिदंशं प्रादुरभवत् प्रकाशानन्दबृंहितम् ।
दुर्दर्शनं प्रकाशेन साधुसन्तापकारिणाम् ॥ ५९ ॥

आह्लादेन स्वभक्ताना सुदर्शनमितीरितम् ।
षडध्वोर्ध्वगतो देवो भूत्वा कालानलात्मना ॥ ६० ॥

भक्तानां दुरितं हन्ति चिन्तितो नृहरिर्हरि. ।
येन संपूजितावेतौ तेजसातीव निर्भरौ ॥ ६१ ॥

स तेजस्वी च भू(पू)तात्मा सर्वत्र च सुखी भवेत् ।
ज्ञात्वैवं मन्त्रसद्भावमारभेद्यजनक्रियाम् ॥ ६२ ॥

परस्माद्भगवत्तत्वाच्चित्स्वरूपं परात्मकम् ।
मनसा मन्त्रमुच्चार्य विष्टरोर्ध्वेऽवतार्य च ॥ ६३ ॥

वाच्यवाचकभावेन द्विधा सौदर्शन वपुः ।
साकारो वाच्यरूप. स्यान्मन्त्ररूपस्तु वाचकः ॥ ६४ ॥

प्रशस्तौ तावुभौ स्याता परापरविभागत ।
वाच्यरूपं पर विद्यादपर मन्त्रयन्त्रितम् ॥ ६५ ॥

ज्ञात्वैवमुदयं कुर्यात् परसूक्ष्मादिभावनम् ।
ज्योतीरूप पर विद्यात् नादान्ताह्लादलक्षणम् ॥

चिच्छक्तिलक्षणं सूक्ष्म शिर.पार्ष्यादिगर्भितम् ।
लिङ्गमात्र प्रकाशाढ्य भाविप्रसरधर्मि यत् ॥ ६७ ॥

स स्थूलो व्यक्तरूप. स्याद्वाच्यवाचकरूपयो ।
मन्त्राणा शब्दरूपाणा तिस्रोऽवस्था परादिका. ॥

पश्यन्त्याद्या. परिज्ञेया स्वं पर त्वपर त्रिधा ।
आद्यस्तत्रैव तार स्याद्द्वितीयो बीजसञ्ज्ञित. ॥ ६९ ॥

तृतीय पदमन्त्राद्यस्त्विति भाव्यो भवेन्नृभि. ।
सान्निध्यं संमुखीभाव. सन्निरोधोऽपि पूर्ववत् ॥ ७० ॥

मन्त्रन्यासादिक कृत्वा लयभोगार्चन तथा ।
सकर्णिकेसरदलसंयुक्तेष्वम्बुजेष्वपि ॥ ७१ ॥

भूपुरादिषु सर्वत्र मन्त्राणा लिङ्गरूपिणाम् ।
मूर्तीना केशवादीना मन्त्राणामर्चन तत. ॥ ७२ ॥

प्रागुक्तैर्विधिवन्मन्त्रैर्भोगयागवदाचरेत् ।
शिरोर्ध्वे देवदेवस्य भावयेदिन्दुमण्डलम् ॥ ७३ ॥

तत्स्रुतैरमृतौघैश्च कुर्यादर्घ्यादिकल्पनम् ।
षोडशैरुपचारैर्वा द्विगुणैर्वा चतुर्गुणै. ॥ ७४ ॥

राजवत्प्रीणनं कृत्वा होमं कुर्यात्तथाविधम् ।
नाभिचक्रकृते कुण्डे षट्कोणे गुणमेखले ॥ ७५ ॥

निर्मथ्य भावनोद्भूतामरणि ज्ञानरज्जुना ।
समुत्पाद्य च चिद्वह्नि सर्वसंस्कारसंस्कृतम् ॥ ७६ ॥

सदैवोर्ध्वशिख दीप्त शुद्धं भगवदात्मकम् ।
नाभिकुण्डगतं ज्ञात्वा तेज. शक्त्युपबृंहितम् ॥ ७७ ॥

हृदब्जगगनोर्ध्वस्थं मूलमन्त्रं समुच्चरेत् ।
प्लुतध्यानसमोपेत सत्यान्तेऽस्मिन् लय गते ॥ ७८ ॥

निस्तरङ्गे परे प्राप्ते ब्रह्मस्थं पूर्णवारितैः ।
ध्यानस्रुवेण चाहृत्य सन्धिमार्गेऽमृताध्वना ॥ ७९ ॥

हृदयादवतीर्णस्य ज्वालाग्रावस्थितस्य च।
मन्त्रनाथस्य शिरसि वसुधारामिव क्षिपेत् ॥ ८० ॥

चिदग्निमेव सन्तार्य ज्वालाग्रावस्थित प्रभुम्।
हृद्व्जकर्णिकान्तस्थं भूयो भाव्याहुतिक्रिया. ॥ ८१ ॥

समाप्य विधिवत् पूजामपराङ्गे हरि स्थितम्।
स्वमन्त्रेणार्चयित्वाऽथ होमान्त भावनामृतै. ॥ ८२ ॥

तदन्ते यन्त्ररूपस्य मुखद्वयगतस्य च।
यन्त्रसंघस्य पूर्णान्तं कृत्वा सन्तर्पण तत ॥ ७३ ॥

विष्टरस्थं यजेद्बाह्यं त्वर्चारूपमुखद्वये।
मूर्तैरर्घ्यादिभिर्भोगैर्विधिवत्समुपाहृतै. ॥ ८४ ॥

प्राग्वदर्घ्यादिपात्राणा पूजन स्थापन तथा।
देहविन्यस्तमन्त्राणा गर्भद्वारस्थपूजनम् ॥ ८५ ॥

धातारं च विधातारं प्रचण्डं चण्डपूर्वकम्।
पूर्वपश्चिमयोर्वाह्यमण्टपद्वारयो. क्रमात् ॥ ८६ ॥

जयं च विजय चाथ सुभद्रं चाथ भद्रकम्।
सूर्याचन्द्रमसौ पूज्यौ दक्षेतरगवाक्षयोः ॥ ८७ ॥

कृत्वैवं द्वारयागं तु प्रविश्याभ्यन्तर तत।
आधारशक्तेरारभ्य यन्त्रविष्टरपश्चिमम् ॥ ८८ ॥

मन्त्रमासनमभ्यर्च्य गणनाथादिकं तथा।
प्रतिष्ठितस्य देवस्य कुर्यादावाहनं तत ॥ ८९ ॥

विम्बहृत्कमलाकाशाच्चैतन्यममल परम्।
प्रकाशानन्दरूपं च नित्योदितमनूपमम् ॥ ९० ॥

कर्णिकामध्यमाश्रित्य निविष्टमनुभावयेत्।
मूलमन्त्रं समुच्चार्य प्रबुद्ध भास्वर तत ॥ ९१ ॥

मन्त्रन्यासं ततः कुर्याद्यथा देहे स्वके तथा।
स्थानेषु हृदयादीनि चक्राद्यस्त्रवराणि च ॥ ९२ ॥

भूषणादीनि विन्यस्य मस्तकादि समानि च।
रत्नराशिप्रकाशानि लयाख्येनार्चयेत्तत. ॥ ९३ ॥

कर्णिकादिषु यन्त्रस्थान् भास्वद्रूपास्तथैव च।
आसनाद्यैश्च सांस्पर्शैर्हृदयंगमपश्चिमै ॥ ९४ ॥

प्रीणयित्वा विधानेन मूर्तिसङ्घसमन्वितम्।
जप्त्वा मन्त्र यथाशक्ति तन्निवेद्य यथा पुरा ॥ ९५ ॥

पाश्चात्ययन्त्रमध्यस्थमेवं नरहरि तत.।
साङ्गं सपरिवारं च सयन्त्रार्ण समर्चयेत् ॥ ९६ ॥

इति सङ्क्षेपत. प्रोक्तं महायन्त्रार्चन परम्।
प्रीणयेदग्निमध्यस्थं समिद्भि प्रागुदीरितै. ॥ ९७ ॥

अभीष्टफलसिध्यर्थं काम्यैरपि विशेषत.।

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे सोदर्शनमहायन्त्रे बाह्याभ्यन्तरयागनिर्णयो नाम पञ्चविंशोऽध्याय ।

श्रीः

षड्विंशोऽध्यायः ॥

सनक —

पञ्चरात्रार्थतत्वज्ञ ! भगवन् ! भविना प्रिय !
मय्यनुग्रहबुद्ध्या त्वमग्निमध्यगतार्चनम् ॥ १ ॥

यथाविधि समाचक्ष्व सर्वसिद्धिप्रसाधनम्।

शाण्डिल्य —

मुनीन्द्र ! सकलप्राज्ञ ! सिद्धिमोक्षप्रद शुभम् ॥ २ ॥

कुण्डमध्यगतं यागं शृणु वक्ष्ये समाहित ।
होमार्थं मण्टपं कुर्याद्विततं वह्निदिग्गतम् ॥ ३ ॥

धूमनिर्गमनोपेतं गवाक्षगणमण्डितम् ।
तन्मध्ये वेदिका कार्या चतुरश्रा चतुष्करा ॥ ४ ॥

द्वादशाङ्गुलमानोच्चा प्रासादासनलक्षणा ।
चक्राब्जलक्षणं कुण्डं तदूर्ध्वे कल्पयेच्छुभम् ॥ ५ ॥

मध्ये सूत्रत्रयं दद्यात् प्राक्प्रत्यग्दक्षिणोत्तरम् ।
हस्तद्वयेन, तन्मध्ये चतुरश्रं प्रकल्प्य च ॥ ६ ॥

एकादशाङ्गुलायामं सूत्रं संस्थाप्य मध्यतः ।
खातार्थं वृत्तमापाद्य बहिरावृतियोगतः ॥ ७ ॥

त्यजेदङ्गुलमोष्ठस्य, द्व्यङ्गुलं कर्णिकावने ।
अङ्गुलं केसराणां च, द्व्यङ्गुलं पत्रसन्ततेः ॥ ८ ॥

तदग्रस्याङ्गुलं ज्ञेयं, नाभेरेकाङ्गुलोन्नतम् ।
द्व्यङ्गुलं स्यादरक्षेत्रं नेमेरेकाङ्गुलं भवेत् ॥ ९ ॥

द्व्यङ्गुलं मेखलायाः स्यादेवमावृतियोगतः ।
मानमालानपर्यन्तं मेखलान्तं हृदि स्थितम् ॥ १० ॥

कृत्वाऽथ नेमिपर्यन्तं क्षेत्राणां वृत्तता नयेत् ।
मेखला सर्वबाह्यस्था स्यात्तुर्याश्रा यथा भवेत् ॥

समेखलं द्विहस्तं तन्निर्माणमधुना शृणु ।
खातार्थमन्तरावृत्तादन्तरं निखनेत् समम् ॥ १२ ॥

त्रिपादमर्धं पादं वा बाह्यतो दशनच्छदात् ।
साधयेत् कर्णिकादीनि नेम्यन्तानि यथाक्रमम् ॥

द्वादशाङ्गुलमानोच्चा कार्या स्यात् कर्णिकान्तरा ।
विस्तारसदृशोच्छ्राया बाह्यतः केसरान्विता ॥ १४ ॥

यथाभिमतसङ्ख्यानि पद्मपत्राणि साधयेत् ।
पद्मसङ्ख्यासमं क्षेत्रं महापद्मसमन्ततः ॥ १५ ॥

केसरभ्रमकुण्डेन पत्राग्रभ्रमणावधि ।
पक्षमध्यमसूत्राणि प्राक्प्रत्यग्दिक्षु पातयेत् ॥ १६ ॥

दलमध्यगसूत्रेण दलमध्योर्ध्वगामिना ।
दलमध्यप्रसादार्थं लाञ्छयेदर्धचन्द्रवत् ॥ १७ ॥

चन्द्रशृङ्गं च मध्यं च पत्राग्रे सङ्गतानि च ।
पक्षसूत्रेण पत्राग्रं जनयेत् कुलिशाग्रवत् ॥ १८ ॥

दलसङ्ख्यासमेतानि स्वक्षेत्राणि च साधयेत् ।
विभज्य दलवत् क्षेत्रं सूत्राण्यास्फालयेत्तथा ॥ १९ ॥

अष्टधा वाऽथ षोढा वा कृत्वैकैकं क्रमेण तु ।
सन्त्यज्य पार्श्वगौ भागौ बाह्यसूत्रस्य मध्यतः ॥ २० ॥

स्थापिताभ्यां च सूत्राभ्यां गदाभ्यामग्रमध्यमात् ।
मत्स्यवल्लाञ्छनं कुर्याद्यावन्मूलभ्रमावधि ॥ २१ ॥

प्रथयो नेमिभूमिष्ठाः कार्याश्चोर्ध्वेऽथवा बहिः ।
संसाधयेदथामन्त्रादिष्टकाभिर्मृदा सह ॥ २२ ॥

मेखलावधिपर्यन्तं नीचान्यङ्गानि मीलयेत् ।
विस्तारोच्छ्रायतुल्यानि समानि सुदृढानि च ॥ २३ ॥

कर्णिकाकेसरोर्ध्वस्था योनिः पिप्पलपत्रवत् ।
जिह्वया संस्पृशन्त्योऽ कार्या योन्युपमाश्रिता ॥ २४ ॥

केसरावनिमाक्रम्य पृष्ठतोर्ध्वाङ्गुलेन तु ।
पार्श्वयोर्मध्यसूत्रस्य बालचन्द्रद्वयोपमा ॥ २५ ॥

प्रोन्नता कर्णिकाभूमेः पृष्ठतश्चाङ्गुलेन तु ।
आमूलादग्रपर्यन्तं क्रमान्निम्ना गजोष्ठवत् ॥ २६ ॥

कोणेषु चैवं कुण्डस्य कार्यं शङ्खचतुष्टयम् ।
एवमेतत् समुद्दिष्टं बहुधा मानतो भवेत् ॥ २७ ॥

आद्वादशाङ्गुलान्मानादेकैकाङ्गुलवर्धनात् ।
द्विचतुर्हस्तपर्यन्तमेकाशीत्यधिकं शतम् ॥ २८ ॥

एतेष्वेकतरं प्रोक्तमन्येषामेवमेव हि ।
तत्साधनं विहा(धा?)य तत् अङ्गव्यूहं प्रकल्प्य च ॥

ततो यथोचितस्थाने होमद्रव्याणि विन्यसेत् ।
संस्कृत्य विधिवत् कुण्डं वह्निमुत्पादितं तथा ॥ ३० ॥

संस्कृताज्यस्य विप्रुड्भिः संस्पृशेदिन्धनादिकम् ।
सन्तर्पणं तथाग्नेश्च तस्मिन्मन्त्रासनादिकम् ॥ ३१ ॥

यन्त्रविष्टरसंस्थानमन्तराहवनं तथा ।
हृदयादवतारं च महायन्त्रस्य विष्टरे ॥ ३२ ॥

समिद्भिश्चाथ नित्याभिः काम्यैश्च हवनं तथा ।
खिष्टकृद्धवनं चाथ प्रायश्चित्ताहुतिं त्वपि ॥ ३३ ॥

पूर्णाहुतिं प्रधानं च यन्त्रस्थस्य विसर्जनम्।
हृदयस्थे प्रविश्याथ मण्टपं यजनास्पदम् ॥ ३४ ॥

समर्पणं च होमस्य पितॄणां तर्पणं त्वपि।
बलिदानं च भूतानामिष्टशिष्टोदनस्य च ॥ ३५ ॥

प्रदानं यज्ञशीलानां कारिणां भावितात्मनाम्।
अनुयागं च विधिवन्नैवेद्यप्राशनादिकम् ॥ ३६ ॥

पूर्ववत् सकलं कुर्याद्भोगमोक्षप्रसिद्धये।
अनेन यन्त्रराजेन शान्तिकादिषु कर्मसु ॥ ३७ ॥

ध्यानेन पूजितेनैव हुतेन जपितेन च।
समीहितानि पूर्यन्ते भक्तानां भावितात्मनाम् ॥ ३८ ॥

एकरूपमिदं ध्यानं वर्णितं शान्तिकादिषु।
होमे स्वाहान्तिमो मन्त्रः स्वभावादधिकं सदा ॥

शान्तिके पौष्टिके वौषट्पूर्णायामपि तादृशः।
आप्यायने वषट्प्रोक्तो हुमन्तो वश्यकर्मणि ॥ ४० ॥

फडन्तं क्षयविद्वेषप्रोत्सादनविधौ सदा।
हुमन्तं चारिविद्वेषे मोहने हुंफडन्तिमम् ॥ ४१ ॥

स्तम्भने वषडन्तं स्यान्नमोन्तो मोक्षकर्मणि।
अथो हिताय लोकानां राज्ञामपि विशेषतः ॥ ४२ ॥

पृच्छते नारदायैतदहिर्बुध्न्येन विस्तरात्।
यथोपदिष्टं विधिवत्तथा तत्र निरीक्ष्य च ॥ ४३ ॥

प्रयोक्तव्यं तु बहुधा, शान्तिकामी यथेच्छया।
कुर्यादेकमुखं यन्त्रं स्थाप्य संपूजयीत च ॥ ४४ ॥

नैमित्तिकानि काम्यानि नित्यानि यजनानि वै।
विशेषेणैव कार्याणि विना स्वापं महोत्सवम् ॥ ४५ ॥

न कर्मबिम्बानि तथा नित्यनैमित्तिकादिषु।
स्थितं यन्त्रं समाराध्यं स्थापितं मन्त्रवित्तमैः ॥ ४६ ॥

दिव्याद्यायतनाङ्गत्वे स्थापिते सति कुत्रचित्।
चलस्थिरविभागेन हविरन्तं समर्चयेत् ॥ ४७ ॥

द्वादश्यादिषु कालेषु पुण्येषु विविधेष्वपि।
इति सम्यक् समुद्दिष्टं महायन्त्रार्चनं परम् ॥ ४८ ॥

अदीक्षितानां विधिवदशिष्याणां दुरात्मनाम्।
गोपनीयं प्रयत्नेन त्वभक्तानां जनार्दने ॥ ४९ ॥

भावभक्तिसमेतानां वाच्यवाचकयोर्गुरौ।
शास्त्रे ज्ञानक्रियोपेते सात्त्विके वेदसंमिते ॥ ५० ॥

आस्तिक्यं जायते येषां तेषामेतत् प्रकाशय।

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां क्रियाकाण्डे सुदर्शनमहायन्त्रार्चने अग्निकार्यविधिर्नाम षट्त्रिंशोऽध्यायः ॥

Printed at THE KALYAN PRESS, 12 A Madura Road, Tiruchirapalli

॥ श्रीः ॥

॥ शुद्धयादिपत्रम् ॥

१. अध्याये

इश (3) संयुक्ते
39 अपरं
52 एवं
89 सात्वतादीनि
106 मात्र

२. अध्याये

12 अभ्युद्धृते
54 तितय
104 परमात्मानमेव च
122 तोयाभावे
123 प्रोद्धृतेन

३. अध्याये

21 तत्
29 चाक्षतै.
49 गोमयं.
54 स्वासन न्यस्य
61 तद्व्याप्ति
107 कुकराबुभौ
163 वाय्वाधारे
167 वायव्य विभवं
177 गन्धाद्येन
182 अभ्यसेत्
195 ज्वाला
207 जनित्वैव
209 स्वानन्दस्य
211 (आ) कारं
215 समन्त्र

४. अध्याये

9 वर्णास्तु

५. अध्याये

47 एतस्मात्
50 ह्यनन्ताख्या
80 भ्रमं
92 यत्स्वरूप
121 सस्मरेत्
124 (सम्प्लुतं)
128 ह्यय
135 भज मेऽच्युत
155 मागण

६. अध्याये

17 शलाभा
41 निक्षिपेत्
51 पुष्प
54 अभ्यर्च्य
95 विग्रहाम्
106 अवसानाभ्या
113 सदेवहि
144 समाश्रय
160 मण्डल
163 तत्वानि
, विन्यस्य
,, पीठे
174 लक्ष्म्यादीना
213 उद्यदादित्य
222 रशनादा
225 प्रावृद्जलद
238 अनेकमूर्ति
240 स्थितमायतने
285 विदिग्दलेषु
287 पृष्ठमन्त्रं
292 अङ्गान्यथा
313 प्रक्षाल्य
321 ऐक्षव
345 व्यजनेनैव
349 दद्यात्
353 रत्नप्रभोज्ज्वलैः
377 निवेदयेत्
400 प्रक्षाल्य
वाह्ययागोनाम

७. अध्याये

12 दैशिकीये
28 (वाथ)
37 शिखा
81 अपरस्मिन्
86 द्वितयं
106 श्रीकुक्षि
117 देवव्रत
126 वायव्ये
134 निष्ठा
191 लाक्षालक्तक
193 अग्निघृत
203 प्रदीप्ते
204 कृशानुर्नैव
205 हानिर्भवेत्
212 घृतेनापूर्य
216 पूर्णशीताशु
221 विवर्धनी
222 कर्मणि
224 तदर्थत
234 तर्पणात्
236 पूर्णा
274 भक्त्या
291 हलादो
354 पुरस्सरा.
372 स्नपने
390 यानं
425 तदा कृतिधरस्य
434 योगार्थिना च
470 कथ्यते
471 सुलीनच
472 पत्रिविधा
495 जयं
,, शय्यासनं
500 कर्मकृतंच
501 सर्व
,, फलसम्पत्ति
515 समभ्यर्च्या
520 कुडात्स्तराद्यस्य
पितृसविभाग—
नित्योत्स वादि-
सप्तमोऽध्याय ॥

८. अध्याये

2 गरुडस्य
6 मण्टप
16 वा गमनोन्मुखी
31 गणित्वक
38 सत्याख्या
49 व्यत्ययेन
58 उत्कटादय
, पूजनीया
64 वदस्व, सुनेऽधुना
83 (भेदेषु)
95 भूधरव्योम भूषित
96 स्वरवर्जित
104 मण्टपे
112 मृगयाद्युत्सवे
128 चतुर्भुजस्य
136 निमुक्त
139 पुनर्न्यस्य
153 विनायकादय.
,, विघ्नशा.
155 सर्वे
160 निष्ठ
161 अनिलवेगिनम
162 राजेश्वरा
164 तदाद्योक्तं

178 मण्टपात्
191 उपयोगयानि
196 लाञ्छितान्
197 मण्टपे

९. अध्याये

17 स्वान्हिकस्य
56 पूजनारम्भः
59 माध्यन्दिना
64 प्रत्यूष
141 तात्कालिकं अर्चनादि

१०. अध्याये

15 तन्मात्र
46 पतयश्चैव
132 त दृष्ट्वा
„ कमलासन
210 महात्मन.
212 परिस्तुतम्
215 निष्ठिस्तु
218 सहस्रार
220 स्रुक्
229 द्वादशाक्षर
245 प्रदं
258 भक्त्या
261 भावितात्मा
„ नृपोत्तम.
262 घृष्ट्वा
274 कृतकृत्य
277 पीठे
318 गन्धवे·
321 अनुवेधादि
339 एतत्तु
341 उन्मुषितस्य
352 अनुवेधक्रिया
354 पुरस्सरे

११ अध्याये

3 अन्तिमे
20 भुजाभ्यां
23 मकुटाद्यै.
26 गणित्रक
33 नानाभरण
82 पूर्वोक्त
98 सस्थितं
128 स्वरश्मि
165 अन्तक
169 सुधानन्दं
179 तर्जयन्त.
180 स्थानके
220 एतच्चतुष्पाणि
230 तदन्यद्वार
235 मन्त्रमुद्रा
242 अधोधृत.
325 प्रक्षालित
326 ऊर्ध्वाम्बुज
389 स्वयव्यक्त- नाम

१२. अध्याये

39 भक्ताना
50 षड्हस्त
58 विस्तारौ
65 इष्टकाः
78 अवताराश्च,
93 पीतं
104 हरीवेरेण
112 तेषा तु
117 कार्यस्तु
135 पूर्वोक्तं
145 शक्तीनां
170 स्तनादूर्ध्व
182 मलयक्षोद
202 देहग
276 समन्वितं
311 योज्यः
312 युक्ताः
350 स्तोत्रे.
371 त्वत्प्राप्ति. सा
374 परमेश्वर
378 आपत्काले
381 सुक्षेत्रवापिते

१३. अध्याये

71 आचार्य
74 (पदे)
175 क्षामयेत्
178 स्थित
195 उत्सव
199 एवं
212 अनन्त चतुर्द

१४. अध्याये

0 स्थलमध्ये
9 द्व्येक
12 आपद्यपि
22 प्राङ्मुखो वा
40 महत्वस्य
69 अर्धाङ्गुलो
73 पिधानै.
96 अन्यस्मिन्
116 सूत्राणा
121 समुद्भूत
130 वला
192 ज्ञौप
215 पञ्चकं
217 औपमानिक
231 चतुर्विंशति
252 मधुवातेति
255 अग्निमीले
332 गारुड
336 गदितानि
357 भूयश्चत्वारिंशत्
365 चतुरन्त.
371 हुत्वा
372 द्वारां
95 शुद्धानि तोयानि
397 तद्बहिः
408 पञ्चमे
421 मध्ये
429 हरिद्राशालि
449 यध्यकुम्भे तु
450 क्रमात्
452 श्रीवत्सं
453 पूर्णा कृत्वा
478 विष्णवासेति
476 स्नापयीत
480 शपथ्या
483 दधिक्राविष्ण
486 तैलैस्तु
492 ऋग्भ्या
513 यदि वै
516 संस्नाप्य
525 समर्घ्य
527 ततश्चोत्स वेत्येतदर्घ द्वि पतितम्।

१५. अध्याये

32 संस्थिता
42 मृद्भूतीगोमय
92 मण्टपात्
111 तालोन्नते
118 (वा)
170 मध्यवेद्या
„ ध्वजाष्टके
179 अथार्घ्य
„ समावृत.
187 विचक्रेति
197 बुद्ध्वैवं
205 बिम्बं
220 वर्णान्तरयुते
224 सिद्धार्थकादिकैः

271 स्नानार्थत
279 तिन्त्रिणी
280 अलङ्कृत्य
289 स्नान
300 सपरिच्छदं
358 पूर्वोदितै.
368 जितनामन्त्रेण
385 समापयेत्
403 चतुर्भुजस्य
405 मन्त्रास्तु
419 बलीयसा
429 तिलाज्यैः
431 अव्यय.
455 तत्पदात्
462 पदार्थस्य
473 व्यासं
475 निष्कलं चैव
,, उभयात्मकं
476 दिवसोदये
525 शिखरोद्देशे
561 देवं
571 धारिणीः
594 (वाहन) मन्त्रेण
628 ब्राह्म
629 भजेत्
646 स्पृश्यन्ते
661 सप्तभाक्तेऽग्रभागे
666 पङ्क्तया
718 बलोत्साह
747 ताम्र
836 न्यासत्रयं
838 संस्थाप्य
841 मूर्तिपाद्या वै
843 एकायनं
863 सहचैकायनीयैः
868 संपूजयेत्
905 उपेतात्
980 प्रश्ने विष्णो
981 कृत चक्रेति
982 आथर्वणिकान्
1002 स्नानावशिष्ट
1007 स्नानभोगान्ते
1024 अङ्गुलकोत्से धान्
1076 वाह्ये

१६. अध्याये

23 पञ्च
38 समायुक्तो
42 उत्तरफल्गुने
46 फाल्गुनादिषु
48 ध्वजस्यारोहणं
150 शते
163 शक्तिद्वादशकं
171 चतुर्थ्यन्तै.

षोडशो

188 यजमान उद्धृत्य
237 भ्रुकुटीभङ्ग
242 दैर्घ्यादधेन
249 गुलिक.
265 ऊर्वोर्मूल
267 अङ्घ्रिदैर्घ्याश्च
270 स्तनभ्रूलोचनेन तु
271 भ्रूयुगं
282 शतैरष्टाभि
317 भवेत्
319 अङ्गुलं
322 तत्सार.
366 सफलमूलकैः
405 फेणका
428 ध्वजमेव
454 ओमच्युत !
474 तद्दक्षिणे
475 स्नातं
521 षड्जर्षभौ
531 मरुद्गणा.

१७. अध्याये

7 कञ्चुकाद्ये.
9 मूलमूर्तिगतं
18 चतुर्भि
,, सप्तभिः
47 काललवात्
57 मौक्तिकै.
75 विन्यासे
103 विधानवित्
138 पत्तने
153 भवन.
159 अग्निरेव च
172 पञ्चाशत
174 पुण्डरीकायए
194 सर्वनेत्रानुगा
229 सहस्राणा
233 पञ्चशताना
236 अनुक्ताना
248 नूत्ते
263 देवेशं
302 कुम्भार्चन
318 सर्वाङ्
328 दर्शयित्वा
337 द्विकरायता
342 सूक्तेन
370 पात्र
374 कण्ठे भद्रं
399 यात्रावसानात्
407 तीर्थमासाद्य
408 सर्वतीर्थानि
411 निमज्जेत्
428 स्थित्वा
443 विनिवेश्य
493 सहस्तक
520 नोपद्वारे.
527 तदर्था
573 सिराभिस्तु

१८ अध्या

4 क्रमात्
24 हविर्वृद्धि
31 तथापि
34 इच्छानुरूपत.
38 कर्मण्यानि
51 फलं
52 लवण
,, पूर्ववत्
58 चतुर्दश
148 ब्राह्म
168 सर्प
186 कृमि

अष्टा

260 ताम्रजा.
273 विन्यसेत्
278 प्रक्षालनं
308 तस्मात्
321 आनीय
358 पाश्चात्यादि
385 उपपात्रगम्
388 रसवीर्यादि
397 एकमश
407 स्वकर्मसु
417 सति

१९. अध्याये

42 अवस्य
55 उत्सवार्थविम्बे
66 दत्तं भगवते
67 अन्येषामपि
69 प्रदानं
83 मूलशत
94 वद्धा
96 कौतुकबन्धन
109 पुण्याहवाचनै
149 वद्धध्वजपटे
151 गवादीना
159 तत्तत्पूजाविलोपने

160 वाहनगाधया
,, सग्रहेषु
169 वलि द्रव्यै.
170 व्यत्यासे
267 दोषद.
301 प्रसादनीय
334 प्राक्
335 आचार्य.
336 द्विज'
449 सति
553 देवो नैकेन
554 द्वादशाध्या
555 कर्मण्यभि
सन्धिपरै

२०. अध्याये
126 सैद्धायतने

२१. अध्याये
एकविशाध्याय:

२२. अध्याये
31 आलयाश्रयवर्तिन.
77 पञ्चगव्य

२३. अध्याये
29 मूलविस्तृते
106 दृष्टमानस
109 प्रथिगणेषु
149 हरितानि

महायन्त्रस्वरूपकथन

२४. अध्याये
3 त्वया प्राज्ञ'
12 जगच्चक्र
19 शक्ति
51 ऋत्याद्यर्णोपरि
62 अशीति तदन्ते
95 वर्णान्ते
116 अभिनिविष्टाना
117 पुष्टि

२५. अध्याये
1 मन्त्ररूप
13 राका

, यश
15 उन्मन्त्रे
83 मन्त्रसङ्घस्य

२६. अध्याये
20 क्रमेण
9 छन्दपूर्व
47 (अ ज)
50 सर्वशक्ति
51 अङ्कितल.
76 उद्धृता
26 कर्णिकाभूमि